# मत्स्य पुराणम् ।

महर्षि वेदव्यास प्रणीतम्

बि, ए उपाधि धारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

संस्कृत्य प्रकाशितम् ।

कलिकाता नगरे ।

सरस्वती यन्त्रे मुद्रितम् ।

इ. १८७६

# मत्स्यपुराणम् ।

श्रीगणेशाय नमः ।

प्रचण्डताण्डवाटोपे प्रक्षिप्ता येन दिग्गजाः ।
भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः ॥
पातालादुत्पतिष्णोर्मकरवसतयो यस्य पुच्छाभिघाता-
दूर्ध्वं ब्रह्माण्डखण्डव्यतिकरविहितव्यत्ययेनापतन्ति
विष्णोर्मत्स्यावतारे सकलवसुमतीमण्डलं व्यश्नुवानं
तस्यास्योदीरितानां ध्वनिरपहरतादश्रियं वः श्रुतीनाम् ॥ २ ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ३ ॥
अजोऽपि यः क्रियायोगान्नारायण इति स्मृतः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयम्भुवे ॥ ४ ॥
सूतमेकाग्रमासीनं नैमिषारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दीर्घसंहिताम् ॥ ५ ॥
प्रवृत्तासु पुराणीषु धर्म्यासु ललितासु च ।
कथासु शौनकाद्यास्तु अभिनन्द्य मुहुर्मुहुः ॥ ६ ॥
कथितानि पुराणानि यान्यस्माकं त्वयानघ ! ।
तान्येवामृतकल्पानि श्रोतुमिच्छामहे पुनः ॥ ७ ॥
कथं ससर्ज भगवान् लोकनाथश्चराचरम् ।
कस्माच्च भगवान्विष्णुर्मत्स्यरूपत्वमाश्रितः ॥ ८ ॥
भैरवत्वं भवस्यापि पुरारित्वञ्च गद्यते ।

कस्य हेतोः कपालित्वं जगाम वृषभध्वजः॥
सर्वमेतत्समाचक्ष्व सूत! विस्तरशः क्रमात्।
त्वद्वाक्येनामृतस्येव न तृप्तिरिह जायते॥ १०॥
उवाच। पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः!।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः॥ ११॥
पुरा राजा मनुर्नाम चीर्णवान् विपुलन्तपः।
पुत्रे राज्यं समारोप्य क्षमावान् रविनन्दनः॥ १२॥
मलयस्यैकदेशे तु सर्वात्मगुणसंयुतः।
समदुःखसुखो वीरः प्राप्तवान् योगमुत्तमम्॥ १३॥
बभूव वरदश्चास्य वर्षायुतशते गते।
वरम्वृणीष्व प्रोवाच प्रीतः स कमलासनः॥ १४॥
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम्।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम्॥ १५॥
भूतग्रामस्य सर्वस्य स्थावरस्य चरस्य च।
भवेयं रक्षणायालं प्रलये समुपस्थिते॥ १६॥
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत।
पुष्पवृष्टिः सुमहती खात्पपात सुरार्पिता॥ १७॥
कदाचिदाश्रमे तस्य कुर्वतः पितृतर्पणम्।
पपात पाण्योरुपरि शफरी जलसंयुता॥ १८॥
दृष्ट्वा तच्छफरीरूपं स दयालुर्महीपतिः।
रक्षणायाकरोद्यत्नं स तस्मिन् करकोदरे॥ १९॥
अहोरात्रेण चैकेन षोडशाङ्गुलविस्तृतः।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत्॥ २०॥
स तमादाय मणिके प्राक्षिपज्जलचारिणम्।

तत्रापि चैकरात्रेण हस्तत्रयमवर्धत ॥ २१ ॥
पुनः प्राहार्तनादेन सहस्रकिरणात्मजम् ।
समत्सरः पाहि पाहीति त्वामहं शरणङ्गतः ॥ २२ ॥
ततः स कूपे तं मत्स्यं प्राहिणोद्रविनन्दनः ।
यदा न माति तत्रापि कूपे मत्स्यः सरोवरे ॥ २३ ॥
क्षिप्तोऽसौ पृथुतामागात्पुनर्योजनसम्मिताम् ।
तत्राप्याह पुनर्दीनः पाहि पाहि नृपोत्तम ! ॥ २४ ॥
ततः स मनुना क्षिप्तो गङ्गायामप्यवर्धत ॥
यदा तदा समुद्रे तं प्राक्षिपन्मेदिनीपतिः ॥ २५ ॥
यदा समुद्र मखिलं व्याप्यासौ समुपस्थितः ।
तदा प्राह मनुर्भीतः कोऽपि त्वमसुरेतरः ॥ २६ ॥
अथवा वासुदेवस्त्वमन्य ईदृक्कथं भवेत् ।
योजनायुतविंशत्या कस्य तुल्यं भवेद्वपुः ॥ २७ ॥
ज्ञातस्त्वं मत्स्यरूपेण मा खेदयसि केशव ! ।
हृषीकेश ! जगन्नाथ ! जगद्धाम ! नमोऽस्तु ते ॥ २८ ॥
एवमुक्तः स भगवान्मत्स्यरूपी जनार्दनः ।
साधु साध्विति चोवाच सम्यग् ज्ञातस्त्वयानघ ! ॥ २९ ॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ! ।
भविष्यति जले मग्ना सशैलवनकानना ॥ ३० ॥
नौरियं सर्वदेवानां निकायेन विनिर्मिता ।
महाजीवनिकायस्य रक्षणार्थं महीपते ! ॥ ३१ ॥
स्वेदाण्डजोद्भिज्जा ये वै ये च जीवा जरायुजाः ॥
अस्यां निधाय सर्वांस्ताननाथान् पाहि सुव्रत ! ॥ ३२ ॥
युगान्तवाताभिहता यदा भवति नौर्नृप ! ।

शृङ्गेऽस्मिन्मम राजेन्द्र ! तदेमां संयमिष्यसि ॥ ३३ ॥
ततो लयान्ते सर्वस्य स्थावरस्य चरस्य च ।
प्रजापतिस्त्वं भविता जगतः पृथिवीपते ! ॥ ३४ ॥
एवं कृतयुगस्यादौ सर्वज्ञो धृतिमान्नृपः ।
मन्वन्तराधिपश्चापि देवपूज्यो भविष्यसि ॥ ३५ ॥

द्वितीयोऽध्यायः ।

---

सूत उवाच । एवमुक्तो मनुस्तेन पप्रच्छ मधुसूदनम् ।
भगवन् ! कियद्भिर्वर्षैर्भविष्यत्यन्तरक्षयः ॥ १ ॥
सत्त्वानि च कथं नाथ ! रक्षिष्ये मधुसूदन ! ।
त्वया सह पुनर्योगः कथं वा भविता मम ॥ २ ॥
मत्स्य उवाच । अद्य प्रभृत्यनावृष्टिर्भविष्यति महीतले ।
यावद्वर्षशतं साग्रन्दुर्भिक्षमशुभावहम् ॥ ३ ॥
ततोऽल्पसत्त्वक्षयदा रश्मयः सप्त दारुणाः ।
सप्त सप्तेर्भविष्यन्ति प्रतप्ताङ्गारवर्षिणः ॥ ४ ॥
और्वानलोऽपि विकृतिङ्गमिष्यति युगक्षये ।
विषाग्निश्चापि पातालात्सङ्कर्षणमुखच्युतः ॥
भवस्यापि ललाटोत्थतृतीयनयनानलः ॥ ५ ॥
त्रिजगन्निर्दहन् क्षोभं समेष्यति महामुने ! ।
एवं दग्धा मही सर्वा यदास्याद्भस्मसन्निभा ॥ ६ ॥
आकाशमूष्मणा तप्तम्भविष्यति परन्तप ! ।
ततः सदेवनक्षत्रं जगद्यास्यति संक्षयम् ॥ ७ ॥
सम्वर्तो भीमनादश्च द्रोणश्चण्डो बलाहकः ।
विद्युत्पताकः शोणस्तु सप्तैते लयवारिदाः ॥ ८ ॥

अग्निप्रस्वेदसम्भूतां प्लावयिष्यन्ति मेदिनीम् ।
समुद्राः क्षोभमागत्य चैकत्वेन व्यवस्थिताः ॥ ९ ॥
एतदेकार्णवं सर्वं करिष्यन्ति जगत्त्रयम् ।
वेदनावमिमां गृह्य सत्त्वबीजानि सर्वशः ॥ १० ॥
आरोप्य रज्जुयोगेन मत्प्रदत्तेन सुव्रत ! ।
संयम्य नावं मच्छृङ्गे मत्प्रभावाभिरक्षितः ॥ ११ ॥
एकः स्थास्यसि देवेषु दग्धेष्वपि परन्तप ! ।
सोमसूर्यावहं ब्रह्मा चतुर्लोकसमन्वितः ॥ १२ ॥
नर्मदा च नदी पुण्या मार्कण्डेयो महान् ऋषिः ।
भवो वेदाः पुराणञ्च विद्याभिः सर्वतोवृतम् ॥ १३ ॥
त्वया सार्द्धमिदं विश्वं स्थास्यत्यन्तरसंक्षये ।
एवमेकार्णवे जाते चाक्षुषान्तरसंक्षये ॥ १४ ॥
वेदान् प्रवर्त्तयिष्यामि त्वत्सर्गादौ महीपते ! ।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ॥ १५ ॥
मनुरप्यास्थितो योगं वासुदेवप्रसादजम् ।
अभ्यसन् यावदाभूत संप्लवं पूर्वसूचितम् ॥ १६ ॥
काले यथोक्ते संजाते वासुदेवमुखोद्गते ।
शृङ्गी प्रादुर्बभूवाथ मत्स्यरूपो जनार्द्दनः ॥ १७ ॥
भुजङ्गो रज्जुरूपेण मनोः पार्श्वमुपागमत् ।
भूतान् सर्वान् समाकृष्य योगेनारोप्य धर्म्मवित् ॥ १८ ॥
भुजङ्गरज्ज्वा मत्स्यस्य शृङ्गे नावमयोजयत् ।
उपर्य्युपस्थितस्तस्याः प्रणिपत्य जनार्द्दनम् ॥ १९ ॥
आभूतसंप्लवे तस्मिन्नतीते योगशायिना ।
पृष्टेन मनुना प्रोक्तं पुराणं मत्स्यरूपिणा ।

द्वितीयोऽध्यायः ।

तदिदानीं प्रवक्ष्यामि शृणुध्व मृषिसत्तमाः । ॥ ३२ ॥
यन्नवद्भिः पुरा पृष्टः सृष्ट्यादिक महद्भिजाः । ।
तदेवैकार्णवे तस्मिन् मनुः पप्रच्छ केशवम् ॥ २१ ॥
मनुरुवाच । उत्पत्तिं प्रलयञ्चैव वंशान्मन्वन्तराणि च ।
वंश्यानुचरितञ्चैव भुवनस्य च विस्तरम् ॥ २२ ॥
दानधर्म्मविधिञ्चैव श्राद्धकल्पञ्च शाश्वतम् ।
वर्णाश्रमविभागञ्च तथेष्टापूर्त्तसंज्ञितत् ॥ २२ ॥
दैवतानां प्रतिष्ठादि यच्चान्यद्विद्यते भुवि ।
तत्सर्वं विस्तरेण त्वं धर्म्मं व्याख्यातु मर्हसि ॥२४॥
मत्स्य उवाच । महाप्रलयकालान्त एतदासीत्तमोमयम् ।
प्रसुप्तमिव चातर्क्यमप्रज्ञात मलक्षणम् ॥ २५ ॥
अविज्ञेय मविज्ञातं जगत् स्थास्नु चरिष्णु च ।
ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्म्मणाम् ॥२६॥
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः ।
योऽतीन्द्रियः परोव्यक्तादणुर्ज्यायान् सनातनः ।
नारायण इति ख्यातः सएकः स्वयमुद्बभौ ॥२७॥
यः शरीरादभिध्याय सिसृक्षुर्विविधं जगत् ।
अपएव ससर्जादौ तासु वीजमवासृजत् ॥ २८ ॥
तदेवाण्डं समभवद्धेमरूप्यमयं महत् ॥
संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम् ॥ २९ ॥
प्रविश्यान्त र्महातेजाः स्वयमेवात्मसम्भवः ।
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुनः ॥३०॥
तदन्तर्भगवानेष सूर्य्यः समभवत् पुरा ।
आदित्यश्चादिभूतत्वात् ब्रह्मा ब्रह्म पठन्नभूत् ॥३१॥

दिवं भूमिं समकरोत्तदण्डशकलद्वयम् ।
स चाकरोद्दिशः सर्व्वा मध्ये व्योम च शाश्वतम् ॥३२॥
जरायुर्मेरुमुख्याश्च शैलास्तस्याभवंस्तदा ।
यदुल्बन्तदभूम्मेघस्तडित्सङ्घातमण्डलम् ॥ ३३ ॥
नद्योऽण्डनाम्नः सम्भूताः पितरो मनवस्तथा ।
सप्त येऽमी समुद्राश्च तेऽपि चान्तर्जलोद्भवाः ।
लवणेक्षुसुराद्याश्च नानारत्नसमन्विताः ॥ ३४ ॥
स सिसृक्षुरभूद्देवः प्रजापतिररिन्दम ! ।
तत्तेजसश्च तत्रैव मार्त्तण्डः समजायत ॥ ३५ ॥
मृतेऽण्डे जायते यस्मान्मार्त्तण्डस्तेन संस्मृतः ।
रजोगुणमयं यत्तद्रूपं तस्य महात्मनः ।
चतुर्मुखः स भगवानभूल्लोकपितामहः ॥ ३६ ॥
येन सृष्टं जगत्सर्वं सदेवासुरमानुषम् ।
तमवेहि रजोरूपं महत्सत्त्वमुदाहृतम् ॥ ३७ ॥

अथ तृतीयोऽध्यायः ।

मनुरुवाच । चतुर्मुखत्वमगमत्कस्माल्लोकपितामहः ।
कथं तु लोकानसृजत् ब्रह्मा ब्रह्मविदाम्वरः ॥ १ ॥
मत्स्य उवाच । तपश्चचार प्रथमममराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥ २ ॥
पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥ ३ ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।

मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः॥ ४॥
वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः।
मनसः पूर्वसृष्टा वै जाता यत्तेन मानसाः॥ ५॥
मरीचिरभवत् पूर्वं ततोऽत्रिर्भगवान् ऋषिः।
अङ्गिराश्चाभवत्पश्चात् पुलस्त्यस्तदनन्तरम्॥ ६॥
ततः पुलहनामा वै ततः क्रतुरजायत।
प्रचेताश्च ततः पुत्रो वशिष्ठश्चाभवत् पुनः॥ ७॥
पुत्रो भृगुरभूत्तद्वन्नारदोऽप्यचिरादभूत्।
दशेमान् मानसान् ब्रह्मा मुनीन् पुत्रानजीजनत्॥ ८॥
शारीरानथ वक्ष्यामि मातृहीनान् प्रजापतेः।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत॥ ९॥
धर्म्मस्तनान्तादभवत् हृदयात् कुसुमायुधः।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः॥ १०॥
बुद्धेर्मोहः समभवदहङ्कारादभून्मदः।
प्रमोदश्चाभवत्कण्ठान्मृत्युर्लोचनतो नृप!॥ ११॥
भरतः करमध्यात्तु ब्रह्मसूनुरभूत्ततः।
एते नव! सुता राजन्! कन्या च दशमी पुनः।
अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता॥ १२॥
मनुरुवाच। बुद्धेर्मोहः समभवदिति यत्परिकीर्त्तितम्।
अहङ्कारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते॥ १३॥
मत्स्य उवाच। सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता॥ १४॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः।

एतदेव प्रजासृष्टिं करोति विकरोति च ॥ १५ ॥
गुणेभ्यः क्षोभमाणेभ्यस्त्रयो देवा विजज्ञिरे।
एकामूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः ॥ १६ ॥
स विकारात् प्रधानात्तु महत्तत्त्वं प्रजायते।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥१७॥
अहङ्कारश्च महतो जायते मानवर्द्धनः।
इन्द्रियाणि ततः पञ्च वक्ष्ये बुद्धिवशानि तु।
प्रादुर्भवन्ति चान्यानि तथा कर्म्मवशानि तु ॥ १८ ॥
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका च यथाक्रमम्।
पायूपस्थं हस्तपादं वाक् चेतीन्द्रियसंग्रहः ॥ १९ ॥
शब्दः स्पर्शश्च रूपञ्च रसोगन्धश्च पञ्चमः।
उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः ॥ २० ॥
मन एकादशं तेषां कर्म्मबुद्धि गुणान्वितम्।
इन्द्रियावयवाः सूक्ष्मास्तस्य मूर्त्तिं मनीषिणः ॥२१॥
श्रयन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम्।
शरीरयोगाज्जीवोऽपि शरीरी गद्यते बुधैः ॥ २२ ॥
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया।
आकाशं शब्दतन्मात्रा दभूच्छब्दगुणात्मकम् ॥२३॥
आकाशविकृतेर्वायुः शब्दस्पर्शगुणोऽभवत्।
वायोश्च स्पर्शतन्मात्रात्तेजश्चाविरभूत्ततः ॥ २४ ॥
त्रिगुणं तद्विकारेण तच्छब्दस्पर्शरूपवत्।
तेजोविकारादभवद्वारि राजंश्चतुर्गुणम् ॥ २५ ॥
रसतन्मात्रसम्भूतं प्रायोरसगुणात्मकम्।
भूमिस्तु गन्धतन्मात्रादभूत्पञ्चगुणान्विता ॥ २६ ॥

प्रायोगन्धगुणा सा तु बुद्धिरेषा गरीयसी ।
एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः ॥ १७ ॥
ईश्वरेच्छावशः सोऽपि जीवात्मा कथ्यते बुधैः ।
एवं षड्विंशकं प्रोक्तं शरीर इह मानवे ॥ १८ ॥
सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते ।
एतत्तत्त्वात्मकं कृत्वा जगद्वेधा अजीजनत् ॥ १९ ॥
सावित्रीं लोकसृष्ट्यर्थं हृदि कृत्वा समास्थितः
ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ॥ २० ॥
स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् ।
शतरूपा च सा ख्याता सावित्री च निगद्यते ॥ २१ ॥
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! ।
ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् ॥ २२ ॥
दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः ।
अहो रूपमहोरूपमिति चाह प्रजापतिः ॥ २३ ॥
ततो वशिष्ठप्रमुखाः भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकनादृते ॥ २४ ॥
अहो रूपमहोरूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रान्तां पुनरेवाभ्यलोकयत् ॥ २५ ॥
अथ प्रदक्षिणं चक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया ॥ २६ ॥
आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ।
विस्मयस्फुरदोष्ठञ्च पाश्चात्यमुदगात्ततः ॥ २७ ॥
चतुर्थमभवत्पश्चाद्वामं कामशरातुरम् ।
ततोऽन्यदभवत्तस्य कामातुरतया तथा ॥ २८ ॥

उत्पतन्त्यास्तदाकाशे आलोकनकुतूहलात्।
स्रष्टुर्य्यत् कृतं तेन तपः परमदारुणम्॥ ३९॥
तत्सर्व्वं नाशमगमत् स्वसुतोपगमेच्छया।
तेनोर्द्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः।
आविर्भवज्जटाभिश्च तद्वक्त्रञ्चावृणोत्प्रभुः॥ ४०॥
ततस्तानब्रवीत् ब्रह्मा पुत्त्रानात्मसमुद्भवान्।
प्रजाः सृजध्वमभितः सदेवासुरमानुषीः॥ ४१॥
एवमुक्ता स्ततः सर्व्वे ससृजुर्व्विविधाः प्रजाः।
गतेषु तेषु सृष्ट्यर्थं प्रणामावनतामिमाम्॥ ४२॥
उपयेमे स विश्वात्मा शतरूपामनिन्दिताम्।
सम्बभूव तया सार्द्धमतिकामातुरो विभुः।
सलज्जाञ्चकमे देवः कमलोदरमन्दिरे॥ ४३॥
यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः।
ततः कालेन महता तस्याः पुत्त्रोऽभवन्मनुः॥ ४४॥
स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्।
तद्रूपगुणसामान्यादधिपूरुष उच्यते॥ ४५॥
वैराजा यत्र ते जाता बहवः शंसितव्रताः।
स्वायम्भुवा महाभागाः सप्त सप्त तथापरे॥ ४६॥
स्वारोचिषाद्याः सर्व्वे ते ब्रह्मतुल्यस्वरूपिणः।
औत्तमिप्रमुखा स्तद्वद्येषान्त्वं सप्तमोऽधुना॥ ४७॥

अथ चतुर्थोऽध्यायः॥

---

मनुरुवाच। अहो कष्टतरञ्चैतदङ्गजागमनं विभो!।
कथं न दोषमगमत्कर्म्मणानेन पद्मभूः॥ १॥

परस्परञ्च सम्बन्धः सगोत्राणामभूत्कथम् ।
वैवाहिकस्तत्सुतानाञ्छिन्धि मे संशयं विभो ! ॥१॥

मत्स्य उवाच । दिव्येयमादिसृष्टिस्तु रजोगुणसमुद्भवा ।
अतीन्द्रियेन्द्रिया तद्वदतीन्द्रियशरीरिका ॥ २ ॥
दिव्यतेजोमयी भूप ! दिव्यज्ञानसमुद्भवा ।
नमर्त्यैरभितः शक्या वक्तुं वै मांसचक्षुभिः ॥ ४ ॥
यथा भुजङ्गाः सर्पाणामाकाशं विश्वपक्षिणाम् ।
विदन्ति मार्गं दिव्यानां दिव्या एव न मानवाः ॥५॥
कार्य्याकार्य्ये न देवानां शुभाशुभफलप्रदे ।
यस्मात्तस्मान्न राजेन्द्र ! तद्विचारो नृणां शुभः ॥ ६ ॥
अन्यच्च सर्ववेदानामधिष्ठाता चतुर्मुखः ।
गायत्री ब्रह्मणस्तद्वदङ्गभूता निगद्यते ॥ ७ ॥
अमूर्तं मूर्तिमद्वापि मिथुनं तत्प्रचक्षते ।
विरिञ्चिर्यत्र भगवांस्तत्र देवी सरस्वती ।
भारती यत्र यत्रैव तत्र तत्र प्रजापतिः ॥ ८ ॥
यथातपो न रहितश्छायया दृश्यते क्वचित् ।
गायत्री ब्रह्मणः पार्श्वं तथैव न विमुञ्चति ॥ ९ ॥
वेदराशिः स्मृतो ब्रह्मा सावित्रीतदधिष्ठिता ।
तस्मान्न कश्चिद्दोषः स्यात् सावित्रीगमने विभो ॥१०॥
तथापि लज्जावनतः प्रजापतिरभूत् पुरा ।
स्वसुतोपगमात् ब्रह्मा शशाप कुसुमायुधम् ॥ ११ ॥
यस्मान्ममापि भवता मनः संक्षोभितं शरैः ।
तस्मात्त्वद्देहमचिराद्रुद्रो भस्मीकरिष्यति ॥ १२ ॥
ततः प्रसादयामास कामदेवश्चतुर्मुखम् ॥

न मामकारणे शप्तुं त्वमिहार्हसि मानद ! ॥ १३ ॥
अहमेवंविधः सृष्टस्त्वयैव चतुरानन ! ।
इन्द्रियक्षोभजनकः सर्वेषामेव देहिनाम् ॥ १४ ॥
स्त्रीपुंसोरविचारेण मया सर्वत्र सर्वदा ।
क्षोभ्यं मनः प्रयत्नेन त्वयैवोक्तं पुरा विभो ! ॥ १५ ॥
तस्मादनपराधेन त्वया शप्तस्तथा विभो ! ।
कुरु प्रसादं भगवन् ! स्वशरीराप्तये पुनः ॥ १६ ॥
ब्रह्मोवाच । वैवस्वतेऽन्तरे प्राप्ते यादवान्वयसम्भवः ।
रामो नाम यदा मर्त्यो मत्सत्त्वबलमाश्रितः ॥ १७ ॥
अवतीर्य्यासुरध्वंसी द्वारकामधिवत्स्यति ।
तद्भ्रातुस्तत्समस्य त्वन्तदा पुत्रत्वमेष्यसि ॥ १८ ॥
एवं शरीरमासाद्य भुक्त्वा भोगानशेषतः ।
ततो भरतवंशान्ते भूत्वा वत्सनृपात्मजः ॥ १९ ॥
विद्याधराधिपत्यं च यावदाभूतसंप्लवम् ।
सुखानि धर्म्मतः प्राप्य मत्समीपङ्गमिष्यसि ॥ २० ॥
एवं शापप्रसादाभ्यामुपेतः कुसुमायुधः ।
शोकप्रमोदाभियुतो जगाम स यथागतम् ॥ २१ ॥
मनुरुवाच । कोऽसौ यदुरिति प्रोक्तो यद्वंशे कामसम्भवः ।
कथञ्च दग्धो रुद्रेण किमर्थं कुसुमायुधः ॥ २२ ॥
भरतस्यान्वये कस्य का च सृष्टिः पुराभवत् ।
एतत्सर्वं समाचक्ष्व मूलतः संशयो हि मे ॥ २३ ॥
मत्स्य उवाच । या सा देहार्धसम्भूता गायत्री ब्रह्मवादिनी ।
जननी या मनोर्देवी शतरूपा शतेन्द्रिया ॥ २४ ॥

रतिर्मनस्तपो बुद्धिर्महदादिसमुद्भवः।
ततः स शतरूपायां सप्तापत्यान्यजीजनत् ॥ २५ ॥
ये मरीच्यादयः पुत्रा मानसास्तस्य धीमतः।
तेषामयमभूल्लोकः सर्वज्ञानात्मकः पुरा ॥ २६ ॥
ततोऽसृजद्वामदेवं त्रिशूलवरधारिणम्।
सनत्कुमारं च विभुं पूर्वेषामपि पूर्वजम् ॥ २७ ॥
वामदेवस्तु भगवान सृजन् मुखतो द्विजान्।
राजन्यान सृजद्बाह्वोर्विट् शूद्रानूरुपादयोः ॥ २८ ॥
विद्युतोऽशनि मेघांश्च रोहितेन्द्र धनूंषि च।
छन्दांसि च ससर्जादौ पर्जन्यं च ततः परम् ॥२९॥
ततः साध्यगणानीशस्त्रिनेत्रानसृजत् पुनः।
कोटीश्च चतुराशीतिर्जरामरणवर्जिताः ॥ ३० ॥
वामोऽसृजन्न मर्त्यांस्तान् ब्रह्मणा विनिवारितः।
नैवं विधा भवेत् सृष्टिर्जरामरणवर्जिता ॥ ३१ ॥
शुभाशुभात्मिका यातु सैव सृष्टिः प्रशस्यते।
एवं स्थितः स तेनादौ सृष्टे स्थाणुरतोऽभवत् ॥३२॥
स्वायम्भुवो मनुर्धीमांस्तपस्तप्त्वा सुदुश्चरम्।
पत्नीमेवापरूपाख्यामनन्तीं नाम नामतः ॥ ३३ ॥
प्रियव्रतोत्तानपादौ मनुस्तस्यामजीजनत्।
धर्मस्य कन्या चतुरा सुनृता नाम भामिनी ॥३४॥
उत्तानपादात्तनयान् प्राप मन्थरगामिनी।
अपस्यतिमपस्यन्तं कीर्त्तिमन्तं ध्रुवं तथा ॥ ३५ ॥
उत्तानपादोऽजनयत् सुनृतायां प्रजापतिः।
ध्रुवो वर्षसहस्राणि त्रीणि कृत्वा तपः पुरा ॥ ३६ ॥

दिव्यमाप ततः स्थानमचलं ब्रह्मणो वरात्।
तमेव पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः॥ ३७॥
धन्या नाम मनोः कन्या ध्रुवाच्छिष्टमजीजनत्।
अग्निकन्या तु सुच्छाया शिष्टात्सा सुषुवे सुतान्॥३८॥
कृपं रिपुं जयं वृत्तं वृकं च वृकतेजसम्।
चक्षुषं ब्रह्मदौहित्र्यां विरिण्यां स रिपुञ्जयः॥ ३९॥
वीरणस्यात्मजायान्तु चक्षुर्मनुमजीजनत्॥
मनुर्वै राजकन्यायां नड्वलायां सचाक्षुषः॥ ४०॥
जनयामास तनयान्दश शूरानकल्मषान्।
ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् हविः॥ ४१॥
अग्निष्टुदतिरात्रश्च सुद्युम्नश्चापराजितः।
अभिमन्युस्तु दशमो नड्वलायामजायत॥ ४२॥
ऊरोरजनयत् पुत्रान् षडाग्नेयी तु सुप्रभान्।
अग्निं सुमनसं ख्यातिं क्रतुमङ्गिरसङ्गयम्॥ ४३॥
पितृकन्या सुनीथा तु वेनमङ्गादजीजनत्।
वेनमन्यायिनं विप्रा ममन्थुस्तत्करादभूत्।
पृथुर्नाम महातेजाः स पुत्रौ द्वावजीजनत्॥ ४४॥
अन्तर्धानस्तु मारीचं शिखण्डिन्यामजीजनत्।
हविर्धानात् षडाग्नेयी धिषणाऽजनयत् सुतान्।
प्राचीनवर्हिषं साङ्गं यमं शुक्रं बलं शुभम्॥ ४५॥
प्राचीनवर्हिर्भगवान् महानासीत्प्रजापतिः।
हविर्धानाः प्रजास्तेन बहवः सम्प्रवर्त्तिताः॥ ४६॥
सवर्णायान्तु सामुद्र्यान्दशाधत्त सुतान् प्रभुः।
सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः॥ ४७॥

तस्तपोरक्षिता वृक्षा बभुर्लोके समन्ततः ।
देवादेशाच्च तानग्निरदहद्द्रविनन्दन ! ॥ ४८ ॥
सोमकन्याऽभवत्पत्नी मारीषा नाम विश्रुता ।
तेभ्यस्तु दक्षमेकं सा पुत्रं मग्र्यमजीजनत् ॥ ४९ ॥
दक्षादनन्तरं वृक्षानोषधानि च सर्वशः ।
अजीजनत्सोमकन्या नन्दीं चन्द्रवतीं तथा ॥ ५० ॥
सोमांशस्य च तस्यापि दक्षस्याशीतिकोटयः ।
तासां तु विस्तरं वक्ष्ये लोके यः सुप्रतिष्ठितः ॥५१॥
द्विपदश्चाभवन् केचित् केचिद् बहुपदा नराः ।
वलीमुखाः शङ्कुकर्णाः कर्णप्रावरणास्तथा ॥ ५२ ॥
अश्व ऋक्षमुखाः केचित् केचित् सिंहानना स्तथा ।
श्वशूकरमुखाः केचित् केचिदुष्ट्रमुखा स्तथा ॥ ५३ ॥
जनयामास धर्मात्मा म्लेच्छान् सर्व्वाननेकशः ।
स सृष्ट्वा मनसा दक्षः स्त्रियः पश्चादजीजनत् ॥ ५४ ॥
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय ददौ नक्षत्रसंज्ञिताः ।
देवासुरमनुष्यादि ताभ्यः सर्वमभूज्जगत् ॥ ५५ ॥

इति चतुर्थोऽध्यायः समाप्तः ।

---

ऋषय ऊचुः । देवानां दानवानाञ्च गन्धर्व्वोरगरक्षसाम् ।
उत्पत्तिं विस्तरेणैव सूत ! ब्रूहि यथा तथम् ॥ १ ॥
सूत उवाच । सङ्कल्पाद्दर्शनात् स्पर्शात् पूर्वेषां सृष्टिरुच्यते
दक्षात्प्राचेतसादूर्ध्वं सृष्टिर्मैथुनसम्भवा ॥ २ ॥
प्रजाः सृजेतिव्यादिष्टः पूर्वं दक्षः स्वयम्भुवा ।

यथा ससर्ज चैवादौ तथैव शृणुत द्विजाः ! ॥ ३ ॥
यदा तु सृजतस्तस्य देवर्षिगणपन्नगान् ।
न वृद्धि मगमल्लोकस्तदा मैथुनयोगतः ।
दक्षः पुत्रसहस्राणि पाञ्चजन्यामजीजनत् ॥ ४ ॥
तांस्तु दृष्ट्वा महाभागः सिसृक्षुर्विविधाः प्रजाः ।
नारदः प्राह हर्य्यश्वान् दक्षपुत्रान् समागतान् ॥ ५ ॥
भुवः प्रमाणं सर्वत्र ज्ञात्वोर्ध्वमध एव च ।
ततः सृष्टिं विशेषेण कुरुध्वमृषिसत्तमाः ! ॥ ६ ॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतोदिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रादिव सिन्धवः ॥ ७ ॥
हर्य्यश्वेषु प्रणष्टेषु पुनर्दक्षः प्रजापतिः ।
वैरिण्यामेव पुत्राणां सहस्रमसृजत्प्रभुः ॥ ८ ॥
शबला नाम ते विप्राः समेताः सृष्टिहेतवः ।
नारदोऽनुगतान् प्राह पुनस्तान् पूर्ववत्स तान् ।
भुवः प्रमाणं सर्वत्र ज्ञात्वा भ्रातॄनथो पुनः ॥ ९ ॥
आगत्य चाथ सृष्टिञ्च करिष्यथ विशेषतः ।
तेऽपि तेनैव मार्गेण जग्मुर्भ्रातॄन् यथा पुरा ॥ १० ॥
ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति ।
अन्विषन्दुःखमाप्नोति तेन तत्परिवर्जयेत् ॥ ११ ॥
तत स्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः ।
वैरिण्यां जनयामास दक्षः प्राचेतस स्तथा ॥ १२ ॥
प्रादात्स दश धर्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये ॥ १३ ॥
द्वे चैव भृगुपुत्राय द्वे कृशाश्वाय धीमते ।

द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरात् ॥ १४ ॥
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः ।
मरुत्वती वसुर्यामी लम्बा भानुररुन्धती ॥ १५ ॥
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भामिनी ।
धर्म्मपत्न्यः समाख्यातास्तासां पुत्रान्निबोधत ॥१६॥
विश्वेदेवांश्च विश्वायाः साध्या साध्यानजीजनत् ।
मरुत्वत्यां मरुत्वन्तो वसोस्तु वसवस्तथा ॥ १७ ॥
भानोस्तु भानवस्तद्वन् मुहूर्त्तायां मुहूर्तकाः ।
लम्बायां घोषनामानो नागवीथीतु यामिजा ॥१८॥
पृथिवीतलसम्भूत मरुत्वत्यामजायत ।
सङ्कल्पायास्तु सङ्कल्पो वसुसृष्टिं निबोधत ॥ १९ ॥
ज्योतिष्मन्तस्तु ये देवा व्यापकाः सर्वतो दिशम् ।
वसवस्ते समाख्यातास्तेषां सर्गं निबोधत ॥ २० ॥
आपो ध्रुवश्च सोमश्च धर्म्मश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ २१ ॥
आपस्य पुत्राश्चत्वारः शान्तो वै दण्ड एव च ।
शाम्बोऽथ मणिवक्त्रश्च यज्ञरक्षाधिकारिणः ॥ २२ ॥
ध्रुवस्य कालपुत्रस्तु वर्चाः सोमादजायत ।
द्रविणो हव्यवाहश्च धरपुत्रा वुभौ स्मृतौ ॥ २३ ॥
कल्याणिन्यां ततः प्राणो रमणः शिशिरोऽपि च ।
मनोहराधरात् पुत्रानवापाथ हरेः सुता ॥ २४ ॥
शिवा मनोजवं पुत्रमविज्ञातगतिं तथा ।
अवापानलात् पुत्रावग्निप्रायगुणौ पुनः ॥ २५ ॥
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ।

तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः ॥ २६ ॥
अपत्यं कृत्तिकानां तु कार्त्तिकेयस्ततः स्मृतः ।
प्रत्यूषस्यर्षिः पुत्रो विभुर्नाम्नाथ देवलः ।
विश्वकर्मा प्रभासस्य पुत्रः शिल्पी प्रजापतिः ॥ २७ ॥
प्रासादभवनोद्यानप्रतिमाभूषणादिषु ।
तडागारामकूपेषु स्मृतः सोमरवर्धकिः ॥ २८ ॥
अजैकपादहिर्बुध्न्य विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥ २९ ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥ ३० ॥
एतेषां मानसानान्तु त्रिशूलवरधारिणाम् ।
कोटयश्चतुराशीतिस्तत्पुत्राश्चाक्षया मताः ॥ ३१ ॥
दिक्षु सर्वासु ये रक्षां प्रकुर्वन्ति गणेश्वराः ।
पुत्रपौत्रसुताश्चैते सुरभी गर्भसम्भवाः ॥ ३२ ॥

॥ इति पञ्चमोऽध्यायः ॥

---

षष्ठोऽध्यायः ।

सूत उवाच । कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥ १ ॥
सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा ।
कद्रूर्विश्वा मुनिस्तद्वत्तासां पुत्रान्निबोधत ॥ २ ॥
तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः ।
वैवस्वतेऽन्तरे चैते आदित्या द्वादश स्मृताः ॥ ३ ॥
इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणो यमः ।

विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च ॥ ४ ॥
एते सहस्रकिरणा आदित्या द्वादश स्मृताः ।
मारीचात् कश्यपादाप पुत्रानदितिरुत्तमान् ॥ ५ ॥
कृशाश्वस्य ऋषेः पुत्रा देवप्रहरणाः स्मृताः ।
एते देवगणा विप्राः प्रतिमन्वन्तरेषु च ॥ ६ ॥
उत्पद्यन्ते प्रलीयन्ते कल्पे कल्पे तथैव च ।
दितिः पुत्रद्वयं लेभे कश्यपादिति नः श्रुतम् ॥ ७ ॥
हिरण्यकशिपुश्चैव हिरण्याक्षं तथैव च ।
हिरण्यकशिपोस्तद्वज्जातं पुत्रचतुष्टयम् ॥ ८ ॥
प्रह्लादश्चानुह्लादश्च संह्लादोह्लाद एव च ।
प्रह्लादपुत्र आयुष्मान् शिबिर्वाष्कल एव च ॥ ९ ॥
विरोचनश्चतुर्थश्च स बलिं पुत्रमाप्तवान् ।
बलेः पुत्रशतं त्वासीद्बाणज्येष्ठं ततो द्विजाः ॥ १० ॥
धृतराष्ट्रस्तथा सूर्यश्चन्द्रश्चन्द्रांशुतापनः ।
निकुम्भनाभो गुर्वक्षः कुक्षिभीमो विभीषणः ॥ ११ ॥
एवमाद्यास्तु बहवो बाणज्येष्ठा गुणाधिकाः ।
बाणः सहस्रबाहुश्च सर्वास्त्रगणसंयुतः ॥ १२ ॥
तपसा तोषितो यस्य पुरे वसति शूलभृत् ।
महाकालत्वमगमत्साम्यं यश्च पिनाकिनः ॥ १३ ॥
हिरण्याक्षस्य पुत्रोऽभूदुलूकः शकुनिस्तथा ।
भूतसन्तापनश्चैव महानाभस्तथैव च ॥ १४ ॥
एतेभ्यः पुत्रपौत्राणां कोटयः सप्तसप्ततिः ।
महाबला महाकाया नानारूपा महौजसः ॥ १५ ॥
दनुः पुत्रशतं लेभे कश्यपाद्बलदर्पितम् ।

विप्रचित्तिः प्रधानोऽभूद्येषां मध्ये महाबलः ॥ १६ ॥
द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरोधरः ।
अयोमुखः शम्बरश्च कपिशो नामतस्तथा ॥ १७ ॥
मारीचिर्मेघवांश्चैव इरा गर्भ शिरास्तथा ।
विद्रावणश्च केतुश्च केतुवीर्यः शतह्रदः ॥ १८ ॥
इन्द्रजित् सप्तजिच्चैव वज्रनाभस्तथैव च ।
एकचक्रो महाबाहुर्वज्राक्षस्तारकस्तथा ॥ १९ ॥
असिलोमा पुलोमा च बिन्दुर्बाणो महासुरः ।
स्वर्भानुर्वृषपर्वा च एवमाद्या दनोः सुताः ॥ २० ॥
स्वर्भानोस्तु प्रभा कन्या शची चैव पुलोमजा ।
उपदानवीमयस्यासीत्तथा मन्दोदरी कुहूः ॥ २१ ॥
शर्मिष्ठा सुन्दरी चैव चन्द्रा च वृषपर्वणः ।
पुलोमा कालका चैव वैश्वानरसुते हि ते ॥ २२ ॥
बह्वपत्ये महासत्वे मारीचस्य परिग्रहे ।
तयोः षष्टिसहस्राणि दानवानामभूत्पुरा ॥ २३ ॥
पौलोमान् कालकेयांश्च मारीचोऽजनयत् पुरा ।
अवध्या येऽमराणां वै हिरण्यपुरवासिनः ॥ २४ ॥
चतुर्मुखाल्लब्धवरास्ते हता विजयेन तु ।
विप्रचित्तिः सैंहिकेयान् सिंहिकायामजीजनत् ॥२५॥
हिरण्यकशिपोर्ये वै भागिनेयास्त्रयोदश ।
व्यंसः कल्पश्च राजेन्द्र ! नलो वातापिरेव च ॥२६॥
इल्वलो नमुचिश्चैव श्वसृपश्चाजनस्तथा ।
नरकः कालनाभश्च सरमाणस्तथैव च ॥ २७ ॥
कालवीर्यश्च विख्यातो दनुवंशविवर्धनाः ॥

संह्लादस्य तु दैत्यस्य निवातकवचाः कृताः ॥ २८ ॥
अवध्याः सर्वदेवानां गन्धर्वोरगरक्षसाम् ।
ये हता भर्गमाश्रित्य त्वर्जुनेन रणाजिरे ॥ २९ ॥
षट् कन्या जनयामास ताम्रा मारीचवीजतः ।
शुकी श्येनी च भासी च सुग्रीवी गृध्रिका शुचिः ॥३०॥
शुकी शुकानुलूकांश्च जनयामास धर्मतः ।
श्येनी श्येनांस्तथा भासी कुररानप्यजीजनत् ॥ ३१ ॥
गृध्री गृध्रान् कपोतांश्च पारावतविहङ्गमान् ।
हंससारसक्रौञ्चांश्च प्लवान् शुचिरजीजनत् ॥ ३२ ॥
अजाश्वमेषोष्ट्रखरान् सुग्रीवी चाप्यजीजनत् ।
एष ताम्रान्वयः प्रोक्तो विनतायां निबोधत ॥ ३३ ॥
गरुडः पततांनाथो अरुणश्च पतत्रिणाम् ।
सौदामिनी तथा कन्या येयं नभसि विश्रुता ॥ ३४ ॥
सम्पातिश्च जटायुश्च अरुणस्य सुतावुभौ ।
सम्पातिपुत्रो बभ्रुश्च शीघ्रगश्चापि विश्रुतः ॥ ३५ ॥
जटायुषः कर्णिकारः शतगामी च विश्रुतौ ।
सारसो रज्जुवालश्च भेरुण्डश्चापि तत्सुताः ॥ ३६ ॥
तेषामनन्तमभवत् पक्षिणां पुत्रपौत्रकम् ।
सुरसायाः सहस्रन्तु सर्पाणामभवत्पुरा ॥ ३७ ॥
सहस्रशिरसाङ्कद्रूः सहस्रञ्चापि सुव्रत ! ।
प्रधानास्तेषु विख्याताः षड्विंशति ररिन्दम ! ॥३८॥
शेषवासुकिकर्कोट शङ्खैरावतकम्बलाः ।
धनञ्जयमहानीलपद्माश्वतरतक्षकाः ॥ ३९ ॥
एलापत्रमहापद्मधृतराष्ट्रबलाहकाः ।

अहल्यालम्बकाश्चैव पुष्पदंष्ट्र शुभाननाः ॥ ४० ॥
अङ्कुरोमा च वञ्जुलो वामनः पाणिनस्तथा ।
कपिलोदुम्बरश्चापि पतञ्जलिरिति स्मृताः ॥ ४१ ॥
एषामनन्तमभवत् सर्वेषां पुत्रपौत्रकम् ।
प्रायशो यत् पुरादग्धं जनमेजयमन्दिरे ॥ ४२ ॥
रक्षोगणं क्रोधवशा स्वनामानमजीजनत् ।
दंष्ट्रिणां नियुतं तेषां भीमसेनादगात् क्षयम् ॥ ४३ ॥
रुद्राणाञ्च गणं तद्वद्गोमहिष्यो वराङ्गनाः ।
सुरभिर्जनयामास कश्यपात् संयतव्रता ॥ ४४ ॥
मुनिर्मुनीनाञ्च गणं गणमप्सरसां तथा ।
तथा किन्नरगन्धर्व्वानरिष्टाऽजनयद्बहून् ॥ ४५ ॥
तृणवृक्षलता गुल्ममिरा सर्वमजीजनत् ।
विश्वातु यक्षरक्षांसि जनयामास कोटिशः ॥ ४६ ॥
तत एकोनपञ्चाशन्मरुतः कश्यपाद्दितिः ।
जनयामास धर्म्मज्ञान् सर्वानमरवल्लभान् ॥ ४७ ॥
इति श्रीमत्स्यपुराणे कश्यपान्वयो नाम षष्ठोऽध्यायः ॥

---

ऋषय ऊचुः । दितेः पुत्राः कथं जाता मरुतो देववल्लभाः ।
देवैर्जग्मुश्च सापत्नैः कस्मात्ते सख्यमुत्तमम् ॥ १ ॥
सूत उवाच । पुरा देवासुरे युद्धे हतेषु हरिणासुरैः ।
पुत्रपौत्रेषु शोकार्त्ता गत्वा भूर्लोकमुत्तमम् ॥ २ ॥
स्यमन्तपञ्चके क्षेत्रे सरस्वत्यास्तटे शुभे ।
भर्तुराराधनपरा तप उग्रं चचार ह ॥ ३ ॥
तदा दितिर्दैत्यमाता ऋषिरूपेण सुव्रत ! ।

फलाहारा तप लेपे कृच्छ्रं चान्द्रायणादिकम् ॥ ४ ॥
यावद्वर्षशतं साग्रं जाता शोकसमाकुला ।
ततः सा तपसा तप्ता वसिष्ठादीनपृच्छत ॥ ५ ॥
कथयन्तु भवन्तो मे पुत्रशोकविनाशनम् ।
व्रतं सौभाग्यफलदमिह लोके परत्र च ॥ ६ ॥
ऊचुर्वसिष्ठप्रमुखा मदनद्वादशीव्रतम् ।
यस्याः प्रभावादभवत् सुतशोकविवर्जिता: ॥ ७ ॥
ऋषय ऊचुः । श्रोतुमिच्छामहे सूत ! मदनद्वादशी व्रतम् ।
सुतानेकोनपञ्चाशद्येन लेभेदितिः पुनः ॥ ८ ॥
सूत उवाच । यद्वसिष्ठादिभिः पूर्वन्दितेः कथितमुत्तमम् ।
विस्तरेण तदेवेदं मत्सकाशान्निबोधत ॥ ९ ॥
चैत्र मासि सिते पक्षे द्वादश्यां नियतव्रतः ।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितम् ॥ १० ॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम् ।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम् ॥ ११ ॥
नानाभक्ष्यसमोपेतं सहिरण्यन्तु शक्तितः ।
ताम्रपात्रं गुडोपेतं तस्योपरि निवेशयेत् ॥ १२ ॥
तस्मादुपरि कामन्तु कदलीदलसंस्थितम् ।
कुर्याच्छर्करयोपेतं रतिं तस्य च वामतः ॥ १३ ॥
गन्धं धूपं ततो दद्याद्गीतं वाद्यञ्च कारयेत् ।
तदभावे कथां कुर्यात् कामकेशवयोर्नरः ॥ १४ ॥
कामनाम्नो हरेरर्चां स्नापयेद्गन्धवारिणा ।
शुक्लपुष्पाक्षततिलैरर्चयेन्मधुसूदनम् ॥ १५ ॥
कामाय पादौ संपूज्य जङ्घे सौभाग्यदाय च ।

अङ्गजायेति पुनर्मंत्स्यायेति वै कटिम् ॥ १६ ॥
स्वच्छोदरायेत्युदरमनङ्गायेत्युरो हरेः ।
मुखं पद्ममुखायेति बाहू पञ्चशराय वै ॥ १७ ॥
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवम् ।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत् ॥ १८ ॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणादृते ।
भुक्त्वा तु दक्षिणां दद्यादिमं मन्त्रमुदीरयेत् ॥ १९ ॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः ।
हृदये सर्वभूतानां यआनन्दोऽभिधीयते ॥ २० ॥
अनेन विधिना सर्वं मासि मासि व्रतं चरेत् ।
उपवासी त्रयोदश्यामर्च्चयेद्विष्णुमव्ययम् ॥ २१ ॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत् ।
ततस्त्रयोदशे मासि घृतधेनुसमन्विताम् ॥ २२ ॥
शय्यां दद्यादनङ्गाय सर्वोपस्करसंयुताम् ।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम् ॥ २३ ॥
वासोभिर्द्विजदाम्पत्यं पूज्यं शक्त्या विभूषणैः ।
शय्यागन्धादिकं दद्यात् प्रीयतामित्युदीरयेत् ॥२४
होमः शुक्लतिलैः कार्य्यः कामनामानि कीर्त्तयेत् ।
गव्येन हविषा तद्वत् पायसेन च धर्म्मवित् ॥ २५ ॥
विप्रेभ्यो भोजनं दद्याद्वित्तशाठ्यं विवर्जयेत् ।
इक्षुदण्डानथो दद्यात् पुष्पमालाश्च शक्तितः ॥ २६ ॥
यः कुर्याद्विधिनानेन मदनद्वादशीमिमाम् ।
स सर्वपापनिर्म्मुक्तः प्राप्नोति हरिसाम्यताम् ॥२७॥
इह लोके वरान् पुत्रान् सौभाग्यफलमश्नुते ।

यः स्मरः संस्मृतो विष्णुरानन्दात्मा महेश्वरः ॥ २८ ॥
सुखार्थी कामरूपेण स्मरेदङ्गजमीश्वरम्।
एतच्छ्रुत्वा चकारासौ दितिः सर्वमशेषतः ॥ २९ ॥
कश्यपो व्रतमाहात्म्यमदागत्य परया मुदा।
चकार कर्कशांभूयो रूपयौवनशालिनीम् ॥ ३० ॥
वरैश्छन्दयामास सा तु वव्रे ततोवरम्।
पुत्रं शक्रवधार्थाय समर्थममितौजसम् ॥ ३१ ॥
वरयामि महात्मानं सर्वामरनिषूदनम्।
उवाच कश्यपो वाक्य मिन्द्रहन्तार मूर्जितम् ॥ ३२॥
प्रदास्याम्यहमेवेह किं त्वेतत्क्रियतां शुभे ! ।
आपस्तम्भःकरोत्विष्टिं पुत्रीयामद्य सुव्रते ! ॥ ३३ ॥
विधास्यामि ततो गर्भं मिन्द्रशत्रुनिषूदनम्।
आपस्तम्भस्ततश्चक्रे पुत्रेष्टिन्द्रविणाधिकाम् ॥ ३४ ॥
इन्द्रशत्रुर्भवस्वेति जुहाव च सविस्तरम्।
देवा मुमुदिरे दैत्या विमुखाः स्युश्चदानवाः ॥ ३५ ॥
दित्यां गर्भमथाधत्त कश्यपः प्राह तां पुनः।
त्वया यत्नो विधातव्यो ह्यस्मिन्गर्भे वरानने ! ॥३६॥
संवत्सरशतं त्वेकमस्मिन्नेव तपोवने।
सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि ! ॥३७॥
न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्वदा।
नोपस्करेषूपविशेन्मुसलोलूखलादिषु ॥ ३८ ॥
जले च नावगाहेत शून्यागारञ्च वर्जयेत्।
वल्मीकायां न तिष्ठेत नचोद्विग्नमना भवेत् ॥ ३९ ॥
विलिखेन्न नखैर्भूमिमाङ्गारेण न भस्मना।

भयशालुः स्वस्था तिष्ठेद्व्यायामञ्च विवर्जयेत् ॥ ४० ॥
न तुषाङ्गार भस्मास्थिकपालेषु समाविशेत् ।
वर्जयेत्कलहं लोकैर्गात्रभङ्गं तथैव च ॥ ४१ ॥
न मुक्तकेशी तिष्ठेत नाशुचिः स्यात् कदाचन ।
न शयीतोत्तरशिरा नचापर शिराः क्वचित् ॥४२ ॥
न वस्त्रहीना नोद्विग्ना नचार्द्रचरणा सती ।
नामङ्गल्यां वदेद्वाचं नच हास्याधिका भवेत् ॥ ४३ ॥
कुर्य्यात्तु गुरुशुश्रूषां नित्यं माङ्गल्यतत्परा ।
सर्व्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥ ४४
कृत रक्षा सुभूषा च वास्तु पूजनतत्परा ।
तिष्ठेत् प्रसन्नवदना भर्तुः प्रियहिते रता ॥ ४५॥
दानशीला तृतीयायां पार्वत्यं नक्तमाचरेत् ।
इति वृत्ता भवेन्नारी विशेषेण तु गर्भिणी ॥ ४६ ॥
यस्तु तस्या भवेत् पुत्रः शीलायुर्वृद्धिसंयुतः ।
अन्यथा गर्भपतनमवाप्नोति न संशयः ॥ ४७ ॥
तस्मात्त्वमनया वृत्त्या गर्भेऽस्मिन् यत्नमाचर ।
स्वस्त्यस्तु ते गमिष्यामि तथेत्युक्ता स्तया पुनः ॥ ४८ ॥
पश्यतां सर्वभूतानां तत्रैवान्तरधीयत ।
ततः सा कश्यपोक्तेन विधिना समतिष्ठत ॥ ४९ ॥
अथ भीतस्तथेन्द्रोऽपि दितेः पार्श्वमुपागमत् ।
विहाय देवसदनं तच्छुश्रूषुरवस्थितः ॥ ५० ॥
दितेश्छिद्रान्तरप्रेप्सुरभवत् पाकशासनः ।
विनीतोऽभवदव्यग्रः प्रशान्तवदनो बहिः ॥ ५१ ॥
अजानन् किल तत् कार्य्यमात्मनः शुभमाचरन् ।

ततो वर्षशतान्ते सा न्यूने तु दिवसैस्त्रिभिः ॥ ५२ ॥
मेने कृतार्थमात्मानं प्रीत्या विस्मितमानसा ।
अकृत्वा पादयोः शौचं प्रसुप्ता मुक्तमूर्धजा ॥ ५३ ॥
निद्राभरसमाक्रान्ता दिवापरशिराः क्वचित् ।
ततस्तदन्तरं लब्ध्वा प्रविष्टस्तु शचीपतिः ॥ ५४ ॥
वज्रेण सप्तधा चक्रे तं गर्भं त्रिदशाधिपः ।
ततः सप्तैव ते जाताः कुमाराः सूर्यवर्चसः ॥ ५५ ॥
रुदन्तः सप्त ते बाला निषिद्धा गिरिदारिणा ।
भूयोऽपि रुदतश्चैतानेकैकं सप्तधा हरिः ॥ ५६ ॥
चिच्छेद वृत्रहन्ता वै पुनस्तदुदरे स्थितः ।
एवमेकोनपञ्चाशद्भूत्वा ते रुरुदुर्भृशम् ॥ ५७ ॥
इन्द्रो निवारयामास मा रोदिष्ट पुनः पुनः ।
ततः स चिन्तयामास किमेतदिति वृत्रहा ।
धर्मस्य कस्य माहात्म्यात् पुनः सञ्जीविता स्त्वमी ।
विदित्वा ध्यानयोगेन मदनद्वादशीफलम् ॥ ५८ ॥
नूनमेतत् परिणतमधुना कृष्णपूजनात् ।
वज्रेणापि हताः सन्तो न विनाशमवाप्नुयुः ॥ ६० ॥
एकोऽप्यनेकतामाप यस्मादुदरगोऽप्यलम् ।
अवध्या नूनमेते वै तस्माद्देवा भवन्त्विति ॥ ६१ ॥
यस्मान्मा रुदतेत्युक्ता रुदन्तो गर्भसंस्थिताः ।
मरुतो नाम ते नाम्ना भवन्तु मखभागिनः ॥ ६२ ॥
ततः प्रसाद्य देवेशः क्षमस्वेति दितिं पुनः ।
अर्थशास्त्रं समास्थाय मयैतद्दुष्कृतं कृतम् ॥ ६३ ॥
कृत्वा मरुद्गणं देवैः समानममराधिपः ।

दितिं विमानमारोप्य ससुतामनयद्दिवम् ॥ ६४ ॥
यज्ञभागभुजो जाता मरुतस्ते ततो द्विजाः ।
न जग्मुरैक्यमसुरैरतस्ते सुरवल्लभाः ॥ ६५ ॥

इति श्रीमत्स्यपुराणे मरुतोत्पत्तौ मदनद्वादशीव्रतं नाम सप्तमोऽध्यायः ॥

---

ऋषय ऊचुः । आदिसर्गश्च यः सूत ! कथितो विस्तरेण तु ।
प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः ॥ १ ॥

सूत उवाच ।

यदाभिषिक्तः सकलाधिराज्ये पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपं चकार यज्ञव्रतानां तपसाञ्च चन्द्रम् ॥ २ ॥
नक्षत्र तारा द्विज वृक्ष गुल्मलतावितानस्य च रुक्मगर्भः ।
अपामधीशं वरुणं धनानां राज्ञां प्रभुं वै श्रवणञ्च तद्वत् ॥ ३ ॥
विष्णुं रवीणामधिपं वसूनामग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपं च दक्षञ्चकार शक्रं मरुतामधीशम् ॥ ४ ॥
दैत्याधिपानामथ दानवानां प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षः पशु भूत यक्ष वेतालराजन्त्वथ शूलपाणिम् ॥ ५ ॥
प्रालेय शैलञ्च पतिं गिरीणामीशं समुद्रं ससरिन्नदानाम् ।
गन्धर्वविद्याधर किन्नराणामीशं पुनश्चित्ररथं चकार ॥ ६ ॥
नागाधिपं वासुकिमुग्रवीर्यं सर्पाधिपं तक्षकमादिदेश ।
दिशाङ्गजानामधिपञ्चकार गजेन्द्रमैरावत नामधेयम् ॥ ७ ॥
सुपर्णमीशम्पततामथाश्व राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च प्लक्षं पुनः सर्ववनस्पतीनाम् ॥ ८ ॥
पितामहः पूर्वमथाभ्यषिञ्चदेतान् पुनः सर्वदिशाधिनाथान् ।

पूर्वेण दिक्पालमथाभ्यषिञ्चन्नाम्ना सुधर्माणमरातिकेतुम् ॥९॥
ततोऽधिपं दक्षिणतश्चकार सर्वेश्वरं शङ्खपदाभिधानम् ।
सकेतुमन्तञ्च दिशीशमीशश्चकार पश्चाद्भुवनाण्डगर्भः ॥ १० ॥
हिरण्यरोमाणमुदग्दिगीशं प्रजापतिर्देवसुतश्चकार ।
अद्यापि कुर्वन्ति दिशामधीशाः शत्रून् दहन्तस्य भुवोभिरक्षां
चतुर्भिरेभिः पृथुनामधेयो नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
गतेऽन्तरे चाक्षुषनामधेये वैवस्वताख्ये च पुनः प्रवृत्ते ॥१२॥
प्रजापतिः सोऽस्य चराचरस्य बभूव सूर्यान्वय वंशचिह्नः ॥
इति मत्स्यपुराणे आधिपत्याभिषेचनं नामाष्टमोऽध्याय ॥

---

सूत उवाच । एवं श्रुत्वा मनुः प्राह पुनरेव जनार्दनम् ।
पूर्वेषाञ्चरितं ब्रूहि मनूनां मधुसूदन ॥ १ ॥
मत्स्य उवाच । मन्वन्तराणि सर्वाणि मनूनां चरितञ्च यत् ।
प्रमाणञ्चैव कालस्य तच्छृणुष्व समाहितः ॥ २ ॥
एकचित्तः प्रशान्तात्मा शृणु मार्तण्डनन्दन ।
यामानाम पुरा देवा आसन् स्वायम्भुवान्तरे ॥ ३ ॥
सप्तैवर्षयः पूर्वं ये मरीच्यादयः स्मृताः ।
आग्नीध्रश्चाग्निबाहुश्च सहः सवन एव च ॥ ४ ॥
ज्योतिष्मान् द्युतिमान् हव्यो मेधामेधातिथिर्वसुः ।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः ॥ ५ ॥
प्रतिसर्गमिमे कृत्वा जग्मुर्यत्परमम्पदम् ।
एतत् स्वायम्भुवं प्रोक्तं स्वारोचिषमतः परम् ॥ ६ ॥
स्वारोचिषस्य तनया चत्वारो देववर्चसः ।
नभो नभस्य प्रसृति भानवः कीर्तिवर्द्धनाः ॥ ७ ॥

दत्तोनिश्च्यवनस्तम्बः प्राणः कश्यप एव च ।
और्वो बृहस्पतिश्चैव सप्तैते ऋषयः स्मृताः ॥ ८ ॥
देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे ।
हवीन्द्रः सुकृतो मूर्तिरापो ज्योतिरयस्मयः ॥ ९ ॥
वसिष्ठस्य सुताः सप्त ये प्रजापतयः स्मृताः ।
द्वितीयमेतत्कथितं मन्वन्तरमतः परम् ॥ १० ॥
औत्तमीयं प्रवक्ष्यामि तथा मन्वन्तरं शुभम् ।
मनुर्नामौत्तमिर्यत्र दशपुत्रानजीजनत् ॥ ११ ॥
ईषऊर्जश्च तर्जश्च शुचिः शुक्रस्तथैव च ।
मधुश्च माधवश्चैव नभस्योऽथ नभास्तथा ॥ १२ ॥
सहः कनीयानेतेषामुदारः कीर्त्तिवर्द्धनः ।
भावनास्तत्र देवाःस्युरूर्जाः सप्तर्षयः स्मृताः ॥ १३ ॥
कौकुरुण्डिश्च दाल्भ्यश्च शङ्खः प्रवहणः शिवः ॥
सितश्च सस्मितश्चैव सप्तैते योगवर्द्धनाः ॥ १४ ॥
मन्वन्तरं चतुर्थं तु तामसं नाम विश्रुतम् ।
कविः पृथुस्तथैवाग्निरकपिः कपिरेव च ॥ १५ ॥
तथैव जल्पधीमानौ मुनयः सप्ततामतः ।
साध्या देवगणा यत्र कथितास्तामसेऽन्तरे ॥ १६ ॥
अकल्मषस्तथा धन्वी तपोमूलस्तपोधनः ।
तपोरति तपस्यश्च तपोद्युति परन्तपौ ॥ १७ ॥
तपोभागी तपोयोगी धर्माचाररताः सदा ।
तामसस्य सुताः सर्वे दशवंशविवर्द्धनाः ॥ १८ ॥
पञ्चमस्य मनोस्तद्वद्रैवतस्यान्तरं शृणु ।
देवबाहुः सुबाहुश्च पर्जन्यः सोमपो मुनिः ॥ १९ ॥

हिरण्यरोमा सप्ताश्वः सप्तैते ऋषयः स्मृताः ।
देवाश्चाभूतरजसस्तथाप्रकृतयः शुभाः ॥ २० ॥
अरुणस्तत्त्वदर्शी च धृतिमान् हव्यवान् कविः ।
युक्तो निरुत्सुकः सत्त्वो निर्मोहोऽथ प्रकाशकः ॥२१॥
धर्मवीर्यबलोपेता दशैते रैवतात्मजाः ।
भृगुः सुधामा विरजाः सहिष्णुर्नाद एव च ॥ २२ ॥
विवस्वानति नामा च षष्ठे सप्तर्षयोऽपरे ।
चाक्षुषस्यान्तरे देवा लेखा नाम परिश्रुताः ॥ २३ ॥
ऋभवोऽथ ऋभाद्याश्च वारिमूला दिवौकसः ।
चाक्षुषस्यान्तरे प्रोक्ता देवानां पञ्च योनयः ॥ २४ ॥
रुरुप्रभृतयस्तद्वच्चाक्षुषस्य सुता दश ।
प्रोक्ताः स्वायम्भुवे वंशे ये मया पूर्वमेव तु ॥ २५ ॥
अन्तरं चाक्षुषं चैतन्मया ते परिकीर्त्तितम् ।
सप्तमं तत्प्रवक्ष्यामि यद्वैवस्वत मुच्यते ॥ २६ ॥
अत्रिश्चैव वशिष्ठश्च काश्यपो गौतमस्तथा ।
भरद्वाजस्तथायोगी विश्वामित्रः प्रतापवान् ॥ २७ ॥
जमदग्निश्च सप्तैते साम्प्रतं ये महर्षयः ।
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमम्पदम् ॥ २८ ॥
साध्याविश्वे च रुद्राश्च मरुतो वसवोऽश्विनौ ।
आदित्याश्च सुरास्तद्वत् सप्त देवगणाः स्मृताः ॥ २९ ॥
इक्ष्वाकु प्रमुखाश्चास्य दशपुत्राः स्मृता भुवि ।
मन्वन्तरेषु सर्वेषु सप्त सप्त महर्षयः ॥ ३० ॥
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमम्पदम् ।
सावर्ण्यस्य प्रवक्ष्यामि मनोर्भावि तथान्तरम् ॥ ३१ ॥

अश्वत्थामा शरद्वांश्च कौशिको गालवस्तथा।
शतानन्दः काश्यपश्च रामश्च ऋषयः स्मृताः॥ २२॥
धृतिर्वरीयान् यवसः सुवर्णो धृष्टिरेव च।
चरिष्णुरीड्यः सुमतिर्वसुः शुक्रश्च वीर्यवान्॥ २३॥
भविष्याद्दशसावर्णे र्मनोः पुत्राः प्रकीर्त्तिताः।
रौच्यादयस्तथान्येऽपि मनवः सम्प्रकीर्त्तिताः॥ २४॥
रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति।
मनुर्भूति सुतस्तद्वद्भौत्यो नाम भविष्यति॥ २५॥
ततस्तु मेरु सावर्णिर्ब्रह्म सूनुर्मनुः स्मृतः।
ऋतश्च ऋतधामा च विष्वक् सेनोमनुस्तथा॥ २६॥
अतीतानागताश्चैते मनवः परिकीर्तिताः।
षडूनं युगसाहस्र मेभिर्व्याप्तं नराधिप!॥ २७॥
स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्य सचराचरम्।
कल्पक्षये विनिर्वृत्ते मुच्यन्ते ब्रह्मणा सह॥ २८॥
एते युग सहस्रान्ते विनश्यन्ति पुनः पुनः।
ब्रह्माद्या विष्णुसायुज्यं याताशास्यन्ति वै द्विजाः॥२९॥

इति श्रीमत्स्यपुराणे मन्वन्तरानुकीर्तनं नाम नवमोऽध्यायः

## अथ दशमोऽध्यायः।

---

ऋषय ऊचुः। बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा।
पार्थिवाः पृथिवी योगात् पृथिवी कस्य योगतः॥१॥
किमर्थञ्च कृतासंज्ञा भूमेः किं पारिभाषिकी।
गौरितीयञ्च विख्याता सूत! कस्माद् ब्रवीहि नः॥२॥
सूत उवाच। वंशे स्वायम्भुवस्यासीदङ्गो नाम प्रजापतिः।

मृत्योस्तु दुहिता तेन परिणीता सुदुर्मुखा ॥ ३ ॥
सुनीथा नाम तस्यास्तु वेनो नाम सुतः पुरा ।
अधर्म्मनिरतश्चासीद्बलवान्वसुधाधिपः ॥ ४ ॥
लोकेऽप्यधर्म्मकृज्जातः परभार्यापहारकः ।
धर्माचारस्य सिद्ध्यर्थं जगतोऽथ महर्षिभिः ॥ ५ ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्दिताः ॥ ६ ॥
ममन्थु र्ब्राह्मणास्तस्य बलाद्देहमकल्मषाः ।
तत्कायान्मथ्यमानात्तु निपेतु र्म्लेच्छ जातयः ॥ ७ ॥
शरीरे मातुरंशेन कृष्णाञ्जन समप्रभाः ।
पितुरंशस्य चांशेन धार्मिको धर्मचारिणः ॥ ८ ॥
उत्पन्नो दक्षिणाद्धस्तात्स धनुः सशरो गदी ।
दिव्यतेजोमय वपुः स रत्नकवचाङ्गदः ॥ ९ ॥
पृथोरेवा भवद्यस्मात् ततः पृथुरजायत ।
स विप्रैरभिषिक्तोऽपि तपः कृत्वा सुदारुणम् ॥ १० ॥
विष्णोर्वरेण सर्वस्य प्रभुत्वमगमत्पुनः ।
निःस्वाध्यायवषट्कारं निर्धर्मं वीक्ष्य भूतलम् ॥ ११ ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुद्यता ॥ १२ ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततःस्थित्वैकदेशे तु किं करोमीति चाब्रवीत् ॥ १३ ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च ॥ १४ ॥
तथैव सा ब्रवीद्भूमिर्दुदोह स नराधिपः ।

स्वके पाणौ पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥ १५ ॥
तदन्नम भवच्छुद्धं प्रजा जीवन्ति येन वै ।
ततस्तु ऋषिभिर्दुग्धावत्सः सोमस्तदा भवत् ॥ १६ ॥
दोग्धा बृहस्पतिरभूत्पात्रं वेदस्तपो रसः ।
वेदैश्च वसुधा दुग्धा दोग्धामित्रस्तदा भवत् ॥ १७ ॥
इन्द्रोवत्सः समभवत् चीरमूर्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतं तथा ॥ १८ ॥
अन्तकश्चा भवद्दोग्धा यमोवत्सः स्वधारसः ।
अलावुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥ १९ ॥
विषं चीरं ततो दोग्धा धृतराष्ट्रोऽभवत्पुनः ।
असुरैरपि दुग्धेयं मायसे शक्र पीडिनीम् ॥ २० ॥
पात्रे मायामभूद्वत्सः प्राह्लादिस्तु विरोचनः ।
दोग्धाद्विमूर्धा तत्रासीन्माया येन प्रवर्त्तिता ॥ २१ ॥
यक्षैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥ २२ ॥
प्रेतरक्षोगणैर्दुग्धा धारा रुधिरमुल्वणम् ।
रौप्यनाभोऽभव दोग्धा सुमाली वत्सएव तु ॥ २३ ॥
गन्धर्वैश्च पुरा दुग्धा वसुधा साप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥ २४ ॥
दोग्धा वररुचिर्नामनाटवेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥ २५ ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाचलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥ २६ ॥
वृक्षैश्च वसुधा दुग्धा चीरं छिन्नप्ररोहणम् ।

पालाशपात्रे दोग्धा तु शालः पुष्पलताकुलः ॥ २७ ॥
प्लक्षोऽभवत्ततो वत्सः सर्ववृक्षः धनाधिपः ।
एवमन्यैश्च वसुधा तदा दुग्धा यथेप्सितम् ॥ २८ ॥
आयुर्धनानि सौख्यञ्च पृथौ राज्यं प्रशासति ।
न दरिद्रस्तदा कश्चिन्नरोगी न च पापकृत् ॥ २९ ॥
नोपसर्गं भयं किञ्चित् पृथौ राजनि शासति ।
नित्यं प्रमुदिता लोका दुःखशोकविवर्जिताः ॥ ३० ॥
धनुष्कोट्या च शैलेन्द्रानुत्सार्य्य स महाबलः ।
भुवस्तलं समं चक्रे लोकानां हितकाम्यया ॥ ३१ ॥
न पुरग्रामदुर्गाणि नचायुधधरा नराः ।
क्षयातिशयदुःखञ्च नार्थशास्त्रस्य चादरः ॥ ३२ ॥
धर्म्मैकवासना लोकाः पृथौ राज्यं प्रशासति ।
कथितानि च पात्राणि यत्क्षीरञ्च मया तव ॥ ३३ ॥
येषां यत्र रुचिस्तत्तद्देयं तेभ्यो विजानता ।
यज्ञश्राद्धेषु सर्वेषु मया तुभ्यं निवेदितम् ॥ ३४ ॥
दुहितृत्वङ्गता यस्मात् पृथोर्धर्म्मवतो मही ।
तदानुरागयोगाच्च पृथिवी विश्रुता बुधैः ॥ ३६ ॥
इति मत्स्यपुराणे वैन्याभिवर्णनो नाम दशमोऽध्यायः ।

---

## अथ एकादशोऽध्यायः ॥

ऋषय ऊचुः । आदित्यवंशमखिलं वद सूत ! यथाक्रमम् ।
सोमवंशञ्च तत्त्वज्ञ ! यथावद्वक्तुमर्हसि ॥ १ ॥
सूत उवाच । विवस्वान् कश्यपात् पूर्वमदित्यामभवत्सुतः ।
तस्य पत्नीत्रयं तद्वत्संज्ञा राज्ञी प्रभा तथा ॥ २ ॥

रैवतस्य सुता राज्ञी रैवतं सुषुवे सुतम् ।
प्रभा प्रभातं सुषुवे त्वाष्ट्रीसंज्ञा तथा मनुम् ॥ ३ ॥
यमश्च यमुना चैव यमलौतु बभूवतुः ।
ततस्तेजोमयं रूपमसहन्ती विवस्वतः ॥ ४ ॥
नारीमुत्पादयामास स्वशरीराद निन्दिताम् ।
त्वाष्ट्रीस्वरूपेण नाम्ना छायेति भामिनी तदा ॥ ५ ॥
किङ्करीमीति पुरतः स्थितां तामभ्यभाषत ।
छाये ! त्वं भज भर्तारमस्मदीयं वरानने ! ॥ ६ ॥
अपत्यानि मदीयानि मातृस्नेहेन पालय ।
तथेत्युक्ता तु सा देवमगमत् क्वापि सुव्रता ॥ ७ ॥
कामयामास देवोऽपि संज्ञेयमिति चादरात् ।
जनयामास तस्यां तु पुत्रञ्च मनुरूपिणम् ॥ ८ ॥
सवर्णत्वाच्च सावर्णिर्म्मनो वैंवस्वतस्य च ।
ततः शनिञ्च तपतीं विष्टिं चैव क्रमेण तु ॥ ९ ॥
छायायां जनयामास संज्ञेयमिति भास्करः ।
छाया स्वपुत्रेऽभ्यधिकं स्नेहं चक्रे मनौ तथा ॥ १० ॥
पूर्वो मनुस्तु चक्षाम न यमः क्रोधमूर्च्छितः ।
सन्तर्जयामास तदा पादमुद्यम्य दक्षिणम् ॥ ११ ॥
शशाप च यमं छाया सक्षतः क्रमिसंयुतः ।
पादोऽयमेको भविता पूयशोणितविस्रवः । १२ ।
निवेदयामास पितुर्धर्म्मः शापादमर्षितः ।
निष्कारणमहं शप्तोमात्रा देव ! सकोपया ॥ १३ ॥
बालभावान्मया किञ्चिदुद्यतश्चरणः सकृत् ।

मनुना वार्य्यमाणापि मम शापमदाद्विभो ! ॥ १४ ॥
प्रायो न माता सास्माकं शापेनाहं यतो हतः।
देवोऽप्याह यमं भूयः किङ्करोमि महामते ! ॥ १५ ॥
मौर्ख्यात्कस्य न दुःखं स्यादथवा कर्म्मसन्ततिः।
अनिवार्या भवस्यापि का कथान्येषु जन्तुषु ॥ १६ ॥
कृकवाकुर्म्मया दत्तो यः कृमीन् भक्षयिष्यति।
क्लेदञ्च रुधिरञ्चैव वत्सायमपनेष्यति ॥ १७ ॥
एवमुक्तस्तपस्तेपे यमस्तीव्रं महायशाः।
गोकर्णतीर्थे वैराग्यात् फलपर्णानिलाशनः ॥ १८ ॥
आराधयन् महादेवं यावद्वर्षायुतायुतम्।
वरं प्रादात् महादेवः सन्तुष्टः शूलभृत्तदा ॥ १९ ॥
वव्रे स लोकपालत्वं पितृलोके नृपालयम्।
धर्म्मा धर्म्मात्मकस्यापि जगतस्तु परीक्षणम् ॥ २० ॥
एवं स लोकपालत्वमगमच्छूलपाणिनः।
पितृणाञ्चाधिपत्यञ्च धर्म्मा धर्म्मस्य चानघ ! ॥ २१ ॥
विवस्वानथ तज्ज्ञात्वा संज्ञायाः कर्म्मचेष्टितम्।
त्वष्टुः समीपमगमदाचचक्षे च रोषवान् ॥ २२ ॥
तमुवाच ततस्त्वष्टा सान्त्वपूर्वं द्विजोत्तमाः।
तवासहन्ती भगवन् ! महस्तीव्रं तमोनुदम् ॥ २३ ॥
वडवा रूपमास्थाय मत्सकाशमिहागता।
निवारिता मया सा तु त्वया चैव दिवाकर ! ॥ २४ ॥
यस्मादविज्ञाततया मत्सकाशमिहागता।
तस्मान्मदीयं भवनं प्रवेष्टुं न त्वमर्हसि ॥ २५ ॥

एवमुक्त्वा जगामाथ मरुदेशमनिन्दिता।
वडवा रूपमास्थाय भूतले सम्प्रतिष्ठिता ॥ २६ ॥
तस्मात्प्रसादं कुरु मे यद्यनुग्रहभागहम्।
अपनेष्यामि ते तेजो यन्त्रे कृत्वा दिवाकर ! ॥ २७ ॥
रूपं तव करिष्यामि लोकानन्दकरं प्रभो ! ।
तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम् ॥ २८ ॥
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत्।
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ॥ २९ ॥
दैत्य दानवसंहर्तुः सहस्रकिरणात्मकम्।
रूपञ्चाप्रतिमञ्चक्रे त्वष्टापद्भ्यां मृते महत् ॥ ३० ॥
न शशाकाथ तद्द्रष्टुं पादरूपं रवेः पुनः।
अर्चास्वपि ततः पादौ न कश्चित् कारयेत् क्वचित् ३१
यः करोति स पापिष्ठां गतिमाप्नोति निन्दिताम्।
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतः ॥ ३२ ॥
तस्माच्च धर्म्मकामार्थी चित्रेष्वायतनेषु च।
न क्वचित्कारयेत्पादौ देव देवस्य धीमतः ॥ ३३ ॥
ततः स भगवान् ! गत्वा भूर्लोकममराधिपः।
कामयामास कामार्तो मुखएव दिवाकरः ॥ ३४ ॥
अश्वरूपेण महता तेजसा च समावृतः।
संज्ञा च मनसा क्षोभमगमद्भयविह्वला ॥ ३५ ॥
नासापुटाभ्यामुत्सृष्टं परोऽयमिति शङ्कया।
तद्रेतस्ततोजातावश्विनाविति निश्चितम् ॥ ३६ ॥
दस्रौसुतत्वात्सञ्जातौ नासत्यौ नासिकाग्रतः।

ज्ञात्वा चिराच्च तं देवं सन्तोषमगमत्परम् ।
विमानेनागमत्स्वर्गं पत्या सह मुदान्विता ॥ ३७ ॥
सावर्णोऽपि मनुर्मेरावद्याप्यास्ते तपोधनः ।
शनि स्तपोबलाद्‌ग्रहसाम्यं ततः पुनः ॥ ३८ ॥
यमुना तपती चैव पुनर्नद्यौ बभूवतुः ।
विष्टिर्घोरात्मिका तद्वत् कालत्वेन व्यवस्थिता ॥ ३९
मनोर्वैवस्वतस्यासन् दशपुत्रा महाबलाः ।
इलस्तु प्रथमस्तेषां पुत्रेष्ट्यां समजायत ॥ ४० ॥
इक्ष्वाकुः कुशनाभश्च अरिष्टो धृष्ण एव च ।
नरिष्यतः करूषश्च शर्य्यातिश्च महाबलाः ।
पृषध्रश्चाथ नाभागः सर्वे ते दिव्यमानुषाः ॥ ४१॥
अभिषिच्य मनुः पुत्रमिलं ज्येष्ठं स धार्मिकः ।
जगाम तपसेभूयः स महेन्द्रवनालयम् ॥ ४२ ॥
अथ दिग्जयसिध्यर्थमिलः प्रायान् महीमिमाम् ।
भ्रमन् द्वीपानि सर्वाणि क्ष्माभृतः संप्रधर्षयन् ॥ ४३ ॥
जगामोपवनं शम्भोरश्वाकृष्टः प्रतापवान् ।
कल्पद्रुमलताकीर्णं नाम्ना शर वणं महत् ॥ ४४ ॥
रमते यत्र देवेशः शम्भुः सोमार्द्धशेखरः ।
उमया समयस्तत्र पुरा शरवणे कृतः ॥ ४५ ॥
पुन्नामसत्त्वं यत् किञ्चिदागमिष्यति ते वने ।
स्त्रीत्वमेष्यति तत्सर्वं दशयोजनमण्डले ॥ ४६ ॥
अज्ञात समयो राजा इलः शरवणे पुरा ।
स्त्रीत्वमाप विशन्नेव वडवात्वं हयस्तदा ॥ ४७ ॥
पुरुषत्वं हृतं सर्वं स्त्रीरूपे विस्मितो नृपः ।

स्थूलेति साभवन्नारी पीनोन्नत घनस्तनी ॥ ४८ ॥
उन्नत श्रोणिजघना पद्मपत्रायते क्षणा ।
पूर्णेन्दुवदना तन्वी विलासोल्लासितेक्षणा ॥ ४९ ॥
मूलोन्नतायतभुजा नील कुञ्चित मूर्ध्वजा ।
तनुलोमा सुदशना मृदु गम्भीर भाषिणी ॥ ५० ॥
श्यामगौरेण वर्णेन हंसवारणगामिनी ।
कार्मुकभ्रूयुगोपेता तनुताम्रनखाङ्कुरा ॥ ५१ ॥
भ्रमन्ती च वने तस्मिन् चिन्तयामास भामिनी ।
को मे पिताथवा भ्राता का मे माता भवेदिह ॥५२॥
कस्य भर्तुरहं दत्ता कियद्वत्स्यामि भूतले ।
इति चिन्तयती दृष्टा सोम पुत्रेण साङ्गना ॥ ५३ ॥
इलारूप समाक्षिप्त मनसा वरवर्णिनीम् ।
बुधस्तदाप्तये यत्न मकरोत् कामपीड़ितः ॥ ५४ ॥
विशिष्टा कारवान् दण्डीसकमण्डलु पुस्तकः ।
वेणु दण्ड कृतानिक पवित्रक गणित्रकः ॥ ५५ ॥
द्विजरूपः शिखी ब्रह्म निगदन् कर्ण कुण्डलः ।
वटुभिश्चान्वितो युक्तैः समित् पुष्प कुशोदकैः ॥५६॥
किलान्विषन्वने तस्मिन्नाजुहाव सतामिलाम् ।
वहिर्वनस्यान्तरितः किल पादप मण्डले ॥ ५७ ॥
ससम्भ्रमसकस्मात्तां सोपालम्भमिवावदत् ।
त्यक्ताग्निहोत्र शुश्रूषां क्व गता मन्दिरान्मम ॥ ५८ ॥
इयं विहारवेला ते ह्यति क्रामति साम्प्रतम् ।
एह्येहि पृथुसुश्रोणि ! सम्भ्रान्ताकेन हेतुना ॥ ५९ ॥
इयं सायन्तनीवेला विहारस्येह वर्तते ।

कृत्वोपलेपनं पुष्पै रलंकुरु गृहं मम ॥ ६० ॥
साऽत्वब्रवीद्धि स्मृताहं सर्वमेतत्तपोधन ! ।
आत्मानं त्वाञ्च भर्तारं कुलञ्च वदमेनघ ॥ ६१ ॥
बुधः प्रोवाच तान्तन्वीमिला त्वं वरवर्णिनि ! ।
अहञ्च कामुको नाम बहुविद्यो बुधः स्मृतः ॥ ६२ ॥
तेजस्विनः कुलेजातः पिता मे ब्राह्मणाधिपः ।
इति सा तस्य वचनात् प्रविष्टा बुधमन्दिरम् ॥ ६३ ॥
रत्नस्तम्भ समायुक्तं दिव्यमाया विनिर्मितम् ।
इला कृतार्थ मात्मानं मेने तद्भवनस्थिता ॥ ६४ ॥
अहोवृत्त महोरूप महो धन महोकुलम् ।
ममचास्य च मे भर्तुरहोलावण्य मुत्तमम् ॥ ६५ ॥
रेमे च सा तेन समम ति कालमिला ततः ।
सर्वभोगमये गेहे यथेन्द्रभवने तथा ॥ ६६ ॥

इति मत्स्यपुराणे एकादशोऽध्यायः ।

---

सूत उवाच । अथान्विषन्तो राजानं भ्रातरस्तस्य मानवाः ।
इक्ष्वाकु प्रमुखा जग्मुस्तदा शरवणान्तिकम् ॥ १ ॥
ततस्ते ददृशुः सर्वे वडवामग्रतः स्थिताम् ।
रत्न पर्याण किरण दीप्तकायामनुत्तमाम् ॥ २ ॥
पर्याण प्रत्यभिज्ञानात् सर्वे विस्मयमागताः ।
अयं चन्द्र प्रभो नाम वाजी तस्य महात्मनः ॥ ३ ॥
अगमद्वडवा रूपमुत्तमं केन हेतुना ।
ततस्तु मैत्रावरुणिं पप्रच्छुस्ते पुरोधसम् ॥ ४ ॥
किमित्येतदभूच्चित्रंवद्‌योगविदाम्बर ! ।

वशिष्ठश्चाब्रवीत् सर्वं दृष्ट्वा तद्‌ध्यानचक्षुषा ॥ ५ ॥
समयः शम्भु दयिताकृतः शरवणे पुरा ।
यः पुमान् प्रविशेदत्र स नारीत्वमवाप्स्यति ॥ ६ ॥
अयमश्वोऽपि नारी त्वमगाद्राज्ञा सहैव तु ।
पुनः पुरुषतामेति यथासौ धनदोपमः ॥ ७ ॥
तथैव यत्नः कर्तव्यश्चाराध्यैव पिनाकिनम् ।
ततस्ते मानवा जग्मुर्यत्र देवो महेश्वरः ॥ ८ ॥
तुष्टुवुर्विविधैः स्तोत्रैः पार्वती परमेश्वरौ ।
तावूचतुरलङ्घ्योऽयं समयः किन्तु साम्प्रतम् ॥ ९ ॥
इक्ष्वाकोरश्वमेधेन यत् फलं स्यात्तदावयोः ।
दत्त्वा किम्पुरुषो वीरः स भविष्यत्यसंशयम् ॥ १० ॥
तथेत्युक्तास्ततस्तेस्तु जग्मुर्वैवस्वतात्मजाः ।
इक्ष्वाकोश्वाश्वमेधेन चेलः किम्पुरुषोऽभवत् ॥ ११ ॥
मासमेकम्पुमान्वीरः स्त्री च मासमभूत् पुनः ।
बुधस्य भवने तिष्ठन्निलो गर्भधरोऽभवत् ॥ १२ ॥
अजीजनत् पुत्रमेकमनेकगुणसंयुतम् ।
बुधश्चोत्पाद्य तं पुत्रं स्वर्लोकमगमत्ततः ॥ १३ ॥
इलस्य नाम्ना तद्वर्षमिलावृतमभूत्तदा ।
सोमार्कवंशयोरादाविलोऽभून्मनुनन्दनः ॥ १४ ॥
एवं पुरूरवाः पुंसोरभवद्वंशवर्द्धनः ।
इक्ष्वाकुरर्कवंशस्य तथैवोक्तस्तपोधनाः ॥ १५ ॥
इलः किम्पुरुषत्वे च सुद्युम्न इति चोच्यते ।
पुनः पुत्रत्रयमभूत् सुद्युम्नस्यापराजितम् ॥ १६ ॥
उत्कलो वै गयस्तद्वद्धरिताश्वश्च वीर्य्यवान् ।

उत्कलस्योत्कला नाम गयस्य तु गया मता॥ १७॥
हरिताश्वस्य दिक् पूर्वा विश्रुता कुरुभिः सह।
प्रतिष्ठानेभिषिच्याथ स पुरूरवसं सुतम्॥ १८॥
जगामेलावृतं भोक्तुं वर्षं दिव्यफलाशनम्।
इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान्॥ १९॥
नरिष्यन्तस्य पुत्रोऽभूच्छुचो नाम महाबलः।
नाभगस्याम्बरीषस्तु धृष्टस्य च सुतत्रयम्॥ २०॥
धृतकेतुश्चित्रनाथो रणधृष्टश्च वीर्य्यवान्।
आनर्तो नाम शर्यातेः सुकन्या चैव दारिका॥ २१॥
आनर्तस्याभवत् पुत्रो रोचमानः प्रतापवान्।
आनर्तो नाम देशोऽभून्नगरी च कुशस्थली॥ २२॥
रोचमानस्य पुत्रोऽभूद्रेवो रेवत एव च।
ककुद्मी चापराख्यामज्येष्ठः पुत्रशतस्य च॥ २३॥
रेवती तस्य सा कन्या भार्या रामस्य विश्रुता।
करूषस्य तु कारूषा बहवः प्रथिता भुवि॥ २४॥
पृषध्रो गोवधाच्छूद्रो गुरुशापादजायत।
इक्ष्वाकुवंशं वक्ष्यामि शृणुध्वमृषिसत्तमाः!॥ २५॥
इक्ष्वाकोः पुत्रतामाप विकुक्षिर्नाम देवराट्।
ज्येष्ठः पुत्रशतस्यासीद्दश पञ्च च तत्सुता॥ २६॥
मेरोरुत्तरतस्ते तु जाताः पार्थिवसत्तमाः।
चतुर्दशोत्तरञ्चान्यच्छतमस्य तथाभवत्॥ २७॥
मेरोर्दक्षिणतो ये वै राजानः सम्प्रकीर्त्तिताः।
ज्येष्ठः ककुत्स्थो नाम्नाऽभूत्तत्सुतस्तु सुयोधनः॥२८॥
तस्य पुत्रः पृथुर्नाम विश्वगश्च पृथोः सुतः।

बृन्दुस्तस्य च पुत्रोऽभूद्युवनाश्वस्ततोऽभवत् ॥ २९ ॥
श्रावस्तश्च महातेजा वत्सकस्तत्सुतोऽभवत् ॥
निर्मिता येन श्रावस्ती गौडदेशे द्विजोत्तमाः ॥ ३० ॥
श्रावस्ताद्बृहदश्वोऽभूत् कुवलाश्वस्ततोऽभवत् ।
धुन्धुमारत्वमगमद्धुन्धुं नाम्नाहतः पुरा ॥ ३१ ॥
तस्य पुत्रास्त्रयो जाता दृढाश्वो दण्ड एव च ।
कपिलाश्वश्च विख्यातो धौन्धुमारिः प्रतापवान् ॥ ३२॥
दृढाश्वस्य प्रमोदश्च हर्यश्वस्तस्यचात्मजः ।
हर्यश्वस्य निकुम्भोऽभूत्संहताश्वस्ततो भवत् ॥ ३३ ॥
अकृताश्वोरणाश्वश्च संहताश्व सुता बुभौ ।
युवनाश्वोरणाश्वस्य मान्धाता च ततोऽभवत् ॥ ३४ ॥
मान्धातुः पुरुकुत्सोऽभूद्धर्मसेनश्च पार्थिवः ।
मुचुकुन्दश्च विख्यातः शत्रुजिच्च गमागमात् ॥ ३५ ॥
पुरुकुत्सस्य पुत्रोऽभूद्वसुदोनर्मदापतिः ।
सम्भूतिस्तस्य पुत्रोऽभूत्त्रिधन्वा च ततोऽभवत् ॥ ३६ ॥
त्रिधन्वनः सुतो जातस्त्रय्यारुण इति स्मृतः ।
तस्मात्सत्यव्रतोनाम तस्मात्सत्यरथः स्मृतः ॥ ३७ ॥
तस्य पुत्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः ।
रोहिताच्च वृको जातो वृकाद्बाहुरजायत ॥ ३८ ॥
सगरस्तस्य पुत्रोऽभूद्राजा परमधार्मिकः ।
द्वे भार्य्ये सगरस्यापि प्रभाभानुमती तथा ॥ ३९ ॥
ताभ्यामाराधितः पूर्वमौर्वोऽग्निः पुत्रकाम्यया ।
और्वस्तुष्टस्तयोः प्रादाद्यथेष्टं वरमुत्तमम् ॥ ४० ॥
एकाषष्टिं सहस्राणि सुतमेकं तथा परा ।

असह्यात्तु वंशकर्तारं प्रभा षष्टिसहस्रं तदा ॥ ४१ ॥
एकं भानुमती पुत्रमसह्यादसमञ्जसम्।
ततः षष्टिं सहस्राणि सुषुवे यादवीप्रभा ॥ ४२ ॥
खनन्तः पृथिवीं दग्धा विष्णुनायेऽश्वमार्गणे।
असमञ्जसस्तु तनयो योंऽशुमान्नाम विश्रुतः ॥ ४३ ॥
तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः।
येन भागीरथी गङ्गा तपः कृत्वावतारिता ॥ ४४ ॥
भगीरथस्य तनयोनाभाग इति विश्रुतः।
नाभागस्याम्बरीषोऽभूत्सिन्धुद्वीपस्ततोऽभवत् ॥ ४५ ॥
तस्यायुतायुः पुत्रोऽभूदृतुपर्णस्ततोऽभवत्।
तस्य कल्माषपादस्तु सर्वकर्मा ततः स्मृतः ॥ ४६ ॥
तस्यानरण्यः पुत्रोऽभून्निघ्नस्तस्य सुतोऽभवत्।
निघ्नपुत्रा पुत्रौ जातौ अनमित्र रघूनृपौ ॥ ४७ ॥
अनमित्रो वनमगाद्भविता सकृते नृपः।
रघोरभूत् दिलीपस्तु दिलीपादजकस्तथा ॥ ४८ ॥
दीर्घबाहुरजाज्जातस्त्वा जपालस्ततो नृपः।
तस्माद्दशरथो जातस्तस्य पुत्र चतुष्टयम् ॥ ४९ ॥
नारायणात्मकाः सर्वे रामस्तेष्वग्रजोऽभवत्।
रावणान्तकरस्तद्वद्रघूणां वंशवर्धनः ॥ ५० ॥
वाल्मीकिस्तस्य चरितं चक्रे भार्गवसत्तमः।
तस्य पुत्रौ कुशलवाविक्ष्वाकुकुलवर्धनौ ॥ ५१ ॥
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः।
नलस्तु नैषधस्तस्मान्नभास्तस्मादजायत ॥ ५२ ॥
नभसः पुण्डरीकोऽभूत् क्षेमधन्वा ततः स्मृतः।

तस्य पुत्रोऽभवद्वीरो देवानीकः प्रतापवान् ॥ ५३ ॥
अहीनगुस्तस्य सुतःसहस्राश्वस्ततः परः ।
ततश्चन्द्रावलोकस्तु तारा पीडस्ततोऽभवत् ॥ ५४ ॥
तस्यात्मजश्चन्द्र गिरिर्भानुश्चन्द्रस्ततोऽभवत् ।
श्रुतायुरभवत्तस्माद्भारते यो निपातितः ॥ ५५ ॥
नलौ द्वावेवविख्यातौ वंशे कश्यप सम्भवे ।
वीरसेन सुतस्तद्वन्नैषधश्च नराधिपः ॥ ५६ ॥
एते वैवस्वते वंशे राजानो भूरि दक्षिणाः ।
इक्ष्वाकुवंश प्रभवाः प्राधान्येन प्रकीर्त्तिताः ॥ ५७ ॥
इति श्रीमत्स्यपुराणे सूर्य्यवंशानु कीर्त्तनो
नाम द्वादशोऽध्यायः ।

---

अथ त्रयोदशोऽध्यायः ।

मनुरुवाच । भगवन्! श्रोतुमिच्छामि पितॄणां वंशमुत्तमम् ।
रवेश्च श्राद्धदेवत्वं सोमस्य च विशेषतः ॥ १ ॥
मत्स्य उवाच । हन्तते कथयिष्यामि पितॄणां वंशमुत्तमम् ।
स्वर्गे पितृगणाः सप्त त्रयस्तेषाममूर्त्तयः ॥ २ ॥
मूर्तिमन्तोऽथ चत्वारः सर्वेषाममितौजसः ।
अमूर्त्तयः पितृगणा वैराजस्य प्रजापतेः ॥ ३ ॥
यजन्ति यान् देवगणा वै राजा इति विश्रुताः ।
दिवि ते योगविभ्रष्टाः प्राप्य लोकान् सनातनान् ॥ ४॥
पुनर्ब्रह्मविदान्ते तु जायन्ते ब्रह्मवादिनः ।
संप्राप्यतां स्मृतिं भूयो योगं साङ्ख्य मनुत्तमम् ॥ ५ ॥
सिद्धिं प्रयान्ति योगेन पुनरावृत्ति दुर्लभाम् ।

योगिनामेव देयानि तथाच्छ्राद्धानि दातृभिः ॥ ६ ॥
एतेषां मानसी कन्या पत्नी हिमवतो मता।
मैनाकस्तस्य दायादः क्रौञ्चस्तस्याग्रजोऽभवत् ॥ ७ ॥
क्रौञ्चद्वीपः स्मृतो येन चतुर्थो घृतसंवृतः।
मेना च सुषुवे तिस्रः कन्या योगवतीस्ततः ॥ ८ ॥
उमैकपर्णापर्णा च तीव्र व्रतपरायणाः।
रुद्रस्यैका सितस्यैका जैगीषव्यस्य चापरा ॥ ९ ॥
दत्ता हिमवता बालाः सर्वा लोके तपोऽधिकाः
ऋषय ऊचुः। कस्माद्दाक्षायणी पूर्वं ददाहात्मानमात्मना॥१०॥
हिमवद्दुहिता तद्वत् कथं जाता महीतले।
संहरन्ती किमुक्तासौ सुता वा ब्रह्मसूनुना ॥ ११ ॥
दक्षेण लोकजननी सूत! विस्तरतो वद।
सूत उवाच। दक्षस्य यज्ञे विततं प्रभूत वरदक्षिणे ॥ १२ ॥
समाहूतेषु देवेषु प्रोवाच पितरं सती।
किमर्थं तात! भर्ता मे यज्ञेऽस्मिन्नाभिमन्त्रितः ॥१३॥
अयोग्य इति तामाह दक्षो यज्ञेषु शूलभृत्।
उपसंहार कृद्रुद्रस्तेना मङ्गलभागयम् ॥ १४ ॥
चुकोपाथ सती देहं त्यक्ष्यामीति त्वदुद्भवम्।
दशानामथ भविता पितॄणामेक पुत्रकः ॥ १५ ॥
चाक्षियत्वेऽश्वमेधे च रुद्रा त्वं नाशमेष्यसि।
इत्युक्त्वा योगमास्थाय स्वदेहोद्भव तेजसा ॥ १६ ॥
निर्दहन्ती तदात्मानं स देवासुरकिन्नरैः।
किं किमेतदिति प्रोक्ता गन्धर्वगणगुह्यकैः ॥ १७ ॥
उपगम्याब्रवीद्दक्षः प्रणिपत्याथ दुःखितः।

त्वमस्य जगतो माता जगत्सौभाग्य देवता ॥ १८ ॥
दुहितृत्वङ्गता देवि ममानुग्रहकाम्यया ।
न त्वया रहितं किञ्चित् ब्रह्माण्डे सचराचरम् ॥ १९ ॥
प्रसादं कुरु धर्मज्ञे न मान्त्यक्तुमिहार्हसि ।
प्राह देवी यदारब्धं तत्कार्य्यं मे न संशयः ॥ २० ॥
किं त्ववश्यं त्वया मर्त्त्ये हत यज्ञेन शूलिना ।
प्रसादे लोकसृष्ट्यर्थं तपः कार्यं ममान्तिके ॥ २१ ॥
प्रजापतिस्त्वं भविता दशानामङ्गजोप्यलम् ।
मदंशेनाङ्गनाषष्टि र्भविष्यन्त्य ग्रजास्तव ।
मत्सन्निधौ तपः कुर्वन् प्राप्स्यसे योगमुत्तमम् ।
एव मुक्तोऽब्रवीद्दक्षः केषु केषु मयानघे ॥ २३ ॥
तीर्थेषु च त्वं द्रष्टव्या स्तोतव्या केश्च नामभिः ।
देव्युवाच । सर्वदा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि ॥ २४ ॥
सर्वलोकेषु यत्किञ्चिद्रहितं न मया विना ।
तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः ॥ २५ ॥
स्मर्तव्या भूतिकामैर्वा तानि वक्ष्यामि तत्वतः ।
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी ॥ २६ ॥
प्रयागे ललिता देवी कामाक्षी गन्धमादने ।
मानसे कुमुदा नाम विश्वकाया तथाम्बरे ॥ २७ ॥
गोमन्ते गोमती नाम मन्दरे काम चारिणी ।
मदोत्कटा चैत्ररथे जयन्ती हस्तिना पुरे ॥ २८ ॥
कान्य कुब्जे तथा गौरी रम्भा मलयपर्वते ।
एकाम्रके कीर्तिमती विश्वां विश्वेश्वरे विदुः ॥ २९ ॥

पुष्करे पुरुहूतेति केदारे मार्गदायिनी ।
नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥ २० ॥
स्थानेश्वरे भवानी तु विल्वके विल्वपत्रिका ।
श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा ॥ २१ ॥
जया वराहशैले तु कामला कमलालये ।
रुद्रकोट्याञ्च रुद्राणी काली कालञ्जरे गिरौ ॥ २२ ॥
महालिङ्गे तु कपिला मर्कोटे मुकुटेश्वरी ।
शालिग्रामे महादेवी शिवलिङ्गे जलप्रिया ॥ २३ ॥
मायापुर्याङ्कुमारी तु सन्ताने ललिता तथा ।
उत्पलाक्षी सहस्राक्षे कमलाक्षे महोत्पला ॥ २४ ॥
गङ्गायां मङ्गला नाम विमला पुरुषोत्तमे ।
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने ॥ २५ ॥
नारायणी सुपार्श्वे तु त्रिकूटे भद्रसुन्दरी ।
विपुले विपुला नाम कल्याणी मलयाचले ॥ २६ ॥
कोटवी कोटितीर्थे तु सुगन्धा माधवे वने ।
कुब्जाम्रके त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥ २७ ॥
शिवकुण्डे सुनन्दा तु नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥ २८ ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी ॥ २९ ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रेति चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥ ४० ॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
अरोगा वैद्यनाथे तु महाकाले महेश्वरी ॥ ४१ ॥

अभयेत्युष्णतीर्थेषु चामृता विन्ध्यकन्दरे ।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे ॥४२॥
छागलण्डे प्रचण्डा तु चण्डिका मकरन्दके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥ ४३ ॥
देवमाता सरस्वत्यां पारा पारातटे मता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥ ४४ ॥
सिंहिका क्रतशौचे तु कार्त्तिकेये यशस्करी ।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥ ४५ ॥
माता सिद्धपुरे लक्ष्मी रङ्गना भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्वते ॥ ४६ ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमा देवी हिमाद्रौ तु पुष्टिर्विश्वेश्वरे तथा ॥ ४७ ॥
कपालमोचने शुद्धिर्माता कायावरोहणे ।
शङ्खोद्धारे धरा नाम धृतिः पिण्डारके तथा ॥ ४८ ॥
काला तु चन्द्रभागायां मच्छोदे शिवकारिणी ।
वेणायाममृता नाम वदर्य्यामुर्वशी तथा ॥ ४९ ॥
औषधी चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु मुकुटे सत्यवादिनी ॥ ५० ॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्वती शिवसन्निधौ ॥ ५१ ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्य्यबिम्बे प्रभा नाम मातॄणां वैष्णवी मता ॥ ५२ ॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्वशरीरिणाम् ॥५३॥

एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम्।
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम्॥ ५४॥
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते।
एषु तीर्थेषु यः कृत्वा स्नानं पश्यति मां नरः॥५५॥
सर्वपापविनिर्मुक्तः कल्पं शिवपुरे वसेत्।
यस्तु मत्परमं कालं करोत्येतेषु मानवः॥ ५६॥
स भित्त्वा ब्रह्मसदनं पदमभ्येति शाङ्करम्।
नाम्ना मष्टशतं यस्तु श्रावयेच्छिवसन्निधौ॥ ५७॥
तृतीयाया मथाष्टम्यां बहुपुत्रो भवेन्नरः।
गोदाने श्राद्धदाने वा अहन्यहनि वा बुधः॥ ५८॥
देवार्चनविधौ विद्वान् पठन् ब्रह्माधिगच्छति।
एवं वदन्ती सा तत्र ददाहात्मानमात्मना॥ ५९॥
स्वायम्भुवोऽपि कालेन दक्षः प्राचेतसोऽभवत्।
पार्वती साभवद्देवी शिवदेहार्धधारिणी॥ ६०॥
मेनागर्भसमुत्पन्ना भुक्तिमुक्तिफलप्रदा।
अरुन्धती जपन्त्येतत् प्राप योगमनुत्तमम्॥ ६१॥
पुरूरवाश्च राजर्षिर्लोके व्यजयतामगात्।
ययातिः पुत्रलाभञ्च धनलाभञ्च भार्गवः॥ ६२॥
तथान्ये देवदैत्याश्च ब्राह्मणाः क्षत्रियास्तथा।
वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्॥ ६३॥
यत्रैतल्लिखितं तिष्ठेत् पूज्यते देवसन्निधौ।
न तत्र शोको दौर्गत्यं कदाचिदपि जायते॥ ६४॥

इति श्रीमत्स्यपुराणे पितृवंशानुकीर्तने गौरीनामाष्टोत्तरशत-
कथनं नाम त्रयोदशोऽध्यायः॥

सूत उवाच । लोकाः सोमपथा नाम यत्र मारीचनन्दनाः ।
वर्तन्ते देवपितरो देवा यान् भावयन्त्यलम् ॥ १ ॥
अग्निष्वात्ता इति ख्याता यज्वानो यत्र संस्थिताः ।
अच्छोदा नाम तेषान्तु मानसी कन्यका नदी ॥ २ ॥
अच्छोदन्नाम च सरः पितृभिर्निर्मितं पुरा ।
अच्छोदा तु तपश्चक्रे दिव्यं वर्षसहस्रकम् ॥ ३ ॥
आजग्मुः पितरस्तुष्टाः किल दातुञ्च तां वरम् ।
दिव्यरूपधराः सर्वे दिव्यमाल्यानुलेपनाः ॥ ४ ॥
सर्वे युवानो बलिनः कुसुमायुधसन्निभाः ।
तन्मध्येऽमावसुं नाम पितरं वीक्ष्य साऽङ्गना ॥ ५ ॥
वव्रे वरार्थिनी सङ्गं कुसुमायुधपीड़िता ।
योगाद्भ्रष्टा तु सा तेन व्यभिचारेण भामिनी ॥ ६ ॥
धरान्तु नास्पृशत् पूर्वं पपाताथ भुवस्तले ।
तिथावमावसुर्यस्या मिच्छां चक्रे न तां प्रति ॥ ७ ॥
धैर्येण तस्य सा लोकैरमावास्येति विश्रुता ।
पितृणां वल्लभा तस्मात्तस्या मक्षयकारकम् ॥ ८ ॥
अच्छोदाधोमुखी दीना लज्जिता तपसः क्षयात् ।
सा पितॄन् प्रार्थयामास पुरे चात्मप्रसिद्धये ॥ ९ ॥
विलप्यमाना पितृभिरिदमुक्ता तपस्विनी ।
भविष्यमर्थमालोक्य देवकार्यञ्च ते तदा ॥ १० ॥
इदमूचुर्महाभागाः प्रसादशुभया गिरा ।
दिवि दिव्यशरीरेण यत् किञ्चित् क्रियते बुधैः ॥ ११ ॥
तेनैव तत्कर्मफलं भुज्यते वरवर्णिनि ! ।
सद्यः फलन्ति कर्माणि देवत्वे प्रेत्य मानुषे ॥ १२ ॥

तस्मात्त्वं पुत्रि ! तपसः प्राप्स्यसे प्रेत्य तत्फलम् ।
अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ॥ १३ ॥
व्यतिक्रमात् पितॄणां त्वं कष्टं कुलमवाप्स्यसि ।
तस्माद्राज्ञो वसोः कन्या त्वमवश्यं भविष्यसि ॥ १४ ॥
कन्या भूत्वा च लोकान् स्वान् पुनराप्स्यसि दुर्लभान् ।
पराशरस्य वीर्येण पुत्रमेकमवाप्स्यसि ॥ १५ ॥
द्वीपे तु वदरी प्राये वादरायणमच्युतम् ।
स वेदमेकं बहुधा विभजिष्यति ते सुतः ॥ १६ ॥
पौरवस्यात्मजौ द्वौ तु समुद्रांशस्य शन्तनोः ।
विचित्रवीर्य्यस्तनयस्तथा चित्राङ्गदो नृपः ॥ १७ ॥
इमा वुत्पाद्य तनयौ क्षेत्रजावस्य धीमतः ।
प्रोष्ठपद्यष्टकारूपा पितृलोके भविष्यसि ॥ १८ ॥
नाम्ना सत्यवती लोके पितृलोके तथाऽष्टका ।
आयुरारोग्यदा नित्यं सर्वकामफलप्रदा ॥ १९ ॥
भविष्यसि परे काले नदीत्वञ्च गमिष्यसि ॥
पुण्यतोया सरिच्छ्रेष्ठा लोके ह्यच्छोदनामिका ॥ २० ॥
इत्युक्त्वा सगणस्तेषां तत्रैवान्तरधीयत ।
साप्यवाप च तत्सर्वं फलं यदुदितं पुरा ॥ २१ ॥
इति श्रीमत्स्यपुराणे पितृवंशानुकीर्त्तनो नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

सूत उवाच । विभ्राजा नाम चान्ये तु दिवि सन्ति सुवर्चसः ।
लोका वर्हिषदो यत्र पितरः सन्ति सुव्रताः ॥ १ ॥
यत्र वर्हिणयुक्तानि विमानानि सहस्रशः ।

सङ्कल्पत्र बर्हिषो यत्र तिष्ठन्ति फलदायिनः ॥ २ ॥
यत्राभ्युदयशालासु मोदन्ते श्राद्धदायिनः ।
यांश्च देवासुरगणा गन्धर्वाप्सरसाङ्गणाः ॥ ३ ॥
यक्षरक्षोगणाश्चैव यजन्ति दिवि देवताः ।
पुलस्त्यपुत्राः शतशस्तपोयोगसमन्विताः ॥ ४ ॥
महात्मानो महाभागा भक्तानामभयप्रदाः ।
एतेषां पीवरी कन्या मानसी दिवि विश्रुता ॥ ५ ॥
योगिनी योगमाता च तपश्चक्रे सुदारुणम् ।
प्रसन्नो भगवांस्तस्यावरं वव्रे तु सा हरेः ॥ ६ ॥
योगवन्तं सुरूपञ्च भर्तारं विजितेन्द्रियम् ।
देहि देव ! प्रसन्नस्त्वं पतिं मे वदताम्वरम् ॥ ७ ॥
उवाच देवो भविता व्यासपुत्रो यदा शुकः ।
भविता तस्य भार्या त्वं योगाचार्य्यस्य सुव्रते ! ॥ ८ ॥
भविष्यति च ते कन्या कृत्वी नाम च योगिनी ।
पाञ्चालाधिपतेर्देया मानुषस्य त्वया तदा ॥ ९ ॥
जननी ब्रह्मदत्तस्य योगसिद्धा च गौः स्मृता ।
कृष्णो गौरः प्रभुः शम्भुर्भविष्यन्ति च ते सुताः ॥१० ॥
महात्मानो महाभागा गमिष्यन्ति परम्पदम् ।
तानुत्पाद्य पुनर्योगात्त्वरा मोक्षमेष्यसि ॥ ११ ॥
सुमूर्त्तिमन्तः पितरो वशिष्ठस्य सुताः स्मृताः ।
नाम्ना तु मानसाः सर्वे सर्वे ते धर्म्ममूर्त्तयः ॥ १२ ॥
ज्योतिर्भासिषु लोकेषु ये वसन्ति दिवः परम् ।
विराजमानाः क्रीडन्ति यत्र ते श्राद्धदायिनः ॥ १३ ॥
सर्वकामसमृद्धेषु विमानेष्वपि पादजाः ।

किं पुनः श्राद्धदा विप्रा भक्तिमन्तः क्रियान्विताः॥१४॥
गौर्नाम कन्या येषान्तु मानसी दिवि राजते।
शुक्रस्य दयिता पत्नी साध्यानां कीर्त्तिवर्द्धिनी॥ १५॥
मरीचिगर्भा नाम्ना तु लोका मार्तण्डमण्डले।
पितरो यत्र तिष्ठन्ति हविष्मन्तोऽङ्गिरःसुताः॥ १६॥
तीर्थश्राद्धप्रदा यान्ति ये च क्षत्रियसत्तमाः।
राज्ञान्तु पितरस्ते वै स्वर्गमोक्षफलप्रदाः॥ १७॥
एतेषां मानसी कन्या यशोदा लोकविश्रुता।
पत्नी ह्यंशुमतः श्रेष्ठा स्नुषा पञ्चजनस्य च॥ १८॥
जनन्यथ दिलीपस्य भगीरथपितामही।
लोकाः कामदुघा नाम कामभोगफलप्रदाः॥ १९॥
सुस्वधा नाम पितरो यत्र तिष्ठन्ति सुव्रताः।
आज्यपा नाम लोकेषु कर्दमस्य प्रजापतेः॥ २०॥
पुलहाङ्गजदायादा वैश्यास्तान् भावयन्ति च।
यत्र श्राद्धकृतः सर्वे पश्यन्ति युगपद्गताः॥ २१॥
मातृभ्रातृपितृष्वसृ सखि सम्बन्धि बान्धवान्।
अपि जन्मायुतैर्दृष्टा ननु भूतान् सहस्रशः॥ २२॥
एतेषां मानसी कन्या विरजा नाम विश्रुता।
या पत्नी नहुषस्यासीद्ययातेर्जननी तथा॥ २३॥
एकाष्टकाऽभवत् पश्चाद् ब्रह्मलोके गता सती।
त्रय एते गणाः प्रोक्ताश्चतुर्थन्तु वदाम्यतः॥ २४॥
लोकास्तु मानसा नाम ब्रह्माण्डोपरि संस्थिताः।
येषान्तु मानसी कन्या नर्मदा नाम विश्रुता॥ २५॥
सोमपा नाम पितरो यत्र तिष्ठन्ति शाश्वताः।

कृत्वा सन्ध्यादिकं सर्वं मानसे साम्प्रतस्थिताः ॥२६॥
नर्मदा नाम तेषान्तु कन्या तोयवहा सरित् ।
भूतानि या पावयति दक्षिणापथगामिनी ॥ २७ ॥
तेभ्यः सर्वे तु मनवः प्रजाः सर्गेषु निर्मिताः ।
ज्ञात्वा श्राद्धानि कुर्वन्ति धर्माभावेऽपि सर्वदा ॥ २७ ॥
तेभ्य एव पुनः प्राप्य प्रसादाद्योगसन्ततिम् ।
पितृणामादिसर्गे तु श्राद्धमेव विनिर्मितम् ॥ २८ ॥
सर्वेषां राजतं पात्रमथवा रजतान्वितम् ।
दत्तं स्वधा पुरोधाय पितॄन् प्रीणाति सर्वदा ॥ ३० ॥
अग्नीषोमयमानान्तु कार्य्यमाप्यायनं बुधैः ।
अग्न्यभावेऽपि विप्रस्य पाणावपि जलेऽथवा ॥ ३१ ॥
अजाकर्णेऽश्वकर्णे वा गोष्ठे वा सलिलान्तिके ।
पितृणामम्बरं स्थानं दक्षिणा दिक् प्रशस्यते ॥ ३२॥
प्राचीनावीतमुदकं तिलाः सव्याङ्गमेव च ।
दर्भा मांसं चपाठीनं गोक्षीरं मधुरा रसाः ॥ ३३ ॥
खड्गलोहामिषमधु कुशश्यामाकशालयः ।
यवनीवारमुद्गेक्षुशुक्लपुष्पघृतानि च ॥ ३४ ॥
वल्लभानि प्रशस्तानि पितृणामिह सर्वदा ।
द्वेष्याणि सम्प्रवक्ष्यामि श्राद्धे वर्ज्यानि यानि तु ॥ ३५ ॥
मसूरशणनिष्पावराजमाषकुसुम्भिकाः ।
पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः ॥ ३६ ॥
न देयाः पितृकार्येषु पयश्चाजाविकं तथा ।
कोद्रवोदारचणकाः कपित्थं मधुकातसी ॥ ३ ॥
एतान्यपि न देयानि पितृभ्यः प्रियमिच्छता ।

पितॄन् प्रीणाति यो भक्त्या ते पुनः प्रीणयन्ति तम् ॥३८॥
यच्छन्ति पितरः पुष्टिं स्वर्गारोग्यं प्रजाफलम् ।
देवकार्य्यादपि पुनः पितृकार्य्यं विशिष्यते ॥ ३९ ॥
देवतानाञ्च पितरः पूर्वमाप्यायनं स्मृतम् ।
शीघ्रप्रसादास्त्वक्रोधानिःसङ्गाः स्थिरसौहृदाः ॥ ४० ॥
शान्तात्मानः शौचपराः सततं प्रियवादिनः ।
भक्तानुरक्ताः सुखदाः पितरः पूर्वदेवताः ॥ ४१ ॥
हविष्मतामाधिपत्ये श्राद्धदेवः स्मृतो रविः ।
एतद्वः सर्वमाख्यातं पितृवंशानुकीर्त्तनम् ॥ ४२ ॥
पुण्यं पवित्रमायुष्यं कीर्त्तनीयं सदा नृभिः ।
इति श्रीमत्स्यपुराणे पितृवंशानुकीर्त्तनं नाम
पञ्चदशोऽध्यायः समाप्तः ॥

---

## अथ षोडशोऽध्यायः ।

सूत उवाच । श्रुत्वैतत्सर्वमखिलं मनुः पप्रच्छ केशवम् ।
श्राद्धकालञ्च विविधं श्राद्धभेदं तथैव च ॥ १ ॥
श्राद्धेषु भोजनीया ये ये च वर्ज्या द्विजातयः ।
कस्मिन्वासरभागे वा पितृभ्यः श्राद्धमाचरेत् ॥ २ ॥
कस्मिन् दत्तं कथं याति श्राद्धन्तु मधुसूदन ! ।
विधिना केन कर्त्तव्यं कथं प्रीणाति तत्पितॄन् ॥३॥
मत्स्य उवाच । कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥ ४ ॥
नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते ।
नित्यं तावत् प्रवक्ष्यामि अर्घावाहनवर्जितम् ॥ ५ ॥

अदैवं तद्विजानीयात् पार्वणं पर्वसु स्मृतम् ।
पार्वणं त्रिविधं प्रोक्तं शृणु तावन्महीपते ॥ ६ ॥
पार्वणे ये नियोज्यास्तु तां शृणुष्व नराधिप ।।
पञ्चाग्निः स्नातकश्चैव त्रिसुपर्णः षडङ्गवित् ॥ ७ ॥
श्रोत्रियः श्रोत्रियसुतो विधिवाक्यविशारदः ।
सर्वज्ञो वेदविन्मन्त्री ज्ञातवंशः कुलान्वितः ॥८ ॥
पुराणवेत्ता धर्मज्ञः स्वाध्यायजपतत्परः ।
शिवभक्तः पितृपरः सूर्यभक्तोऽथ वैष्णवः ॥ ९ ॥
ब्रह्मण्यो योगविच्छान्तो विजितात्मा च शीलवान् ।
भोजयेच्चापि दौहित्रं यत्नतः स्वसुहृद्गुरून् ॥ १० ॥
विट्पतिं मातुलं बन्धुं ऋत्विगाचार्यसोमपान् ।
यश्च व्याकुरुते वाक्यं यश्च मीमांसतेऽध्वरम् ॥ ११ ॥
सामस्वरविधिज्ञश्च पङ्क्तिपावनपावनः ।
सामगो ब्रह्मचारी च वेदयुक्तोऽथ ब्रह्मवित् ॥ १२ ॥
यत्रैते भुञ्जते श्राद्धे तदेव परमार्थवित् ।
एते भोज्याः प्रयत्नेन वर्जनीयान्निबोध मे ॥ १३ ॥
पतितोऽभिशस्तः क्लीबश्च पिशुनव्यङ्गरोगिणः ।
कुनखी श्यावदन्तश्च कुण्डगोलाश्वपालकाः ॥ १४ ॥
परिविर्त्तिनियुक्तात्मा प्रमत्तोन्मत्तदारुणाः ।
वैडाली वकवृत्तिश्च दम्भी देवलकादयः ॥ १५ ॥
कृतघ्नान्नास्तिकांस्तद्वन्म्लेच्छदेशनिवासिनः ।
त्रिशङ्कुवर्ब्बरद्रावबीतद्रविडकोङ्कणान् ॥ १६ ॥
वर्जयेल्लिङ्गिनः सर्वान् श्राद्धकाले विशेषतः ।
पूर्ब्बेद्युरपरेद्युर्वा विनीतात्मा निमन्त्रयेत् ॥ १७ ॥

निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान् ।
वायुभूतानुगच्छन्ति तथासीनानुपासते ॥ १८ ॥
दक्षिणं जानुमालभ्य त्वं मया तु निमन्त्रितः ।
एवं निमन्त्र्य नियमं श्रावयेत् पितृबान्धवान् ॥ १९ ॥
अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ २० ॥
पितृयज्ञं विनिर्वर्त्य तर्पणाख्यन्तु योऽग्निमान् ।
पिण्डान्वाहार्यकं कुर्य्याच्छ्राद्धमिन्दुक्षये सदा ॥ २१ ॥
गोमयेनोपलिप्ते तु दक्षिणप्रवणे स्थले ।
श्राद्धं समाचरेद्भक्त्या गोष्ठे वा जलसन्निधौ ॥ २२ ॥
अग्निमान्निर्वपेत्पित्र्यं चरुञ्च सममुष्टिभिः ।
पितृभ्यो निर्वपामीति सर्वं दक्षिणतोन्यसेत् ॥ २३ ॥
अभिघार्य्यं ततः कुर्य्यान्निर्वापत्रयमग्रतः ।
तेऽपि तस्यायताः कार्य्याश्चतुरङ्गुलविस्तृताः ॥ २४ ॥
दर्व्वीत्रयन्तु कुर्व्वीत खादिरं रजतान्वितम् ।
रत्निमात्रं परिश्लक्ष्णं हस्ताकाराग्रमुत्तमम् ॥ २५ ॥
उदपात्रञ्च कांस्यञ्च मेक्षणञ्च समित्कुशान् ।
तिलाः पात्राणि सद्वासो गन्धधूपानुलेपनम् ॥ २६ ॥
आहरेदपसव्यन्तु सर्वं दक्षिणतः शनैः ।
एवमासाद्य तत्सर्वं भवनस्याग्रतो भुवि ॥ २७ ॥
गोमयेनोपलिप्तायां गोमूत्रेण तु मण्डलम् ।
अक्षताभिः सपुष्पाभिस्तदभ्यर्च्यापसव्यवत् ॥ २८ ॥
विप्राणां क्षालयेत्पादावभिनन्द्य पुनः पुनः ।
आसनेषूपक्लृप्तेषु दर्भवत्सु विधानवत् ॥ २९ ॥

उपस्पृष्टोदकान्विप्रानुपवेश्यानुमन्त्रयेत् ।
द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र च ॥ ३० ॥
भोजयेदीश्वरोऽपीह न कुर्य्याद्विस्तरं बुधः ।
दैवपूर्वं नियोज्याथ विप्रानर्घ्यादिना बुधः ॥ ३१ ॥
अग्नौ कुर्यादनुज्ञातो विप्रैर्विप्रो यथाविधि ।
स्वगृह्योक्तविधानेन कांस्ये कृत्वा चरुं ततः ॥ ३२ ॥
अग्नीषोमयमाभ्यान्तु कुर्यादाप्यायनं बुधः ।
दक्षिणाग्नौ प्रतीते वा य एकाग्निर्द्विजोत्तमः ॥ ३३ ॥
यज्ञोपवीती निर्वर्त्य ततः पर्युक्षणादिकम् ।
प्राचीनावीतिना कार्य्यमतः सर्वं विजानता ॥ ३४ ॥
षट् च तस्मादविशेषात् पिण्डान् कृत्वा ततोदकम् ।
दद्यादुदकपात्रैस्तु सतिलं सव्यपाणिना ॥ ३५ ॥
जान्वाच्य सव्यं यत्नेन दर्भयुक्तो विमत्सरः ।
विधाय लेखां यत्नेन निर्वापेष्ववनेजनम् ॥ ३६ ॥
दक्षिणाभिमुखः कुर्य्यात्करे दर्वीं निधाय वै ।
निधाय पिण्डमेकैकं सर्वदर्भेष्वनुक्रमात् ॥ ३७ ॥
निनयेदथ दर्भेषु नामगोत्रानुकीर्तनैः ।
तेषु दर्भेषु तं हस्तं निमृजाल्लेपभागिनाम् ॥ ३८ ॥
तथैव च ततः कुर्यात् पुनः प्रत्यवनेजनम् ।
षडभ्येतान्नमस्कृत्य गन्धधूपार्हणादिभिः ॥ ३९ ॥
एवमावाह्य तत्सर्वं वेदमन्त्रैर्यथोदितैः ।
एकाग्नेरेक एव स्यान्निर्वापो दर्विका तथा ॥ ४० ॥
ततः कृत्वान्तरे दद्यात् पत्नीभ्योऽन्नं कुशेषु सः ।

तद्वत्पिण्डादिके कुर्यादावाहनविसर्जनम् ॥ ४१ ॥
ततो गृहीत्वा पिण्डेभ्योमात्राः सर्वाः क्रमेण तु ।
तानेव विप्रान् प्रथमं प्राशयेद्यत्नतो नरः ॥ ४२ ॥
यस्मादन्नात् हृता मात्रा भक्षयन्ति द्विजातयः ।
अन्वाहार्यकमित्युक्तं तस्मात्तच्चन्द्रसंक्षये ॥ ४३ ॥
पूर्वं दत्त्वातु तद्धस्ते सपवित्रं तिलोदकम् ।
तत्पिण्डाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् ॥ ४४ ॥
वर्णयन् भोजयेदन्नं मिष्टं पूतञ्च सर्वदा ।
वर्जयेत् क्रोधपरतां स्मरन्नारायणं हरिम् ॥ ४५ ॥
तृप्तान् ज्ञात्वा ततः कुर्याद्विकिरन् सार्ववर्णिकम् ।
सोदकं चान्नमुद्धृत्य सलिलं प्रक्षिपेद्भुवि ॥ ४६ ॥
आचान्तेषु पुनर्दद्याज्जलपुष्पाक्षतोदकम् ।
स्वस्तिवाचनकं सर्वं पिण्डोपरि समाहरेत् ॥ ४७ ॥
देवाद्यन्तं प्रकुर्वीत श्राद्धनाशोऽन्यथा भवेत् ।
विसृज्य ब्राह्मणांस्तद्वत्तेषां कृत्वा प्रदक्षिणम् ॥ ४८ ॥
दक्षिणां दिशमाकाङ्क्षन् पितॄन् याचेत मानवः ।
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ ४९ ॥
श्रद्धा च नो मा व्यगमत् बहु देयञ्च नोऽस्त्विति ।
अन्नञ्च नो बहुभवेदतिथींश्च लभेमहि ॥ ५० ॥
याचितारश्च नः सन्तु माच याचिष्म कञ्चन ।
एतदस्त्विति तत् प्रोक्तमन्वाहार्यन्तु पार्वणम् ॥ ५१ ॥
यथेन्दुसंक्षये तद्वदन्यत्रापि निगद्यते ।
पिण्डांस्तु गोऽजविप्रेभ्योदद्यादग्नौ जलेऽपिवा ॥ ५२ ॥
विप्रान्ततो वा विकिरेद्वयोभिरभिवाशयेत् ।

पत्नी तु मध्यमं पिण्डं प्राशयेद्विनयान्विता ॥ ५२ ॥
आधत्त पितरो गर्भमत्र सन्तानवर्द्धनम् ।
तावदुच्छेषणं तिष्ठेद्यावद्विप्रा विसर्जिताः ॥ ५४ ॥
वैश्वदेवं ततः कुर्यान्निवृत्ते पितृकर्मणि ।
इष्टैः सह ततः शान्तो भुञ्जीत पितृसेवितम् ॥ ५५ ॥
पुनर्भोजनमध्वानं यानमायासमैथुनम् ।
श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् ॥ ५६ ॥
स्वाध्यायं कलहं चैव दिवास्वप्नञ्च सर्वदा ।
अनेन विधिना श्राद्धं निरुद्यस्येह निर्वपेत् ॥ ५७ ॥
कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा ।
यत्र यत्र प्रदातव्यं सपिण्डीकरणात्परम् ।
तत्रानेन विधानेन देयमग्निमता सदा ॥ ५८ ॥
इति श्रीमत्स्यपुराणे अग्निमच्छ्राद्धे श्राद्धकल्पो नाम
षोडशोऽध्यायः ॥

---

अथ सप्तदशोऽध्यायः ।

सूत उवाच । अतः परं प्रवक्ष्यामि विष्णुना यदुदीरितम् ।
श्राद्धं साधारणं नाम भुक्तिमुक्तिफलप्रदम् ॥ १ ॥
अयने विषुवे युग्मे सामान्ये चार्कसंक्रमे ।
अमावास्याष्टकाकृष्णपक्षे पञ्चदशीषु च ॥ २ ॥
आर्द्रामघारोहिणीषु द्रव्यब्राह्मणसङ्गमे ।
गजच्छायाव्यतीपाते विष्टि वैधृतिवासरे ॥ ३ ॥
वैशाखस्य तृतीयायां नवमी कार्त्तिकस्य च ।
पञ्चदशी च माघस्य नभस्ये च त्रयोदशी ॥ ४ ॥

युगादयः स्मृता ह्येता दत्तस्याक्षय्यकारिकाः ।
तथा मन्वन्तरादौ च देयं श्राद्धं विजानता ॥ ५ ॥
अश्वयुक् शुक्लनवमी द्वादशी कार्तिकी तथा ।
तृतीया चैत्र मासस्य तथा भाद्रपदस्य च ॥ ६ ॥
फाल्गुनस्य ह्यमावास्या पौषस्यैकादशी तथा ।
आषाढ़स्याऽपि दशमी माघमासस्य सप्तमी ॥ ७ ॥
श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ।
कार्तिकी फाल्गुनी चैत्री ज्येष्ठपञ्चदशी सिता ।
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ॥ ८ ॥
यस्यां मन्वन्तरस्यादौ रथमाप दिवाकरः ।
माघमासस्य सप्तम्यां सा तु स्याद्रथसप्तमी ॥ ९ ॥
पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत् पितरो वदन्ति ॥१०॥
वैशाख्यामुपरागेषु तथोत्सवमहालये ।
तीर्थायतनगोष्ठेषु द्वीपोद्यानगृहेषु च ॥ ११ ॥
विविक्तेषूपलिप्तेषु श्राद्धं देयं विजानता ।
विप्रान् पूर्वं परे चाह्नि विनीतात्मा निमन्त्रयेत् ॥१२॥
शीलवृत्तगुणोपेतान् वयोरूपसमन्वितान् ।
द्वौ दैवे त्रींस्तथा पैत्र्ये एकैकमुभयत्र वा ॥ १३ ॥
भोजयेत् सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ।
विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यासनपूर्वकम् ॥ १४ ॥
पूरयेत्पात्रयुग्मन्तु स्थाप्य दर्भपवित्रकम् ।
शन्नो देवीत्यपः कुर्य्याद्यवोऽसीति यवानपि ॥ १५ ॥
गन्धपुष्पैश्च संपूज्य वैश्वदेवं प्रतिन्यसेत् ।

विश्वे देवा स इत्याभ्यामावाह्य विकिरेद्यवान् ॥१६॥
गन्धपुष्पैरलङ्कृत्य या दिव्येत्यप उत्सृजेत् ।
अभ्यर्च्य ताभ्यामुत्सृष्टं पितृकार्य्यं समारभेत् ॥१७॥
दर्भासनन्तु दत्त्वादौ त्रीणि पात्राणि पूरयेत् ।
सपवित्राणि कृत्वादौ शन्नो देवीत्यपः क्षिपेत् ॥१८॥
तिलोऽसीति तिलान् कुर्य्याद्गन्धपुष्पादिकं पुनः ।
पात्रं वनस्पतिमयं तथा पर्णमयं पुनः ॥१९॥
जलजं वाथ कुर्व्वीत तथा सागरसम्भवम् ।
सौवर्णं राजतं वापि पितॄणां पात्रमुच्यते ॥२०॥
रजतस्य कथा वापि दर्शनं दानमेव वा ।
राजतैर्भाजनैरेषामथवा रजतान्वितैः ॥२१॥
वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते ।
तथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम् ॥२२॥
शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्य्येषु वर्जयेत् ॥२३॥
एवं पात्राणि संकल्प्य यथालाभं विमत्सरः ।
या दिव्येति पितुर्नाम गोत्रैर्दर्भकरोन्यसेत् ॥२४॥
पितॄनावाहयिष्यामि कुर्वित्युक्तस्तु तैः पुनः ।
उशन्तस्त्वा तथायन्तु ऋग्भ्यामावाहयेत् पितॄन् ॥२५॥
यादिव्येत्यर्घ्यमुत्सृज्य दद्याद् गन्धादिकांस्ततः ।
हस्तात्तदुदकं पूर्वं दत्त्वा संस्रवमादितः ॥२६॥
पितृपात्रे निधायाथ न्युब्जमुत्तरतोन्यसेत् ।
पितृभ्यः स्थानमसीति निधाय परिषेचयेत् ॥२७॥
तत्रापि पूर्ववत् कुर्यादग्निकार्यं विमत्सरः ।

उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेत् ॥ २८ ॥
प्रशान्तचित्तः सततं दर्भपाणिरशेषतः ।
गुणाढ्यैः सूपशाकैश्च नानाभक्ष्यैर्विशेषतः ॥ २९ ॥
अन्नन्तु सदधिक्षीरं गोघृतं शर्करान्वितम् ।
मासम्प्रीणाति वै सर्वान् पितॄनित्याह केशवः ॥ ३० ॥
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ॥ ३१ ॥
षण्मासं छागमांसेन तृप्यन्ति पितरस्तथा ।
सप्त पार्षतमांसेन तथाष्टावैणजेन तु ॥ ३२ ॥
दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः ।
शशकूर्मजमांसेन मासानेकादशैव तु ॥ ३३ ॥
संवत्सरन्तु गव्येन पयसा पायसेन च ।
रौरवेण च तृप्यन्ति मासान् पञ्चदशैव तु ॥ ३४ ॥
वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ।
कालशाकेन चानन्ता खड्गमांसेन चैव हि ॥ ३५ ॥
यत्किञ्चिन्मधुसंमिश्रं गोक्षीरं घृतपायसम् ।
दत्तमक्षयमित्याहुः पितरः पूर्वदेवताः ॥ ३६ ॥
स्वाध्यायं श्रावयेत् पित्र्यं पुराणान्यखिलानि च ।
ब्रह्मविष्ण्वर्करुद्राणां स्तवानि विविधानि च ॥ ३७ ॥
इन्द्राग्निसोमसूक्तानि पावनानि स्वशक्तितः ।
बृहद्रथन्तरं तद्वज्ज्येष्ठसामसरौहिणम् ॥ ३८ ॥
तथैव शान्तिकाध्यायं मधुब्राह्मणमेव च ।
मण्डलं ब्राह्मणं तद्वत् प्रीतिकारि तु यत् पुनः ॥ ३९ ॥
विप्राणामात्मनश्चैव तत्सर्वं समुदीरयेत् ।

भुक्तवत्सु ततस्तेषु भोजनोपान्तिके नृप ! ॥ ४० ॥
सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा ।
समुत्सृजेद् भुक्तवतामग्रतो विकिरेद् भुवि ॥ ४१ ॥
अग्निदग्धास्तु ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु प्रयान्तु परमाङ्गतिम् ॥ ४२ ॥
येषां न माता न पिता न बन्धुर्न गोत्रशुद्धिर्न तथान्नमस्ति ।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत् प्रयातु लोकेषु सुखाय तद्वत् ॥ ४३ ॥
असंस्कृत प्रमीतानान्त्यक्तानां कुलयोषिताम् ।
उच्छिष्टभागधेयः स्याद्दर्भे विकिरयोश्च यः ॥ ४४ ॥
तृप्ता ज्ञात्वोदकं दद्यात् सकृद्विप्रकरे तथा ।
उपलिप्ते महीपृष्ठे गोमयकृन्मूत्रवारिणा ॥ ४५ ॥
निधाय दर्भान् विधिवद्दक्षिणाग्रान् प्रयत्नतः ।
सर्ववर्णेन चान्नेन पिण्डांस्तु पितृयज्ञवत् ॥ ४६ ॥
अवनेजनपूर्वन्तु नामगोत्रेण मानवः ।
गन्धधूपादिकं दद्यात् कृत्वा प्रत्यवनेजनम् ॥ ४७ ॥
जान्वाच्यसव्यं सव्येन पाणिनाथ प्रदक्षिणम् ।
पित्र्यमानीय तत्कार्यं विधिवद्दर्भपाणिना ॥ ४८ ॥
दीपप्रज्वालनं तद्वत् कुर्यात् पुष्पार्चनं बुधः ।
अथाचान्तेषु चाचम्य वारि दद्यात् सकृत् सकृत् ॥४९॥
अथ पुष्पाक्षतान् पश्चादक्षय्योदकमेव च ।
सतिलं नाम गोत्रेण दद्याच्छक्त्या च दक्षिणाम् ॥५० ॥
गोभूहिरण्यवासांसि भव्यानि शयनानि च ।
दद्याद्यदिष्टं विप्राणामात्मनः पितुरेव च ॥ ५१ ॥
वित्तशाठ्येन रहितः पितृभ्यः प्रीतिमावहन् ।

ततः स्वधावाचनकं विश्वेदेवेषु चोदकम् ॥ ५१ ॥
दत्त्वाशीः प्रतिगृह्णीयाद्द्विजेभ्यः प्राङ्मुखो बुधः।
अघोराः पितरः सन्तु सन्त्वित्युक्तः पुनर्द्विजैः ॥५३ ॥
गोत्रं तथा वर्द्धन्तामस्तथेत्युक्तश्च तैः पुनः।
दातारो नोऽभिवर्द्धन्तामिति चैवमुदीरयेत् ॥ ५४ ॥
एताः सत्याशिषः सन्तु सन्त्वित्युक्तश्च तैः पुनः।
स्वस्तिवाचनकं कुर्यात् पिण्डानुद्धृत्य भक्तितः ॥ ५५ ॥
उच्छेषणन्तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः।
ततो गृहबलिं कुर्यादिति धर्मव्यवस्थितिः ॥ ५६ ॥
उच्छेषणं भूमिगतमजिह्मस्यास्तिकस्य च।
दासवर्गस्य तत्पित्र्यं भागधेयं प्रचक्षते ॥ ५७ ॥
पितृभिर्निर्मितं पूर्वमेतदाप्यायनं सदा।
अपुत्राणां सपुत्राणां स्त्रीणामपि नराधिप ! ॥ ५८ ॥
ततस्तानग्रतः स्थित्वा परिगृह्योदपात्रकम्।
वाजेवाज इति जपन् कुशाग्रेण विसर्जयेत् ॥ ५९ ॥
बहिः प्रदक्षिणान् कुर्यात् पदान्यष्टावनुव्रजन्।
बन्धुवर्गेण सहितः पुत्रभार्यासमन्वितः ॥ ६० ॥
निवृत्य प्रणिपत्याथ पर्युक्ष्याग्निं समन्त्रवत्।
वैश्वदेवं प्रकुर्वीत नैत्यकं बलिमेव च ॥ ६१ ॥
ततस्तु वैश्वदेवान्ते सभृत्यसुतबान्धवः।
भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् ॥ ६२ ॥
एतच्चानुपनीतोऽपि कुर्यात् सर्वेषु पर्वसु।
श्राद्धं साधारणं नाम सर्वकामफलप्रदम् ॥ ६३ ॥
भार्याविरहितोऽप्येतत् प्रवासस्थोऽपि भक्तिमान्।

शूद्रोऽप्यमन्त्रवत् कुर्य्यादनेन विधिना बुधः ॥ ६४ ॥
तृतीयमाभ्युदयिकं वृद्धिश्राद्धं तदुच्यते ।
उत्सवानन्दसम्भारे यज्ञोद्वाहादिमङ्गले ॥ ६५ ॥
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ।
ततो मातामहा राजन् ! विश्वे देवास्तथैव च ॥ ६६ ॥
प्रदक्षिणोपचारेण दध्यक्षतफलोदकैः ।
प्राङ्मुखो निर्वपेत् पिण्डान् दूर्वया च कुशैर्युतान् ॥ ६७ ॥
सम्पन्नमित्यभ्युदये दद्यादर्घ्यं द्वयोर्द्वयोः ।
युग्मा द्विजातयः पूज्या वस्त्रकार्त्तस्वरादिभिः ॥ ६८ ॥
तिलार्थस्तु यवैः कार्यो नान्दिशब्दानुपूर्वकः ।
माङ्गल्यानि च सर्वाणि वाचयेद्द्विजपुङ्गवैः ॥ ६९ ॥
एवं शूद्रोऽपि सामान्यवृद्धिश्राद्धेऽपि सर्वदा ।
नमस्कारेण मन्त्रेण कुर्यादामान्नतः सदा ॥ ७० ॥
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः ।
दानेन सर्वकामाप्तिरस्य सञ्जायते यतः ॥ ७१ ॥

इति श्रीमत्स्यपुराणे साधारणाभ्युदयकीर्तनो नाम
सप्तदशोऽध्यायः ।

---

## अथाष्टादशोऽध्यायः ।

सूत उवाच । एकोद्दिष्टमतो वक्ष्ये यदुक्तं चक्रपाणिना ।
मृते पुत्रैर्यथाकार्यमाशौचञ्च पितर्यपि ॥ १ ॥
दशाहं शावमाशौचं ब्राह्मणेषु विधीयते ।
क्षत्रियेषु दश द्वे च पक्षं वैश्येषु चैव हि ॥ २ ॥
शूद्रेषु मासमाशौचं सपिण्डेषु विधीयते ।

नैयम्याऽज्ञतवृत्तस्य निरालम्बरतः स्मृतम् ॥ ३ ॥
जननेऽप्येवमेव स्यात् सर्ववर्णेषु सर्वदा ।
तथास्थिसञ्चयादूर्ध्वमङ्गस्पर्शो विधीयते ॥ ४ ॥
प्रेताय पिण्डदानन्तु द्वादशाहं समाचरेत् ।
पाथेयं तस्य तत् प्रोक्तं यतः प्रीतिकरं महत् ॥ ५ ॥
तस्मात् प्रेतपुरं प्रेतो द्वादशाहं न नीयते ।
गृहं पुत्रं कलत्रञ्च द्वादशाहं प्रपश्यति ॥ ६ ॥
तस्मान्निधेयमाकाशे दशरात्रं पयस्तथा ।
सर्वदाहोपशान्त्यर्थं मध्वश्रमविनाशनम् ॥ ७ ॥
तत एकादशाहे तु द्विजानेकादशैव तु ।
स्नातादिः स्मृतकान्ते तु भोजयेदयुतो द्विजान् ॥ ८ ॥
द्वितीयेऽह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेत् ।
आवाहनाग्नौकरणं दैवहीनं विधानतः ॥ ९ ॥
एकं पवित्रमेकोऽर्घ एकः पिण्डो विधीयते ।
उपतिष्ठतामित्येतद्देयं पश्चात्तिलोदकम् ॥ १० ॥
स्वादितं विकिरेद्ब्रूयाद्विसर्गे चाभिरम्यताम् ।
शेषं पूर्ववदत्रापि कार्यं वेदविदा पितुः ॥ ११ ॥
अनेन विधिना सर्वं मनुमासं समाचरेत् ।
सूतकान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ॥ १२ ॥
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्विताम् ।
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ॥ १३ ॥
वृषोत्सर्गं प्रकुर्वीत देया च कपिला शुभा ।
उदकुम्भश्च दातव्यो भक्ष्यभोज्यसमन्वितः ॥ १४ ॥
यावदब्दं मर्त्येष्ठ ! सतिलोदकपूर्वकम् ।

ततः संवत्सरे पूर्णे सपिण्डीकरणं भवेत् ॥ १५ ॥
सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभाग् भवेत् ।
वृद्धिपूर्वेषु योग्यश्च गृहस्थस्य भवेत्ततः ॥ १६ ॥
सपिण्डीकरणे श्राद्धे देवपूर्वं नियोजयेत् ।
पितॄन्निवासयेत्तत्र पृथक् प्रेतं विनिर्दिशेत् ॥ १७ ॥
गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् ।
अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ १८ ॥
तद्वत्संकल्प्य चतुरः पिण्डान् पिण्डप्रदस्तदा ।
ये समाना इति द्वाभ्यां मध्यन्तु विभजेत्त्रिधा ॥१९॥
चतुर्थस्य पुनः कार्यं न कदाचिदतो भवेत् ।
ततः पितृत्वमापन्नः सर्वतस्तुष्टिमागतः ॥ २० ॥
अग्निष्वात्तादिमध्यत्वं प्राप्नोत्यमृतमुत्तमम् ।
सपिण्डीकरणादूर्ध्वं तस्मै तस्मान्न दीयते ॥ २१ ॥
पितृष्वेव तु दातव्यं तत् पिण्डो येषु संस्थितः ।
ततः प्रभृति संक्रान्तावुपरागादि पर्वसु ॥ २२ ॥
त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृताहनि ।
एकोद्दिष्टं परित्यज्य मृताहे यः समाचरेत् ॥ २३ ॥
सदैव पितृहा स स्यान्मातृभ्रातृविनाशकः ।
मृताहे पार्वणं कुर्वन्नधोऽधो याति मानवः ॥ २४ ॥
संपृक्तेष्वाकुलीभावः प्रेतेषु तु यतो भवेत् ।
प्रतिसंवत्सरं तस्मादेकोद्दिष्टं समाचरेत् ॥ २५ ॥
यावदब्दन्तु यो दद्यादुदकुम्भं विमत्सरः ।
प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ॥ २६ ॥
आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा ।

तेनाग्नौकरणं कुर्यात् पिण्डांस्तेनैव निर्वपेत् ॥२७॥
त्रिभिः सपिण्डीकरणे अतीतैस्त्रितये पिता।
यदा प्राप्स्यति कालेन तदा मुच्येत बन्धनात् ॥२८॥
मुक्तोऽपि लेपभागित्वं प्राप्नोति कुशमार्जनात्।
लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥२९॥
इति श्रीमत्स्यपुराणे सपिण्डीकरणकल्पो नाम
अष्टादशोऽध्यायः।

---

अथ एकोनविंशोऽध्यायः।

ऋषय ऊचुः। कथं कव्यानि देयानि हव्यानि च जनैरिह।
गच्छन्ति पितृलोकस्थान् प्रापकः कोऽत्र गद्यते ॥१॥
यदि मर्त्यो द्विजो भुङ्क्ते हूयते यदि वानले।
शुभाशुभात्मकैः प्रेतैर्दत्तन्तद् भुज्यते कथम् ॥ २ ॥
सूत उवाच। वसून् वदन्ति च पितॄन् रुद्रांश्चैव पितामहान्।
प्रपितामहांस्तथा दित्यानित्येवं वैदिकी श्रुतिः ॥३॥
नामगोत्रं पितॄणान्तु प्रापकं हव्यकव्ययोः।
श्राद्धस्य मन्त्राः श्रद्धा च उपयोज्यातिभक्तितः ॥४॥
अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः।
नामगोत्रकालदेशाभवान्तरगतानपि ॥ ५ ॥
प्राणिनः प्रीणयन्त्येते तदाहारत्वमागतान्।
देवो यदि पिता जातः शुभकर्मानुयोगतः ॥ ६ ॥
तस्यान्नममृतं भूत्वा दिव्यत्वेऽप्यनुगच्छति।
दैत्यत्वे भोगरूपेण पशुत्वे च तृणं भवेत् ॥ ७ ॥

आहारं वायुरूपेण सर्पत्वेऽप्युपतिष्ठति ।
पानं भवति यक्षत्वे राक्षसत्वेऽपि तथामिषम् ॥ ८ ॥
दनुजत्वे तथा माया प्रेतत्वे रुधिरोदकम् ।
मनुष्यत्वेऽन्नपानानि नानाभोगरसं भवेत् ॥ ९ ॥
रतिशक्तिः स्त्रियः कान्ता भोज्यं भोजनशक्तिता ।
दानशक्तिः सविभवा रूपमारोग्यमेव च ॥ १० ॥
श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागमः ।
आयुः पुत्रान्धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ ११
राज्यं चैव प्रयच्छन्ति प्रीताः पितृगणा नृणाम् ।
श्रूयते च पुरा मोक्षं प्राप्ताः कौशिकसूनवः ।
पञ्चभिर्जन्मसम्बन्धैर्गता विष्णोः परं पदम् ॥ १२ ॥
इति श्रीमत्स्यपुराणे श्राद्धकल्पे फलानुगमनो नाम
एकोनविंशोऽध्यायः ॥ १९ ॥

---

अथ विंशोऽध्यायः ॥

ऋषय ऊचुः । कथं कौशिकदायादाः प्राप्तास्ते योगमुत्तमम् ।
पञ्चभिर्जन्मसम्बन्धैः कथं कर्म्मक्षयो भवत् ॥ १ ॥
सूत उवाच । कौशिको नाम धर्म्मात्मा कुरुक्षेत्रे महान् ऋषिः ।
नामतः कर्म्मतस्तस्य सुतान् सप्त निबोधत ॥ २ ॥
स्वसृपः क्रोधनो हिंस्रः पिशुनः कविरेव च ।
वाग्दुष्टः पितृवर्त्ती च गर्गशिष्यास्तदाभवन् ॥ ३ ॥
पितर्य्युपरते तेषामभूद् दुर्भिक्षमुल्वणम् ।
अनावृष्टिश्च महती सर्वलोकभयङ्करी ॥ ४ ॥

गर्गादेश्चाहने दोग्ध्रीं रचन्तस्ते तपोधनाः।
खादामः कपिलामेतां वयं क्षुत्पीड़िता भृशम् ॥५॥
इति चिन्तयतां पापं लघुः प्राह तदानुजः।
यद्यवश्यमियं बध्या श्राद्धरूपेण योज्यताम् ॥ ६ ॥
श्राद्धे नियोज्यमाने यं पापात् त्रास्यति नो ध्रुवम्।
एवं कुर्व्वित्यनुज्ञातः पितृवर्त्ती तदानुजैः ॥ ७ ॥
चक्रे समाहितः श्राद्धमुपयुज्य च तां पुनः।
द्वौ दैवे भ्रातरौ कृत्वा पित्र्ये त्रीनप्यनुक्रमात् ॥८॥
तथैकमतिथिं कृत्वा श्राद्धदः स्वयमेव तु।
चकार मन्त्रवच्छ्राद्धं स्मरन् पितृपरायणः ॥ ९ ॥
विना गवा वत्सकोऽपि गुरवे विनिवेदितः।
व्याघ्रेण निहता धेनुर्वत्सोऽयं प्रतिगृह्यताम् ॥१०॥
एवं सा भक्षिता धेनुः सप्तभिस्तैस्तपोधनैः।
वैदिकं बलमाश्रित्य क्रूरे कर्म्मणि निर्भयाः ॥ ११ ॥
ततः कालात्तमुष्टा स्म व्याधा दाशपुरेऽभवन्।
जातिस्मरत्वं प्राप्तास्ते पितृभावेन भाविताः ॥ १२ ॥
यत् कृतं क्रूरकर्म्मापि श्राद्धरूपेण तैस्तदा।
तेन ते भवने जाता व्याधानां क्रूरकर्मिणाम् ॥ १३ ॥
पितृणाञ्चैव माहात्म्याज्जाता जातिस्मराश्च ते।
ते तु वैराग्ययोगेन श्राश्रायानशनं पुनः ॥ १४ ॥
जातिस्मराः सप्त जाता मृगाः कालञ्जरे गिरौ।
नीलकण्ठस्य पुरतः पितृभावानुभाविताः ॥ १५ ॥
तत्रापि ज्ञानवैराग्यात् प्राणानुत्सृज्य धर्म्मतः।
लोकैरवेक्ष्यमाणास्ते तीर्थान्तेऽनशनेन तु ॥ १६ ॥

मानसे चक्रवाकाश्च सञ्जाताः सप्त योगिनः ।
नामतः कर्मतः सर्व्वान् शृणुध्वं द्विजसत्तमाः ! ॥१७ ॥
सुमनाः कुमुदः शुद्ध श्छिद्रदर्शी सुनेत्रकः ।
सुनेत्रश्चांशुमांश्चैव सप्तैते योगपारगाः ॥ १८ ॥
योगभ्रष्टा स्त्रय स्तेषां वभ्रमुश्चाल्पचेतनाः ।
दृष्ट्वा विभ्राजमानं तमुद्याने स्त्रीभिरन्वितम् ॥ १९॥
क्रीडन्तं विविधैर्भावैर्महाबलपराक्रमम् ।
पाञ्चालान्वयसम्भूतं प्रभूतबलवाहनम् ॥ २० ॥
राज्यकामो भवच्चैक स्तेषां मध्ये जलौकसाम् ।
पितृवर्त्ती च यो विप्रः श्राद्धकृत् पितृवत्सलः ॥ २१ ॥
अपरौ मन्त्रिणौ दृष्ट्वा प्रभूतबलवाहनौ ।
मन्त्रित्वे च कृतुश्चैच्छामस्मिन्मर्त्ये द्विजोत्तमाः ॥ २२॥
तन्मध्ये ये तु निष्कामास्ते वभूवुर्द्विजोत्तमाः ! ।
विभ्राजमानस्त्वेकोऽभूत् ब्रह्मदत्त इति स्मृतः ॥२३॥
मन्त्रिपुत्रौ तथा चोभौ कण्डरीक सुबालकौ ।
ब्रह्मदत्तोऽभिषिक्तः सन् पुरोहितविपश्चिता ॥ २४ ॥
पाञ्चालराजो विक्रान्तः सर्व्वशास्त्रविशारदः ।
योगवित् सर्व्वजन्तूनां रुतवेत्ताऽभवत्तदा ॥ २५ ॥
तस्य राज्ञोऽभवद्भार्य्या देवलस्यात्मजा शुभा ।
सन्नतिर्नाम विख्याता कपिला याभवत् पुरा ॥ २६ ॥
पितृकार्य्ये नियुक्तत्वादभवद्ब्रह्मवादिनी ।
तया चकार सहितः सराज्यं राजनन्दनः ॥ २७ ॥
कदाचिदुद्यानगतस्तया सह स पार्थिवः ।
ददर्श कीटमिथुनमनङ्गकलहाकुलम् ॥ २८ ॥

पिपीलिका मनुनयन् परितः कीटकामुकः ।
पञ्चवाणाभितप्ताङ्गः स गद्गदमुवाच ह ॥ २९ ॥
न त्वया सदृशी लोके कामिनी विद्यते क्वचित् ।
मध्यक्षामातिजघना बृहद्वक्षोऽभिगामिनी ॥ ३० ॥
सुवर्णवर्णा सुश्रोणी मन्मृता चारुहासिनी ।
सुलक्षणेतररसना गुडशर्करवत्सला ॥ ३१ ॥
भोक्ष्यसे मयि भुक्ते त्वं स्नासि स्नाते तथा मयि ।
प्रोषिते सति दीना त्वं क्रुद्धेऽपि भयचञ्चला ॥ ३२ ॥
किमर्थं वद कल्याणि ! सरोषवदना स्थिता ।
सा तमाह सकोपा तु किमालपसि मां शठ ! ॥ ३३ ॥
त्वया मोदकचूर्णन्तु मां विहाय विनेष्यता ।
प्रदत्तं समतिक्रान्ते दिनेऽन्यस्याः समन्मथ ! ॥ ३४ ॥
पिपीलिक उवाच । त्वत्सादृश्यान्मया दत्तमन्यस्यै वरवर्णिनि !।
तदेकमपराधं मे क्षन्तुमर्हसि भामिनि ! ॥ ३५ ॥
नैतदेवं करिष्यामि पुनः क्वापीह सुव्रते ! ।
स्पृशामि पादौ सत्येन प्रसीद प्रणतस्य मे ॥ ३६ ॥
सूत उवाच । इति तद्वचनं श्रुत्वा सा प्रसन्नाऽभवत्ततः ।
आत्मानमर्पयामास मोहनाय पिपीलिका ॥ ३७ ॥
ब्रह्मदत्तोऽप्यशेषन्तं ज्ञात्वा विस्मयमागमत् ।
सर्वसत्त्वरुतज्ञत्वात् प्रसादाच्चक्रपाणिनः ॥ ३८ ॥

इति मत्स्यपुराणे आद्यकल्पे श्राद्धमाहात्म्ये पिपीलिकावहासो नाम विंशतितमोऽध्यायः ।

---

## अथ एकविंशतितमोऽध्यायः ।

ऋषय ऊचुः । कथं सत्वसतोऽभूद् ब्रह्मदत्तो धरातले ।
तत्राभवत् कस्य कुले चक्रवाकचतुष्टयम् ॥ १ ॥
सूत उवाच । तस्मिन्नेव पुरे जातास्ते च चक्राह्वयास्तदा ।
वृद्धद्विजस्य दायादा विप्रा जातिस्मराः पुरा ॥ २ ॥
धृतिमांस्तत्त्वदर्शी च विद्याचण्डस्तपोत्सुकः ।
नामतः कर्म्मतश्चैते सुदरिद्रस्य ते सुताः ॥ ३ ॥
तपसे बुद्धिरभवत्तदा तेषां द्विजन्मनाम् ।
यास्यामः परमां सिद्धिमित्यूचुस्ते द्विजोत्तमाः ॥ ४ ॥
ततस्तद्वचनं श्रुत्वा सुदरिद्रो महातपाः ।
उवाच दीनया वाचा किमेतदिति पुत्रकाः ! ॥ ५ ॥
अधर्म्म एष इति वः पिता तानभ्यवारयत् ।
वृद्धं पितरमुत्सृज्य दरिद्रं वनवासिनः ॥ ६ ॥
को नु धर्म्मोऽत्र भविता मत्त्यागाद् गतिरेव वा ।
ऊचुस्ते कल्पिता वृत्तिस्तव तात ! वदस्व तत् ॥ ७ ॥
वित्तमेतत् पुरो राज्ञः स ते दास्यति पुष्कलम् ।
धनं ग्रामसहस्राणि प्रभाते पठतस्तव ॥ ८ ॥
ये विप्रमुख्याः कुरुजाङ्गलेषु दासास्तथादासपुरे मृगाश्च ।
कालञ्जरे सप्त च चक्रवाकाः ये मानसे ते वयमत्र सिद्धाः ।९॥
इत्युक्त्वा पितरं जग्मुस्ते वनं तपसे पुनः ।
वृद्धोऽपि राजभवनं जगामात्मार्थसिद्धये ॥ १० ॥
अनघो नाम वैभ्राजः पाञ्चालाधिपतिः पुरा ।
पुत्रार्थी देवदेवेशं हरिं नारायणं प्रभुम् ॥ ११ ॥
आराधयामास विभुं तीव्रव्रतपरायणः ।
ततः कालेन महता तुष्टस्तस्य जनार्दनः ॥ १२ ॥

वरं वृणीष्व भद्रं ते हृदयेनेप्सितं नृप !।
एवमुक्तस्तु देवेन तत्र स वरमुत्तमम् ॥ १३ ॥
पुत्रं मे देहि देवेश ! महाबलपराक्रमम्।
पारगं सर्वशास्त्राणां धार्मिकं योगिनां परम् ॥१४॥
सर्वसत्त्वरुतज्ञं मे देहि योगिनमात्मजम्।
एवमस्त्विति विश्वात्मा तमाह परमेश्वरः ॥ १५ ॥
पश्यतां सर्वदेवानां तत्रैवान्तरधीयत।
ततः स तस्य पुत्रोऽभूत् ब्रह्मदत्तः प्रतापवान् ॥ १६ ॥
सर्वसत्त्वानुकम्पी च सर्वसत्त्वबलाधिकः।
सर्वसत्त्वरुतज्ञश्च सर्वसत्त्वेश्वरेश्वरः ॥ १७ ॥
अहसत्तेन योगात्मा स पिपीलिकरागतः।
यत्र तत् कीटमिथुनं रममाणमवस्थितम् ॥ १८ ॥
ततः सा सन्नतिर्दृष्ट्वा तं हसन्तं सुविस्मिता।
किमप्याशङ्क्य मनसा तमपृच्छन्नरेश्वरम् ॥ १९ ॥
सन्नतिरुवाच। अकस्मादतिहासस्ते किमर्थमभवन्नृप !।
हास्यहेतुं न जानामि यदकाले कृतं त्वया ॥ २० ॥
सूत उवाच। अवदद्राजपुत्रोऽपि स पिपीलिकभाषितम्।
रागवाग्भिः समुत्पन्नमेतद्धास्यं वरानने !॥ २१ ॥
न चान्यत्कारणं किञ्चिद्धास्यहेतौ शुचिस्मिते !।
न सामन्यत्तदा देवी प्राहालीकमिदं वचः ॥ २२ ॥
अहमेवाद्यहसिता न जीविष्ये त्वयाधुना।
कथं पिपीलिकालापं मर्त्त्योवेत्ति विना सुरान् ॥ २३॥
तस्मात्त्वयाहमेवेहऽसिताकिमतः परम्।
ततो निरुत्तरो राजा जिज्ञासुस्तत्पुरोहरेः ॥ २४ ॥

आस्थाय नियमन्तस्थौ सप्तरात्रमकल्मषः ।
स्वप्ने प्राह हृषीकेशः प्रभाते पर्य्यटन् पुरम् ॥ २५ ॥
वृद्धद्विजोयस्तद्वाक्यात् सर्वं ज्ञास्यस्यशेषतः ।
इत्युक्त्वान्तर्दधे विष्णुः प्रभातेऽथ नृपः पुरात् ॥ २५ ॥
निर्गच्छन्मन्त्रिसहितः सभार्य्यो वृद्धमग्रतः ।
गदन्तं विप्रमायान्तं तं वृद्धं सन्ददर्श ह ॥ २६ ॥
ब्राह्मण उवाच ।
ये विप्रमुख्याः कुरुजाङ्गलेषु दासास्तथा दासपुरे मृगाश्च ।
कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥२८॥
सूत उवाच । इत्याकर्ण्य वचस्ताभ्यां स पपात शुचा ततः ।
जातिस्मरत्व मगमत्तौ च मन्त्रि वरावुभौ ॥ २९ ॥
कामशास्त्रप्रणेता च वाभ्रव्यस्तु सुबालकः ।
पाञ्चाल इति लोकेषु विश्रुतः सर्वशास्त्रवित् ॥ ३० ॥
कण्डरीकोऽपि धर्मात्मा वेदशास्त्रप्रवर्तकः ।
भूत्वा जातिस्मरौ शोकात् पतितावग्रतस्तदा ॥ ३१ ॥
हा वयं योगविभ्रष्टाः कामतः कर्मबन्धनाः ।
एवं विलप्य बहुशस्त्रयस्ते योगपारगाः ॥ ३३ ॥
विस्मयाच्छ्राद्धमाहात्म्यमभिनन्द्य पुनः पुनः ।
ततस्तस्मै धनं दत्त्वा प्रभूतग्रामसंयुतम् ॥ ३२ ॥
विसृज्य ब्राह्मणन्तञ्च वृद्धं धनमुदान्वितम् ।
आत्मीयं नृपतिः पुत्रं नृपलक्षणसंयुतम् ॥ ३४ ॥
विष्वक् सेनाभिधानन्तु राजा राज्येऽभ्यषेचयत् ।
मानसे मिलिताः सर्वे ततस्ते योगिनो वराः ॥ ३५ ॥

ब्रह्मदत्तादयस्तस्मिन् पितृभक्ता विमत्सराः।
सप्ततिश्चाभवद्भ्रष्टा मयैतत् किलकारितम् ॥ ३६ ॥
राजत्यागफलं सर्वं यदेतदभिलष्यते।
तथेति प्राह राजा तु पुनस्तामभिनन्दयन् ॥ ३७ ॥
त्वत् प्रसादादिदं सर्वं मयैतत् प्राप्यते फलम्।
ततस्ते योगमास्थाय सर्व एव वनौकसः ॥ ३८ ॥
ब्रह्मरन्ध्रेण परमम्पदमापुस्तपोधनाः।
एवमायुर्धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ ३९ ॥
प्रयच्छन्ति सुतान् राज्यं नृणां प्रीताः पितामहाः।
य इदं पितृमाहात्म्यं ब्रह्मदत्तस्य च द्विजाः ॥ ४० ॥
द्विजेभ्यः श्रावयेद्यो वा शृणोत्यथ पठेत वा।
कल्पकोटिशतं साग्रं ब्रह्मलोके महीयते ॥ ४१ ॥

इति मत्स्यपुराणे श्राद्धकल्पे पितृमाहात्म्यं नाम
एकविंशतितमोऽध्यायः।

---

अथ द्वाविंशतितमोऽध्यायः॥

ऋषय ऊचुः। कस्मिन् काले च तच्छ्राद्धमनन्तफलदं भवेत्।
कस्मिन् वासरभागे तु श्राद्धकृच्छ्राद्धमाचरेत् ॥ १ ॥
तीर्थेषु केषु च कृतं श्राद्धं बहुफलं भवेत्।
सूत उवाच। अपराह्णे तु संप्राप्ते अभिजिद्रौहिणोदये ॥ २ ॥
यत्किञ्चिद्दीयते तत्र तदक्षयमुदाहृतम्।
तीर्थानि कानि शस्तानि पितॄणां वल्लभानि च ॥ ३ ॥
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः।
पितृतीर्थं गया नाम सर्वतीर्थवरं शुभम् ॥ ४ ॥

यत्रास्ते देवदेवेशः स्वयमेव पितामहः ।
तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः ॥ ५ ॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ ६ ॥
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा ।
यत्राविमुक्तसान्निध्यं भुक्तिमुक्तिफलप्रदम् ॥ ७ ॥
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम् ।
पितृतीर्थं प्रयागन्तु सर्वकामफलप्रदम् ॥ ८ ॥
वटेश्वरस्तु भगवान् माधवेन समन्वितः ।
योगनिद्राशयस्तद्वत् सदावसति केशवः ॥ ९ ॥
दशाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च ।
नन्दाथ ललिता तद्वत्तीर्थं मायापुरी शुभा ॥ १० ॥
तथा मित्रपदं नाम ततः केदारमुत्तमम् ।
गङ्गासागरमित्याहुः सर्वतीर्थमयं शुभम् ॥ ११ ॥
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले ह्रदे ।
तीर्थन्तु नैमिषं नाम सर्वतीर्थफलप्रदम् ॥ १२ ॥
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः ।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत् ॥ १३ ॥
यत्र तत्काञ्चनं द्वारमष्टादशभुजोहरः ।
नेमिस्तु हरिचक्रस्य शीर्णा यत्राभवत्पुरा ॥ १४ ॥
तदेतन्नैमिषारण्यं सर्वतीर्थनिषेवितम् ।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् ॥ १५ ॥
यः प्रयाति स पूतात्मा नारायणपदं व्रजेत् ।
कृतशौचं महापुण्यं सर्वपापनिषूदनम् ॥ १६ ॥

यत्रास्ते नारसिंहस्तु स्वयमेव जनार्दनः ।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा ॥ १७ ॥
सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा ।
कुरुक्षेत्रं महापुण्यं सर्वतीर्थसमन्वितम् ॥ १८ ॥
तथा च सरयूः पुण्या सर्वदेवनमस्कृता ।
इरावती नदी तद्वत् पितृतीर्थाधिवासिनी ॥ १९ ॥
यमुना देविका काली चन्द्रभागा दृषद्वती ।
नदी वेणुमती पुण्या परा वेत्रवती तथा ॥ २० ॥
पितॄणां वल्लभा ह्येताः श्राद्धे कोटिगुणा मताः ।
जम्बूमार्गं महापुण्यं यत्र मार्गो हि लक्ष्यते ॥ २१ ॥
अद्यापि पितृतीर्थं तत्सर्वकामफलप्रदम् ।
नीलकुण्डमिति ख्यातं पितृतीर्थं द्विजोत्तमाः ॥ २२ ॥
तथा रुद्रसरः पुण्यं सरोमानसमेव च ।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥ २३ ॥
पूर्वमित्रपदन्तद्वद्वैद्यनाथं महाफलम् ।
क्षिप्रा नदी महाकालस्तथाकालञ्जरं शुभम् ॥ २४ ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च ॥ २५ ॥
गयापिण्डप्रदानेन समान्याहुर्महर्षयः ।
एतानि पितृतीर्थानि सर्वपापहराणि च ॥ २६ ॥
स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम् ।
ओङ्कारं पितृतीर्थञ्च कावेरी कपिलोदकम् ॥ २७ ॥
सम्भेदश्चण्डवेगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥ २८ ॥

शक्रतीर्थञ्च विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् ॥ २९ ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ ।
कायावरोहणं नाम तथा चर्मण्वती नदी ॥ ३० ॥
गोमती वरुणा तद्वत्तीर्थमौशनसम्परम् ।
भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम् ॥ ३१ ॥
तीर्थं वैनायकं नाम भद्रेश्वरमतः परम् ।
तथा पापहरं नाम पुण्याथ तपती नदी ॥ ३२ ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधिः पाटला च नागतीर्थमवन्तिका ॥ ३३ ॥
तथावेणा नदी पुण्या महाशालं तथैव च ।
महारुद्रं महालिङ्गं दशार्णा च नदी शुभा ॥ ३४ ॥
शतरुद्रा शताह्वा च तथा विश्वपदं परम् ।
अङ्गारवाहिका तद्वन्नदौ तौ शोणघर्घरौ ॥ ३५ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः ॥३६॥
श्राद्धमेतेषु यद्दत्तन्तदनन्तफलं स्मृतम् ।
द्रोणी वाटनदी धारासरित् चीरनदी तथा ॥३७॥
गोकर्णं गजकर्णञ्च तथा च पुरुषोत्तमः ।
द्वारका कृष्णतीर्थञ्च तथार्बुदसरस्वती ॥ ३८ ॥
नदी मणिमती नाम तथा च गिरिकर्णिका ।
धूतपापं तथा तीर्थं समुद्रो दक्षिणस्तथा ॥ ३९ ॥
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघकरं नाम स्वयमेव जनार्दनः ॥ ४० ॥

यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थितः।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा॥४१॥
तथा सामलनाथश्च महाशालनदी तथा।
चक्रवाकं चर्मकोटं तथा जन्मेश्वरं महत्॥ ४२ ॥
अर्जुनं त्रिपुरं चैव सिद्धेश्वर मतःपरम्।
श्रीशैलं शाङ्करं तीर्थं नारसिंहमतःपरम्॥ ४३ ॥
महेन्द्रश्च तथा पुण्यमथ श्रीरङ्गसंज्ञितम्।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम्॥ ४४ ॥
दर्शनादपि चैतानि सद्यः पापहराणि वै।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित्॥४५॥
भीमेश्वरं कृष्णवेणा कावेरी कुड्मला नदी।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम्॥ ४६ ॥
तीर्थं त्रैयम्बकं नाम सर्वतीर्थनमस्कृतम्।
यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः॥ ४७ ॥
श्राद्धमेतेषु सर्वेषु कोटिकोटिगुणं भवेत्।
स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः॥४८॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम्।
तथा मत्स्यनदी पुण्या शिवधारं तथैव च॥ ४९ ॥
भद्रतीर्थञ्च विख्यातं पम्पातीर्थञ्च शाश्वतम्।
पुण्यं रामेश्वरं तद्वदेलापुरमलं पुरम्॥ ५० ॥
अङ्गभूतञ्च विख्यातमामर्दकमलं बुधम्।
आम्रातकेश्वरं तद्वदेकाम्रकमतः परम्॥ ५१ ॥
गोवर्धनं हरिश्चन्द्रं कृपुचन्द्रं पृथूदकम्।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी॥ ५२ ॥

रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गमः ।
इन्द्रकीलं महानादस्तथा च प्रियमेलकम् ॥५३॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्वदेवानां सान्निध्यं दृश्यते यतः ॥ ५४ ॥
दानमेतेषु सर्वेषु दत्तं कोटिशताधिकम् ।
बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥ ५५ ॥
तीर्थं पाशुपतं नाम नदी पार्वतिका शुभा ।
श्राद्धमेतेषु सर्वेषु दत्तं कोटिशतोत्तरम् ॥ ५६ ॥
तथैव पितृतीर्थन्तु यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सर्वान्तरजलावहा ॥ ५७ ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥ ५८ ॥
तत्तीर्थं हव्यकव्यानामप्सरोयुगसंज्ञितम् ।
श्राद्धाग्निकार्य्यदानेषु तथा कोटिशताधिकम् ॥ ५९ ॥
तथा सहस्रलिङ्गञ्च राघवेशमुत्तमम् ।
सेन्द्रफेना नदी पुण्या यत्रेन्द्रः पतितः पुरा ॥६०॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत् ॥ ६१ ॥
तीर्थन्तु पुष्करं नाम शालग्रामं तथैव च ।
सोमपानञ्च विख्यातं यत्र वैश्वानरालयम् ॥ ६२ ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥६३॥
वैदर्भाथ वैरा च पयोष्णी प्राङ्मुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरो गिरिः ॥६४॥

एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥ ६५ ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम् ।
कुब्जाम्रन्तु तथा तीर्थं उर्वशी पुलिनं तथा ॥६६॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥ ६७ ॥
अट्टहासं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वशिष्ठं तीर्थन्तु हारितं तु ततः परम् ॥ ६८
ब्रह्मावर्तं कुशावर्तं हयतीर्थं तथैव च ।
पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च ॥ ६९ ॥
घण्टेश्वरं बिल्वकञ्च नीलपर्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥ ७० ॥
अश्वतीर्थञ्च विख्यातमनन्तं श्राद्धदानयोः ।
तीर्थं वेदशिरो नाम तथैवौघवती नदी ॥ ७१ ॥
तीर्थं वसुप्रदं नाम छागलाण्डं तथैव च ।
एतेषु श्राद्धदातारः प्रयान्ति परमं पदम् ॥ ७२ ॥
तथा च बदरीतीर्थं गणतीर्थं तथैव च ।
जयन्तं विजयञ्चैव शक्रतीर्थं तथैव च ॥ ७३ ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव शारदातीर्थं भद्रकालेश्वरं तथा ॥ ७४ ॥
वैकुण्ठतीर्थञ्च परं भीमेश्वरमथापि वा ।
एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम् ॥ ७५ ॥
तीर्थं मातृगृहं नाम करवीरपुरं तथा ।
कुशेशरञ्च विख्यातं गौरीशिखरमेव च ॥ ७६ ॥

शकुलेशस्य तीर्थञ्च कर्दमालं तथैव च ।
दिण्डिपुण्यकरं तद्वत् पुण्डरीकपुरं तथा ॥ ७७ ॥
सप्त गोदावरी तीर्थं सर्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभिः ॥ ७८ ॥
एष तूद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किमु मानुषः ॥ ७९ ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रहः ।
वर्णाश्रमाणां गेहेऽपि तीर्थन्तु समुदाहृतम् ॥ ८० ॥
एतत्तीर्थेषु यच्छ्राद्धं तत्कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाचरेत् ॥ ८१ ॥
प्रातः कालोमुहूर्तांस्त्रीन् सङ्गवस्तावदेव तु ।
मध्याह्न स्त्रिमुहूर्तः स्यादपराह्णस्ततः परम् ॥ ८२ ॥
सायाह्न स्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु ॥ ८३ ॥
अह्नो मुहूर्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्तो यः सकालः कुतपः स्मृतः ॥ ८४ ॥
मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तदारम्भो भविष्यति ॥ ८५ ॥
मध्याह्नखड्गपात्रञ्च तथा नेपालकम्बलः ।
रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥ ८६ ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः ॥ ८७ ॥
ऊर्ध्वं मुहूर्तात् कुतपाद्यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकञ्चैतत्स्वधाभवनमिष्यते ॥ ८८ ॥

विष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा।
श्राद्धस्य रक्षणायालमेतत्प्राहुर्दिवौकसः॥ ८९॥
तिलोदकाञ्जलिर्देय जलस्थैस्तीर्थवासिभिः।
सदर्भहस्तेनैकेन श्राद्धमेवं विशिष्यते॥ ९०॥
श्राद्धसाधनकाले तु पाणिनैकेन दीयते।
तर्पणन्तूभयेनैव विधिरेष सदा स्मृतः॥ ९१॥
सूत उवाच। पुण्यं पवित्रमायुष्यं सर्वपापविनाशनम्।
पुरा मत्स्येन कथितन्तीर्थश्राद्धानुकीर्तनम्।
शृणोति यः पठेद्वापि श्रीमान् सञ्जायते नरः॥ ९२॥
श्राद्धकाले च वक्तव्यं तथा तीर्थनिवासिभिः।
सर्वपापोपशान्त्यर्थमलक्ष्मीनाशनं परम्॥ ९३॥
इदं पवित्रं यशसो निधानमिदं महापापहरञ्च पुंसाम्।
ब्रह्मार्करुद्रैरपि पूजितञ्च श्राद्धस्य माहात्म्यमुशन्ति तज्ज्ञाः॥
इति श्रीमत्स्यपुराणे श्राद्धकल्पे द्वाविंशतितमोऽध्यायः।

---

अथ त्रयोविंशतितमोऽध्यायः॥

ऋषय ऊचुः। सोमः पितॄणामधिपः कथं शास्त्रविशारद।
तद्वंश्या ये च राजानो बभूवुः कीर्तिवर्धनाः॥ १॥
सूत उवाच। आदिष्टो ब्रह्मणा पूर्वमत्रिः सर्गविधौ पुरा।
अनुत्तमं नाम तपः सृष्ट्यर्थं तप्तवान् प्रभुः॥ २॥
यदानन्दकरं ब्रह्म जगत्क्लेशविनाशनम्।
ब्रह्मविष्ण्वर्करुद्राणामभ्यन्तरमतीन्द्रियम्॥ ३॥
शान्तिकृच्छान्तमनसस्तदन्तर्नयने स्थितम्।
माहात्म्यात्तपसा विप्राः परमानन्दकारकम्॥ ४॥

यस्मादुमापतिः सार्द्धमुमया तमधिष्ठितः ।
तं दृष्ट्वा चाष्टमांशेन तस्मात् सोमोऽभवच्छिशुः ॥५॥
अधः सुस्राव नेत्राभ्यां धाम तच्चाम्बुसम्भवम् ।
दीपयद्विश्वमखिलं ज्योत्स्नया सचराचरम् ॥६॥
तद्दिशो जगृहुर्धाम स्त्रीरूपेण सुतेच्छया ।
गर्भो भूत्वोदरे तासामास्थितोऽब्दशतत्रयम् ॥७॥
आशास्तं मुमुचुर्गर्भमशक्ता धारणे ततः ।
समादायाथ तं गर्भमेकीकृत्य चतुर्मुखः ॥८॥
युवानमकरोद् ब्रह्मा सर्वायुधवरं नरम् ।
स्यन्दनेऽथ सहस्राश्वे वेदशक्तिमये प्रभुः ॥९॥
आरोप्य लोकमनयदात्मीयं स पितामहः ।
तत्र ब्रह्मर्षिभिः प्रोक्तमस्मत्स्वामी भवत्वयम् ॥१०॥
पितृभिर्देवगन्धर्वैरोषधीभिस्तथैव च ।
तुष्टुवुः सोमदैवत्यैर्ब्राह्मणं मन्त्रसंपदैः ॥११॥
स्तूयमानस्य तस्याभूदधिको धामसम्भवः ।
तेजो वितानादभवद् भुवि दिव्यौषधीगणः ॥१२॥
तद्दीप्तिरधिका तस्माद्रात्रौ भवति सर्वदा ।
तेनौषधीशः सोमोऽभूद्द्विजेशश्चापि गद्यते ॥१३॥
वेदधामरसश्चापि यदिदं चन्द्रमण्डलम् ।
क्षीयते वर्द्धते चैव शुक्ले कृष्णे च सर्वदा ॥१४॥
विंशतिश्च तथा सप्त दक्षः प्राचेतसो ददौ ।
रूपलावण्यसंयुक्तास्तस्मै कन्याः सुवर्चसः ॥१५॥
ततः पद्मसहस्राणां सहस्राणि दशैव तु ।
तपश्चचार शीतांशुर्विष्णुध्यानैकतत्परः ॥१६॥

ततस्तुष्टश्च भगवांस्तस्मै नारायणो हरिः ।
वरं वृणीष्व प्रोवाच परमात्मा जनार्दनः ॥ १७ ॥
ततो वव्रे वरान् सोमः शक्र लोकं जयाम्यहम् ।
प्रत्यक्षमेव भोक्तारो भवन्तु मम मन्दिरे ॥ १८ ॥
राजसूये सुरगणा ब्रह्माद्याः सन्तु मे द्विजाः ।
रक्षः पालः शिवोऽस्माकमास्तां शूलधरो हरः ॥ १९ ॥
तथेत्युक्तः स आजह्रे राजसूयन्तु विष्णुना ।
होताऽत्रिर्भृगुरध्वर्युर्ब्रह्माताभूच्चतुर्मुखः ॥ २० ॥
ब्रह्मत्वमगमत्तस्य उपद्रष्टा हरिः स्वयम् ।
सदस्याः सनकाद्यास्तु राजसूय विधौ स्मृताः ॥ २१ ॥
चमसाध्वर्यवस्तत्र विश्वे देवा दशैव तु ।
त्रैलोक्यं दक्षिणा तेन ऋत्विग्भ्यः प्रतिपादितम् ॥ २२ ॥
ततः समाप्तेऽवभृथे तद्रूपालोकनेच्छवः ।
कामबाणाभि तप्ताङ्गो नवदेव्यः सिषेविरे ॥ २३ ॥
लक्ष्मीर्नारायणं त्यक्ता सिनीवाली च कर्दमम् ।
द्युतिर्विभावसुं तद्वत्तुष्टिर्धातारमव्ययम् ॥ २४ ॥
प्रभा प्रभाकरं त्यक्ता हविष्मन्तं कुहूः स्वयम् ॥ २४ ॥
कीर्तिर्जयन्तं भर्तारं वसुर्मारीच कश्यपम् ॥ २५ ॥
धृतिस्त्यक्ता पतिं नन्दिं सोममेवाभजं स्तदा ।
स्वकीया इव सोमोऽपि कामयामास तास्तदा ॥ २६ ॥
एवं कृतापचारस्य तासाभर्तृगणास्तदा ।
न शशाङ्कापकाराय शापैः शस्त्रादिभिः पुनः ॥ २७ ॥
तथाप्यराजत विधुर्दशधा भावयन् दिशः ।
सोमः प्राप्याथ दुष्प्राप्यमैश्वर्यं ऋषिसंस्कृतम् ।

सप्त लोकैकनाथत्वमवाप तपसा तदा ॥ २८ ॥
कदाचिदुद्यानगतामपश्यद् दनेक पुष्पाभरणेश्च शोभिताम् ।
बृहन्नितम्बस्तनभारखेदात् पुष्पस्य भङ्गेऽप्यतिदुर्बलाङ्गीम् ॥२९॥
भार्याञ्च तां देवगुरोरनङ्गबाणाभिरामायतचारुनेत्राम् ।
तारां स ताराधिपतिः स्मरार्तः केशेषु जग्राह विविक्त भूमौ॥३०
सापि स्मरार्ता सह तेन रेमे तद्रूपकान्त्या हृतमानसेन ।
चिरं विहृत्याथ जगाम तारां विधुर्गृहीत्वा स्वगृहं ततोऽपि३०
न तृप्ति रासीच्च गृहेऽपि तस्य तारानुरक्तस्य सुखागमेषु ।
बृहस्पतिस्तद्विरहाग्नि दग्धस्तद्ध्याननिष्ठैकमना बभूव ॥३२ ॥
शशाक शापन्न च दातुमस्मै न मन्त्रशस्त्राग्नि विषैरशेषैः ।
तस्यापकर्त्तुं विविधैरुपायैर्नैवाभिचारैरपि वागधीशः ॥३३ ॥
स याचयामास ततस्तु दैन्यात् सोमं स्वभार्यार्थमनङ्गतप्तः ।
स याच्यमानोऽपि ददौ न तारां बृहस्पतेस्तत्सुखपाशबद्धः॥३४॥
महेश्वरेणाथ चतुर्मुखेन साध्यैर्मरुद्भिः सह लोकपालैः ।
ददौ यदा तान्न कथञ्चिदिन्दुस्तदा शिवः क्रोधपरो बभूव॥३५
यो वामदेवः प्रथितः पृथिव्यामनेक रुद्रार्चित पादपद्मः ।
ततः सशिष्यो गिरिशः पिनाकी बृहस्पतिस्नेहवशानुबद्धः॥३६॥
धनुर्गृहीत्वाजगवं पुरारिर्जगाम भूतेश्वरसिद्धजुष्टः ।
युद्धाय सोमेन विशेषदीप्त तृतीयनेत्रा नल भीमवक्त्रः ॥३७॥
सहैव जग्मुश्च गणेशकाद्या विंशच्चतुः षष्टिगणास्तयुक्ताः ।
यक्षेश्वरः कोटिशतैरनेकैर्युतोऽन्वगात्स्यन्दन संस्थितानाम् ॥३८॥
वेतालयक्षोरगकिन्नराणां पद्मेन चैकेन तथार्बुदेन ।
लक्षैस्त्रिभिर्द्वादशभीरथानां सोमोऽप्यगात्तत्र विवृद्धमन्युः ॥३९॥
नक्षत्र दैत्या सुरसैन्ययुक्तः शनैश्चराङ्गारकवृद्धतेजाः ।

नाम्नु भयं सप्त तथैव लोकाश्चचालभूर्द्वीप समुद्रगर्भा ॥ ४० ॥
स सोममेवाभ्यगमत्पिनाकी गृहीत दीप्तास्त्र विशालवह्निः ।
अत्राभवद्भीषण भीमसेन सैन्यद्वयस्यापि महाहवोऽसौ ॥ ४१ ॥
अशेषसत्त्वक्षय कृत्प्रवृत्तस्तीक्ष्णायुधास्त्रज्ज्वलनैकरूपः ।
शस्त्रैरथान्यान्यमशेष सैन्यं द्वयोर्जगाम क्षयमुग्रतीक्ष्णैः ॥४२॥
पतन्ति शस्त्राणि तथोज्ज्वलानि स्वर्भूमि पातालमथादहन्ति ।
रुद्रः कोपाद् ब्रह्मशीर्षं मुमोच सोमोऽपि सोमास्त्रममोघवीर्यम्
तयोर्निपातेन समुद्र भूम्योरथान्तरिक्षस्य च भीतिरासीत् ।
तद्स्त्रयुग्मं जगतां क्षयाय प्रवृद्धमालोक्य पितामहोऽपि ॥४४॥
अन्तः प्रविश्याथ कथं कथञ्चिन्निवारयामास सुरैः सहैव ।
अकारणं किं क्षयकृज्जनानां सोमः त्वयापीदृशमकारि कार्यम् ४५
यस्मात्परस्त्रीहरणाय सोमः त्वया कृतं युद्धमतीव भीमम् ।
पापग्रहस्त्वं भविता जनेषु शान्तोऽप्यलं नूनमथार्सितान्तो ॥४६॥
भार्यामिमामर्पय वाक्पतेस्त्वं न चावमानोऽस्ति परस्वहारे

सूत उवाच ।

तथेति चोवाच हिमांशु मान्तीयुद्धाद्पाक्रामदतः प्रशान्तः ॥४७॥
बृहस्पतिः स्वामपगृह्य तारां हृष्टो जगाम स्वगृहं स रुद्रः ।
इति श्रीमत्स्यपुराणे सोमवंशाख्याने सोमापचारो नाम
त्रयोविंशतितमोऽध्यायः ॥

---

अथ चतुर्विंशतितमोऽध्यायः ।

सूत उवाच । ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः ।
दिव्यपीताम्बरधरो दिव्याभरणभूषितः ॥ १ ॥
तारोदराद्विनिष्क्रान्तः कुमारश्चन्द्रसन्निभः ।

सर्वार्थशास्त्रविद्धीमान् हस्ति शास्त्रप्रवर्त्तकः ॥ २ ॥
नामयद्राज पुत्रीयं विश्रुतं गजवैद्यकम् ।
राज्ञः सोमस्य पुत्रत्वाद्राज पुत्रो बुधः स्मृतः ॥ ३ ॥
जातमात्रः स तेजांसि सर्वाख्येवाजयद्बली ।
ब्रह्माद्यास्तत्र चाजग्मुर्देवा देवर्षिभिः सह ॥ ४ ॥
बृहस्पति गृहे सर्वे जातकर्मोत्सवे तदा ।
अपृच्छंस्ते सुरास्तारां केन जातः कुमारकः ॥ ५ ॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा ।
पुनः पुनस्तदापृष्टा लज्जयन्ती वराङ्गना ॥ ६ ॥
सोमस्येति चिरादाह ततोऽगृह्णाद्विधुः सुतम् ।
बुध इत्यकरोन्नाम्ना प्रादाद्राज्यञ्च भूतले ॥ ७ ॥
अभिषेकं ततः कृत्वा प्रधानमकरोद्विभुः ।
ग्रहसाम्यं प्रदायाथ ब्रह्माब्रह्मर्षिसंयुतः ॥ ८ ॥
पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ।
इलोदरे च धर्मिष्ठं बुधः पुत्रमजीजनत् ॥ ९ ॥
अश्वमेध शतं साग्र मकरोद्यः स्वतेजसा ।
पुरूरवा इति ख्यातः सर्वलोक नमस्कृतः ॥ १० ॥
हिमवच्छिखरे रम्ये समाराध्य जनार्दनम् ।
लोकैश्वर्यमगाद्राजा सप्तद्वीप पतिस्तदा ॥ ११ ॥
केशिप्रभृतयो दैत्याः कोटिशो येन दारिताः ।
उर्वशी यस्य पत्नीत्वमगमद्रूपमोहिता ॥ १२ ॥
सप्तद्वीपा वसुमती सशैल वनकानना ।
धर्मेण पालिता तेन सर्वलोक हितैषिणा ॥ १३ ॥
चामरग्राहिणीकीर्तिः सदाचैवाङ्गवाहिका ।

विष्णोः प्रसादाद्देवेन्द्रो ददावधौसनन्मदा ॥ १४ ॥
धर्मार्थकामान् धर्मेण सममेवाभ्य पालयत् ।
धर्मार्थकामाः सन्द्रष्टुमाजग्मुः कौतुकात्पुरा ॥ १५ ॥
जिज्ञासवस्तच्चरितं कथं पश्यति नः समम् ।
भक्त्या चक्रे ततस्तेषामर्घ्यपाद्यादिकं नृपः ॥ १६ ॥
आसनत्रयमानीय दिव्यं कनकभूषितम् ।
निवेश्यायाकरोत् पूजां मोषद्धर्मेऽधिकां पुनः ॥१७॥
जग्मतुस्तेन कामार्थाविति कोपं नृपं प्रति ।
अर्थः शाप मदात्तस्मै लोभात्त्वं नाशमेष्यसि ॥ १८ ॥
कामोऽप्याह तवोन्मादो भविता गन्धमादने ।
कुमार वनमाश्रित्य वियोगादुर्वशी भवात् ॥ १९ ॥
धर्मोऽप्याह चिरायुस्त्वं धार्मिकश्च भविष्यसि ।
सन्ततिस्तव राजेन्द्र यावच्चन्द्रार्कतारकम् ॥ २० ॥
शतशो वृद्धिमायातु न नाशम्भुवि यास्यति ।
इत्युक्तान्तर्दधुः सर्वे राजा राज्यं तदन्वभूत् ॥ २१ ॥
अहन्यहनि देवेन्द्रं द्रष्टुं याति मराजराट् ।
कदाचिदारुह्य रथं दक्षिणाम्बरचारिणम् ॥ २२ ॥
सार्धमर्केण सोऽपश्यन्नीयमानामथाम्बरे ।
केशिना दानवेन्द्रेण चित्रलेखामथोर्वशीम् ॥ २३ ॥
तं विनिर्जित्य समरे विविधायुधपाणिना ।
बुधपुत्रेण वायव्यमस्त्रं मुक्त्वा यशोऽर्थिना ॥ २४ ॥
तथा शक्रोऽपि समरे येन चैवं विनिर्जितः ।
मित्रत्वमगमद्देवैर्ददा विस्मय चोर्वशीम् ॥ २५ ॥
ततःप्रभृति मित्रत्वमगमत्पाकशासनः ।

सर्वलोकातिशायित्वं बलमूर्जो यशः श्रियम् ॥२६॥
प्रादाद्वह्निरतिसन्तुष्टो गेयतां भरतेन च।
सा पुरूरवसः प्रीत्या गायन्ती चरितं महत् ॥ २७ ॥
लक्ष्मीस्वयंवरं नाम भरतेन प्रवर्त्तितम्।
मेनकामुर्वशीं रम्भां नृत्यतेति तदादिशत् ॥२८॥
ननर्त्त सलयं तत्र लक्ष्मीरूपेण चोर्वशी।
सा पुरूरवसं दृष्ट्वा नृत्यन्ती कामपीडिता ॥ २९ ॥
विस्मृताभिनयं सर्वं यत्पुरा भरतोदितम्।
शशाप भरतः क्रोधाद्वियोगादस्य भूतले ॥ ३० ॥
पञ्चपञ्चाशदब्दानि लता सूक्ष्मा भविष्यसि।
पुरूरवाः पिशाचत्वं तत्रैवानुभविष्यति ॥ ३१ ॥
ततस्तमुर्वशी गत्वा भर्त्तारमकरोच्चिरम्।
शापान्ते भरतस्याथ उर्वशी बुधसूनुतः ॥ ३२ ॥
अजीजनत् सुतानष्टौ नामतस्तान्निबोधत।
आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान्वसुः ॥ ३३ ॥
शुचिविद्यः शतायुश्च सर्वे दिव्यबलौजसः।
आयुषो नहुषः पुत्रो वृद्धशर्मा तथैव च ॥ ३४ ॥
रजिर्दम्भो विपाप्मा च वीराः पञ्च महारथाः।
रजेः पुत्रशतं जज्ञे राजेयमिति विश्रुतम् ॥ ३५ ॥
रजिराराधयामास नारायणमकल्मषम्।
तपसा तोषितो विष्णुर्वरान् प्रादान्महीपतेः ॥ ३६ ॥
देवासुरमनुष्याणामभूत् स विजयी तदा।
अथ देवासुरं युद्धमभूद्वर्षशतत्रयम् ॥ ३७ ॥
प्रह्लादशक्रयोर्भीमं न कश्चिद्विजयी तयोः।

ततो देवासुरैः पृष्टः प्राह देवव्रतुर्मुखः॥ ३८॥
अनयोर्विजयी कः स्यात्‌ रजिर्यत्रेति सोऽब्रवीत्।
जयाय प्रार्थितो राजा सहायस्त्वं भवस्व नः॥ ३९॥
दैत्यैः प्राह यदि स्वामी वो भवामि ततस्त्वलम्।
नासुरैः प्रतिपन्नं तत्‌ प्रतिपन्नं सुरैस्तथा॥ ४०॥
स्वामी भव त्वमस्माकं संग्रामे नाशय द्विषः।
ततो विनाशिताः सर्वे येऽवध्या वज्रपाणिना॥ ४१॥
पुत्रत्वमगमत्‌ तुष्टस्तस्येन्द्रः कर्मणा विभुः।
दत्त्वेन्द्राय तदा राज्यं जगाम तपसे रजिः॥ ४२॥
रजिपुत्रैस्तदाच्छिन्नं बलादिन्द्रस्य वैभवम्।
यज्ञभागञ्च राज्यञ्च तपोबलगुणान्वितैः॥ ४३॥
राज्याद्भ्रष्टस्तदा शक्रो रजिपुत्रैर्निपीडितः।
प्राह वाचस्पतिं दीनः पीडितोऽस्मि रजेः सुतैः॥ ४४॥
न यज्ञभागो राज्यं मे निर्जितस्य बृहस्पते!।
राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप!॥ ४५॥
ततो बृहस्पतिः शक्रमकरोद्बलदर्पितम्।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्मणा॥ ४६॥
गत्वाथ मोहयामास रजिपुत्रान्‌ बृहस्पतिः।
जिनधर्मं समास्थाय वेदबाह्यं सवेदवित्‌॥ ४७॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदबाह्यान्‌ परिज्ञाय हेतुवादसमन्वितान्॥ ४८॥
जघान शक्रो वज्रेण सर्वान्‌ धर्मबहिष्कृतान्।
नहुषस्य प्रवक्ष्यामि पुत्रान्‌ सप्तैव धार्मिकान्॥ ४९॥
यतिर्ययातिः संयातिरायतिः पाञ्चिरेव च।

शर्यातिमेवजातिश्च सप्तैते वंशवर्धनाः ॥ ५० ॥
यतिः कुमार भावेऽपि योगीवैखानसोऽभवत् ।
ययातिश्चाकरोद्राज्यं धर्मैक शरणः सदा ॥ ५१ ॥
शर्मिष्ठा तस्य भार्याभूद् दुहिता वृषपर्वणः ।
भार्गवस्यात्मजा तद्वद्देवयानी च सुव्रता ॥ ५२ ॥
ययातेः पञ्च दायादास्तान् प्रवक्ष्यामि नामतः ।
देवयानी यदुं पुत्रं तुर्वसुञ्चाप्यजीजनत् ॥ ५३ ॥
तथाद्रुह्यं मनुं पूरुं शर्मिष्ठाजनयत्सुतान् ।
यदुः पूरुश्चाभवतां तेषां वंशविवर्धनौ ॥ ५४ ॥
ययातिर्नाहुषश्चासीत् राजा सत्यपराक्रमः ।
पालयामास स महीमीजे च विधिवन्मखैः ॥ ५५ ॥
अतिभक्त्या पितॄनर्च्य देवांश्च प्रयतः सदा ।
अथाजयत्प्रजाः सर्वा ययातिरपराजितः ॥ ५६ ॥
स शाश्वतीः समा राजा प्रजा धर्मेण पालयत् ।
जरामार्च्छन्महाघोरं नाहुषो रूपनाशिनीम् ॥५७॥
जराभिभूतः पुत्रान् स राजा वचनमब्रवीत् ।
यदुं पूरुं तुर्वसुञ्च द्रुह्युं चानुञ्च पार्थिवः ॥ ५८ ॥
यौवनेन चरान् कामान् युवा युवतिभिः सह ।
विहर्तुमहमिच्छामि साह्याय्यं कुरुतात्मजाः ! ॥ ५९ ॥
तं पुत्रो देवयानेयः पूर्वजो यदुरब्रवीत् ।
साहाय्यं भवतः कार्यमस्माभिर्यौवनेन किम् ॥ ६० ॥
ययातिरब्रवीत् पुत्रान् जरा मे प्रतिगृह्यताम् ।
यौवनेनाथ भवतां चरेयं विषयानहम् ॥ ६१ ॥

यजतो दीर्घसत्रैर्मे शापाच्चोशनसो मुनेः।
कामार्थः परिहीणो मेऽतृप्तोऽहं तेन पुत्रकाः॥ ६२ ॥
स्वकीयेन शरीरेण जरामेनां प्रशास्तु वः।
अहं तन्वाभिनवया युवा कामानवाप्नुयाम्॥ ६३ ॥
न तेऽस्य प्रत्यगृह्णन्त यदुप्रभृतयो जराम्।
चतुरस्तान् स राजर्षिरशपच्चेति नः श्रुतम्॥ ६४ ॥
तमब्रवीत्ततः पूरुः कनीयान् सत्यविक्रमः।
जरां मा देहि नवया तन्वा मे यौवनात्सुखी॥ ६५ ॥
अहं जरास्त्वादाय राज्ये स्थास्यामि चाज्ञया।
एवमुक्तः स राजर्षिः तपो वीर्य्यं समाश्रयात्॥६६॥
संस्थापयामास जरां तदा पुत्रे महात्मनि।
पौरवेणाथ वयसा राजा यौवनमास्थितः॥ ६७ ॥
ययातेश्चाथ वयसा राज्यं पूरुरकारयत्।
ततो वर्ष सहस्रान्ते ययातिरपराजितः॥ ६८ ॥
अतृप्त इव कामानां पूरुं पुत्रमुवाच ह।
त्वया दायादवानस्मि त्वं मे वंशकरः सुतः॥ ६९ ॥
पौरवो वंश इत्येष ख्यातिं लोके गमिष्यति।
ततः स नृपशार्दूलः पूरुं राज्येऽभिषिच्य च॥ ७० ॥
कालेन महता पश्चात्काल धर्म्ममुपेयिवान्।
पूरुवंशं प्रवक्ष्यामि शृणुध्व मृषिसत्तमाः॥ ७१ ॥
यत्र ते भारता जाता भरतान्वयवर्द्धनाः।
इति सोमवंशे ययाति चरिते चतुर्विंशतितमोऽध्यायः॥

अथ पञ्चविंशतितमोऽध्यायः ॥

ऋषय ऊचुः ।

किमर्थं पौरवो वंशः श्रेष्ठत्वं प्राप भूतले ।
ज्येष्ठस्यापि यदोर्वंशः किमर्थं क्षीयते श्रिया ॥ १ ॥
अन्वय्ययाति चरितं सूत ! विस्तरतो वद ।
यस्मात्तत्पुण्यमायुष्यमभिनन्द्यं सुरैरपि ॥ २ ॥

सूत उवाच ।

एतदेव पुरा पृष्टः शतानीकेन शौनकः ।
पुण्यं पवित्रमायुष्यं ययाति चरितं महत् ॥ ३ ॥

शतानीक उवाच ।

ययातिः पूर्वजोऽस्माकं दशमो यः प्रजापतेः ।
कथं स शुक्र तनयां लेभे परमदुर्लभाम् ॥ ४ ॥
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ! ।
आनुपूर्व्याच्च मे शंस पूरोर्वंशधरान्नृपान् ॥ ५ ॥

शौनक उवाच ।

ययाति रासीद्राजर्षिर्देवराज समद्युतिः ।
तं शुक्रवृषपर्वाणौ वव्राथे वै यथा पुरा ॥ ६ ॥
तत्तेऽहं सम्प्रवक्ष्यामि पृच्छतो राजसत्तम ! ।
देवयान्याश्च संयोगं ययातेर्नाहुषस्य च ॥ ७ ॥
सुराणामसुराणाञ्च समजायत वै मिथः ।
ऐश्वर्यं प्रतिसङ्घर्षं स्त्रैलोक्ये सचराचरे ॥ ८ ॥
जिगीषया ततो देवा वव्रुराङ्गिरसं मुनिम् ।
पौरोहित्ये च यज्ञार्थे काव्यं तूशनसं परे ॥ ९ ॥
ब्राह्मणौ तावुभौ नित्यमन्योन्यं स्पर्धिनौ भृशम् ।

तत्र देवा निजघ्नुर्यान् दानवान् युधिसङ्गतान् ॥ १० ॥
तान् पुनर्जीवयामास काव्यो विद्याबलाश्रयात् ।
ततस्ते पुनरुत्थाय योधयां चक्रिरे सुरान् ॥ ११ ॥
असुरास्तु निजघ्नुर्यान् सुरान् समरमूर्द्धनि ।
न तान् संजीवयामास बृहस्पतिरुदारधीः ॥ १२ ॥
न हि वेद स तां विद्यां यां काव्यो वेदवीर्य्यवान् ।
संजीवनीन्ततो देवा विषादमगमन् परम् ॥ १३ ॥
अथ देवा भयोद्विग्नाः काव्यादुशनसस्तदा ।
ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ॥ १४ ॥
भजमानान् भजस्वास्मान् कुरु साहाय्यमुत्तमम् ।
यासौ विद्या निवसति ब्राह्मणे मिततेजसि ॥ १५ ॥
शुक्रे तामाहर क्षिप्रं भागभाग्नो भविष्यसि ।
वृषपर्वणः समीपेऽसौ शक्यो द्रष्टुं त्वया द्विजः ॥ १६ ॥
रक्षते दानवांस्तत्र न स रक्षत्यदानवान् ।
तमाराधयितुं शक्तो नान्यः कश्चिदृते त्वया ॥ १७ ॥
देवयानी च दयिता सुता तस्य महात्मनः ।
तामाराधयितुं शक्तो नान्यः कश्चन विद्यते ॥ १८ ॥
शीलदाक्षिण्य माधुर्य्यैराचारेण दमेन च ।
देवयान्यान्तु तुष्टायां विद्यान्तां प्राप्स्यसि ध्रुवम् ॥१९॥
तदाहि प्रेषितो देवैः समीपे वृषपर्वणः ।
तथेत्युक्त्वा तु स प्रायाद्बृहस्पति सुतः कचः ॥ २० ॥
स गत्वा त्वरितो राजन्! देवैः संपूजितः कचः ।
असुरेन्द्र पुरे शुक्रं प्रणम्येदमुवाच ह ॥ २१ ॥
ऋषेरङ्गिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः ।

नाम्ना कचेति विख्यातं शिष्यं गृह्णातु मां भवान् ॥ २२ ॥
ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरो ! ।
अनुमन्यस्व मां ब्रह्मन् ! सहस्रं परिवत्सरान् ॥ २३ ॥

शुक्र उवाच ।

कच ! सुस्वागतन्तेऽस्तु प्रतिगृह्णामि ते वचः ।
अर्चयिष्येऽहमर्च्यं त्वामर्चितोऽस्तु बृहस्पतिः ॥ २४ ॥

शौनक उवाच ।

कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम् ।
आदिष्टङ्कविपुत्रेण शुक्रेणोशनसा स्वयम् ॥ २५ ॥
व्रतञ्च व्रतकालञ्च यथोक्तं प्रत्यगृह्णत ।
आराधयन्नुपाध्यायं देवयानीञ्च भारत ! ॥ २६ ॥
संशीलयन् देवयानीं कन्यां सम्प्राप्तयौवनाम् ।
पुष्पैः फलैः प्रेषणैश्च तोषयामास भार्गवीम् ॥ २८ ॥
देवयान्यपि तं विप्रं नियमव्रतचारिणम् ।
अनुयायन्ती ललना रहः पर्यचरत्तदा ॥ २९ ॥
पञ्चवर्षशतान्येवं कचस्य चरतो भृशम् ।
तत्तीव्रं व्रतं बुध्वा दानवास्तं ततः कचम् ॥ ३० ॥
गा रक्षन्तं वने दृष्ट्वा रहस्येन ममर्षिता ।
जघ्नुर्बृहस्पतेर्द्वेषान्निजरक्षार्थमेव च ॥ ३१ ॥
हत्वा शालावृकेभ्यश्च प्रायच्छंस्तिलशः कृतम् ।
ततो गावो निवृत्तास्ता अगोपाः स्वनिवेशनम् ॥ ३२ ॥
ता दृष्ट्वा रहिता गास्तु कचेनाभ्यागता वनात् ।
उवाच वचनं काले देवयान्यथ भार्गवम् ॥ ३३ ॥
हुतञ्चैवाग्निहोत्रन्ते सूर्यश्चास्तङ्गतः प्रभो ! ।

अगोपाश्चागतागावः कचस्तात ! न दृश्यते ॥ ३४ ॥
व्यक्तं हतो मृतो वापि कचस्तात ! भविष्यति।
तं विना नैव जीवामि वचः सत्यं ब्रवीम्यहम् ॥ ३५

शुक्र उवाच।

अयेह्येहीति शब्देन मृतं सञ्जीवयाम्यहम्।
ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत ॥ ३६ ॥
आहूतः प्राद्रवद्द्वारात् कचः शुक्रं ननाम सः।
ततोऽहमिति चाचख्यौ राक्षसैर्धिषणात्मजः ॥ ३७॥
स पुनर्देवयान्योक्तः पुष्पाहारे यदृच्छया।
वनं ययौ कचो विप्रः पठन् ब्रह्म च शाश्वतम् ॥ ३८॥
वने पुष्पाणि चिन्वन्तं दृष्ट्वा दानवास्तदा।
ततो द्वितीये तं हत्वा पुनः ज्ञात्वा च चूर्णितम्।
प्रायच्छन् ब्राह्मणायैव सुरायामसुरास्तदा ॥ ३९ ॥
देवयान्यथ भूयोऽपि पितरं वाक्यमब्रवीत्।
पुष्पाहारः प्रेषणकृत् कचस्तात ! न दृश्यते ॥ ४० ॥
व्यक्तं हतो मृतो वापि कचस्तात ! भविष्यति।
तं विना नैव जीवामि वचः सत्यं ब्रवीमि ते ॥ ४१ ॥

शुक्र उवाच।

बृहस्पतेः सुतः पुत्रि ! कचः प्रेतगतिं गतः।
विद्यया जीवितोऽप्येवं हन्यते करवाणि किम् ॥ ४२ ॥
मैवं शुचो मा रुद देवयानि ! न त्वादृशी मर्त्यमनु प्रशोचेत्।
यस्यास्तव ब्रह्म च ब्राह्मणाश्च सेन्द्रा देवा वसवोऽश्विनौ च ॥ ४३ ॥
सुरद्विषश्चैव जगच्च सर्वमुपस्थितं मत्तपसः प्रभावात्।
अशक्योऽयं जीवयितुं द्विजातिः सञ्जीवितो वध्यते चैव भूयः ॥ ४४

देवयान्युवाच ।

यस्याङ्गिरा वृद्धतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः ।
ऋषेः सुपुत्रन्तमथापि पौत्रं कथं न शोचेयमहन्नरुन्द्याम् ॥४५॥
स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्मसु चैव दक्षः ।
कचस्य मार्गं प्रतिपत्स्ये नभोक्ष्ये प्रियो हि मे तात ! कचोभिरूपः ॥४६॥

शौनक उवाच ।

सत्त्वेवमुक्तो देवयान्या महर्षिः संरम्भेण व्याजहाराथ काव्यः ।
असंशयं मामसुरा द्विषन्ति ये मे शिष्यानागतान् सूदयन्ति ॥४७॥
अब्राह्मणं कर्तुमिच्छन्ति रौद्रा एभि र्व्यक्तं प्रस्तुतो दानवैर्हि ।
तत्कर्मणाऽस्य भवेदिहान्तः कं ब्रह्महत्या न दहेदपीन्द्रम् ॥४८॥
स तेनापृष्टो विद्यया चोपहूतः शनैर्वाचं जठरे व्याजहार ।
तमब्रवीत्केन चेहोपनीतो ममोदरे तिष्ठसि ब्रूहि वत्स ! ॥४९॥

कच उवाच ।

भवत्प्रसादान्न जहाति मां स्मृतिः सर्वं स्मरेयं यच्च यथा च वृत्तम् ।
नत्वेवं स्यात्तपसः क्षयो मे ततः क्लेशं घोरतरं स्मरामि ॥५०॥
असुरैः सुरायां भवतोऽस्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य !
ब्राह्मीं मायान्त्वासुरी त्वत्र माया त्वयि स्थिते कथमेवाभिबाधते ॥

शुक्र उवाच ।

किं ते प्रियं करवाण्यद्य वत्से ! विनैव मे जीवितं स्यात्कचस्य ।
नान्यत्र कुक्षेर्मम भेदनाच्च दृश्येत् कचो मद्गतो देवयानि ! ॥५२॥

देवयान्युवाच ।

द्वौ मां शोकावग्निकल्पौ दहेतां कचस्य नाशस्तव चैवोपघातः ।
कचस्य नाशे मम नास्ति शर्म तवोपघाते जीवितुं नास्मि शक्ता ॥५३

शुक्र उवाच ।

संसिद्धरूपोऽसि बृहस्पतेः सुत ! यत्त्वां भक्तं भजते देवयानी ।
विद्यामिमां प्राप्नुहि जीवनीं त्वं न चेदिन्द्रः कचरूपी त्वमद्य ५४
न निवर्तेत पुनर्जीवन् कश्चिदन्यो ममोदरात् ।
ब्राह्मणं वर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ॥५५ ॥
पुत्रो भूत्वा निष्क्रमस्वोदरान् मे भित्त्वा कुक्षिं जीवयमां च तात !
अवेक्षेथा धर्मवतीमवेक्षां गुरोः सकाशात्प्राप्य विद्यां स विद्यः ॥५६

शौनक उवाच ।

गुरोः सकाशात् समवाप्य विद्यां भित्त्वा कुक्षिं निर्विचक्राम विप्रः
प्रालेयाद्रेः शुक्लमुद्भिद्य शृङ्गं रात्र्यागमे पौर्णमास्यामिवेन्दुः ॥ ७
दृष्ट्वा च तं पतितं वेदराशिमुत्थापयामास ततः कचोऽपि ।
विद्यां सिद्धां तामवाप्याभिवाद्यः ततः कचस्तं गुरुमित्युवाच ॥८
निधिं निधीनां वरदं वराणां येनाद्रियन्ते गुरुमर्चनीयम् ।
प्रालेयाद्रिप्रोज्ज्वलभालसंस्थं पापान् लोकांस्ते व्रजन्त्यप्रतिष्ठाः

शौनक उवाच ।

सुरापानाद्वञ्चनात्प्रापयित्वा संज्ञानाशञ्चेतमश्चापि घोरम् ।
दृष्ट्वा कचञ्चापि तथाभिरूपं पीतं तथा सुरया मोहितेन ॥६०॥
स मन्युरुत्थाय महानुभावस्तदोशना विप्रहितं चिकीर्षुः ।
काव्यः स्वयं वाक्यमिदं जगाद सुरापानं प्रत्यसौ जातशङ्कः ॥६१

शुक्र उवाच ।

यो ब्राह्मणोऽद्य प्रभृतीह कश्चिन्मोहात् सुरां पास्यति मन्दबुद्धिः
अपेतधर्मा ब्रह्महा चैव स स्यादस्मिन् लोके गर्हितः स्यात्परे च ६२
मया चेमां विप्रधर्मोक्तिसीमां मर्यादां वै स्थापितां सर्वलोके
सन्तो विप्राः शुश्रुवांसो गुरूणां देवा दैत्याश्चोपशृण्वन्तु सर्वे६३

शौनक उवाच ।

इतीदमुक्त्वा स महाप्रभावस्तपोनिधीनां निधिरप्रमेयः ।
तान्दानवांश्चैव निगूढबुद्धीनिदं समाहूय वचोऽभ्युवाच ॥ ६४॥

शुक्र उवाच ।

आचक्षाणो दानवा बालिशास्थ शिष्यः कचोवत्स्यति मत्समीपे
सञ्जीवनीं प्राप्य विद्यां ममायं तुल्य प्रभावो ब्राह्मणो ब्रह्मभूत ६५

शौनक उवाच । गुरोरुष्य सकाशे च दशवर्षशतानि सः ।
अनुज्ञातः कचोगन्तुमियेष त्रिदशालयम् ॥ ६६ ॥

अथ षड्विंशोऽध्यायः ।

शौनक उवाच । समापितव्रतं तन्तु विसृष्टं गुरुणा तदा ।
प्रस्थितं त्रिदशावासं देवयानीदमब्रवीत् ॥ १ ॥

देवयान्युवाच । ऋषेरङ्गिरसः पौत्र ! वृत्ते नाभिजनेन च ।
भ्राजसे विद्यया चैव तपसाच दमेन च ॥ २ ॥

ऋषिर्यथाङ्गिरा मान्यः पितुर्मम महायशाः ।
तथामान्यश्च पूज्यश्च मम भूयो बृहस्पतिः ॥ ३ ॥

एवं ज्ञात्वा विजानीहि यद्ब्रवीमि तपोधन ! ।
व्रतस्थे नियमोपेते यथावर्त्ताम्यहं त्वयि ॥ ४ ॥

स समापित विद्यो मां भक्तान्न त्यक्तुमर्हसि ।
गृहाण पाणिं विधिवन् मम मन्त्र पुरस्कृतम् ॥५ ॥

कच उवाच । पूज्योमान्यश्च भगवान् यथा मम पिता तव ।
तथात्वमनवद्याङ्गि ! पूजनीयतमा मता ॥ ६ ॥

आत्मप्राणैः प्रियतमा भार्गवस्य महात्मनः ।
त्वं भद्रे ! धर्म्मतः पूज्या गुरुपुत्री सदा मम ॥ ७ ॥

यथा मम गुरुर्नित्यं मान्यः शुक्रः पिता तव ।

देवयानि ! तथैव त्वं नैवं मां वक्तुमर्हसि ॥ ८॥

देवयान्युवाच। गुरुपुत्रस्य पुत्रो मे न तु त्वमसि मे पितुः।
तस्मात्मान्यश्च पूज्यश्च ममापित्वं द्विजोत्तम ! ॥ ९ ॥
असुरैर्हन्यमानेतु कचे त्वयि पुनः पुनः।
तदा प्रभृति या प्रीतिस्तां त्वमेव स्मरस्व मे ॥ १० ॥
सौहार्द्दे चानुरागे च वेत्थ मे भक्ति मुत्तमाम्।
न मामर्हसि धर्म्मज्ञ ! त्यक्तुं भक्तामनागसम् ॥ ११ ॥

कच उवाच। अनियोज्ये नियोगे मां नियुनक्षि शुभव्रते !।
प्रसीद सुभ्रु ! मह्यन्त्वं गुरोर्गुरुतरा शुभे ! ॥ १२ ॥
यत्रोषितं विशालाक्षि ! त्वया चन्द्रनिभानने !।
तत्राहमुषितो भद्रे ! कुक्षौ काव्यस्य भामिनि ! ॥१३॥
भगिनी धर्म्मतो मे त्वं मैवं वोचः शुभानने !।
सुखेनाध्युषितो भद्रे ! न मन्युर्विद्यते मम ॥ १४ ॥
आपृच्छे त्वां गमिष्यामि शिवमस्त्वथ मे पथि।
अविरोधेन धर्म्मस्य स्मर्त्तव्योऽस्मि कथान्तरे ॥ १५ ॥
अप्रमत्तोद्यता नित्यमाराधय गुरुं मम।

देवयान्युवाच दैत्यैर्हतस्त्वं यद्भर्त्तबुध्या त्वं रक्षितोमया ॥१६॥
यदि मां धर्म्मकामार्थां प्रत्याख्यास्यसि धर्म्मतः।
ततः कच ! न ते विद्या सिद्धिरेषा गमिष्यति ॥ १७ ॥

कच उवाच। गुरुपुत्रीति कृत्वाहं प्रत्याख्यास्ये न दोषतः।
गुरुणा चाभ्यनुज्ञातः काममेवं शपस्व माम् ॥ १८ ॥
आर्षं धर्मं ब्रुवाणोऽहं देवयानि ! यथा त्वया।
शप्तुं नार्होऽस्मि कल्याणि ! कामतोऽद्य च धर्म्मतः ॥ १९॥
तस्माद्भवत्या यः कामो न तथा संभविष्यति।

ऋषि पुत्रो न ते कश्चित् जातु पाणिं ग्रहीष्यति॥२०॥
फलिष्यति न मे विद्या त्वद्वचश्चेति तत्तथा।
अध्यापयिष्यामि च यं तस्य विद्या फलिष्यति ॥२१॥
शौनक उवाच। एवमुक्त्वा नृप श्रेष्ठ ! देवयानीं कचस्तदा।
त्रिदशेशालयं शीघ्रं जगाम द्विजसत्तमः ॥ २२ ॥
तमागतमभिप्रेक्ष्य देवाः सेन्द्र पुरोगमाः।
बृहस्पतिं सभाज्येदं कचमाहुर्मुदान्विताः ॥ २३ ॥
देवा ऊचुः। त्वं कचास्मद्धितं कर्म्म कृतवान्महदद्भुतम्।
न ते यशः प्रणशिता भाग् भाग् च भविष्यसि ॥२४॥

---

अथ सप्तविंशोऽध्यायः।

शौनक उवाच। कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः।
कचादवेत्य तां विद्यां कृतार्था भरतर्षभ ! ॥ १ ॥
सर्व्व एव समागम्य शतक्रतुमथाब्रुवन्।
कालः स्वद्विक्रमस्याद्य जहि शत्रून् पुरन्दर ! ॥ २ ॥
एवमुक्तस्तु सह तैस्त्रिदशैर्मघवांस्तदा।
तथेत्युक्त्वोपचक्राम सो पश्य द्विपिने स्त्रियः ॥ ३ ॥
क्रीडन्तीनान्तु कन्यानां वने चैत्ररथोपमे।
वायुर्भूतः सवस्त्राणि सर्वाण्येव व्यमिश्रयत् ॥ ४ ॥
ततो जलात् समुत्तीर्य ताः कन्याः सहितास्तदा।
वस्त्राणि जगृहुस्तानि यथा संस्थान्यनेकशः ॥ ५ ॥
तत्र वासो देवयान्याः शर्मिष्ठा जगृहे तदा।
व्यतिक्रममजानन्ती दुहिता वृषपर्वणः ॥ ६ ॥
ततस्तयोर्मिथस्तत्र विरोधः समजायतः।

देवयान्याश्च राजेन्द्र! शर्म्मिष्ठायाश्च तत् कृते ॥ ७ ॥

देवयान्युवाच।

कस्माद्धरसि मे वस्त्रं शिष्या भूत्वा ममासुरि!।
समुदाचार हीनाया न ते श्रेयो भविष्यति ॥ ८ ॥

शर्म्मिष्ठोवाच।

आसीनञ्च शयानञ्च पिता ते पितरं मम।
स्तौति पृच्छति चाभीक्ष्णं नीचस्थः सुविनीतवत् ॥ ९ ॥
याचतस्त्वञ्च दुहिता स्तुवतः प्रतिगृह्णतः।
सुताहं स्तूयमानस्य ददतो नतु गृह्णतः ॥ १० ॥
अनायुधा सायुधायाः किं त्वं कुप्यसि भिक्षुकि!।
लप्स्यसे प्रतियोद्धारं न च त्वां गणयाम्यहम् ॥ ११ ॥

शौनक उवाच।

सा विस्मयं देवयानीं गतां सक्ताञ्च वाससि।
शर्म्मिष्ठा प्राक्षिपत् कूपे ततः स्वपुरमाविशत् ॥ १२ ॥
हतेयमिति विज्ञाय शर्म्मिष्ठा पापनिश्चया।
अनवेक्ष्य ययौ तस्मात् क्रोधवेगपरायणा ॥ १३ ॥
अथ तं देशमभ्यगाद्ययातिर्नहुषात्मजः।
श्रान्तयुग्मः श्रान्तरूपो मृगलिप्सुः पिपासितः ॥१४॥
नाहुषः प्रेक्ष्यमाणोहि सनिपाने गतोदके।
ददर्श कन्यां तां तत्र दीप्तामग्निशिखामिव ॥ १५ ॥
तामपृच्छत् स दृष्ट्वैव कन्याममरवर्णिनीम्।
सान्त्वयित्वा नृपश्रेष्ठः साम्ना परमवल्गुना ॥ १६ ॥
का त्वं चारुमुखी श्यामा सुमृष्टमणिकुण्डला।
दीर्घं ध्यायसि चात्यर्थं कस्माच्छ्वसिषि चातुरा ॥१७॥

कथञ्च पतिता ह्यस्मिन् कूपे वीरुत्तृणावृते।
दुहिता चैव कस्य त्वं वद सर्वं सुमध्यमे ! ॥ १८ ॥
देवयान्युवाच। योऽसौ देवैर्हतान् दैत्यानुत्थापयति विद्यया।
तस्य शुक्रस्य कन्याहन्त्वं मां नूनं न बुध्यसे ॥ १९ ॥
एष मे दक्षिणो राजन् ! पाणिस्ताम्रनखाङ्गुलिः।
समुद्धर गृहीत्वा मां कुलीनस्त्वं हि मे मतः ॥ २० ॥
जानामि त्वाञ्च संशान्तं वीर्य्यवन्तं यशस्विनम्।
तस्मान्मां पतितं कूपादस्मादुद्धर्तुमर्हसि ॥ २१ ॥
शौनक उवाच।
तामथ ब्राह्मणीं स्त्रीं च विज्ञाय नहुषात्मजः।
गृहीत्वा दक्षिणे पाणावुज्जहार ततो बलात् ॥ २२ ॥
उद्धृत्य चैनान्तरसा तस्मात् कूपान्नराधिपः।
आमन्त्रयित्वा सुश्रोणीं ययातिः स्वपुरं ययौ ॥ २३ ॥
देवयान्युवाच। त्वरितं घूर्णिके गच्छ सर्वमाचक्ष्व मे पितुः।
नेदानीं तु प्रवेक्ष्यामि नगरं वृषपर्वणः ॥ २४ ॥
शौनक उवाच। सा तु वै त्वरितं गत्वा घूर्णिकासुरमन्दिरम्।
दृष्ट्वा काव्यमुवाचेदं कम्पमाना विचेतना ॥ २५ ॥
आचख्यौ च महाभागा देवयानी वने हता।
शर्मिष्ठया महाप्राज्ञ ! दुहित्रा वृषपर्वणः ॥ २६ ॥
श्रुत्वा दुहितरं काव्यस्तदा शर्मिष्ठया हताम्।
त्वरया निर्ययौ दुःखात् मार्गमाणः सुतां वने ॥ २७ ॥
दृष्ट्वा दुहितरं काव्यो देवयानीं तपोवने।
बाहुभ्यां संपरिष्वज्य दुःखितो वाक्यमब्रवीत् ॥ २८ ॥
आत्मदोषैर्नियच्छन्ति सर्वे दुःखसुखे जनाः।

नाधर्मश्चरितो राजन् ! सद्यः फलति गौरिव ।
शनैरावर्त्यमानस्तु मूलान्यपि निकृन्तति ॥ २ ॥
यदि नात्मनि पुत्रेषु न चेत् पश्यति नप्तृषु ।
पापमाचरितं कर्म त्रिवर्गं मतिवर्त्तते ॥ ३ ॥
फलत्येवं ध्रुवं पापं गुरुभुक्तमिवोदरे ।
यदाघातयसे विप्रं कचमाङ्गिरसन्तदा ॥ ४ ॥
अपापशीलं धर्म्मज्ञं शुश्रूषुं मद्गृहे रतम् ।
वधादनर्हतस्तस्य वधाच्च दुहितुर्मम ॥ ५ ॥
वृषपर्व्वन्निबोध त्वं त्यक्ष्यामि त्वां सबान्धवम् ।
स्थातुं त्वद्विषये राजन् ! न शक्नोमि त्वया सह ॥ ६ ॥
अद्यैवमभिजानामि दैत्यं मिथ्याप्रलापिनम् ।
यतस्त्वमात्मनो दीर्णां दुहितां किमुपेक्षसे ॥ ७ ॥
वृषपर्वोवाच । नावद्यं न मृषावादं त्वयि जानामि भार्गव !
त्वयि सत्यञ्च धर्म्मश्च तत्प्रसीदतु मां भवान् ॥ ८ ॥
अथास्मानपहाय त्वमितो यास्यसि भार्गव ! ।
समुद्रं सम्प्रवेक्ष्यामि नान्यदस्ति परायणम् ॥ ९ ॥
शुक्र उवाच । समुद्रं प्रविशध्वं वा दिशो वा व्रजतासुराः ! ।
दुहितुर्नाप्रियं सोढुं शक्तोऽहं दयिता हि मे ॥ १० ॥
प्रसाद्यतां देवयानी जीवितं यत्र मे स्थितम् ।
योगक्षेमकरस्तेऽहमिन्द्रस्येव बृहस्पतिः ॥ ११ ॥
वृषपर्वोवाच । यत्किञ्चिदसुरेन्द्राणां विद्यते वसु भार्गव ! ।
भुवि हस्तिगवाश्वं वा तस्य त्वं मम चेश्वरः ॥ १२ ॥
शुक्र उवाच । यत्किञ्चिदस्ति द्रविणं दैत्येन्द्राणां महासुर ! ।
तस्येश्वरोऽस्मि यद्येतद्देवयानि ! प्रसाद्यताम् ॥ १३ ॥

शौनक उवाच। ततस्तु त्वरितः शुक्रस्तेन राज्ञा समं ययौ।
उवाच चैनां सुभगे! प्रतिपद्य वचस्तव ॥ १४ ॥
देवयान्युवाच। यदि त्वमीश्वरस्तात! राज्ञोवित्तस्य भार्गव!।
नाभिजानामि तत्तेऽहं राजा वदतु मां स्वयम् ॥१५॥
वृषपर्वोवाच। यं काममभिजानासि देवयानि! शुचिस्मिते!।
तत् तेऽहं संप्रदास्यामि यद्यपि स्यात् सुदुर्लभम् ॥ १६ ॥
देवयान्युवाच। दासीं कन्यासहस्रेण शर्मिष्ठामभिकामये।
अनुयास्यति मां तत्र यत्र दास्यति मे पिता ॥१७॥
वृषपर्वोवाच। उत्तिष्ठ धात्रि! गच्छ त्वं शर्मिष्ठां शीघ्रमानय।
यं च कामयते कामं देवयानी करोतु तम् ॥ १८ ॥
शौनक उवाच। ततो धात्री तत्र गत्वा शर्मिष्ठामिदमब्रवीत्।
उत्तिष्ठ भद्रे! शर्मिष्ठे! ज्ञातीनांसुखमावह॥१९ ॥
त्यजति ब्राह्मणः शिष्यान् देवयान्या प्रचोदितः।
यं सा कामयते कामं स कार्योऽद्य त्वयानघे!।
दासीत्वमभिजानामि देवयान्याः सुशोभने! ॥ २० ॥
शर्मिष्ठोवाच। यं च कामयते कामं करवाण्यहमद्य तम्।
मागाच्छुक्रो देवयानी च मत्कृते ॥ २१ ॥
शौनक उवाच। ततः कन्यासहस्रेण वृता शिविकया तदा।
पितुर्निदेशात्त्वरिता निश्चक्राम पुरोत्तमात् ॥ २२ ॥
शर्मिष्ठोवाच। अहं कन्यासहस्रेण दासी ते परिचारिका।
ध्रुवं त्वां तत्र यास्यामि यत्र दास्यति ते पिता ॥२३॥
देवयान्युवाच। स्तुवतो दुहिता चाहं याचतः प्रतिगृह्णतः।
स्तूयमानस्य दुहिता कथं दासी भविष्यसि ॥ २४ ॥
शर्मिष्ठोवाच। येन केनचिदार्तानां ज्ञातीनां सुखमावहेत्।

अनुयास्याम्यहं तत्र यत्र दास्यति ते पिता ॥ २५ ॥

शौनक उवाच। प्रतिश्रुते दासभावे दुहिता वृषपर्व्वणः।

देवयानी नृपश्रेष्ठ! पितरं वाक्यमब्रवीत् ॥ २६ ॥

प्रविशामि पुरं तात तुष्टास्मि द्विजसत्तम!।

अमोघं तव विज्ञानमस्ति विद्याबलञ्च ते ॥ २७ ॥

एवमुक्तो द्विजश्रेष्ठो दुहित्रा सुमहायशाः।

प्रविवेश पुरं हृष्टः पूजितः सर्व्वदानवैः ॥ २८ ॥

अथ त्रिंशोऽध्यायः॥

शौनक उवाच। अथ दीर्घेण कालेन देवयानी नृपोत्तम

वनं तदेव निर्याता क्रीड़ार्थं वरवर्णिनी ॥ १ ॥

तेन दासीसहस्रेण सार्धं शर्म्मिष्ठया तदा।

तमेव देशं संप्राप्ता यथा कामं चचार सा ॥ २ ॥

ताभिः सखीभिः सहिताः सर्व्वाभिर्मुदिता भृशम्।

क्रीड़न्त्योऽभिरताः सर्व्वाः पिबन्त्यो मधु माधवम् ॥३॥

खादन्त्यो विविधान् भक्ष्यान् फलानि विविधानि च।

पुनश्च नाहुषो राजा मृगलिप्सुर्यदृच्छया ॥ ४ ॥

तमेव देशं संप्राप्तो जललिप्सुः प्रतर्षितः।

ददर्श देवयानीञ्च शर्म्मिष्ठान्ताश्च योषितः ॥ ५ ॥

पिबन्त्यो ललनास्ताश्च दिव्याभरणभूषिताः।

उपविष्टाञ्च ददृशे देवयानीं शुचिस्मिताम् ॥ ६ ॥

रूपेणाप्रतिमां तासां स्त्रीणां मध्ये वराङ्गनाम्।

शर्म्मिष्ठया सेव्यमानां पादसम्बाहनादिभिः ॥ ७ ॥

ययातिरुवाच। द्वाभ्यां कन्यासहस्राभ्यां द्वे कन्ये परिवारिते।

गोत्रे च नामनी चैव द्वयोः पृच्छाम्यतोऽप्यहम् ॥ ८ ॥

देवयान्युवाच । आख्यास्याम्यहमादत्स्व वचनं मे नराधिप ।
शुक्रो नामासुरगुरुः सुतां जानीहि तस्य माम् ॥९॥
इयं च मे सखी दासी यत्राहं तत्र गामिनी ।
दुहिता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः ॥ १० ॥
ययातिरुवाच । कथं तु ते सखी दासी कन्येयं वरवर्णिनी ।
असुरेन्द्रसुता सुभ्रु ! परं कौतूहलं हि मे ॥ ११ ॥
देवयान्युवाच । सर्वमेव नरव्याघ्र ! विधानमनुवर्त्तते ।
विधिना विहितं ज्ञात्वा मा विचित्रं मनः कृथाः ॥ १२ ॥
राजवद्रूपवेशौ ते ब्राह्मीं वाचं बिभर्षि च ।
किंनामा त्वं कुतश्चासि कस्य पुत्रश्च शंस मे ॥१३॥
ययातिरुवाच । ब्रह्मचर्येण वेदो मे कृत्स्नः श्रुतिपथं गतः ।
राजाहं राजपुत्रश्च ययातिरिति विश्रुतः ॥१४ ॥
देवयान्युवाच । केन चार्थेन नृपते ! ह्येनं देशं समागतः ।
जिघृक्षुर्वारिजं किञ्चिदथवा मृगलिप्सया ॥ १५ ॥
ययातिरुवाच । मृगलिप्सुरहं भद्रे ! पानीयार्थमिहागतः ।
बहुधाप्यनुयुक्तोऽस्मि त्वमनुज्ञातुमर्हसि ॥ १६ ॥
देवयान्युवाच । द्वाभ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह ।
त्वदधीनास्मि भद्रं ते सखे ! भर्त्ता च मे भव ॥ १७॥
ययातिरुवाच । विद्ध्यौशनसि भद्रं ते न त्वदर्होऽस्मि भामिनि !
अविवाह्याः स्म राजानो देवयानि ! पितुस्तव ॥१८॥
देवयान्युवाच । संसृष्टं ब्रह्मणा क्षत्रं क्षत्रं ब्रह्मणि संश्रितम् ।
ऋषिश्च ऋषिपुत्रश्च नाहुषाद्य भजस्व माम् ॥ १९ ॥
ययातिरुवाच । एकदेहोद्भवा वर्णाश्चत्वारोऽपि वरानने ! ।
पृथक्धर्माः पृथक्शौचास्तेषां वै ब्राह्मणो वरः ॥२०

देवयान्युवाच। पाणिग्रहो नाहुषायं न पुंभिः सेवितः पुरा।
त्वमेनमग्रहीरग्रे वृणोमि त्वामहं ततः ॥ २१ ॥
कथं तु मे मनस्विन्याः पाणिमन्यः पुमान् स्पृशेत्।
गृहीतमृषिपुत्रेण स्वयं वा प्यृषिणा त्वया ॥ २२ ॥
ययातिरुवाच। क्रुद्धा दाशी विषात्सर्पाज्ज्वलनात्सर्वतो मुखात्।
दुराधर्षतरो विप्रः पुरुषेण विजानता ॥ २३ ॥
देवयान्युवाच। कथमाशी विषात्सर्पाज्ज्वलनात्सर्वतोमुखात्।
दुराधर्षतरो विप्र इत्यात्थ पुरुषर्षभ ! ॥ २४ ॥
ययातिरुवाच। हन्त्याशी विषस्त्वेकं शस्त्रेणैकश्च बध्यते।
हन्ति विप्रः सराष्ट्राणि पुराण्यपि हि कोपितः ॥ २५ ॥
दुराधर्षतरो विप्रस्तस्मात् भीरु! मतो मम।
अतो दत्ताञ्च पित्रा त्वां भद्रे! न विवहाम्यहम् ॥ २६ ॥
देवयान्युवाच।
दत्तां वहस्व पित्रा मां त्वं हि राजन्! वृता मया।
अयाचतो भयं नास्ति दत्ताञ्च प्रतिगृह्णतः ॥ २७ ॥
शौनक उवाच। त्वरितं देवयान्याथ प्रेषिता पितुरात्मनः।
सर्वं निवेदयामास धात्री तस्मै यथातथम् ॥ २८ ॥
श्रुत्वैव च स राजानं दर्शयामास भार्गवः।
दृष्ट्वैव मागतं विप्रं ययातिः पृथिवीपतिः ॥ २९ ॥
ववन्दे ब्राह्मणं काव्यं प्राञ्जलिः प्रणतः स्थितः।
तं चाप्यभ्यवदत्काव्यः साम्ना परमवल्गुना ॥ ३० ॥
देवयान्युवाच। राजायं नाहुष स्तात दुर्गमे पाणिमग्रहीत्।
नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे ॥ ३१ ॥
शुक्र उवाच। वृतोऽनया पतिर्वीर! सुतया त्वं ममेष्टया।

स्त्र्यर्थमेमां मया दत्तां महिषीं नहुषात्मज ! ॥३२॥
ययातिरुवाच । अधर्मो मां स्पृशेदेवं पापमस्यास्य भार्गव !
वर्णसंकरतो ब्रह्मन् ! इति त्वां प्रवृणोम्यहम् ॥ ३३ ॥
शुक्र उवाच । अधर्मात् त्वां विमुञ्चामि वरं वरयचेप्सितम् ।
अस्मिन् विवाहे त्वं श्लाघ्यो रहो पापमुदामि ते॥३४॥
वहस्व भार्य्यां धर्मेण देवयानीं शुचिस्मिताम् ।
अनया सह संप्रीतिमतुलां समवाप्नुहि ॥ ३५ ॥
इयं चापि कुमारी ते शर्म्मिष्ठा वार्षपर्वणी ।
संपूज्य सततं राजन् ! नचैनां शयने ह्वय: ॥ ३६ ॥
शौनक उवाच । एवमुक्तो ययातिस्तु शुक्रं कृत्वा प्रदक्षिणम् ।
जगाम स्वपुरं हृष्टः सोऽनुज्ञातो महात्मना ॥ ३७ ॥
अथैकत्रिंशोऽध्यायः ॥

---

शौनक उवाच । ययातिः स्वपुरं प्राप्य महेन्द्रपुरसन्निभम् ।
प्रविश्यान्तःपुरं तत्र देवयानीं न्यवेशयत् ॥ १ ॥
देवयान्याश्चानुमते सुतां तां वृषपर्वणः ।
अशोकवनिकाभ्याशे गृहं कृत्वा न्यवेशयत् ॥ २ ॥
वृतां दासीसहस्रेण शर्म्मिष्ठां मासुरायणीम् ।
वासोभिरन्नपानैश्च संविभज्य सुसंवृताम् ॥ ३ ॥
देवयान्यातु सहितः स नृपो नहुषात्मजः ।
विजहार बहूनब्दान् देववन्मुदितो भृशम् ॥ ४ ॥
ऋतुकाले तु संप्राप्ते देवयानी वराङ्गना ।
लेभे गर्भं प्रथमतः कुमारश्च व्यजायतः ॥ ५ ॥
गते वर्षसहस्रे तु शर्म्मिष्ठा वार्षपर्वणी ।

ददर्श यौवनं प्राप्ता ऋतुं सा कमलेक्षणा ॥ ६ ॥
चिन्तयामास धर्मज्ञा ऋतुप्राप्तौ च भामिनी।
ऋतुकालश्च संप्राप्तो न कश्चिन् मे पतिर्वृतः ॥ ७ ॥
किं प्राप्तं किञ्च कर्तव्यं कथं कृत्वा सुखं भवेत्।
देवयानी प्रसूतासौ वृथाहं प्राप्तयौवना ॥ ८ ॥
यथा तया वृतो भर्ता तथैवाहं वृणोमि तम्।
राज्ञा पुत्रफलं देयमिति मे निश्चिता मतिः ॥९ ॥
अपीदानीं स धर्मात्मा रहो मे दर्शनं व्रजेत् ॥८॥
शौनक उवाच। अथ निष्क्रम्य राजासौ तस्मिन् काले यदृच्छया।
अशोकवनिकाभ्याशे शर्मिष्ठां प्राप्य धिष्ठितः ॥ १०॥
तमेकं रहसि दृष्ट्वा शर्मिष्ठा चारुहासिनी।
प्रत्युद्गम्याञ्जलिं कृत्वा राजानं वाक्यमब्रवीत् ॥११॥
शर्मिष्ठोवाच। सोमस्येन्द्रस्य वायुश्च यमस्य वरुणस्य वा।
तव वा नाहुषस्याहे कः स्त्रियं द्रष्टुमर्हति ॥ १२ ॥
रूपाभिजनशीलैर्हि त्वं राजन्! वेत्थ मां सदा।
सा त्वां याचे प्रसाद्येऽह रन्तुं मेहि नराधिप ॥१३॥
ययातिरुवाच।
वेद्मि त्वां शीलसम्पन्नां दैत्यकन्यामनिन्दिताम्।
रूपन्तु ते न पश्यामि सूच्यग्रमपि निन्दितम् ॥ १४ ॥
मामब्रवीत्तदा शुक्रो देवयानीं यदावहम्।
नेयमाह्वयितव्या ते शयने वार्षपर्वणी ॥ १५ ॥
शर्मिष्ठोवाच।
न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्नविवाहकाले।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि॥१६॥

पृष्टास्तु साक्ष्ये प्रवदन्ति चान्यथा भवन्ति मिथ्यावचना नरेन्द्र ते ।
एकार्थतायान्तु समाहितायां मिथ्यावदन्तं ह्यनृतं हिनस्ति॥१७

ययातिरुवाच ।

राजा प्रमाणं भूतानां स विनश्येत् मृषा वदन् ।
अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्तुमुत्सहे ॥ १८ ॥

शर्मिष्ठोवाच ।

समावेतौ मतौ राजन् ! पतिः सख्याश्च यः पतिः ।
समं विवाह इत्याहुः सख्या मेऽसि पतिर्यतः ॥ १९ ॥

ययातिरुवाच । दातव्यं याचमानस्य ह्येति मे व्रतमाहितम् ।
त्वञ्च याचसि कामं मां ब्रूहि किङ्करवाणि तत् ॥२० ॥

शर्मिष्ठोवाच ।

अधर्मात् त्राहि मां राजन् ! धर्मञ्च प्रतिपादय ।
त्वत्तोऽपत्यवती लोके चरेयं धर्ममुत्तमम् ॥ २१ ॥
त्रय एवाधना राजन्! भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ २२ ॥
देवयान्या भुजिष्यास्मि वश्या च तव भार्गवी ।
सचाहं च त्वया राजन् ! भरणीया भजस्व माम्॥२३॥

शौनक उवाच ।

एवमुक्तस्तया राजा तथ्यमित्यभिजज्ञिवान् ।
पूजयामास शर्मिष्ठां धर्मं च प्रतिपादयत् ॥ २४ ॥
स समागम्य शर्मिष्ठां यथाकाममवाप्य च ।
अन्योन्यं चाभिसंपूज्य जग्मतुस्तौ यथागतम् ॥२५ ॥
तस्मिन् समागमे सुभ्रु: शर्मिष्ठा वार्षपर्वणी ।
लेभे गर्भं प्रथमतः तस्मान्नृपतिसत्तमात् ॥ २६ ॥

त्वत्तोहि मे पूज्यतरो राजर्षिः किन्नवेत्थितत् ॥ २२॥
शौनक उवाच। श्रुत्वा तस्या स्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नाद्येह वक्ष्यामि विप्रियं मे त्वया कृतम् ॥२३॥
सहसोत्पतितां श्यामां दृष्ट्वा तां साश्रुलोचनाम्।
तूर्णं सकाशं काव्यस्य प्रस्थितां व्यथितस्तदा ॥२४ ॥
अनुवव्राज सम्भ्रान्तः पृष्ठतः सान्त्वयन् नृपः!
न्यवर्तत न सा चैव क्रोधसंरक्तलोचना ॥ २५ ॥
अपि ब्रुवन्ती किञ्चिच्च राजानं साश्रुलोचना।
अचिरादेव संप्राप्तः काव्यस्योशनसोऽन्तिकम् ॥ २६ ॥
सातु दृष्ट्वेव पितरमभिवाद्याग्रतः स्थिता।
अनन्तरं ययातिस्तु पूजयामास भार्गवम् ॥ २६ ॥
देवयान्युवाच। अधर्मेण जितोधर्म्मः प्रवृत्तमधरोत्तरम्।
शर्मिष्ठयातिवृत्तास्मि दुहिता वृषपर्वणः ॥ २८ ॥
त्रयोऽस्याञ्जनिताः पुत्रा राज्ञानेन ययातिना।
दुर्भगाया मम द्वौ तु पुत्रौ तात! ब्रवीमि ते ॥ २९॥
धर्म्मज्ञ इति विख्यात एष राजा भृगूद्वह!।
अतिक्रान्तश्च मर्यादां काव्यैतत्कथयामि ते ॥ ३०॥
शुक्र उवाच। धर्म्मज्ञस्त्वं महाराज! योऽधर्म्ममकृथाः प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ॥ ३१ ॥
ययातिरुवाच। ऋतुं यो याच्यमानाया न ददाति पुमान् वृतः।
भ्रूणहेत्युच्यते ब्रह्मन्! सचेह ब्रह्मवादिभिः ॥ ३२ ॥
ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति योहि धर्मेण ब्रह्महेत्युच्यते बुधैः ॥ ३३ ॥
इत्येतानि समीक्ष्याहङ्कारणानि भृगूद्वह!।

अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान् ॥ ३४ ॥
शुक्र उवाच । न त्वहं प्रत्यवेक्ष्यस्ते मदधीनोऽसि पार्थिव ! ।
मिथ्याचरणधर्मेषु चौर्यं भवति नाहुष ! ॥ ३५ ॥
शौनक उवाच । क्रोधेनोशनसा शप्तो ययातिर्नाहुषस्तदा ।
पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यत ॥ ३६ ॥
ययातिरुवाच । अतृप्तो यौवनस्याहं देवयान्यां भृगूद्वह ! ।
प्रसादं कुरु मे ब्रह्मन् ! जरेयं मा विशेत माम् ॥३७ ॥
शुक्र उवाच । नाहं मृषा वदाम्येतज्जरां प्राप्तोऽसि भूमिप ! ।
जरान्त्वेतां त्वमन्यस्मिन् संक्रामय यदीच्छसि ॥३८॥
ययातिरुवाच ।
राज्यभाक् स भवेद् ब्रह्मन् ! पुण्यभाक् कीर्तिभाक् तथा
यो दद्यान्मे वयः शुक्रस्तद्भवाननुमन्यताम् ॥ ३९ ॥
शुक्र उवाच । संक्रामयिष्यसि जरां यथेष्टं नहुषात्मजः ।
मामनुध्याय तत्वेन न च पापमवाप्स्यसि ॥ ४० ॥
वयो दास्यति ते पुत्रो यः स राजा भविष्यति ।
आयुष्मान् कीर्तिमांश्चैव बह्वपत्यस्तथैव ॥ ४१ ॥

---

अथ त्रयस्त्रिंशोऽध्यायः ।

शौनक उवाच ।

जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः ॥ १ ॥
ययातिरुवाच । जरा वली च मां तात ! पलितानि च पर्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥ २॥
त्वं यदो ! प्रतिपद्यस्व पाप्मानञ्जरया सह ।

यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ ३ ॥
पूर्णे वर्षसहस्रे तु त्वदीयं यौवनं त्वहम् ।
दत्त्वा संप्रतिपत्स्यामि पाप्मानञ्जरया सह ॥ ४ ॥
यदुरुवाच । सितश्मश्रुधरो दीनो जरसा शिथिलीकृतः ।
वलीसन्ततगात्रश्च दुर्दर्शो दुर्बलः कृशः ॥ ५ ॥
अशक्तः कार्यकरणे परिभूतः स यौवने ।
सहोपजीविभिश्चैव तज्जरां नाभिकामये ॥ ६ ॥
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ! ।
जरां गृहीतुं धर्मज्ञ ! पुत्र मन्यं वृणीष्व वै ॥ ७ ॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
पापान्मातुलसम्बन्धाद्दुष्प्रजा ते भविष्यति ॥ ८ ॥
तुर्वसो ! प्रतिपद्यस्व पाप्मानञ्जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ! ॥ ९ ॥
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
तथैव प्रतिपत्स्यामि पाप्मानञ्जरया सह ॥ १० ॥
तुर्वसुरुवाच । न कामये जरां तात ! कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिमानविनाशिनीम् ॥ ११ ॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजासमुच्छेदं तुर्वसो ! तव यास्यति ॥ १२ ॥
संकीर्णाचारधर्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु लोकेषु नूनं राजा भविष्यसि ॥ १३ ॥
गुरुदारप्रसक्तेषु तिर्य्यग्योनिरतेषु च ।
पशुधर्मिषु म्लेच्छेषु पापेषु प्रभविष्यसि ॥ १४ ॥

शौनक उवाच। एवं स तुर्वसुं शप्त्वा ययातिः सुतमात्मनः।
शर्मिष्ठायाः सुतं ज्येष्ठं द्रुह्युं वचनमब्रवीत् ॥ १५ ॥
ययातिरुवाच। द्रुह्यो! त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम्।
जरां वर्षसहस्रं मे यौवनं स्वं प्रयच्छताम् ॥ १६ ॥
पूर्णे वर्षसहस्रे तु ते प्रदास्यामि यौवनम्।
स्वञ्चादास्यामि भूयोऽहं पाप्मानञ्जरया सह ॥ १७॥
द्रुह्यु उवाच। न राजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम्।
न रागश्चास्य भवति तज्जरान्ते न कामये ॥ १८ ॥
ययातिरुवाच। यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि।
तद्द्रुह्यो! वै प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥ १९॥
नौरूपप्लवसञ्चारो यत्र नित्यं भविष्यति।
अराजभोजशब्दस्त्वं तत्र प्राप्स्यसि सान्वयः ॥ २०॥
ययातिरुवाच। अनो! त्वं प्रतिपद्यस्व पाप्मानञ्जरया सह।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥ २१ ॥
अनुरुवाच। जीर्णः शिशुरिवादत्ते कालेऽन्नमशुचिर्यथा।
न जुहोति च कालेऽग्निं तां जरां नाभिकामये॥२२॥
ययातिरुवाच। यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि।
जरादोषस्त्वयोक्तो यस्तस्मात् त्वं प्रतिपत्स्यसे॥ २३ ॥
प्रजाश्च यौवनं प्राप्ता विनश्यन्ति ह्यनो! तव।
अग्निप्रस्कन्दनगतस्त्वञ्चाप्येवं भविष्यसि ॥ २४ ॥
ययातिरुवाच। पूरो! त्वं प्रतिपद्यस्व पाप्मानं जरया सह।
त्वं मे प्रियतरः पुत्रस्त्वं वरीयान् भविष्यसि ॥ २५ ॥
जरावली च मां तात! पलितानि च पर्यगुः।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥२६ ॥

किञ्चित् कालं चरेयं वै विषयान् वयसा तव।
पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम्॥ २७।
स्वञ्चैव प्रतिपत्स्येऽहं पाप्मानं जरया सह।
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा॥ २८॥
यथात्थ त्वं महाराज! तत् करिष्यामि ते वचः।
प्रतिपत्स्यामि ते राजन्! पाप्मानं जरया सह॥ २९॥
गृहाण यौवनं मत्तश्चर कामान् यथेप्सितान्।
जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव।
यौवनं भवते दत्त्वा चरिष्यामि यथेच्छया॥ ३०॥

---

अथ चतुस्त्रिंशोऽध्यायः।

शौनक उवाच। एवमुक्तः स राजर्षिः काव्यं स्मृत्वा महाव्रतम्।
संक्रामयामास जरां तदा पुत्रे महात्मनि॥ १॥
पौरवेणाथ वयसा ययातिर्नहुषात्मजः।
प्रीतियुक्तो नरश्रेष्ठ चचार विषयान् प्रियान्॥ २॥
यथाकामं यथोत्साहं यथाकालं यथा सुखम्।
धर्माविरुद्धान् राजेन्द्रो यथार्हति स एव हि॥ ३॥
देवानतर्पयद्यज्ञैः श्राद्धैरपि पितामहान्।
दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान्॥ ४॥
अतिथीनन्नपानैश्च विशश्च प्रतिपालनैः।
आनृशंस्येन शूद्रांश्च दस्यून् निग्रहणेन च॥ ५॥
धर्म्मेण च प्रजाः सर्व्वा यथावदनुरञ्जयन्।
ययातिः पालयामास साक्षादिन्द्र इवापरः॥ ६॥
स राजा सिंहविक्रान्तो युवाविषयगोचरः।

अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥ ७ ॥
स सम्प्राप्य शुभान् कामान् तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ॥ ८ ॥
परिचिन्त्य स कालज्ञः कलाः काष्ठाश्च वीर्य्यवान् ।
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥ ९ ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ १० ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥ ११ ॥
यथासुखं यथोत्साहं यथाकाममरिन्दम ! ।
सेविता विषयाः पुत्र ! यौवनेन मया तव ॥ १२ ॥
पूरो ! प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ।
राज्यञ्चैव गृहाणेदं त्वं हि मे प्रियकृत्सुतः ॥ १३ ॥
शौनक उवाच । प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा ।
यौवनं प्रतिपेदे स पूरुः स्वं पुनरात्मनः ॥ १४ ॥
अभिषेक्तुकामञ्च नृपं पूरुं पुत्रं कनीयसम् ।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥ १५ ॥
कथं शुक्रस्य दौहित्रं देवयान्याः सुतं प्रभो ! ।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि ॥ १६ ॥
ज्येष्ठो यदुस्तावसुतस्तुर्वसुस्तदनन्तरम् ।
शर्मिष्ठायाः सुतो द्रुह्युस्तथानुः पूरुरेव च ॥ १७ ॥
कथं ज्येष्ठमतिक्रम्य कनीयान् राज्यमर्हति ।
एतत् सम्बोधयामस्त्वां स्वधर्ममनुपालय ॥ १८ ॥

ययातिरुवाच । ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यतो राज्यं न देयं मे कथञ्चन ॥ १९ ॥
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः । २० ॥
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः ।
स पुत्रः पुत्रवद्यश्च वर्त्तते पितृमातृषु ॥ २१ ॥
यदुनाहं मवज्ञात स्तथा तुर्वसुनापि वा ।
द्रुह्येण चानुना चैव मय्यवज्ञा कृता भृशम् ॥ २२ ॥
पूरुणा मे कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान्मम दायादो जरा येन धृता मम ॥ २३ ॥
मम कामः स च कृतः पूरुणा पुत्ररूपिणा ।
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ॥ २४ ॥
पुत्रो यस्त्वानुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पूरू राज्येऽभिषिच्यताम् ॥ २५ ॥
प्रकृतय ऊचुः । यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा
सर्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ॥ २६ ॥
अर्हः पूरो रिदं राज्यं यः प्रियः प्रियकृत्तव ।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् ॥ २७ ॥
शौनक उवाच । पौरजानपदैस्तुष्टै रित्युक्तो नाहुषस्तदा ।
अभिषिच्य ततः पूरुं राज्ये स्वसुतमात्मजम् ॥ २८ ॥
दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः ।
पुरात् स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥२९॥
यदोस्तु यादवा जाता तुर्वसोर्यवनाः सुताः ।
द्रुह्यस्य तु सुता भोजा अनोस्तु म्लेच्छजातयः ॥ ३० ॥

पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ।
इदं वर्षसहस्रात्तु राजंत्र कुरु कुलागतम् ॥ ३१ ॥

---

पञ्चत्रिंशोऽध्यायः ।

शौनक उवाच । एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन् मुनिः ॥ १ ॥
उषित्वा वनवासं स ब्राह्मणैः सह संश्रितः ।
फलमूलाशनो दान्तो यथा स्वर्गमितो गतः ॥ २ ॥
स गतः स्वर्गवासन्तु न्यवसत् मुदितः सुखी ।
कालस्य नातिमहतः पुनः शक्रेण पातितः ॥ ३ ॥
विवशः प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलम् ।
स्थितश्चासीदन्तरिक्षे स तदेति श्रुतं मया ॥ ४ ॥
तत एव पुनश्चापि गतः स्वर्गमिति श्रुतिः ।
राज्ञा वसुमता सार्द्धमष्टकेन च वीर्यवान् ।
प्रतर्दनेन शिबिना समेत्य किल संसदि ॥ ५ ॥
शतानीक उवाच । कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः ।
कथमिन्द्रेण भगवन् ! पातितो मेदिनीतले ॥ ६ ॥
सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः ।
कथ्यमानं त्वया विप्र ! देवर्षिगणसन्निधौ ॥ ७ ॥
देवराजसमो ह्यासीद्ययातिः पृथिवीपतिः ।
वर्द्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥ ८ ॥
तस्य विस्तीर्णयशसः सत्यकीर्त्तेर्महात्मनः ।
श्रोतुमिच्छामि देवेश ! दिवि चेह च सर्वशः ॥ ९ ॥

शौनक उवाच। हन्त ते कथयिष्यामि ययातेरुत्तमां कथाम्।
दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम्॥ १०॥
ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसम्।
राज्येऽभिषिच्य मुदितः प्रवव्राज वनं तदा॥ ११॥
अन्त्येषु स विनिक्षिप्य पुत्रान् यदुपुरोगमान्।
फलमूलाशनो राजा वनेऽसौ न्यवसच्चिरम्॥ १२॥
स जितात्मा जितक्रोधस्तर्पयन् पितृदेवताः।
अग्नींश्च विधिवज्जुह्वन् वानप्रस्थविधानतः॥ १३॥
अतिथीन् पूजयन्नित्यं वन्येन हविषा विभुः।
शिलोञ्छवृत्तिमास्थाय शेषान्नकृतभोजनः॥ १४॥
पूर्णं सहस्रं वर्षाणामेवंवृत्तिरभून्नृपः।
अम्बुभक्षः समास्त्रिंशदासीन्नियतवाङ्मनाः॥ १५॥
ततस्तु वायुभक्षोऽभूत्संवत्सरमतन्द्रितः।
पञ्चाग्निमध्ये च तपस्तेपे संवत्सरं पुनः॥ १६॥
एकपादस्थितश्चासीत् षण्मासाननिलाशनः।
पुण्यकीर्तिस्ततः स्वर्गं जगामावृत्य रोदसी॥ १७॥

---

## अथ षट्त्रिंशोऽध्यायः।

शौनक उवाच। स्वर्गतस्तु स राजेन्द्रो न्यवसद्देवसद्मनि।
पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तथा॥ १॥
देवलोकाद् ब्रह्मलोकं सञ्चरन् पुण्यकृद्वशी।
अवसत् पृथिवीपालो दीर्घकालमिति श्रुतिः॥ २॥
स कदाचिन्नृपश्रेष्ठः ययातिः शक्रमागतः।

कथान्ते तत्र शक्रेण पृष्टः स पृथिवीपतिः ॥ २ ॥

शक्र उवाच ।

यदा स पूरुस्तव पुत्रेषु राजन्! जरां गृहीत्वा प्रचचार लोके ।

तदा राज्यं सम्प्रदायैव तमस्मै त्वया किमुक्तः कथयेह सत्यम् ।

ययातिरुवाच । प्रकृत्यनुमते पूरुं राज्ये कृत्वेदमब्रुवम् ।

गङ्गायमुनयोर्मध्ये कृत्स्नोऽयं विषयस्तव ।

मध्ये पृथिव्यास्त्वं राजा भ्रातरोऽन्तेऽधिपास्तव ॥ ५॥

अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथाऽतितिक्षुरतितिक्षोर्विशिष्टः ।

अमानुषेभ्यो मानुषश्च प्रधानो विद्वांस्तथैवाविदुषः प्रधानः ॥६॥

आक्रोश्यमानो नाक्रोशेन्मन्युमेव तितिक्षति ।

आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ७ ॥

नारुन्तुदः स्यान्न नृशंसवादी नहीनतः परमभ्याददीत ।

यथाऽस्य वाचा पर उद्विजेत न तां वदेद्रुशतीं पापलोक्याम् ॥८॥

अरुन्तुदं पुरुषं तीव्रवाचं वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।

विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धान्निरृतिं वहन्तम् ९

सद्भिः पुरस्तादभिपूजितः स्यात् सद्भिस्तथा पृष्ठतो रक्षितः स्यात्

सदा सतामतिवादांस्तितिक्षेत् सतां वृत्तं पालयन् साधुवृत्तः ॥१०॥

वाक्सायका वदनान्निःपतन्ति यैराहतः शोचति वा त्र्यहानि ।

परस्य नो मर्मसु ते पतन्ति तान् पण्डितो नावसृजेत् परेषु ॥११॥

नास्तीदृशं सम्वननं त्रिषु लोकेषु किञ्चन ।

यथा मैत्री च लोकेषु दानञ्च मधुरा च वाक् ॥ १२ ॥

तस्मात् सान्त्वं सदा वाच्यं परुषं नैव कुत्रचित् ।

पूज्यान् संपूजयेद्दद्यान्नाभिशापं कदाचन ॥ १३ ॥

इन्द्र उवाच ।

सर्वाणि कार्याणि समाप्य राजन्! गृहान् परित्यज्य वनं गतोऽसि
तत्त्वां पृच्छामि नहुषस्य पुत्र! केनापि तुल्यस्तपसा ययाते ॥ १ ॥

ययातिरुवाच । नाहं देवमनुष्येषु न गन्धर्वमहर्षिषु ।
आत्मनस्तपसा तुल्यं कञ्चित् पश्यामि वासव! ॥ २ ॥

इन्द्र उवाच ।

यदावमंस्थाः सदृशः श्रेयसश्च पापीयसश्चाविदित प्रभावः ।
तस्माल्लोकाऽन्तवन्तस्तवेमे क्षीणे पुण्ये पतितोऽस्यद्य राजन्!॥३॥

ययातिरुवाच ।

सुरर्षिगन्धर्वनरावमानात् क्षयं गता मे यदि शक्रलोकाः ।
इच्छाम्यहं सुरलोकाद्विहीनः सतां मध्ये पतितुं देवराज! ॥४॥

इन्द्र उवाच ।

सतां सकाशे पतितोऽसि राजन्! च्युतः प्रतिष्ठां यत्र लब्धासि भूयः ।
एवं विदित्वा तु पुनर्ययाति न तेऽवमान्याः सदृशः श्रेयसे च ॥५॥

शौनक उवाच ।

ततः पपातामरराजजुष्टात् पुण्याल्लोकात्पतमानं ययातिम् ।
संप्रेक्ष्य राजर्षिवरोऽष्टकस्तमुवाच सद्धर्मविधानगोप्ता ॥ ६ ॥

अष्टक उवाच ।

कस्त्वं युवा वासवतुल्यरूपः स्वतेजसा दीप्यमानो यथाग्निः ।
पतस्युदीर्णोऽम्बुधरप्रकाशः खे खेचराणां प्रवरो यथार्कः ॥७॥
दृष्ट्वा च त्वां सूर्यपथात् पतन्तं वैश्वानरार्कद्युतिमप्रमेयम् ।
किन्नु स्विदेतत् पततीव सर्वे वितर्कयन्तः परिमोहिताः स्मः॥८॥
दृष्ट्वा च त्वाधिष्ठितं देवमार्गे शक्रार्कविष्णुप्रतिमप्रभावम् ।
प्रत्युद्गतास्त्वां वयमद्य सर्वे तत्पाते तव जिज्ञासमानाः ॥९॥

अथापि त्वां श्रुणुवः प्रष्टुमग्रे न च त्वमस्मान् पृच्छसि के वयं स्म।
तत्त्वां पृच्छामि स्पृहणीयरूपं कस्य त्वं वा किंनिमित्तं त्वमागाः॥१०॥
भयन्तु तेऽव्येतु विषादमोहौ त्यजाशु देवेन्द्रसमानरूप!।
त्वां वर्तमानं हि सतां सकाशे नालं प्रसोढुं बलहापि शक्रः॥११॥
सन्तः प्रतिष्ठा हि सुखच्युतानां सतां सदैवामरराजकल्प!।
ते सङ्गताः स्थावरजङ्गमेशाः प्रतिष्ठितस्त्वं सदृशेषु सत्सु॥१२॥
प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः।
प्रभुः सूर्य्यः प्रकाशाच्च सतां चाभ्यागतः प्रभुः॥१३॥

---

## अथ अष्टत्रिंशोऽध्यायः।

ययातिरुवाच।

अहं ययातिर्नहुषस्य पुत्रः पूरोः पिता सर्वभूतावमानात्।
प्रभ्रंशितोऽहं सुरसिद्धलोकात् परिच्युतः प्रपताम्यल्पपुण्यः॥१॥
अहं हि पूर्वो वयसा भवद्भ्यस्तेनाभिवादं भवतां प्रयुञ्जे।
यो विद्यया तपसा जन्मना वा वृद्धः स वै सम्भवति द्विजानाम्॥२॥

अष्टक उवाच।

अवादीस्त्वं वयसास्मि वृद्ध इति वै राजन्नधिकः कथञ्चित्।
यो वै विद्वांस्तपसा च वृद्धः स एव पूज्यो भवति द्विजानाम्॥३॥

ययातिरुवाच।

प्रतिकूलं कर्म्मणां पापमाहुस्तद्वर्त्तिनां प्रवणं पापलोकम्।
सन्तो सतो नानुवर्तन्त ते वै यदात्मनैषां प्रतिकूलवादी॥४॥
अभूद्धनं मे विपुलं महद्वै विचेष्टमानोऽधिगन्ता तदस्मि।
एवं प्रधार्य्यात्महिते निविष्टो यो वर्तते स विजानाति धीरः॥५॥
नानाभावा बहवो जीवलोके दैवाधीना नष्टचेष्टाधिकाराः।

तत्तत् प्राप्य न विहन्येत धीरो दिष्टं बलीय इति मत्वात्मबुध्या ।
सुखं हि जन्तुर्यदिवापि दुःखं दैवाधीनं विन्दति नात्मशक्त्या ।
तस्माद्दिष्टं बलवन्मन्यमानो न सञ्ज्वरेन्नापि हृष्येत्कदाचित् ॥ ७॥

भयेन मुह्याम्यष्टकाहं कदाचित्
सन्तापो मे मानसो नास्ति कश्चित् ।
धाता यथा मां विदधाति लोके
ध्रुवं तथाहं भवितेति मत्वा ॥ ८ ॥

संस्वेदजा ह्यण्डजा ह्युद्भिदश्च सरीसृपाः क्रमयोऽप्यप्सु मत्स्याः ।
तथाश्मानस्तृणकाष्ठञ्च सर्वं दिष्टक्षये स्वां प्रकृतिं भजन्ते ॥९॥
अनित्यतां सुखदुःखस्य बुध्वा कस्मात्सन्तापमष्टकाहं भजेयम् ।
किं कुर्य्यां वै किञ्च कृत्वा न तप्ये तस्मात्सन्तापं वर्जयाम्यप्रमत्तः॥१०

शौनक उवाच ।

एवं ब्रुवाणं नृपतिं ययातिमथाष्टकः पुनरेवान्वपृच्छत् ।
मातामहं सर्वगुणोपपन्नं यत्र स्थितं स्वर्गलोके यथावत् ॥११॥

अष्टक उवाच ।

ये ये लोकाः पार्थिवेन्द्र प्रधानास्त्वया भुक्ता यच्च कालं यथा च ।
तन्मे राजन् ब्रूहि सर्वं यथावत् क्षेत्रज्ञवद्भाषसे त्वं हि धर्मम्॥१२

ययातिरुवाच ।

राजाहमासन्निह सार्वभौमस्ततो लोकान् महतश्चाजयं वै
तत्रावसं वर्षसहस्रमात्रं ततो लोकान् परमानभ्युपेतः ॥ १३॥
ततः पुरीं पुरुहूतस्य रम्यां सहस्रद्वारां शतयोजनान्ताम् ।
अध्यावसं वर्षसहस्रमात्रं ततो लोकान् परमानभ्युपेतः ॥ १४॥
ततो दिव्यमजरं प्राप्य लोकं प्रजापतेर्लोकपतेर्दुरापम् ।
तत्रावसं वर्षसहस्रमात्रं ततो लोकान् परमानभ्युपेतः ॥१५॥

देवस्य देवस्य निवेशने च विजित्य लोकान् न्यवसं यथेष्टम्।
संपूज्यमानस्त्रिदशैः समस्तैस्तुल्यप्रभावद्युतिरीश्वराणाम्॥१६॥

तथा वसन्नन्दनकामरूपी
संवत्सराणामयुतं शतानाम्।
सहाप्सरोभिर्विचरन् पुण्यगन्धान्
पश्यन्नगान् पुष्पितांश्चारुरूपान्॥ १७॥
तत्र स्थितं मां देवसुखेषु सक्तं
कालेऽतीते महति ततोऽतिमात्रम्।
दूतो देवानामब्रवीदुग्ररूपो
ध्वंसेत्युच्चैस्त्रिः प्लुतेन स्वरेण॥१८॥

एतावन्मे विदितं राजसिंह ततो भ्रष्टोऽहं नन्दनात् क्षीणपुण्यः
वाचोऽश्रौषञ्चान्तरिक्षे सुराणामनुक्रोशाच्छोचतां मां नरेन्द्र॥१९॥
अकस्माद्वै क्षीणपुण्यो ययातिः पतत्यसौ पुण्यकृत् पुण्यकीर्तिः।
तानब्रुवं पतमानस्तदाहं सतां मध्ये निपतेयं कथम्॥२०॥
तैराख्यातां भवतां यज्ञभूमिं समीक्ष्य चैनामहमागतोऽस्मि।
हविर्गन्धैर्दर्शितां यज्ञभूमिं धूमापाङ्गं परिगृह्य प्रतीताम्॥२१॥

---

ऊनचत्वरिंशत्तमोऽध्यायः।

अष्टक उवाच।

यदा वसन्नन्दने कामरूपे संवत्सराणामयुतं शतानाम्।
किं कारणं कार्तयुगप्रधान हित्वा तद्वै वसुधामन्वपद्यः॥१॥

ययातिरुवाच।

ज्ञातिः सुहृत् स्वजनो यो यथेह क्षीणे वित्ते त्यज्यते मानवैर्हि।
तथा स्वर्गे क्षीणपुण्यं मनुष्यं त्यजन्ति सद्यः खेचरा देवसंघाः॥२॥

अष्टक उवाच ।

कथं तस्मिन् क्षीणपुण्या भवन्ति संमुह्यते मेऽत्र मनोऽतिमात्रम् ।
किं विशिष्टाः कस्य धामोपयान्ति तद्वै ब्रूहि क्षेत्रवित्त्वं मतो मे ३

ययातिरुवाच ।

इमं भौमं नरकन्ते पतन्ति लालप्यमाना नरदेव ! सर्वे ।
ते कङ्कगोमायुपलाशनार्थं चितौ विवृद्धिं बहुधा प्रयान्ति ॥४॥
तस्मादेवं वर्जनीयं नरेन्द्रं दुष्टं लोके गर्हणीयञ्च कर्म ।
आख्यातं ते पार्थिव सर्वमेतत् भूयश्चेदानीं वद किन्ते वदामि ॥५

अष्टक उवाच ।

यदा तु तांस्ते वितुदन्ते वयांसि तथा गृध्राः शितिकण्ठाः पतङ्गाः
कथं भवन्ति कथमाभवन्ति त्वत्तो भौमं नरकमहं शृणोमि ॥६॥

ययातिरुवाच ।

ऊर्ध्वं देहात्कर्म्मणो जृम्भमाणात् व्यक्तं पृथिव्यामनुसञ्चरति ।
इमं भौमं नरकन्ते पतन्ति नावेक्षन्ते वर्षपूगाननेकान् ॥ ७ ॥
षष्टिं सहस्राणि पतन्ति व्योम्नि तथाशीतिञ्च व तु वत्सराणाम् ।
तान्वै तुदन्ते प्रपतन्तः प्रयातान्
भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ॥ ८ ॥

अष्टक उवाच ।

यदेतांस्ते संपततस्तुदन्ति भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ।
कथं भवन्ति कथमाभवन्ति कथं भूगर्भभूता भवन्ति ॥ ९ ॥

ययातिरुवाच ।

असृग्रेतःपुष्परसानुयुक्तं अन्वेति सद्यः पुरुषेण सृष्टम् ।
तद्वै तस्या रज आपद्यते च स गर्भभूतः समुपैति तत्र ॥१०॥
वनस्पतीनोषधींश्चा विशन्ति अपो वायुं पृथिवीञ्चान्तरिक्षम् ।

चतुष्पदं द्विपदञ्चापि सर्वं एवंभूता गर्भभूता भवन्ति ॥ ११ ॥

अष्टक उवाच ।

अन्यद्वपुर्विदधातीह गर्भं उताहोस्वित् स्वेन कामेन याति ।
आपद्यमानो नरयोनिमेतामाचक्ष्व मे संशयात् पृच्छतस्त्वम् ॥ १२
शरीरदेहादिसमुच्छ्रयञ्च चक्षुःश्रोत्रे लभते केन संज्ञाम् ।
एतत् सर्वं तात आचक्ष्व पृष्टः क्षेत्रज्ञं त्वां मन्यमाना हि सर्वे १३

ययातिरुवाच ।

वायुः समुत्कर्षति गर्भयोनिमृतौ रेतःपुष्परसानुयुक्तम् ।
स तत्र तन्मात्रकृताधिकारः क्रमेण संवर्धयतीह गर्भम् ॥ १४ ॥
स जायमानोऽथ गृहीतगात्रः संज्ञामधिष्ठाय ततो मनुष्यः ।
स श्रोत्राभ्यां वेदयतीह शब्दं स वै रूपं पश्यति चक्षुषा च ॥ १५ ॥
घ्राणेन गन्धं जिह्वयाथो रसञ्च त्वचा स्पर्शं मनसा वेदभावम् ।
इत्यष्टकेहोपचितं हि विद्धि महात्मनः प्राणभृतः शरीरे ॥ १६

अष्टक उवाच ।

यः संस्थितः पुरुषो दह्यते वा निखन्यते वापि निकृष्यते वा ।
अभावभूतः स विनाशमेत्य केनात्मानं चेतयते पुरस्तात् ॥ १७ ॥

ययातिरुवाच ।

हित्वा सोऽसून् सुप्तवन्निश्चितत्वात् पुरोधाय सुकृतं दुष्कृतञ्च ।
अन्यां योनिं पुण्यपापानुसारां हित्वा देहं भजते राजसिंह ॥ १८ ॥
पुण्यां योनिं पुण्यकृतो विशन्ति पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापाश्च मे विवक्षास्ति महानुभाव १९
चतुष्पदा द्विपदाः पक्षिणश्च तथाभूता गर्भभूता भवन्ति ।
आख्यातमेतन्निखिलं हि सर्वं भूयस्तु किं पृच्छसि राजसिंह २०

अष्टक उवाच ।

किंस्वित् कृत्वा लभते तात संज्ञां मर्त्यः श्रेष्ठां तपसा विद्यया वा।
तन्मे पृष्टः शंस सर्वं यथावच्छुभान् लोकान् येन गच्छेत् क्रमेण॥२१

ययातिरुवाच।

तपश्च दानञ्च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा।
स्वर्गस्य लोकस्य वदन्ति सन्तो द्वाराणि सप्तैव महान्ति पुंसाम्॥२२
सर्वाणि चैतानि यथोदितानि तपःप्रधानान्यभिमर्शकेन।
नश्यन्ति मानेन तमोऽभिभूताः पुंसः सदैवेति वदन्ति सन्तः॥२३
अधीयानः पण्डितं मन्यमानो यो विद्यया हन्ति यशः परस्य।
तस्यान्तवन्तः पुरुषस्य लोका नचास्य तद्ब्रह्मफलं ददाति॥२४॥
चत्वारि कर्माणि भयङ्कराणि भयं प्रयच्छन्त्ययथाकृतानि।
मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः॥२५॥
न मान्यमानो मुदमाददीत न सन्तापं प्राप्नुयाच्चावमानात्।
सन्तः सतः पूजयन्तीह लोके नासाधवः साधु बुद्धिं लभन्ते॥२६
इति दद्यादिति यजेदित्यधीयीत मे श्रुतम्।
इत्येतान्यभयान्याहुस्तान्यवर्ज्यानि नित्यशः॥२७॥
येनाश्रयं वेदयन्ते पुराणं मनीषिणो मानसे मानयुक्तम्।
तन्निश्रेयस्तेन संयोगमेत्य परां शान्तिं प्राप्नुयुः प्रेत्य चेह॥२८॥

अथ चत्वारिंशत्तमोऽध्यायः।

अष्टक उवाच।

चरन् गृहस्थः कथमेति देवान् कथं भिक्षुः कथमाचार्य्यकर्मा।
वानप्रस्थः सत्पथे सन्निविष्टो बह्नन्यस्मिन् संप्रति वेदयन्ति॥१॥

ययातिरुवाच।

आहूताध्यायी गुरुकर्मसु चोद्यतः पूर्वोत्थायी चरमञ्चोपशायी।
मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी॥२
धर्मागतं प्राप्य धनं यजेत दद्यात्सदैवातिथीन् भोजयेच्च।

अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषत् पुराणी ॥ ३ ॥
स्ववीर्य्यजीवी वृजिनान्निवृत्तो दाता परेभ्यो न परोपतापी।
तादृङ् मुनिः सिद्धिमुपैति मुख्यां वसन्नरण्ये नियताहारचेष्टः॥४
अशिल्पजीवी विगृहश्च नित्यं जितेन्द्रियः सर्वतो विप्रमुक्तः।
अनोकशायी लघु लिप्समानश्चरन् देशानेकचरः स भिक्षुः ॥५॥
रात्र्यायया चाभिजिताश्च लोका भवन्ति कामाभिजिताः सुखेन च
तामेव रात्रिं प्रयतेत विद्वानरण्यसंस्थो भवितुं यतात्मा ॥६ ॥
दशैव पूर्वान् दश चापरांस्तु ज्ञातींस्तथात्मानमथैकविंशम्।
अरण्यवासी सुकृतं दधाति मुक्त्वात्वरण्ये स्वशरीरधातून् ॥ ७॥

अष्टक उवाच।

कतिस्विदेव मुनयो मौनानि कति चाप्युत।
भवन्तीति तदाचक्ष्व श्रोतुमिच्छामहे वयम् ॥ ८ ॥
ययातिरुवाच। अरण्ये वसतो यस्य ग्रामो भवति पृष्ठतः।
ग्रामे वा वसतोऽरण्यं स मुनिः स्याज्जनाधिप ! ॥ ९ ॥

अष्टक उवाच।

कथंस्विद्वसतोऽरण्ये ग्रामो भवति पृष्ठतः।
ग्रामे वा वसतोऽरण्यं कथं भवति पृष्ठतः ॥ १० ॥

ययातिरुवाच।

न ग्राम्यमुपयुञ्जीत य आरण्यो मुनिर्भवेत्।
तथास्य वसतोऽरण्ये ग्रामो भवति पृष्ठतः ॥ ११ ॥
अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥ १२ ॥
यावत्प्राणाभिसन्धानं तावदिच्छेच्च भोजनम्।
तदास्य वसतो ग्रामेऽरण्यं भवति पृष्ठतः ॥ १३ ॥

यस्तु कामान् परित्यज्य त्यक्तकर्मा जितेन्द्रियः ।
आतिष्ठेत मुनिर्मौनं स लोके सिद्धिमाप्नुयात् ॥ १४॥
धौतदन्तं कृत्तनखं सदास्नातमलङ्कृतम् ।
असितं सितकर्म्माणं कस्तमर्चितुमर्हति ॥ १५॥
तपसा कर्शितः क्षामः क्षीणमांसास्थिशोणितः ।
यदा भवति निर्द्वन्द्वो मुनिर्मौनं समास्थितः ॥ १६ ॥
अथ लोकमिमञ्जित्वा लोकञ्चापि जयेत्परम्
आस्येनतु यदाहारं गोवन्मृगयते मुनिः ।
अथास्य लोकः सर्वो यः सोऽमृतत्वाय कल्पते ॥ १७ ॥

---

अथ एकचत्वारिंशत्तमोऽध्यायः ।

अष्टक उवाच । कतरस्त्वेतयोः पूर्वं देवानामेति सात्मताम् ।
उभयोर्धावतो राजन् सूर्य्याचन्द्रमसोरिव ॥ १ ॥
ययातिरुवाच । अनिकेत गृहस्थेषु कामवृत्तेषु संयतः ।
ग्राम एव चरन् भिक्षुस्तयोः पूर्वतरङ्गतः ॥ २ ॥
अप्राप्य दीर्घमायुश्च यः प्राप्तो विकृतिं चरेत् ।
तप्येत यदि तत् कृत्वा चरेत् सोऽन्यं तपस्ततः ॥ ३ ॥
यद्वै नृशंसन्तदपथ्यमाहुर्यः सेवते धर्ममनर्थबुद्धिः ।
अभावनोऽगः स तथैव राजन् तदार्जवं स समाधिस्तदार्य्यम् ॥ ४ ॥
अष्टक उवाच ।
केनास्य त्वन्तु प्रहितोऽसि राजन् युवा स्रग्वी दर्शनीयः सुवर्चाः ।
कुत आगतः कतमस्यां दिशि त्वमुताहोस्वित् पार्थिवस्थानमस्ति ५
ययातिरुवाच ।
इमं भौमं नरकं क्षीणपुण्यः प्रवेष्टुमुर्वीं गगनाद्विप्रकीर्णः ।

उच्चाहं वः प्रपतिष्याम्यनन्तरत्वरत्वमीब्राह्मणो लोकपा ये ॥६॥
सतां सकाशे तु वृतः प्रपातस्ते सङ्गता गुणवन्तस्तु सर्वे ।
शक्राच्च लब्धो हि वरोमयैष पतिष्यता भूमितलं नरेन्द्र ! ॥७॥

अष्टक उवाच ।

पृच्छामि त्वां प्रपतन्तं प्रपातं यदि लोकाः पार्थिव सन्ति मेऽत्र ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये॥८

ययातिरुवाच ।

यावत् पृथिव्यां विहितं गवाश्वं सहारण्यैः पशुभिः पक्षिभिश्च ।
तावल्लोका दिवि ते संस्थिता वै तथा विजानीहि नरेन्द्रसिंह॥९

अष्टक उवाच ।

तांस्ते ददामि मा प्रपत प्रपातं ये मे लोका दिवि राजेन्द्र सन्ति
यद्यन्तरिक्षे यदि वा दिवि श्रितास्तानाक्रम क्षिप्रममित्रहामि१०

ययातिरुवाच ।

नास्मद्विधो ब्राह्मणो ब्रह्मविच्च प्रतिग्रहे वर्तते राजमुख्य ।
यथा प्रदेयं सततं द्विजेभ्यस्तथा ददे पूर्वमहं नरेन्द्रम् ॥ ११ ॥
नाब्राह्मणः कृपणो जातु जीवेद्याचापि स्यात ब्राह्मणी वीरपत्नी ।
सोऽहं यदैवाकृतपूर्वञ्चरेयं विधित्समानः किमु तत्र साधुः॥१२॥

प्रतर्दन उवाच ।

पृच्छामि त्वां स्पृहणीयरूप प्रतर्दनोऽहं यदि मे सन्ति लोकाः ।
यद्यन्तरिक्षे यदि वा दिवि श्रुताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये१३

ययातिरुवाच ।

सन्ति लोका बहवस्ते नरेन्द्र! अप्येकैकं सप्तसप्तान्यहानि ।
मधुच्युतो घृतवन्तो विशोकास्ते नान्तवन्तः प्रतिपालयन्ति ॥१४॥

प्रतर्द्दन उवाच ।

तांस्ते ददामि पतमानस्य राजन् ये मे लोकास्तव ते वै भवन्तु ।
यद्यन्तरिक्षे यदि वा दिवि श्रिता लोकानाक्रम क्षिप्रमपेतमोहः ॥१४॥

ययातिरुवाच ।

न तुल्यतेजाः सुकृतं हि कामये योगक्षेमं पार्थिवात् पार्थिवः सन्।
दैवादेशादापदं प्राप्य विद्वान् चरेन्नृशंसं हि न जातु राजा॥१६
धर्म्यं मार्गं चिन्तयानो यशस्यं कुर्य्यात्नृपो धर्ममवेक्षमाणः ।
न मद्विधो धर्मबुद्धिर्हि राजा ह्येवं कुर्य्यात् कृपणं मां यथात्थ ॥
कुर्य्यामपूर्वं न कृतं यदन्यैर्विवित्समानः किमु तत्र साधुः ।
ब्रुवाणमेवं नृपतिं ययातिं नृपोत्तमो वसुमानब्रवीत्तम् ॥१८॥

वसुमानुवाच ।

पृच्छाम्यहं वसुमानौषदश्विर्यद्यस्ति लोको दिवि मह्यं नरेन्द्र ।
यद्यन्तरिक्षे प्रथितो महात्मन् क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये॥१॥

ययातिरुवाच ।

यदन्तरिक्षं पृथिवी दिशश्च यत्तेजसा तपते भानुमांश्च ।
लोकास्तावन्तो दिवि संस्थिता वै ते त्वां भवन्तं प्रतिपालयन्ति ॥२॥

वसुमानुवाच ।

तांस्ते ददामि पतमाप्रपात ये मे लोकास्तव ते वै भवन्तु ।
क्रीणीष्वैनांस्तृणकेनापि राजन् प्रतिग्रहस्ते यदि सम्यक् प्रदुष्टः॥३

ययातिरुवाच ।

न मिथ्याहं विक्रियं वै स्मरामि मया कृतं शिशुभावेऽपि राजन् ।
कुर्य्यान्न चाकृतपूर्वमन्यैर्विवित्समानो वसुमन्न साधु ॥ ४ ॥

वसुमानुवाच ।

तांस्त्वं लोकान् प्रतिपद्यस्व राजन् ।

मया दत्तान् यदि नेष्टः क्रयश्चेत्।
नाहन्तान् वै प्रतिगन्ता नरेन्द्र सर्वे लोकास्तावका वै भवन्तु॥५॥
शिबिरुवाच।
पृच्छामि त्वां शिबिरौशीनरोऽहं ममापि लोका यदि सन्ति तात!
यद्यन्तरिक्षे यदि वा दिवि स्थिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये॥६॥
ययातिरुवाच।
न त्वं वाचा हृदयेनापि राजन्! परीप्समानो नावमंस्था नरेन्द्र।
तेनानन्ता दिवि लोकाः स्थिता वै विद्युद्रूपाः स्वनवन्तो महान्तः॥७॥
शिबिरुवाच।
तांस्त्वं लोकान् प्रतिपद्यस्व राजन् मया दत्तान् यदि नेष्टः क्रयस्ते
न चाहन्तान् प्रतिपद्य दत्त्वा यत्र त्वं तात गन्तासि लोके॥८॥
ययातिरुवाच।
यथा त्वमिन्द्र प्रतिमप्रभावस्ते चाप्यनन्ता नरदेवलोकाः।
तथाद्य लोके नरमेऽन्यदत्ते तस्माच्छिबे नाभिनन्दामि वाचम्॥९॥
अष्टक उवाच।
न चेदेकैकशो राजन्! लोकान् नः प्रतिनन्दसि।
सर्वे प्रदाय तान् लोकान् गन्तारो नरकं वयम्॥१०॥
ययातिरुवाच। यदर्हाय ददध्वं वः सन्तः सत्याभिदर्शिनः।
अहन्तु नाभिगच्छामि यत् कृतं न मया पुरा॥११॥
अलिप्समानस्य तु मे यदुक्तं न तत्तथास्तीह नरेन्द्रसिंह!।
अस्य प्रदानस्य यदेव युक्तं तस्यैव चानन्तफलं भविष्यम्॥१२॥
अष्टक उवाच। कस्यैते प्रतिदृश्यन्ते रथाः पञ्च हिरण्मयाः।
उच्चैः सन्तः प्रकाशन्ते ज्वलन्तोऽग्निशिखा इव॥१३॥
ययातिरुवाच। भवतां मम चैवैते रथा भान्ति हिरण्मयाः।

आरुह्यैतेषु गन्तव्यं भवद्भिश्च मया सह ॥ १४ ॥

अष्टक उवाच । आतिष्ठस्व रथं राजन् विक्रमस्व विहायसा ।
वयमप्यनुयास्यामो यदा कालो भविष्यति ॥ १५ ॥

ययातिरुवाच । सर्वैरिदानीं गन्तव्यं सह स्वर्गो जितो यतः ।
एष वो विरजाः पन्था दृश्यते देवसद्मगः ॥ १६ ॥

शौनक उवाच । तेऽभिरुह्य रथं सर्वे प्रयाता नृपते नृपाः ।
आक्रमन्तो दिवं भाभि धर्मेणावृत्य रोदसी ॥ १७ ॥

अष्टक उवाच ।

अहं मन्ये पूर्वमेकोऽभिगन्ता सखा चेन्द्रः सर्वथा मे महात्मा ।
कस्मादेवं शिविरौशी नरोऽयमेकोऽत्ययात् सर्ववेगेन वाहान् ॥ १८ ॥

ययातिरुवाच । अददाद्देवयानाय यावद्वित्तमनिन्दितः ।
उशीनरस्य पुत्रोऽयं तस्मात् श्रेष्ठो हि वः शिविः ॥ १९ ॥

दानं शौचं सत्यमथो ह्यहिंसा
ह्रीः श्रीस्तितिक्षा समतानृशंस्यम् ।
राजन्त्येतान्यथ सर्वाणि राज्ञि शिवौ स्थितान्यप्रतिमस्य बुद्ध्या ।
एवं वृत्तं ह्रीनिषेवो बिभर्ति तस्माच्छिविरभिगन्ता रथेन ॥ २० ॥

शौनक उवाच ।

अथाष्टकः पुनरेवान्वपृच्छन् मातामहं कौतुकादिन्द्रकल्पम् ।
पृच्छामि त्वां नृपते ब्रूहि सत्यं कुतश्च कश्चासि कथं त्वमागाः ।
कृतं त्वया यद्धि न तस्य कर्ता लोके त्वदन्यो ब्राह्मणः क्षत्रियो वा २१

ययातिरुवाच ।

ययातिरस्मि नहुषस्य पुत्रो पूरोः पिता सार्वभौमस्त्विहासम् ।
गुह्यं मन्त्रं मा वकेभ्यो ब्रवीमि मातामहो भवतां सुप्रकाशः ॥ २२
सर्वामिमां पृथिवीं निर्जिगाय कृत्स्नां महीमददं ब्राह्मणेभ्यः ।

मेध्यानमेध्यानेकशस्तान् सुरूपान् तदा देवाः पुण्यभाजो भवन्ति॥२३
अदामहं पृथिवीं ब्राह्मणेभ्यः पूर्णामिमामखिलां वाजिनागैः।
गोभिः सुवर्णैश्च धनैश्च सुख्येरश्वाः सनागाः शतशस्त्वमुंदानि॥२४
सत्येन मे द्यौश्च वसुन्धरा च तथैवाग्निर्ज्वलते मानुषेषु।
न मे वृथाव्याहृतमेव वाक्यं सत्यं हि सन्तः प्रतिपूजयन्ति॥२५॥
साष्टकप्रब्रवीमीह सत्यं प्रतर्दनं वसुमन्तं शिविञ्च।
सर्वे देवा मुनयश्च लोकाः सत्येन पूज्या इति मे मनोगतम्॥२६

यो नः स्वर्गजितं सर्वं यथा वृत्तं निवेदयेत्।
अनसूयुर्द्विजाग्रेभ्यः सभजेन्न सलोकताम्॥ २७॥

शौनक उवाच।

एवं राजन् स महात्मा ययातिः स्वदौहित्रैः स्तारितो मित्रवर्यैः
त्यक्त्वा महीं परमोदारकर्मा स्वर्गं गतः कर्मभिर्व्याप्य पृथ्वीम् २८
एवं सर्वं विस्तरतो यथावदाख्यातं ते चरितं नाहुषस्य
वंशो यस्य प्रथितः कौरवेयो यस्मिन् जातस्त्वं मनुजेन्द्रकल्पः

## अथ त्रिचत्वारिंशत्तमोऽध्यायः।

सूत उवाच। इत्येतच्छौनकाद्राजा शतानीको निशम्य तु।
विस्मितः परया प्रीत्या पूर्णचन्द्र इवाबभौ॥ १॥
पूजयामास नृपतिर्विधिवच्चाथ शौनकम्।
रत्नैर्गोभिः सुवर्णैश्च वासोभिर्विविधैस्तथा॥ २॥
प्रतिगृह्य ततः सर्वं यद्राज्ञा प्रहितं धनम्।
दत्त्वा च ब्राह्मणेभ्यश्च शौनकोऽन्तरधीयत॥ ३॥
ऋषय ऊचुः। ययातेर्वंशमिच्छामः श्रोतुं विस्तरतो वद।
यदुप्रभृतिभिः पुत्रैर्यदा लोके प्रतिष्ठितः॥ ४॥

सूत उवाच । यदोर्वंशं प्रवक्ष्यामि ज्येष्ठस्योत्तमतेजसः ।
विस्तरेणानुपूर्व्या च गदतो मे निबोधत ॥ ५ ॥
यदोः पुत्रा बभूवुर्हि पञ्च देवसुतोपमाः ।
महारथा महेष्वासा नामतस्तान्निबोधत ॥ ६ ॥
सहस्रजिरथो ज्येष्ठः क्रोष्टुर्नीलोऽन्तिको लघुः ।
सहस्रजेस्तु दायादो शतजिर्नाम पार्थिवः ॥ ७ ॥
शतजेरपि दायादास्त्रयः परमकीर्तयः ।
हैहयश्च हयश्चैव तथा वेणुहयश्च यः ॥ ८ ॥
हैहयस्य तु दायादो धर्मनेत्रः प्रतिश्रुतः ।
धर्मनेत्रस्य कुन्तिस्तु संहतस्तस्य चात्मजः ॥ ९ ॥
संहतस्य तु दायादो महिष्मान्नाम पार्थिवः ।
आसीन्महिष्मतः पुत्रो रुद्रश्रेण्यः प्रतापवान् ॥ १० ॥
वाराणस्यामभूद्राजा कथितं पूर्वमेव तु ।
रुद्रश्रेण्यस्य पुत्रोऽभूद्दुर्दमो नाम पार्थिवः ॥ ११ ॥
दुर्दमस्य सुतो धीमान् कनको नाम वीर्यवान् ।
कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः ॥ १२ ॥
कृतवीर्यः कृताग्निश्च कृतवर्मा तथैव च ।
कृतौजाश्च चतुर्थोऽभूत् कृतवीर्यात्तु सोऽर्जुनः ॥
जातः करसहस्रेण सप्तद्वीपेश्वरो नृपः ।
वर्षायुतं तपस्तेपे दुश्चरं पृथिवीपतिः ॥ १४ ॥
दत्तमाराधयामास कार्तवीर्योऽत्रिसम्भवम् ।
तस्मै दत्ता वरास्तेन चत्वारः पुरुषोत्तम ! ॥ १५ ॥
पूर्वं बाहुसहस्रन्तु स वव्रे राजसत्तमः ।
अधर्मं चरमाणस्य सद्भिश्चापि निवारणम् ॥ १६ ॥

युद्धेन पृथिवीं जित्वा धर्मेणैवानुपालनम्।
संग्रामे वर्त्तमानस्य बधश्चैवाधिकाद्भवेत्॥ १७॥
तेनेयं पृथिवी सर्वा सप्तद्वीपा सपर्वता।
समोदधिपरिक्षिप्ता क्षात्रेण विधिना जिता॥ १८॥
जज्ञे बाहुसहस्रं वै इच्छतस्तस्य धीमतः।
रथो ध्वजश्च संजज्ञे इत्येवमनुशुश्रुमः॥ १९॥
दशयज्ञसहस्राणि राज्ञा द्वीपेषु वै तदा।
निरर्गला निवृत्तानि श्रूयन्ते तस्य धीमतः॥ २०॥
सर्वे यज्ञा महाराजस्तस्यासन् भूरिदक्षिणाः।
सर्वे काञ्चनयूपास्ते सर्वाः काञ्चनवेदिकाः॥ २१॥
सर्वे देवैः समं प्राप्तैर्विमानस्थैरलङ्कृताः।
गन्धर्वैरप्सरोभिश्च नित्यमेवोपशोभिताः॥ २२॥
तस्य यज्ञे जगौ गाथां गन्धर्वो नारदस्तथा।
कार्त्तवीर्य्यस्य राजर्षेर्महिमानं निरीक्ष्य सः॥ २३॥
न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति क्षत्रियाः।
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च॥ २४॥
स हि सप्तसु द्वीपेषु खड्गी चक्री शरासनी।
रथी द्वीपान्यनुचरन् योगी पश्यति तस्करान्॥ २५॥
पञ्चाशीतिसहस्राणि वर्षाणां स नराधिपः।
स सर्वरत्नसम्पूर्णश्चक्रवर्त्ती बभूव ह॥ २६॥
स एव पशुपालोऽभूत् क्षेत्रपालः स एव हि।
स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनोऽभवत्॥ २७॥
योऽसौ बाहुसहस्रेण ज्याघातकठिनत्वचा।
भाति रश्मिसहस्रेण शारदेनैव भास्करः॥ २८॥

एष नागं मनुष्येषु माहिष्मत्यां महाद्युतिः ।
कर्कोटकसुतं जित्वा पुर्य्यां तत्र न्यवेशयत् ॥ २९ ॥
एष वेगं समुद्रस्य प्रावृट्काले भजेत वै ।
क्रीड़न्नेव सुखोद्भिन्नः प्रतिस्रोतो महीपतिः ॥ ३० ॥
ललता क्रीड़ता तेन प्रतिस्रग्दाममालिनी ।
ऊर्मि भ्रुकुटिसन्त्रासाच्चकिताभ्येति नर्म्मदा ॥ ३१ ॥
एको बाहुसहस्रेण वगाहे स महार्णवः ।
करोत्युद्धतवेगान्तु नर्म्मदां प्रावृडुद्धताम् ॥ ३२ ॥
तस्य बाहुसहस्रेण क्षोभ्यमाणे महोदधौ ।
भवन्त्यतीव निश्चेष्टा पातालस्था महासुराः ॥ ३३ ॥
चूर्णीकृतमहावीचिलीनमीनमहातिमिम् ।
मारुताविद्धफेनौघमावर्त्ताक्षिप्तदुःसहम् ॥ ३४ ॥
करोत्यालोडयन्नेव दोःसहस्रेण सागरम् ।
मन्दरक्षोभचकिता ह्यमृतोत्पादशङ्किताः ॥ ३५ ॥
तदा निश्चलमूर्द्धानो भवन्ति च महोरगाः ।
सायाह्ने कदलीखण्डा निर्वातस्तिमिता इव ॥ ३६ ॥
एवं बध्वा धनुर्ज्यायामुत्सिक्तं पञ्चभिः शरैः ।
लङ्कायां मोहयित्वा तु सबलं रावणं बलात् ॥ ३७ ॥
निर्जित्य बध्वा चानीय माहिष्मत्यां बबन्ध च ।
ततो गत्वा पुलस्त्यस्तु अर्ज्जुनं संप्रसादयत् ॥ ३८ ॥
मुमोच रक्षः पौलस्त्यं पुलस्त्येनेह सान्त्वितम् ।
तस्य बाहुसहस्रेण बभूव ज्यातलस्वनः ॥ ३९ ॥
युगान्ताभ्रसहस्रस्य आस्फोटस्त्वशनेरिव ।
अहोबत विधेर्वीर्यं भार्गवोऽयं यदाच्छिनत् ॥ ४० ॥

तद्दै सहस्रं बाहूनां हेमतालवनं यथा।
यत्नापवस्य संक्रुद्धो ह्यनुमं शप्तवान् प्रभुः॥ ४१॥
यस्मादनं प्रदग्धं वै विश्रुतं मम हैहय!।
तस्मात्ते दुष्करं कर्म्म कृतमन्यो हरिष्यति॥ ४२॥
छित्वा बाहुसहस्रन्ते प्रथमन्तरसा बली।
तपस्वी ब्राह्मणश्च त्वां स बधिष्यति भार्गवः॥ ४३॥
सूत उवाच। तस्य रामस्तदा त्वासीत् मृत्युः शापेन धीमता।
वरश्चैवन्तु राजर्षेः स्वयमेव वृतः पुरा॥ ४४॥
तस्य पुत्रशतं त्वासीत् पञ्च तत्र महारथाः।
कृतास्त्रा बलिनः शूरा धर्म्मात्मानो महाबलाः॥४५॥
शूरसेनश्च शूरश्च धृष्टः क्रोष्टुस्तथैव च।
जयध्वजश्च वैकर्त्ता अवन्तिश्च विशाम्पते!॥ ४६॥
जयध्वजस्य पुत्रस्तु तालजङ्घो महाबलः।
तस्य पुत्रशतान्येव तालजङ्घा इति श्रुताः॥ ४७॥
तेषां पञ्च कुला ख्याताः हैहयानां महात्मनाम्।
वीतिहोत्राश्च शार्य्याता भोजाश्चावन्तयस्तथा॥ ४८॥
कुण्डिकेराश्च विक्रान्तास्तालजङ्घास्तथैव च।
वीतिहोत्रसुतश्चापि आनर्तो नाम वीर्य्यवान्।
दुर्जयस्तस्य पुत्रस्तु बभूवामित्रकर्शनः॥ ४९॥
सद्भावेन महाराज! प्रजा धर्म्मेण पालयन्।
कार्त्तवीर्य्यार्जुनो नाम राजा बाहुसहस्रवान्॥५०॥
येन सागरपर्य्यन्ता धनुषा निर्जिता मही।
यस्तस्य कीर्त्तयेन्नाम कल्यमुत्थाय मानवः॥ ५१॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः।

कार्त्तवीर्यस्य यो जन्म कथयेदिह धीमतः ।
यथावत् स्विष्टपूतात्मा स्वर्गलोके महीयते ॥ ५२ ॥

---

अथ चतुश्चत्वारिंशत्तमोऽध्यायः ।

ऋषय ऊचुः । किमर्थं तद्वनं दग्धमापवस्य महात्मनः ।
कार्त्तवीर्येण विक्रम्य सूत ! प्रब्रूहि तत्त्वतः ॥ १ ॥
रक्षिता स तु राजर्षिः प्रजानामिति नः श्रुतम् ।
स कथं रक्षिता भूत्वा अदहत्तत्तपोवनम् ॥ २ ॥
सूत उवाच । आदित्यो द्विजरूपेण कार्त्तवीर्यमुपस्थितः ।
तृप्तिमेकां प्रयच्छस्व आदित्योऽहं नरेश्वर ! ॥ ३ ॥
राजोवाच । भगवन् ! केन तृप्तिस्ते भवतीह दिवाकर ! ।
कीदृशं भोजनं दद्मि श्रुत्वा तु विदधाम्यहम् ॥ ४ ॥
आदित्य उवाच । स्थावरन्देहि मे सर्वमाहारन्ददतां वर ! ।
तेन तृप्तो भवेयं वै सा मे तृप्तिर्हि पार्थिव ! ॥ ५ ॥
कार्त्तवीर्य उवाच । न शक्याः स्थावराः सर्वे तेजसा च बलेन च ।
निर्दग्धुं तपतां श्रेष्ठ ! तेन त्वां प्रणमाम्यहम् ॥ ६ ॥
आदित्य उवाच । तुष्टोऽहं शरान् दद्मि अक्षयान् सर्वतोमुखान् ।
ये प्रक्षिप्ता ज्वलिष्यन्ति मम तेजःसमन्विताः ॥ ७ ॥
आविष्टा मम तेजोभिः शोषयिष्यन्ति स्थावरान् ।
शुष्कान् भस्मीकरिष्यन्ति तेन तृप्तिर्नराधिप ! ॥ ८ ॥

सूत उवाच ।

ततः शरांस्तदादित्यस्त्वर्जुनाय प्रयच्छत ।
ततो ददाह संप्राप्तान् स्थावरान् सर्वमेव च ॥ ९ ॥
ग्रामांश्चैवाश्रमांश्चैव घोषाणि नगराणि च ।

तथा वनानि रम्याणि वनान्युपवनानि च ॥ १० ॥
एवं प्राचीं समदहत् ततः सर्वांश्च पश्चिमाः ।
निर्वृक्षा निस्तृणा भूमिर्हता घोरेण तेजसा ॥ ११ ॥
एतस्मिन्नेव काले तु आपवो जलमास्थितः ।
दशवर्षसहस्राणि तत्रास्ते स महानृषिः ॥ १२ ॥
पूर्णे व्रते महातेजा उदतिष्ठत्तपोधनः ।
सोऽपश्यदाश्रमं दग्धमर्जुनेन महामुनिः ॥ १३ ॥
क्रोधाच्छशाप राजर्षिं कीर्तितं वो यथा मया ।
क्रोष्टोः शृणुत राजर्षेर्वंशमुत्तमपौरुषम् ॥ १४ ॥
यस्यान्ववाये सम्भूतो विष्णुर्वृष्णिकुलोद्वहः ।
क्रोष्टोरेवाभवत् पुत्रो वृजिनीवान् महारथः ॥ १५ ॥
वृजिनीवतस्य पुत्रोऽभूत् स्वाहो नाम महाबलः ।
स्वाहपुत्रोऽभवद्राजन् रुषद्गुर्वदतां वरः ॥ १६ ॥
स तु प्रसूतिमिच्छन् वै रुषद्गुः सौम्यमात्मजम् ।
चित्ररथस्तस्य पुत्रः कर्मभिरन्वितः ॥ १७ ॥
अथ चैत्ररथिर्वीरो जज्ञे विपुलदक्षिणः ।
शशबिन्दुरिति ख्यातश्चक्रवर्ती बभूव ह ॥ १८ ॥
अत्रानुवंशश्लोकोऽयं गीतस्तस्मिन् पुराभवत् ।
शशबिन्दोस्तु पुत्राणां शतानामभवच्छतम् ॥ १९ ॥
धीमतां चाभिरूपाणां भूरिद्रविणतेजसाम् ।
तेषां शतप्रधानानां पृथुसाह्वा महाबलाः ॥ २० ॥
पृथुश्रवाः पृथुयशाः पृथुधर्मा पृथुञ्जयः ।
पृथुकीर्तिः पृथुमना राजानः शशबिन्दवः ॥ २१ ॥
शंसन्ति च पुराणज्ञाः पृथुश्रवसमुत्तमम् ।

अनरस्य सुयशस्य सुयशस्तनयोऽभवत् ॥ २२ ॥
उशना तु सुयशस्य यो रक्षन् पृथिवीमिमाम् ।
आजहाराश्वमेधानां शतमुत्तमधार्म्मिकः ॥ २३ ॥
तितिक्षुरभवत् पुत्र औशनः शत्रुतापनः ।
मरुत्तस्तस्य तनयो राजर्षीणामनुत्तमः ॥ २४ ॥
आसीन्मरुत्ततनयो वीरः कम्बलबर्हिषः ।
पुत्रस्तु रुक्मकवचो विद्वान् कम्बलबर्हिषः ॥ २५ ॥
निहत्य रुक्मकवचः परान् कवचधारिणः ।
धन्विनो विविधैर्बाणैरवाप्य पृथिवीमिमाम् ॥ २६ ॥
अश्वमेधे ददौ राजा ब्राह्मणेभ्यस्तु दक्षिणाम् ।
यज्ञे तु रुक्मकवचः कदाचित् परवीरहा ॥ २७ ॥
जज्ञिरे पञ्चपुत्रास्तु महावीर्या धनुर्भृतः ।
रुक्मेषुः पृथुरुक्मश्च ज्यामघः परिघो हरिः ॥ २८ ॥
परिघं च हरिं चैव विदेहेऽस्थापयत् पिता ।
रुक्मेषुरभवद्राजा पृथुरुक्मस्तदाश्रयः ॥ २९ ॥
तेभ्यः प्रव्राजितो राज्यात् ज्यामघस्तु तदाश्रमे ।
प्रशान्तश्चाश्रमस्थश्च ब्राह्मणेनावबोधितः ॥ ३० ॥
जगाम धनुरादाय देशमन्यं ध्वजी रथी ।
नर्म्मदां नृप एकाकी केवलं वृत्तिकामतः ॥ ३१ ॥
ऋक्षवन्तं गिरिं गत्वा भुक्तमन्यैरुपाविशत् ।
ज्यामघस्याभवद्भार्या शैव्या परिणता सती ॥ ३२ ॥
अपुत्रो न्यवसद्राजा भार्यामन्यामविन्दत ।
तस्यासीद्विजयो युद्धे तत्र कन्यामवाप्य सः ॥ ३३ ॥
भार्यामुवाच सन्त्रासात् स्नुषेयं ते शुचिस्मिते ।

एवमुक्त्वाब्रवीदेनं कस्य चेयं स्नुषेति च ॥ ३४ ॥
राजोवाच । यस्ते जनिष्यते पुत्रस्तस्य भार्या भविष्यति ।
तस्मात् सा तपसोग्रेण कन्यायाः सम्प्रसूयत ॥ ३५ ॥
पुत्रं विदर्भं सुभगा चैत्रा परिणता सती ।
राजपुत्र्यां च विद्वान् स स्नुषायां क्रथकैशिकौ ।
लोमपादं तृतीयन्तु पुत्रं परमधार्मिकम् ॥ ३६ ॥
तस्यां विदर्भोऽजनयच्छूरान् रणविशारदान् ।
लोमपादान् मनुः पुत्रो ज्ञातिस्तस्य तु चात्मजः ॥ ३७ ॥
कैशिकस्य चिदिः पुत्रो तस्माच्चैद्या नृपा स्मृताः ।
क्रथो विदर्भपुत्रस्तु कुन्तिस्तस्यात्मजोऽभवत् ॥ ३८ ॥
कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान् ।
धृष्टस्य पुत्रो धर्मात्मा निर्वृतिः परवीरहा ॥ ३९ ॥
तदेको निर्वृतेः पुत्रो नाम्ना स तु विदूरथः ।
दशार्हस्तस्य वै पुत्रो व्योमस्तस्य च वै स्मृतः ।
दाशार्हाच्चैव व्योमात्तु पुत्रो जीमूत उच्यते ॥ ४० ॥
जीमूतपुत्रो विमलस्तस्य भीमरथः सुतः ।
सुतो भीमरथस्यासीत् स्मृतो नवरथः किल ॥ ४१ ॥
तस्य चासीद्दृढरथः शकुनिस्तस्य चात्मजः ।
तस्मात् करम्भः कारम्भिर्देवरातो बभूव ह ॥ ४२ ॥
देवक्षत्रोऽभवद्राजा दैवरातिर्महायशाः ।
देवगर्भसमो जज्ञे देवक्षत्रनन्दनः ॥ ४३ ॥
मधुर्नाम महातेजा मधोः पुरवसस्तथा ।
आसीत् पुरवसः पुत्रः पुरुद्वान् पुरुषोत्तमः ॥ ४४ ॥
जन्तुर्जज्ञेऽथ वैदर्भ्यां भद्रसेन्यां पुरुद्वतः ।

ऐक्ष्वाकी चाभवद्भार्या जन्तोस्तस्यामजायत ॥ ४५ ॥
सात्वतः सत्वसंयुक्तः सात्वतां कीर्त्तिवर्द्धनः ।
इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः ।
प्रजावानेति सायुज्यं राज्ञः सोमस्य धीमतः ॥४६ ॥
सात्वतान् सत्वसम्पन्नान् कौशल्या सुषुवे सुतान् ।
भजिनं भजमानन्तु दिव्यं देवावृधं नृप ! ॥ ४७ ॥
अन्धकञ्च महाभोजं वृष्णिं च यदुनन्दनम् ।
तेषान्तु सर्गाश्चत्वारो विस्तरेणैव तच्छृणु ॥ ४८ ॥
भजमानस्य सृञ्जय्यां बाह्यकायाञ्च बाह्यकाः ।
सृञ्जयस्य सुते द्वे तु बाह्यकास्तु तदाभवन् ॥ ४९ ॥
तस्य भार्ये भगिन्यौ द्वे सुषुवाते बहून् सुतान् ।
निमिञ्च कृमिलञ्चैव वृष्णिं परपुरञ्जयम् ।
ते बाह्यकायां सृञ्जय्यां भजमानाद्विजज्ञिरे ॥ ५० ॥
यज्ञो देवावृधो राजा बन्धूनां मित्रवर्द्धनः ।
अपुत्रस्त्वभवद्राजा चचार परमन्तपः ।
पुत्रः सर्वगुणोपेतो मम भूयादिति स्पृहन् ॥ ५१ ॥
संयोज्य मन्त्रमेवाथ पर्णाशाजलमस्पृशत् ।
तदोपस्पर्शनात्तस्य चकार प्रियमापगा ॥ ५२ ॥
कल्याणत्वान्नरपतेस्तस्मै सा निम्नगोत्तमा ।
चिन्तयाथ परीतात्मा जगामाथ विनिश्चयम् ॥ ५३ ॥
नाधिगच्छाम्यहं नारीं यस्यामेवंविधः सुतः ।
जायेत तस्मादद्याहं भवाम्यथ सहस्रशः ॥ ५४ ॥
अथ भूत्वा कुमारी सा बिभ्रती परमं वपुः ।
ज्ञापयामास राजानं तामियेष महाव्रतः ॥ ५५ ॥

अथ सा नवमे मासि सुषुवे सरितां वरा।
पुत्रं सर्व्वगुणोपेतं बभ्रुं देवावृधान्नृपात् ॥ ५६ ॥
अनुवंशे पुराणज्ञा गायन्तीति परिश्रुतम्।
गुणान् देवावृधस्यापि कीर्त्तयन्तो महात्मनः ॥५७॥
यथैवं शृणुमो दूरादपश्यामस्तथान्तिकात्।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ ५८ ॥
षष्टिश्च पूर्व्वपुरुषाः सहस्राणि च सप्ततिः।
एतेऽमृतत्वं संप्राप्ता बभ्रोर्देवावृधान्नृप ! ॥ ५९ ॥
यज्वा दानपतिर्व्वीरो ब्रह्मण्यश्च दृढव्रतः।
रूपवान् सुमहातेजाः श्रुतवीर्य्यधरस्तथा ॥ ६० ॥
अथ कङ्कस्य दुहिता सुषुवे चतुरः सुतान्।
कुकुरं भजमानञ्च शमिं कम्बलबर्हिषम् ॥ ६१ ॥
कुकुरस्य सुतो वृष्णिर्वृष्णेस्तु तनयो धृतिः।
कपोतरोमा तस्याथ तैत्तिरिस्तस्य चात्मजः ॥६२ ॥
तस्यासीत्तनुजा पत्नी सखा विद्वान्नलः किल।
ख्यायते तस्य नाम्ना स नन्दनोदरदुन्दुभिः ॥६३ ॥
तस्मिन् प्रवितते यज्ञे अभिजातः पुनर्वसुः।
अश्वमेधं च पुत्रार्थमाजहार नरोत्तमः ॥ ६४ ॥
तस्य मध्ये तिरात्रस्य सभामध्यात् समुत्थितः।
अतश्च विद्वान् कर्म्मज्ञो यज्वा दाता पुनर्व्वसुः ॥६५॥
तस्यासीत् पुत्रमिथुनं बभूवाविजितं किल।
आहुकश्चाहुकी चैव ख्यातं मतिमतां वर ! ॥ ६६ ॥
इमांश्चोदाहरन्त्यत्र श्लोकान् प्रति तमाहुकम्।
सोपासङ्गानुकर्षाणां सध्वजानां वरूथिनाम् ॥ ६७॥

रथानां मेघघोषाणां सहस्राणि दशैव तु।
नासत्यवादी नातेजा नायज्वा नासहस्रदः॥ ६८॥
नाशुचिर्नाप्यविद्वान् हि यो भोजेष्वभ्य जायत।
आहुकस्य भृतिं प्राप्ता इत्येतद्वै तदुच्यते॥ ६९॥
आहुकश्चापरवन्तीषु स्वसारं चाहुकीं ददौ।
आहुकात् काश्यदुहिता द्वौ पुत्रौ समसूयत॥ ७०॥
देवकश्चोग्रसेनश्च देवगर्भसमावुभौ।
देवकस्य सुता वीरा जज्ञिरे त्रिदशोपमाः॥ ७१॥
देववानुपदेवश्च सुदेवो देवरक्षितः।
तेषां स्वसारः सप्तासन् वसुदेवाय ता ददौ॥ ७२॥
देवकी श्रुतदेवी च यशोदा च यशोधरा।
श्रीदेवी सत्यदेवी च सुतापी चेति सप्तमी॥ ७३॥
नवोग्रसेनस्य सुताः कंसस्तेषान्तु पूर्वजः।
न्यग्रोधश्च सुनामा च कङ्कः शंकुश्च भूयसः॥ ७४॥
सुतनू राष्ट्रपालश्च युद्धमुष्टिः सुमुष्टिदः।
तेषां स्वसारः पञ्चासन् कंसा कंसवती तथा॥ ७५॥
सुतनू राष्ट्रपाली च कङ्का चेति वराङ्गनाः।
उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः॥ ७६॥
भजमानस्य पुत्रोऽथ रथिमुख्यो विदूरथः।
राजाधिदेवः शूरश्च विदूरथसुतोऽभवत्॥ ७७॥
राजाधिदेवस्य सुतौ जज्ञाते देवसंमितौ।
नियमव्रतप्रधानौ शोणाश्वः श्वेतवाहनः॥ ७८॥
शोणाश्वस्य सुताः पञ्च शूरा रणविशारदाः।
शमी च वेदगर्भा च निकुन्तः शत्रुजित्॥ ७९॥

शमिपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः।
प्रतिक्षत्रः सुतो भोजो हृदीकस्तस्य चात्मजः॥ ८० ॥
हृदीकस्याभवन् पुत्रा दश भीमपराक्रमाः।
कृतवर्माग्रजस्तेषां शतधन्वा च मध्यमः॥ ८१ ॥
देवार्हश्चैव नाभश्च भीषणश्च महाबलः।
अजातो वनजातश्च कनीयककरम्भकौ॥ ८२ ॥
देवार्हस्य सुतो विद्वान् जज्ञे कम्बलबर्हिषः।
असमञ्जाः सुतस्तस्य तमोजास्तस्य चात्मजः॥ ८३ ॥
अजातपुत्रा विक्रान्तास्त्रयः परमकीर्त्तयः।
सुदंष्ट्रश्च सुनाभश्च कृष्ण इत्यन्धकामताः॥ ८४ ॥
अन्धकानामिमं वंशं यः कीर्तयति नित्यशः।
आत्मनो विपुलं वंशं प्रजावानाप्नुते नरः॥८५॥
इति श्रीमत्स्यपुराणे सोमवंशे चतुश्चत्वारिंशोऽध्यायः॥४४॥

---

अथ पञ्चचत्वारिंशोऽध्यायः।

सूत उवाच। गान्धारी चैव माद्री च वृष्णिभार्ये बभूवतुः
गान्धारी जनयामास सुमित्रं मित्रनन्दनम्॥ १ ॥
माद्री युधाजितं पुत्रं ततो वै देवमीढुषम्।
अनमित्रं शिनिञ्चैव पञ्चमं कृतलक्षणम्॥ २ ॥
अनमित्रसुतो निम्नो निम्नस्यापि तु द्वौ सुतौ।
प्रसेनश्च महावीर्यः शक्तिसेनश्च तावुभौ॥ ३ ॥
स्यमन्तकः प्रसेनस्य मणिरत्नमनुत्तमम्।
पृथिव्यां सर्वरत्नानां राजा वै सोऽभवन्मणिः॥ ४ ॥

हृदि कृत्वा तु बहुशो मणिरत्नमभियाचितम् ।
गोविन्दोऽपि न तं लेभे शक्तोऽपि न जहार सः ॥ ५ ॥
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः ।
यथाशब्दं स शुश्राव बिले सत्वेन पूरिते ॥ ६ ॥
ततः प्रविश्य स बिलं प्रसेनो ऋक्षमैक्षत ।
ऋक्षः प्रसेनश्च तथा ऋक्षं चैव प्रसेनजित् ॥ ७ ॥
हत्वा ऋक्षः प्रसेनन्तु ततस्तं मणिमाददात् ।
अदृष्टस्तु हतस्तेन अन्तर्बिलगतस्तदा ॥ ८ ॥
प्रसेनन्तु हतं ज्ञात्वा गोविन्दः परिशङ्कितः ।
गोविन्देन हतो व्यक्तं प्रसेनो मणिकारणात् ॥ ९ ॥
प्रसेनस्तु गतोऽरण्यं मणिरत्नेन भूषितः ।
तं दृष्ट्वा स हतस्तेन गोविन्दः प्रत्युवाच ह ।
हन्मि चैनं दुराचारं शत्रुभूतं हि वृष्णिषु ॥ १० ॥
अथ दीर्घेण कालेन मृगयां निर्गतः पुनः ।
यदृच्छया च गोविन्दो बिलमप्राप्यासमागमत् ॥११॥
तं दृष्ट्वा तु महाशब्दं स चक्रे ऋक्षराड्बली ।
शब्दं श्रुत्वा तु गोविन्दः खड्गपाणिः प्रविश्य सः ।
अपश्यज्जाम्बवन्तं तं ऋक्षराजं महाबलम् ॥ १२ ॥
ततस्तूर्णं हृषीकेशस्तमृक्षपतिं मञ्जसा ।
जाम्बवन्तं स जग्राह क्रोधसंरक्तलोचनः ॥१३॥
तुष्टावैनं तदा ऋक्षः कर्मभिर्वैष्णवैः प्रभुम् ।
ततस्तुष्टस्तु भगवान् वरेणैनमरोचयत् ॥ १४ ॥
जाम्बवानुवाच । इच्छे चक्रप्रहारेण त्वत्तोऽहं मरणं प्रभो ! ।
कन्या चेयं मम शुभा भर्तारं त्वामवाप्नुयात् ।

योऽयं मणिः प्रसेनस्तु हत्वा प्राप्तो मया प्रभो ! ॥१५॥
ततः सजाम्बवन्तं तं वै हत्वा चक्रेण वै प्रभुः ।
कृतकर्मा महाबाहुः सकन्यं मणिमाहरत् ॥ १६ ॥
ददौ सत्राजितायैनं सर्वसात्वतसंसदि ।
तेन मिथ्यापवादेन सन्तप्ता ये जनार्दने ॥ १७॥
ततस्ते यादवाः सर्वे वासुदेवमथाब्रुवन् ।
अस्माकन्तु मतिह्यासीत् प्रसेनस्तु त्वया हतः ॥ १८ ॥
कैकेयस्य सुता भार्या दश सत्राजितः शुभाः ।
तासुत्पन्नाः सुतास्तस्य सर्वलोकेषु विश्रुताः ।
ख्यातिमन्तो महा वीर्या भङ्गकारस्तु पूर्वजः ॥ १९ ॥
अथ व्रतवती तस्मात् भङ्गकारात्तु पूर्वजात् ।
सुषुवे सुकुमारीस्तु तिस्रः कमललोचनाः ॥ २० ॥
सत्यभामा वरा स्त्रीणां व्रतिनी च दृढव्रता ।
तथा पद्मावती चैव ताश्च कृष्णायसोऽददात् ॥ २१॥
अनमित्रात् शिनिर्जज्ञे कनिष्ठाद्वृष्णिनन्दनात् ।
सत्यवांस्तस्य पुत्रस्तु सात्यकिस्तस्य चात्मजः ॥ २२ ॥
सत्यवान् युयुधानस्तु शिनेर्नप्ता प्रतापवान् ।
असङ्गो युयुधानस्य द्युम्निस्तस्यात्मजोऽभवत् ॥ २३ ॥
द्युम्नेर्युगन्धरः पुत्र इति शैन्याः प्रकीर्त्तिताः ।
अनमित्रान्वयो ह्येषवरख्यातो वृष्णिवंशजः ॥ २४ ॥
अनमित्रस्य संजज्ञे पृथ्व्यां वीरो युधाजितः ।
अन्यौ तु तनयौ वीरौ वृषभः चत्रएव च ॥ २५ ॥
वृषभः काशिराजस्य सुतां भार्यामविन्दत ।
जयन्तस्तु जयन्त्यान्तु पुत्रः समभवच्छुभः ॥ २६ ॥

सदा यज्ञोऽति वीरस्य श्रुतश्चानतिथिप्रियः ।
अक्रूरः सुषुवे तस्मात् सदा यज्ञोऽतिदक्षिणः ॥ २७ ॥
रत्ना कन्या च शैब्यस्य अक्रूरस्तामवाप्तवान् ।
पुत्रानुत्पादयामास एकादश महाबलान् ॥ २८ ॥
उपलम्भः सदा लम्भो वृकलो वीर्य्य एव च ।
सिखी ततो महापक्षः शत्रुघ्नो वारि मे जयः ॥ २९ ॥
धर्म्मभृद्धर्म्मयर्मौणौ धृष्टमानस्तथैव च ।
सर्वे च प्रतिहोतारो रत्नायां जज्ञिरे च ते ॥ ३० ॥
अक्रूरादुग्रसेनायां सुतौ द्वौ कुलवर्द्धनौ ।
देववानुपदेवश्च जज्ञाते देवसन्निभौ ॥ ३१ ॥
अश्विन्यां च ततः पुत्राः पृथुर्विपृथुरेव च ।
अश्वत्थामा सुबाहुश्च सुपार्श्वकगवेषणौ ॥ ३२ ॥
वृष्टिनेमिः सुधर्मा च तथा शर्यातिरेव च ।
अभूमिर्वर्ज्जभूमिश्च श्रमिष्ठः श्रवणस्तथा ॥ ३३ ॥
इमां मिथ्याभिशस्तिं यो वेदकृष्णादपोहिताम् ।
न स मिथ्याभिशापेन अभिशाप्योऽस्ति केनचित् ॥ ३४ ॥

---

## अथ षट्चत्वारिंशोऽध्यायः ।

सूत उवाच । ऐक्ष्वाकी सुषुवे शूरं ख्यातमद्भुतमीदृशम् ।
पौरुषाज्जज्ञिरे शूरात् भोजायां पुत्रका दश ॥ १ ॥
वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः ।
देवमार्गस्ततो जज्ञे ततो देवश्रवाः पुनः ॥ २ ॥
अनाधृष्टिः शिनिश्चैव नन्दश्चैव ससृञ्जयः ।
श्यामः शमीकः संयूपः पञ्चचास्य वराङ्गनाः ॥ ३ ॥

श्रुतकीर्तिः पृथा चैव श्रुतदेवी श्रुतश्रवाः ।
राजाधिदेवी च तथा पञ्चैता वीरमातरः ॥ ४ ॥
कृतस्य तु श्रुता देवी सुगर्भं सुषुवे सुतम् ।
कैकय्यां श्रुतकीर्त्यान्तु जज्ञे सोऽनुव्रतो नृपः ॥ ५ ॥
श्रुतश्रवसं चैद्यस्य सुनीथः समपद्यत ।
वार्षिको धर्मशरीरः स बभूवारिमर्दनः ॥ ६ ॥
अथ सख्येन वृद्धेऽसौ कुन्तिभोजे सुतां ददौ ।
एवं कुन्ती समाख्याता वसुदेव स्वसा पृथा ॥ ७ ॥
वसुदेवेन सा दत्ता पाण्डोर्भार्या ह्यनिन्दिता ।
पाण्डोरर्थेन सा जज्ञे देवपुत्रान् महारथान् ॥ ८ ॥
धर्माद्युधिष्ठिरो जज्ञे वायोर्जज्ञे वृकोदरः ।
इन्द्राद्धनञ्जयश्चैव शक्रतुल्य पराक्रमः ॥ ९ ॥
माद्रवत्यान्तु जनितावश्विभ्यामिति शुश्रुमः ।
नकुलः सहदेवश्च रूपशीलगुणान्वितौ ॥ १० ॥
रोहिणी पौरवी सा तु ख्यातमानकदुन्दुभेः ।
लेभे ज्येष्ठं सुतं रामं सारणञ्च सुतं प्रियम् ॥ ११ ॥
दुर्दमं दमनं शुभ्रं पिण्डारकमहाहनू ।
चित्राक्ष्यौ द्वे कुमार्य्यौ तु रोहिण्यां जज्ञिरे तदा ॥ १२ ॥
देवक्यां जज्ञिरे शौरेः सुषेणः कीर्तिमानपि ।
उदासी भद्रसेनश्च ऋषिवासस्तथैव च ।
षष्ठो भद्रविदेहश्च कंसः सर्वानघातयत् ॥ १३ ॥
प्रथमाया अमावास्या वार्षिकी तु भविष्यति ।
तस्यां जज्ञे महाबाहुः पूर्वं कृष्णः प्रजापतिः ॥ १४ ॥
अनुजात्वभवत् कृष्णात् सुभद्रा भद्रभाषिणी ।

देवक्यान्तु महातेजा जज्ञे शूरो महायशाः ॥ १५ ॥
सहदेवस्तु ताम्रायां जज्ञे शौरिकुलोद्वहः ।
उपासङ्गधरं लेभे तनयं देवरक्षिता ।
एकां कन्याञ्च सुभगाङ्कंस तामभ्यघातयत् ॥ १६ ॥
विजयं रोचमानञ्च वर्द्धमानन्तु देवलम् ।
एते सर्वे महात्मानो ह्युपदेव्याः प्रजज्ञिरे ॥ १७ ॥
अवगाहो महात्मा च वृकदेव्यामजायत ।
वृकदेव्यां स्वयं जज्ञे नन्दको नामनामतः ॥ १८ ॥
सप्तमं देवकी पुत्रं मदनं सुषुवे नृप ! ।
गवेषणं महाभागं संग्रामेष्व पराजितम् ॥ १९ ॥
श्रद्धा देव्या विहारे तु वने हि विचरन् पुरा ।
वैश्यायामदधात् शौरिः पुत्रं कौशिकमग्रजम् ॥ २० ॥
सुतनूरथराजी च शौरेः रास्तां परिग्रहौ ।
पुण्ड्रश्च कपिलश्चैव वसुदेवात्मजौ बलौ ॥ २१ ॥
जरानाम निषादोऽभूत् प्रथमः स धनुर्द्धरः ।
सौभद्रश्च भवश्चैव महासत्वौ बभूवतुः ॥ २२ ॥
देवभाग सुतश्चापि नाम्ना स उद्धवः स्मृतः ।
पण्डितं प्रथमं प्राहुर्देवश्रवः समुद्भवम् ॥ २३ ॥
ऐक्ष्वाक्य लभतापत्य मनाधृष्टे र्यशस्विनी ।
निधूतसत्वं शत्रुघ्नं श्राद्धस्तस्मादजायत ॥ २४ ॥
करुषाया मपत्याय कृष्णस्तुष्ट सुतन्ददौ ।
सुचन्द्रन्तु महाभागं वीर्यवन्तं महाबलम् ॥ २५ ॥
जाम्बवत्याः सुतावेतौ द्वौच सत् कृतलक्षणौ ।
चारुदेष्णश्च साम्बश्च वीर्यवन्तौ महाबलौ ॥ २६ ॥

तन्तिपालश्च तन्तिश्च नन्दनस्य सुता वुभौ।
शमीक पुत्राश्चत्वारो विक्रान्ताः सुमहाबलाः।
विराजश्च धनुश्चैव श्याम्यश्च सृञ्जयस्तथा॥ २७॥
अनपत्योऽभवच्छ्यामः शमीकस्तु वनं ययौ।
जुगुप्समानो भोजत्वं राजर्षित्वमवाप्तवान्॥ २८॥
कृष्णस्य जन्माभ्युदयं यः कीर्तयति नित्यशः।
शृणोति मानवो नित्यं सर्वपापैः प्रमुच्यते॥ २९॥
इति श्रीमत्स्यपुराणे सोमवंशे षट्चत्वारिंशोऽध्यायः।

---

अथ सप्तचत्वारिंशोऽध्यायः।

सूत उवाच। अथ देवो महादेवः पूर्वं कृष्णः प्रजापतिः।
विहारार्थं स देवेशो मानुषेष्विह जायते॥ १॥
देवक्यां वसुदेवस्य तपसा पुष्करेक्षणः।
चतुर्बाहुस्तदा जातो दिव्यरूपो ज्वलन् श्रिया॥ २॥
श्रीवत्सलक्षणं देवं दृष्ट्वा दिव्यैश्च लक्षणैः।
उवाच वसुदेवस्तं रूपं संहरवै प्रभो!॥ ३॥
भीतोऽहं देव! कंसस्य ततस्त्वेतद्ब्रवीमि ते।
मम पुत्रा हतास्तेन ज्येष्ठास्ते भीमविक्रमाः॥ ४॥
वसुदेववचः श्रुत्वा रूपं संहरतेऽच्युतः।
अनुज्ञाप्य ततः शौरिं नन्दगोपगृहेऽनयत्॥ ५॥
दत्त्वैनं नन्दगोपस्य रक्ष्यतामिति चाब्रवीत्।
अतस्तु सर्वकल्याणं यादवानां भविष्यति॥ ६॥
मुनय ऊचुः। क एष वसुदेवस्तु देवकी च यशस्विनी।
नन्दगोपश्च कस्त्वेष यशोदा च महाव्रता॥ ७॥

यो विष्णुं जनयामास यश्च तातेत्यभाषत ।
या गर्भं जनयामास या चैनं त्वभ्यवर्धयत् ॥ ८ ॥
सूत उवाच । पुरुषः कश्यपस्त्वासीददितिस्तु प्रिया स्मृता ।
ब्रह्मणः कश्यपस्त्वांशः पृथिव्यास्त्वदिति तथा ॥ ९ ॥
अथ कामान् महाबाहुर्देवक्याः समपूरयत् ।
ये तया काङ्क्षिता नित्यमजातस्य महात्मनः ॥ १० ॥
सोऽवतीर्णो महीं देवः प्रविष्टो मानुषीं तनुम् ।
मोहयन् सर्वभूतानि योगात्मा योगमायया ॥ ११ ॥
नष्टे धर्मे तथा जज्ञे विष्णुर्वृष्णिकुले प्रभुः ।
कर्तुं धर्मस्य संस्थानं असुराणां प्रणाशनम् ॥ १२ ॥
रुक्मिणी सत्यभामा च सत्या नाग्नजिती तथा ।
सुभामा च तथा शैब्या गान्धारी लक्ष्मणा तथा ॥ १३ ॥
मित्रविन्दा च कालिन्दी देवी जाम्बवती तथा ।
सुशीला च तथा माद्री कौशल्या विजया तथा ।
एवमादीनि देवीनां सहस्राणि च षोडश ॥ १४ ॥
रुक्मिणी जनयामास पुत्रं रणविशारदम् ।
चारुदेष्णं रणे शूरं प्रद्युम्नञ्च महाबलम् ॥ १५ ॥
सुचारुं भद्रचारुं च सुदेष्णं भद्रमेव च ।
परशुञ्चारुगुप्तञ्च चारुभद्रं सुचारुकम् ।
चारुहासं कनिष्ठञ्च कन्यां चारुमतीं तथा ॥ १६ ॥
जज्ञिरे सत्यभामाया भानुर्भ्रमरतेक्षणः ।
रोहितो दीप्तिमांश्चैव ताम्रपक्षो जलन्धमः ॥ १७ ॥
चतस्रो जज्ञिरे तेषां स्वसारस्तु यवीयसीः ।
जाम्बवत्याः सुतो जज्ञे साम्बः समितिशोभनः ॥ १८ ॥

मित्रवान् मित्रविन्दश्च मित्रविन्दा वराङ्गना ।
मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजाहि सा ॥१९॥
एवमादीनि पुत्राणां सहस्राणि निबोधत ।
अशीतिश्च सहस्राणि वासुदेवसुतास्तथा ।
लक्षमेकं तथा प्रोक्तं पुत्राणाञ्च द्विजोत्तमाः ॥ २० ॥
उपासङ्गस्य तु सुतौ वज्रः संक्षिप्त एव च ।
भूरीन्द्रसेनो भूरिश्च गवेषण सुतावुभौ ॥ २१ ॥
प्रद्युम्नस्य तु दायादो वैदर्भ्यां बुद्धिसत्तमः ।
अनिरुद्धो रणे रुद्धः जज्ञेऽस्य मृगकेतनः २२ ॥
काश्या सुपार्श्वतनया साम्बाल्लेभे तरस्विनः ।
सत्य प्रकृतयो देवाः पञ्चवीराः प्रकीर्त्तिताः ॥ २३ ॥
तिस्रः कोट्यः प्रवीराणां यादवानां महात्मनाम् ।
षष्टिः शतसहस्राणि वीर्यवन्तो महाबलाः ।
देवांशाः सर्व एवेह उत्पन्नास्ते महौजसः ॥ २४ ॥
देवासुरे हता ये च असुरा ये महाबलाः ।
इहोत्पन्ना मनुष्येषु बाधन्ते सर्वमानवान् ॥ २५ ॥
तेषामुत्सादनार्थाय उत्पन्नो यादवे कुले ।
कुलानां शतमेकञ्च यादवानां महात्मनाम् ॥ २६ ॥
सर्वमेतत्कुलं यावद्वर्त्तते वैष्णवे कुले ।
विष्णुस्तेषां प्रणेता च प्रभुत्वे च व्यवस्थितः ।
निदेशस्थायिनस्तस्य कथ्यन्ते सर्वयादवाः ॥ २७ ॥
ऋषय ऊचुः । सप्तर्षयः कुवेरश्च यक्षो माणिचरस्तथा ।
शालकिर्नारदश्चैव सिद्धो धन्वन्तरिस्तथा ॥ २८ ॥
आदिदेवस्तथा विष्णुरेभिस्तु सह दैवतैः ।

किमर्थं सम्भवोभूताः स्मृताः सम्भूतयः कति ॥२८॥
भविष्याः कतिचैवान्ये प्रादुर्भावा महात्मनः।
ब्रह्म क्षत्रेषु शान्तेषु किमर्थमिह जायते ॥ ३०॥
यदर्थमिह सम्भूतो विष्णुर्व्वारम्बकोत्तमः।
पुनः पुनर्मनुष्येषु तन्नः प्रब्रूहि पृच्छताम् ॥ ३१॥
सूत उवाच। त्यक्त्वा दिव्यान्तनुं विष्णुर्मानुषेष्विह जायते।
युगेत्वथ परावृत्ते काले प्रशिथिले प्रभुः ॥ ३२॥
देवासुर विमर्देषु जायते हरिरीश्वरः॥
हिरण्यकशिपौ दैत्ये त्रैलोक्यं प्राक्प्रशासति ॥ ३३॥
बलिनाधिष्ठिते चैव पुरा लोकत्रये क्रमात्।
सख्यमासीत्परमकं देवानामसुरैः सह ॥ ३४॥
युगाख्या सुरसंपूर्णं ह्यासीदव्याकुलं जगत्।
निदेशस्थायिनश्चापि तयोर्देवासुराः समम् ॥ ३५॥
बद्धोबलि विमर्दाय संप्रवृद्धः सुदारुणः।
देवानामसुराणां च घोरः क्षयकरो महान् ॥३६॥
कर्तुं धर्म व्यवस्थानं जायते मानुषेष्विह।
भृगोः शाप निमित्तस्तु देवासुर कृते तदा ॥३७॥
मुनय ऊचुः। कथं देवासुरकृते व्यापारं प्राप्तवान् स्वतः।
देवासुरं यथा वृत्तमन्नः प्रब्रूहि पृच्छताम् ॥ ३८॥
सूत उवाच। तेषां दायनिमित्तं ते संग्रामास्तु सुदारुणाः।
वराहाद्या दश द्वौ च शण्डामर्कान्तरे स्मृताः ॥ ३९॥
नामतस्तु समासेन शृणुतेषां विवक्षतः।
प्रथमो नारसिंहस्तु द्वितीयश्चापि वामनः ॥ ४०॥
तृतीयस्तु वराहश्च चतुर्थोऽमृतमन्थनः।

संग्रामः पञ्चमश्चैव सञ्जातस्तारकामयः ॥ ४१ ॥
षष्ठो ह्याडीबकाख्यस्तु सप्तमस्त्रैपुरस्तथा ।
अन्धकाख्योऽष्टमस्तेषां नवमो वृत्रघातकः ॥ ४२ ॥
धात्रश्च दशमश्चैव ततो हालाहलः स्मृतः ।
प्रथितो द्वादशस्तेषां घोरः कोलाहलस्तथा ॥ ४३ ॥
हिरण्यकशिपुर्दैत्यो नारसिंहेन पातितः ।
वामनेन बलिर्बद्धस्त्रैलोक्याक्रमणे पुरा ॥ ४४ ॥
हिरण्याक्षो हतो द्वन्द्वे प्रतिघाते तु दैवतैः ।
दंष्ट्रया तु वराहेण समुद्रस्तु द्विधाकृतः ॥ ॥ ४५ ॥
प्रह्लादो निर्जितो युद्धे इन्द्रेणामृतमन्थने ।
विरोचनस्तु प्राह्लादिर्नित्यमिन्द्रवधोद्यतः ॥ ॥ ४६ ॥
इन्द्रेणैव तु विक्रम्य निहतस्तारकामये ।
अशक्नुवन् स देवानां सर्वं सोढुं सदैवतम् ॥ ४७ ॥
निहता दानवाः सर्वे त्रैलोक्ये त्र्यम्बकेण तु
असुराश्च पिशाचाश्च दानवाश्चान्धकाहते ॥ ४८ ॥
हतादेव मनुष्येश्च पितृभिश्चैव सर्वशः ।
संपृक्तो दानवैर्वृत्रो घोरो हालाहले हतः ॥ ४९ ॥
तदा विष्णुसहायेन महेन्द्रेण निवर्तितः ।
हतो ध्वजे महेन्द्रेण मायाच्छन्नस्तु योगवित् ।
ध्वजलक्षणमाविश्य विप्रचित्तिः सहानुजः ॥ ५० ॥
दैत्यांश्च दानवांश्चैव संयतान् किलसंयुतान् ।
जयन् कोलाहले सर्वान् देवैः परिवृतो वृषा ।
यज्ञस्यावभृथे दृश्यौ षण्डामर्कौ तु दैवतैः ॥ ५१ ॥
एते देवासुरे वृत्ताः संग्रामा द्वादशैव तु ।

देवासुर क्षयकराः प्रजानान्तु हिताय वैः ॥ ५२ ॥
हिरण्यकशिपू राजा वर्षाणामर्बुदं बभौ ।
द्विसप्तति तथान्यानि नियुतान्यधिकानि च ।
अशीतिञ्च सहस्राणि त्रैलोक्यैश्वर्यताङ्गतः ॥ ५३ ॥
पर्यायेण तु राजा भूद्बलिर्वर्षायुतं पुनः ।
षष्टिवर्षसहस्राणि नियुतानि च त्रिंशति ॥ ५४ ॥
बले राज्याधिकारस्तु यावत्कालं बभूवह ।
तावत्कालन्तु प्रह्लादो निवृत्तो ह्यसुरैः सह ॥ ५५ ॥
इन्द्राश्चयस्ते विज्ञेया असुराणां महौजसः ।
दैत्यसंस्थमिदं सर्वमासीद्दशयुगं पुनः ॥ ५६ ॥
त्रैलोक्यमिदमव्यग्रं महेन्द्रेणानुपाल्यते ।
असपत्नमिदं सर्वमासीद्दशयुगं पुनः ॥ ५७ ॥
प्रह्लादस्य हृते तस्मिन् त्रैलोक्ये कालपर्ययात् ।
पर्यायेण तु संप्राप्ते त्रैलोक्यं पाकशासने ।
ततोऽसुरान् परित्यज्य शुक्रो देवा न गच्छत ॥५८॥
यज्ञे देवानथ गतान्दितिजाः काव्यमाब्रुवन् ।
किं त्वं नो मिषतां राज्यं त्यक्त्वायज्ञं पुनर्गतः ॥५९॥
स्थातुं न शक्नुमो ह्यत्र प्रविशामो रसातलम् ।
एवमुक्तोऽब्रवीद्दैत्यान्विषण्णान् सान्त्वयन् गिरा ॥६०॥
माभैष्ट धारयिष्यामि तेजसा स्वेन वोऽसुराः ।
मन्त्रांश्चौषधीश्चैव रसांवसु च यत् परम् ॥ ६१॥
कृत्स्नानि मयि तिष्ठन्ति पादस्तेषां सुरेषु वै ।
तत्सर्वं वः प्रदास्यामि युष्मदर्थे धृता मया ॥ ६२ ॥
ततो देवास्तु तान् दृष्ट्वा वृतान् काव्येन धीमता ।

यं मन्त्रयन्ति देवा वै यं विद्यास्तु जिहीर्षया ॥ ६३ ॥
काव्योह्येष इदं सर्वं व्यावर्तयति नो बलात् ।
साधु गच्छामहे तूर्णं यावन्नाध्यापयिष्यति ॥ ६४ ॥
प्रसह्य हत्वा शिष्टांस्तु पातालं प्रापयामहे ।
ततो देवास्तु संरब्धा दानवानुपसृत्य ह ॥ ६५ ॥
ततस्ते वध्यमानास्तु काव्यमेवाभिदुद्रुवुः ।
ततः काव्यस्तु तान् दृष्ट्वा तूर्णं देवैरभिद्रुतान् ॥ ६६ ॥
रक्षां काव्येन संहृत्य देवास्तेऽप्यसुरार्दिताः ।
काव्यं दृष्ट्वा स्थितं देवा निःशङ्कमसुरान् जघ्नुः ॥ ६७ ॥
ततः काव्योऽनुचिन्त्याथ ब्रह्मणो वचनं हितम् ।
तानुवाच ततः काव्यः पूर्ववृत्तमनुस्मरन् ॥ ६८ ॥
त्रैलोक्यं वो हृतं सर्वं वामनेन त्रिभिः क्रमैः ।
बलिर्बद्धो हतो जम्भो निहतश्च विरोचनः ॥ ६९ ॥
महासुरा द्वादशसु संग्रामेषु सुरैर्हताः ।
तैस्तैरुपायैर्भूयिष्ठं निहता वः प्रधानतः ॥ ७० ॥
किञ्चिच्छिष्टास्तु यूयं वै युद्धं माऽस्त्विति मे मतम् ।
नीतयो वोऽभिधास्यामि तिष्ठध्वं कालपर्ययात् ॥ ७१ ॥
यास्याम्यहं महादेवं मन्त्रार्थं विजयावहम् ।
अप्रतीपांस्ततो मन्त्रान् देवात्प्राप्य महेश्वरात् ।
युध्यामहे पुनर्देवांस्ततः प्राप्स्यथ वै जयम् ॥ ७२ ॥
ततस्ते कृतसंवादा देवानूचुस्तदासुराः ।
न्यस्तशस्त्रा वयं सर्वे निःसन्नाहा रथैर्विना ॥ ७३ ॥
वयं तपश्चरिष्यामः संवृता वल्कलैर्वने ।

प्रह्लादस्य वचः श्रुत्वा सत्याभिव्याहृतन्तु तत् ॥ ७४ ॥
ततो देवा न्यवर्तन्त विज्वरा मुदिताश्च ते ।
न्यस्तशस्त्रेषु दैत्येषु विनिवृत्तास्तदा सुराः ॥ ७५ ॥
ततस्तानब्रवीत् काव्यः कञ्चित्कालमुपास्यथ ।
निरुत्सिक्ता स्तपोयुक्ताः कालं कार्य्यार्थसाधकम् ॥ ७६ ॥
पितुर्म्माश्रमस्था वै मां प्रतीक्षथ दानवाः ।
तान् संदिश्यासुरान् काव्यो महादेवं प्रपद्यत ॥ ७७ ॥
शुक्र उवाच । मन्त्रानिच्छाम्यहं देव ! ये न सन्ति बृहस्पतौ ।
पराभवाय देवानामसुराणां जयाय च ॥ ७८ ॥
एवमुक्तोऽब्रवीद् देवो व्रतं त्वञ्चर भार्गव ! ।
पूर्णं वर्षसहस्रं तु कणधूममवाक्शिराः ।
यदि पास्यसि भद्रं ते ततो मन्त्रानवाप्स्यसि ॥ ७९ ॥
तथेति समनुज्ञाप्य शुक्रस्तु भृगुनन्दनः ।
पादौ संस्पृश्य देवस्य बाढमित्यब्रवीद्वचः ।
व्रतं चराम्यहं देव ! त्वयादिष्टोऽद्य वै प्रभो ! ॥ ८० ॥
ततोऽनुसृष्टो देवेन कुण्डधारोऽस्य धूमकृत् ।
तदा तस्मिन् गते शुक्रे ह्यसुराणां हिताय वै ।
मन्त्रार्थं तत्र वसति ब्रह्मचर्यं महेश्वरे ॥ ८१ ॥
तद्बुद्ध्वा नीतिपूर्वं तु राज्ये न्यस्ते तदा सुरैः ।
अस्मिंश्छिद्रे तदामर्षाद्देवास्तान् समुपाद्रवन् ॥ ८२ ॥
दंशिताः सायुधाः सर्वे बृहस्पतिपुरःसराः ॥ ८३ ॥
दृष्ट्वाऽसुरगणा देवान् प्रगृहीतायुधान् पुनः ।
उत्पेतुः सहसा ते वै सन्त्रस्तास्तान् वचोऽब्रुवन् ॥ ८४ ॥
न्यस्ते शस्त्रे भये दत्ते आचार्ये व्रतमास्थिते ।

दत्त्वा भवन्तो ह्यभयं संप्राप्ता नो जिघांसया ॥ ८५ ॥
अनाचार्या वयं देवा ! त्यक्तशस्त्रास्त्ववस्थिताः ।
चीरकृष्णाजिनधरा निष्क्रिया निष्परिग्रहाः ॥ ८६ ॥
रणे विजेतुं देवांश्च न शक्ष्यामः कथञ्चन ।
अयुद्धेन प्रपत्स्यामः शरणं काव्यमातरम् ॥ ८७ ॥
ज्ञापयामः कृच्छ्रमिदं यावदभ्येति नो गुरुः ।
निवृत्ते च तथा शुक्रे योत्स्यामो दंशितायुधाः ॥ ८८ ॥
एवमुक्त्वा सुरान्योन्यं शरणं काव्यमातरम् ।
प्रापद्यन्त ततो भीतास्तेभ्योऽदादभयन्तु सा ॥ ८९ ॥
न भेतव्यं न भेतव्यं भयन्त्यजत दानवाः !
मत्सन्निधौ वर्त्ततां वो न भीर्भवितुमर्हति ॥ ९० ॥
तया चाभ्युपपन्नांस्तान् दृष्ट्वा देवास्ततोऽसुरान् ।
अभिजग्मुः प्रसह्यैतानविचार्य बलाबलम् ॥ ९१ ॥
ततस्तान् बाध्यमानांस्तु देवैर्दृष्ट्वा सुरांस्तदा ।
देवी क्रुद्धाऽब्रवीद्देवाननिन्द्रान्वः करोम्यहम् ॥ ॥९२॥
संभृत्य सर्वसम्भारानिन्द्रं साभ्यचरत्तदा ।
तस्तम्भ देवी बलवद्योगयुक्ता तपोधना ॥ ९३ ॥
ततस्तं स्तम्भितं दृष्ट्वा इन्द्रं देवाश्च मूकवत् ।
प्राद्रवन्त ततो भीता इन्द्रं दृष्ट्वा वशीकृतम् ॥ ९४ ॥
गतेषु सुरसङ्घेषु शक्रं विष्णुरभाषत ।
मां त्वं प्रविश भद्रं ते नयिष्ये त्वां सुरोत्तम ! ॥ ९५ ॥
एवमुक्तस्ततो विष्णुं प्रविवेश पुरन्दरः ।
विष्णुना रक्षितं दृष्ट्वा देवी क्रुद्धा वचोऽब्रवीत् ॥९६॥
एषा त्वां विष्णुना सार्धन्दहामि मघवन् ! बलात् ।

मिषतां सर्वभूतानां दृश्यतां मे तपोबलम् ॥ ९७ ॥
तयाभिभूतौ तौ देवाविन्द्रविष्णू बभूवतुः ।
अथ मुच्येऽवसहितौ विष्णुरिन्द्रमभाषत ॥ ९८ ॥
इन्द्रोऽब्रवीज्जहि ह्येनां यावन्नो न दहेत् प्रभो ! ।
विशेषेणाभिभूतोऽस्मि त्वत्तोऽहञ्जहि मा चिरम् ॥ ९९ ॥
ततः समीक्ष्य विष्णुस्तां स्त्रीवधे कृच्छ्रमास्थितः ।
अभिध्याय ततश्चक्रमापदुद्धरणे तु तत् ॥ १०० ॥
ततस्तु त्वरया युक्तः शीघ्रकारी भयान्वितः ।
ज्ञात्वा विष्णु ततस्तस्याः क्रूरन्देव्याश्चिकीर्षितम् ।
क्रुद्धः स्वमस्त्रमादाय शिरश्चिच्छेद वै भिया ॥ १०१ ॥
तं दृष्ट्वा स्त्रीवधं घोरं चुक्रोध भृगुरीश्वरः ।
ततोऽभिशप्तो भृगुणा विष्णुर्भार्यावधे तदा ॥ १०२ ॥
यस्मात्ते जानतोधर्मं मवध्या स्त्री निषूदिता ।
तस्मात्त्वं सप्तकृत्वेह मानुषेषूपपत्स्यसि ॥ १०३ ॥
ततस्तेनाभिशापेन नष्टे धर्मे पुनः पुनः ।
लोकस्य च हितार्थाय जायते मानुषेष्विह ॥ १०४ ॥
अनुव्याहृत्य विष्णुं स तदादाय शिरस्त्वरन् ।
समानीय ततः कायमसौ गृह्य दमब्रवीत् ॥ १०५ ॥
एषा त्वं विष्णुना देवि ! हता सञ्जीवयाम्यहम् ।
ततस्तां योज्य शिरसा अभिजीवेति सोऽब्रवीत् ॥ १०६ ॥
यदि कृत्स्नो मया धर्मो ज्ञायते चरितोऽपि वा ।
तेन सत्येन जीवस्व यदि सत्यं वदाम्यहम् ॥ १०७ ॥
ततस्तां प्रोक्ष्य शीताभिरद्भिर्जीवेति सोऽब्रवीत् ।
ततोऽभिव्याहृते तस्य देवी सञ्जीविता तदा ॥ १०८ ।

ततस्तां सर्वभूतानि दृष्ट्वा सुप्तोत्थितामिव।
साधु साध्विति चक्रुस्ते वचसा सर्वतो दिशम् ॥१०९॥
एवं प्रत्याहृता तेन देवी सा भृगुणा तदा।
मिषतां देववृन्दानां चित्रं तदद्भुतमिवाभवत् ॥ ११० ॥
असंभ्रान्तेन भृगुणा पत्नी सञ्जीविता पुनः।
दृष्ट्वा चेन्द्रो नालभत शर्म काव्यभयात् पुनः।
प्रजागरे ततश्चेन्द्रो जयन्तीमिदमब्रवीत् ॥ १११ ॥
सञ्चिन्त्य मतिमान्वाक्यं स्वां कन्यां पाकशासनः।
एष काव्यो ह्यमित्राय व्रतञ्चरति दारुणम्।
तेनाहं व्याकुलः पुत्रि ! कृतो मतिमताभृगम् ॥ ११२ ॥
गच्छ संसाधयस्वैनं श्रमापनयनैः शुभैः।
तैस्तैर्मनोऽनुकूलैश्च ह्युपचारैरतन्द्रिता ॥ ११३॥
काव्यमाराधयस्वैनं यथा तुष्येत स द्विजः।
गच्छ त्वं तस्य दत्तासि प्रयत्नं कुरु मत्कृते ॥११४ ॥
एवमुक्ता जयन्ती सा वचः संगृह्य वै पितुः।
अगच्छद्यत्र घोरं स तप आरभ्य तिष्ठति ॥ ११५ ॥
तं दृष्ट्वा तु पिबन्तं सा कणधूममवाङ्मुखम्।
यक्षेण पात्यमानञ्च कुण्डधारेण पातितम् ॥ ११६ ॥
दृष्ट्वा च तं पात्यमानं देवी काव्यमवस्थितम्।
स्वरूपध्यानशाम्यन्तं दुर्बलं भूतिमास्थितम्।
पित्रा यथोक्तं वाक्यं सा काव्ये कृतवती तदा ॥११७॥
गीर्भिश्चैवानुकूलाभिः स्तुवती वल्गुभाषिणी।
गात्रसंवाहनैः काले सेवमाना त्वचः सुखैः।
व्रतचर्यानुकूलाभिरुवास बहुलाः समाः ॥ ११८ ॥

पूर्णे धूमव्रते तस्मिन् घोरे वर्षसहस्रके ।
वरेण च्छन्दयामास काव्यं प्रीतो भवस्तदा ॥ ११९ ॥
महादेव उवाच । एतद्व्रतं त्वयैकेन चीर्णं नान्येन केनचित् ।
तस्माद्वै तपसा बुद्ध्या श्रुतेन च बलेन च ॥ १२० ॥
तेजसा च सुरान् सर्वांस्त्वमेकोऽभिभविष्यसि ।
यच्चाभिलषितं ब्रह्मन् ! विद्यते भृगुनन्दन ! ॥ १२१ ॥
प्रपत्स्यसे तु तत्सर्वं नानुवाच्यन्तु कस्यचित् ।
सर्वाभिभावी तेन त्वं भविष्यसि द्विजोत्तम ! ॥ १२२ ॥
एतान्दत्त्वा वरांस्तस्मै भार्गवाय भवः पुनः ।
प्रजेशत्वं धनेशत्वमवध्यत्वञ्च वै ददौ ॥ १२३ ॥
एतान् लब्ध्वा वरान् काव्यः सम्प्रहृष्टतनूरुहः ।
हर्षात् प्रादुर्भवत्तस्य दिव्यस्तोत्रं महेश्वरम् ।
तथा तिर्यक्स्थितश्चैव तुष्टुवे नीललोहितम् ॥ १२४ ॥
शुक्र उवाच । नमोऽस्तु शितिकण्ठाय कनिष्ठाय सुवर्चसे ।
लेलिहानाय काव्याय वत्सरायान्धसः पते ॥ १२५ ॥
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ।
संस्तुताय सुतीर्थाय देवदेवाय रंहसे ॥ १२६ ॥
उष्णीषिणे सुवक्त्राय बहुरूपाय वेधसे ।
वसुरेताय रुद्राय तपसे चित्रवाससे ॥ १२७ ॥
ह्रस्वाय मुक्तकेशाय सेनान्ये रोहिताय च ।
कवये राजवृक्षाय तक्षकक्रीडनाय च ॥ १२८ ॥
सहस्रशिरसे चैव सहस्राक्षाय मीढुषे ।
वराय भव्यरूपाय श्वेताय पुरुषाय च ॥ १२९ ॥
गिरिशाय नमोऽर्काय बलिने आज्यपाय च ।

सुवर्माय सुवस्त्राय धन्विने भार्गवाय च ॥ १३० ॥
निषङ्गिणे च ताराय स्वक्षाय क्षपणाय च ।
ताम्राय चैव भीमाय उग्राय च शिवाय च ॥ १३१ ॥
महादेवाय शर्वाय विश्वरूपशिवाय च ।
हिरण्याय वरिष्ठाय ज्येष्ठाय मध्यमाय च ॥ १३२ ॥
वास्तोष्पते पिनाकाय मुक्तये केवलाय च ।
मृगव्याधाय दक्षाय स्थाणवे भीषणाय च ॥ १३३ ॥
बहुनेत्राय धुर्य्याय त्रिनेत्रायेश्वराय च ।
कपालिने च वीराय मृत्यवे त्र्यम्बकाय च ॥ १३४ ॥
बभ्रवे च पिशङ्गाय पिङ्गलायारुणाय च ।
पिनाकिने चेषुमते चित्राय रोहिताय च ॥ १३५ ॥
दुन्दुभ्यायैकपादाय अजाय बुद्धिदाय च ।
आरण्याय गृहस्थाय यतये ब्रह्मचारिणे ॥ १३६ ॥
साङ्ख्याय चैव योगाय व्यापिने दीक्षिताय च ।
अनाहताय शर्व्वाय भवेशाय यमाय च ॥ १३७ ॥
रोधसे चेकितानाय ब्रह्मिष्ठाय महर्षये ।
चतुष्पदाय मेध्याय रक्षिणे शीघ्रगाय च ॥ १३८ ॥
शिखण्डिने करालाय दंष्ट्रिणे विश्ववेधसे ।
भास्वराय प्रतीताय सुदीप्ताय सुमेधसे ॥ १३९ ॥
क्रूरायाविकृतायैव भीषणाय शिवाय च ।
सौम्याय चैव मुख्याय धार्म्मिकाय शुभाय च ॥ १४० ॥
अवध्यायामृतायैव नित्याय शाश्वताय च ।
व्यापृताय विशिष्टाय भरताय च साक्षिणे ॥ १४१ ॥
क्षेम्याय सहमानाय सत्याय चामृताय च ।

कवे परशवे चैव शूलिने दिव्यचक्षुषे ॥ १४२ ॥
सोमपायाज्यपायैव धूमपायोष्मपाय च ।
शुचये परिधानाय सद्योजाताय मृत्यवे ॥ १४३ ॥
पिशिताशाय सर्व्वाय मेघाय विद्युताय च ।
व्याहृताय वरिष्ठाय भरितायतरक्षवे ॥ १४४ ॥
त्रिपुरघ्नाय तीर्थायावक्राय रोमशाय च ।
तिग्मायुधाय व्याख्याय सुसिद्धाय पुलस्तये ॥ १४५ ॥
रोचमानाय चण्डाय स्फीताय ऋषभाय च ।
व्रतिने युञ्जमानाय शुचये चोर्ध्वरेतसे ॥ १४६ ॥
असुरघ्नाय स्वाघ्नाय मृत्युघ्ने यज्ञियाय च ।
कृशानवे प्रचेताय वह्नये निर्म्मलाय च ॥ १४७ ॥
रक्षोघ्नाय पशुघ्नायाविघ्नाय श्वसिताय च ।
विभ्रान्ताय महान्ताय अत्यन्तं दुर्गमाय च ॥ १४८ ॥
कृष्णाय च जयन्ताय लोकानामीश्वराय च ।
अनाश्रिताय वेध्याय समत्वाधिष्ठिताय च ॥ १४९ ॥
हिरण्यबाहवे चैव व्याप्ताय च महाय च ।
सुकर्म्मणे प्रसह्याय चेकितानाय सुचक्षुषे ॥ १५० ॥
क्षिप्रेषवे सदश्वाय शिवाय मोक्षदाय च ।
कपिलाय पिशङ्गाय महादेवाय धीमते ॥ १५१ ॥
महाकायाय दीप्ताय रोदनाय सहाय च ।
दृढधन्विने कवचिने रथिने च वरूथिने ॥ १५२ ॥
भृगुनाथाय शुक्राय गह्वरेष्ठाय वेधसे ।
अमोघाय प्रशान्ताय सुमेधाय वृषाय च ॥ १५३ ॥
नमोऽस्तु तुभ्यं भगवन् ! विश्वाय कृत्तिवाससे ।

पशूनां पतये तुभ्यं भूतानां पतये नमः॥ १५४॥
प्रणवे ऋग्यजुःसाम्ने स्वाहाय च स्वधाय च।
वषट्कारात्मने चैव तुभ्यं मन्त्रात्मने नमः॥ १५५॥
त्वष्ट्रे धात्रे तथा कर्त्रे चक्षुःश्रोत्रमयाय च।
भूतभव्यभवेशाय तुभ्यं कर्मात्मने नमः॥ १५६॥
वसवे चैव साध्याय रुद्रादित्यसुराय च।
विश्वाय मारुतायैव तुभ्यं देवात्मने नमः॥ १५७॥
अग्नीषोमविधिज्ञाय पशुमन्त्रौषधाय च।
स्वयम्भुवे ह्यजायैव अपूर्वप्रथमाय च।
प्रजानां पतये चैव तुभ्यं ब्रह्मात्मने नमः॥ १५८॥
आत्मेशायात्मवश्याय सर्वेशातिशयाय च।
सर्वभूताङ्गभूताय तुभ्यं भूतात्मने नमः॥ १५९॥
निर्गुणाय गुणज्ञाय व्याकृतायामृताय च।
निरुपाख्याय मित्राय तुभ्यं साङ्ख्यात्मने नमः॥१६०॥
पृथिव्यै चान्तरिक्षाय दिव्याय च महाय च।
जनस्तपाय सत्याय तुभ्यं लोकात्मने नमः॥ १६१॥
अव्यक्ताय च महते भूतादेरिन्द्रियाय च।
आत्मज्ञाय विशेषाय तुभ्यं सर्व्वात्मने नमः॥ १६२॥
नित्याय चात्मलिङ्गाय सूक्ष्मायैवेतराय च।
बुद्धाय विभवे चैव तुभ्यं मोक्षात्मने नमः॥ १६३॥
नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु।
सत्याद्यंतेषु महाद्येषु चतुर्षु च नमोऽस्तु ते॥ १६४॥
नमस्तोत्रे मया ह्यस्मिन् यदि न व्याहृतं भवेत्।
मद्भक्त इति ब्रह्मण्य! तत्सर्वं क्षन्तुमर्हसि॥ १६५॥

सूत उवाच । एवमाभाष्य देवेशमीश्वरं नीललोहितम् ।
प्रह्वोऽभिप्रणतस्तस्मै प्राञ्जलिर्वाग्यतोऽभवत् ॥ १६६ ॥
काव्यस्य गात्रं संस्पृश्य हस्तेन प्रीतिमान् भवः ।
निकामं दर्शनं दत्त्वा तत्रैवान्तरधीयत ॥ १६७ ॥
ततः सोऽन्तर्हिते तस्मिन् देवेशेऽनुचरीं तदा ।
तिष्ठन्तीं पार्श्वतो दृष्ट्वा जयन्तीमिदमब्रवीत् ॥ १६८ ॥
कस्य त्वं सुभगे ! का वा दुःखिते मयि दुःखिता ।
महता तपसा युक्ता किमर्थं मां निषेवसे ॥ १६९ ॥
अनया संस्तुतो भक्त्या प्रश्रयेण दमेन च ।
स्नेहेन चैव सुश्रोणि ! प्रीतोऽस्मि वरवर्णिनि ! ॥ १७० ॥
किमिच्छसि वरारोहे ! कस्ते कामः समृध्यताम् ।
तत्ते संपादयाम्यद्य यद्यपि स्यात् सुदुष्करः ॥ १७१ ॥
एवमुक्ता ब्रवीदेनं तपसा ज्ञातुमर्हसि ।
चिकीर्षितं हि मे ब्रह्मन् ! त्वं हि वेत्थ यथातथम् ॥ १७२ ॥
एवमुक्तोऽब्रवीदेनां दृष्ट्वा दिव्येन चक्षुषा ।
मया सह त्वं सुश्रोणि ! दशवर्षाणि भामिनि ! ॥ १७३ ॥
देवि ! चेन्दीवरश्यामे ! वरार्हे ! वामलोचने ! ।
एवं वृणोषि कामं त्वं मत्तो वै वल्गुभाषिणि ! ॥ १७४ ॥
एवं भवतु गच्छामो गृहान्नो मत्तकाशिनि ! ।
ततः स्वगृहमागत्य जयन्त्याः पाणिमुद्वहन् ॥ १७५ ॥
तया सहावसद्देव्या दशवर्षाणि भार्गवः ।
अदृश्यः सर्वभूतानां मायया संवृतः प्रभुः ॥ १७६ ॥
कृतार्थमागतं दृष्ट्वा काव्यं सर्वे दितेः सुताः ।
अभिजग्मुर्गृहं तस्य मुदितास्ते दिदृक्षवः ॥ १७७ ॥

यदा गता न पश्यन्ति मायया संवृतं गुरुम् ।
लक्षणं तस्य तद्बुद्धा प्रतिजग्मुर्यथागतम् ॥१७८॥
बृहस्पतिस्तु संरुद्धं काव्यं ज्ञात्वा वरेण तु ।
तुष्ट्यर्थं दशवर्षाणि जयन्त्या हितकाम्यया ॥ १७९ ॥
बुद्धा तदन्तरं सोऽपि दैत्यानामिन्द्रनोदितः ।
काव्यस्य रूपमास्थाय असुरान् समुपाह्वयत् ॥१८०॥
ततस्तानागतान् दृष्ट्वा बृहस्पतिरुवाच ह ।
स्वागतं मम याज्यानां प्राप्तोऽहं वो हिताय च ॥१८१॥
अहं वोऽध्यापयिष्यामि विद्याः प्राप्तास्तु या मया ।
ततस्ते हृष्टमनसो विद्यार्थमुपपेदिरे ॥ १८२ ॥
पूर्णे काव्यस्तदा तस्मिन् समये दशवार्षिके ।
स मयान्ते देवयानी तदोत्पन्ना इति श्रुतिः ।
बुद्धिं चक्रे ततः सोऽथ याज्यानां प्रत्यवेक्षणे ॥१८३॥
देवि ! गच्छाम्यहं द्रष्टुं मम याजान् शुचिस्मिते ! ।
विभ्रान्तवीक्षिते ! साध्वि ! त्रिवर्णायतलोचने ॥१८४॥
एवमुक्ताब्रवीदेनं भज भक्तान् महाव्रत ! ।
एष धर्म्मः सतां ब्रह्मन् ! न धर्मं लोपयामि ते ॥१८५
ततोगत्वा सुरान् दृष्ट्वा देवाचार्य्येण धीमता ।
वञ्चितान् काव्यरूपेण ततः काव्योऽब्रवीत्तु तान् ॥१८६॥
काव्यं मां भो विजानीध्वमाङ्गिरसो गिरिशो विभुः ।
वञ्चिता बत यूयं वै सर्वे शृणुत दानवाः ! ॥ १८७ ॥
श्रुत्वा तथा ब्रुवाणस्तं संभ्रातास्ते तदाऽभवन् ।
प्रेक्षन्तस्तावुभौ तत्र स्थितासीनौ सुविस्मिताः ॥ १८८॥
सम्प्रमूढास्ततः सर्वे न प्राबुध्यन्त किञ्चन ।

अब्रवीत् सम्प्रमूढेषु काव्यस्तानसुरांस्तदा ॥ १८९ ॥
आचार्यो वो ह्यहं काव्यो देवाचार्योऽयमङ्गिराः ।
अनुगच्छत मां दैत्यास्त्यजतैनं बृहस्पतिम् ॥ १९० ॥
इत्युक्ता ह्यसुरास्तेन तावुभौ समवेक्ष्य च ।
यदासुरा विशेषन्तु न जानन्त्युभयोस्तयोः ॥ १९१ ॥
बृहस्पतिरुवाचैनानसंभ्रान्तस्तपोधनः ।
काव्यो वोऽहं गुरुर्दैत्या ! मद्रूपोऽयं बृहस्पतिः ॥ १९२ ॥
संमोहयति रूपेण मामकेनैष वोऽसुराः ! ।
श्रुत्वा तस्य ततस्ते वै समेत्य तु ततोऽब्रुवन् ॥ १९३ ॥
अयं नो दशवर्षाणि सततं शास्ति वै प्रभुः ।
एष वै गुरुरस्माकमन्तरे स्फुरयन् द्विजः ॥ १९४ ॥
ततस्ते दानवाः सर्वे प्रणिपत्याभिनन्द्य च ।
वचनञ्जगृहुस्तस्य चिराभ्यासेन मोहिताः ॥ १९५ ॥
ऊचुस्तमसुराः सर्वे क्रोधसंरक्तलोचनाः ।
अयं गुरुर्हितोऽस्माकं गच्छ त्वं नासि नो गुरुः ॥ १९६ ॥
भार्गवो वाङ्गिरा वापि भगवानेष नो गुरुः ।
स्थितावयं निदेशेऽस्य साधु त्वं गच्छ माचिरम् ॥ १९७ ॥
एवमुक्ता सुराः सर्वे प्रापद्यन्त बृहस्पतिम् ।
यदा न प्रतिपद्यन्त काव्येनोक्तं महद्धितम् ॥ १९८ ॥
चुकोप भार्गवस्तेषामवलेपेन तेन तु ।
बोधिता हि मया यस्मान्न मां भजथ दानवाः ॥ १९९ ॥
तस्मात् प्रनष्टसंज्ञा वै पराभवमवाप्स्यथ ।
इति व्याहृत्य तान् काव्यो जगामाथ यथागतम् ॥ २०० ॥
शप्तांस्तानसुरान् ज्ञात्वा काव्येन स बृहस्पतिः ।

शतार्थः स तदा हृष्टः स्वरूपं प्रत्यपद्यत ॥ २०१ ॥
बुद्ध्वा सुरान् हतान् ज्ञात्वा शतार्थोऽभ्यरधीयत ।
ततः प्रणष्टे तस्मिंस्तु विभ्रान्ता दानवा भवन् ॥२०२॥
अहो विवञ्चिताः क्वेति परस्परमथाब्रुवन् ।
पृष्ठतोऽभिमुखाश्चैव ताडिताश्चिरवेन तु ॥ २०३ ॥
वञ्चिताः स्वोपधानेन स्वे स्वे वसूनि मायया ।
ततस्त्वपरितुष्टास्ते तमेव त्वरिता ययुः ।
प्रह्लादमग्रतः कृत्वा काव्यस्यानुपदं पुनः ॥ २०४ ॥
ततः काव्यं समासाद्य उपतस्थुरवाङ्मुखाः ।
समागमात् पुनर्दृष्ट्वा काव्यो याज्यानुवाच ह ॥२०५॥
मया सम्बोधिताः सर्वे यस्मान्मां नाभिनन्दथ ।
ततस्तेनावमानेन गता यूयं पराभवम् ॥ २०६ ॥
एवं ब्रुवाणं शक्रन्तु वाष्पसन्दिग्धया गिरा ।
प्रह्लादस्तमथोवाच मा न त्वन्त्यज भार्गव ! ॥२०७॥
स्वाश्रयान् भजमानांश्च भक्तांस्त्वम्भज भार्गव ! ।
त्वय्यदृष्टे वयं तेन देवाचार्य्येण मोहिताः ।
भक्तानर्हसि वै ज्ञातुं तपोदीर्घेण चक्षुषा ॥ २०८ ॥
यदि न स्त्वं न कुरुषे प्रसादं भृगुनन्दन ! ।
अपध्याता त्वया ह्यद्य प्रविशामो रसातलम् ॥२०९॥
ज्ञात्वा काव्यो यथा तत्त्वं कारुण्यादनुकम्पया ।
एवं प्रत्यनुनीतो वै ततः कोपं नियम्य सः ।
उवाचैतान्न भेतव्यं न गन्तव्यं रसातलम् ॥ २१० ॥
अवश्यं भाविनो ह्यर्थाः प्राप्तव्या मयि जाग्रति ।

न शक्यमन्यथाकर्तुं दिष्टं हि बलवत्तरम् ॥ २११ ॥
संज्ञा प्रनष्टा या वोऽद्य ता मेतां प्रतिपत्स्यथ ।
देवान् जित्वा सकृच्चापि पातालं प्रतिपत्स्यथ ॥ २१२ ॥
प्राप्ते पर्यायकाले च हीति ब्रह्माभ्यभाषत ।
मत्प्रसादाच्च त्रैलोक्यं भुक्तं युष्माभिरूर्जितम् ॥ २१३ ॥
युगाख्या दश संपूर्णा देवानाक्रम्य मूर्द्धनि ।
एतावन्तञ्च कालं वै ब्रह्मा राज्यमभाषत ॥ २१४ ॥
राज्यं सावर्णिके तुभ्यं पुनः किल भविष्यति ।
लोकानामीश्वरो भावी तव पौत्रः पुनर्बलिः ॥ २१५ ॥
एवं किल मिथः प्रोक्तः पौत्रके विष्णुना स्वयम् ।
वाचा हृतेषु लोकेषु ताम्तास्याभवन् किल ॥ २१६ ॥
यस्मात् प्रवृत्तयश्चास्य सकाशादभिसन्धिताः ।
तस्माद्दत्तेन प्रीतेन तुभ्यं दत्तं स्वयम्भुवा ॥ २१७ ॥
देवराज्ये बलिर्भाव्य इति मामीश्वरोऽब्रवीत् ।
तस्माद्दृश्यो भूतानां कालापेक्षः स तिष्ठति ॥ २१८ ॥
प्रीतेन चापरो दत्तो वरस्तुभ्यं स्वयम्भुवा ।
तस्मान्निरुत्सुकस्त्वं वै पर्यायं सहितोऽसुरैः ॥ २१९ ॥
न हि शक्यं मया तुभ्यं पुरस्ताद्विप्रभाषितुम् ।
ब्रह्मणा प्रतिषिद्धोऽहं भविष्यज्ञानता विभो ! ॥ २२० ॥
इमौ च शिष्यौ द्वौ मह्यं समावर्तौ बृहस्पतेः ।
दैवतैः सह संसृष्टान् सर्वान्वो धारयिष्यतः ॥ २२१ ॥
इत्युक्ता असुराः सर्वे काव्येनाक्लिष्टकर्मणा ।
हृष्टास्तेन ययुः सार्द्धं प्रह्लादेन महात्मना ॥ २२२ ॥
अवश्यं भावमर्थन्तु श्रुत्वा शुक्रेण भाषितम् ।

सप्तरात्रंसमायातु जयं प्रश्नेष भावितम् ।
दंशिताः सायुधाः सर्वे ततो देवान् समाह्वयन् ॥२२३॥
देवास्तदा सुरान् दृष्ट्वा संग्रामे समुपस्थितान् ।
सर्वे संभृतसम्भारा देवास्तान् समयोधयन् ॥ २२४
देवासुरे तदा तस्मिन् वर्त्तमाने शतं समाः ।
अजयन्नसुरा देवा ततो देवा ह्यमन्त्रयन् ॥२२५ ॥
यज्ञेनोपाह्वयामस्तौ ततो जेष्यामहे सुरान् ।
तदोपामन्त्रयन् देवाः शण्डामर्कौ तु तावुभौ ॥२२६॥
यज्ञे चाहूय तौ प्रोक्तौ त्यजेतामसुरान् द्विजौ ।
वयं युवां भजिष्यामः सह जित्वा तु दानवान् ॥२२७॥
एवं कृताभिसन्धीतौ शण्डामर्कौ सुरास्तथा ।
ततो देवा जयं प्रापुर्दानवाश्च पराजिताः ॥ २८ ॥
शण्डामर्कपरित्यक्ता दानवा ह्यबलास्तथा ।
एव दैत्याः पुरा काव्यशापेनाभिहतास्तदा ॥ २२९॥
काव्यशापाभिभूतास्ते निराधाराश्च सर्वशः ।
निरस्यमानादेवैश्च विविशुस्ते रसातलम् ॥ २३० ॥
एवं निरुद्यमा देवैः कृताः कृच्छ्रेण दानवाः ।
ततः प्रभृति शापेन भृगोर्नैमित्तिकेन तु ॥ २३१ ॥
जज्ञे पुनः पुनर्विष्णुर्धर्मे प्रशिथिले प्रभुः ।
कुर्वन् धर्मव्यवस्थानमसुराणां प्रणाशनम् ॥ २३२ ॥
प्रह्लादस्य निदेशे तु न स्थास्यन्त्यसुराश्च ये ।
मनुष्यवध्यास्ते सर्वे ब्रह्मेति व्याहरत् प्रभुः ॥२३३॥
धर्मान्नारायणस्यांशः सम्भूतश्चाक्षुषेऽन्तरे ।
यज्ञं वै वर्तयामासुर्देवा वैवस्वतेऽन्तरे ॥ २३४ ॥

प्रादुर्भावे ततस्तस्य ब्रह्मा ह्यासीत्पुरोहितः।
युगाख्यायां चतुर्थ्यान्तु आपन्नेषु सुरेषु वै॥ २३५॥
सम्भूतश्च समुद्रान्ते हिरण्यकशिपोर्वधे।
द्वितीये नरसिंहाख्ये रुद्रो ह्यासीत् पुरोहितः॥२३६॥
बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति।
तृतीये वामनस्यार्थे धर्मेण तु पुरोधसा॥ २३७॥
एतास्तिस्रः स्मृता यस्य दिव्याः सम्भूतयो द्विजाः।
मानुषाः सप्त यास्तास्तु शापजास्ता निबोधत॥२३८॥
त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह।
नष्टे धर्मे चतुर्थांशे मार्कण्डेयपुरःसरः॥ २३९॥
पञ्चमः पञ्चदश्याञ्च त्रेतायां सम्बभूव ह।
मान्धाता चक्रवर्त्ती तु तथ्योतथ्य पुरःसरे॥ २४०॥
एकोनविंशत्यां त्रेतायां सर्वक्षत्रान्तकृद्विभुः।
जामदग्न्य स्तथा षष्ठो विश्वामित्रपुरःसरः॥ २४१॥
चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा।
सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः॥ २४२॥
अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात्।
वेदव्यास स्तथा यज्ञे जातूकर्ण्यपुरःसरः॥ २४३॥
कर्त्तुं धर्मव्यवस्थानमसुराणां प्रणाशनम्।
बुद्धो नवमको जज्ञे तपसा पुष्करेक्षणः।
देवसुन्दररूपेण द्वैपायनपुरःसरः॥ २४४॥
तस्मिन्नेव युगे क्षीणे सन्ध्याशिष्टे भविष्यति।
कल्की तु विष्णुयशसःपाराशर्य्यपुरःसरः।
दशमो भाव्यसम्भूतो याज्ञवल्क्यपुरःसरः॥ २४५॥

सर्वांश्च भूतान्निमितान् पाषण्डांश्चैव सर्वशः।
प्रगृहीतायुधैर्विप्रैर्वृतः शतसहस्रशः॥ २४६॥
निःशेषान् शूद्रराज्ञस्तु तदा स तु करिष्यति।
अधार्मिकाः सपक्षांस्तु संहत्यैव च तद्वपुः॥ २४७॥
अष्टाविंशे स्थितः कल्किश्चरितार्थः ससैनिकः।
शूद्रान् संशोधयित्वा तु समुद्रान्तञ्च वै स्वयम्॥ २४८॥
प्रवृत्तचक्रो बलवान् संहारन्तु करिष्यति।
उत्सादयित्वा वृषलान् प्रायशस्तानधार्मिकान्॥ २४९॥
ततस्तदा स वै कल्किश्चरितार्थः ससैनिकः।
प्रजास्तं साधयित्वा तु समृद्धास्तेन वै स्वयम्॥ २५०।
अकस्मात्कोपितान्योन्यं भविष्यन्तीह मोहिताः।
क्षपयित्वा तु तेऽन्योन्यं भाविनार्थेन चोदिताः॥ २५१॥
तस्मिकाले व्यतीते तु स देवोऽन्तरधीयत।
नृपेष्वथ प्रनष्टेषु प्रजानां संप्लवस्तदा॥ २५२॥
रक्षणे विनिवृत्ते तु हत्वा चान्योन्यमाहवे।
परस्परं निहत्वा तु निराक्रन्दाः सुदुःखिताः॥ २५३॥
पुराणि हित्वा ग्रामांश्च तुल्यत्वे निष्परिग्रहाः।
प्रनष्टाश्रमधर्म्माश्च नष्टवर्णाश्रमास्तथा॥ २५४॥
ह्रस्वशूला जानपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाः केशशूलाश्च भविष्यन्ति युगक्षये॥ २५५॥
ह्रस्वदेहायुषश्चैव भविष्यन्ति वनौकसः।
सरित्पर्वतवासिन्यो मूलपत्रफलाशनाः॥ २५६॥
चीरचर्माजिनधराः सङ्करं घोरमाश्रिताः।
उत्पातदुःखाः स्वल्पार्थाः बहुबाधाश्च ताः प्रजाः॥ २५७॥

एवं कष्टमनुप्राप्ताः काले सन्ध्यंशके तदा ।
ततः चयं गमिष्यन्ति सार्द्धं कलियुगेन तु ॥२५८॥
चीणे कलियुगे तस्मिंस्ततः क्षतमवर्त्तत ।
इत्येतत्कीर्त्तितं सम्यक् देवासुरविचेष्टितम् ॥२५९॥
यदुवंशप्रसङ्गेन समासाद्वैष्णवं यशः ।
तुर्वसोस्तु प्रवक्ष्यामि पूरोर्द्रुह्योस्तथानोः ॥२६०॥

---

## अष्टचत्वारिंशोऽध्यायः ।

सूत उवाच । तुर्वसोस्तु सुतो गर्भो गोभानुस्तस्य चात्मजः ।
गोभानोस्तु सुतो वीरस्त्रिसारिरपराजितः ॥ १ ॥
करन्धमस्तु त्रैसारिर्मरुतस्तस्य चात्मजः ।
दुष्यन्तः पौरवस्यापि तस्य पुत्रो ह्यकल्मषः ॥ २ ॥
एवं ययातिशापेन जरासंक्रमणे पुरा ।
तुर्वसोः पौरवं वंशं प्रविवेश पुरा किल ॥ ३ ॥
दुष्यन्तस्य तु दायादो वरूथो नाम पार्थिवः ।
वरूथात्तु तथा वीरः सन्धानस्तस्य चात्मजः ॥ ४ ॥
पाण्ड्यश्च केरलश्चैव चोलः कर्णस्तथैव च ।
तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः ॥५॥
द्रुह्यस्य तनयौ शूरौ सेतुः केतुस्तथैव च ।
सेतुपुत्रः शरद्वांस्तु गन्धारस्तस्य चात्मजः ॥ ६ ॥
ख्यायते यस्य नाम्नासौ गन्धारविषयो महान् ।
आरट्टदेशजास्तस्य तुरगा वाजिनां वराः ॥ ७ ॥
गन्धारपुत्रो धर्म्मस्तु घृतस्तस्यात्मजोऽभवत् ।
घृताच्च विदुषो जज्ञे प्रचेतास्तस्य चात्मजः ॥ ८ ॥

प्रचेतसः पुत्त्रशतं राजानः सर्व्व एव ते।
म्लेच्छराष्ट्राधिपाः सर्व्वे उदीचीन्दिशमाश्रिताः ॥९॥
अनोश्चैव सुता वीरास्त्रयः परमधार्म्मिकाः।
सभानरश्चाक्षुषश्च परमेषु स्तथैव च ॥१०॥
सभानरस्य पुत्त्रस्तु विद्वान् कोलाहलो नृपः।
कोलाहलस्य धर्म्मात्मा सञ्जयो नाम विश्रुतः ॥११॥
सञ्जयस्याभवत् पुत्त्रो वीरो नाम पुरञ्जयः।
जनमेजयो महाराज! पुरञ्जय सुतोऽभवत् ॥१२॥
जनमेजयस्य राजर्षे महाशालोऽभवत् सुतः।
आसीदिन्द्रसमो राजा प्रतिष्ठितयशाभवत् ॥१३॥
महामनाः सुतस्तस्य महाशालस्य धार्म्मिकः।
सप्तद्वीपेश्वरो जज्ञे चक्रवर्त्ती महामनाः ॥१४॥
महामनास्तु द्वौ पुत्त्रौ जनयामास विश्रुतौ।
उशीनरञ्च धर्म्मज्ञं तितिक्षुं चैव तावुभौ ॥१५॥
उशीनरस्य पत्न्यस्तु पञ्च राजर्षिसम्भवाः।
भृशा कृशा नवा दर्शा या च देवी दृषद्वती ॥१६॥
उशीनरस्य पुत्त्रास्तु तासु जाताः कुलोद्वहाः।
तपसा ते तु महता जाता वृद्धस्य धार्म्मिकाः ॥१७॥
भृशायास्तु नृगः पुत्त्रो नवायान्नव एव च।
कृशायास्तु कृशो जज्ञे दर्शायाः सुव्रतोऽभवत्।
दृषद्वत्याः सुतश्चापि शिविरौशीनरो नृपः ॥१८॥
शिवेस्तु शिवयः पुत्त्राश्चत्वारो लोकविश्रुताः॥
पृथुदर्भः सुवीरश्च केकयो भद्रकस्तथा ॥१९॥
तेषां जनपदा स्फीताः केकया भद्रकास्तथा।

सौवीराश्चैव पौराश्च नृगस्य केकयास्तथा ॥ २० ॥
सुव्रतस्य तथाम्बष्ठा कृमस्य कृमिला पुरी ।
नवस्य नवराष्ट्रन्तु तितिक्षोस्तु प्रजां शृणु ॥ २१ ॥
तितिक्षुरभवद्राजा पूर्वस्यां दिशि विश्रुतः ।
वृषद्रथः सुतस्तस्य तस्य सेनोऽभवत्सुतः ॥ २२ ॥
सेनस्य सुतपा जज्ञे सुतपस्तनयो बलिः ।
जातो मानुषयोन्यान्तु क्षीणे वंशे प्रजेच्छया ॥ २३ ॥
महायोगी तु स बलिर्बद्धो यो महात्मना ।
पुत्रानुत्पादयामास चैत्रजान् पञ्च पार्थिवान् ॥ २४ ॥
अङ्गं स जनयामास वङ्गं सुह्मं तथैव च ।
पुण्ड्रं कलिङ्गं च तथा बालेयं क्षेत्रमुच्यते ।
बालेया ब्राह्मणाश्चैव तस्य वंशकराः प्रभोः ॥ २५ ॥
बलेश्च ब्रह्मणा दत्तो वरः प्रीतेन धीमतः ।
महायोगित्वमायुश्च कल्पस्य परिमाणकम् ॥ २६ ॥
संग्रामे चाप्यजेयत्वं धर्मे चैवोत्तमा मतिः ।
त्रैकाल्यदर्शनं चैव प्राधान्यं प्रसवे तथा ॥ २७ ॥
जयश्चाप्रतिमं युद्धे धर्मे तत्त्वार्थदर्शनम् ।
चतुरो नियतान् वर्णान् स वै स्थापयिता प्रभुः ॥ २८ ॥
तेषाञ्च पञ्च दायादा वङ्गाङ्गाः सुह्मकास्तथा ।
पुण्ड्राः कलिङ्गाश्च तथा अङ्गस्य तु निबोधत ॥ २९ ॥
मुनय ऊचुः । कथं बलेः सुता जाताः पञ्च तस्य महात्मनः ।
किं नाम्नो महर्षेर्यो तस्य जनिता कतमो ऋषिः ॥ ३० ॥
कथं चोत्पादिता स्तेन तन्नः प्रब्रूहि पृच्छताम् ।
माहात्म्यञ्च प्रभावञ्च निखिलेन वदस्व तत् ॥ ३१ ॥

सूत उवाच। अथोशिज इति ख्यात आसीद्विद्वानृषिः पुरा।
पत्नी वै ममता नाम बभूवास्य महात्मनः॥ ३२ ॥
उशिजस्य यवीयान् वै भ्रातृपत्नीमकामयत्।
बृहस्पतिर्महातेजा ममतामित्य कामतः॥ ३३ ॥
उवाच मम तातस्तु देवरं वरवर्णिनी।
अन्तर्वत्न्यस्मि ते भ्रातुर्ज्येष्ठस्य तु विरम्यताम्॥ ३४ ॥
अयं तु मे महाभाग! गर्भः कुक्ष्येत् बृहस्पते!।
औशिजो भ्रातृजन्यस्ते सोपाङ्गं वेदमुद्गिरन्॥ ३५ ॥
अमोघरेतास्त्वञ्चापि न मां भजितुमर्हसि।
अस्मिन्नेव गते काले यथा वा मन्यसे प्रभो!॥ ३६ ॥
एवमुक्त्वा तथा सम्यक् बृहत्तेजा बृहस्पतिः।
कामात्मा स महात्मापि न मनः सोऽभ्यवारयत्॥ ३७ ॥
सम्बभूवैव धर्मात्मा तया सार्द्धमकामया।
उत्सृजन्तं तु तद्रेतो वाचं गर्भोऽभ्यभाषत॥ ३८ ॥
भो तात! वाचामधिप! द्वयोर्नास्तीह संस्थितिः।
अमोघरेतास्त्वञ्चापि पूर्वं चाहमिहागतः॥ ३९ ॥
सोऽशपत्तं ततः क्रुद्ध एवमुक्तो बृहस्पतिः।
पुत्रं ज्येष्ठस्य वै भ्रातुर्गर्भस्थं भगवानृषिः॥ ४० ॥
यस्मात्त्वमीदृशे काले गर्भस्थोऽपि निषेधसि।
मामेव मुक्तवांस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि॥ ४१ ॥
ततो दीर्घतमा नाम शापादृषिरजायत।
अतोऽशजोबृहत्कीर्तिर्बृहस्पतिरिवौजसा॥ ४२ ॥
ऊर्द्ध्वरेतास्ततोऽसौ वै वसते भ्रातुराश्रमे।
स धर्मान् सौरभेयांश्च वृषभाच्छ्रुतवांस्ततः॥ ४३ ॥

तस्य भ्राता पितृव्योऽयमकार भरणन्तदा ।
तस्मिन्निव सतस्तस्य यदृच्छयैवागतोऽवृषः ॥ ४४ ॥
यज्ञार्थमाहृतान्दर्भांश्चखाद सुरभीसुतः ।
जग्राह तं दीर्घतमाः शृङ्गयोस्तु चतुष्पदम् ॥ ४५ ॥
तेनासौ निगृहीतश्च न चचाल पदात्पदम् ।
ततोऽब्रवीद्वृषस्तं वै मुञ्च मां बलिनां वर ! ॥ ४६ ॥
न मया सादितस्तात ! बलवांस्त्वत्समः क्वचित् ।
मम चान्यः समोवापि न हि मे बलसंख्यया ।
मुञ्च तातेति च पुनः प्रीतस्तेऽहं वरं वृणु ॥ ४७ ॥
मुञ्च तातेति च पुनः प्रीतस्तेऽहं वरं वृणु ।
एवमुक्तोऽब्रवीदेनं जीवन्मे त्वं क्व यास्यसि ।
एष त्वां न विमोक्ष्यामि परस्वादं चतुष्पदम् ॥ ४८ ॥
वृषभ उवाच । नास्माकं विद्यते तात ! पातकं स्तेयमेव च ।
भक्ष्याभक्ष्यं तथा चैव पेयापेयं तथैव च ॥ ४९ ॥
द्विपदां वहवो ह्येते धर्म एष गवां स्मृतः ।
कार्याकार्ये नवा गम्या गमनञ्च तथैव च ॥ ५० ॥
सूत उवाच । गवां धर्मन्तु वै श्रुत्वा सम्भ्रान्तस्तु विमृश्य तम् ।
भक्त्यान्नपानदानात्तु गोपतिं सम्प्रसादयन् ॥ ५१ ॥
प्रसादिते गते तस्मिन् गोधर्मं भक्तितस्तु सः ।
मनसैव समादध्यौ तन्निष्ठस्तत्परोऽपि सः ॥ ५२ ॥
ततो यवीयसः पत्नीं गौतमस्याभ्यपद्यत ।
कृतावलेपास्तां मत्वा सोऽनड्वानिव न क्षमी ॥ ५३ ॥
गोधर्मन्तु परं मत्वा स्नुषान्तामभ्यपद्यत ।
निर्भर्त्स्य चैनं वद्धा च बाहुभ्यां सम्प्रगृह्य च ॥ ५४ ॥

भार्य्यमर्थन्तु तं ज्ञात्वा माहात्म्यात्तमुवाच सा।
विपर्य्ययन्तु त्वं लब्ध्वा अनड्वानिव वर्त्तसे ॥ ५५ ॥
गम्यागम्यं न जानीषे गोधर्मात् प्रार्थयन् सुताम्।
दुर्वृत्तं त्वात्यजाम्यद्य गच्छ त्वं स्वेन कर्म्मणा ॥ ५६ ॥
काष्ठे समुद्रे प्रक्षिप्य गङ्गाम्भसि समुत्सृजत्।
यस्मात्त्वमन्धो वृद्धश्च भर्त्तव्यो दुरधिष्ठितः ॥ ५७ ॥
तमुह्यमानं वेगेन स्रोतसोऽभ्यासमागतः।
जग्राह तं स धर्मात्मा बलिर्वैरोचनिस्तदा ॥ ५८ ॥
अन्तःपुरे जुगोपैनं भक्ष्यभोज्यैश्च तर्पयन्।
प्रीतश्चैनं वरेणैव च्छन्दयामास वै बलिम् ॥ ५९ ॥
तस्माच्च स वरं वव्रे पुत्रार्थे दानवर्षभः।
सन्तानार्थं महाभाग! भार्य्यायां मम मानद!।
पुत्रान् धर्मार्थतत्त्वज्ञानुत्पादयितुमर्हसि ॥ ६० ॥
एवमुक्तोऽथ देवर्षि तथास्त्वित्युक्तवान् प्रभुः।
स तस्य राजा स्वां भार्य्यां सुदेष्णां नाम प्राहिणोत्।
अन्धं वृद्धञ्च तं ज्ञात्वा न सा देवी जगाम ह ॥ ६१ ॥
शूद्रान्धात्रेयिकां तस्मै भर्त्स्याय प्राहिणोत्तदा।
तस्यां काक्षीवदादींश्च शूद्रयोनावृषिर्वशी ॥ ६२ ॥
जनयामास धर्मात्मा शूद्रानित्येवमादिकम्।
उवाच तं बली राजा दृष्ट्वा काक्षीवदादिकान् ॥ ६३ ॥
राजोवाच। प्रवीणानृषिधर्म्मस्य चेश्वरान् ब्रह्मवादिनः।
विद्वान् प्रत्यक्षधर्माणां बुद्धिमान् हरिमान् शुचीन् ॥ ६४ ॥
ममैवचेति होवाच तं दीर्घतमसं बलिः।
नेत्युवाच मुनिस्तं वै ममैवमितिचाब्रवीत् ॥ ६५ ॥

उच्यतां शूद्रयोनौ तु भवच्छन्दे सुरोत्तम ! ।
अन्धं वृद्धञ्च मां ज्ञात्वा सुदेष्णा महिषी तव ।
प्राहिणोदवमानान्मे शूद्रां धात्रेयिकां नृप ! ॥ ६६ ॥
ततः प्रसादयामास बलिस्तमृषिसत्तमम् ।
बलिः सुदेष्णान्तां भार्यां भर्त्सयामास दानवः ॥ ६७ ॥
पुनश्चैनामलङ्कृत्य ऋषये प्रत्यपादयत् ।
तां स दीर्घतमा देवीं तथा कृतवतीं तदा ॥ ६८ ॥
दध्ना लवणमिश्रेण स्वक्तं मधुकेन तु ।
लिह्यमाम जुगुप्सन्ती आपादतलमस्तकम् ।
ततस्त्वं प्राप्स्यसे देवि ! पुत्रान् वै मनसेप्सितान् ॥ ६९ ॥
तस्य सा तद्वचो देवी सर्वं कृतवती तदा ।
तस्य चापानमासाद्य देवी परिहरत्तदा ॥ ७० ॥
तामुवाच ततः सोऽथ यत्ते परिहृतं शुभे ! ।
विना पानं कुमारन्तु जनयिष्यसि पूर्वजम् ॥ ७१ ॥
सुदेष्णोवाच । नार्हसि त्वं महाभाग ! पुत्रं मे दातुमीदृशम् ।
तोषितस्य यथाशक्त्या प्रसादं कुरु मे प्रभो ! ॥ ७२ ॥
दीर्घतमोवाच । तवापचाराद्देवेऽयं नान्यथा भविता शुभे ! ।
नैव दास्यति पुत्रस्ते पौत्रो वै दास्यते फलम् ॥ ७३ ॥
तस्यापानं विना चैव योग्यभावो भविष्यति ।
तस्माद्दीर्घतमाङ्गेषु कुक्षौ स्पृष्ट्वेदमब्रवीत् ॥ ७४ ॥
प्राशितं यद्दन्तेषु न सोपस्थं शुचिस्मिते ! ।
तेन तिष्ठन्ति ते गर्भे पौर्णमास्यामिवोडुराट् ॥ ७५ ॥
भविष्यन्ति कुमारास्ते पञ्च देवसुतोपमाः ।
तेजस्विनः सुदृप्ताश्च यज्वानो धार्मिकाश्च ते ॥ ७६ ॥

सूत उवाच। तदङ्गस्तु सुदेष्णायां ज्येष्ठः पुत्रो व्यजायत।
अङ्गस्तथा कलिङ्गश्च पुण्ड्रः सुह्मस्तथैव च ॥ ७७ ॥
वङ्गराजस्तु पञ्चैते बलेः पुत्राश्च क्षेत्रजाः।
इत्येते दीर्घतमसा बलेर्दत्ताः सुतास्तथा ॥ ७८ ॥
प्रतिष्ठामागतानां हि ब्राह्मण्यं कारयंस्ततः।
ततो मातृपयोन्यां स जनयामास वै प्रजाः ॥ ७९ ॥
ततस्तं दीर्घतमसं सुरभिर्वाक्यमब्रवीत्।
विचार्य यस्माद्गोधर्मं प्रमाणन्ते कृतं विभो ! ॥ ८० ॥
भक्त्या चानन्यया त्वास्तु तेन प्रीतास्मि तेऽनघ ! ।
तस्मात्तुभ्यं तमो दीर्घमाघ्रायापनुदामि वै ॥ ८१ ॥
बार्हस्पत्यस्तथैवैष पाप्मा वै तिष्ठति त्वयि।
जरां मृत्युं तमश्चैव आघ्रायापनुदामि ते ॥ ८२ ॥
सद्यः स घ्रातमात्रस्तु असितामुनिसत्तम ! ।
आयुष्मांश्च वपुष्मांश्च चक्षुष्मांश्च ततोऽभवत् ॥ ८३ ॥
गोभ्याहृतो तमश्च व गौतमस्तु ततोऽभवत्।
काक्षीवांस्तु ततो गत्वा सह पित्रा गिरिव्रजम् ॥ ८४ ॥
दृष्ट्वा सृष्ट्वा पितुः सार्धं ह्युपविष्टश्चिरन्तपः।
ततः कालेन महता तपसा भावितस्तु सः।
विधूय मानजं कायं ब्राह्मण्यं प्राप्तवान् विभुः।
ततोऽब्रवीत्पिता तं वै पुत्रवानस्म्यहं त्वया ॥ ८६ ॥
सत्पुत्रेण तु धर्मज्ञ ! कृतार्थोऽहं यशस्विना।
युक्तात्मानं ततोऽसौ वै प्राप्तवान् ब्राह्मणः स्वयम् ॥ ८७ ॥
ब्राह्मण्यं प्राप्य काक्षीवान् सहस्रमसृजत् सुतान्।

कौमाण्डा गौतमाश्चैव स्मृताः काक्षीवतः सुताः ॥८८॥
इत्येष दीर्घतमसो बलेर्वैरोचनस्य च ।
समागमो वः कथितः सन्ततिश्चोभयोस्तथा ॥ ८९ ॥
बलिस्तानभिषिच्याह पञ्च पुत्रान् कल्मषान् ।
कृतार्थः सोऽपि धर्मात्मा योगमायावृतः स्वयम् ॥९०॥
अदृश्यः सर्वभूतानां कालापेक्षः स वै प्रभुः ।
तत्राङ्गस्य तु दायादो राजासीद्दधिवाहनः ॥ ९१ ॥
दधिवाहनपुत्रस्तु राजा दिविरथः स्मृतः ।
आसीद्दिविरथापत्यं विद्वान् धर्मरथो नृपः ॥ ९२ ॥
स हि धर्मरथः श्रीमांस्तेन विष्णुपदे गिरौ ।
सोमः शुक्रेण वै राज्ञा सह पीतो महात्मना ॥ ९३॥
अथ धर्मरथस्याभूत् पुत्रश्चित्ररथः किल ।
तस्य सत्यरथः पुत्रस्तस्माद्दशरथः किल ॥ ९४ ॥
लोमपाद इति ख्यातस्तस्य शान्ता सुताभवत् ।
अथ दाशरथिर्वीरश्चतुरङ्गो महायशाः ॥ ९५ ॥
ऋष्यशृङ्गप्रसादेन जज्ञे स्वकुलवर्धनः ।
चतुरङ्गस्य पुत्रस्तु पृथुलाक्ष इति स्मृतः ॥ ९६ ॥
पृथुलाक्षसुतश्चापि चम्पनामा बभूव ह ।
चम्पस्य तु पुरी चम्पा पूर्वं या मालिनीऽभवत् ॥ ९७॥
पूर्णभद्रप्रसादेन हर्यङ्गोऽस्य सुतोऽभवत् ।
जज्ञे विभाण्डकाच्चास्य वारणः शत्रुवारणः ॥९८ ॥
अवतारयामास महीं मन्त्रैर्वाहनमुत्तमम् ।
हर्यङ्गस्य तु दायादो जातो भद्ररथः किल ॥ ९९ ॥
अथ भद्ररथस्यासीत् बृहत्कर्मा जनेश्वरः ।

बृहद्भानुः सुतस्तस्य तस्माज्जज्ञे महात्मवान् ॥ १०० ॥
बृहद्भानुस्तु राजेन्द्रो जनयामास वै सुतम्।
नाम्ना जयद्रथं नाम तस्मात् बृहद्रथो नृपः ॥ १०१ ॥
आसीद्बृहद्रथाच्चैव विश्वजिज्जनमेजयः।
दायादस्तस्य चाङ्गो वै तस्मात् कर्णोऽभवन्नृपः ॥ १०२ ॥
कर्णस्य वृषसेनस्तु पृथुसेनस्तथात्मजः।
एतेऽङ्गस्यात्मजाः सर्वे राजानः कीर्तिता मया।
विस्तरेणानुपूर्व्याच्च पूरोंस्तु शृणुत द्विजाः ! ॥ १०३ ॥
ऋषय ऊचुः। कथं सूतात्मजः कर्णः कथमङ्गस्य चात्मजः।
एतदिच्छामहे श्रोतुमत्यन्तकुशलो ह्यसि ॥ १०४ ॥
सूत उवाच। बृहद्भानुसुतो जज्ञे राजा नाम्ना बृहन्मनाः।
तस्य पत्नीद्वयं ह्यासीच्चैद्यस्य तनये शुभे।
यशोदेवी च सत्या च तयोर्वंशञ्च मे शृणु ॥ १०५ ॥
जयद्रथन्तु राजानं यशोदेवी ह्यजीजनत्।•
सा बृहन्मनसः सत्या विजयं नाम विश्रुतम् ॥ १०६ ॥
विजयस्य बृहत्पुत्रस्तस्य पुत्रो बृहद्रथः।
बृहद्रथस्य पुत्रस्तु सत्यकर्मा महामनाः ॥ १०७ ॥
सत्यकर्मणोऽधिरथः सूतश्चाधिरथः स्मृतः।
यः कर्णं प्रतिजग्राह ततो न कर्णस्तु सूतजः।
तच्चैतत्सर्वमाख्यातं कर्णं प्रति यथोदितम् ॥ १०८ ॥

---

## ऊनपञ्चाशत्तमोऽध्यायः।

पूरोः पुत्रो महातेजा राजा स जनमेजयः।
प्राचीन्वतः सुतस्तस्य यः प्राचीमकरोद्दिशम् ॥ १ ॥

प्राचीनतस्य तनयोमनस्युश्च तथाभवत् ।
राजा पीतायुधो नाम मनस्योरभवत् सुतः ॥ २ ॥
दायादस्तस्य चाप्यासीद् धुन्धुर्नाम महीपतिः ।
धुन्धोर्बहुविधः पुत्रः सम्पातिस्तस्य चात्मजः ॥ ३ ॥
सम्पातेस्तु रहंवर्चा भद्राश्वस्तस्य चात्मजः ।
भद्राश्वस्य घृतायां तु दशाप्सरसि सूनवः ॥ ४ ॥
औचेयुश्च हृषेयुश्च कक्षेयुश्च सनेयुकः ।
घृतेयुश्च विनेयुश्च स्थलेयुश्चैव सत्तमः ॥ ५ ॥
धर्मेयुः सन्नतेयुश्च पुण्येयुश्चेति ते दश ।
औचेयोर्ज्वलना नाम भार्य्या वै तक्षकात्मजा ॥ ६ ॥
तस्यां स जनयामास अन्तिनारं महीपतिम् ।
अन्तिनारो मनस्विन्यां पुत्रान् जज्ञे परान् शुभान् ॥ ७ ॥
अमूर्तरयसं वीरं त्रिवनञ्चैव धार्मिकम् ।
गौरी कन्या तृतीया च मान्धातुर्जननी शुभा ॥ ८ ॥
इलिना तु यमस्यासीत्कन्या याजनयत् सुतान् ।
ब्रह्मवादपराक्रान्तांश्चतुरस्त्विलिना शुभान् ॥ ९ ॥
उपदानवी सुतान् लेभे चतुरस्त्विलिनात्मजात् ।
ऋष्यन्तमथ दुष्यन्तं प्रवीरमनघं तथा ॥ १० ॥
चक्रवर्त्ती ततो जज्ञे दुष्यन्तात् समितिञ्जयः ।
शकुन्तलायां भरतो यस्य नाम्ना च भारताः ॥ ११ ॥
दौष्यन्तिं प्रति राजानं वागूचे चाशरीरिणी ।
माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥१२॥
भर स्वपुत्रं दुष्यन्त ! मावमंस्थाः शकुन्तलाम् ।
रेतोधां नयते पुत्रः परेत यमसादनात् ।

त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ १३ ॥
भरतस्य विनष्टेषु तनयेषु पुरा किल ।
पुत्राणां मातृकात् कोपात् सुमहान् संक्षयः कृतः ॥ १४ ॥
ततो मरुद्भिरानीय पुत्रः स तु बृहस्पतेः ।
संक्रामितो भरद्वाजो मरुद्भिर्भरतस्य तु ॥ १५ ॥
ऋषय ऊचुः । भरतस्य भरद्वाजः पुत्रार्थं मारुतैः कथम् ।
संक्रामितो महातेजास्तन्नो ब्रूहि यथातथम् ॥ १६ ॥
सूत उवाच । पत्न्यामापन्नसत्त्वायामुशिजः संस्थितो भुवि ।
भ्रातुर्भार्यां स दृष्ट्वा तु बृहस्पतिरुवाच ह ॥ १७ ॥
उपतिष्ठ स्वलङ्कृत्य मैथुनाय च मां शुभे ।
एवमुक्ताऽब्रवीदेनं स्वयमेव बृहस्पतिम् ॥ १८ ॥
गर्भः परिणतश्चायं ब्रह्म व्याहरते गिरा ।
अमोघरेतास्त्वञ्चापि धर्मश्चैव विगर्हितम् ॥ १९ ॥
एवमुक्तोऽब्रवीदेनां स्वयमेव बृहस्पतिः ।
नोपदेष्टव्यो विनयस्त्वया मे वरवर्णिनि ॥ २० ॥
धर्षमाणः प्रसह्यैनां मैथुनायोपचक्रमे ।
ततो बृहस्पतिं गर्भो धर्षमाणमुवाच ह ॥ २१ ॥
सन्निविष्टो ह्यहं पूर्वमिह नाम बृहस्पते ।
अमोघरेताश्च भवान् नावकाश इह द्वयोः ॥ २२ ॥
एवमुक्तः स गर्भेण कुपितः प्रत्युवाच ह ।
यस्मात्त्वमीदृशे काले सर्वभूतेप्सिते सति ।
अभिषेधसि तस्मात्त्वं तमो दीर्घं प्रवेक्ष्यसि ॥ २३ ॥
ततः कामं सन्निवर्त्य तस्यानन्दाद् बृहस्पतेः ।
तद्रेतस्त्वपतद् भूमौ निवृत्तं शिशुकोऽभवत् ॥ २४ ॥

सद्यो जातं कुमारन्तु दृष्ट्वा तं ममताब्रवीत् ।
गमिष्यामि गृहं स्वं वै भरस्वैनं बृहस्पते ! ॥ २५ ॥
एवमुक्त्वा गता सा तु गतायां सोऽपि तं त्यजत् ।
मातापितृभ्यां त्यक्तन्तु दृष्ट्वा तं मारुतः शिशुम् ।
जगृहु स्तं भरद्वाजं मरुतः कृपया स्थिताः ॥ २६ ॥
तस्मिन् काले तु भरतो बहुभिः क्रतुभिर्विभुः ।
पुत्रनैमित्तिकैर्यज्ञैरयजत् पुत्रलिप्सया ॥ २७ ॥
यदा स यजमानस्तु पुत्रं नासादयत प्रभुः ।
ततः क्रतुं मरुत्सोमं पुत्रार्थे समुपाहरत् ॥ २८ ॥
तेन ते मरुतस्तस्य मरुत्सोमेन तुष्टुवुः ।
उपनिन्युर्भरद्वाजं पुत्रार्थं भरताय वै ॥ २९ ॥
दायादोऽङ्गिरसः सूनो रौरसस्तु बृहस्पतेः ।
संक्रामितो भरद्वाजो मरुद्भिर्भरतं प्रति ॥ ३० ॥
भरतस्तु भरद्वाजं पुत्रं प्राप्य विभुर्ब्रवीत् ।
आदावात्महिताय त्वं कृतार्थोऽहं त्वया विभो ! ॥३१॥
पूर्वन्तु वितथे तस्मिन् कृते वै पुत्रजन्मनि ।
ततस्तु वितथो नाम भरद्वाजो नृपोऽभवत् ॥ ३२ ॥
तस्मादपि भरद्वाजाद् ब्राह्मणाः क्षत्रिया भुवि ।
द्व्यामुष्यायणकौलीनाः स्मृतास्ते द्विविधेन च ॥३३॥
ततो जाते हि वितथे भरतश्च दिवं ययौ ।
भरद्वाजो दिवं यातो ह्यभिषिच्य सुतं ऋषिः ॥२४॥
दायादो वितथस्यासीद्भुवमन्युर्महायशाः ।
महाभूतोपमाः पुत्राश्चत्वारो भुवमन्यवः ॥३५॥
बृहत्क्षत्रो महावीर्यो नरो गर्गश्च वीर्यवान् ।

नरस्य संकृतिः पुत्रस्तस्य पुत्रौ महायशाः ॥ ३६ ॥
गुरुधीरन्तिदेवश्च सतकृत्यान्तावुभौ स्मृतौ।
गर्गस्य चैव दायादः शिर्विविद्वानजायत ॥ ३७ ॥
स्मृताः शैब्यास्ततो गर्गाः क्षत्रोपेता द्विजातयः।
आहार्यतनयश्चैव धीमानासीदुरुक्षवः ॥ ३८ ॥
तस्य भार्या विशाला तु सुषुवे पुत्रकत्रयम्।
त्र्यारुणं पुष्करिं चैव कविं चैव महायशाः ॥ ३९ ॥
उरुक्षवाः स्मृता ह्येते सर्वे ब्राह्मणतां गताः।
काव्यानान्तु वरा ह्येते त्रयः प्रोक्ता महर्षयः ॥ ४० ॥
गर्गाः संकृतयः काव्याः क्षत्रोपेता द्विजातयः।
सम्भृताङ्गिरसो दक्षाः बृहत्क्षत्रस्य च क्षितिः ॥ ४१ ॥
बृहत्क्षत्रस्य दायादो हस्तिनामा बभूव ह।
तेनेदं निर्मितं पूर्वं पुरन्तु गजसाह्वयम् ॥ ४२ ॥
हस्तिनश्चैव दायादास्त्रयः परमकीर्तयः।
अजमीढो द्विमीढश्च पुरुमीढस्तथैव च ॥ ४३ ॥
अजमीढस्य पत्न्यस्तु तिस्रः कुरुकुलोद्वहाः।
नीलिनी धूमिनी चैव केशिनी चैव विश्रुताः ॥ ४४ ॥
स तासु जनयामास पुत्रान् वै देववर्चसः।
तपसोऽन्ते महातेजा जाता वृद्धस्य धार्मिकाः ॥ ४५ ॥
भारद्वाजप्रसादेन विस्तरं तेषु मे शृणु।
अजमीढस्य केशिन्यां कण्वः समभवत्किल ॥ ४६ ॥
मेधातिथिः सुतस्तस्य तस्मात्काण्वायना द्विजाः।
अजमीढस्य धूमिन्यां जज्ञे बृहदनुर्नृपः ॥ ४७ ॥
बृहदनोर्बृहन्तोऽथ बृहन्तस्य बृहन्मनाः।

बृहत्मनः सुतश्चापि बृहद्धनुरिति श्रुतः ॥ ४८ ॥
बृहद्धनोर्बृहदिषुः पुत्रस्तस्य जयद्रथः ।
अश्वजित्तनयस्तस्य सेनजित्तस्य चात्मजः ॥ ४९ ॥
अथ सेनजितः पुत्राश्चत्वारो लोकविश्रुताः ।
रुचिराश्वश्च काव्यश्च राजा दृढरथस्तथा ॥ ५० ॥
वत्सश्चावर्त्तको राजा यस्यैते परिवत्सकाः ।
रुचिराश्वस्य दायादः पृथुसेनो महायशाः ॥ ५१ ॥
पृथुसेनस्य पौरस्तु पौरान्नीपोऽथ जज्ञिवान् ।
नीपस्यैकशतन्त्वासीत् पुत्राणाममितौजसाम् ॥ ५२ ॥
नीपा इति समाख्याता राजानः सर्वएव ते ।
तेषां वंशकरः श्रीमान् नीपानां कीर्त्तिवर्द्धनः ॥ ५३ ॥
काव्याच्च समरो नाम सदेष्टसमरोऽभवत् ।
समरस्य पारसम्पारौ सदश्व इति ते त्रयः ॥ ५४ ॥
पुत्राः सर्वगुणोपेता जाता वै विश्रुता भुवि ।
पारपुत्रः पृथुर्जातः पृथोस्तु सुकृतोऽभवत् ॥ ५५ ॥
जज्ञे सर्वगुणोपेतो विभ्राजस्तस्य चात्मजः ।
विभ्राजस्य तु दायादस्त्वणुहो नाम वीर्य्यवान् ॥ ५६ ॥
बभूव शुकजामाता कृत्वीभर्त्ता महायशाः ।
अणुहस्य तु दायादो ब्रह्मदत्तो महीपतिः ॥ ५७ ॥
युगदत्तः सुतस्तस्य विष्वक्सेनो महायशाः ।
विभ्राजः पुनराजातः सुकृतेनेह कर्म्मणा ॥ ५८ ॥
विष्वक्सेनस्य पुत्रस्तु उदक्सेनो बभूव ह ।
भल्लाटस्तस्य पुत्रस्तु तस्यासीज्जनमेजयः ।
उग्रायुधेन तस्यार्थे सर्वे नीपाः प्रणाशिताः ॥ ५९ ॥

ऋषय ऊचुः । उग्रायुधः कस्य सुतः कस्य वंशे स कथ्यते ।
किमर्थं तेन ते नीपाः सर्वे चैव प्रणाशिताः ॥ ६० ॥
सूत उवाच । उग्रायुधः सूर्य्यवंश्यस्तपस्तेपे वराश्रमे ।
स्थाणुभूतोऽष्टसाहस्रन्तं भेजे जनमेजयः ॥ ६१ ॥
तस्य राज्यं प्रतिगृह्य नीपानाजघ्निवान् प्रभुः ।
उवाच सान्त्वं विविधं जघ्नुस्ते तै ह्यभावपि ॥ ॥६२॥
हन्यमाना मतानूचे यस्माद्धेतोर्न मे वचः ।
शरणागत रक्षार्थं तस्मादेवं शपाम्यवः ॥ ६३ ॥
यदि मेऽस्ति तपस्तस्मं सर्वान्नयतु वो यमः ।
ततस्तान् कृष्यमाणांस्तु यमेन पुरतः स तु ॥ ६४ ॥
कृपया पर्य्याविष्टो जनमेजय मूचिवान् ।
शतानेतानिमान् वीरांस्त्वं मे रक्षितुमर्हसि ॥ ६५ ॥

जनमेजय उवाच ।

अरे पापा ! दुराचारा ! भवितारोऽस्य किङ्कराः ।
तथेत्युक्त्वा ततो राजा यमेन युयुधे चिरम् ॥ ६६ ॥
व्याधिभिर्नारकैर्घोरैर्यमेन सह तान् बलात् ।
विजित्य मनये प्रादात्तदद्भुतमिवाऽभवत् ॥ ६७ ।
यमस्तुष्टस्ततस्तस्मै मुक्तिज्ञानं ददौ परम् ।
सर्वे यथोचितं कृत्वा जग्मुस्ते कृष्णमव्ययम् ॥ ६८ ॥
येषान्तु चरितं श्रुत्वा हन्यन्ते नापमृत्युभिः ।
इह लोके परे चैव सुखमक्षय्यमश्नुते ॥ ६९ ॥
अजमीढस्य धूमिन्यां विद्वान् जज्ञे यवो नरः ।
धृतिमांस्तस्य पुत्रस्तु तस्य सत्यधृतिः सुतः ।
अथ सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान् ॥ ७० ॥

दृढनेमिसुतश्चापि सुधर्मा नाम पार्थिवः ।
आसीत् सुधर्मतनयः सार्वभौमः प्रतापवान् ॥ ७१ ॥
सार्वभौमेति विख्यातः पृथिव्यामेकराट्‌विभौ ।
तस्यान्ववाये महति महापौरवनन्दनः ॥ ७२ ॥
महापौरवपुत्रस्तु राजा रुक्मरथः स्मृतः ।
अथ रुक्मरथस्यासीत् सुपार्श्वो नाम पार्थिवः ॥ ७३ ॥
सुपार्श्वतनयश्चापि सुमतिर्नाम धार्मिकः ।
सुमतेरपि धर्मात्मा राजा सन्नतिमानपि ॥ ७४ ॥
तस्यासीत् सन्नतिमतः कृतो नाम सुतो महान् ।
हिरण्यनाभिनः शिष्यः कौशल्यस्य महात्मनः ॥ ७५ ॥
चतुर्विंशतिधा येन प्रोक्ता वै सामसंहिताः ।
स्मृतास्ते प्राच्यसामानः कार्ता नामेह सामगाः ॥ ७६ ॥
कार्तिरुग्रायुधः सो वै महापौरववर्द्धनः ।
बभूव येन विक्रम्य पृषतस्य पिता हतः ॥ ७७ ॥
नीलो नाम महाराजः पञ्चालाधिपतिर्वशी ।
उग्रायुधस्य दायादः क्षेमो नाम महायशाः ॥ ७८ ॥
क्षेमात् सुनीथः संजज्ञे सुनीथस्य नृपञ्जयः ।
नृपञ्जयाच्च विरथ इत्येते पौरवाः स्मृताः ॥ ७९ ॥

---

## पञ्चाशत्तमोऽध्यायः ।

सूत उवाच । अजमीढस्य नीलिन्यां नीलः समभवन्नृपः ।
नीलस्य तपसोग्रेण सुशान्तिरुपपद्यत ॥ १ ॥
पुरुजानुः सुशान्तेस्तु पृथुस्तु पुरुजानुतः ।
भद्राश्वः पृथुदायादो भद्राश्वतनयान् शृणु ॥ २ ॥

मुद्गलश्च जयश्चैव राजा बृहदिषु स्तथा ।
यवीनरश्च विक्रान्तः कपिलश्चैव पञ्चमः ॥ ३ ॥
पञ्चानाञ्चैव पञ्चालानेतान् जनपदान् विदुः ।
पञ्चालं रक्षिणो ह्येते देशानामिति नः श्रुतम् ॥ ४ ॥
मुद्गलस्यापि मौद्गल्याः क्षत्रोपेता द्विजातयः ।
एते ह्यङ्गिरसः पक्षं संश्रिताः काण्वमुद्गलाः ॥ ५ ॥
मुद्गलस्य सुतो जज्ञे ब्रह्मिष्ठः सुमहायशाः ।
इन्द्रसेनः सुतस्तस्य विन्ध्याश्वस्तस्य चात्मजः ॥ ६ ॥
विन्ध्याश्वान्मिथुनं जज्ञे मेनकायामिति श्रुतिः ।
दिवोदासश्च राजर्षिरहल्या च यशस्विनी ॥ ७ ॥
शरद्वतस्तु दायादमहल्या समसूयत ।
शतानन्दमृषिश्रेष्ठं तस्यापि सुमहातपाः ॥ ८ ॥
सुतः सत्यधृतिर्नाम धनुर्वेदस्य पारगः ।
आसीत् सत्यधृतेः शुक्रममोघं धार्मिकस्य तु ॥ ९ ॥
स्कन्नं रेतः सत्यधृतेर्दृष्ट्वा चाप्सरसं जले ।
मिथुनं तत्र सम्भूतं तस्मिन् सरसि सम्भृतम् ॥१०॥
ततः सरसि तस्मिंस्तु क्रममाणं महीपतिः ।
दृष्ट्वा जग्राह कृपया शन्तनुर्मृगयां गतः ॥ ११ ॥
एते शरद्वतः पुत्रा आख्याता गौतमा वराः ।
अत ऊर्ध्वं प्रवक्ष्यामि दिवोदासस्य वै प्रजाः ॥१२ ॥
दिवोदासस्य दायादो धर्मिष्ठो मित्रयुर्नृपः ।
मैत्रायणा वरः सोऽथ मैत्रेयस्तु ततः स्मृतः ॥ १३ ॥
एते वंशा यतेः पक्षाः क्षत्रोपेतास्तु भार्गवाः ।
राजा चैद्यवरो नाम मैत्रेयस्य सुतः स्मृतः ॥ १४ ॥

अथ चैद्यवरात् विद्वान् सुदासस्तस्य चात्मजः ।
अजमीढः पुनर्जातः क्षीणे वंशे तु सोमकः ॥ १५ ॥
सोमकस्य सुताजन्तुर्हते तस्मिन् शतं बभौ ।
पुत्राणामजमीढस्य सोमकस्य महात्मनः ॥ १६ ॥
महिषीत्वजमीढस्य धूमिनी पुत्रवर्धिनी ।
पुत्राभावे तपस्तेपे शतं वर्षाणि दुश्चरम् ॥ १७ ॥
हुत्वाग्निं विधिवत् सम्यक् पवित्रीकृतभोजना ।
अग्निहोत्रक्रमेणैव सा सुष्वाप महाव्रता ॥ १८ ॥
तस्यां वै धूमवर्णायामजमीढः समीयिवान् ।
ऋक्षं सा जनयामास धूमवर्णं शताग्रजम् ॥ १९ ॥
ऋक्षात् संवरणो जज्ञे कुरुः संवरणात्ततः ।
यः प्रयागमतिक्रम्य कुरुक्षेत्रमकल्पयत् ॥ २० ॥
कृष्यतस्तु महाराजो वर्षाणि सुबहून्यथ ।
कृष्यमाणस्ततः शक्रो भयात्तस्मै वरन्ददौ ॥ २१ ॥
पुण्यञ्च रमणीयञ्च कुरुक्षेत्रन्तु तत् स्मृतम् ।
तस्यान्ववायः सुमहान् यस्य नाम्ना तु कौरवाः ॥ २२ ॥
कुरोस्तु दयिताः पुत्राः सुधन्वा जह्नुरेव च ।
परीक्षिच्च महातेजाः प्रजनश्चारिमर्दनः ॥ २३ ॥
सुधन्वनस्तु दायादः पुत्रो मतिमतां वरः ।
च्यवनस्तस्य पुत्रस्तु राजा धर्मार्थतत्त्ववित् ॥ २४ ॥
च्यवनस्य कृमिः पुत्र ऋक्षात् जज्ञे महातपाः ।
कृमेः पुत्रो महावीर्यः ख्यात इन्द्रसमो विभुः ॥ २५ ॥
चैद्यो परिचरो वीरो वसुर्नामान्तरिक्षगः ।
चैद्यो परिचराज्जज्ञे गिरिका सप्त वै सुतान् ॥ २६ ॥

महारथो मगधराट् विश्रुतो यो बृहद्रथः ।
प्रत्यश्रवाः कुशश्चैव चतुर्थो हरिवाहनः ॥ २७ ॥
पञ्चमश्च यजुश्चैव मत्स्यः काली च सप्तमी ।
बृहद्रथस्य दायादः कुशाग्रो नाम विश्रुतः ॥ २८ ॥
कुशाग्रस्यात्मजश्चैव वृषभो नाम वीर्यवान् ।
वृषभस्य तु दायादः पुष्पवान् नाम पार्थिवः ॥२९॥
पुष्पः पुष्पवतश्चैव राजा सत्यधृतिस्ततः ।
दायादस्तस्य धनुषस्तस्मात् सर्वश्च जज्ञिवान् ॥ ३० ॥
सर्वस्य सम्भवः पुत्रस्तस्माद्राजा बृहद्रथः ।
द्वे तस्य शकले जाते जरया सन्धितश्च सः ॥ ३१ ॥
जरया सन्धितो यस्माज्जरासन्धस्ततः स्मृतः ।
जेता सर्वस्य क्षत्रस्य जरासन्धो महाबलः ॥ ३२ ॥
जरासन्धस्य पुत्रस्तु सहदेवः प्रतापवान् ।
सहदेवात्मजः श्रीमान् सोमवित्स महातपाः ॥ ३३ ॥
श्रुतश्रवास्तु सोमाद्वै मागधाः परिकीर्तिताः ।
अक्रुस्त्वजनयत् पुत्रं सुरथं नाम भूमिपम् ॥ ३४ ॥
सुरथस्य तु दायादो वीरो राजा विदूरथः ।
विदूरथसुतश्चापि सार्वभौम इति स्मृतः ॥ ३५ ॥
सार्वभौमात् जयत्सेनो रुचिरस्तस्य चात्मजः ।
रुचिरात्तु ततो भौमस्त्वरितायुस्ततोऽभवत् ॥ ३६ ॥
अक्रोधनस्त्वायुसुतस्तस्माद्देवातिथिः स्मृतः ।
देवातिथेस्तु दायादो दक्ष एव बभूव ह ॥ ३७ ॥
भीमसेनस्ततो दक्षात् दिलीपस्तस्य चात्मजः ।

अश्वस्य याजिनः कश्चित् शापात्तस्य महात्मनः ।
पौर्णमासेन हविषा इष्ट्वा तस्मिन् प्रजापतिम् ।
स वैशम्पायनेनैव प्रविशन् वारितस्ततः ॥ ६२ ॥
परीक्षितः सुतः सोऽथ पौरवो जनमेजयः ।
द्विरश्वमेधमाहृत्य महावाजसनेयकः ॥ ६३ ॥
प्रवर्तयित्वा तं सर्वं ऋषिं वाजसनेयकम् ।
विवादे ब्राह्मणैः सार्धमभिशप्तो वनं ययौ ॥ ६४ ॥
जनमेजयाच्छतानीकस्तस्माज्जज्ञे स वीर्यवान् ।
जनमेजयः शतानीकं पुत्रं राज्येऽभिषिक्तवान् ॥ ६५ ॥
अथाश्वमेधेन ततः शतानीकस्य वीर्यवान् ।
जज्ञेऽधिसोमकृष्णाख्यः साम्प्रतं यो महायशाः ॥ ६६ ॥
तस्मिन् शासति राष्ट्रे तु युष्माभिरिदमाहृतम् ।
दुरापं दीर्घसत्रं वै त्रीणि वर्षाणि पुष्करे ।
वर्षद्वयं कुरुक्षेत्रे दृषद्वत्यां द्विजोत्तमाः ॥ ६७ ॥
मुनय ऊचुः । भविष्यं श्रोतुमिच्छामः प्रजानां लोमहर्षण ।
पुरा किल यदेतद्वै व्यतीतं कीर्तितं त्वया ॥ ६८ ॥
येषु वै स्थास्यते क्षत्रं उत्पत्स्यन्ते नृपाश्च ये ।
तेषामायुः प्रमाणञ्च नामतश्चैव तान् नृपान् ॥ ६९ ॥
कृतयुगप्रमाणञ्च त्रेताद्वापरयोस्तथा ।
कलियुगप्रमाणञ्च युगदोषं युगक्षयम् ॥ ७० ॥
सुखदुःखप्रमाणञ्च प्रजादोषं युगस्य तु ।
एतत्सर्वं प्रसंख्याय पृच्छतां ब्रूहि नः प्रभो ॥ ७१ ॥
सूत उवाच । यथा मे कीर्तितं पूर्वं व्यासेनाक्लिष्टकर्मणा ।
भाव्यं कलियुगञ्चैव तथा मन्वन्तराणि च ॥ ७२ ॥

अनागतानि सर्व्वाणि ब्रुवतो मे निबोधत।
अत ऊर्द्ध्वं प्रवक्ष्यामि भविष्या ये नृपा स्तथा ॥ ७३ ॥
ऐक्ष्वाकान्वये चैव पौरवे चान्वये तथा।
येषु संस्थास्यते तच्च ऐक्ष्वाकुकुलं शुभम्।
तान् सर्वान् कीर्त्तयिष्यामि भविष्ये कथितान्नृपान् ॥ ७४
तेभ्योऽपरेऽपि ये त्वन्ये ह्युत्पत्स्यन्ते नृपाः पुनः।
क्षत्राः पारशवाः शूद्रा स्तथान्ये ये महीश्वराः ॥ ७५ ॥
अन्धाः शकाः पुलिन्दाश्च चूलिका यवना स्तथा।
कैवर्त्ताभीरशवरा ये चान्ये म्लेच्छसम्भवाः।
पर्य्यायतः प्रवक्ष्यामि नामतश्चैव तान्नृपान् ॥ ७६ ॥
अधिसोमकृष्णश्चैतेषां प्रथमं वर्त्तते नृपः।
तस्यान्ववाये वक्ष्यामि भविष्ये कथितान्नृपान् ॥ ७७ ॥
अधिसोमकृष्णपुत्रस्तु विवक्षुर्भविता नृपः।
गङ्गया तु हृते तस्मिन् नगरे नागसाह्वये ॥ ७८ ॥
त्यक्ता विवक्षुर्नगरं कौशाम्ब्यान्तु निवत्स्यति।
भविष्याष्टौ सुतास्तस्य महाबलपराक्रमाः ॥ ७९ ॥
भूरिर्ज्येष्ठः सुतस्तस्य तस्य चित्ररथः स्मृतः।
शुचिद्रवश्चित्ररथात् वृष्णिमांश्च शुचिद्रवात् ॥ ८० ॥
वृष्णिमतः सुषेणश्च भविष्यति शुचिर्नृपः।
तस्मात् सुषेणात् भविता सुनीथो नाम पार्थिवः ॥ ८१ ॥
नृपात् सुनीथाद्भविता नृचक्षुः सुमहायशाः।
नृचक्षुषस्तु दायादो भविता वै सुखीबलः ॥ ८२ ॥
सुखीबलसुतश्चापि भावी राजा परिप्लवः।
परिप्लवसुतश्चापि भविता सुतपा नृपः ॥ ८३ ॥

मेधावी तस्य दायादो भविष्यति न संशयः ।
मेधाविनः सुतश्चापि भविष्यति पुरञ्जयः ॥ ८४ ॥
उर्वोभाव्यः सुतस्तस्य तिग्मात्मा तस्य चात्मजः ।
तिग्मात् वृहद्रथो भाव्यो वसुदामा वृहद्रथात् ॥ ८५ ॥
वसुदाम्नः शतानीको भविष्योदयनस्ततः ।
भविष्यति च दयनात् वीरो राजा वहीनरः ॥ ८६ ॥
वहीनरात्मजश्चैव दण्डपाणिर्भविष्यति ।
दण्डपाणे र्निरामित्रो निरामित्रात्तु क्षेमकः ॥ ८७ ॥
अत्रानुवंशश्लोकोऽयं गीतो विप्रैः पुरातनैः ।
ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं संस्थास्यति कलौ युगे ॥ ८८ ॥
इत्येष पौरवो वंशो यथावदिह कीर्त्तितः ।
धीमतः पाण्डुपुत्रस्य अर्जुनस्य महात्मनः ॥ ८९ ॥

---

अथ एकपञ्चाशत्तमोऽध्यायः ।

ऋषय ऊचुः । ये पूज्यास्तु द्विजातीनामग्नयः सूत ! सर्वदा
तानिदानीं समाचक्ष्व तद्वंशं चानुपूर्वशः ॥ १ ॥
सूत उवाच । योऽसावग्निरभीमानी स्मृतः स्वायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्रस्तस्मात् स्वाहा व्यजीजनत् ॥ २ ॥
पावकं पवमानञ्च शुचिरग्निश्च यः स्मृतः ।
निर्मथ्यः पवमानोऽग्निर्वैद्युतः पावकात्मजः ॥ ३ ॥
शुचिरग्निः स्मृतः सौरः स्थावराश्चैव ते स्मृताः ।
पवमानात्मजो ह्यग्निर्हव्यवाहः स उच्यते ॥ ४ ॥
पावकिः सहरक्षस्तु हव्यवाहमुखः शुचिः ।

देवानां हव्यवाहोऽग्निः प्रथमो ब्रह्मणः सुतः ॥५॥
सहरक्षः सुराणान्तु त्रयाणान्ते त्रयोऽग्नयः।
एतेषां पुत्रपौत्राश्च चत्वारिंशत्तथैव च ॥ ६ ॥
प्रवक्ष्ये नामतस्तान्वै प्रविभागेन तान् पृथक्।
पावनो लौकिको ह्यग्निः प्रथमो ब्रह्मणश्च यः ॥ ७ ॥
ब्रह्मौदनाग्निस्तत् पुत्रो भरतो नाम विश्रुतः।
वैश्वानरो हव्यवाहो वहन् हव्यं ममार सः ॥ ८ ॥
स मृतोऽथर्वणः पुत्रो मथितः पुष्करोदधिः।
योऽथर्वा लौकिको ह्यग्निर्दक्षिणाग्निः स उच्यते ॥ ९ ॥
भृगोः प्रजायताथर्वा ह्यङ्गिराथर्वणः स्मृतः।
तस्य ह्यलौकिको ह्यग्निर्दक्षिणाग्निः स वै स्मृतः ॥१०॥
अथ यः पवमानस्तु निर्मथ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः ॥ ११ ॥
ततः सभ्यावसथ्यौ च संशत्यास्तौ सुतावुभौ।
ततः षोडश नद्यस्तु चकमे हव्यवाहनः।
यः खल्वाहवनीयोऽग्निरभिमानी द्विजैः स्मृतः ॥ १२ ॥
कावेरीं कृष्णवेणीञ्च नर्मदां यमुनां तथा।
गोदावरीं वितस्ताञ्च चन्द्रभागामिरावतीम् ॥ १३ ॥
विपाशां कौशिकीञ्चैव शतद्रूं शरयूं तथा।
सीतां मनस्विनीञ्चैव ह्रादिनीं पावनां तथा ॥ १४ ॥
तासु षोडशधात्मानं प्रविभज्य पृथक् पृथक्।
तदा तु विहरंस्तासु धिष्ण्येच्छः स बभूव ह ॥ १५ ॥
स्वाभिधानस्थिता धिष्ण्यास्तासूत्पन्नाश्च धिष्णवः।
धिष्ण्येषु जज्ञिरे यस्मात् ततस्ते धिष्णवः स्मृताः ॥१६॥

इत्येते वै नदीपुत्रा धिष्ण्येषु प्रतिपेदिरे ।
तेषां विहरणीया ये उपस्थेयाश्च तां शृणु ।
विभुः प्रवाहणोऽग्नीध्रस्तत्रस्था धिष्ण्योऽपरे ॥ १७ ॥
विहरन्ति यथास्थानं पुण्याहे समुपक्रमे ।
अनिर्देश्यानिवार्याणामग्नीनां शृणुत क्रमम् ॥ १८ ॥
वासवोऽग्निः कृशानुर्यो द्वितीयोत्तरवेदिकः ।
सम्राडग्निसुतो ह्यष्टावुपतिष्ठन्ति तान् द्विजाः ॥ १९ ॥
पर्जन्यः पावमानस्तु द्वितीयः सोऽनुदृश्यते ।
पावकाणः समूहस्तु वेदान्तरे सोऽग्निरुच्यते ॥ २० ॥
हव्यसूदो ह्यसंमृज्यः शामित्रः स विभाव्यते ।
शतधामा सुधाज्योती रौद्रैश्वर्यः स उच्यते ॥ २१ ॥
ब्रह्मज्योतिर्वसुधामा ब्रह्मस्थानीय उच्यते ।
अजैकपादुपस्थेयः स वै शालामुखीयतः ॥ २२ ॥
अनिर्देश्यो ह्यहिर्बुध्न्यो बहिरन्ते तु दक्षिणः ।
पुत्रा ह्येते तु सर्वस्य उपस्थेया द्विजैः स्मृताः ॥ २३ ॥
ततो विहरणीयांस्तु वक्ष्याम्यष्टौ तु तान् सुतान् ।
होत्रियस्य सुतो ह्यग्निर्बर्हिषो हव्यवाहनः ॥ २४ ॥
प्रशंस्योऽग्निः प्रचेतास्तु द्वितीयः संसहायकः ।
सुतो ह्यग्नेर्विश्ववेदा ब्राह्मणाच्छंसि उच्यते ॥ २५ ॥
अपां योनिः स्मृतः स्वाम्भः सेतुर्नाम विभाव्यते ।
धिष्ण्यश्चाहरणा ह्येते सोमेनेज्यन्त वै द्विजैः ॥ २६ ॥
ततो यः पावको नाम्ना यः सद्भिर्योग उच्यते ।
अग्निः सोऽवभृथो ज्ञेयो वरुणेन सहेज्यते ॥ २७ ॥
हृदयस्य सुतो ह्यग्नेर्जठरेऽसौ नृणां पचेत् ।

मन्युमान् जाठरश्चाग्निर्विद्धाग्निः सततं स्मृतः ॥२८॥
परस्परोत्थितो ह्यग्निर्भूतानीह विभुर्दहन्।
अग्नेर्मन्युमतः पुत्रो घोरः सम्वर्त्तकः स्मृतः ॥२९॥
पिबन्नग्निः स वसति समुद्रे वडवामुखे।
समुद्रवासिनः पुत्रः सहरक्षो विभाव्यते ॥३०॥
सहरक्षस्तु वै कामान् गृहे स वसते नृणाम्।
क्रव्यादग्निः सुतस्तस्य पुरुषान् योऽत्ति वै मृतान् ॥३१॥
इत्येते पावकस्याग्ने [illegible] पुत्राः प्रकीर्त्तिताः।
ततः सुतास्तु सौचीख्याद्गन्धर्वैरसुरैर्हृताः ॥३२॥
मथितो यस्त्वरण्यान्तु सोऽग्निराप समिन्धनम्।
आयुर्नाम्ना [illegible] पत्नी यस्तु प्रणीयते ॥३३॥
आयुषो महिमान् [illegible] दहनस्तु ततः सुतः।
पाकयज्ञेष्वभीमानी हुतं हव्यं भुनक्ति यः ॥३४॥
सर्वस्मादेव लोकाच्च हव्यं कव्यं भुनक्ति यः।
पुत्रोऽस्य [illegible] ह्यग्निरद्भुतः स महायशाः ॥३५॥
प्रायश्चित्तेष्वभीमानी हुतं हव्यं भुनक्ति यः।
अद्भुतस्य सुतो [illegible] महान् स्मृतः ॥३६॥
विविधाग्नि [illegible] तस्य पुत्रो महाकविः।
विविधाग्निस [illegible] तनयोऽष्टौ सुताः स्मृताः ॥३७॥
काम्याग्निष्टिष्वभीमानी रक्षोहायतिकृच्च यः।
सुरभिर्वसुमान् [illegible] हर्य्यश्वः सोऽभवत् पुरा ॥३८॥
प्रवर्ग्यः क्षेमवां [illegible] इत्यष्टौ च प्रकीर्त्तिताः।
शुच्यग्नेस्तु प्रजाः ह्येषा अग्नयश्च चतुर्दश ॥३९॥
इत्येते ह्यग्नयः प्रोक्ताः प्रणीता ये हि चाध्वरे।

समतीतेतु सर्गे ये यामैः सह सुरोत्तमैः ॥ ४० ॥
स्वायम्भुवेऽन्तरे पूर्वमग्नयस्तेऽभिमानिनः ।
एते विहरणीयेषु चेतनाचेतनेष्विह ॥ ४१ ॥
स्थानाभिमानिनोऽग्न्याः प्रागासन् हव्यवाहनाः ।
काम्यनैमित्तिकाख्यास्ते ये ते कर्म्मस्ववस्थिताः ॥ ४२ ॥
पूर्वं मन्वन्तरेऽतीते शुक्रैर्यामैश्च तैः सह ।
एते देवगणैः सार्द्धं प्रथमस्यान्तरे मताः ॥ ४३ ॥
इत्येता योनयो ह्युक्ताः स्थानाख्या जातवेदसाम् ।
स्वारोचिषादिषु ज्ञेयाः सवर्णान्तेषु सप्तसु ॥ ४४ ॥
तैरेवन्तु प्रसंख्यातं साम्प्रतानागतेष्विह ।
मन्वन्तरेषु सर्व्वेषु लक्षणं जातवेदसाम् ॥ ४५ ॥
मन्वन्तरेषु सर्वेषु नानारूपप्रयोजनैः ।
वर्त्तन्ते वर्त्तमानैश्च यामैर्देवैः सहाग्नयः ॥ ४६ ॥
अनागतैः सुरैः सार्द्धं वत्स्यन्त्यनागतास्त्वथ ।
इत्येष प्रचयोऽग्नीनां मया प्रोक्तो यथाक्रमम् ।
विस्तरेणानुपूर्व्व्या च किमन्यच्छ्रोतुमिच्छथ ॥ ४७ ॥

---

## अथ द्विपञ्चाशत्तमोऽध्यायः ।

ऋषय ऊचुः । इदानीं प्राह यद्विष्णुः पृष्टः परममुत्तमम् ।
तमिदानीं समाचक्ष्व धर्माधर्मस्य विस्तरम् ॥ १ ॥
सूत उवाच । एवमेकार्णवे तस्मिन् मत्स्यरूपी जनार्द्दनः ।
विस्तारमादिसर्गस्य प्रतिसर्गस्य चाखिलम् ॥ २ ॥
कथयामास विश्वात्मा मनवे सूर्य्यसूनवे ।
कर्म्मयोगञ्च साङ्ख्यञ्च यथावद्विस्तरान्वितम् ॥ ३ ॥

ऋषय ऊचुः । श्रोतुमिच्छामहे सूत ! कर्म्मयोगस्य लक्षणम् ।
यस्मादविदितं लोके न किञ्चित्तव सुव्रत ! ॥ ४ ॥
सूत उवाच । कर्म्मयोगस्य वक्ष्यामि यथा विष्णुविभाषितम् ।
ज्ञानयोगसहस्राद्धि कर्म्मयोगः प्रशस्यते ॥ ५ ॥
कर्म्मयोगोद्भवं ज्ञानं तस्मात्तत्परमम्पदम् ।
कर्म्म ज्ञानोद्भवं ब्रह्म न च ज्ञानमकर्म्मणः ॥ ६ ॥
तस्मात् कर्म्मणि युक्तात्मा तत्त्वमाप्नोति शाश्वतम् ।
वेदोऽखिलो धर्म्ममूलमाचारश्चैव तद्विदाम् ॥ ७ ॥
अष्टावात्मगुणास्तस्मिन् प्रधानत्वेन संस्थिताः ।
दया सर्व्वेषु भूतेषु क्षान्तिरक्षातुरस्य तु ॥ ८ ॥
अनसूया तथा लोके शौचमन्तर्व्वहिर्द्विजाः ।
अनायासेषु कार्य्येषु माङ्गल्याचारसेवनम् ॥ ९ ॥
न च द्रव्येषु कार्पण्यमार्त्तेषूपार्ज्जितेषु च ।
तथा स्पृहा परद्रव्ये परस्त्रीषु च सर्व्वदा ॥ १० ॥
अष्टावात्मगुणाः प्रोक्ताः पुराणस्य तु कोविदैः ।
अयमेव क्रियायोगो ज्ञानयोगस्य साधकः ॥ ११ ॥
कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते ।
श्रुतिस्मृत्युदितं धर्म्ममुपतिष्ठेत्प्रयत्नतः ॥ १२ ॥
देवतानां पितॄणाञ्च मनुष्याणाञ्च सर्व्वदा ।
कुर्य्यादहरहर्य्यज्ञैर्भूतर्षिगणतर्पणम् ॥ १३ ॥
स्वाध्यायैरर्च्चयेदृषीन् होमैर्द्देवान् यथाविधि ।
पितॄन् श्राद्धैरन्नदानैर्भूतानि बलिकर्म्मभिः ।
पञ्चैते विहिता यज्ञाः पञ्चसूनापनुत्तये ॥ १४ ॥
कण्डनी पेषणी चुल्ली जलकुम्भी प्रमा—

पञ्चसूना गृहस्थस्य तेन स्वर्गं न गच्छति ।
तत्पापनाशनायामी पञ्चयज्ञाः प्रकीर्त्तिताः ॥ १६ ॥
द्वाविंशति तथाष्टौ च ये संस्काराः प्रकीर्त्तिताः ।
तद्युक्तोऽपि न मोक्षाय यस्त्वात्मगुणवर्जितः ॥ १७ ॥
तस्मादात्मगुणोपेतः श्रुतिकर्म्म समाचरेत् ।
गोब्राह्मणानां वित्तेन सर्वदा भद्रमाचरेत् ॥ १८ ॥
गोभूहिरण्यवासोभिर्गन्धमाल्योदकेन च ।
पूजयेद् ब्रह्मविष्ण्वर्करुद्रवस्वात्मकं शिवम् ॥ १९ ॥
व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः ।
योऽसावतीन्द्रियः शान्तः सूक्ष्मोऽव्यक्तः सनातनः ।
वासुदेवो जगन्मूर्त्तिस्तस्य सम्भूतयो ह्यमी ॥ २० ॥
ब्रह्मा विष्णुश्च भगवान् मार्त्तण्डो वृषवाहनः ।
अष्टौ च वसवस्तद्वदेकादशगणाधिपाः ।
लोकपालाधिपाश्चैव पितरो मातरस्तथा ॥ २१ ॥
इमा विभूतयः प्रोक्ताश्चराचरसमन्विताः ।
ब्रह्माद्याश्चतुरो मूलमव्यक्ताधिपतिः स्मृतः ॥ २२ ॥
ब्रह्मणा चाथ सूर्येण विष्णुनाथ शिवेन वा ।
अभेदात् पूजितेन स्यात् पूजितं स चराचरम् ॥ २३ ॥
ब्रह्मादीनां परस्मात्तु त्रयाणामपि संस्थितिः ।
वेदमूर्त्तावतः पूषा पूजनीयः प्रयत्नतः ॥ २४ ॥
तस्मादग्निद्विजमुखान् कृत्वा सम्पूजयेदिमान् ।
[illegible]नैर्व्रतोपवासैश्च जपहोमादिना नरः ॥ २५ ॥
[illegible]गपरायणस्य वेदान्तशास्त्रस्मृतिवत्सलस्य ।
[illegible] न किञ्चित् प्राप्तव्यमस्तीह परे च लोके ।
कर्म्मयोगश्च साङ्ख्य[illegible]

# अथ त्रिपञ्चाशत्तमोऽध्यायः ।

मुनय ऊचुः । पुराणसंख्यामाचक्ष्व सूत ! विस्तरशः क्रमात् ।
दानधर्ममशेषन्तु यथावदनुपूर्वशः ॥ १ ॥
सूत उवाच । इदमेव पुराणेषु पुराणपुरुषस्तदा ।
यदुक्तवान् स विश्वात्मा मनवे तन्निबोधत ॥ २ ॥
मत्स्य उवाच । पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ ३ ॥
पुराणमेकमेवासीत् तदा कल्पान्तरेऽनघ ! ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ ४ ॥
निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ।
अङ्गानि चतुरो वेदाः पुराणं न्यायविस्तरम् ॥ ५ ॥
मीमांसां धर्मशास्त्रञ्च परिगृह्य मया कृतम् ।
मत्स्यरूपेण च पुनः कल्पादावुदकार्णवे ॥ ६ ॥
अशेषमेतत् कथितमुदकान्तर्गतेन च ।
श्रुत्वा जगाद च मुनीन् प्रति देवान् चतुर्मुखः ॥ ७ ॥
प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ।
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ! ॥ ८ ॥
व्यासरूपमहं कृत्वा संहरामि युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥ ९ ॥
तथाष्टादशधा कृत्वा भूर्लोकेऽस्मिन् प्रकाश्यते ।
अद्यापि देवलोकेऽस्मिन् शतकोटिप्रविस्तरम् ॥ १० ॥
तदर्थोऽत्र चतुर्लक्षं संक्षेपेण निवेशितम् ।

पुराणानि दशाष्टौ च साम्प्रतं तदिहोच्यते ॥ ११ ॥
नामतस्तानि वक्ष्यामि शृणुध्वं मुनिसत्तमाः ।
ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये ॥ १२ ॥
ब्राह्मं त्रिदशसाहस्रं पुराणं परिकीर्त्यते ।
लिखित्वा तच्च यो दद्यात् जलधेनुसमन्वितम् ।
वैशाखपूर्णिमायाञ्च ब्रह्मलोके महीयते ॥ १३ ॥
एतदेव यदा पद्म मभूद्धैरण्मयं जगत् ।
तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः ।
पाद्मं तत् पञ्च पञ्चाशत् सहस्राणीह कथ्यते ॥ १४ ॥
तत्पुराणञ्च यो दद्यात् सुवर्णकमलान्वितम् ।
ज्येष्ठे मासि तिलैर्युक्तं मश्वमेधफलं लभेत् ॥ १५ ॥
वाराहकल्पवृत्तान्तमधिकृत्य पराशरः ।
यत्राह धर्मानखिलान् तदुक्तं वैष्णवं विदुः ॥ १६ ॥
तदाषाढे च यो दद्यात् घृतधेनुसमन्वितम् ।
पौर्णमास्यां विपूतात्मा स पदं याति वारुणम् ।
त्रयोविंशतिसाहस्रं तत् प्रमाणं विदुर्बुधाः ॥ १७ ॥
श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत् ।
यत्र तद्वायवीयं स्यात् रुद्रमाहात्म्यसंयुतम् ।
चतुर्विंशत्सहस्राणि पुराणं तदिहोच्यते ॥ १८ ॥
श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम् ।
यो दद्यात् वृषसंयुक्तं ब्राह्मणाय कुटुम्बिने ।
शिवलोके स पूतात्मा कल्पमेकं वसेन्नरः ॥ १९ ॥
यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥ २० ॥

सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरोत्तमाः ।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमुच्यते ॥ २१ ॥
लिखित्वा तच्च यो दद्याद्धेम सिंहसमन्वितम् ।
पौर्णमास्यां प्रौष्ठपद्यां स याति परमां गतिम् ।
अष्टादशसहस्राणि पुराणं तत् प्रचक्षते ॥ २२ ॥
यत्राह नारदो धर्मान् बृहत्कल्पाश्रयाणि च ।
पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते ॥ २३ ॥
तदिदं पञ्चदश्यान्तु दद्याद्धेनुसमन्वितम् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥ २४ ॥
यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणा ।
व्याख्याता वै मुनिप्रश्ने मुनिभिर्धर्मचारिभिः ॥ २५ ॥
मार्कण्डेयेन कथितं तत् सर्वं विस्तरेण तु ।
पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते ॥ २६ ॥
प्रतिलिख्य च यो दद्यात् सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां पुण्डरीकस्य यज्ञस्य फलभाग्भवेत् ॥ २७ ॥
यत्तदीशानकं कल्पं वृत्तान्तमधिकृत्य च ।
वशिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते ॥ २८ ॥
लिखित्वा तच्च यो दद्याद्धेमपद्म समन्वितम् ।
मार्गशीर्ष्यां विधानेन तिलधेनुसमन्वितम् ।
तच्च षोडशसाहस्रं सर्वक्रतुफलप्रदम् ॥ २९ ॥
यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः ।
अघोरकल्पवृत्तान्तप्रसङ्गेन जगत्स्थितिम् ।
मनवे कथयामास भूतग्रामस्य लक्षणम् ॥ ३० ॥
चतुर्दशसहस्राणि तथा पञ्चशतानि च ।

भविष्यचरितप्रायं भविष्यन्तदिहोच्यते ॥ ३१ ॥
तत्पौषे मासि यो दद्यात् पौर्णमास्यां विमत्सरः ।
गुड़कुम्भसमायुक्तमग्निष्टोमफलं भवेत् ॥ ३२ ॥
रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च ।
सावर्णिर्नारदाय कृष्णमाहात्म्यमुत्तमम ॥ ३३ ॥
यत्र ब्रह्मवराहस्य चोदन्तं वर्णितं मुहुः ।
तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ॥ ३४ ॥
पुराणं ब्रह्मवैवर्त्तं यो दद्यान्माघमासि च ।
पौर्णमास्यां शुभदिने ब्रह्मलोके महीयते ॥ ३५ ॥
यत्राग्निलिङ्गमध्यस्थः प्राह देवो महेश्वरः ।
धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च ॥ ३६ ॥
कल्पान्ते लैङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् ।
तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ।
तिलधेनुसमायुक्तं स याति शिवसाम्यताम् ॥ ३७ ॥
महावराहस्य पुनर्माहात्म्यमधिकृत्य च ।
विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते ॥ ३८ ॥
मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तमाः ।
चतुर्विंशत्सहस्राणि तत् पुराणमिहोच्यते ॥ ३९ ॥
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ।
पौर्णमास्यां मधौ दद्यात् ब्राह्मणाय कुटुम्बिने ।
वराहस्य प्रसादेन पदमाप्नोति वैष्णवम् ॥ ४० ॥
यत्र माहेश्वरान्धर्मानधिकृत्य च षण्मुखः ।
कल्पे तत् पुरुषं वृत्तचरितैरुपबृंहितम् ॥ ४१ ॥
स्कान्दं नाम पुराणञ्च ह्येकाशीति निगद्यते ।

सहस्राणि शतं चैकमिति मर्त्येषु गद्यते ॥ ४२ ॥
परिलिख्य च यो दद्याद्धेम शूलसमन्वितम् ।
शैवं पदमवाप्नोति मीने चोपागते रवौ ॥ ४३ ॥
त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ।
त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्तितम् ॥ ४४ ॥
पुराणं दशसाहस्रं कूर्मकल्पानुगं शिवम् ।
यः शरद्विषुवे दद्याद्वैष्णवं यात्यसौ पदम् ॥ ४५ ॥
यत्र धर्मार्थकामानां मोक्षस्य च रसातले ।
माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥ ४६ ॥
इन्द्रद्युम्नप्रसङ्गेन ऋषिभ्यः शक्रसन्निधौ
अष्टादशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ॥ ४७ ॥
यो दद्यादयने कूर्मं हेमकूर्मसमन्वितम् ।
गोसहस्रप्रदानस्य फलं संप्राप्नुयान्नरः ॥ ४८ ॥
श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः ।
मत्स्यरूपेण मनवे नरसिंहोपवर्णनम् ॥ ४९ ॥
अधिकृत्याऽब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः ।
तन्मात्स्यमिति जानीध्वं सहस्राणि चतुर्दश ॥ ५० ॥
विषुवे हेममत्स्येन धेन्वा चैव समन्वितम् ।
यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला ॥ ५१ ॥
यदा च गारुडे कल्पे विश्वाण्डाद् गरुडोद्भवम् ।
अधिकृत्याऽब्रवीत् कृष्णो गारुडं तदिहोच्यते ॥ ५२ ॥
तदष्टादशकञ्चैव सहस्राणीह पठ्यते ।
सौवर्णहंससंयुक्तं यो ददाति पुमानिह ।
स सिद्धिं लभते मुख्यां शिवलोके च संस्थितिम् ॥ ५३ ॥

ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत् पुनः ।
तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ॥ ५४ ॥
भविष्याणाञ्च कल्पानां श्रूयते यत्र विस्तरः ।
तद्ब्रह्माण्डपुराणञ्च ब्रह्मणा समुदाहृतम् ॥ ५५ ॥
यो दद्यात्तद्व्यतीपाते पीतोर्णायुगसंयुतम् ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ।
हेमधेन्वा युतं तच्च ब्रह्मलोकफलप्रदम् ॥ ५६ ॥
चतुर्लक्षमिदं प्रोक्तं व्यासेनाद्भुतकर्मणा ।
मत् पितुर्मम पित्रा च मया तुभ्यं निवेदितम् ॥ ५७ ॥
इह लोकहितार्थाय संक्षिप्तं परमर्षिणा ।
इदमद्यापि देवेषु शतकोटिप्रविस्तरम् ॥ ५८ ॥
उपभेदान् प्रवक्ष्यामि लोके ये सम्प्रकीर्त्तिताः ।
पाद्मे पुराणे तत्रोक्तं नरसिंहोपवर्णनम् ।
तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ॥ ५९ ॥
नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते ।
नन्दीपुराणं तल्लोकैराख्यातमिति कीर्त्यते ॥ ६० ॥
यत्र साम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ।
प्रोच्यते तत् पुनर्लोके साम्बमेतन्मुनिव्रताः ॥ ६१ ॥
पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः ।
धन्यं यशस्यमायुष्यं पुराणानामनुक्रमम् ।
एवमादित्यसंज्ञा च तत्रैव परिगच्छति ॥ ६२ ॥
अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदिश्यते ।
विजानीध्वं द्विजश्रेष्ठाः तदेतेभ्यो विनिर्गतम् ॥ ६३ ॥
पञ्चाङ्गानि पुराणेषु आख्यानकमिति स्मृतम् ।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥ ६४ ॥
ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च।
ससंहारप्रदानाश्च पुराणे पञ्चवर्णके ॥ ६५ ॥
धर्म्मश्चार्थश्च कामश्च मोक्षश्चैवात्र कीर्त्त्यते।
सर्वेष्वपि पुराणेषु तद्विरुद्धञ्च यत् फलम् ॥ ६६ ॥
सात्त्विकेषु पुराणेषु माहात्म्यमधिकं हरेः।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ ६७ ॥
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
संकीर्णेषु सरस्वत्याः पितृणाञ्च निगद्यते ॥ ६८ ॥
अष्टादश पुराणानि कृत्वा सत्यवतीसुतः।
भारताख्यानमखिलञ्चक्रे तदुपबृंहितम्।
लक्षणैकेन यत् प्रोक्तं वेदार्थपरिबृंहितम् ॥ ६९ ॥
वाल्मीकिनात् यत् प्रोक्तं रामोपाख्यानमुत्तमम्।
ब्रह्मणाभिहितं यच्च शतकोटिप्रविस्तरम् ॥ ७० ॥
आहृत्य नारदायैव तेन वाल्मीकये पुनः।
वाल्मीकिना च लोकेषु धर्म्मकामार्थसाधनम्।
एवं सपादाः पञ्चैते लक्षा मर्त्ये प्रकीर्तिताः ॥ ७१ ॥
पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।
धन्यं यशस्यमायुष्यं पुराणानामनुक्रमम्।
यः पठेच्छृणुयाद्वापि स याति परमाङ्गतिम् ॥ ७२ ॥
इदं पवित्रं यशसो निधानं इदं पितृणामतिवल्लभञ्च।
इदञ्च देवेष्वमृतायितञ्च नित्यं त्विदं पापहरञ्च पुंसाम् ॥ ७३ ॥

———

## अथ चतुःपञ्चाशत्तमोऽध्यायः ।

सूत उवाच । अतः परं प्रवक्ष्यामि दानधर्मानशेषतः ।
व्रतोपवाससंयुक्तान् यथा मत्स्योदितानिह ॥ १ ॥
महादेवस्य संवादे नारदस्य च धीमतः ।
यथा वृत्तं प्रवक्ष्यामि धर्मकामार्थसाधकम् ॥ २ ॥
कैलासशिखरासीनमपृच्छन्नारदः पुरा ।
त्रिनयनमनङ्गारिमनङ्गाङ्गहरं हरम् ॥ ३ ॥
नारद उवाच । भगवन् ! देव ! देवेश ! ब्रह्मविष्ण्विन्द्रिनायक ! ।
श्रीमदारोग्यरूपायुर्भाग्यसौभाग्यसम्पदा ।
संयुक्तस्तव विष्णोर्वा पुमान् भक्तः कथं भवेत् ॥ ४ ॥
नारी वा विधवा सर्वगुणसौभाग्यसंयुता ।
क्रमान्मुक्तिप्रदन्देव ! किञ्चिद्व्रतमिहाचरताम् ॥ ५ ॥
ईश्वर उवाच । सम्यक् पृष्टं त्वया ब्रह्मन्! सर्वलोकहितावहम् ।
श्रुतमप्यत्र यच्छान्त्यै तद्व्रतं शृणु नारद ! ॥ ६ ॥
नक्षत्रपुरुषं नाम व्रतं नारायणात्मकम् ।
पादादि कुर्याद्विधिवत् विष्णुनामानुकीर्तनम् ॥ ७ ॥
प्रतिमां वासुदेवस्य मूलर्क्षादिषु चार्चयेत् ।
चैत्रमासं समासाद्य कृत्वा ब्राह्मणवाचनम् ॥ ८ ॥
मूले नमो विश्वधराय पादौ गुल्फावनन्ताय च रोहिणीषु ।
जङ्घेऽभिपूज्ये वरदाय चैव द्वे जानुनी चाश्विकुमार ऋक्षे ॥९॥
पूर्वोत्तराषाढयुगे तथोरू नमः शिवायेत्यभिपूजनीयौ ।
पूर्वोत्तराफल्गुनि युग्मके च मेढ्रं नमः पञ्चशरायपूज्यम् ॥१०॥
कटिं नमः शार्ङ्गधराय विष्णोः संपूजयेन्नारद ! कृत्तिकासु ।
यथार्चयेत् भाद्रपदाद्वये च पार्श्वं नमः केशिनिषूदनाय ॥११॥

कुक्षिद्वयं नारद ! रेवतीषु दामोदरायेत्यभिपूजनीयम् ।
ऋक्षेऽनुराधासु च माधवाय नमस्तथोरस्थलमेव पूज्यम् ॥१२॥
पृष्ठं धनिष्ठासु च पूजनीयमघौघविध्वंसकराय तच्च ।
श्रीशङ्खचक्रासिगदाधराय नमो विशाखासु भुजाश्च पूज्याः ॥१३॥
हस्ते तु हस्ता मधुसूदनाय नमोऽभिपूज्या इति कैटभारेः ।
पुनर्वसावङ्गुलिपर्वभागाः साम्ना मधीशाय नमोऽभिपूज्याः ॥१४
भुजङ्गनक्षत्रदिने नखानि संपूजयेन्मत्स्यशरीरभाजः ।
कूर्मस्य पादौ शरणं व्रजामि ज्येष्ठासु कण्ठे हरिरर्चनीयः ॥१५
श्रोत्रे वराहाय नमोऽभिपूज्ये जनार्दनस्य श्रवणेन सम्यक् ।
पुष्ये मुखं दानवसूदनाय नमो नृसिंहाय च पूजनीयम् ॥१६॥
नमो नमः कारणवामनाय स्वातीषु दन्ताग्रमथार्चनीयम् ।
आस्यं हरेर्भार्गवनन्दनाय सम्पूजनीयं द्विजवारणे तु ॥१७॥
नमोऽस्तु रामाय मघासु नासा संपूजनीया रघुनन्दनस्य ।
मृगोत्तमाङ्गे नयनेऽभिपूज्ये नमोऽस्तु ते रामविघूर्णिताक्ष ॥१८॥
बुद्धाय शान्ताय नमो ललाटं चित्रासु संपूज्यतमं मुरारेः ।
शिरोऽभिपूज्यं भरणीषु विष्णोर्नमोऽस्तु विश्वेश्वर कल्किरूपिन् ॥१९
आर्द्रासु केशाः पुरुषोत्तमस्य संपूजनीया हरये नमस्ते ।
उपोषिते नक्षदिनेषु भक्त्या संपूजनीया द्विजपुङ्गवाः स्युः ॥२०॥
पूर्णे व्रते सर्वगुणान्विताय वाग्रूपशीलाय च सामगाय ।
हैमीं विशालायतबाहुदण्डां मुक्ताफलेन्दूपलवज्रयुक्ताम् ॥२१॥
जलस्य पूर्णे कलशे निविष्टामर्चां हरेर्वस्त्रगवा सहैव ।
शय्यां तथोपस्करभाजनादियुक्तां प्रदद्याद्द्विजपुङ्गवाय ॥२२॥
यच्चास्ति यत्किञ्चिदिहास्ति देयं दद्याद्द्विजायात्महिताय सर्वम्
मनोरथं नः सफलीकुरुष्व हिरण्यगर्भाच्युत ! रुद्ररूपिन् ! ॥२३॥

सलक्ष्मीकं सभार्याय काञ्चनं पुरुषोत्तमम् ।
शय्यां च दद्यान्मन्त्रेण ग्रन्थिभेदविवर्जितम् ॥२४ ॥
यथा न विष्णुभक्तानां वृजिनं जायते क्वचित् ।
तथा सुरूपतारोग्यं केशवे भक्तिमुत्तमाम् ॥ २५ ॥
यथा न लक्ष्म्या शयनं तव शून्यं जनार्दन ! ।
शय्या ममाप्यशून्यास्तु कृष्ण ! जन्मनि जन्मनि ॥२६ ॥
एवं निवेद्य तत्सर्वं वस्त्रमाल्यानुलेपनम् ।
नक्षत्रपुरुषज्ञाय विप्रायाथ विसर्जयेत् ॥ २७ ॥
भुञ्जीतातैललवणं सर्वर्क्षेष्वप्युपोषितः ।
भोजनञ्च यथाशक्त्या वित्तशाठ्यं विवर्जयेत् ॥ २८ ॥
इति नक्षत्रपुरुषं उपास्य विधिवत् स्वयम् ।
सर्वान् कामानवाप्नोति विष्णुलोके महीयते ॥ २९ ॥
ब्रह्महत्यादिकं किञ्चिदिह वामुत्र वा कृतम् ।
आत्मना वाथ पितृभिस्तत्सर्वं क्षयमाप्नुयात् ॥ ३० ॥
इति पठति शृणोति यश्च भक्त्या पुरुषवरो व्रतमङ्गनाथ कुर्यात्
कलिकलुषविदारणं मुरारेः सकलविभूतिफलप्रदञ्च पुंसाम्॥३१

---

पञ्चपञ्चाशत्तमोऽध्यायः ।

नारद उवाच । उपवासेष्वशक्तस्य तदेव फलमिच्छतः ।
अनभ्यासेन रोगाद्वा किमिष्टं व्रतमुत्तमम् ॥ १ ॥
ईश्वर उवाच । उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।
यस्मिन् व्रते तदप्यत्र श्रूयतामक्षयं महत् ॥ २ ॥
आदित्यशयनं नाम यथावच्छङ्कराचनम् ।
येषु नक्षत्रयोगेषु पुराणज्ञाः प्रचक्षते ॥ ३ ॥

यदा हस्तेन सप्तम्यां आदित्यस्य दिनं भवेत्।
सूर्य्यस्य चाथ संक्रान्तिस्तिथिः सा सार्वकामिकी ॥४॥
उमामहेश्वरस्यार्चामर्चयेत् सूर्य्यनामभिः।
सूर्य्यार्चां शिवलिङ्गे च प्रकुर्वन् पूजयेद्यतः ॥ ५ ॥
उमापतै रवेर्वापि न भेदो दृश्यते क्वचित्।
यस्मात्तस्मान्मुनिश्रेष्ठ ! गृहे शम्भुं समर्चयेत् ॥ ६ ॥

हस्ते च सूर्य्याय नमोऽस्तु पादावर्काय चित्रासु च गुल्फदेशम्।
स्वातीषु जङ्घे पुरुषोत्तमाय धात्रे विशाखासु च जानुदेशम् ७
तथानुराधासु नमोऽभिपूज्यमूरुद्वयञ्चैव सहस्रभानोः।
ज्येष्ठास्वनङ्गाय नमोऽस्तु गुह्यमिन्द्राय सोमाय कटीच मूले॥८॥
पूर्वोत्तराषाढयुगे च नाभिस्त्वष्ट्रे नमः सप्ततुरङ्गमाय।
तीक्ष्णांशवे च श्रवणे च कुक्षौ पृष्ठं धनिष्ठासु विकर्तनाय॥९॥
वक्षःस्थलं ध्वान्तविनाशनाय जलाधिपर्क्षे परिपूजनीयम्।
पूर्वोत्तराभाद्रपदाद्वये च बाहू नमश्चण्डकराय पूज्यौ ॥ १० ॥
साम्नामधीशाय करद्वयञ्च संपूजनीयं द्विज ! रेवतीषु।
नखानि पूज्यानि तथाश्विनीषु नमोऽस्तु सप्ताश्वधुरन्धराय॥११॥
कठोरधाम्ने भरणीषु कण्ठं दिवाकरायेत्यभिपूजनीया।
ग्रीवाग्नि ऋक्षे धरमम्बुजेशे संपूजयेन्नारद ! रोहिणीषु ॥१२॥
मृगोत्तमाङ्गे दशना मुरारेः संपूजनीया हरये नमस्ते।
नमः सवित्रे रसनां शङ्करे च नासाभिपूज्या च पुनर्वसौच १३
ललाटमम्भोरुहवल्लभाय पुष्ये लकावेद शरीरधारिणे।
सार्पेऽथ मौलिं विबुधप्रियाय मघासु कर्णाविति गो गणेशे १४॥
पूर्वासु गोब्राह्मणवन्दनाय नेत्राणि सम्पूज्यतमानि शम्भोः।
अथोत्तराफल्गु निभे भ्रुवौ च विश्वेश्वरायेति च पूजनीये १५

नमोऽस्तु पाशाङ्कुशशूलपद्मकपालसर्पेन्दुधनुर्धराय।
गजासुरानङ्गपुरान्धकादिविनाशमूलाय नमः शिवाय ॥ १६ ॥
इत्यादि चास्त्राणि च पूजयेत् नित्यं विश्वेश्वरायेति शिराभिपूज्य।
भोक्तव्यमन्नैव मतैलशाकमर्मांसमक्षारमभुक्तशेषम् ॥ १७ ॥
इत्येवं द्विज ! मन्त्राणि कृत्वा दद्यात्पुनर्वशी।
शालेयतण्डुलप्रस्थमौदुम्बरमये घृतम् ॥ १८ ॥
संस्थाप्य पात्रे विप्राय स हिरण्यं निवेदयेत्।
सप्तमे वस्त्रयुग्मञ्च पारणे त्वधिकं भवेत् ॥ १९ ॥
चतुर्दशे तु संप्राप्ते पारणे वारदाब्दिके।
ब्राह्मणान् भोजयेद्भक्त्या गुड़क्षीरघृतादिभिः ॥ २० ॥
कृत्वा तु काञ्चनं पद्मं मष्टपत्रं सकर्णिकम्।
शुद्धमष्टाङ्गुलं तच्च पद्मरागदलान्वितम् ॥ २१ ॥
शय्यां विलक्षणां कृत्वा विरुद्धग्रन्थिवर्जिताम्।
सोपधानकविश्रामस्वास्तरणजनानि च ॥ २२ ॥
भाजनोपानहच्छत्रचामरासनदर्पणैः।
भूषणैरपि संयुक्तां फलवस्त्रानुलेपनैः ॥ २३ ॥
तस्यां विधाय तत् पद्ममलङ्कृत्य गुणान्वितम्।
कपिलां वस्त्रसंयुक्तां सुशीलाञ्च पयस्विनीम् ॥ २४
रौप्यखुरीं हेमशृङ्गीं सवत्सां कांस्यदोहनाम्।
दद्यान्मन्त्रेण पूर्वाह्णे न चैनामभिलङ्घयेत् ॥ २५ ॥
यथैवादित्यशब्दानमशून्यं तव सर्वदा।
कान्त्या धृत्या श्रिया रत्या तथा मे सन्तु सिद्धयः ॥२६
यथा न देवाः श्रेयांसं त्वदन्यमनघं विदुः।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥ २७ ॥

ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत्।
शय्यागवादि तत्सर्वं द्विजस्य भवनं नयेत्॥ २८॥
नैतद्विशीलाय न दाम्भिकाय कुतर्कदुष्टाय विनिन्दकाय।
प्रकाशनीयं व्रतमिन्दुमौलेर्यश्चापि निन्दामधिकां विधत्ते॥२९॥
भक्ताय दान्ताय च गुह्यमेतदाख्येयमानन्दकरं शिवस्य।
इदं महापातकभिन्नराणामप्यक्षरं वेदविदो वदन्ति॥ ३०॥
न बन्धुपुत्रेण धनैर्वियुक्तः पत्नीभिरानन्दकरः सुराणाम्।
नाभ्येति रोगं न च शोकदुःखं या वाथ नारी कुरुतेऽतिभक्त्या ३१
इदं वसिष्ठेन पुरार्जुनेन कृतं कुवेरेण पुरन्दरेण।
यत्कीर्तनेनाप्यखिलानि नाशमायान्ति पापानि न संशयोऽस्ति ३२
इति पठति शृणोति वा य इत्थं रविशयनं पुरुहुतवल्लभः स्यात्।
अपि नरकगतान् पितृनशेषानपि दिवमानयतीह यः करोति ३३

---

## अथ षट्पञ्चाशत्तमोऽध्यायः।

श्रीभगवानुवाच। कृष्णाष्टमीमथो वक्ष्ये सर्वपापप्रणाशिनीम्।
शान्तिर्मुक्तिश्च भवति जयः पुंसां विशेषतः॥ १॥
शङ्करं मार्गशिरसि शम्भुं पौषेऽभिपूजयेत्।
माघे महेश्वरं देवं महादेवञ्च फाल्गुने॥ २॥
स्थाणुं चैत्रे शिवं तद्वद्वैशाखे त्वर्चयेन्नरः।
ज्यैष्ठे पशुपातं चार्चेदाषाढ़े उग्रमर्चयेत्॥ ३॥
पूजयेत् श्रावणे शर्वं नभस्ये त्र्यम्बकं तथा।
हरमाश्वयुजे मासि तथेशानञ्च कार्तिके॥ ४॥
कृष्णाष्टमीषु सर्वासु शक्तः सम्पूजयेद् द्विजान्।

संप्राश्य गोमूत्रममांसमन्नमक्षारमष्टावथ विंशतिञ्च ।
ग्रासान् पयःसर्पियुतानुपोष्य भुक्त्वेतिहासं शृणुयान् मुहूर्त्तम् ॥१५॥
कदम्बनीलोत्पलकेतकानि जातीसरोजं शतपत्रिका च ।
अम्लानकुब्जान्यथ सिन्दुवारं पुष्पं पुनर्नारद ! मल्लिकायाः ।
शुभ्रञ्च विष्णोः करवीरपुष्पं श्रीचम्पकं चन्द्रमसः प्रदेयम् ॥१६॥
श्रावणादिषु मासेषु क्रमादेतानि सर्वदा ।
यस्मिन् मासे व्रतादिः स्यात्तत् पुष्पैरर्चयेद्धरिम् ॥१७॥
एवं संवत्सरं यावदुपास्य विधिवन्नरः ।
व्रतान्ते शयनं दद्यात् दर्पणोपस्करान्वितम् ॥ १८ ॥
रोहिणीचन्द्रमिथुनं कारयित्वाथ काञ्चनम् ।
चन्द्रः षडङ्गुलः कार्यो रोहिणी चतुरङ्गुला ॥ ११ ॥
मुक्ताफलाष्टकयुतं सितनेत्रपटावृतम् ।
क्षीरकुम्भोपरि पुनः कांस्यपात्राक्षतान्वितम् ।
दद्यान्मन्त्रेण पूर्वाह्णे शालीक्षुफलसंयुतम् ॥२०॥
श्वेतामथ सुवर्णास्यां खुरैरौप्यैः समन्विताम् ।
सवस्त्रभाजनां धेनुं तथा शङ्खं च शोभनम् ॥ २१ ॥
भूषणैर्द्विजदाम्पत्यमलङ्कृत्य गुणान्वितम् ।
चन्द्रोऽयं द्विजरूपेण सभार्य्य इति कल्पयेत् ॥ २२ ॥
यथा न रोहिणी कृष्णशय्यां सन्त्यज्य गच्छति ।
सोमरूपस्य ते तद्वन्ममाभेदोऽस्तु भूतिभिः ॥२३॥
यथा त्वमेव सर्वेषां परमानन्दमुक्तिदः ।
भुक्तिर्मुक्तिस्तथा भक्तिस्त्वयि चन्द्रास्तु मे सदा ॥ २४॥
इति संसारभीतस्य मुक्तिकामस्य चानघ ! ।
रूपारोग्यायुषामेतद्विधायकमनुत्तमम् ॥ २५ ॥

इदमेव पितॄणां च सर्वदा वल्लभं मुने ! ।
त्रैलोक्याधिपतिर्भूत्वा सप्तकल्पशतत्रयम् ।
चन्द्रलोकमवाप्नोति विमुक्तो भूत्वा तु मुच्यते ॥२६॥
नारी वा रोहिणी चन्द्रशयनं या समाचरेत् ।
साऽपि तत्फलमाप्नोति पुनरावृत्तिदुर्लभम् ॥२७॥
इति पठति शृणोति वा य इत्थं
मधुमथनार्चनमिन्दुकीर्तनेन नित्यम् ।
मतिमपि च ददाति सोऽपि शौरे
र्भवनगतः परिपूज्यतेऽमरौघैः ॥ २८ ॥

अथाष्टपञ्चाशत्तमोऽध्यायः ।

मनु उवाच । जलाशयगतं विष्णुमुवाच रविनन्दनः ।
तडागारामकूपानां वापीषु नलिनीषु च ॥ १ ॥
विधिं पृच्छामि देवेश ! देवतायतनेषु च ।
के तत्र ऋत्विजो नाथ ! वेदी वा कीदृशी भवेत् ॥ २ ॥
दक्षिणावलयः कालः स्थानमाचार्य्यएव च ।
द्रव्याणि कानि शस्तानि सर्वमाचक्ष्व तत्त्वतः ॥ ३ ॥
मत्स्य उवाच । शृणु राजन्महाबाहो ! तडागादिषु यो विधिः ।
पुराणेष्वितिहासोऽयं पठ्यते वेदवादिभिः ॥ ४ ॥
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥ ५ ॥
प्रागुदक्प्रवणे देशे तडागस्य समीपतः ।
चतुर्हस्तां शुभां वेदिं चतुरस्रां चतुर्मुखाम् ॥ ६ ॥
तथा षोडशहस्तः स्यान्मण्डपश्च चतुर्मुखः ।
वेद्याश्च परितो गर्त्तारत्निमात्रास्त्रिमेखलाः ॥ ७ ॥

नव सप्ताथ वा पञ्च नातिरिक्ता नृपात्मज ।
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलिविस्तृता ॥ ८ ॥
गर्ताश्चतस्रः प्रस्ताः स्युस्त्रिपर्वोच्छ्रितमेखलाः ।
सर्वतस्तु सवर्णाः स्युः पताकाध्वजसंयुताः ॥ ९ ॥
अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि तु ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥ १० ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ॥ ११ ॥
सर्वलक्षणसम्पूर्णो मन्त्रविद्विजितेन्द्रियः ।
कुलशीलसमायुक्तः पुरोधाः स्याद्द्विजोत्तमः ॥ १२ ॥
प्रतिगर्तेषु कलशा यज्ञोपकरणानि च ।
व्यजनञ्चामरे शुभ्रे ताम्रपात्रे सुविस्तृते ॥ १३ ॥
ततस्त्वनेकवर्णाः स्युश्चरवः प्रतिदैवतम् ।
आचार्य्यः प्रक्षिपेद्भूमावनुमन्त्र्य विचक्षणः ॥ १४ ॥
अरत्निमात्रो यूपः स्यात् क्षीरवृक्षविनिर्मितः ।
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥ १५ ॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशति ऋत्विजः ।
कुण्डलानि च हैमानि केयूरकटकानि च ॥ १६ ॥
तथाङ्गुलयः पवित्राणि वासांसि विविधानि च ।
पूजयेत् समं सर्वान् आचार्य्यो द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् प्रियम् ॥ १७ ॥
सौवर्णकूर्म्ममकरौ राजतौ मत्स्यदुन्दुभौ ।
ताम्रौ कुलीरमण्डूकावायसः शिंशुमारकः ।
एवमासाद्य तत्सर्वमादावेव विशाम्पते ॥ १८ ॥

शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
सर्वौषध्युदके स्नात स्नापितो वेदपारगैः ॥ १९ ॥
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ।
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ॥ २० ॥
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ।
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ॥ २१ ॥
षोड़शारन्ततश्चक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥ २२ ॥
वेद्याश्चोपरि तत् कृत्वा ग्रहान् लोकपतींस्ततः ।
सन्न्यसेन्मन्त्रतः सर्वान् प्रतिदिक्षु विचक्षणः ॥ २३ ॥
कूर्मादि स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितः ।
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद् बुधः ॥ २४ ॥
विनायकञ्च विन्यस्य कमलामम्बिकां तथा ।
शान्त्यर्थं सर्वलोकानां भूतग्रामं न्यसेत्ततः ॥ २५ ॥
पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम् ।
कुम्भान् सजलगर्भांस्तान् वासोभिः परिवेष्टयेत् ॥ २६ ॥
पुष्पगन्धैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्य्यस्त्वभिपूजयेत् ॥ २७ ॥
बह्वृचौ पूर्वतः स्थाप्यौ दक्षिणेन यजुर्विदौ ।
सामगौ पश्चिमे तद्वदुत्तरेण त्वथर्वणौ ॥ २८ ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
यजध्वमिति तान् ब्रूयाद् हौत्रिकान् पुनरेव तु ॥२९॥
उत्कृष्टान् मन्त्रजापेन तिष्ठध्वमिति जापकान् ।
एवमादिश्य तान् सर्वान् पर्य्युक्ष्याग्निं स मन्त्रवित् ॥३०॥

जुहुयाद्वारुणैर्मन्त्रै राज्यं च समिधस्तथा ।
ऋत्विगभिश्चाथ होतव्यं वारुणैरेव सर्वतः ॥ ३१ ॥
ग्रहेभ्यो विधिवद् हुत्वा तथेन्द्रायेश्वराय च ।
मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्मणे ॥ ३२ ॥
रात्रिसूक्तञ्च रौद्रञ्च पावमानं सुमङ्गलम् ।
जपेयुः पौरुषं सूक्तं पूर्वतो बह्वृचाः पृथक् ॥ ३३ ॥
शाक्रं रौद्रञ्च सौम्यं च कूष्माण्डं जातवेदसम् ।
सौरसूक्तं जपेन्मन्त्रं दक्षिणेन यजुर्विदः ॥ ३४ ॥
वैराजं पौरुषं सूक्तं सौवर्णं रुद्रसंहिताम् ।
शैशवं पञ्च निधनं गायत्रं ज्येष्ठसाम च ॥ ३५ ॥
वामदेव्यं बृहत्साम रौरवं सरथन्तरम् ।
गवां व्रतं च काण्वञ्च रक्षोघ्नं वयसस्तथा ।
गायेयुः सामगा राजन् ! पश्चिमं द्वारमाश्रिताः ॥३६॥
अथर्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ।
जपेयुर्मनसा देवमाश्रित्य वरुणं प्रभुम् ॥ ३७ ॥
पूर्वेद्युरभितो रात्रावेवं कृत्वाधिवासनम् ।
गजाश्वरथ्यावल्मीकात् सङ्गमाद्ध्रदगोकुलात् ।
मृदमादाय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा ॥ ३८ ॥
रोचनाञ्च ससिद्धार्थां गन्धं गुग्गुलमेव च ।
स्नपनं तस्य कर्तव्यं पञ्चभङ्गसमन्वितम् ॥ ३९ ॥
प्रत्येकन्तु महामन्त्रैरेवं कृत्वा विधानतः ।
एवं क्षपातिवाह्याथ विधियुक्तेन कर्मणा ॥ ४० ॥
ततः प्रभाते विमले सञ्जातेऽथ शतं गवाम् ।
ब्राह्मणेभ्यः प्रदातव्यमष्टषष्टिश्च वा पुनः ।

पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशति रप्यथ ॥ ४१ ॥
ततः साम्वत्सरप्रोक्ते शुभे लग्ने सुशोभने ।
वेदशब्दैश्च गान्धर्वैर्वाद्यैश्च विविधैः पुनः ॥ ४२ ॥
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ।
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ॥ ४३ ॥
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ।
ततो निक्षिप्य मकरमत्स्यादींश्चैव सर्वशः ।
धृतां चतुर्विधैर्विप्रै र्वेदवेदाङ्गपारगैः ॥ ४४ ॥
महानदीजलोपेतां दध्यक्षतसमन्विताम् ।
उत्तराभिमुखीं धेनुं जलमध्ये तु कारयेत् ॥ ४५ ॥
आथर्वणेन संस्नातां पुनर्मामित्यथेति च ।
आपोहिष्ठेति मन्त्रेण क्षिप्त्वागत्य च मण्डलम् ॥४६॥
पूजयित्वा सदस्यान् बलिं दद्यात् समन्ततः ।
पुनर्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ! ॥ ४७ ॥
चतुर्थी कर्म कर्तव्यं देया तत्रापि शक्तितः ।
दक्षिणा राजशार्दूल ! वरुणक्षापनं ततः ॥ ४८ ॥
कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च ।
ऋत्विग्भ्यस्तु समं दत्त्वा मण्डपं विभजेत् पुनः ।
हेमपात्रीञ्च शय्याञ्च स्थापकाय निवेदयेत् ॥ ४९ ॥
ततः सहस्रं विप्राणामथ वाष्टशतं तथा ।
भोजनीयं यथाशक्ति पञ्चाशद्वाथ विंशतिः ।
एवमेतु पुराणेषु तडागविधिरुच्यते ॥ ५० ॥
कूपवापीषु सर्वासु तथा पुष्करिणीषु च ।
एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव ॥ ५१ ॥

मन्त्रतस्तु विशेषः स्यात् प्रसादोद्यानभूमिषु ।
अयन्त्वसमन्त्रावर्त्तेन विधिर्दृष्टः स्वयम्भुवा ।
अल्पेष्वेकाग्निवत् कृत्वा वित्तशाठ्याद्दृते नृणाम् ॥५२ ॥
प्रावृट्काले स्थिते तोये ह्यग्निष्टोमफलं स्मृतम् ।
शरत्काले स्थितं यत् स्यात् तदुक्तफलदायकम् ।
वाजपेयातिरात्राभ्यां हेमन्ते शिशिरे स्थितम् ॥ ५३॥
अश्वमेधसमं प्राह वसन्तसमये स्थितम् ।
ग्रीष्मेऽपि तत् स्थितन्तोयं राजसूयाद्विशिष्यते ॥ ५४ ॥
एतान्महाराज ! विशेषधर्मान् करोति योऽप्यागमशुद्धबुद्धिः ।
स याति रुद्रालयमाशु पूतः कल्पाननेकान् दिवि मोदते च ॥५५॥
अनेकलोकान् समहस्तपादीन् भुक्त्वा परार्द्धद्वयमङ्गनाभिः ।
सहैव विष्णोः परमम्पदं यत् प्राप्नोति तद्यागफलेन भूयः ॥५६॥

---

अथोनषष्टितमोऽध्यायः ।

ऋषय ऊचुः । पादपानां विधिं सूत ! यथावद्विस्तराद्वद ।
विधिना केन कर्त्तव्यं पादपोद्यापनं बुधैः ।
ये च लोकाः स्मृतास्तेषां तानिदानीं वदस्व नः ॥१॥
सूत उवाच । पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु ।
तडागविधिवत् सर्वमासाद्य जगदीश्वर ! ॥ २ ॥
ऋत्विङ्मण्डपसम्भारमाचार्यञ्चैव तद्विधः ।
पूजयेत् ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः ॥ ३ ॥
सर्वौषध्युदकैः सिक्तान् पिष्टातकविभूषितान् ।
वृक्षान्माल्यैरलङ्कृत्य वासोभि रभिवेष्टयेत् ॥४ ॥
सूच्या सौवर्णया कार्यं सर्वेषां कर्णवेधनम् ।

अञ्जनञ्चापि दातव्यं तद्वद्धेमशलाकया ॥ ५ ॥
फलानि सप्त चाष्टौ वा कालधौतानि कारयेत्।
प्रत्येकं सर्ववृक्षाणां वेद्यान्तान्यधिवासयेत् ॥ ६ ॥
धूपोऽत्र गुग्गुलः श्रेष्ठः ताम्रपात्रैरधिष्ठितान्।
सर्वान्धान्यस्थितान् कृत्वा वस्त्रगन्धानुलेपनैः ॥ ७ ॥
कुम्भान् सर्वेषु वृक्षेषु स्थापयित्वा नरेश्वर !।
सहिरण्यानशेषांस्तान् कृत्वा बलिनिवेदनम् ॥८॥
यथास्वं लोकपालानामिन्द्रादीनां विशेषतः।
वनस्पतेश्च विद्वद्भिर्होमः कार्यो द्विजातिभिः ॥ ९ ॥
ततः शुक्लाम्बरधरां सौवर्णकृतभूषणाम्।
सकांस्यदोहां सौवर्णशृङ्गाभ्यामतिशालिनीम्।
पयस्विनीं वृक्षमध्यादुत्सृजेत् गामुदङ्मुखीम् ॥१०॥
ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः।
ऋग्यजुःसाममन्त्रैश्च वारुणैरभितस्तथा।
तैरेव कुम्भैः स्नपनं कुर्यात् ब्राह्मणपुङ्गवः ॥ ११ ॥
स्नातः शुक्लाम्बरस्तद्वद्यजमानोऽभिपूजयेत्।
गोभिर्विभवतः सर्वान् ऋत्विजस्तान् समाहितः ॥१२॥
हेमसूत्रैः सकटकैरङ्गुलीयपवित्रकैः।
वासोभिः शयनीयैश्च तथोपस्करपादुकैः।
क्षीरेण भोजनं दद्याद्यावद्दिनचतुष्टयम् ॥ १३ ॥
होमश्च सर्षपैः कार्यो यवैः कृष्णतिलैस्तथा।
पलाशसमिधः शस्तास्तुर्थेऽह्नि तथोत्सवः।
दक्षिणा च पुनस्तद्वद्देया तत्रापि शक्तितः ॥ १४ ॥
यद्यदिष्टतमं किञ्चित् तत्तत् दद्यादमत्सरी।

आचार्ये द्विगुणां दद्यात्प्रणिपत्य विसर्जयेत् ॥ १५ ॥
अनेन विधिना यस्तु कुर्यात् वृक्षोत्सवं बुधः ।
सर्वान् कामानवाप्नोति फलञ्चानन्त्यमश्नुते ॥ १६ ॥
यश्चैकमपि राजेन्द्र ! वृक्षं संस्थापयेन्नरः ।
सोऽपि स्वर्गे वसेद्राजन् ! यावदिन्द्रायुतत्रयम् ॥ १७ ॥
भूतान् भव्यांश्च मनुजांस्तारयेद्द्रुमसंमितान् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥ १८ ॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ।
सोऽपि संपूजितो देवैर्ब्रह्मलोके महीयते ॥ १९ ॥

---

अथ षष्टितमोऽध्यायः ।

मत्स्य उवाच । तथैवान्यत् प्रवक्ष्यामि सर्वकामफलप्रदम् ।
सौभाग्यशयनं नाम यत्पुराणविदो विदुः ॥ १ ॥
पुरा दग्धेषु लोकेषु भूर्भुवःस्वर्महादिषु ।
सौभाग्यं सर्वभूताना मेकस्थमभवत्तदा ।
वैकुण्ठं स्वर्गमासाद्य विष्णोर्वक्षस्थलस्थितम् ॥ २ ॥
ततः कालेन महता पुनः सर्गविधौ नृप ! ।
अहङ्कारावृते लोके प्रधानपुरुषान्विते ॥ ३ ॥
स्पर्धायाञ्च प्रवृत्तायां कमलासनकृष्णयोः ।
लिङ्गाकारा समुद्भूता वह्नेर्ज्वालातिभीषणा ।
तयाभितप्तस्य हरेर्वक्षस्तद्विनिःसृतम् ॥ ४ ॥
वक्षःस्थलं समाश्रित्य विष्णोः सौभाग्यमास्थितम् ।
रसरूपन्ततो यावत् प्राप्नोति वसुधातलम् ॥ ५ ॥
उत्क्षिप्तमन्तरिक्षे तद्ब्रह्मपुत्रेण धीमता ।

दक्षेण पीतमात्रं तु रूपलावण्यकारकम् ॥ ६ ॥
बलं तेजो महज्जातं दक्षस्य परमेष्ठिनः ।
शेषं यदपतद् भूमावष्टधा समजायत ॥ ७ ॥
ततो जनानां सञ्जाताः सप्त सौभाग्यदायकाः ।
इक्षवो रसराजश्च निष्पावाजाजिधान्यकम् ॥ ८ ॥
विकारवच्च गोक्षीरं कुसुम्भं कुङ्कुमं तथा ।
लवणं चाष्टमं तद्वत् सौभाग्याष्टकमुच्यते ॥ ९ ॥
पीतं यद् ब्रह्मपुत्रेण योगज्ञानविदा पुनः ।
दुहिता साभवत्तस्य या सतीत्यभिधीयते ॥ १० ॥
लोकानतीत्य लालित्यात् ललिता तेन चोच्यते ।
त्रैलोक्यसुन्दरीमेनामुपयेमे पिनाकधृक् ॥ ११ ॥
या देवी सौभाग्यमयी भुक्तिमुक्तिफलप्रदा ।
तामाराध्य पुमान् भक्त्या नारी वा किन्न विन्दति ॥ १२ ॥
मनुरुवाच । कथमाराधनं तस्या जगद्धात्र्या जनार्दन ! ।
तद्विधानं जगन्नाथ ! तत् सर्वञ्च वदस्व मे ॥ १३ ॥
मत्स्य उवाच । वसन्तमासमासाद्य तृतीयायां जनप्रिय ! ।
शुक्लपक्षस्य पूर्वाह्णे तिलैः स्नानं समाचरेत् ॥ १४ ॥
तस्मिन्नहनि सा देवी किल विश्वात्मना सती ।
पाणिग्रहणकैर्मन्त्रैरुद्वहद्वरवर्णिनी ॥ १५ ॥
तया सहैव देवेशं तृतीयायामथार्चयेत् ।
फलैर्नानाविधैर्धूपदीपनैवेद्यसंयुतैः ॥ १६ ॥
प्रतिमां पञ्चगव्येन तथा गन्धोदकेन तु ।
स्नापयित्वार्चयेद् गौरीमिन्दुशेखरसंयुताम् ॥ १७ ॥

नमोऽस्तु पाटलायै तु पादौ देव्याः शिवस्य तु ।
शिवायेति च संकीर्त्य जयायै गुल्फयोर्द्वयोः ॥ १८ ॥
त्रिगुणायेति रुद्राय भवान्यै जङ्घयोर्युगम् ।
शिवां रुद्रेश्वरायै च विजयायेति जानुनी ।
सङ्कीर्त्य हरिकेशाय तथोरू वरदे नमः ॥ १९ ॥
ईशायै च कटिं देव्याः शङ्करायेति शङ्करम् ।
कुक्षिद्वयञ्च कोटव्यै शूलिने शूलपाणये ॥ २० ॥
मङ्गलायै नमस्तुभ्यमुदरं चाभि पूजयेत् ।
सर्वात्मने नमो रुद्रमीशान्यै च कुचद्वयम् ॥ २१ ॥
शिवं वेदात्मने तद्वद्रुद्राण्यै कण्ठमर्चयेत् ।
त्रिपुरघ्नाय विश्वेशमनन्तायै करद्वयम् ॥ २२ ॥
त्रिलोचनाय च हरं बाहुकालानलप्रिये ।
सौभाग्यभवनायेति भूषणानि सदार्चयेत् ।
स्वाहा स्वधायै च मुखमीश्वरायेति शूलिनम् ॥ २३ ॥
अशोकमधुवासिन्यै पूज्यावोष्ठौ च भूतिदौ ।
स्थाणवे तु हरं तद्वदास्यं चन्द्रमुखप्रिये ॥ २४ ॥
नमोऽर्द्धनारीशहरमसिताङ्गीति नासिकाम् ।
नम उग्राय लोकेशं ललितेति पुनर्भ्रुवौ ॥ २५ ॥
शर्वाय पुरहन्तारं वा सव्येतु तथालकान् ।
नमः श्रीकण्ठनाथायै शिवकेशांस्ततोऽर्चयेत् ।
भीमोग्रसमरूपिण्यै शिरः सर्वात्मने नमः ॥ २६ ॥
शिवमभ्यर्च्य विधिवत्सौभाग्याष्टकमग्रतः ।
स्थापयेद् घृतनिष्पावकुसुम्भक्षीरजीरकान् ॥ २७ ॥
रसराजञ्च लवणं कस्तुम्ब च मथाष्टकम् ।

दत्तं सौभाग्यमित्यस्मात् सौभाग्याष्टकमित्यतः ॥२८॥
एवं निवेद्य तत्सर्वमग्रतः शिवयोः पुनः।
रात्रौ शृङ्गोदकं प्राश्य तद्वद् भूमावरिन्दम ! ॥२९॥
पुनः प्रभाते तु तथा कृतस्नानजपः शुचिः।
संपूज्य द्विजदाम्पत्यं वस्त्रमाल्यविभूषणैः ॥ ३० ॥
सौभाग्याष्टकसंयुक्तं सुवर्णचरणद्वयम्।
प्रीयतामत्र ललिता ब्राह्मणाय निवेदयेत् ॥ ३१ ॥
एवं सम्वत्सरं यावत् तृतीयायां सदा मनो !।
कर्त्तव्यं विधिवद् भक्त्या सर्वसौभाग्यमीप्सुभिः ॥३२
प्राशने दानमन्त्रे च विशेषोऽयन्निबोध मे।
शृङ्गोदकञ्चैत्रमासे वैशाखे गोमयं पुनः ॥ ३३ ॥
ज्यैष्ठे मन्दारकुसुमं विल्वपत्रं शुचौ स्मृतम्।
श्रावणे दधि सम्प्राश्यं नभस्ये च कुशोदकम्।
क्षीरमाश्वयुजि मासि कार्त्तिके पृषदाज्यकम्।
मार्गे मासे तु गोमूत्रं पौषे संप्राशयेद् घृतम् ॥ ३५ ॥
माघे कृष्णतिलं तद्वत् पञ्चगव्यञ्च फाल्गुने।
ललिता विजया भद्रा भवानी कुमुदा शिवा ॥ ३६ ॥
वासुदेवी तथा गौरी मङ्गला कमला सती।
उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत् ॥३७॥
मल्लिकाशोककमलं कदम्बोत्पलमालतीः।
कुब्जकं करवीरञ्च वाणम् म्लानकुङ्कुमम् ॥ ३८ ॥
सिन्दुवारञ्च सर्वेषु मासेषु क्रमशः स्मृतम्।
जपाकुसुम्भकुसुमं मालती शतपत्रिका ॥ ३९ ॥
यथालाभं प्रशस्तानि करवीरञ्च सर्वदा।

एवं सम्वत्सरं यावदुपोष्य विधिवन्नरः ॥ ४० ॥
स्त्रीभक्ता वा कुमारी वा शिवमभ्यर्च्य भक्तितः ।
व्रतान्ते शयनं दद्यात् सर्वोपस्करसंयुतम् ॥ ४१ ॥
उमा महेश्वरं हैमं वृषभञ्च गवा सह ।
स्थापयित्वाथ शयने ब्राह्मणाय निवेदयेत् ॥ ४२ ॥
अन्यान्यपि यथाशक्त्या मिथुनान्यम्बरादिभिः ।
धान्यालङ्कारगोदानैरन्यैर्धनसञ्चयैः ।
वित्तशाठ्येन रहितः पूजयेत् गतविस्मयः ॥ ४३ ॥
एवं करोति यः सम्यक् सौभाग्यशयनव्रतम् ।
सर्वान् कामानवाप्नोति पदमत्यन्तमश्नुते ।
फलस्यैकस्य त्यागेन व्रतमेतत्समाचरेत् ॥ ४४ ॥
य इच्छन् कीर्तिमाप्नोति प्रतिमासं नराधिप ।
सौभाग्यारोग्यरूपायुर्वस्त्रालङ्कारभूषणैः ।
न वियुक्तो भवेद्राजन् ! नवार्बुदशतत्रयम् ॥ ४५ ॥
यस्तु द्वादश वर्षाणि सौभाग्यशयनव्रतम् ।
करोति सप्त चाष्टौ वा श्रीकण्ठभवनेऽमरैः ।
पूज्यमानो वसेत् सम्यक् यावत्कल्पायुतत्रयम् ॥ ४६ ॥
नारी वा कुरुते वापि कुमारी वा नरेश्वर ! ।
सापि तत्फलमाप्नोति देव्यनुग्रहलालिता ॥ ४७ ॥
शृणुयादपि यश्चैव प्रदद्यादथ वा मतिम् ।
सोऽपि विद्याधरो भूत्वा स्वर्गलोके चिरं वसेत् ॥ ४८ ॥
इदमिह मदनेन पूर्वमिष्टं शतधनुषा कृतवीर्यसूनुना च ।
कृतमथ वरुणेन नन्दिना वा किमु जननाथ ततो यदुद्भवः स्यात् ४९

---

# अथ षष्टितमोऽध्यायः ।

नारद उवाच । भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।
तपः सत्यश्च सप्तैते देवलोकाः प्रकीर्तिताः ॥ १ ॥
पर्यायेण तु सर्वेषामाधिपत्यं कथं भवेत् ।
इह लोके शुभं रूपमायुः सौभाग्यमेव च ।
लक्ष्मीश्च विपुला नाथ ! कथं स्यात् पुरसूदन ! ॥ २ ॥
पुरा हुताशनः सार्द्धं मारुतेन महीतले ।
आदिष्टः पुरुहूतेन विनाशाय सुरद्विषाम् ॥ ३ ॥
निर्दग्धेषु ततस्तेन दानवेषु सहस्रशः ।
तारकः कमलाक्षश्च कालदंष्ट्रः परावसुः ।
विरोचनश्च संग्रामादपलायंस्तपोधन ! ॥ ४ ॥
अम्भः सामुद्रमाविश्य सन्निवेशमकुर्वत ।
अशक्या इति तेऽप्यग्निमारुताभ्यामुपेक्षिताः ॥ ५ ॥
ततः प्रभृति ते देवान् मनुष्यान् सह जङ्गमान् ।
संपीड्य च मुनीन् सर्वान् प्रविशन्ति पुनर्जलम् ॥ ६ ॥
एवं वर्षसहस्राणि वीराः पञ्च च सप्त च ।
जलदुर्गबलाद्ब्रह्मन् ! पीडयन्ति जगत्त्रयम् ॥ ७ ॥
ततः परमथो वह्निमारुतावमराधिपः ।
आदिदेशाचिरादम्बु निधिरेष विशोष्यताम् ॥ ८ ॥
यस्मादस्मद्द्विषामेष शरणं वरुणालयः ।
तस्माद्भवद्भ्यामद्यैव क्षयमेष प्रणीयताम् ॥ ९ ॥
तावूचतुस्ततः शक्रमुभौ शम्बरसूदनम् ।
अधर्म्म एष देवेन्द्र ! सागरस्य विनाशनम् ॥ १० ॥
यस्माज्जीवनिकायस्य महतः संक्षयो भवेत् ।
तस्मान्न पापमद्यावाङ्करवावः पुरन्दर ! ॥ ११ ॥

यस्य योजनमात्रेऽपि जीवकोटिशतानि च ।
निवसन्ति सुरश्रेष्ठ ! स कथं नाशमर्हति ॥ १२ ॥
एवमुक्तः सुरेन्द्रस्तु कोपात् संरक्तलोचनः ।
उवाचेदं वचोरोषान्निर्दहन्निव पावकम् ॥ १३ ॥
न धर्माधर्मसंयोगं प्राप्नुवन्त्यमराः क्वचित् ।
भवतस्तु विशेषेण माहात्म्यस्याधितिष्ठति ॥ १४ ॥
महाजालहनं यस्मान्मारुतेन समन्वया ।
मुनिव्रतमहिंसादि परिगृह्य त्वया कृतम् ।
धर्मार्थशास्त्ररहितं प्रभुं प्रति विभावसो ! ॥ १५ ॥
तस्मादेकेन वपुषा मुनिरूपेण मानुषे ।
मारुतेन समं लोके तव जन्म भविष्यति ॥ १६ ॥
यदा च मानुषत्वेऽपि त्वयागस्त्येन शोषितः ।
भविष्यत्युदधिर्वह्ने ! तदा देवत्वमाप्स्यसि ॥ १७ ॥
इतीन्द्रशापात् पतितौ तत्क्षणात्तौ महीतले ।
अवाप्तावेकदेहेन कुम्भाज्जन्म तपोधन ! ॥ १८ ॥
मित्रावरुणयोर्वीर्याद्वसिष्ठस्यानुजोऽभवत् ।
अगस्त्य इत्युग्रतपाः सम्बभूव पुनर्मुनिः ॥ १९ ॥
नारद उवाच । सम्भूतः स कथं भ्राता वसिष्ठस्याभवन्मुनिः
कथञ्च मित्रावरुणौ पितरावस्य तौ स्मृतौ ।
जन्म कुम्भादगस्त्यस्य कथं स्यात् सुरसत्तम ! ॥ २० ॥
ईश्वर उवाच । पुरा पुराणपुरुषः कदाचिद् गन्धमादने ।
भूत्वा धर्मसुतो विष्णुश्चचार विपुलन्तपः ॥ २१ ॥
तपसा तस्य भीतेन विघ्नार्थं प्रेषितावुभौ ।
शक्रेण माधवानङ्गावप्सरोगणसंयुतौ ॥ २२

तदा तद्गीतवाद्येन माङ्गरागादिना हरिः।
न काममाधवाभ्याञ्च विषयान् प्रतिचुक्षुभे ॥ २३ ॥
तदा काममधुस्त्रीणां विषादमगमद्गणः।
संक्षोभाय ततस्तेषां स्वोरुदेशाद्वराग्रजः।
नारीमुत्पादयामास त्रैलोक्यजनमोहिनीम् ॥२४॥
संक्षुब्धास्तु तया देवास्तौ तु देववरावुभौ।
अप्सरोभिः समक्षं हि देवानामब्रवीद्धरिः ॥ २५ ॥
अप्सरा इति सामान्यादेवानामब्रवीद्धरिः।
उर्वशीति च नाम्नेयं लोके ख्यातिं गमिष्यति ॥ २६ ॥
ततः कामयमानेन मित्रेणाहूय सोर्वशी।
उक्ता मां रमयस्वेति बाढमित्यब्रवीत्तु सा ॥ २७ ॥
गच्छन्ती चाम्बरं तद्वत् स्तोकमिन्दीवरेक्षणा।
वरुणेन धृता पश्चात् वरुणं नाभ्यनन्दत ॥ २८ ॥
मित्रेणाहं वृता पूर्वमद्य भार्या न ते विभो!।
उवाच वरुणश्चित्तं मयि सन्न्यस्य गम्यताम् ॥ २९ ॥
गतायां बाढमित्युक्ता मित्रः शापमदात्तदा।
तस्यै मानुषलोके त्वं गच्छ सोमसुतात्मजम् ॥ ३० ॥
भजस्वेति यतोवेश्या धर्म्म एष त्वया कृतः।
जलकुम्भे ततो वीर्यं मित्रेण वरुणेन च।
प्रक्षिप्त मथसञ्जातौ द्वावेव मुनिसत्तमौ ॥ ३१ ॥
निमिर्नाम सह स्त्रीभिः पुरा द्यूतमदीव्यत।
तत्रान्तरे ह्याजगाम वसिष्ठो ब्रह्मसम्भवः ॥ ३२ ॥
तस्य पूजामकुर्वंस्तं शशाप समुनिर्नृपम्।
विदेहस्त्वं भवस्वेति ततस्तेनाप्यसौ मुनिः ॥ ३३ ॥

अन्योन्यशापाच्च तयोर्विगते इव चेतसी ।
जग्मतुः शापमानाय ब्रह्माणं जगतः पतिम् ॥ ३४ ॥
अथ ब्रह्मण आदेशाज्जीवनेष्ववसन्निमिः ।
निमेषाः स्युश्च लोकानां तद्विश्रामाय नारद ! ॥ ३५ ॥
वसिष्ठोऽप्यभवत्तस्मिन् जलकुम्भे च पूर्ववत् ।
ततः स्फीतश्चतुर्बाहुः साक्षसूत्रकमण्डलुः ।
अगस्त्य इति शान्तात्मा बभूव ऋषिसत्तमः ॥ ३६ ॥
मलयस्यैकदेशे तु वैखानसविधानतः ।
सभार्यः संवृतो विप्रैस्तपश्चक्रे सुदुश्चरम् ॥ ३७ ॥
ततः कालेन महता तारकादतिपीडितम् ।
जगद्वीक्ष्य स कोपेन पीतवान्वरुणालयम् ॥ ३८ ॥
ततोऽस्य वरदाः सर्वे बभूवुः शङ्करादयः ।
ब्रह्मा विष्णुश्च भगवान् वरदानाय जग्मतुः ।
वरं वृणीष्व भद्रन्ते यदभीष्टश्च वै मुने ! ॥ ३९ ॥
अगस्त्य उवाच । यावद् ब्रह्मसहस्राणां पञ्चविंशतिकोटयः ।
वैमानिको भविष्यामि दक्षिणाचलवर्त्मनि ॥ ४० ॥
मद्विमानोदये कुर्याद्यः कश्चित् पूजनं मम ।
स सप्तलोकाधिपतिः पर्यायेण भविष्यति ॥ ४१ ॥
ईश्वर उवाच । एवमस्त्विति तेऽप्युक्त्वा जग्मुर्देवा यथागतम् ।
तस्मादर्घः प्रदातव्यो ह्यगस्त्यस्य सदा बुधैः ॥ ४२ ॥
नारद उवाच । कथमर्घप्रदानन्तु कर्तव्यं तस्य वै विभो ! ।
विधानं यदगस्त्यस्य पूजने तद्वदस्व मे ॥ ४३ ॥
ईश्वर उवाच । प्रत्यूषसमये विद्वान् कुर्यादस्योदये निशि ।
स्नानं शुक्लतिलैस्तद्वत् शुक्लमाल्याम्बरो गृही ॥ ४४ ॥

स्नापयेदव्रणं कुम्भं माल्यवस्त्रविभूषितम् ।
पञ्चरत्नसमायुक्तं घृतपात्रसमन्वितम् ॥ ४५ ॥

अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमित्यायतबाहुदण्डम् ।
चतुर्मुखं कुम्भमुखे निधाय धान्यानि सप्ताम्बरसंयुतानि॥४६

सकांस्यपात्राक्षतशुक्तियुक्तं मन्त्रेण दद्यात् द्विजपुङ्गवाय ।
उत्क्षिपन्न लम्बोदरदीर्घबाहु मनन्यचेता यमदिङ्मुखः सन्॥४७

श्वेताञ्च दद्याद्यदि शक्तिरस्ति रौप्यैः खुरैर्हेममुखीं सवत्सां ।
धेनुं नरः क्षीरवतीं प्रणम्य सवस्त्रघण्टाभरणां द्विजाय ॥४८॥

आसप्तरात्रोदयमेतदस्य दातव्य मेतत् सकलं नरेण ।
यावत्समाः सप्तदशाथ वास्युरथोर्ध्वमप्यत्र वदन्ति केचित् ॥४९॥

काशपुष्पप्रतीकाश ! अग्निमारुतसम्भव ! ।
मित्रावरुणयोः पुत्र ! कुम्भयोने ! नमोऽस्तु ते ।
प्रत्यहन्तु फलैर्योगमेवं कुर्वन्न सीदति ॥ ५० ॥

होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम् ।
अनेन विधिना यस्तु पुमानर्घ्यं निवेदयेत् ॥ ५१ ॥

इमं लोकं स चाप्नोति रूपारोग्यसमन्वितः ।
द्वितीयेन भुवर्लोकं स्वर्लोकञ्च ततः परम् ॥ ५२ ॥

सप्तैव लोकानाप्नोति सप्तार्घ्यान् यः प्रयच्छति ।
यावदायुश्च यः कुर्य्यात् परं ब्रह्माधिगच्छति ॥ ५३ ॥

इह पठति शृणोति वा य एतदुगुलमुनिप्रभवार्घ्यसंप्रदानम् ।
मतिमपिच ददाति सोऽपि विष्णोर्भवनगतः परिपूज्यतेऽमरौघैः ५४

---

## एकषष्टितमोऽध्यायः ।

मनुरुवाच । सौभाग्यारोग्यफलदममुत्राक्षयकारकम् ।

भुक्तिमुक्तिप्रदं देव ! तन्मे ब्रूहि जनार्दन ! ॥ १ ॥
मत्स्य उवाच । यदुमायाः पुरा देव ! उवाच पुरसूदनः ।
कैलासशिखरासीनां देव्या पृष्टस्तदा किल ॥ २ ॥
कथासु संप्रवृत्तासु धर्म्यासु ललितासु च ।
तदिदानीं प्रवक्ष्यामि भुक्तिमुक्तिफलप्रदम् ॥ ३ ॥
ईश्वर उवाच । शृणुष्वावहिता देवि ! तथैवानन्तपुण्यकृत् ।
नराणामथ नारीणामाराधनमनुत्तमम् ॥ ४ ॥
नभस्ये वाथ वैशाखे पुष्यमार्गशिरस्य च ।
शुक्लपक्षे तृतीयायां सुस्नातो गौरसर्षपैः ॥ ५ ॥
गोरोचनं सगोमूत्रमुष्णं गोशकृतं तथा ।
दधिचन्दनसंमिश्रं ललाटे तिलकं न्यसेत् ।
सौभाग्यारोग्यदं यस्मात् सदा च ललिता प्रियम् ॥ ६ ॥
प्रतिपक्षं तृतीयासु पुमानापीतवाससी ।
धारयेदथ रक्तानि नारी चेदथ संयता ॥ ७ ॥
विधवा धातु रक्तानि कुमारी शुक्लवाससी ।
देवीं तु पञ्चगव्येन ततः क्षीरेण केवलम् ।
स्नापयेन्मधुना तद्वत् पुष्पगन्धोदकेन च ॥ ८ ॥
पूजयेच्छुक्लपुष्पैश्च फलैर्नानाविधैरपि ।
धान्यकाजाजिलवणैर्गुडक्षीरघृतान्वितैः ॥ ९ ॥
शुक्लाक्षततिलैरर्च्चान्ततो देवीं सदार्चयेत् ।
पादाद्यभ्यर्चनं कुर्य्यात् प्रतिपक्षं वरानने ! ॥ १० ॥
वरदायै नमः पादौ तथा गुल्फौ नमः श्रियै ।
अशोकायै नमो जङ्घे पार्वत्यै जानुनी तथा ॥ ११ ॥
ऊरू मङ्गलकारिण्यै वामदेव्यै तथा कटिम् ।

पयोधरायै जठरमुरः कामश्रियै नमः ॥ १२ ॥
करौ सौभाग्यदायिन्यै बाहू हरमुखं श्रियै ।
मुखं दर्पणवासिन्यै स्मरदायै स्मितं नमः ॥ १३ ॥
गौर्यै नम स्तथा नासामुत्पलायै च लोचने ।
तुष्ट्यै ललाटमलकान् कात्यायन्यै शिर स्तथा ॥१४ ॥
नमो गौर्यै नमो धिष्ण्यै नमः कान्त्यै नमः श्रियै ।
रम्भायै ललितायै च वासुदेव्यै नमो नमः ॥ १५ ॥
एवं संपूज्य विधिवदग्रतः पद्ममालिखेत् ।
पत्रैर्द्वादशभिर्युक्तं कुङ्कुमेन स कर्णिकम् ॥ १६ ॥
पूर्वेण विन्यसेद्गौरीमपर्णाञ्च ततः परम् ।
भवानीं दक्षिणे तद्वद्रुद्राणीञ्च ततः परम् ॥ १७ ॥
विन्यसेत् पश्चिमे सौम्यां सदा मदनवासिनीम् ।
वायव्ये पाटला मुग्रामन्तरेण ततोऽप्युमाम् ॥ १८ ॥
मध्ये यथा स्वभासाङ्गामङ्गलां कुमुदां सतीम् ।
रुद्रञ्च मध्ये संस्थाप्य ललितां कर्णिकोपरि ।
कुसुमैरक्षतैर्वाभिर्नमस्कारेण विन्यसेत् ॥ १९ ॥
गीतमङ्गलनिर्घोषान् कारयित्वा सुवासिनीः ।
पूजयेद्रक्तवासोभीरक्तमाल्यानुलेपनैः ।
सिन्दूरं स्नानचर्णञ्च तासां शिरसि पातयेत् ॥ २० ॥
सिन्दूरकुङ्कुमस्नानमतीवेष्टतमं यतः ।
तथोपदेष्टारमपि पूजयेद्यत्नतोगुरुम् ।
न पूज्यते गुरुर्यत्र सर्वास्तत्राफलाः क्रियाः ॥ २१ ॥
नभस्ये पूजयेद् गौरीं मुत्पलैरसितैः सदा ।
बन्धुजीवैराश्वयुजि कार्तिके शतपत्रकैः ॥ २२ ॥

जातीपुष्पैर्मार्गशीर्षे पौषे पीतैः कुरण्टकैः ।
कुन्दकुङ्कुमपुष्पैस्तु देवीं माघे तु पूजयेत् ।
सिन्दुवारेण जात्या वा फाल्गुनेऽप्यर्चयेदुमाम् ॥ २३ ॥
चैत्रे तु मल्लिकाशोकैर्वैशाखे गन्धपाटलैः ।
ज्यैष्ठे कमलमन्दारैराषाढे च नवाम्बुजैः ।
कदम्बैरथ मालत्या श्रावणे पूजयेत्सदा ॥ २४ ॥
गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् ।
बिल्वपत्रार्कपुष्पञ्च यवान् गोशृङ्गवारि च ॥ २५ ॥
पञ्चगव्यञ्च बिल्वञ्च प्राशयेत् क्रमशस्तदा ।
एतद्भाद्रपदाद्यन्तु प्राशनं समुदाहृतम् ॥ २६ ॥
प्रतिपक्षञ्च मिथुनं तृतीयायां वरानने ।
पूजयित्वार्चयेद्भक्त्या वस्त्रमाल्यानुलेपनैः ।
पुंसः पीताम्बरे दद्यात् स्त्रियै कौसुम्भवाससी ॥ २७ ॥
निष्पावाजाजिलवणमिक्षुदण्डगुडान्वितम् ।
तस्यै दद्यात् फलं पुष्पं सुवर्णोत्पलसंयुतम् ॥ २८ ॥
यथा न देवि ! देवेशस्त्वां परित्यज्य गच्छति ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥ २९ ॥
कुमुदा विमलानन्ता भवानी च सुधा शिवा ।
ललिता कमला गौरी सती रम्भाथ पार्वती ॥ ३० ॥
नभस्यादिषु मासेषु प्रीयतामित्युदीरयेत् ।
व्रतान्ते शयनं दद्यात् सुवर्णकमलान्वितम् ॥ ३१ ॥
मिथुनानि चतुर्विंशद्दश द्वौ च समर्चयेत् ।
अष्टौ वाप्यथ वा पुनश्चानुमासं समर्चयेत् ॥ ३२ ॥
पूर्वं दत्त्वा तु गुरवे शेषानभ्यर्चयेत् बुधः ।

उमानन्त तृतीयैषा सदानन्तफलप्रदा ॥ २३ ॥
सर्वपापहरा देवि! सौभाग्यारोग्यवर्धिनीम्।
न चैनां वित्तशाठ्येन कदाचिदपि लङ्घयेत्।
नरो वा यदि वा नारी वित्तशाठ्यात् पतत्यधः ॥२४॥
गर्भिणी सूतिकानक्तं कुमारी वाथ रोगिणी।
यद्यशुद्धा तदान्येन कारयेत् प्रयता स्वयम् ॥ २५ ॥
इमामनन्तफलदां यः तृतीयां समाचरेत्।
कल्पकोटिशतं साग्रं शिवलोके महीयते ॥ २६ ॥
वित्तहीनोऽपि कुरुते वर्षत्रयमुपोषणैः।
पुष्पमन्त्रविधानेन सोऽपि तत् फलमाप्नुयात् ॥ २७ ॥
नारी वा कुरुते यातु कुमारी विधवाथ वा।
सापि तत्फलमाप्नोति गौर्यनुग्रहलालिता ॥ २८ ॥
इति पठति शृणोति वा य इत्थं गिरितनयाव्रतमिन्द्रवाससंस्थः।
मतिमपि च ददाति सोऽपि देवैरमरवधूजनकिन्नरैश्च पूज्यः ॥२९॥

---

अथ द्विषष्टितमोऽध्यायः।

अथान्यामपि वक्ष्यामि तृतीयां पापनाशिनीम्।
रसकल्याणिनीमेतां पुराकल्पविदो विदुः ॥ १ ॥
माघमासे तु संप्राप्ते तृतीयां शुक्लपक्षतः।
प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत् ॥ २ ॥
स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च।
दक्षिणाङ्गानि संपूज्य ततो वामानि पूजयेत् ॥३ ॥
ललितायै नमो देव्याः पादौ गुल्फौ ततोऽर्चयेत्।

जङ्घाजानुं तथा शम्भोस्तथैवोरुं श्रियै नमः ॥ ४ ॥
मदालसायै तु कटिममलायै तथोदरम् ।
स्तनौ मदनवासिन्यै कुमुदायै च कन्धराम् ॥ ५ ॥
भुजं भुजाग्रं माधव्यै कमलायै मुखस्मिते ।
भ्रूललाटे च रुद्राण्यै शङ्करायै तथालकान् ॥ ६ ॥
मुकुटं विश्ववासिन्यै शिरः कान्त्यै तथार्चयेत् ।
मदनायै ललाटन्तु मोहनायै पुनर्भ्रुवौ ॥ ७ ॥
नेत्रे चन्द्रार्धधारिण्यै तुष्ट्यै च वदनं पुनः ।
उत्कण्ठिन्यै नमः कण्ठममृतायै नमः स्तनौ ॥ ८ ॥
रम्भायै वामकुक्षिञ्च विशोकायै नमः कटिम् ।
हृदयं मन्मथाधिपत्यै पाटलायै तथोदरम् ॥ ९ ॥
कटिं सुरतवासिन्यै तथोरुचम्पकप्रिये ! ।
जानुजङ्घे नमो गौर्यै गायत्र्यै घुटिके नमः ॥ १० ॥
धराधरायै पादौ तु विश्वकायै नमः शिरः ।
नमो भवान्यै कामिन्यै कामदेव्यै जगत्प्रिये ! ॥ ११ ॥
एवं सम्पूज्य विधिवत् द्विजदाम्पत्यमर्चयेत् ।
भोजयित्वान्नपानेन मधुरेण विमत्सरः ॥ १२ ॥
जलपूरितं तथा कुम्भं शुक्लाम्बरयुगद्वयम् ।
दत्त्वा सुवर्णकमलं गन्धमाल्यैः समर्चयेत् ॥ १३ ॥
प्रीयतामत्र कुमुदा गृह्णीयाल्लवणव्रतम् ।
अनेन विधिना देवीं मासि मासि समर्चयेत् ॥ १४ ॥
लवणं वर्जयेन्माघे फाल्गुने च गुडं पुनः ।
तवराजं तथा चैत्रे वर्ज्यं च मधुमाधवे ॥ १५ ॥
पानकं ज्येष्ठमासे तु आषाढे चाथ जीरकम् ।

श्रावणे वर्जयेत् क्षीरं दधिभाद्रपदे तथा ॥ १६ ॥
घृतमाश्वयुजि मद्वत् ऊर्जे वर्ज्यञ्च माक्षिकम् ।
धान्यकं मार्गशीर्षे तु पौषे वर्ज्या च शर्करा ॥ १७ ॥
व्रतान्ते करकं पूर्णमेतेषां माघि माघि च ।
दद्याद्विकालवेलायां पूर्णपात्रेण संयुतम् ॥ १८ ॥
लड्डुकान् श्वेतवर्त्तीश्च संयावमथ पूरिकाः ।
घारिकामप्यपूपांश्च पिष्टापूपांश्च मण्डकान् ॥ १८ ॥
क्षीरं शाकञ्च दध्यन्नमिण्डर्यो शोकवर्त्तिकाः ।
माघादि क्रमशो दद्यादेतानि करकोपरि ॥ २८ ॥
कुमुदा माधवी गौरी रम्भा भद्रा जया शिवा ।
उमा रतिः सती तद्वन्मङ्गला रतिलालसा ॥ २१ ॥
क्रमान्माघादि सर्व्वत्र प्रीयतामिति कीर्त्तयेत् ।
सर्व्वत्र पञ्चगव्येन प्राशनं समुदाहृतम् ।
उपवासी भवेन्नित्य मशक्तो नक्तमिष्यते ॥ २२ ॥
पुनर्माघे तु संप्राप्ते शर्करां करकोपरि ।
कृत्वा तु काञ्चनीं गौरीं पञ्चरत्नसमन्विताम् ॥ २३ ॥
हैमीमङ्गुष्ठमात्राञ्च साक्षसूत्रकमण्डलुम् ।
चतुर्भुजामिन्दुयुतां सितनेत्रपटावृताम् ॥ २४ ॥
तद्वद्गोमिथुनं शुक्लं सुवर्णास्यं सिताम्बरम् ।
सवस्त्रभाजनं दद्याद्भवानी प्रीयतामिति ॥ २५ ॥
अनेन विधिना यस्तु रसकल्याणिनीव्रतम् ।
कुर्य्यात्स सर्व्वपापेभ्यस्तत्क्षणादेव मुच्यते ॥ २६ ॥
नवार्बुदसहस्रन्तु न दुःखी जायते क्वचित् ।
सुवर्णकमलं गौरी मासि मासि ददत्क्वचित् ।

अग्निष्टोमसहस्रस्य यत् फलं तदवाप्नुयात् ॥ २७ ॥
नारी वा कुरुते यातु कुमारी वा वरानने ! ।
विधवा वा तथा नारी सापि तत् फलमाप्नुयात् ।
सौभाग्यारोग्यसंपन्ना गौरी लोके महीयते ॥ २८ ॥
इति पठति शृणोति यः प्रसङ्गात्
कलिकलुषविमुक्तः पार्वती लोकमेति ।
मतिमपि च नराणां यो ददाति प्रियार्थम्
विबुधपतिविमाने नायकः स्यादमोघः ॥ २९ ॥

---

त्रिषष्टितमोऽध्यायः ।

ईश्वर उवाच । तथैवान्यां प्रवक्ष्यामि तृतीयां पापनाशिनीम् ।
नाम्ना च लोके विख्यातां आर्द्रानन्दकरीमिमाम् ॥१॥
यदा शुक्लतृतीयायामाषाढर्क्षं भवेत् क्वचित् ।
ब्रह्मर्क्षं वा मृगर्क्षं वा हस्तो मूलमथापि वा ।
दर्भगन्धोदकैः स्नानं तदा सम्यक् समाचरेत् ॥२॥
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
भवानीमर्चयेद्भक्त्या शुक्लपुष्पैः सुगन्धिभिः ।
महादेवेन सहितामुपविष्टां महासने ॥ ३ ॥
वासुदेव्यै नमः पादौ शङ्कराय नमो हरम् ।
जङ्घे शोकविनाशिन्यै आनन्दाय नमः प्रभो ! ॥ ४ ॥
रम्भायै पूजयेदूरू शिवाय च पिनाकिनः ।
अदित्यै च कटिं देव्याः शूलिनः शूलपाणये ॥ ५ ॥
माधव्यै च तथा नाभिमथ शम्भोर्भवाय च ।
स्तनावानन्दकारिण्यै शङ्करस्येन्दुधारिणे ॥ ६ ॥

उत्कण्ठिन्यै नमः कण्ठं नीलकण्ठाय वै हरम् ।
करावुत्पलधारिण्यै रुद्राय च जगत्पते ।।
बाहू च परिरम्भिण्यै त्रिशूलाय हराय च ॥ ७ ॥
देव्या मुखं विलासिन्यै वृषेशाय पुनर्विभोः ।
स्मितं सस्मेरलीलायै विश्ववक्त्राय वै विभोः ॥ ८ ॥
नेत्रे मदनवासिन्यै विश्वधाम्ने त्रिशूलिनः ।
भ्रुवौ नृत्यप्रियायै तु ताण्डवेशाय शूलिनः ॥ ९ ॥
देव्या ललाटमिन्द्राण्यै हव्यवाहाय वै विभोः ।
स्वाहायै मुकुटं देव्या विभोर्गङ्गाधराय वै ॥ १० ॥
विश्वकायौ विश्वमुखौ विश्वपादकरौ शिवौ ।
प्रसन्नवदनौ वन्दे पार्वतीपरमेश्वरौ ॥ ११ ॥
एवं संपूज्य विधिवदग्रतः शिवयोः पुनः ।
पद्मोत्पलानि रजसा नानावर्णेन कारयेत् ॥ १२ ॥
शङ्खचक्रे सकटके स्वस्तिकाङ्कुशचामरान् ।
यावन्तः पांसवस्तत्र रजसः पतिता भुवि ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥ १३ ॥
चत्वारि घृतपात्राणि सहिरण्यानि शक्तितः ।
दत्त्वा द्विजाय करकमुदकान्नसमन्वितम् ।
प्रतिपक्षं चतुर्मासं यावदेतन्निवेदयेत् ॥ १४ ॥
ततस्तु चतुरो मासान् पूर्ववत् करकोपरि ।
चत्वारि सक्तुपात्राणि तिलपात्राण्यतः परम् ॥ १५ ॥
गन्धोदकं पुष्पवारि चन्दनं कुङ्कुमोदकम् ।
अपक्वं दधि दुग्धञ्च गोशृङ्गोदकमेव च ॥ १७ ॥
पिष्टोदकं तथा वारि कुष्ठचूर्णान्वितं पुनः ।

उशीरसलिलं तद्वच्चचूर्णोदकं पुनः ॥ १७ ॥
तिलोदकस्य संप्राश्य स्वपेन्मार्गशिरादिषु ।
मासेषु पञ्चद्वितयं प्राशनं समुदाहृतम् ॥ १८ ॥
सर्वत्र शुक्लपुष्पाणि प्रशस्तानि सदार्चने ।
दानकाले च सर्वत्र मन्त्रमेतमुदीरयेत् ॥ १९ ॥
गौरी मे प्रीयतां नित्यमघनाशाय मङ्गला ।
सौभाग्यायास्तु ललिता भवानी सर्वसिद्धये ॥ २० ॥
संवत्सरान्ते लवणं गुडकुम्भञ्च सर्जिकाम् ।
चन्दनं नेत्रपट्टञ्च सहिरण्याम्बुजेन तु ॥ २१ ॥
उमामहेश्वरं हैमं तद्वदिक्षुफलैर्युतम् ।
सतूलावरणां शय्यां सविश्रामां निवेदयेत् ।
सपत्नीकाय विप्राय गौरी मे प्रीयतामिति ॥ २२ ॥
आर्द्रानन्दकरी नाम्ना तृतीयैषा सनातनी ।
यामुपोष्य नरो याति शम्भोर्यत्परमम्पदम् ॥ २३ ॥
इह लोके सदानन्दमाप्नोति धनसम्पदः ।
आयुरारोग्यसम्पन्नो न कश्चिच्छोकमाप्नुयात् ॥ २४ ॥
नारी वा कुरुते या तु कुमारी विधवा च या ।
सापि तत् फलमाप्नोति देव्यनुग्रहलालिता ॥ २५ ॥
प्रतिपक्षमुपोष्यैवं मन्त्रार्चनविधानवित् ।
रुद्राणी लोकमभ्येति पुनरावृत्तिदुर्लभम् ॥ २६ ॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ।
शक्रलोके स गन्धर्वैः पूज्यतेऽपि युगत्रयम् ॥ २७ ॥
आनन्ददां सकलदुःखहरां तृतीयाम्
या स्त्री करोत्यविधवाऽविधवाय कापि ।

सा खे गृहे सुखमतान्यनुभूय भूयो
गौरी पदं सुदयिता दयिता प्रयाति ॥ २८ ॥

---

अथ चतुःषष्टितमोऽध्यायः ।

ईश्वर उवाच । अथान्यामपि वक्ष्यामि तृतीयां सर्व्वकामदाम् ।
यस्यां दत्तं हुतं जप्तं सर्व्वं भवति चाक्षयम् ॥ १ ॥
वैशाखशुक्लपक्षे तु तृतीया ये ह्युपोषिता ।
अक्षयं फलमाप्नोति सर्व्वस्य सुकृतस्य च ॥ २ ॥
सा तथा कृत्तिकोपेता विशेषेण सुपूजिता ।
तत्र दत्तं हुतं जप्तं सर्व्वमक्षयमुच्यते ॥ ३ ॥
अक्षया सन्ततिस्तस्यास्तस्यां सुकृतमक्षयम् ।
अक्षतैश्च नराः स्नाता विष्णोर्दत्त्वा तथाक्षतान् ॥ ४ ॥
विप्रेषु दत्त्वा तानेव तथा सक्तून् सुसंस्कृतान् ।
यथान्नभुक् महाभागः फलमक्षयमश्नुते ॥ ५ ॥
एकामप्युक्तवत् कृत्वा तृतीयां विधिवन्नरः ।
एतासामपि सर्व्वासां तृतीयानां फलं भवेत् ॥ ६ ॥
तृतीयायां समभ्यर्च्च्य सोपवासो जनार्द्दनम् ।
राजसूयफलं प्राप्य गतिमग्र्याञ्च विन्दति ॥ ७ ॥

मनुरुवाच । मधुरा भारती केन व्रतेन मधुसूदन ! ।
तथैव जनसौभाग्यं मतिं विद्यासुकौशलम् ॥ १ ॥
अभेदश्चापि दम्पत्योस्तथा बन्धुजनेन च ।
आयुश्च विपुलं पुंसां तन्मे कथय माधव ! ॥ २ ॥

मत्स्य उवाच । सम्यक् पृष्टं त्वया राजन् । शृणु सारस्वतं व्रतम् ।
यस्य संकीर्त्तनादेव तुष्यतीह सरस्वती ॥ ३ ॥

यो यद्भक्तः पुमान् कुर्य्यात् एतद्व्रतमनुत्तमम् ।
तद्दिवसरादो सम्पूज्य विप्रानेतान् समाचरेत् ॥ ४ ॥
अथवादित्यवारेण ग्रहताराबलेन च ।
पायसं भोजयेद्विप्रान् कृत्वा ब्राह्मणवाचनम् ॥ ५ ॥
शुक्लवस्त्राणि दत्त्वा च शुक्लगन्धानुलेपनैः ।
गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥ ६ ॥
यथा न देवि ! भगवान् ब्रह्मलोके पितामहः ।
त्वां परित्यज्य तिष्ठेत तथा भव वरप्रदा ॥ ७ ॥
वेदाः शास्त्राणि सर्वाणि गीतनृत्यादिकञ्च यत् ।
न विहीनं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥ ८ ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टा प्रभामतिः ।
एताभिः पाहि अष्टाभि स्तनूभिर्मां सरस्वति ! ॥ ९ ॥
एवं सम्पूज्य गायत्रीं ब्राह्मीं चयनिवारिणीम् ।
शुक्लपुष्पाक्षतैर्भक्त्या सकमण्डलुपुस्तकाम् ।
मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्म्मवित् ॥ १० ॥
पञ्चम्यां प्रतिमञ्चैव पूजयेद्ब्रह्मवासिनीम् ।
तथैव तण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
क्षीरं दद्याद्विरञ्चैव गायत्री प्रीयतामिति ॥ ११ ॥
सन्ध्यायाञ्च तथा मौनमेतत् कुर्वन् समाचरेत् ।
नान्तरा भोजनं कुर्य्याद्यावन्मासा त्रयोदश ॥ १२ ॥
समाप्ते तु व्रते कुर्य्याद्भोजनं शुक्लतण्डुलैः ।
पूर्णं शक्तियुक्तञ्च दद्याद्विप्राय भोजनम् ॥ १३ ॥
देव्या वितानं घण्टाञ्च सितनेत्रे पयस्विनीम् ।
चन्दनं वस्त्रयुग्मञ्च दद्याच्च शिखरं पुनः ॥ १४ ॥

तथोपदेष्टारमपि भक्त्या संपूजयेत् गुरुम् ।
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ॥ १५ ॥
अनेन विधिना यस्तु कुर्यात्सारस्वतं व्रतम् ।
विद्यावानर्थसंयुक्तो रक्तकण्ठश्च जायते ॥ १६ ॥
सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते ।
नारी वा कुरुते या तु सापि तत् फलगामिनी ।
ब्रह्मलोके वसेद्राजन् ! यावत्कल्पायुतत्रयम् ॥ १७ ॥
सारस्वतं व्रतं यस्तु शृणुयादपि यः पठेत् ।
विद्याधरपुरे सोऽपि वसेत् कल्पायुतत्रयम् ॥ १८ ॥

---

अथ पञ्चषष्टितमोऽध्यायः ।

मनुरुवाच । चन्द्रादित्योपरागे तु यत्स्नानमभिधीयते ।
तदहं श्रोतुमिच्छामि द्रव्यमन्त्रविधानवित् ॥ १ ॥
मत्स्य उवाच । यस्य राशिं समासाद्य भवेद्ग्रहणसंप्लवः ।
तस्य स्नानं प्रवक्ष्यामि मन्त्रौषधविधानतः ॥ २ ॥
चन्द्रोपरागं सम्प्राप्य कृत्वा ब्राह्मणवाचनम् ।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥ ३ ॥
पूर्वमेवोपरागस्य समासाद्यौषधादिकम् ।
स्थापयेच्चतुरः कुम्भानव्रणान् सागरानिति ॥ ४ ॥
गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय चाक्षिपेत् ॥ ५ ॥
पञ्चगव्यञ्च कुम्भेषु पञ्चमुक्ताफलानि च ।
रोचनां पद्मशङ्खौ च पञ्चरत्नसमन्वितम् ॥ ६ ॥
स्फटिकं चन्दनं श्वेतं तीर्थवारि ससर्षपम् ।

राजदन्तं सकुमुदं तथैवोशीरगुग्गुलम्।
एतत्सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत् सुरान्॥ ७॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥ ८॥
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः।
सहस्रनयनश्चेन्द्रो ग्रहपीडां व्यपोहतु॥ ९॥
मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः।
चन्द्रोपरागसम्भूतां अग्निः पीडां व्यपोहतु॥ १०॥
यः कर्मसाक्षी भूतानां धर्मो महिषवाहनः।
यमश्चन्द्रोपरागोत्थां ममपीडां व्यपोहतु॥ ११॥
नागपाशधरो देवः साक्षान्मकरवाहनः।
स जलाधिपतिश्चन्द्रग्रह पीडां व्यपोहतु॥ १२॥
प्राणरूपेण यो लोकान् पाति कृष्णमृगप्रियः।
वायुश्चन्द्रोपरागोत्थां पीडामत्र व्यपोहतु॥ १३॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः।
चन्द्रोपरागकलुषं धनदो मे व्यपोहतु॥ १४॥
योऽसौ बिन्दुधरो देवः पिनाकी वृषवाहनः।
चन्द्रोपरागजां पीडां विनाशयतु शङ्करः॥ १५॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्ण्वर्कयुक्तानि तानि पापं दहन्तु वै॥ १६॥
एवमामन्त्र्य तैः कुम्भैरभिषिक्तो गुणान्वितैः।
ऋग्यजुःसामसन्त्रैश्च शुक्लमाल्यानुलेपनैः।
पूजयेद्वस्त्रगोदानैर्ब्राह्मणानिष्टदेवताः॥ १७॥
एतानेव ततोमन्त्रान् विलिख्याम्बरकान्वितान्।

यजमानोऽथ वा पश्चात् पञ्चरत्नसमन्वितान् ॥ १८ ॥
यजमानस्य शिरसि निदध्युर्द्विजोत्तमाः ।
ततोऽभिवादयेद्वेत्ता सुपरागानुगामिनोम् ॥ १९ ॥
प्राङ्मुखः पूजयित्वा तु नमस्येदिष्टदेवताम् ।
चन्द्रग्रहे विनिर्वृत्ते कृतगोदानमङ्गलः ।
कृतस्नानाय तत् पट्टं ब्राह्मणाय निवेदयेत् ॥ २० ॥
अनेन विधिना यस्तु ग्रहस्नानं समाचरेत् ।
न तस्य ग्रहपीडा स्यान्नच बन्धुजनक्षयः ॥ २१ ॥
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ।
सूर्यग्रहे सूर्यनाम सदा मन्त्रेषु कीर्तयेत् ॥ २२ ॥
अधिकाः पद्मरागाः स्युः कपिलाश्च सुशोभनाम् ।
प्रयच्छेच्च निशाम्यत्वे चन्द्रसूर्योपरागयोः ॥ २२ ॥
य इदं शृणुयान्नित्यं श्रावयेद्वाऽपि मानवः ।
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ २४ ॥

---

अथ षट्षष्टितमोऽध्यायः ।

नारद उवाच । किमुद्वेगाद्भुतं कृत्यमलक्ष्मीः केन हन्यते ।
मृतवत्साभिषेकादि कार्येषु च किमिष्यते ॥ १ ॥
श्रीभगवानुवाच । पुरा कृतानि पापानि फलन्त्यस्मिंस्तपोधन ।
रोगदौर्गत्यरूपेण तथैवेष्टवधेन च ॥ २ ॥
तद्विघाताय वक्ष्यामि सदाकल्याणकारकम् ।
सप्तमीस्नपनं नाम जनपीडाविनाशनम् ॥ ३ ॥
बालानां मरणं यत्र क्षीरपानां प्रदृश्यते ।
तद्वद्वृद्धे तराचाद्य यौवने चापिवर्तताम् ॥ ४ ॥

शान्तये तव वक्ष्यामि कृतवत्साभिषेचनम् ।
एतदेवाश्रु तोद्वेगचित्तभ्रमविनाशनम् ॥ ५ ॥
भविष्यति च वाराहो यत्र कल्पस्तपोधन ! ।
वैवस्वतश्च तत्रापि यदा तु मनुरुत्तमः ॥ ६ ॥
भविष्यति च तत्रैव पञ्चविंशतिमं यदा ।
कृतं नामयुगं तत्र हैहयान्वयवर्द्धनः ।
भविता नृपतिर्वीरः कृतवीर्यः प्रतापवान् ॥ ७ ॥
स सप्तद्वीपमखिलं पालयिष्यति भूतलम् ।
यावद्वर्षसहस्राणि सप्तसप्तति नारद ! ॥ ८ ॥
जातमात्रश्च तस्यापि यावत्पुत्रशतं तथा ।
च्यवनस्य तु शापेन विनाशमुपयास्यति ॥ ९ ॥
सहस्रबाहुश्च यदा भविता तस्य वै सुतः ।
कुरङ्गनयनः श्रीमान् स भ्रूतो नृपलक्षणैः ॥ १० ॥
कृतवीर्य्यस्तदाराध्य सहस्रांशुं दिवाकरम् ।
उपवासैर्व्रतैर्दिव्यैर्वेदसूक्तैश्च नारद ! ।
पुत्रस्य जीवनायालमेतत्स्नानमवाप्स्यति ॥ ११ ॥
कृतवीर्य्येण वै पृष्ट इदं वक्ष्यति भास्करः ।
धर्मेवदुष्टशमनं सदा कल्मषनाशनम् ॥ १२ ॥
सूर्य्य उवाच । अलं क्लेशेन महता पुत्रस्य नराधिप ! ।
भविष्यति चिरञ्जीवी किन्तु कल्मषनाशनम् ॥ १३ ॥
सप्तमी स्नपनं वक्ष्ये सर्वलोकहिताय वै ।
जातस्य मृतवत्सायाः सप्तमे मासि नारद ! ।
अथवा शुक्लपक्षस्या सैतत्सर्वं प्रशस्यते ॥ १४ ॥
ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनम् ।

बालस्य जन्मनक्षत्रं वर्जयेत्तां तिथिं बुधः ।
तद्वद्रुद्रेतराणाञ्च कृत्यं स्यादितरेषु च ॥ १५ ॥
गोमयेनानुलिप्तायां भूमावेकाग्निवत्तदा ।
तण्डुलै रक्तशालीयैश्चरुं क्षीरसंयुतम् ।
निर्वपेत् सूर्य्यरुद्राभ्यां तन्मन्त्राभ्यां विधानतः ॥१६॥
कीर्त्तयेत् सूर्य्यदैवत्यं सप्तर्चिं च घृताहुतीः ।
जुहुयाद्रुद्रसूक्तेन तद्वद्रुद्राय नारद ! ॥ १७ ॥
होतव्याः समिधश्चात्र तथैवार्कपलाशयोः ।
यवकृष्णतिलैर्होमः कर्त्तव्योऽष्टशतं पुनः ॥ १८ ॥
व्याहृतीभि स्तथाज्येन तथैवाष्टशतं पुनः ।
हुत्वा स्नानञ्च कर्त्तव्यं मङ्गलं येन धीमता ॥ १९ ॥
विप्रेण वेदविदुषा विधिवद्दर्भपाणिना ।
स्थापयित्वा तु चतुरः कुम्भान् कोणेषु शोभनान् ॥२०॥
पञ्चमञ्च पुनर्मध्ये दध्यक्षतविभूषितम् ।
स्थापयेदव्रणं कुम्भं सप्तर्चेनाभिमन्त्रितम् ॥ २१ ॥
सौरेण तीर्थतोयेन पूर्णं रत्नसमन्वितम् ।
सर्वान् सर्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान् ।
पञ्चरत्नफलैः पुष्पैर्वासोभिः परिवेष्टयेत् ॥ २२ ॥
गजाश्वरथ्यावल्मीकात्सङ्गमाद्ध्रदगोकुलात् ।
संगृह्य मृदमानीय सर्वेष्वेव विनिक्षिपेत् ॥ २२ ॥
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम् ।
गृहीत्वा ब्राह्मणस्तत्र सौरान्मन्त्रानुदीरयेत् ॥ २४ ॥
नारीभिः सप्तसंख्याभिरव्यङ्गाङ्गीभिरत्र च ।
पूजिताभिर्यथाशक्त्या माल्यवस्त्रविभूषणैः ।

सर्व्विप्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनम् ॥ २५ ॥
दीर्घायुरस्तु बालोऽयं जीवत्पुत्रा च भामिनी ।
आदित्यश्चन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः ॥ २६ ॥
सशक्रा लोकपाला वै ब्रह्मविष्णुमहेश्वराः ।
एते चान्ये च देवौघाः सदा पान्तु कुमारकम् ॥ २७॥
मित्रोशनिर्वा हुतभुक् ये च बालग्रहाः क्वचित् ।
पीड़ां कुर्वन्तु बालस्य मा मातुर्जनकस्य वै ॥ २८॥
ततः शुक्लाम्बरधरा कुमारपतिसंयुता ।
सप्तकं पूजयेद्भक्त्या स्त्रीणामथ गुरुं पुनः ॥ २९ ॥
काञ्चनीञ्च ततः कुर्यात् ताम्रपात्रोपरि स्थिताम् ।
प्रतिमां धर्म्मराजस्य गुरवे विनिवेदयेत् ॥ ३० ॥
वस्त्रकाञ्चनरत्नाद्यैर्भक्ष्यैः सघृतपायसैः ।
पूजयेद्ब्राह्मणांस्तद्वद्वित्तशाठ्यविवर्जितः ॥ ३१ ॥
भुक्त्वा च गुरुणा चैव मुच्चार्य्या मन्त्रसन्ततिः ।
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं सुखी ॥ ३२ ॥
यत् किञ्चिदस्य दुरितं तत् क्षिप्तं वडवानले ।
ब्रह्मा रुद्रो वसुः स्कन्दो विष्णुः शक्रो हुताशनः ॥ ३३ ॥
रक्षन्तु सर्व्वे दुष्टेभ्यो वरदाः सन्तु सर्व्वदा ।
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम् ॥ ३४ ॥
शक्तितः कपिलां दद्यात् प्रणम्य च विसर्जयेत् ।
चरुञ्च पुत्रसहिता प्रणम्य रविशङ्करौ ॥ ३५ ॥
हुतशेषं तदाश्नीयादादित्याय नमोऽस्त्विति ।
इदमेवाद्भुतोद्वेगदुःस्वप्नेषु प्रशस्यते ॥ ३६ ॥
कर्त्तुर्जन्मदिनर्क्षञ्च त्यक्त्वा संपूजयेत् सदा ।

शान्त्यर्थं पञ्चसप्तम्यामेतत् कुर्वन्न सीदति ॥ ३७ ॥
सद्दानेन विधानेन दीर्घायुरभवन्नरः ।
सम्वत्सराणां प्रयुतं शशास पृथिवीमिमाम् ॥ ३८ ॥
पुण्यं पवित्रमायुष्यं सप्तमीस्नपनं रविः ।
कथयित्वा द्विजश्रेष्ठ ! तत्रैवान्तरधीयत ॥ ३९ ॥
एतत् सर्वं समाख्यातं सप्तमीस्नानमुत्तमम् ।
सर्वदुष्टोपशमनं बालानां परमं हितम् ॥ ४० ॥
आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ईश्वरात् ज्ञानमिच्छेत् मोक्षमिच्छेज्जनार्दनात् ॥४१॥
एतन्महापातकनाशनं स्यात्परं हितं बालविवर्द्धनञ्च ।
शृणोति यश्चैनमनन्यचेतास्तस्यापि सिद्धिं मुनयो वदन्ति ॥४२॥

---

## अथाष्टषष्टितमोऽध्यायः ।

मत्स्य उवाच । पुरा रथन्तरे कल्पे परिपृष्टो महात्मनः ।
मन्दरस्थो महादेवः पिनाकी ब्रह्मणा स्वयम् ॥ १ ॥
ब्रह्मोवाच । कथमारोग्यमैश्वर्यमनन्तममरेश्वर ! ।
स्वल्पेन तपसा देव ! भवेन्मोक्षोऽथवा नृणाम् ॥ २ ॥
किमज्ञातं महादेव ! त्वत्प्रसादादधोक्षज ! ।
स्वल्पेनाथ तपसा महत् फलमिहोच्यताम् ॥ ३ ॥
मत्स्य उवाच । एवं पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः ।
उमापतिरुवाचेदं मनसः प्रीतिकारकम् ॥ ४ ॥
ईश्वर उवाच । अस्माद्रथन्तरात् कल्पात् त्रयोविंशात् पुनर्यदा ।
वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे । ५ ॥
वैवस्वताख्ये सञ्जाते सप्तमे सप्तलोककृत् ।

द्वापराख्यं युगमतद्दष्टाविंशतिमञ्जगुः ॥ ६ ॥
तस्यान्ते स महादेवो वासुदेवो जनार्द्दनः ।
भारावतरणार्थाय त्रिधा विष्णुर्भविष्यति ॥ ७ ॥
द्वैपायन ऋषिस्तद्वद्रौहिणेयोऽथ केशवः ।
कंसादिदर्पमथनः केशवः क्लेशनाशनः ॥ ८ ॥
पुरीं द्वारवतीं नाम साम्प्रतं या कुशस्थली ।
दिव्यानुभावसंयुक्ता मधिवासाय शार्ङ्गिणः ।
त्वष्टा ममाज्ञया तद्वत् करिष्यति जगत्पतेः ॥ ९ ॥
तस्यां कदाचिदासीनः सभायाममितद्युतिः ।
भार्याभिर्वृष्णिभिश्चैव भूभृद्भिर्भूरिदक्षिणैः ॥ १० ॥
कुरुभिर्देवगन्धर्वैरभितः कैठभार्द्दनः ।
प्रवृत्तासु पुराणासु धर्म्मसम्बधिनीषु च ॥ ११ ॥
कथान्ते भीमसेनेन परिपृष्टः प्रतापवान् ।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदकृत् ॥ १२ ॥
भविता स तदा ब्रह्मन् ! कर्त्ता चैव वृकोदरः ।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुपुत्रो महाबलः ॥ १३ ॥
यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः ।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः ॥ १४ ॥
मतिमान्दानशीलश्च नागायुतबलो महान् ।
भविष्यत्यरजाः श्रीमान् कन्दर्प इव रूपवान् ॥ १५ ॥
धार्मिकस्याप्यशक्तस्य तीव्राग्नित्वादुपोषणे ।
इदं व्रतमशेषाणां व्रतानामधिकं यतः ॥ १६ ॥
कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः ।
अशेषयज्ञफलदमशेषाघविनाशनम् ॥ १७ ॥

अशेषदुष्टशमनमशेषसुरपूजितम्।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्।
भविष्यञ्च भविष्याणां पुराणानां पुरातनम्॥ १८॥
वासुदेव उवाच। यद्यष्टमी चतुर्दश्यो द्वादशीष्वथ भारत!।
अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम्॥ १९॥
ततः पुण्यान्तिथिमिमां सर्वपापप्रणाशिनीम्।
उपोष्य विधिनानेन गच्छ विष्णोः परम्पदम्॥ २०॥
माघमासस्य दशमी यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत्॥ २१॥
तथैव विष्णुमभ्यर्च्य नमोनारायणेति च।
कृष्णाय पादौ संपूज्य शिरः सर्वात्मने नमः॥ २२॥
वैकुण्ठायेति वैकण्ठमुरः श्रीवत्सधारिणे।
शङ्खिने चक्रिणे तद्वद् गदिने वरदाय हिवै।
सर्वं नारायणस्यैव संपूज्या बाहवः क्रमात्॥ २३॥
दामोदरायेत्युदरं मेढ्रं पञ्च शरा वै।
ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे॥ २४॥
नमो नीलाय वै जङ्घे पादौ विश्वसृजे नमः।
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै॥२५॥
नमः पुष्ट्यै नमस्तुष्ट्यै धृष्ट्यै हृष्ट्यै नमोनमः।
नमो विहङ्गनाथाय वायुवेगाय पक्षिणे।
विषप्रमाथिने नित्यं गरुडश्चाभिपूजयेत्॥ २६॥
एवं संपूज्य गोविन्दं उमापतिविनायकौ॥
गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैरपि॥ २७॥
गव्येन पयसा सिद्धङ्कसरामथ वाग्यतः।

सर्पिषा सह भुक्त्वा च गत्वा शतपदं बुधः ॥ २८ ॥
नैयग्रोधं दन्तकाष्ठमथ वा खादिरं बुधः ।
गृहीत्वा धावयेद्दन्तानाचान्तः प्रागुदङ्मुखः ॥ २९ ॥
ब्रूयात् सायन्तनीं कृत्वा सन्ध्यामस्तमिते रवौ ।
नमो नारायणायेति त्वामहं शरणङ्गतः ॥ ३० ॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम् ।
रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसा तथा ॥ ३१ ॥
सर्पिषा चापि हवनं हुत्वा ब्राह्मणपुङ्गवैः ।
सहैव पुण्डरीकाक्ष ! द्वादश्यां क्षीरभोजनम् ।
करिष्यामि यतात्माहं निर्विघ्नेनास्तु तच्च मे ॥३२ ॥
एवमुक्त्वा स्वपेद्भूमावितिहासकथां पुनः ।
श्रुत्वा प्रभाते सञ्जाते नदीं गत्वा विशाम्पते ! ।
स्नानं कृत्वा मृदा तद्वत् पाषण्डानभिवर्जयेत् ॥ ३३ ॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम् ।
प्रणम्य च हृषीकेशं सप्तलोकैकमीश्वरम् ॥ ३४ ॥
गृहस्य पुरतो भक्त्या मण्डपं कारयेद् बुधः ।
दशहस्तमथाष्टौ वा करान् कुर्याद्विशाम्पते ! ॥ ३५ ॥
चतुर्हस्तां शुभां कुर्याद्वेदीमरिनिषूदन ! ।
चतुर्हस्तप्रमाणञ्च विन्यसेत्तत्र तोरणम् ॥ ॥ ३६ ॥
प्रणम्य कलशं तत्र माषमात्रेण संयुतम् ।
च्छिद्रेण जलसम्पूर्णमथ कृष्णाजिनस्थितः ।
तस्य धारां च शिरसा धारयेत् सकलान्निशाम् ॥३७॥
तथैव विष्णोः शिरसि क्षीरधारां प्रपातयेत् ।
अरत्निमात्रं कुण्डञ्च कुर्यात्तत्र त्रिमेखलम् ॥ ३८ ॥

योनिवक्त्रञ्च तत् कृत्वा ब्राह्मणैः पयसर्पिषी।
तिलांश्च विष्णुदैवत्यैर्मन्त्रैरेकाग्निवत्तदा॥ ४०॥
हुत्वा च वैष्णवं सम्यक् चरुं गोक्षीरसंयुतम्।
निष्पावार्द्धप्रमाणां वै धारामाज्यस्य पातयेत्॥४१॥
जलकुम्भान् महावीर्य्य! स्थापयित्वा त्रयोदश।
भक्ष्यैर्नानाविधैर्युक्तान् सितवस्त्रैरलङ्कृतान्॥ ४२॥
युक्तानौदुम्बरैः पात्रैः पञ्चरत्नसमन्वितान्।
चतुर्भिर्ब्राह्मणैर्होमस्तत्र कार्य्य उदङ्मुखैः॥ ४३॥
रुद्रजापश्चतुर्भिश्च यजुर्वेदपरायणैः।
वैष्णवानि तु सामानि चतुरः सामवेदिनः।
अरिष्टवर्गसहितान्यभितः परिपाठयेत्॥ ४४॥
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः।
पूजयेदङ्गुलीयैश्च कटकैर्हेमसूत्रकैः॥ ४५॥
वासोभिः शयनीयैश्च वित्तशाठ्यविवर्जितः।
एवं क्षपातिवाह्या च गीतमङ्गलनिस्वनैः॥ ४६॥
उपाध्यायस्य च पुनर्द्विगुणं सर्वमेव तु।
ततः प्रभाते विमले समुत्थाय त्रयोदश॥ ४७॥
गावो दद्यात् कुरुश्रेष्ठ! सौवर्णमुखसंयुताः।
पयस्विन्यः शीलवत्यः कांस्यदोहसमन्विताः॥४८॥
रौप्यखुराः सवस्त्राश्च चन्दनेनाभिषेचिताः।
तास्तु तेषां ततो भक्त्या भक्ष्यभोज्यान्नतर्पितान्॥४९॥
कृत्वा वै ब्राह्मणान् सर्वानन्नैर्नानाविधैस्तथा।
भुक्त्वा चाक्षारलवणमात्मना च विसर्जयेत्॥ ५०॥
अनुगम्य पदान्यष्टौ पुत्रभार्य्यासमन्वितः।

प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥ ५१ ॥
शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥५२॥
एवमुच्चार्य तान् कुम्भान् गाश्चैव शयनानि च ।
वासांसि चैव सर्वेषां गृहाणि प्रापयेद् बुधः ॥ ५३ ॥
अभावे बहुशय्यानामेकामपि सुसंस्कृताम् ।
शय्यां दद्याद्‌द्विजातेश्च सर्वोपस्करसंयुताम् ॥५४ ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल ! य इच्छेद्विपुलां श्रियम् ॥ ५५ ॥
तस्मात्त्वं सत्त्वमालम्ब्य भीमसेन ! विमत्सरः ।
कुरु व्रतमिदं सम्यक् स्नेहान्मम मयेरितम् ॥ ५६ ॥
त्वया कृतमिदं वीर ! त्वन्नामाख्यं भविष्यति ।
सा भीमद्वादशी ह्येषा सर्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥ ५७ ॥
त्वमादिकर्ता भव सौकरेऽस्मिन् कल्पे महावीरवरप्रधान ! ।
यस्याः स्मरन् कीर्तनमप्यशेषं विनष्टपापस्त्रिदशाधिपः स्यात्॥५८॥
कृत्वा च यामप्सरसामधीशा वेश्याकृता ह्यन्यभवान्तरेषु ।
आभीरकन्यातिकुतूहलेन सैवोर्वशी सम्प्रति नाकपृष्ठे ॥ ५९ ॥
जाताथवा वैश्यकुलोद्भवापि पुलोमकन्या पुरुहूतपत्नी ।
तत्रापि तस्याः परिचारिकेयं मम प्रिया सम्प्रति सत्यभामा॥६०॥
स्नातः पुरा मण्डलमेष तद्वत्तेजोमयं वेदशरीरमाप ।
अस्याश्च कल्याणतिथौ विवस्वान् सहस्रधारेण सहस्ररश्मिः॥६१॥
इदमेव कृतं महेन्द्रमुख्यैर्वसुभिर्देवसुरारिभिस्तथा तु ।
फलमस्य न शक्यतेऽभिवक्तुं यदि जिह्वायुतकोट्यो मुखे स्युः ।

कलिकलुषविदारिणीमनन्तामिति कथयिष्यति यादवेन्द्रसूनुः६२
अपि नरकगतान् पितृनशेषानलमुद्धर्त्तुमिहैव यः करोति।
य इदमघविदारणं शृणोति भक्त्या परिपठतीह परोपकारहेतोः।
तिथिमिह सकलार्थभाङ् नरेन्द्रस्तव चतुरानन !साम्यतामुपैति६३
कल्याणिनी नाम पुरा बभूव या द्वादशी माघदिनेषु पूज्या।
सा पाण्डुपुत्रेण कृता भविष्यत्यनन्तपुण्यानघ ! भीमपूर्वा ॥ ६४॥

---

अथोनसप्ततितमोऽध्यायः।

ब्रह्मोवाच। वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतः।
सदाचारस्य भगवन् ! धर्मशास्त्रविनिश्चयः।
पुण्यस्त्रीणां सदाचारं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥
ईश्वर उवाच। तस्मिन्नेव युगे ब्रह्मन् ! सहस्राणि तु षोडश।
वासुदेवस्य नारीणां भविष्यन्त्यम्बुजोद्भव ! ॥ २ ॥
ताभिर्वसन्तसमये कोकिलालिकुलाकुले।
पुष्पिते पवनोत्फुल्लकल्हारसरसस्तटे ॥ ३ ॥
निर्भरापानगोष्ठीषु प्रसक्ताभिरलङ्कृतः।
कुरङ्गनयनः श्रीमान् मालतीकृतशेखरः ॥ ४ ॥
गच्छन् समीपमार्गेण साम्बः परपुरञ्जयः।
साक्षात्कन्दर्परूपेण सर्वाभरणभूषितः ॥ ५ ॥
अनङ्गशरतप्ताभिः साभिलाषमवेक्षितः।
प्रवृद्धो मन्मथस्तासां भविष्यति यदात्मनि ॥ ६ ॥
तदावेक्ष्य जगन्नाथः सर्वतो ध्यानचक्षुषा।
शापं वक्ष्यति ताः सर्वा वो हरिष्यन्ति दस्यवः।
मत्परोक्षं यतः कामलीलादीदृग्विधं कृतम् ॥ ७ ॥

ततः प्रसादितो देव इदं वक्ष्यति शार्ङ्गभृत् ।
ताभिः शापाभितप्ताभिर्भगवान् भूतभावनः ॥ ८ ॥
उत्तारभूतन्दासत्वं समुद्राद्ब्राह्मणप्रियः ।
उपदेक्ष्यत्यनन्तात्मा भाविकल्याणकारकम् ॥ ९ ॥
भवतीना मृषिर्दाल्भ्यो यद्व्रतं कथयिष्यति ।
तदेवोत्तारणायालं दासत्वेऽपि भविष्यति ।
इत्युक्त्वा ताः परिष्वज्य गतो द्वारवतीश्वरः ॥ १० ॥
ततः कालेन महता भारावतरणे कृते ।
निवृत्ते मौसले तद्वत् केशवे दिवमागते ॥ ११ ॥
शून्ये यदुकुले सर्वैश्चौरैरपि जितेऽर्जुने ।
हृतासु कृष्णपत्नीषु दासभोग्यासु चाम्बुधौ ॥ १२ ॥
तिष्ठन्तीषु च दौर्गत्यमन्तप्तासु चतुर्मुख ! ।
आगमिष्यति योगात्मा दाल्भ्यो नाम महातपाः ॥१३॥
तास्तमर्घ्येण संपूज्य प्रणिपत्य पुनः पुनः ।
लालप्यमाना बहुशोबाष्पपर्याकुलेक्षणाः ॥ १४ ॥
स्मरन्त्यो विपुलान् भोगान् दिव्यमाल्यानुलेपनम् ।
भर्तारञ्जगतामीशमनन्तमपराजितम् ॥ १५ ॥
दिव्यभावान्ताश्च पुरीं नानारत्नगृहाणि च ।
द्वारकावासिनः सर्वान् देवरूपान् कुमारकान् ।
प्रश्नमेवं करिष्यन्ति मुनेरभिमुखं स्थिताः ॥ १६ ॥
स्त्रिय ऊचुः । दस्युभिर्भगवन् ! सर्वाः परिभुक्ता वयं बलात् ।
स्वधर्माच्चावतेऽस्माकमस्मिन्वः शरणम्भव ॥ १७ ॥
आदिष्टोऽसि पुरा ब्रह्मन् ! केशवेन च धीमता ।
कस्मादीशेन संयोगं प्राप्य वेश्यात्वमागताः ॥ १८ ॥

वेश्यानामपि यो धर्म्मस्तन्नो ब्रूहि तपोधन ! ।
कथयिष्यत्यतस्तासां स दाल्भ्यश्चैकितायनः ॥ १९ ॥
दाल्भ्य उवाच । जलक्रीडाविहारेषु पुरा सरसि मानसे ।
भवतीनाञ्च सर्वासां नारदोऽभ्यासमागतः ॥ २० ॥
हुताशनसुताः सर्वा भवन्त्योऽप्सरसः पुरा ।
अप्रणाम्यावलेपेन परिपृष्टः स योगवित् ।
कथं नारायणोऽस्माकं भर्ता स्यादित्युपादिश ॥ २१ ॥
तस्माद्वरप्रदानं वः शापश्चायमभूत् पुरा ।
शय्याद्वयप्रदानेन मधुमाधवमासयोः ॥ २२ ॥
सुवर्णोपस्करोत्सर्गाद् द्वादश्यां शुक्लपक्षतः ।
भर्ता नारायणो नूनं भविष्यत्यन्यजन्मनि ॥ २३ ॥
यदकृत्वा प्रणामं मे रूपसौभाग्यमत्सरात् ।
परिपृष्टोऽस्मि तेनाशु वियोगो वा भविष्यति ।
चौरैरपहृताः सर्वा वेश्यात्वं समवाप्स्यथ ॥ २४ ॥
एवं नारदशापेन केशवस्य च धीमतः ।
वेश्यात्वमागताः सर्वा भवन्त्यः काममोहिताः ।
इदानीमपि यद्वच्मि तच्छृणुध्वं वराङ्गनाः ! ॥ २५ ॥
दाल्भ्य उवाच । पुरा देवासुरे युद्धे हतेषु शतशः सुरैः ।
दानवासुरदैत्येषु राक्षसेषु ततस्ततः ॥ २६ ॥
तेषां शतसहस्राणि शतान्यपि च योषिताम् ।
परिणीतानि यानि स्युर्बलाद्भुक्तानि यानि वै ।
तानि सर्वाणि देवेशः प्रोवाच वदताम्वरः ॥ २७ ॥
इन्द्र उवाच । वेश्याधर्म्मेण वर्त्तध्वमधुना नृपमन्दिरे ।
भक्तिमत्योवरारोहास्तथा देवकुलेषु च ॥ २८ ॥

राजानः स्वामिनस्तुल्या सुता वापि च तत्समाः।
भविष्यति च सौभाग्यं सर्वासामपि शक्तितः॥ २९॥
यः कश्चिच्छुल्कमादाय गृहमेष्यति वः सदा।
निधनेनोपचार्योवः स तदान्यत्र दाम्भिकात्॥३०॥
देवतानां पितृणां च पुण्याहे समुपस्थिते।
गोभूहिरण्यधान्यानि प्रदेयानि स्वशक्तितः।
ब्राह्मणानां वरारोहाः कार्याणि वचनानि च॥३१॥
यच्चाप्यन्यद् व्रतं सम्यगुपदेक्ष्याम्यहं ततः।
अविचारेण सर्वाभिरनुष्ठेयं च तत्पुनः॥ ३२॥
संसारोत्तारणायालमेतद्वेदविदोविदुः।
यदा सूर्यदिने हस्तः पुष्योवाथ पुनर्वसुः॥ ३३॥
भवेत्सर्वौषधीस्नानं सम्यङ्नारी समाचरेत्।
तदा पञ्चशरस्यापि सन्निधानत्वमेष्यति।
अर्चयेत् पुण्डरीकाक्षमनङ्गस्यानुकीर्तनैः॥ ३४॥
कामाय पादौ संपूज्य जङ्घे वै मोहकारिणे।
मेढ्रं कन्दर्पनिधये कटिं प्रीतिमते नमः॥ ३५॥
नाभिं सौख्यसमुद्राय रामाय च तथोदरम्।
हृदयं हृदयेशाय स्तनावाह्लादकारिणे॥ ३६॥
उत्कण्ठायेति वैकण्ठमास्यमानन्दकारिणे।
वामाङ्गं पुष्पचापाय पुष्पबाणाय दक्षिणम्॥ ३७॥
मानसायेति वै मौलिं विलोलायेति मूर्धजम्।
सर्वात्मने च सर्वाङ्गं देवदेवस्य पूजयेत्॥ ३८॥
नमः शिवाय शान्ताय पाशाङ्कुशधराय च।
गदिने पीतवस्त्राय शङ्खचक्रधराय च॥ ३९॥

नमो नारायणायेति कामदेवात्मने नमः ।
सर्वप्रास्यै नमः प्रीत्यै नमोरत्यै नमः श्रियै ॥ ४० ॥
नमः पुष्ट्यै नमस्तुष्ट्यै नमः सर्वार्थसम्पदे ।
एवं संपूज्य देवेशमनङ्गात्मकमीश्वरम् ।
गन्धैर्माल्यैस्तथा धूपैर्नैवेद्येन च कामिनी ॥ ४१ ॥
तत आहूय धर्मज्ञं ब्राह्मणं वेदपारगम् ।
अव्यङ्गावयवं पूज्य गन्धपुष्पार्चनादिभिः ॥ ४२ ॥
शालेय तण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
तस्मै विप्राय सा दद्यान्माधवः प्रीयतामिति ॥ ४३ ॥
यथेष्टाहारयुक्तं वै तमेव द्विजसत्तमम् ।
रत्यर्थं कामदेवोऽयमिति चित्तेऽवधार्य तम् ॥ ४४ ॥
यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्याद्विलासिनी ।
सर्वभावेन चात्मानमर्पयेत् स्मितभाषिणी ॥ ४५ ॥
एवमादित्यवारेण सर्वमेतत्समाचरेत् ।
तण्डुलप्रस्थदानञ्च यावन्मासास्त्रयोदश ॥ ४६ ॥
ततस्त्रयोदशे मासि संप्राप्ते तस्य भामिनी ।
विप्रस्योपस्करैर्युक्तां शय्यां दद्याद्विलक्षणाम् ॥ ४७ ॥
सोपधानकविश्रामां सास्तरावरणां शुभाम् ।
प्रदीपोपानहच्छत्रपादुकासनसंयुताम् ॥ ४८ ॥
सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः ।
सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ॥ ४९ ॥
कामदेवं सपत्नीकं गुडकुम्भोपरि स्थितम् ।
ताम्रपात्रासनगतं हैमनेत्रपटावृतम् ॥ ५० ॥
स कांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ।

दद्यादेतेन मन्त्रेण तथैकां गां पयस्विनीम् ॥ ५१ ॥
यथान्तरं न पश्यामि कामकेशवयोः सदा ।
तथैव सर्वकामाप्तिरस्तु विष्णो ! सदा मम ॥ ५२ ॥
यथा न कमला देहात् प्रयाति तव केशव ! ।
तथा ममापि देवेश ! शरीरे स्वे कुरु प्रभो ! ॥ ५३ ॥
तथा च काञ्चनं देवं प्रतिग्टह्णन् द्विजोत्तमः ।
क इदं कस्मादादिति वैदिकं मन्त्रमीरयेत् ॥ ५४ ॥
ततः प्रदक्षिणीकृत्य विसर्ज्य द्विजपुङ्गवम् ।
शय्यासनादिकं सर्वं ब्राह्मणस्य गृहं नयेत् ॥ ५५ ॥
ततः प्रभृति यो विप्रो रत्यर्थं गृहमागतः ।
स मान्यः सूर्यवारे च स मन्तव्यो भवेत्तदा ॥ ५६ ॥
एवं त्रयोदश यावन्मासमेवं द्विजोत्तमान् ।
तर्पयेत यथाकामं प्रोषितेऽन्यं समाचरेत ॥ ५७ ॥
तदनुज्ञया रूपवान्यो यावदभ्यागतो भवेत् ।
आत्मनोऽपि यथाविघ्नं गर्भभूतिकरम्प्रियम् ॥ ५८ ॥
दैवं वा मानुषं वा स्यादनुरागेण वा ततः ।
साचारानष्टपश्चाशच्छ्राशक्त्या समाचरेत् ॥ ५९ ॥
एतद्वि कथितं सम्यक् भवतीनां विशेषतः ।
अधर्मोऽयं ततो न स्याद्वेश्यानामिह सर्वदा ॥ ६० ॥
पुरुहूतेन यत् प्रोक्तं दानवीषु पुरा मया ।
तदिदं साम्प्रतं सर्वं भवतीष्वपि युज्यते ॥ ६१ ॥
सर्वपापप्रशमनमनन्तफलदायकम् ।
कल्याणीनां प्रकथितं तत् कुरुध्वं वरानना: ! ॥ ६२ ॥

करोति या शेषमखण्डमेतत् कलत्राणिनी माधवलोकसंस्था।
सा पूजिता देवगणैरशेषैरानन्दकृत्स्थानमुपैति विष्णोः ॥६३॥
श्रीभगवानुवाच।
तपोधनः सोऽप्यभिधाय चैवं तदा च तासां व्रतमङ्गनानाम्।
स्वस्थानमेष्यन्ति समस्तमित्यं व्रतं करिष्यन्ति च देवयोने ! ॥६४

---

## अथ सप्ततितमोऽध्यायः।

ब्रह्मोवाच। भगवन् ! पुरुषस्येह स्त्रियाश्च विरहादिकम्।
शोकव्याधिभयं दुःखं न भवेद्येन तद्वद ॥ १ ॥
श्रीभगवानुवाच। श्रावणस्य द्वितीयायां कृष्णायां मधुसूदनः।
क्षीरार्णवे सपत्नीकः सदा वसति केशवः ॥ २ ॥
तस्यां सम्पूज्य गोविन्दं सर्वान् कामान् समश्नुते।
गोभूहिरण्यदानादि सप्तकल्पशतानुगम् ॥ ३ ॥
अशून्यशयनं नाम द्वितीया सम्प्रकीर्त्तिता।
तस्यां सम्पूजयेद्विष्णुं एभिर्मन्त्रैर्विधानतः ॥ ४ ॥
श्रीवत्सधारिन् ! श्रीकान्त ! श्रीधामन् ! श्रीपतेऽव्यय !।
गार्हस्थ्यं मा प्रणाशं मे यातु धर्म्मार्थकामदम् ॥५॥
अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम !।
पितरो मा प्रणश्यन्तु मास्तु दाम्पत्यभेदनम् ॥ ६ ॥
लक्ष्म्या वियुज्यते देव ! न कदाचिद्यथा भवान्।
तथा कलत्रसम्बन्धो देव ! मा मे वियुज्यताम् ॥ ७ ॥
लक्ष्म्या न शून्यो वरद ! यथा त्वं शयनं गतः।
शय्या ममाप्यशून्यास्तु तथैव मधुसूदन ! ॥ ८ ॥
गीतवादित्रनिर्घोषं देवदेवस्य कीर्त्तयेत्।

घण्टाभवेदशक्तस्य सर्वंवाद्यमयी यतः ॥ ९ ॥
एवं सम्पूजय गोविन्दमश्नीयात्तैलवर्जितम् ।
नक्तमक्षारलवणं यावत्तत्स्याच्चतुष्टयम् ॥ १० ॥
ततः प्रभाते सञ्जाते लक्ष्मीपतिसमन्विताम् ।
दीपान्नभाजनैर्युक्तां शय्यां दद्याद्विलक्षणाम् ॥ ११ ॥
पादुकोपानहच्छत्रचामरासनसंयुताम् ।
अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृताम् ॥ १२ ॥
सोपधानकविश्रामां फलैर्नानाविधैर्युताम् ।
तथाभरणधान्यैश्च यथाशक्त्या समन्विताम् ॥ १३ ॥
अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने ।
दातव्या वेदविदुषे भावेनापतिताय च ॥ १४ ॥
तत्रोपविश्य दाम्पत्यमलङ्कृत्य विधानतः ।
पत्न्यास्तु भाजनं दद्याद्भक्ष्यभोज्यसमन्वितम् ॥ १५ ॥
ब्राह्मणस्यापि सौवर्णीमुपस्करसमन्विताम् ।
प्रतिमां देवदेवस्य सोदकुम्भां निवेदयेत् ॥ १६ ॥
एवं यस्तु पुमान् कुर्य्यादशून्यशयनं हरेः ।
वित्तशाठ्येन रहितो नारायणपरायणः ॥ १७ ॥
नारी वा विधवा ब्रह्मन् ! यावच्चन्द्रार्कतारकम् ।
न विरूपौ न शोकार्त्तौ दम्पती भवतः क्वचित् ॥१८॥
न पुत्रपशुरत्नानि क्षयं यान्ति पितामह ! ।
सप्तकल्पसहस्राणि सप्तकल्पशतानि च ।
कुर्वन्नशून्यशयनं विष्णुलोके महीयते ॥ १९ ॥

---

## अथ एकसप्ततितमोऽध्यायः ।

ईश्वर उवाच । शृणु चान्यद्ध विप्र यद्रूपमस्पद्धिभायकम् ।

भविष्यति युगे तस्मिन् द्वापरान्ते पितामह ! ।

पिप्पलादस्य संवादो युधिष्ठिरपुरःसरैः ॥ १ ॥

वसन्तं नैमिषारण्ये पिप्पलादं महामुनिम् ।

अधिगम्य तदा चैनं प्रश्नमेकं करिष्यति ।

युधिष्ठिरो धर्म्मपुत्रो धर्म्मयुक्त स्तपोधनम् ॥ २ ॥

युधिष्ठिर उवाच । कथमारोग्यमैश्वर्य्यं मतिर्धर्मे गति स्तथा ।

अव्यङ्गता शिवे भक्तिर्वैष्णवी वा भवेत्कथम् ॥ ३ ॥

ईश्वर उवाच । तस्योत्तरमिदं ब्रह्मन् ! पिप्पलादस्य धीमतः ।

शृणुष्व यद्वक्ष्यति वै धर्म्मपुत्राय धार्मिकः ॥ ४ ॥

पिप्पलाद उवाच । साधु पृष्टं त्वया भद्र ! इदानीं कथयामि ते ।

अङ्गारव्रतमित्येतत् स वक्ष्यति महीपतिः ॥ ५ ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।

विरोचनस्य सम्वादं भार्गवस्य च धीमतः ॥ ६ ॥

प्रह्लादस्य सुतं दृष्ट्वा द्विरष्टपरिवत्सरम् ।

रूपेणाप्रतिमं कान्त्या सोऽहसद्भृगुनन्दनः ॥ ७ ॥

साधु साधु महाबाहो ! विरोचन ! शिवं तव ।

तत्तथा हसितं तस्य पप्रच्छ सुरसूदनः ॥ ८ ॥

ब्रह्मन् ! किमर्थमेतत्ते हास्यमाकस्मिकं कृतम् ।

साधु साध्विति मामेवमुक्तवांस्त्वं वदस्व मे ॥ ९ ॥

तमेवं वादिनं शक्र उवाच वदतांवरः ।
विस्मयाद्व्रतमाहात्म्यादाश्चर्यमेतत् कृतं मया ॥ १० ॥
पुरा दक्षविनाशाय कुपितस्य तु शूलिनः ।
अथ तद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः ॥ ११ ॥
भित्त्वा स सप्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनोज्ज्वलज्ज्वलनभीषणः ॥ १२ ॥
वीरभद्र इति ख्यातः करपादायुतैर्युतः ।
कृत्वासौ यज्ञमथनं पुनर्भूतलसम्भवः ।
त्रिजगन्निर्दहन् भूयः शिवेन विनिवारितः ॥ १३ ॥
कृतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ।
इदानीमलमेतेन लोकदाहेन कर्म्मणा ।
शान्तिप्रदाता सर्वेषां ग्रहाणां प्रथमो भव ।
प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति वरात्मम ॥ १५ ॥
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ।
देवलोके द्वितीयञ्च तव रूपं भविष्यति ॥ १६ ॥
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वद्दिने नराः ।
रूपमारोग्यमैश्वर्यं तेष्वनन्तं भविष्यति ॥ १७ ॥
एवमुक्तस्तदा शान्तिमगमत्कामरूपधृक् ।
स सञ्जातस्तत्क्षणाद्राजन् ! ग्रहत्वमगमत् पुनः ॥ १८
स कदाचित् भवांस्तस्य पूजार्घादिकमुत्तमम् ।
दृष्टवान् क्रियमाणञ्च शूद्रेण च व्यवस्थितः ! ॥ १९ ।
तेन त्वं रूपवान् जातः सुरशत्रुकुलोद्वह ! ।
विचित्रा च रुचिर्जाता यस्मात्तव विदूरगा ॥ २० ॥
विरोचन इति प्राहुर्यस्मात् त्वां देवदानवाः ।

शूद्रेण क्रियमाणस्य व्रतस्य तव दर्शनात् ॥ ११ ॥
ईदृशीं रूपसम्पत्तिं दृष्ट्वा विस्मितवानहम्।
साधु साध्विति तेनोक्तं महीमाहात्म्यमुत्तमम्।
पश्यतोऽपि भवेद्रूपमैश्वर्यं किमु कुर्वतः ॥ २२ ॥
यस्माच्च भक्त्या धरणीधृतस्य विनिन्द्यमानेन गवादिदानम्।
आलोकितस्तेन सुरारिगर्भे सम्भूति रेषा तव दैत्य! जाता॥२३
ईश्वर उवाच। अथ तद्वचनं श्रुत्वा भार्गवस्य महात्मनः।
प्रह्लादनन्दनो वीरः पुनः पप्रच्छ विस्मितः ॥ २४ ॥
विरोचन उवाच।
भगवंस्तद्व्रतं सम्यक् श्रोतुमिच्छामि तत्त्वतः।
दीयमानन्तु यद्दानं मया दृष्टं भवान्तरे ॥ २५ ॥
माहात्म्यञ्च विधिं तस्य यथावद्वक्तुमर्हसि।
इति तद्वचनं श्रुत्वा पुनः प्रोवाच विस्तरात् ॥ २६ ॥
शुक्र उवाच। चतुर्थ्यङ्गारकदिने यदा भवति दानव!।
मृदा स्नानं तदा कुर्यात् पद्मरागविभूषितः ॥ २७ ॥
अग्निर्मूर्द्धा दिवोमन्त्रं जपन्नास्ते उदङ्मुखः।
शूद्रस्तूष्णीं स्मरन् भौममास्ते भोगविवर्जितः ॥ २८ ॥
तथास्तमित आदित्ये गोमयेनानुलेपयेत्।
प्राङ्गणं पुष्पमालाभी रक्ताभिः समन्ततः ॥ २९ ॥
अभ्यर्च्याभिलिखेत् पद्मं कुङ्कुमेनाष्टपत्रकम्।
कुङ्कुमस्याप्यभावे तु रक्तचन्दनमिष्यते ॥ ३० ॥
चत्वारः करकाः कार्या भक्ष्यभोज्यसमन्विताः।
तण्डुलै रक्तमाल्यैश्च पद्मरागैश्च संयुताः ॥ ३१ ॥
चतुःकोणेषु तान् कृत्वा फलानि विविधानि च।

गन्धमाल्यादिकं सर्वं तथैव विनिवेदयेत् ॥ ३२ ॥
सुवर्णशृङ्गीं कपिलामथार्घ्यैं रौप्यैः खुरैः कांस्यदोहां सवत्साम् ।
धुरन्धरं रक्तमतीव सौम्यं धान्यानि सप्ताम्बरसंयुतानि ॥ ३३ ॥
अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदण्डम् ।
चतुर्भुजं हेममये निविष्टं पात्रे गुडस्योपरि सर्पियुक्तम् ॥
समस्तयज्ञाय जितेन्द्रियाय पात्राय शीलान्वयसंयुताय ।
दातव्यमेतत् सकलं द्विजाय कुटुम्बिने नैव तु दाम्भिकाय ।
समर्पयेद्विप्रवराय भक्त्या कृताञ्जलिः पूर्वमुदीर्य मन्त्रम् ॥ ३५ ॥
भूमिपुत्र ! महाभाग ! स्वेदोद्भव ! पिनाकिनः ।
रूपार्थी त्वां प्रपन्नोऽहं गृहाणार्घ्यं नमोऽस्तु ते ॥ ३६ ॥
मन्त्रेणानेन दत्त्वार्घ्यं रक्तचन्दनवारिणा ।
ततोऽर्चयेद्विप्रवरं रक्तमाल्याम्बरादिभिः ॥ ३७ ॥
दद्यात्तेनैव मन्त्रेण भौमङ्गोमिथुनान्वितम् ।
शय्यां च शक्तितो दद्यात् सर्वोपस्करसंयुताम् ॥ ३८ ॥
यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयन्तद्वाक्षयमिच्छता ॥ ३९ ॥
प्रदक्षिणं ततः कृत्वा विसर्ज्य द्विजपुङ्गवम् ।
नक्तमक्षारलवणमश्नीयाद् घृतसंयुतम् ॥ ४० ॥
भक्त्या यस्तु पुनः कुर्यादेवमङ्गारकाष्टकम् ।
चतुरो वाथवा तस्य यत्पुण्यं तद्वदामि ते ॥ ४१ ॥
रूपसौभाग्यसम्पन्नः पुनर्जन्मनि जन्मनि ।
विष्णौ वाथ शिवे भक्तः सप्तद्वीपाधिपो भवेत् ॥ ४२ ॥
सप्तकल्पसहस्राणि रुद्रलोके महीयते ।
तस्मात्त्वमपि दैत्येन्द्र ! व्रतमेतत् समाचर ॥ ४३ ॥

पिप्पलाद उवाच ।

इत्येवमुक्त्वा भृगुनन्दनोऽपि जगाम दैत्यश्च चकार सर्वम् ।

त्वं चापि राजन् ! कुरु सर्वमेतद्यतोऽक्षयं वेदविदो वदन्ति॥४४

ईश्वर उवाच ।

तथेति संपूज्य स पिप्पलादं वाक्यञ्चकाराद्भुतवीर्यकर्मा ।

शृणोति यश्चैनमनन्यचेतास्तस्यापि सिद्धिं भगवान् विधत्ते ४५

अथ द्विसप्ततितमोऽध्यायः ।

---

पिप्पलाद उवाच । अथातः शृणु भूपाल ! प्रति शुक्रं प्रशान्तये ।

यत्रारम्भेऽवसाने च तथा शुक्रोदये त्विह ॥ १ ॥

राजते वाथ सौवर्णे कांस्यपात्रेऽथ वा पुनः ।

शुक्लपुष्पाम्बरयुते सिततण्डुलपूरिते ॥ २ ॥

विधाय राजतं शुक्रं शुचि मुक्ताफलान्वितम् ।

मन्त्रेणानेन तत्पूर्वं सामगाय निवेदयेत् ॥ ३ ॥

नमस्ते सर्वलोकेश ! नमस्ते भृगुनन्दन ! ।

कवे ! सर्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥ ४ ॥

एवमस्योदये कुर्वन् यात्रादिषु च भारत ! ।

सर्वान् कामानवाप्नोति विष्णुलोके महीयते ॥ ५ ॥

यावच्छुक्रस्य न कृता पूजा सामालकैः शुभैः ।

वटकैः पूरिकाभिश्च गोधूमैश्चणकैरपि ।

तावदन्नं नचाश्नीयात् त्रिभिः कामार्थसिद्धये ॥६॥

तद्वद्वाचस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर ! ।

सुवर्णपात्रे सौवर्णममरेशपुरोहितम् ॥ ७ ॥

पीतपुष्पाम्बरयुतं कृत्वा स्नात्वाथ सर्षपैः ।

पलाशाश्वत्थयोगेन पञ्चगव्यजलेन च ॥ ८ ॥
पीताङ्गरागवसनो हुतहोमन्तु कारयेत् ।
प्रणम्य च गवा सार्धं ब्राह्मणाय निवेदयेत् ॥ ९ ॥
नमस्तेऽङ्गिरसानाथ ! वाक्पते ! च बृहस्पते ! ।
क्रूरग्रहैः पीडितानाममृताय नमो नमः ॥ १० ॥
संक्रान्तावस्य कौन्तेय ! ग्रामास्त्वभ्युदयेषु च ।
कुर्वन् बृहस्पतेः पूजां सर्वान् कामान् समश्नुते ॥११॥

---

अथ त्रिसप्ततितमोऽध्यायः ।

ब्रह्मोवाच ! भगवन् ! भव ! संसारसागरोत्तारकारक ! ।
किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥ १ ॥
ईश्वर उवाच । सौरं धर्मं प्रवक्ष्यामि नाम्ना कल्याणसप्तमीम् ।
विशोकसप्तमीं तद्वत् फलाढ्यां पापनाशिनीम् ॥२॥
शर्करासप्तमीं पुण्यां तथा कमलसप्तमीम् ।
मन्दारसप्तमीं तद्वच्छुभदां शुभसप्तमीम् ॥ ३ ॥
सर्वानन्तफलाः प्रोक्ताः सर्वा देवर्षिपूजिताः ।
विधानमासां वक्ष्यामि यथावदनुपूर्वशः ॥ ४ ॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत् ।
सा तु कल्याणिनी नाम विजया च निगद्यते ॥५॥
प्रातर्गव्येन पयसा स्नानमस्यां समाचरेत् ।
ततः शुक्लाम्बरः पद्ममक्षताभिः प्रकल्पयेत् ॥ ६ ॥
प्राङ्मुखोऽष्टदलं मध्ये तद्वद् वृत्तां च कर्णिकाम् ।
पुष्पाक्षताभिर्देवेशं विन्यसेत् सर्वतः क्रमात् ॥ ७ ॥
पूर्वेण तपनायेति मार्त्तण्डायेति चानले ।

याम्ये दिवाकरायेति विधात्र इति नैर्ऋते ॥ ८ ॥
पश्चिमे वरुणायेति भास्करायेति चानिले ।
सौम्ये वैकर्तनायेति रवये चाष्टमे दले ॥ ९ ॥
आदावन्ते च मध्ये च नमोऽस्तु परमात्मने ।
मन्त्रैरेभिः समभ्यर्च्य नमस्कारान्तदीपितैः ॥ १० ॥
शुक्लवस्त्रैः फलैर्भक्ष्यैर्धूपमाल्यानुलेपनैः ।
स्थण्डिले पूजयेद्भक्त्या गुडेन लवणेन च ॥ ११ ॥
ततो व्याहृतिमन्त्रेण विसर्जेद् द्विजपुङ्गवान् ।
शक्तितः पूजयेद्भक्त्या गुडक्षीरघृतादिभिः ।
तिलपात्रं हिरण्यं च ब्राह्मणाय निवेदयेत् ॥ १२ ॥
एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः ।
कृतस्नानजपो विप्रैः सहैव घृतपायसम् ॥ १३ ॥
भुक्त्वा च वेदविदुषे विडालव्रतवर्जिते ।
घृतपात्रं सकनकं सोदकुम्भं निवेदयेत् ॥ १४ ॥
प्रीयतामत्र भगवान् परमात्मा दिवाकरः ।
अनेन विधिना सर्वं मासि मासि व्रतं चरेत् ॥१५ ॥
ततस्त्रयोदशे मासि गा वै दद्यात्त्रयोदश ।
वस्त्रालङ्कारसंयुक्ताः सुवर्णास्याः पयस्विनीः ॥ १६॥
एकामपि प्रदद्याद्वा वित्तहीनो विमत्सरः ।
न वित्तशाठ्यं कुर्वीत यतो मोहात् पतत्यधः ॥१७॥
अनेन विधिना यस्तु कुर्यात् कल्याणसप्तमीम् ।
सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ।
आयुरारोग्यमैश्वर्यमनन्तमिह जायते ॥ १८ ॥
सर्वपापहरा नित्यं सर्वदैवतपूजिता ।

सर्वदुष्टोपशमनी सदा कल्याणसप्तमी ॥ १९ ॥
इमामनन्तफलदां यस्तु कल्याणसप्तमीम् ।
शृणोति पठते चेह सर्वपापैः प्रमुच्यते ॥ २० ॥

---

अथ चतुःसप्ततितमोऽध्यायः ।

ईश्वर उवाच । विशोकसप्तमीं तद्वक्ष्यामि मुनिपुङ्गव ! ।
यामुपोष्य नरः शोकं न कदाचिदिहाश्नुते ॥ १ ॥
माघे कृष्णतिलैः स्नात्वा षष्ठ्यां वै शुक्लपक्षतः ।
कृताहारः कृसरया दन्तधावनपूर्वकम् ।
उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि ॥ २ ॥
ततः प्रभात उत्थाय कृतस्नानजपः शुचिः ।
कृत्वा तु काञ्चनं पद्ममर्कायेति च पूजयेत् ॥ ३ ॥
करवीरेण रक्तेन रक्तवस्त्रयुगेन च ।
यथा विशोकं भुवनं त्वयैवादित्य ! सर्वदा ।
तथा विशोकता मेऽस्तु त्वद्भक्तिः प्रतिजन्म च ॥ ४ ॥
एवं संपूज्य षष्ठ्यान्तु भक्त्या संपूजयेद्द्विजान् ।
सुप्त्वा संप्राश्य गोमूत्रमुत्थाय कृतनैत्यकः ॥ ५ ॥
संपूज्य विप्रानन्नेन गुडपात्रसमन्वितम् ।
तद्वस्त्रयुग्मं पद्मञ्च ब्राह्मणाय निवेदयेत् ॥ ६ ॥
अतैललवणं भुक्त्वा सप्तम्यां मौनसंयुतः ।
ततः पुराणश्रवणं कर्तव्यं भूतिमिच्छता ॥ ७ ॥
अनेन विधिना सर्वमुभयोरपि पक्षयोः ।
कृत्वा यावत् पुनर्माघशुक्लपक्षस्य सप्तमी ॥ ८ ॥
व्रतान्ते कलशन्दद्यात् सुवर्णकमलान्वितम् ।

शय्यां सोपस्कराम्दद्यात् कपिलाञ्च पयस्विनीम् ॥ ९ ॥
अनेन विधिना यस्तु वित्तशाठ्यविवर्जितः ।
विशोकसप्तमीं कुर्यात् स याति परमाङ्गतिम् ॥ १० ॥
यावज्जन्मसहस्राणां साग्रं कोटिशतं भवेत् ।
तावत्स शोकमभ्येति रोगदौर्गत्यवर्जितः ॥ ११ ॥
यं यं प्रार्थयते कामं तन्तमाप्नोति पुष्कलम् ।
निष्कामः कुरुते यस्तु स परं ब्रह्म गच्छति ॥ १२ ॥
यः पठेच्छृणुयाद्वापि विशोकाख्याञ्च सप्तमीम् ।
सोऽपीन्द्रलोकमाप्नोति न दुःखी जायते क्वचित् ॥१३॥

---

अथ पञ्चसप्ततितमोऽध्यायः ।

ईश्वर उवाच । अन्यामपि प्रवक्ष्यामि नाम्ना तु फलसप्तमीम् ।
यामुपोष्य नरः पापाद्विमुक्तः स्वर्गभाग्भवेत् ॥ १ ॥
मार्गशीर्षे शुभे मासि सप्तम्यां नियतव्रतः ।
तामुपोष्याथ कमलं कारयित्वा तु काञ्चनम् ॥ २ ॥
शर्करासंयुतं दद्याद्ब्राह्मणाय कुटुम्बिने ।
रविं काञ्चनकं कृत्वा फलस्यैकस्य धर्मवित् ।
दद्यादपराह्णकालवेलायां भानुर्मे प्रीयतामिति ॥ ३ ॥
भक्त्या तु विप्रान् संपूज्य चाष्टम्यां क्षीरभोजनम् ।
दत्त्वा कुर्यात् फलत्यागं यावत् स्यात् कृष्णसप्तमी ॥४॥
तामप्युपोष्य विधिवदनेनैव क्रमेण तु ।
तद्वद्धेमफलं दत्त्वा सुवर्णकमलान्वितम् ॥ ५ ॥
शर्करापात्रसंयुक्तं वस्त्रमाल्यसमन्वितम् ।

सम्वत्सरञ्च तेनैव विधिनोभयसप्तमीम् । ६ ॥
उपोष्य दत्त्वा क्रमशः सूर्यमन्त्रमुदीरयेत् ।
भानुरर्को रविर्ब्रह्मा सूर्यः शक्रो हरिः शिवः ।
श्रीमान् विभावसुस्त्वष्टा वरुणः प्रीयतामिति ॥ ७ ॥
प्रतिमासञ्च सप्तम्यामेकैकं नाम कीर्त्तयेत् ।
प्रतिपक्षं फलत्यागमेतत् कुर्वन् समाचरेत् ॥ ८ ॥
व्रतान्ते विप्रमिथुनं पूजयेद्वस्त्रभूषणैः ।
शर्कराकलशं दद्याद्धेमपद्मदलान्वितम् ॥ ९ ॥
यथा न विफला कामास्त्वद्भक्तानां सदा रवे ! ।
तथानन्तफलावाप्तिरस्तु मे सप्तजन्मसु ॥ १० ॥
इमामनन्तफलदां यः कुर्य्यात् फलसप्तमीम् ।
सर्वपाप विशुद्धात्मा सूर्य्यलोके महीयते ॥ ११ ॥
सुरापानादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
तत्सर्वं नाशमायाति यः कुर्य्यात् फलसप्तमीम् ॥१२ ॥
कुर्वाणः सप्तमीञ्चेमां सततं रोगवर्जितः ।
भूतान् भव्यांश्च पुरुषांस्तारयेदेकविंशतिम् ।
यः शृणोति पठेद्वापि सोऽपि कल्याणभाग्भवेत् ॥ १३॥

---

अथ षट्सप्ततितमोऽध्यायः ।

ईश्वर उवाच । शर्करासप्तमीं वक्ष्ये तद्वत्कल्मषनाशिनीम् ।
आयुरारोग्यमैश्वर्यं ययानन्तं प्रजायते ॥ १ ॥
माधवस्य सिते पक्षे सप्तम्यां नियतव्रतः ।
प्रातः स्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनः ॥ २ ॥
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम् ।

तस्मिन्नमः सवित्रे तु गन्धधूपौ निवेदयेत् ॥ ३ ॥
स्नापयेदुदकुम्भेन शर्करापात्रसंयुतम्।
शुक्लवस्त्रैरलङ्कृत्य शुक्लमाल्यानुलेपनैः।
सुवर्णेन समायुक्तं मन्त्रेणानेन पूजयेत् ॥ ४ ॥
विश्ववेदमयो यस्माद्वेदवादीति पठ्यसे।
सर्वस्यामृतमेव त्वमतः शान्तिं प्रयच्छ मे ॥ ५ ॥
पञ्चगव्यं ततः पीत्वा स्वपेत्तत् पार्श्वतः क्षितौ।
सौरसूक्तं स्मरन्नास्ते पुराणश्रवणेन च ॥ ६ ॥
अहोरात्रे गते पश्चादष्टम्यां कृतनैत्यकः।
तत्सर्वं विदुषे तद्वद्ब्राह्मणाय निवेदयेत् ॥ ७ ॥
भोजयेच्छक्तितो विप्रान् शर्कराघृतपायसैः।
भुञ्जीतातैललवणं स्वयमप्यथ वाग्यतः ॥ ८ ॥
अनेन विधिना सर्वं मासि मासि समाचरेत्।
संवत्सरान्ते शयनं शर्कराकलशान्वितम् ॥ ९ ॥
सर्वोपस्करसंयुक्तं तथैकाङ्गां पयस्विनीम्।
गृहं च शक्तिमान् दद्यात् समस्तोपस्करान्वितम्॥१०
सहस्रेणाथ निष्काणां कृत्वा दद्याच्छतेन वा।
दशभिर्वाथ निष्केण तदर्द्धेनापि शक्तितः ॥ ११ ॥
सुवर्णाश्वः प्रदातव्यः पूर्ववन्मन्त्रवादनम्।
न वित्तशाठ्यं कुर्वीत कुर्वन्दोषं समश्नुते ॥ १२ ॥
अमृतं पिबतो वक्त्रात् सूर्य्यस्यामृतबिन्दवः।
निपेतुर्ये तदुत्थास्ते शालिमुद्गेक्षवः स्मृताः ॥ १३ ॥
शर्करा तु परा तस्मादिक्षुसारोऽमृतात्मवान्।
इष्टारवेरतः पुण्या शर्करा हव्यकव्ययोः ॥ १४ ॥

अर्करा सप्तमी चेयं वाजिमेधफलप्रदा।
सर्वदुष्टप्रशमनी पुत्रपौत्रप्रवर्द्धिनी॥ १५॥
यः कुर्यात् परया भक्त्या स वै सन्ततिमाप्नुयात्।
कल्पमेकं वसेत् स्वर्गे ततो याति परम्पदम्॥ १६॥
इदमनघं यः शृणोति स्मरेद्वा परिपठतीह सुरेश्वरस्य लोके।
मतिमपि च ददाति सोऽपि देवैरमरवधूजनमालयाभिपूज्यः॥१७

---

अथ सप्तसप्ततितमोऽध्यायः।

ईश्वर उवाच। अतः परं प्रवक्ष्यामि तद्वत् कमलसप्तमीम्।
यस्याः सङ्कीर्तनादेव तुष्यतीह दिवाकरः॥ १॥
वसन्तामलसप्तम्यां स्नातः सन् गौरसर्षपैः।
तिलपात्रे च सौवर्णं विधाय कमलं शुभम्॥ २॥
वस्त्रयुग्मावृतं कृत्वा गन्धपुष्पैः समर्चयेत्।
नमः कमलहस्ताय नमस्ते विश्वधारिणे॥ ३॥
दिवाकर! नमस्तुभ्यं प्रभाकर! नमोऽस्तु ते।
ततो द्विकालवेलायामुदकुम्भसमन्विताम्॥ ४॥
विप्राय दद्यात् संपूज्य वस्त्रमाल्यविभूषणैः।
शक्त्या च कपिलां दद्यादलङ्कृत्य विधानतः॥ ५॥
अहोरात्रे गते पश्चादष्टम्यां भोजयेद्द्विजान्।
यथाशक्त्याथ भुञ्जीत मांसतैलविवर्जितम्॥ ६॥
अनेन विधिना शुक्लसप्तम्यां मासि मासि च।
सर्वं समाचरेद्भक्त्या वित्तशाठ्यविवर्जितः॥ ७॥
व्रतान्ते शयनं दद्यात् सुवर्णं कमलान्वितम्।
गाञ्च दद्यात् स्वशक्त्या तु सुवर्णाढ्यां पयस्विनीम्॥८॥

भाजनाञ्च नदीपादीन् दद्यादिष्टानुपस्करान् ।
अनेन विधिना यस्तु कुर्यात् कमलसप्तमीम् ।
लक्ष्मीमनन्तामभ्येति सूर्य्यलोके महीयते ॥ ९ ॥
कल्पे कल्पे ततो लोकान् सप्त गत्वा पृथक् पृथक् ।
अप्सरोभिः परिवृतस्ततो याति पराङ्गतिम् ॥ १० ॥
यः पश्यतीदं शृणुयाच्च मर्त्यः पठेच्च भक्त्याथ मतिं ददाति ।
सोऽप्यत्र लक्ष्मीमचलामवाप्य गन्धर्वविद्याधरलोकभाक् स्यात् ॥ ११ ॥

---

## अथाष्टसप्ततितमोऽध्यायः ।

ईश्वर उवाच । अथातः संप्रवक्ष्यामि सर्वपापप्रणाशिनीम् ।
सर्वकामप्रदां रम्यां नाम्ना मन्दारसप्तमीम् ॥ १ ॥
माघस्यामलपक्षे तु पञ्चम्यां लघुभुङ् नरः ।
दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेद् बुधः ॥ २ ॥
विप्रान् संपूजयित्वा तु मन्दारं प्राशयेन्निशि ।
ततः प्रभात उत्थाय कृत्वा स्नानं पुनर्द्विजान् ॥ ३ ॥
भोजयेच्छक्तितः कृत्वा मन्दारकुसुमाष्टकम् ।
सौवर्णं पुरुषं तद्वत् पद्महस्तं सुशोभनम् ॥ ४ ॥
पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रे षु पत्रकम् ।
हैममन्दारकुसुमैर्भास्करायेति पूर्वतः ॥ ५ ॥
नमस्कारेण तद्वच्च सूर्य्यायेत्यानलेदले ।
दक्षिणे तद्वदर्काय तथार्य्यम्णेति नैरृते ॥ ६ ॥
पश्चिमे वेदधाम्ने च वायव्ये चण्डभानवे ।
पूष्णे त्वुत्तरतः पूज्यमानन्दायेत्यतः परम् ॥ ७ ॥
कर्णिकायाञ्च पुरुषं स्थाप्य सर्वात्मनेति च ।

धूपवस्त्रैः समावेष्ट्य भक्ष्यैर्माल्यफलादिभिः ॥ ८ ॥
एवमभ्यर्च्य तत्सर्वं दद्याद्द्विजवरे पुनः ।
भुञ्जीतातैललवणं वाग्यतः प्राङ्मुखो गृही ॥ ९ ॥
अनेन विधिना सर्वं सप्तम्यां मासि मासि च ।
कुर्य्यात्सम्वत्सरं यावद्वित्तशाठ्यविवर्जितः ॥ १० ॥
एतदेव व्रतान्ते तु निधाय कलशोपरि ।
गोभिर्विभवतः सार्द्धं दातव्यं भूतिमिच्छता ॥ ११ ॥
नमो मन्दारनाथाय मन्दारभवनाय च ।
त्वं रवे ! तारयस्वास्मान् संसारभयसागरात् ॥ १२ ॥
अनेन विधिना यस्तु कुर्य्यात् मन्दारसप्तमीम् ।
विपाप्मा स सुखी मर्त्यः कल्पन्तु दिवि मोदते ॥ १३ ॥
इमामघौघपटलभीषणध्वान्तदीपिकाम् ।
गच्छन् प्रगृह्य संसारं सर्वार्थांश्च लभेन्नरः ॥ १४ ॥
मन्दार सप्तमीमितामीप्सितार्थफलप्रदाम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥ १५ ॥

---

अथैनाशीतिसप्ततितमोऽध्यायः ।

श्रीभगवानुवाच । अथान्यामपि वक्ष्यामि शोभनां शुभसप्तमीम् ।
यामुपोष्य नरो रोगशोकदुःखैः प्रमुच्यते ॥ १ ॥
पुण्ये चाश्वयुजे मासि कृतस्नानजपः शुचिः ।
वाचयित्वा ततो विप्रानारभेच्छुभसप्तमीम् ॥ २ ॥
कपिलां पूजयेद्भक्त्या गन्धमाल्यानुलेपनैः ।
नमामि सूर्य्यसम्भूतामशेषभुवनालयाम् ।
त्वामहं शुभकल्याणशरीरां सर्वसिद्धये ॥ ३ ॥

अथ कृत्वा तिलप्रस्थं ताम्रपात्रेण संयुतम्।
काञ्चनं वृषभं तद्वद्गन्धमाल्यगुडान्वितैः॥ ४॥
फलैर्नानाविधैर्भक्ष्यैर्घृतपायससंयुतैः।
दद्यात् द्विकालवेलायामर्यमा प्रीयतामिति॥ ५॥
पञ्चगव्यञ्च संप्राश्य स्वपेद्भूमौ विमत्सरः।
ततः प्रभाते सञ्जाते भक्त्या संपूजयेद्‌द्विजान्॥ ६॥
अनेन विधिना दद्यान्मासि मासि सदा नरः।
वाससी वृषभं हैमं तद्वद्गां काञ्चनोद्भवाम्॥ ७॥
सम्वत्सरान्ते शयनमिक्षुदण्डगुडान्वितम्।
सोपधानकविश्रामं भाजनासनसंयुतम्॥ ८॥
ताम्रपात्रे तिलप्रस्थं सौवर्णं वृषभं तथा।
दद्याद्वेदविदे सर्वं विश्वात्मा प्रीयतामिति॥ ९॥
अनेन विधिना विद्वान् कुर्याद्यः शुभसप्तमीम्।
तस्य श्रीर्विपुला कीर्तिर्भवेज्जन्मनि जन्मनि॥ १०॥
अप्सरोगणगन्धर्वैः पूज्यमानः सुरालये।
वसेद्‌ गणाधिपो भूत्वा यावदाभूतसंप्लवम्।
कल्पादाववतीर्णस्तु सप्तद्वीपाधिपो भवेत्॥ ११॥
ब्रह्महत्यासहस्रस्य भ्रूणहत्याशतस्य च।
नाशायालमियं पुण्या पठ्यते शुभसप्तमी॥ १२॥
इमां पठेद्यः शृणुयान्मुहूर्तं पश्येत् प्रसङ्गादपि दीयमानम्
सोऽप्यत्र सर्वाघविमुक्तदेहः प्राप्नोति विद्याधरनायकत्वम्॥१३॥
यावत्समाः सप्त नरः करोति यः सप्तमीं सप्तविधानयुक्ताम्।
स सप्तलोकाधिपतिः क्रमेण भूत्वा पदं याति परं मुरारेः॥१४॥

---

अथाशीतितमोऽध्यायः ।

मनुरुवाच ।

किमभीष्टवियोगशोकसङ्घादलमुद्धर्त्तुमुपोषणं व्रतं वा ।
विभवोद्भवकारिभूतलेऽस्मिन् भवभीतेरपि सूदनञ्च पुंसः ॥ १॥

मत्स्य उवाच ।

परिपृष्टमिदं जगत् प्रियन्ते विबुधानामपि दुर्लभं महत्त्वात् ।
तव भक्तिमतस्तथापि वक्ष्ये व्रतमिन्द्रासुरमानवेषु गुह्यम् ॥ २

पुण्यमाश्वयुजे मासि विशोकद्वादशीव्रतम् ।
दशम्यां लघुभुग्विद्वानारभेन्नियमेन तु ॥ ३ ॥
उदङ्मुखः प्राङ्मुखो वा दन्तधावनपूर्वकम् ।
एकादश्यां निराहारः समभ्यर्च्य तु केशवम् ।
श्रियं वाभ्यर्च्य विधिवद्भोक्ष्यामि त्वपरेऽहनि ॥ ४ ॥
एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः ।
स्नानं सर्वौषधैः कुर्यात् पञ्चगव्यजलेन तु ।
शुक्लमाल्याम्बरधरः पूजयेच्छ्रीशमुत्पलैः ॥ ५ ॥
विशोकाय नमः पादौ जङ्घे च वरदाय वै ।
श्रीशाय जानुनी तद्वदूरू च जलशायिने ॥ ६ ॥
कन्दर्पाय नमो गुह्यं माधवाय नमः कटिम् ।
दामोदरायेत्युदरम्पार्श्वे च विपुलाय वै ॥ ७ ॥
नाभिञ्च पद्मनाभाय हृदयं मन्मथाय वै ।
श्रीधराय विभोर्वक्षः करौ मधुजिते नमः ॥ ८ ॥
चक्रिणे वामबाहुञ्च दक्षिणङ्गदिने नमः ।
वैकुण्ठाय नमः कण्ठमास्यं यज्ञमुखाय वै ॥ ९ ॥
नासामशोकनिधये वासुदेवाय चाक्षिणी ।

ललाटं वामनायेति हरयेति पुनर्भ्रुवौ ॥ १० ॥
अलकान् माधवायेति किरीटं विश्वरूपिणे ।
नमः सर्वात्मने तद्वच्छिर इत्यभिपूजयेत् ॥ ११ ॥
एवं संपूजय गोविन्दं फलमाल्यानुलेपनैः ।
ततस्तु मण्डलं कृत्वा स्थण्डिलं कारयेन्मृदा ॥ १२ ॥
चतुरस्रं समन्ताच्च रत्निमात्र मुदक्प्लवम् ।
श्लक्ष्णं हृद्यं च परितो विप्रत्रयसमावृतम् ॥ १३ ॥
अङ्गुलेनोच्छ्रिता विप्रास्तद्विस्तारस्तु द्व्यङ्गुलः ।
स्थण्डिलस्योपरिष्टाच्च भित्तिरष्टाङ्गुला भवेत् ॥ १४ ॥
नदी वालुकया शूर्पे लक्ष्म्याः प्रतिकृतिं न्यसेत् ।
स्थण्डिले शूर्पमारोप्य लक्ष्मीमित्यर्चयेद्बुधः ॥ १५ ॥
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै ।
नमः पुष्ट्यै नमस्तुष्ट्यै हृष्ट्यै हृष्ट्यै नमो नमः ॥१६॥
विशोका दुःखनाशाय विशोका वरदास्तु मे ।
विशोका चास्तु सम्पत्त्यै विशोका सर्वसिद्धये ॥ १७ ॥
ततः शुक्लाम्बरैः शूर्पं वेष्ट्य संपूजयेत्फलैः ।
वस्त्रैर्नानाविधैस्तद्वत् सुवर्णकमलेन च ॥ १८ ॥
रजनीषु च सर्वासु पिवेद्दर्भोदकं बुधः ।
ततस्तु गीतनृत्यादि कारयेत् सकलां निशाम् ॥ १९ ॥
यामत्रये व्यतीते तु सुप्त्वाप्युत्थाय मानवः ।
अभिगम्य च विप्राणां मिथुनानि तदार्चयेत् ॥ २० ॥
शक्तितस्त्रीणि चैकं वा वस्त्रमाल्यानुलेपनैः ।
शयनस्थानि पूज्यानि नमोऽस्तु जलशायिने ॥ २१ ॥
ततस्तु गीतवाद्येन रात्रिजागरणे कृते ।

प्रभाते च ततः स्नानं कृत्वा दाम्पत्यमर्चयेत् ॥ २२ ॥
भोजनञ्च यथाशक्त्या वित्तशाठ्यविवर्जितः ।
भुक्त्वा श्रुत्वा पुराणानि तद्दिनञ्चातिवाहयेत् ॥ २३ ॥
अनेन विधिना सर्वं मासि मासि समाचरेत् ।
व्रतान्ते शयनं दद्याद्गुड़धेनुसमन्वितम् ।
सोपधानकविश्रामं सास्तरावरणं शुभम् ॥ २४ ॥
यथा न लक्ष्मीर्देवेश ! त्वां परित्यज्य गच्छति ।
तथा सुरूपतारोग्यमशोकञ्चास्तु मे सदा ॥ २५ ॥
यथा देवेन रहिता न लक्ष्मीर्जायते क्वचित् ।
तथाविशोकतामेऽस्तु भक्तिरग्र्या च केशवे ॥ २६ ॥
मन्त्रेणानेन शयनं गुड़धेनुसमन्वितम् ।
शूर्पञ्च लक्ष्म्या सहितं दातव्यं भूतिमिच्छता ॥ २७ ॥
उत्पलं करवीरञ्च बाणमम्लानकुङ्कुमम् ।
केतकी सिन्दुवारञ्च मल्लिका गन्धपाटला ।
कदम्बं कुब्जकं जातिः शस्तान्येतानि सर्वदा ॥ २८ ॥

---

अथैकाशीतितमोऽध्यायः ।

मनुरुवाच । गुड़धेनुविधानं मे समाचक्ष्व जगत्पते ! ।
किं रूपं केन मन्त्रेण दातव्यं तदिहोच्यताम् ॥ १ ॥
मत्स्य उवाच । गुड़धेनुविधानस्य यद्रूपमिह यत् फलम् ।
तदिदानीं प्रवक्ष्यामि सर्वपापविनाशनम् ॥ २ ॥
कृष्णाजिनं चतुर्हस्तं प्रागग्रं विन्यसेद्भुवि ।
गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वतः ॥ ३ ॥
लघ्वेणकाजिनं तद्वत्सस्य परिकल्पयेत् ।

प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥ ४॥
उत्तमा गुडधेनुः स्यात् सदाभारचतुष्टयम्।
वत्सं भारेण कुर्वीत द्वाभ्यां वै मध्यमा स्मृता ॥ ५ ॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु।
चतुर्थांशेन वत्सः स्याद् गृहवित्तानुसारतः ॥ ६ ॥
धेनुवत्सौ घृतास्यौ च सितसूक्ष्माम्बरावृतौ।
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ॥ ७ ॥
सितसूत्रशिरालौ तौ सितकम्बलकम्बलौ।
ताम्रगण्डकपृष्ठौ तौ सितचामररोमकौ ॥ ८ ॥
विद्रुमभ्रूयुगोपेतौ नवनीतस्तनावुभौ।
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥ ९ ॥
सुवर्णशृङ्गाभरणौ राजतैः खुरसंयुतौ।
नानाफलसमायुक्तौ घ्राणगन्धकरण्डकौ।
इत्येवं रचयित्वा तौ दीपधूपैरथार्चयेत् ॥ १० ॥
या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥ ११ ॥
देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ १२ ॥
विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये ॥ १३ ॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे ॥ १४ ॥
स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजाञ्च या।

सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥ १५ ॥
एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
विधानमेतद्धेनूनां सर्वासामभिपठ्यते ॥ १६ ॥
यास्ताः पापविनाशिन्यः पठ्यन्ते दश धेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ! ॥ १७ ॥
प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथापरा ।
तिलधेनुस्तृतीया तु चतुर्थी जलसंज्ञिता ॥ १८ ॥
क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा ।
सप्तमी शर्कराधेनुर्दधिधेनुस्तथाष्टमी ।
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ॥ १९ ॥
कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः ।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ॥ २० ॥
नवनीतेन रत्नैश्च तथान्ये तु महर्षयः ॥ २० ॥
एतदेव विधानं स्यात्तएवोपस्कराः स्मृताः ।
मन्त्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि ।
यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ॥ २१ ॥
गुडधेनुप्रसङ्गेन सर्वास्तावन्मयोदिताः ।
अशेषयज्ञफलदाः सर्वाः पापहराः शुभाः ॥ २२ ॥
व्रतानामुत्तमं यस्माद्विशोकद्वादशीव्रतम् ।
तदङ्गत्वेन चैवात्र गुडधेनुः प्रशस्यते ॥ २३ ॥
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः ।
गुडधेन्वादयो देयास्तूपरागादिपर्वसु ॥ २४ ॥
विशोकद्वादशी चैषा पुण्या पापहरा शुभा ।
यामुपोष्य नरो याति तद्विष्णोः परमं पदम् ॥ २५ ॥

इह लोके च सौभाग्यमायुरारोग्य मेव च ।
वैष्णवं पुरमाप्नोति मरणे च स्मरन् हरिम् ॥ २६ ॥
नवार्बुदसहस्राणि दश चाष्टौ च धर्मवित् ।
न शोकदुःखदौर्गत्यं तस्य सञ्जायते नृप ! ॥ २७ ॥
नारी वा कुरुते या तु विशोकद्वादशीव्रतम् ।
नृत्यगीतपरा नित्यं सापि तत्फलमाप्नुयात् ॥ २८ ॥
तस्मादग्रे हरेर्नित्यमनन्तं गीतवादनम् ।
कर्त्तव्यं भूतिकामेन भक्त्या तु परया नृप ! ॥२९॥
इति पठति य इत्थं यः शृणोतीह सम्यक्
मधुमुरनरकारेरर्चनं यस्स पश्येत् ।
मतिमपि च जनानां यो ददातीन्द्रलोके
वसति स विबुधौघैः पूज्यते कल्पमेकम् ॥ ३० ॥

---

अथ द्व्यशीतितमोऽध्यायः ।

नारद उवाच ।

भगवन् ! श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ।
यदक्षयं परे लोके देवर्षिगणपूजितम् ॥ १ ॥
उमापतिरुवाच । मेरोः प्रदानं वक्ष्यामि दशधा मुनिपुङ्गव ! ।
यत्प्रदानान्नरो लोकानाप्नोति सुरपूजितान् ॥ २ ॥
पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च ।
न तत्फलमधीतेषु कृतेष्विह यदश्नुते ॥ ३ ॥
तस्माद्विधानं वक्ष्यामि पर्वतानामनुक्रमात् ॥
प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ॥ ४ ॥

गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः।
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः॥ ५॥
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः।
राजतो नवमस्तद्वद्दशमः शर्कराचलः॥ ६॥
वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः।
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये॥ ७॥
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये।
विवाहोत्सवयज्ञेषु द्वादश्यामथ वा पुनः॥ ८॥
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः।
धान्यशैलादयो देया यथाशास्त्रं विधानतः॥ ९॥
तीर्थेष्वायतनेष्वपि गोष्ठे वा भवनाङ्गणे।
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवणन्तद्वत् प्राङ्मुखञ्च विधानतः॥ १०॥
गोमयेनानुलिप्तायां भूमावास्तीर्य वै कुशान्।
तन्मध्ये पर्वतं कुर्यात् विष्कम्भपर्वतान्वितम्॥ ११॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः॥ १२॥
मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात्।
पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः॥ १३॥
पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैदूर्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवालैर्लतान्वितः शुक्तिशिलातलः स्यात्॥१४
ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।
मूर्द्धन्यवस्थानममत्सरेण कार्यं त्वनेकैश्च पुनर्द्विजौघैः॥ १५॥
चत्वारि शृङ्गाणि च राजतानि नितम्बभागेष्वपि राजतः स्यात्।

तथेक्षुवंशाहृतकन्दरश्च घृतोदकप्रस्रवणैश्च दिक्षु ॥ १६ ॥
शुक्लाम्बराण्यम्बुधरावली स्यात् पूर्वेण पीतानि च दक्षिणेन।
वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोघनाली ॥१७॥
रौप्यान् महेन्द्रप्रमुखांस्तथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्यान्मनोरमं माल्यविलेपनञ्च ।
वितानकञ्चोपरि पञ्चवर्णमम्लानपुष्पाभरणं सितञ्च ॥ १८ ॥
इत्थं निवेश्यामरशैलमग्र्यं मेरोस्तु विष्कम्भगिरीन् क्रमेण।
तुरीयभागेन चतुर्दिशञ्च संस्थापयेत् पुष्पविलेपनाढ्यान् ॥१९॥
पूर्वेण मन्दरमनेकफलावलीभियुक्तं यवैः कनकभद्रकदम्बचिह्नैः
कामेन काञ्चनमयेन विराजमान
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ।
क्षीरारुणोदसरसाथ वनेन चैवम्
रौप्येण शक्तिघटितेन विराजमानम् ॥ २० ॥
याम्येन गन्धमदनश्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतयुक्तः ।
हैमेन यक्षपतिना घृतमानसेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात् ॥ २१ ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्प-
सौवर्णपिप्पलहिरण्मयहंसयुक्तम् ।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे ॥ २२ ॥
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुवस्त्रम्।
पुष्पैश्च हेमवटपादपशेखरन्त

माकारयेत् कनकधेनुविराजमानम् ॥ २२ ॥
माध्वीकभद्रसरसाच वनेन तद्व-
द्द्वीपैश्च भास्करवता च युतं निधाय।
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः ॥ २४ ॥
पूर्वेण हस्तमितमत्र विधाय कुण्डम्
कार्यस्तिलैर्यवघृतेन समित्कुशैश्च।
रात्रौ च जागरमनुव्रतगीततुर्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ॥ २५ ॥
त्वं सर्वदेवगणधामनिधे! विरुद्ध-
मस्मद्गृहेष्वमर! पर्वतनाशयाशु।
क्षेमं विधत्स्व कुरु शान्ति मनुत्तमाञ्चः
संपूजितः परमभक्तिमता मया हि ॥ २६ ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः।
मूर्तामूर्तात्परं वीजमतः पाहि सनातन! ॥ २७ ॥
यस्मात्त्वं लोकपालानां विश्वमूर्तेश्च मन्दिरम्।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥ २८ ॥
यस्मादशून्यममरैर्नारीभिश्च शिवेन च।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ २९ ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत्।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन च वर्षतः ॥ ३० ॥
शोभसे मन्दर! क्षिप्रमतस्तुष्टिकरो भव।
यस्माच्चूडामणिर्जम्बूद्वीपे त्वं गन्धमादन! ॥ ३१ ॥
गन्धर्ववनशोभावानतः कीर्त्तिर्दृढास्तु मे।

यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ॥ ३२ ॥
हिरण्मयाश्वत्थशिरास्तस्मात् पुष्टिर्ध्रुवास्तु मे ।
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरक्षयास्तु मे ॥ ३३ ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।
स्नात्वाथ गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ॥ ३४ ॥
विष्कम्भपर्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने ! ।
गाश्च दद्याच्चतुर्विंशमथवा दश नारद ! ॥ ३५ ॥
नव सप्त तथाष्टौ वा पञ्च दद्यादशक्तिमान् ।
एकापि गुरवे देया कपिला च पयस्विनी ॥ ३६ ॥
पर्वतानामशेषाणामेष एव विधिः स्मृतः ।
तएव पूजने मन्त्रास्तएवोपस्करा मताः ॥ ३७ ॥
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्वदा ।
स्वमन्त्रेणैव सर्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमशक्तो नक्तमिष्यते ॥ ३८ ॥
विधानं सर्वशैलानां क्रमशः शृणु नारद ! ।
दानकाले च ये मन्त्राः पर्वतेषु च यत् फलम् ॥ ३९ ॥
अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः ।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ॥ ४० ॥
अन्नमेव ततो लक्ष्मीरन्नमेव जनार्दनः ।
धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ! ॥ ४१ ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरशतं साग्रं देवलोके महीयते ॥ ४२ ॥
अप्सरोगणगन्धर्वैराकीर्णेन विराजता ।

विमानेन दिवः पृष्ठमायाति च निषेवितः ।
धर्म्मक्षये राजराज्यमाप्नोतीह न संशयः ॥ ४१ ॥

---

अथ त्र्यशीतितमोऽध्यायः ।

ईश्वर उवाच । अथातः सम्प्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदानान्नरो लोकानाप्नोति शिवसंयुतान् ॥ १ ॥
उत्तमः षोड़शद्रोणैः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥ २ ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भपर्वतान् कारयेत् पृथक् ॥ ३ ॥
विधानं पूर्ववत्कुर्य्याद्ब्रह्मादीनाञ्च सर्वदा ।
तद्वद्धेममयान् सर्व्वान् लोकपालान्निवेशयेत् ॥ ४ ॥
सरांसि कामदेवादींस्तद्वदत्रापि कारयेत् ।
कुर्य्याज्जागरमत्रापि दानमन्त्रान्निबोधत ॥ ५ ॥
सौभाग्यरससम्भूतो यतोऽयं लवणोरसः ।
तद्दानकर्त्तृत्वेन त्वं मां पाहि नगोत्तम ! ॥ ६ ॥
यस्मादन्नरसाः सर्वे नोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिं प्रयच्छ मे ॥ ७॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ।
तस्मात्पर्वतरूपेण पाहि संसारसागरात् ॥ ८ ॥
अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ।
उमालोके वसेत्कल्पं ततो याति परां गतिम् ॥ ९॥

---

## अथ चतुरशीतितमोऽध्यायः ।

ईश्वर उवाच । अतःपरं प्रवक्ष्यामि गुड़पर्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितम् ॥ १ ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान् ॥ २ ॥
तद्वदामन्त्रणं पूजां हेमवृक्ष सुराचनम् ।
विष्कम्भपर्वतांस्तद्वत् सरांसि वनदेवताः ॥ ३ ॥
होमजागरणं तद्वल्लोकपालाधिवासनम् ।
धान्यपर्वतवत् कुर्यादिमं मन्त्रमुदीरयेत् ॥ ४ ॥
यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥ ५ ॥
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ ६ ॥
मम तस्मात् परां लक्ष्मीं गुडपर्वत ! देहि वै ।
यस्मात् सौभाग्यदायिन्या भ्राता त्वं गुडपर्वत ! ।
निवासश्चापि पार्वत्यास्तस्माच्छान्तिं प्रयच्छ मे ॥ ७ ॥
अनेन विधिना यस्तु दद्याद्‌गुडमयं गिरिम् ।
पूज्यमानः स गन्धर्वैर्गौरीलोके महीयते ॥ ८ ॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः ॥ ९ ॥

## अथ पञ्चाशीतितमोऽध्यायः ।

अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रदानाद्भवनं वैरिञ्चं याति मानवः ॥ १ ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः ।
दद्यादेकपलादूर्द्धं यथाशक्त्या विमत्सरः ॥ २ ॥
धान्यपर्वतवत् सर्वं विदध्यान्मुनिपुङ्गवः ।
विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ॥ ३ ॥
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय ते नमः ।
यस्मादनन्तफलदस्तस्मात्पाहि शिलोच्चय ! ॥ ४॥
यस्मादग्नेरपत्यं त्वं यस्मात् पुण्यं जगत्पते ! ।
हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ! ॥ ५ ॥
अनेन विधिना यस्तु दद्यात् कनकपर्वतम् ।
स याति परमं ब्रह्मलोकमानन्दकारकम् ।
तत्र कल्पशतं तिष्ठेत् ततो याति परां गतिम् ॥६॥

## अथ षडशीतितमोऽध्यायः ।

अतःपरं प्रवक्ष्यामि तिलशैलं विधानतः ।
यत् प्रदानान्नरो याति विष्णुलोकं सनातनम् ॥ १ ॥
उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिः स्मृतः ।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्तितः ॥२॥
पूर्ववच्चापरान् सर्वान् विष्कम्भानभितो गिरीन् ।
दानमन्त्रान् प्रवक्ष्यामि यथावन्मुनिपुङ्गव ! ॥ ३ ॥
यस्मान् मधुवधे विष्णोर्देहस्वेदसमुद्भवाः ।
तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवत्विह ॥४॥

हव्ये कव्ये च यस्माच्च तिला एवाभिरक्षणम्।
भवादुद्धर शैलेन्द्र! तिलाचल! नमोऽस्तु ते ॥ ५ ॥
इत्यामन्त्र्य च यो दद्यात् तिलाचलमनुत्तमम्।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् ॥ ६ ॥
दीर्घायुष्यं समाप्नोति पुत्रपौत्रैश्च मोदते।
पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत् ॥ ७ ॥

---

## अथ सप्ताशीतितमोऽध्यायः।

कार्पासपर्वतस्त्वद्वविंशद्भारैरिहोत्तमः।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्वधमः स्मृतः।
भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः ॥ १ ॥
धान्यपर्वतवत् सर्वमासाद्य मुनिपुङ्गव!।
प्रभातायान्तु शर्वर्यां दद्यादिदमुदीरयेत् ॥ २ ॥
त्वमेवावरणं यस्माल्लोकानामिह सर्वदा।
कार्पासाद्रे! नमस्तुभ्यमघौघध्वंसनो भव ॥ ३ ॥
इति कार्पासशैलेन्द्रं यो दद्याच्छर्वसन्निधौ।
रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह ॥ ४ ॥

---

## अथाष्टाशीतितमोऽध्यायः।

अतः परं प्रवक्ष्यामि घृताचलमनुत्तमम्।
तेजोऽमृतमयं दिव्यं महापातकनाशनम् ॥ १ ॥
विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्वधमः स्मृतः ॥ २ ॥
अल्पवित्तोऽपि यः कुर्य्याद्द्वाभ्यामिह विधानतः।

विष्कम्भपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत् ॥ ३ ॥
शालितण्डुलपात्राणि कुम्भोपरि निवेशयेत् ।
कारयेत्संहतानुच्चान्यथाशोभं विधानतः ॥४॥
वेष्टयेच्छुक्लवासोभिरिक्षुदण्डफलादिकैः ।
धान्यपर्वतवच्छेषं विधानमिह पठ्यते ॥ ५ ॥
अधिवासनपूर्वञ्च तद्वद्धोमसुरार्चनम् ।
प्रभातायां तु शर्वर्य्यां गुरवे तन्निवेदयेत् ।
विष्कम्भपर्वतां स्तद्वदृत्विग्भ्यः शान्तमानसः ॥ ६ ॥
संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः ।
तस्माद्घृतार्च्चिर्विश्वात्मा प्रीयतामत्र शङ्करः ॥ ७ ॥
यस्मात्तेजोमयं ब्रह्म घृते तद्धि व्यवस्थितम् ।
घृतपर्वतरूपेण तस्मात्त्वं पाहि नोऽनिशम् ॥ ८ ॥
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ।
महापातकयुक्तोऽपि लोकमाप्नोति शाङ्करम् ॥ ८ ॥
हंससारसयुक्तेन किङ्किणीजालमालिना ।
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः ।
विहरेत् पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥ १० ॥

---

अथैकनवतितमोऽध्यायः ।

अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्वतः स्यादनुत्तमः ॥ १ ॥
मध्यमः पञ्चशतकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भपर्वताः स्युः समन्ततः ॥ २ ॥
पूर्वेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः ।

पद्मरागयुतः कार्य्यो विद्वद्भिर्गन्धमादनः ॥ ३ ॥
वैदूर्य्यविद्रुमैः पश्चात्संमिश्रो विमलाचलः।
पद्मरागैः ससौवर्णैरुत्तरेण च विन्यसेत् ॥ ४ ॥
धान्यपर्वतवत्सर्वमत्रापि परिकल्पयेत्।
तद्वदावाहनं कुर्य्याद्‌वृक्षान् देवांश्च काञ्चनान् ॥ ५ ॥
पूजयेत्पुष्पगन्धाद्यैः प्रभाते च विमत्सरः।
पूर्ववद्‌गुरुऋत्विग्भ्य इमान् मन्त्रानुदीरयेत् ॥ ६ ॥
यदा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः।
त्वञ्च रत्नमयो नित्यं नमस्तेऽस्तु सदाचल ! ॥ ७ ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः।
सदा रत्नप्रदानेन तस्मान्नः पाहि पर्वत ! ॥ ८ ॥
अनेन विधिना यस्तु दद्याद्रत्नमयं गिरिम्।
स याति विष्णुसालोक्यममरेश्वरपूजितः ॥ ९ ॥
यावत्कल्पशतं साग्रं वसेच्चेह नराधिप !।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥ १० ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम्।
तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा ॥ ११ ॥

---

## अथ नवतितमोऽध्यायः।

अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रदानान्नरो याति सोमलोकमनुत्तमम् ॥ १ ॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनाधमः स्मृतः ॥ २ ॥
अशक्तो विंशतेरूर्द्ध्वं कारयेच्छक्तितस्तदा।

विष्कम्भपर्वतांस्तद्वत्तुरीयांशेन कल्पयेत् ॥ ३ ॥
पूर्ववद्राजतान् कुर्वन् मन्दरादीन् विधानतः ।
कलधौतमयांस्तद्वल्लोकेशानर्चयेद् बुधः ॥ ४ ॥
ब्रह्मविष्ण्वर्कवान् कार्यो नितम्बोऽत्र हिरण्मयः ।
राजतं स्याद्यदन्येषां सर्वं तदिह काञ्चनम् ॥ ५ ॥
शेषन्तु पूर्ववत् कुर्याद्धोमजागरणादिकम् ।
दद्यात्ततः प्रभाते तु गुरवे रौप्यपर्वतम् ॥ ६ ॥
विष्कम्भशैलान्त्विग्भ्यः पूज्य वस्त्रविभूषणैः ।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्विमत्सरः ॥ ७ ॥
पितृणां वल्लभो यस्माद्धरीन्द्राणां शिवस्य च ।
पाहि राजत ! तस्मात्त्वं शोकसंसारसागरात् ॥ ८ ॥
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥ ९ ॥
सोमलोके सगन्धर्वैः किन्नराप्सरसाङ्गणैः ।
पूज्यमानो वसेद् विद्वान् यावदाभूतसंप्लवम् ॥ १० ॥

---

## अथैकनवतितमोऽध्यायः ।

अथातः संप्रवक्ष्यामि शर्कराशैलमुत्तमम् ।
यस्य प्रदानाद्विष्ण्वर्करुद्रास्तुष्यन्ति सर्वदा ॥ १ ॥
अष्टाभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥ २ ॥
भारेण चार्द्धभारेण कुर्याद्यः स्वल्पवित्तवान् ।
विष्कम्भपर्वतान् कुर्यात् तुरीयांशेन मानवः ॥ ३ ॥
धान्यपर्वतवत् सर्वमासाद्यामरसंयुतम् ।

मेरोरुपरि तद्वच्च स्थाप्य हेमतरुत्रयम् ॥ ४ ॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः ।
एतद् वृक्षत्रयं मूर्द्ध्नि सर्व्वेष्वपि नियोजयेत् ॥ ५ ॥
हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः ।
निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले ॥ ६ ॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गे तु धनदः स्यादुदङ्मुखः ॥ ७ ॥
प्राङ्मुखो वेदमूर्तिस्तु हंसः स्याद्विपुलाचले ।
हैमी सुपार्श्वे सुरभिर्दक्षिणाभिमुखी भवेत् ॥ ८ ॥
धान्यपर्वतवत् सर्वमावाहनविधानकम् ।
कृत्वा तु गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ।
ऋत्विग्भ्यश्चतुरः शैलानिमान्मन्त्रानुदीरयन् ॥ ९ ॥
सौभाग्यामृतसारोऽयं पर्वतः शर्करायुतः ।
तस्मादानन्दकारी त्वं भव शैलेन्द्र ! सर्वदा ॥ १० ॥
अमृतं पिवतां ये तु निपेतुर्भुवि शीकराः ।
देवानां तत् समुत्थस्त्वं पाहि नः शर्कराचल ! ॥ ११ ॥
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ।
तन्मयोऽसि महाशैल ! पाहि संसारसागरात् ॥ १२ ॥
यो दद्याच्छर्कराशैलमनेन विधिना नरः ।
सर्वपापैर्विनिर्मुक्तः स याति परमम्पदम् ॥ १३ ॥
चन्द्रतारार्कसङ्काशमधिरुह्यानुजीविभिः ।
सहैव यानमातिष्ठेत्तत्र विष्णुप्रचोदितः ॥ १४ ॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।

आयुरारोग्यसम्पन्नो यावज्जन्मार्बुदत्रयम् ॥ १५ ॥
भोजनं शक्तितः कुर्यात् सर्वशैलेष्वमत्सरः ।
सर्वनाचारलवणमश्नीयात्तदनुज्ञया ।
पर्वतोपस्करान् सर्वान् प्रापयेद् ब्राह्मणालयम् ॥१६॥
ईश्वर उवाच । आसीत् पुरा वृहत्कल्पे धर्ममूर्तिर्जनाधिपः ।
सुहृच्छक्रस्य निहता येन दैत्याः सहस्रशः ॥ १७ ॥
सोमसूर्यादयो यस्य तेजसा विगतप्रभाः ।
भवन्ति शतशो येन शत्रवश्चापराजिताः ।
यथेच्छारूपधारी च मनुष्योऽप्यपराजितः ॥ १८ ॥
तस्य भानुमती नाम भार्या त्रैलोक्यसुन्दरी ।
लक्ष्मीवद्दिव्यरूपेण निर्जितामरसुन्दरी ॥ १९ ॥
राज्ञस्तस्याग्रमहिषी प्राणेभ्योऽपि गरीयसी ।
दशनारीसहस्राणां मध्ये श्रीरिव राजते ॥ २० ॥
नृपकोटिसहस्रेण न कदाचित् समुच्यते ।
कदाचिदास्थानगतः पप्रच्छ स पुरोधसम् ।
विस्मयेनाहृतो राजा वसिष्ठमृषिसत्तमम् ॥ २१ ॥
भगवन् ! केन धर्मेण मम लक्ष्मी रनुत्तमा ।
कस्माच्च विपुलन्तेजो मच्छरीरे सदोत्तमम् ॥ २२ ॥
वसिष्ठ उवाच । पुरा लीलावती नाम वेश्या शिवपरायणा ।
तया दत्तश्चतुर्दश्यां गुरवे लवणाचलः ।
हेमवृक्षादिभिः सार्द्धं यथावद्विधिपूर्वकम् ॥ २३ ॥
शूद्रः सुवर्णकारश्च नाम्ना शौण्डोऽभवत्तदा ।
भृत्यो लीलावतीगेहे तेन हेम्ना विनिर्मिताः ॥ २४ ॥
तरवः सुरमुख्याश्च श्रद्धायुक्तेन पार्थिव ! ।

मतिरूपेण संपन्ना घटयित्वा विना भृतिम् ।
धर्म्मकार्य्यमिति ज्ञात्वा न गृह्णाति कथञ्चन ॥ २५ ॥
उज्ज्वालिताश्च तत्पत्नग्रा सौवर्णामरपादपाः ।
लीलावती गिरेः पार्श्वे परिचर्य्याश्च पार्थिव ! ॥ २६ ॥
कृत्वा ताभ्यामग्याठ्रेन गुरुशुश्रूषणादिकम् ।
सा च लीलावती वेश्या कालेन महतापि च ॥२७॥
कालधर्म्मं मनुप्राप्ता कर्म्मयोगेन नारद ! ।
सर्वपापविनिर्मुक्ता जगाम शिवमन्दिरम् ॥ २८ ॥
योऽसौ सुवर्णकारस्तु दरिद्रोऽप्रतिसत्ववान् ।
न मौल्यमादादे ख्यातः स भवानिह साम्प्रतम् ॥२९॥
सप्तद्वीपपतिर्जातः सूर्य्यायुतसमप्रभः ।
यथा सुवर्णकारस्य तरवो हेमनिर्मिताः ।
सम्यगुज्ज्वालिताः पत्नग्रा सेयमनुमती तव ॥ ३० ॥

उज्ज्वालनादुज्ज्वलरूपमस्याः सञ्जातमस्मिन् भुवनाधिपत्यम् ।
यस्मात् कृतं तत्परिकर्म्म राजावनुद्धताभ्यां लवणाचलस्य ।
तस्माच्च लोकेष्वपराजितत्वमारोग्यसौभाग्ययुता च लक्ष्मीः॥३१
तस्मात्त्वमप्यत्र विधानपूर्वं धान्याचलादीन् दशधा कुरुष्व ।
तथेति सत्कृत्य स धर्म्ममूर्त्तिर्वचो वसिष्ठस्य ददौ च सर्वान् ।
धान्याचलादीन् प्रतगो मुरारेर्लोकं जगामामरपूज्यमानः ॥३२

पश्येदपीमाबधनोऽति भक्त्या
स्पृशेन्नरैर्नरपि दीयमानान् ।
शृणोति भक्त्याथ मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति ॥ ३३ ॥
दुःस्वप्नं प्रशममुपेति पठ्यमाने

शैलेन्द्रैर्भवभयभेदनैर्मनुष्यः ।
यः कुर्यात् किमु मुनिपुङ्गवेह सम्यक्
शान्तात्मा सकलगिरीन्द्रसम्प्रदानम् ॥ २५ ॥

---

अथ द्विनवतितमोऽध्यायः ।

सूत उवाच । वैशम्पायनमासीनमपृच्छच्छौनकः पुरा ।
सर्वकामाप्तये नित्यं कथं शान्तिकपौष्टिकम् ॥ १ ॥
वैशम्पायन उवाच । श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत् ।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन् पुनः ।
येन ब्रह्मन् ! विधानेन तन्मे निगदतः शृणु ॥ २ ॥
सर्वशास्त्राण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम् ।
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिचोदिताम् ॥ ३ ॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ।
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ॥ ४ ॥
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ॥ ५ ॥
तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः ।
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ॥ ६ ॥
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ।
गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् ॥ ७ ॥
वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रायसम्मिताम् ।
संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम् ॥ ८ ॥
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ।
देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ॥ ९ ॥

सूर्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ।
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥ १० ॥
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥ ११ ॥
पूर्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्वके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ॥ १२ ॥
भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ॥ १३ ॥
ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहोः कालं तथैव च ॥ १४ ॥
केतोर्वै चित्रगुप्तञ्च सर्वेषामधिदेवताः ।
अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ॥ १५ ॥
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ।
विनायकं तथा दुर्गां वायुराकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥ १६ ॥
संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥ १७ ॥
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितम् ॥ १८ ॥
गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् ।
अङ्गारकाय संयावं बुधाय क्षीरषष्टिकम् ॥ १९ ॥

दध्योदनञ्च जीवाय शुक्राय च गुड़ौदनम् ।
शनैश्चराय कृसरामजामांसञ्च राहवे ।
चित्रौदनञ्च केतुभ्यः सर्व्वैर्भक्ष्यैरथार्चयेत् ॥ २० ॥
प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितम् ।
चूतपल्लवसंच्छन्नं फलवस्त्रयुगान्वितम् ॥ २१ ॥
पञ्चरत्नसमायुक्तं पञ्च भङ्ग समन्वितम् ।
स्थापयेदव्रणं कुम्भं वरुणं तत्र विन्यसेत् ॥ २२ ॥
गङ्गाद्याः सरितः सर्व्वाः समुद्रांश्च सरांसि च ।
गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ॥ २३ ॥
मृदमानीय विप्रेन्द्र ! सर्व्वौषधिजलान्वितम् ।
स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्म्मवित् ॥ २४ ॥
सर्व्वे समुद्राः सरितः सरांसि च नदा स्तथा ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ २५ ॥
एवमावाहयेदेतानमरान्मुनिसत्तम ! ।
होमं समारभेत् सर्पिर्यवव्रीहितिलादिना ॥ २६ ॥
अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः ।
औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥२७ ॥
एकैकस्याष्टकशतमष्टाविंशतिमेव वा ।
होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ॥२८ ॥
प्रादेशमात्रा अशिफा अशाखा अपलाशिनीः ।
समिधः कल्पयेत्प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा ॥ २९ ॥
देवानामपि सर्व्वेषामुपांशु परमार्थवित् ।
स्वेन स्वेनैव मन्त्रेण होतव्याः समिधः पृथक् ॥ ३० ॥
होतव्यं च घृताभ्यक्तं चरु भक्षादिकं पुनः ।

मन्त्रैर्दशाहुतीर्हुत्वा होमं व्याहृतिभिस्ततः ॥ ३१ ॥
उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुङ्गवाः ।
मन्त्रवन्तश्च कर्त्तव्याश्चरवः प्रतिदैवतम् ॥ ३२ ॥
हुत्वा च तांश्चरून् सम्यक् ततो होमं समाचरेत् ।
आकृष्णेति च सूर्य्याय होमः कार्य्यो द्विजन्मना ॥३३॥
आप्यायस्वेति सोमाय मन्त्रेण जुहुयात् पुनः ।
अग्निर्मूर्द्धा दिवो मन्त्र इति भौमाय कीर्त्तयेत् ॥३४॥
अग्ने ! विवस्वदुषस इति सोमसुताय वै ।
बृहस्पते ! परिदीया रथेनेति गुरोर्मतः ॥ ३५ ॥
शुक्रन्ते अन्यदिति च शुक्रस्यापि निगद्यते ।
शनैश्चरायेति पुनः शन्नो देवीति होमयेत् ॥ ३६ ॥
कयानश्चित्र आभुव इति राहोरुदाहृतः ॥ ३७ ॥
केतुं कृण्वन्नपि ब्रूयात् केतूनामपि शान्तये ।
आवो राजेति रुद्रस्य बलिहोमं समाचरेत् ।
आपोहिष्ठेत्युमायास्तु स्योनेति स्वामिनस्तथा ॥३८॥
विष्णोरिदं विष्णुरिति तमीशेति स्वयम्भुवः ।
इन्द्रमिद्देवतायेति इन्द्राय जुहुयात्ततः ॥ ३९ ॥
तथा यमस्य चायं गौरिति होमः प्रकीर्त्तितः ।
कालस्य ब्रह्मजज्ञानमिति मन्त्रः प्रशस्यते ॥ ४० ॥
चित्रगुप्तस्य चाज्ञातमिति मन्त्रविदो विदुः ।
अग्निं दूतं वृणीमह इति वह्नेरुदाहृतः ॥ ४१ ॥
उदुत्तमं वरुणमित्यपां मन्त्रः प्रकीर्त्तितः ।
भूमिः पृथिव्यन्तरिक्षमिति वेदेषु पठ्यते ॥ ४२ ॥
सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः ।

इन्द्रायेन्द्रो मरुत्वत इति शक्रस्य भण्यते ॥ ४३ ॥
उत्तानपर्णे सुभगे इति देव्याः समाचरेत् ।
प्रजापतेः पुनर्होमः प्रजापतिरिति स्मृतः ॥ ४४ ॥
नमोऽस्तु सर्पेभ्य इति सर्पाणां मन्त्र उच्यते ।
एष ब्रह्माय ऋत्विज्य इति ब्रह्मण्युदाहृतः ॥ ४५ ॥
विनायकस्य चानूनमिति मन्त्रो बुधैः स्मृतः ।
जातवेदसे सुनवामिति दुर्गामन्त्र उच्यते ॥ ४६ ॥
आदित्प्रत्नस्य रेतस आकाशस्य उदाहृतः ।
प्राणाग्निश्चमहोमाश्च वायोर्मन्त्रः प्रकीर्त्तितः ॥ ४७ ॥
एषो उषा अपूर्व्यादित्यग्निर्मन्त्र उच्यते ।
पूर्णाहुतिस्तु मूर्द्धानं दिव इत्यभिपातयेत् ॥ ४८ ॥
अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ।
पूर्णकुम्भेन तेनैव होमान्ते प्रागुदङ्मुखम् ॥ ४९ ॥
अव्यङ्गावयवैर्ब्रह्मन् ! हेमस्रग्दामभूषितैः ।
यजमानस्य कर्त्तव्यं चतुर्भिः स्नपनं द्विजैः ॥ ५० ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ ५१ ॥
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालास्त्वामवन्तु ते ॥ ५२ ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ।
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ॥ ५२ ॥

आदित्यश्चन्द्रमा भौमो बुधो जीवः सितोऽर्कजः ।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ ५४ ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मुनयो गावो देवमातर एव च ॥ ५५ ॥
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः ।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ ५६ ॥
औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ५७ ॥
ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः ।
सर्वौषधैः सर्वगन्धैः स्नापितो द्विजपुङ्गवैः ॥ ५८ ॥
यजमानः सपत्नीकः ऋत्विजः सुसमाहितान् ।
दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः ॥ ५९ ॥
सूर्याय कपिलां धेनुं शङ्खं दद्यात्तथेन्दवे ।
रक्तं धुरन्धरं दद्याद्भौमाय च ककुद्मिनम् ॥ ६० ॥
बुधाय जातरूपन्तु गुरवे पीतवाससी ।
श्वेताश्वन्दैत्यगुरवे कृष्णाङ्गामर्कसूनवे ॥ ६१ ॥
पायसं राहवे दद्यात् केतुभ्यश्छागमुत्तमम् ।
सुवर्णेन समा कार्य्या यजमानेन दक्षिणा ॥ ६२ ॥
सर्वेषामथवा गावो दातव्या हेमभूषिताः ।
सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति ।
समन्त्रेणैव दातव्याः सर्वाः सर्वत्र दक्षिणाः ॥ ६३ ॥
पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानाञ्च मङ्गलम् ।
विष्णुना विधृतश्चासि ततः शान्तिं प्रयच्छ मे ॥ ६४ ॥

धर्मस्त्वं वृषरूपेण जगदानन्दकारक ! ।
अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ॥ ६५ ॥
हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ६६ ॥
पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ।
प्रदानात्तस्य मे विष्णो ! ह्यतः शान्तिं प्रयच्छ मे ॥ ६७ ॥
विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः ।
चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ॥ ६८ ॥
यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥ ६९ ॥
यस्मादायसकर्माणि तवाधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि तस्माच्छान्तिं प्रयच्छ मे ॥ ७० ॥
यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः ।
यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥ ७१ ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छ्रिये मे स्यादिह लोके परत्र च ॥ ७२ ॥
यस्मादशून्यं शयनं केशवस्य च सर्वदा ।
शय्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि ॥ ७३ ॥
यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः ।
तथा रत्नानि यच्छन्तु रत्नदानेन मे सुराः ॥ ७४ ॥
यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ॥ ७५ ॥
दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह ॥ ७५ ॥
एवं संपूजयेद्भक्त्या वित्तशाठ्येन वर्जितः ।
रत्नकाञ्चनवस्त्रौघैर्धूपमाल्यानुलेपनैः ॥ ७६ ॥

अनेन विधिना यस्तु ग्रहपूजां समाचरेत्।
सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥७७॥
यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः।
तञ्च यत्नेन संपूज्य शेषानप्यर्चयेद् बुधः ॥ ७८ ॥
ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः।
पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः ॥ ७९ ॥
यथा वाणप्रहाराणां कवचम्भवति वारणम्।
तद्वद्दैवोपघातानां शान्तिर्भवति वारणम् ॥ ८० ॥
तस्माच्च दक्षिणाहीनं कर्तव्यं भूतिमिच्छता।
संपूर्णया दक्षिणया यस्मादेकोऽपि तुष्यति ॥ ८१ ॥
सदैवायुतहोमोऽयं नवग्रहमखे स्थितः।
विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु ॥ ८२ ॥
निर्विघ्नार्थं मुनिश्रेष्ठ! तथोद्वेगाद्भुतेषु च।
कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु ॥ ८३ ॥
सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः।
पितॄणां वल्लभं साक्षाद्भुक्तिमुक्तिफलप्रदम् ॥ ८४ ॥
ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनम्।
गृहस्योत्तरपूर्वेण मण्डपं कारयेद् बुधः ॥ ८५ ॥
रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखम्।
दशहस्तमथाष्टौ वा हस्तान् कुर्याद्विधानतः ॥ ८६ ॥
प्रागुदक्प्रवणां भूमिं कारयेद्यत्नतो बुधः।
प्रागुत्तरं समासाद्य प्रदेशं मण्डपस्य तु ॥ ८७ ॥
शोभनं कारयेत् कुण्डं यथावल्लक्षणान्वितम्।
चतुरस्रं समन्तात्तु योनिवक्त्रं समेखलम् ॥ ८८ ॥

चतुरङ्गुलविस्तारा मेखला तद्वदुच्छ्रिता ।
प्रागुदक् प्रवणा कार्या सर्वतः समवस्थिता ॥ ८६ ॥
शान्त्यर्थं सर्वलोकानां नवग्रहमखः स्मृतः ।
मानहीनाधिकं कुण्डमनेकभयदम्भवेत् ।
यस्मात्तस्मात् सुसम्पूर्णं शान्तिकुण्डं विधीयते ॥ ९० ॥
अस्मादृशगुणः प्रोक्तो लक्षहोमः स्वयम्भुवा ।
आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च ॥ ९१ ॥
द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः ।
लक्षहोमे भवेत् कुण्डं योनिवक्त्रत्रिमेखलम् ॥ ९२ ॥
तस्य चोत्तरपूर्वेण वितस्तित्रयसंस्थितम् ।
प्रागुदक् प्रवणन्तच्च चतुरस्रं समन्ततः ॥ ९३ ॥
विष्कम्भार्द्धोच्छ्रितं प्रोक्तं स्थण्डिलं विश्वकर्मणा ।
संस्थापनाय देवानां वप्रत्रयसमावृतम् ॥ ९४ ॥
द्व्यङ्गुलोऽप्युच्छ्रितो विप्रः प्रथमः स उदाहृतः ।
अङ्गुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि ॥ ९५ ॥
त्र्यङ्गुलस्य च विस्तारः सर्वेषां कथ्यते बुधैः ।
दशाङ्गुलोच्छ्रिता भित्तिः स्थण्डिले स्यात्तथोपरि ।
तस्मिन्नावाहयेद्देवान् पूर्ववत् पुष्पतण्डुलैः ॥ ९६ ॥
आदित्याभिमुखाः सर्वाः साधिप्रत्यधिदेवताः ।
स्थापनीया मुनिश्रेष्ठ ! नोत्तरेण पराङ्मुखाः ॥ ९७ ॥
गरुत्मानधिकस्तत्र संपूज्यः श्रियमिच्छता ।
सामध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः ।
विषपापहरो नित्य मतः शान्तिं प्रयच्छ मे ॥ ९८ ॥
पूर्ववत् कुम्भमामन्त्र्य तद्वद्धोमं समाचरेत् ।

सहस्राणां शतं हुत्वा समित्संख्याधिकं पुनः।
घृतकुम्भवसोर्धारां पातयेदनलोपरि ॥ ९९ ॥
औदुम्बरीं तथार्द्रांच ऋज्वीं कोटरवर्जिताम्।
बाहुमात्रां स्रुचं कृत्वा ततस्तम्भद्वयोपरि।
घृतधारान्तयासम्यगग्नेरुपरि पातयेत् ॥ १०० ॥
श्रावयेत् सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवम्।
महावैश्वानरं साम ज्येष्ठसाम च वाचयेत् ॥ १०१ ॥
स्नानञ्च यजमानस्य पूर्ववत् स्वस्तिवाचनम्।
दातव्या यजमानेन पूर्ववद्दक्षिणाः पृथक् ॥ १०२ ॥
कामक्रोधविहीनेन ऋत्विग्भ्यः शान्तचेतसा।
नवग्रहमखे विप्राश्चत्वारो वेदवेदिनः ॥ १०३ ॥
अथवा ऋत्विजौ शान्तौ द्वावेव श्रुतिकोविदौ।
कार्यावयुतहोमे तु न प्रसज्जेत विस्तरे ॥ १०४ ॥
तद्वच्च दश चाष्टौ च लक्षहोमे तु ऋत्विजः।
कर्त्तव्याः शक्तितस्तद्वच्चतुरो वा विमत्सरः ॥ १०५ ॥
नवग्रहमखात् सर्वं लक्षहोमे दशोत्तरम्।
भक्ष्यान् दद्यान् मुनिश्रेष्ठ! भूषणान्यपि शक्तितः ॥ १०६ ॥
शयनानि सवस्त्राणि हैमानि कटकानि च।
कर्णाङ्गुलिपवित्राणि कण्ठसूत्राणि शक्तिमान् ॥ १०७ ॥
न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः।
अददन् लोभतो मोहात् कुलक्षयमवाप्नुते ॥ १०८ ॥
अन्नदानं यथाशक्त्या कर्त्तव्यं भूतिमिच्छता।
अन्नहीनः कृतो यस्माद्दुर्भिक्षफलदो भवेत् ॥ १०९ ॥

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः ।
यष्टारं दक्षिणाहीनं नास्ति यज्ञसमोरिपुः ॥ ११०॥
नवाप्यल्पधनः कुर्याल्लक्षहोमं नरः क्वचित् ।
यस्मात्पीडाकरो नित्यं यज्ञे भवति विग्रहः ॥ १११
तमेव पूजयेद्भक्त्या द्वौ वा त्रीन् वा यथाविधि ।
एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगम् ।
दक्षिणाभिः प्रयत्नेन न बहूनल्पवित्तवान् ॥ ११२ ॥
लक्षहोमस्तु कर्तव्यो यथावित्तं भवेद्गृहे ।
यतः सर्वानवाप्नोति कुर्वन् कामान् विधानतः ॥११३॥
पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः ।
यावत्कल्पशतान्यष्टा वथ मोक्षमवाप्नुयात् ॥ ११४ ॥
सकामोऽयस्त्विमं कुर्याल्लक्षहोमं यथाविधि ।
स तं काममवाप्नोति पदमानन्त्यमश्नुते ॥ ११५ ॥
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ।
भार्यार्थी शोभनां भार्य्यां कुमारी च शुभं पतिम्॥११६
भ्रष्टराजस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ।
यं यं प्रार्थयते कामं स वै भवति पुष्कलः ।
निष्कामः कुरुते यस्तु स परं ब्रह्म गच्छति ॥ ११७॥
अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयम्भुवा ।
आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च ॥ ११८ ॥
पूर्ववद् ग्रहदेवानामावाहनविसर्जने ।
होममन्त्रास्त एवोक्ताः स्नाने दाने तथैव च ।
कुण्डमण्डपवेदीनां विशेषोऽयं निबोध मे ॥ ११९ ॥
कोटिहोमे चतुर्हस्तं चतुरस्रन्तु सर्वतः ।

योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलम् ॥ १२० ॥
द्व्यङ्गुलाभ्युच्छ्रिता कार्य्या प्रथमा मेखला बुधैः ।
त्र्यङ्गुलाभ्युच्छ्रिता तद्वद् द्वितीया परिकीर्त्तिता ॥ १२१ ॥
उच्छ्राय विस्तराभ्यां च तृतीया चतुरङ्गुला ।
द्व्यङ्गुलश्चेति विस्तारः पूर्व्वयोरेव शस्यते ॥ १२२ ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता ।
कूर्म्मपृष्ठोन्नता मध्ये पार्श्वयोश्चाङ्गुलोच्छ्रिता ॥ १२३ ॥
गजोष्ठसदृशी तद्वदायताच्छिद्रसंयुता ।
एतत् सर्व्वेषु कुण्डेषु योनिलक्षणमुच्यते ।
मेखलोपरि सर्व्वत्र अश्वत्थदलसन्निभम् ॥ १२४ ॥
वेदी च कोटिहोमे स्याद्वितस्तीनां चतुष्टयम् ।
चतुरस्रा समन्ताच्च त्रिभिर्व्वप्रैस्तु संयुता ।
वप्रप्रमाणं पूर्व्वोक्तं वेदीनां च तथोच्छ्रयः ॥ १२५ ॥
तथा षोडशहस्तः स्यान्मण्डपश्च चतुर्मुखः ।
पूर्व्वद्वारे च संस्थाप्य बह्वृचं वेदपारगम् ॥ १२६ ॥
यजुर्व्विदं तथा याम्ये पश्चिमे सामवेदिनम् ।
अथर्व्ववेदिनं तद्वदुत्तरे स्थापयेद् बुधः ॥ १२७ ॥
अष्टौ तु होमकाः कार्य्या वेदवेदाङ्गवेदिनः ।
एवं द्वादश विप्राः स्युर्व्वस्त्रमाल्यानुलेपनैः ।
पूर्व्ववत् पूजयेत्तद्वद्वस्त्राभरणभूषणैः ॥ १२८ ॥
रात्रिसूक्तं च रौद्रञ्च पावमानं सुमङ्गलम् ।
पूर्व्वतो बह्वृचः शान्तिं पठन्नास्ते ह्युदङ्मुखः ॥ १२९ ॥
शाक्तं शाक्रञ्च सौम्यञ्च कौष्माण्डं शान्तिमेव च ।
पाठयेद्दक्षिणद्वारि यजुर्व्वेदिनमुत्तमम् ॥ १३० ॥

सुपर्णमथ वैराजमाग्नेयं रुद्रसंहिताम् ।
ज्येष्ठसाम तथा शान्तिं छन्दोगः पश्चिमे जपेत्॥१२१
शान्तिं सूक्तञ्च सौरञ्च तथा शाकुनकं शुभम् ।
पौष्टिकञ्च महाराजमुत्तरेणाप्यथर्ववित् ॥ १२२ ॥
पञ्चभिः सप्तभिर्वापि होमः कार्योऽत्र पूर्ववत् ।
स्नाने दाने च मन्त्राः स्युस्त एव मुनिसत्तम ! ॥१२३॥
वसोर्धाराविधानञ्च लक्षहोमे विशिष्यते ।
अनेन विधिना यस्तु कोटिहोमं समाचरेत् ।
सर्व्वान् कामानवाप्नोति ततो विष्णुपदं व्रजेत् ॥१२४॥
यः पठेच्छृणुयाद्वापि ग्रहयज्ञत्रयं नरः ।
सर्वपापविशुद्धात्मा पदमिन्द्रस्य गच्छति ॥ १२५ ॥
अश्वमेधसहस्राणि दश चाष्टौ च धर्म्मवित् ।
कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते ॥१२६ ॥
ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानि च ।
कोटिहोमेन नश्यन्ति यथावच्छिवभाषितम् ॥ १२७ ॥
वश्यकर्माभिचारादि तथैवोच्चाटनादिकम् ।
नवग्रहमखं कृत्वा ततः काम्यं समाचरेत् ॥ १२८ ॥
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ।
तस्मादयुतहोमस्य विधानं पूर्वमाचरेत् ॥ १२९ ॥
हस्तं वोच्चाटने कुण्डं तथा च वश्यकर्म्मणि ।
त्रिमेखलञ्चैकवक्त्रमरत्निविस्तरेण तु ॥ १४० ॥
पलाशसमिधः शस्ता मधुगोरोचनान्विताः ।
चन्दनागुरुणा तद्वत् कुङ्कुमेनाभिषिञ्चिताः ॥१४१॥
होमयेन्मधुसर्पिभ्यां बिल्वानि कमलानि च ।

सहस्राणि दशैवोक्तं सर्वदैव स्वयम्भुवा ॥ १४२ ॥
वश्यकर्मणि बिल्वानां पद्मानां चैव धर्मवित् ।
सुमित्रियान आप ओषधय इति होमयेत् ॥ १४३ ॥
न चात्र स्थापनं कार्यं न च कुम्भाभिषेचनम् ।
स्नानं सर्वौषधैः कृत्वा शुक्लपुष्पाम्बरो गृही ॥१४४॥
कण्ठसूत्रैः सकनकैः विप्रान् समभिपूजयेत् ।
सूक्ष्मवस्त्राणि देयानि शुक्ला गावः सकाञ्चनाः ॥१४५॥
अवश्यानि वशीकुर्यात् सर्वशत्रुबलान्यपि ।
अमित्राण्यपि मित्राणि होमोऽयं पापनाशनः ॥१४६॥
विद्वेषणेऽभिचारे च त्रिकोणं कुण्डमिष्यते ।
द्विमेखलं कोणमुखं हस्तमात्रञ्च सर्वशः ॥ १४७ ॥
होमं कुर्युस्ततो विप्रा रक्तमाल्यानुलेपनाः ।
निवीतलोहितोष्णीषा लोहिताम्बरधारिणः ॥१४८॥
नववायसरक्ताढ्यपात्रत्रयसमन्विताः ।
समिधो वामहस्तेन श्येनास्थिबलसंयुताः ।
होतव्या मुक्तकेशैस्तु ध्यायद्भिरशिवं रिपौ ॥ १४९ ॥
दुर्मित्रियास्तस्मै सन्तु तथा हुम्फडितीति च ।
श्येनाभिचारमन्त्रेण क्षुरं समभिमन्त्र्य च ॥१५०॥
प्रतिरूपं रिपोः कृत्वा क्षुरेण परिकर्तयेत् ।
रिपुरूपस्य शकलान्यथैवाग्नौ विनिक्षिपेत् ॥ १५१ ॥
गृह्ययज्ञविधानान्ते सदैवाभिचरन् पुनः ।
विद्वेषणं तथा कुर्वन्नेतदेव समाचरेत् ॥ १५२ ॥
इहैव फलदं पुंसामेतन्नामुत्र शोभनम् ।
तस्माच्छान्तिकमेवात्र कर्तव्यं भूतिमिच्छता ॥ १५३ ॥

ग्रहयज्ञत्रयं कुर्य्याद्यस्त्वकाम्येन मानवः ।
स विष्णोः पदमाप्नोति पुनरावृत्तिदुर्लभम् ॥ १५४॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ।
न तस्य ग्रहपीडा स्यान्न च बन्धुजनक्षयः ॥ १५५ ॥
ग्रहयज्ञत्रयं गेहे लिखितं यत्र तिष्ठति ।
न पीडा तत्र बालानां न रोगो न च बन्धनम् ॥१५६॥
अशेषयज्ञफलदं निःशेषाघविनाशनम् ।
कोटिहोमं विदुः प्राज्ञा भुक्तिमुक्तिफलप्रदम् ॥ १५७॥
अश्वमेधफलं प्राहुर्लक्षहोमं सुरोत्तमाः ।
द्वादशाहमखस्तद्वन्नवग्रहमखः स्मृतः ॥ १५८ ॥
इति कथितमिदानीमुत्सवानन्द हेतोः
सकलकलुषहारी देवयज्ञाभिषेकः ।
परिपठति य इत्थं यः शृणोति प्रसङ्गा
दभिभवति स शत्रूनायुरारोग्ययुक्तः ॥ १५९ ॥

---

त्रिनवतितमोऽध्यायः ।

शिव उवाच । पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात् सदा रविः ॥ १ ॥
श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतवाहनः ।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ २ ॥
रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ।
चतुर्भुजः श्वेतरोमा वरदः स्याद्धरासुतः ॥ ३ ॥
पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः ।
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ ४ ॥

देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ।
दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ ५ ॥
इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः।
बाणबाणासनधरः कर्त्तव्योऽर्कसुतस्तथा ॥ ६ ॥
नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते।
धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः।
गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ ७ ॥
सर्वे किरीटिनः कार्य्या ग्रहालोकहितावहाः।
ह्यङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा ॥ ८ ॥

---

अथ चतुर्नवतितमोऽध्यायः।

नारद उवाच। भगवन्! भूतभव्येश! तथान्यदपि यच्छ्रुतम्।
भुक्तिमुक्तिफलायालं तत्पुनर्वक्तुमर्हसि ॥ १ ॥
एवमुक्तोऽब्रवीच्छम्भुरयं वाङ्मयपारगः।
मत्समस्तपसा ब्रह्मन्! पुराणश्रुतिविस्तरैः ॥ २ ॥
धर्मोऽयं वृषरूपेण नन्दीनाम गणाधिपः।
धर्मान् माहेश्वरान् वक्ष्यत्यतः प्रभृति नारद! ॥ ३ ॥
मत्स्य उवाच। शृणुष्वावहितो ब्रह्मन्! वक्ष्ये माहेश्वरं व्रतम्।
त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी ॥ ४ ॥
मार्गशीर्षे त्रयोदश्यां सितायामेकभोजनः।
प्रार्थयेद्देवदेवेश! त्वामहं शरणं गतः ॥ ५ ॥
चतुर्दश्यां निराहारः सम्यगभ्यर्च्य शङ्करम्।
सुवर्णवृषभं दत्त्वा भोक्ष्यामि च परेऽहनि ॥ ६ ॥
एवं नियमकृत् सुप्त्वा प्रातरुत्थाय मानवः।

कृतस्नानजपः पश्चादुमया सह शङ्करम् ।
पूजयेत्कमलैः शुभ्रैर्गन्धमाल्यानुलेपनैः ॥ ७ ॥
पादौ नमः शिवायेति शिरः सर्वात्मने नमः ।
त्रिनेत्रायेति नेत्राणि ललाटं हरये नमः ॥ ८ ॥
मुखमिन्दुमुखायेति श्रीकण्ठायेति कन्धराम् ।
सद्योजाताय कर्णौ तु वामदेवाय वै भुजौ ॥ ९ ॥
अघोरहृदयायेति हृदयञ्चाभिपूजयेत् ।
स्तनौ तत्पुरुषायेति तथेशानाय चोदरम् ॥ १० ॥
पार्श्वे चानन्तधर्माय ज्ञानभूताय वै कटिम् ।
ऊरू चानन्तवैराग्यसिंहायेत्यभिपूजयेत् ॥ ११ ॥
अनन्तैश्वर्य्यनाथाय जानुनी चार्चयेद् बुधः ।
प्रधानाय नमो जङ्घे गुल्फौ व्योमात्मने नमः ॥ १२ ॥
व्योमकेशात्मरूपाय केशान् पृष्ठञ्च पूजयेत् ।
नमः पुष्ट्यै नमस्तुष्ट्यै पार्वतीञ्चापि पूजयेत् ॥ १३ ॥
ततस्तु वृषभं हैममुदकुम्भसमन्वितम् ।
शुक्लमाल्याम्बरधरं पञ्चरत्नसमन्वितम् ।
भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत् ॥ १४ ॥
तता विप्रान् समाहूय तर्पयेद्भक्तितः शुभान् ।
पृषदाज्यञ्च संप्राश्य स्वपेद्भूमावुदङ्मुखः ॥ १५ ॥
पञ्चदश्यां ततः पूज्य विप्रान् भुञ्जीत वाग्यतः ।
तद्वत् कृष्णचतुर्दश्यामेतत् सर्वं समाचरेत् ॥ १६
चतुर्दशीषु सर्वासु कुर्य्यात् पूर्ववदर्चनम् ।
ये तु मासे विशेषाः स्युस्तान्निबोध क्रमादिह ॥ १७ ॥
मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत् ।

शङ्कराय नमस्तेऽस्तु नमस्ते करवीरक ! ॥ १८ ॥
त्र्यम्बकाय नमस्तेऽस्तु महेश्वर मतः परम् ।
नमस्तेऽस्तु महादेव ! स्थाणवे च ततः परम् ॥ १९ ॥
नमः पशुपते नाथ ! नमस्ते शम्भवे पुनः ।
नमस्ते परमानन्द ! नमः सोमार्द्धधारिणे ॥ २० ॥
नमो भीमाय इत्येवं त्वामहं शरणं गतः ।
गोमूत्रं गोमयं क्षीरं दधिसर्पिःकुशोदकम् ॥ २१ ॥
पञ्चगव्यं ततोबिल्वं कर्पूरञ्चागुरुं यवाः ।
तिलाः कृष्णाश्च विधिवत्प्राशनं क्रमशः स्मृतम् ।
प्रतिमासं चतुर्दश्योरेकैकं प्राशनं स्मृतम् ॥ २२ ॥
मन्दारमालतीभिश्च तथा धत्तूरकैरपि ।
सिन्दुवारैरशोकैश्च मल्लिकाभिश्च पाटलैः ॥ २३ ॥
अर्कपुष्पैः कदम्बैश्च शतपत्रा तथोत्पलैः ।
एकैकेन चतुर्दश्यो रर्चयेत्पार्वतीपतिम् ॥ २४ ॥
पुनश्च कार्तिके मासे प्राप्ते सन्तर्पयेद्द्विजान् ।
अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रमाल्यविभूषणैः ॥ २५ ॥
कृत्वा नीलवृषोत्सर्गं श्रुत्युक्तविधिना नरः ।
उमामहेश्वरं हैमं वृषभञ्च गवा सह ॥ २६ ॥
मुक्ताफलाष्टकयुतं सितनेत्रपटावृताम् ।
सर्वोपस्करसंयुक्तां शय्यां दद्यात् सकुम्भकाम् ॥ २७ ॥
ताम्रपात्रोपरि पुनः शालितण्डुलसंयुतम् ।
स्थाप्य विप्राय शान्ताय वेदव्रतपराय च ॥ २८ ॥
ज्येष्ठसामविदे देयं नवकव्रतिने क्वचित् ।
गुणज्ञे श्रोत्रिये दद्यादाचार्ये तत्त्ववेदिनि ॥ २९ ॥

अङ्गाङ्गाय सौम्याय सदाकल्याणकारिणे ।
सपत्नीकाय संपूज्य वस्त्रमाल्यविभूषणैः ॥३० ॥
गुरौ सति गुरोर्देयं तदभावे द्विजातये ।
न वित्तशाठ्यं कुर्वीत कुर्वन् दोषात्पतत्यधः ॥ ३१ ॥
अनेन विधिना यस्तु कुर्याच्छिवचतुर्दशीम् ।
सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ३२ ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
पितृभिर्भ्रातृभिर्वापि तत् सर्वं नाशमाप्नुयात् ॥ ३३ ॥
दीर्घायुरारोग्यकुलान्नवृद्धि रत्राचयामुत्र चतुर्भुजत्वम् ।
गणाधिपत्यं दिवि कल्पकोटिशतान्युषित्वा पदमेति शर्म्भोः॥३४
न बृहस्पतिरप्यनन्तमस्याः फलमिन्द्रोन पितामहोऽपि वक्तुम्।
न च सिद्धगणोऽप्यलं न चाहं यदिजिह्वायुतकोटापि वक्त्रे ३५॥
भवत्यमरवल्लभः पठति यः स्मरेद्वासदा
शृणोत्यपि विमत्सरः सकलपापनिर्मोचनम् ।
इमां शिव चतुर्दशी ममरकामिनी कोटयः ।
स्तुवन्ति तमनिन्दितं किमुत्तमाचरेद्यः सदा ॥ ३६ ॥
या वाथ नारी कुरुतेति भक्त्या भर्तारमापृच्छ्य सुतान् गुरून् वा ।
सापि प्रसादात्परमेश्वरस्य परम्पदं याति पिनाकपाणेः ॥३७॥
इति नन्दिनारदसंवादे शिवचतुर्दशीव्रतं नाम
चतुर्नवतितमोऽध्यायः ।

---

अथ पञ्चनवतितमोऽध्यायः ।

नन्दिकेश्वर उवाच । फलत्यागस्य माहात्म्यं यच्छिवेच्छ्रृणु नारद ! ।
यदक्षयं परं लोके सर्वकामफलप्रदम् ॥ १ ॥

मार्गशीर्षे शुभे मासि तृतीयायां मुने! व्रतम्।
द्वादश्यामथवाष्टम्यां चतुर्दश्यामथापि वा।
आरभेच्छुक्लपक्षस्य कृत्वा ब्राह्मणवाचनम्॥ २॥
अन्येष्वपि हि मासेषु पुण्येषु मुनिसत्तम!।
सदक्षिणाम्पायसेन भोजयेच्छक्तितो द्विजान्॥ ३॥
अष्टादशानां धान्यानामवशं फलमूलकैः।
वर्जयेदब्दमेकन्तु ऋते औषधकारणम्।
सवृषं काञ्चनं रुद्रं धर्म्मराजञ्च कारयेत्॥ ४॥
कूष्माण्डं मातुलिङ्गञ्च वार्त्ताकम्पनसं तथा।
आम्रामातकपित्थानि कलिङ्गमथ वालुकम्॥ ५॥
श्रीफलाश्वत्थबदरञ्जम्बीरं कदलीफलम्।
काश्मरन्दाडिमं शक्त्या कालधौतानि षोडश॥ ६॥
मूलकामलकं जम्बूतिन्तिडीकरमर्दकम्।
कङ्कोलैलाकतुण्डीरकरीरकुटजं शमी॥ ७॥
औदुम्बरं नालिकेरं द्राक्षाथ बृहतीद्वयम्।
रौप्याणि कारयेच्छक्त्या फलानीमानि षोडश॥ ८॥
ताम्रं तालफलं कुर्य्यादगस्तिफलमेव च।
पिण्डारकाश्मर्य्यफलं तथा सूरणकन्दकम्॥ ९॥
रक्तालुकाकन्दकञ्च कनकाह्वञ्च चिर्भिटम्।
चित्रवल्लीफलं तद्वत्कूटशाल्मलिजम्फलम्॥ १०॥
आम्रनिष्पावमधुकवटमुद्गपटोलकम्।
ताम्राणि षोडशैतानि कारयेच्छक्तितो नरः॥ ११॥
उदकुम्भद्वयं कुर्य्याद्धान्योपरि सवस्त्रकम्।
ततश्च कारयेच्छय्यां तयोपरि सुवाससी॥ १२॥

भक्ष्यपात्रत्रयोपेतं यमरुद्रवृषान्वितम् ।
धेन्वा सहैव शान्ताय विप्रायाथ कुटुम्बिने ।
सपत्नीकाय संपूज्य पुण्येऽह्नि विनिवेदयेत् ॥ १३ ॥
यथा फलेषु सर्वेषु वसन्त्यमरकोटयः ।
तथा सर्वफलत्यागव्रताद्भक्तिः शिवेऽस्तु मे ॥ १४ ॥
यथा शिवश्च धर्मश्च सदानन्तफलप्रदौ ।
तद्युक्तफलदानेन तौ स्यातां मे वरप्रदौ ॥ १५ ॥
यथा फलान्यनन्तानि शिवभक्तेषु सर्वदा ।
तथानन्तफलावाप्तिरस्तु जन्मनि जन्मनि ॥ १६ ॥
यथा भेदं न पश्यामि शिवविष्ण्वर्कपद्मजान् ।
तथा ममास्तु विश्वात्मा शङ्करः शङ्करः सदा ॥ १७ ॥
इति दत्त्वा च तत्सर्वमलङ्कृत्य च भूषणैः ।
शक्तिश्चेच्छयनं दद्यात् सर्वोपस्करसंयुतम् ॥ १८ ॥
अशक्तस्तु फलान्येव यथोक्तानि विधानतः ।
तथोदकुम्भसंयुक्तौ शिवधर्मौ च काञ्चनौ ॥ १९ ॥
विप्राय दत्त्वा भुञ्जीत वाग्यतस्तैलवर्जितम् ।
अन्यान्यपि यथा शक्त्या भोजयेच्छक्तितो द्विजान् ॥२०॥
एतद्भागवतानान्तु सौरवैष्णवयोगिनाम् ।
शुभं सर्वफलत्यागव्रतं वेदविदो विदुः ॥ २१ ॥
नारीभिश्च यथाशक्त्या कर्तव्यं द्विजपुङ्गव ! ।
एतस्मान्नापरं किञ्चिदिहलोके परत्र च ।
व्रतमस्ति मुनिश्रेष्ठ ! यदनन्तफलप्रदम् ॥ २२ ॥
सौवर्णरौप्यताम्रेषु यावन्तः परमाणवः ।
भवन्ति चूर्णमानेषु फलेषु मुनिसत्तम ! ।

तावद्युगसहस्राणि रुद्रलोके महीयते ॥ २३ ॥
एतत्समस्तकलुषापहरं जनाना-
मा जीवनाय मनुजेषु च सर्वदा स्यात् ।
जन्मान्तरेष्वपि न पुत्रवियोगदुःख-
माप्नोति धाम च पुरन्दरलोकजुष्टम् ॥ २४ ॥
यो वा शृणोति पुरुषोऽल्पधनः पठेद्वा
देवालयेषु भवनेषु च धार्मिकाणाम् ।
पापैर्विमुक्तवपुरत्र परं पुरारे-
रानन्दकृत्पदमुपैति मुनीन्द्र ! सोऽपि ॥ २५ ॥

---

अथ पञ्चनवतितमोऽध्यायः ।

नारद उवाच । यदारोग्यकरं पुंसां यदनन्तफलप्रदम् ।
यच्छान्तये च मर्त्यानां वद नन्दीश तद्व्रतम् ॥ १ ॥
नन्दिकेश्वर उवाच । यत्तद्विश्वात्मनो धाम परं ब्रह्म सनातनम् ।
सूर्याग्निचन्द्ररूपेण तत्त्रिधा जगति स्थितम् ॥ २ ॥
तदाराध्य पुमान् विप्र प्राप्नोति कुशलं सदा ।
तस्मादादित्यवारेण सदा नक्ताशनो भवेत् ॥ ३ ॥
यदा हस्तेन संयुक्तमादित्यस्य च वासरम् ।
तदा शनिदिने कुर्यादेकभक्तं विमत्सरः ॥ ४ ॥
नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान् ।
पत्रैर्द्वादशसंयुक्तं रक्तचन्दनपङ्कजम् ॥ ५ ॥
विलिख्य विन्यसेत् सूर्यं नमस्कारेण पूर्वतः ।
दिवाकरं तथाग्नेये विवस्वन्तमतः परम् ॥ ६ ॥

भगन्तु नैर्ऋते देवं वरुणं पश्चिमे दले ।
महेन्द्रमनिले तद्वदादित्यञ्च तथोत्तरे ॥ ७ ॥
मित्रमीशानभागे तु नमस्कारेण विन्यसेत् ।
कर्णिका पूर्वपत्रे तु सूर्य्यस्य तुरगान् न्यसेत् ॥ ८ ॥
दक्षिणेऽर्य्यमनामानं मार्तण्डं पश्चिमे दले ।
उत्तरे तु रविं देवं कर्णिकायाञ्च भास्करम् ॥ ९ ॥
रक्तपुष्पोदकेनार्घ्यं सतिलारुणचन्दनम् ।
तस्मिन् पद्मे ततो दद्यादिमं मन्त्रमुदीरयेत् ॥ १० ॥
कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
यस्मादग्नीन्दुरूपस्त्वमतः पाहि दिवाकर ! ॥ ११ ॥
अग्निमीले नमस्तुभ्यमिषेत्वोर्जे च भास्कर ! ।
अग्न आयाहि वरद ! नमस्ते ज्योतिषाम्पते ! ॥ १२ ॥
अर्घ्यं दत्त्वा विसर्ज्जाय निशि तैलविवर्जितम् ।
भुञ्जीत वत्सरान्ते तु काञ्चनं कमलोत्तमम् ।
पुरुषञ्च यथाशक्त्या कारयेद्द्विभुजं तथा ॥ १३ ॥
सुवर्णशृङ्गीं कपिलां महार्घ्यां रौप्यैः खुरैः कांस्यदोहां सवत्साम् ।
पूर्णे गुडस्योपरि ताम्रपात्रे निधाय पद्मं पुरुषञ्च दद्यात् ॥ १४ ॥
संपूज्य रक्ताम्बरमाल्यधूपैर्द्विजञ्च रत्नैश्च हेमशृङ्गैः ।
संकल्पयित्वा पुरुषं सपद्मं दद्यादनेकव्रतदानकाय ।
अव्यङ्गरूपाय जितेन्द्रियाय कुटुम्बिने देय मनुव्रताय ॥ १५ ॥
नमो नमः पापविनाशनाय विश्वात्मने सप्ततुरङ्गमाय ।
सामर्ग्यजुर्धामनिधे ! विधात भवाब्धिपोताय जगत्सवित्रे ॥ १६ ॥
इत्यनेन विधिना समाचरेदब्दमेकमिह यस्तु मानवः ।
सोऽधिरोहति विनष्टकल्मषः सूर्य्यधामधुतचामरावलिः ॥ १७ ॥

धर्मसंचयमवाप्य भूपतिः शोकदुःखभयरोगवर्जितः ।
द्वीपसप्तकपतिः पुनः पुनर्धर्ममूर्तिरमितौजसा युतः ॥ १८ ॥
याच भर्तृगुरुदेवतत्परा वेदमूर्त्तिदिननक्तमाचरेत् ।
सापि लोकममरेशवन्दिता याति नारद ! रवेर्नसंशयः ॥१९॥
यः पठेदपि शृणोति मानवः पठ्यमानमथवानुमोदते ।
सोऽपि शक्रभुवनस्थितोऽमरैः पूज्यते वसति चाक्षयं दिवि॥२०॥

---

अथ सप्तनवतितमोऽध्यायः ।

नन्दिकेश्वर उवाच ।

अथान्यदपि वक्ष्यामि संक्रान्त्युद्यापने फलम् ।
यदक्षयं परे लोके सर्वकामफलप्रदम् ॥ १ ॥
अयने विषुवे वापि संक्रान्ति व्रतमाचरेत् ।
पूर्वेद्युरेकभक्तेन दन्तधावनपूर्वकम् ।
संक्रान्तिवासरे प्रातस्तिलैः स्नानं विधीयते ॥ २ ॥
रविसंक्रमणे भूमौ चन्दनेनाष्टपत्रकम् ।
पद्मं सकर्णिकं कुर्यात् तस्मिन्नावाहयेद्रविम् ॥ ३॥
कर्णिकायां न्यसेत् सूर्यमादित्यं पूर्वतस्ततः ।
नम उष्णार्चिषे याम्ये नमो ऋक्मण्डलाय च ॥४॥
नमः सवित्रे नैऋते वारुणे तपनं पुनः ।
वायव्ये तु भगं न्यस्य पुनः पुनरथार्चयेत् ॥ ५ ॥
मार्तण्डमुत्तरे विष्णुमीशाने विन्यसेत् सदा ।
गन्धमाल्यफलैर्भक्ष्यैः स्थण्डिले पूजयेत्ततः ॥ ६ ॥
द्विजाय सोदकुम्भञ्च घृतपात्रं हिरण्मयम् ।
कमलञ्च यथा शक्त्या कारयित्वा निवेदयेत् ॥ ७ ॥

चन्दनोदकपुष्पैश्च दद्याच्चार्घ्यं निवेदयेत् भुवि ।
विश्वाय विश्वरूपाय विश्वधाम्ने स्वयम्भुवे ।
नमोऽनन्त ! नमो धाम्ने ऋक्सामयजुषाम्पते ! ॥८॥
अनेन विधिना सर्वं मासि मासि समाचरेत् ।
वत्सरान्तेऽथवा कुर्यात् सर्वं द्वादशधा नरः ॥ ९ ॥
सम्वत्सरान्ते घृतपायसेन सन्तर्प्य वह्निं द्विजपुङ्गवांश्च ।
कुम्भान् पुनर्द्वादशधेनुयुक्तान् सरत्नहैरण्मयपद्मयुक्तान् ॥१०॥
पयस्विनीः शीलवतीश्च दद्याद्धेमैः शृङ्गैरौप्यखुरैश्च युक्ताः ।
गावोऽथवा सप्त यथांस्वदोहामाल्याम्बरावाथ चतुरोऽप्यशक्तः ।
दौर्गत्ययुक्तः कपिलामथैकां निवेदयेद्ब्राह्मणपुङ्गवाय ॥११॥
हैमीञ्च दद्यात् पृथिवीं सशेषामाकार्यरूपाममवा च ताम्रीम् ।
पैष्टीमशक्तः प्रतिमां विधाय सौवर्णसूर्येण समन्वदद्यात् ।
न वित्तशाठ्यं पुरुषोऽत्र कुर्यात् कुर्वन्नधो याति नसंशयोऽत्र १२
यावन्महेन्द्रप्रमुखैर्नगेन्द्रैः पृथ्वी च सप्ताब्धियुतेह तिष्ठेत् ।
तावत् सगन्धर्वगणैरशेषैः संपूज्यते नारद ! नाकपृष्ठे ॥१३॥
ततस्तु कर्मक्षयमाप्य सप्तद्वीपाधिपः स्यात् कुलशीलयुक्तः ।
स्पष्टेमुखेऽव्यङ्गवपुः सभार्यः प्रभूतपुत्रान्वयवन्दिताङ्घ्रिः ॥१४॥
इति पठति शृणोति वाथ भक्त्या विधिमखिलं रविसंक्रमस्य पुण्यम् ।
मतिमपि च ददाति सोऽपि देवैरमरपतेर्भवने प्रपूज्यते च ॥१५॥

---

अथाष्टनवतितमोऽध्यायः ।

नन्दिकेश्वर उवाच । शृणु नारद ! वक्ष्यामि विष्णोर्व्रतमनुत्तमम् ।
विभूतिद्वादशी नाम सर्वदेव नमस्कृतम् ॥ १ ॥
कार्त्तिके चैत्रवैशाखे मार्गशीर्षे च फाल्गुने ।

आषाढे वा दशम्यान्तु शुक्लायां लघुभुङ्नरः ।
कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः ॥ २ ॥
एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ।
द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं विभो ! ॥ ३ ॥
तदविघ्नेन मे यातु सफलं स्याच्च केशव ! ।
नमो नारायणायेति वाच्यश्च स्वपता निशि ॥ ४ ॥
ततः प्रभात उत्थाय सावित्र्यष्टशतञ्जपेत् ।
पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥ ५ ॥
विभूतये नमः पादावशोकाय च जानुनी ।
नमः शिवायेत्यूरू च विश्वमूर्त्ते ! नमः कटिम् ॥ ६ ॥
कन्दर्पाय नमो मेढ्रं फलं नारायणाय च ।
दामोदरायेत्युदरं वासुदेवाय च स्तनौ ॥ ७ ॥
माधवायेत्युरो विष्णोः कण्ठमुत्कण्ठिने नमः ।
श्रीधराय मुखं केशान् केशवायेति नारद ! ॥ ८ ॥
पृष्ठं शार्ङ्गधरायेति श्रवणौ वरदाय वै ।
स्वनाम्ना शङ्खचक्रासिगदाजलजपाणये ।
शिरः सर्वात्मने ब्रह्मन् ! नम इत्यभिपूजयेत् ॥ ९ ॥
मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ।
उदकुम्भसमायुक्तः मग्रतः स्थापयेद् बुधः ॥ १० ॥
गुडपात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ।
रात्रौ जागरणं कुर्यादितिहासकथादिना ॥ ११ ॥
प्रभातायान्तु शर्वर्यां ब्राह्मणाय कुटुम्बिने ।
सकाञ्चनोत्पलं देवं सोदकुम्भं निवेदयेत् ॥ १२ ॥
यथा न मुच्यसे देव ! सदा सर्वविभूतिभिः ।

तथा मामुद्धराशेषदुःखसंसारकर्दमात् ॥ १३ ॥
दशावताररूपाणि प्रतिमासं क्रमान्मुने ।
दत्तात्रेयं तथा व्यास मुत्पलेन समन्वितम् ।
दद्यादेवं समा यावत्पाषण्डानभिवर्जयेत् ॥ १४ ॥
समाप्यैवं यथाशक्त्या द्वादश द्वादशीः पुनः ।
सम्वत्सरान्ते लवणपर्वतेन समन्विताम् ।
शय्यां दद्यान्मुनिश्रेष्ठ ! गुरवे धेनुसंयुताम् ॥ १५ ॥
ग्रामञ्च शक्तिमान् दद्यात् क्षेत्रं वा भवनान्वितम् ।
गुरुं संपूज्य विधिवद्वस्त्रालङ्कारभूषणैः ॥ १६ ॥
अन्यानपि यथाशक्त्या भोजयित्वा द्विजोत्तमान् ।
त र्पयेद्वस्त्रगोदानै रत्नौघधनसञ्चयैः ।
अल्पवित्तो यथाशक्त्या स्तोकं स्तोकं समाचरेत् ॥१७
यश्चाप्यतीव निःस्वः स्याद्भक्तिमान् माधवं प्रति ।
पुष्पार्चनविधानेन स कुर्याद्वत्सरद्वयम् ॥ १८ ॥
अनेन विधाना यस्तु विभूतिद्वादशीव्रतम् ।
कुर्यात् पापविनिर्मुक्तः पितॄणां तारयेच्छतम् ॥ १९॥
जन्मनां शतसाहस्रं न शोकफलभाग्भवेत् ।
न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ।
वैष्णवोवाथ शैवोवा भवेज्जन्मनि जन्मनि ॥ २० ॥
यावद्युगसहस्राणां शतमष्टोत्तरं भवेत् ।
तावत्स्वर्गे वसेद्ब्रह्मन् ! भूपतिश्च पुनर्भवेत् ॥ २१ ॥

---

अथ नवनवतितमोऽध्यायः ।

नन्दिकेश्वर उवाच । पुरा रथन्तरे कल्पे राजासीत् पुष्पवाहनः ।

नाम्ना लोकेषु विख्यातस्तेजसा सूर्यसन्निभः ॥ १ ॥
तपसा तस्य तुष्टेन चतुर्वक्त्रेण नारद ! ।
कमलं काञ्चनं दत्तं यथा कामगमं मुने ! ॥ २ ॥
लोकैः समस्तैर्नगरवासिभिः सहितो नृपः ।
द्वीपानि सुरलोकञ्च यथेष्टं व्यचरत्तदा ॥ ३ ॥
कल्पान्ते सप्तमं द्वीपं तस्य पुष्करवासिनः ।
लोके च पूजितं यस्मात् पुष्करद्वीपमुच्यते ॥ ४ ॥
देवेन ब्रह्मणा दत्तं यानमस्य यतोऽम्बुजम् ।
पुष्पवाहनमित्याहुस्तस्मात्तं देवदानवाः ॥ ५ ॥
नागम्यमस्यास्ति जगत्त्रयेऽपि ब्रह्माम्बुजस्थस्य तपोऽनुभावात् ।
पत्नी च तस्याप्रतिमा मुनीन्द्र ! नारीसहस्रैरभितोऽभिनन्द्या ।
नाम्ना च लावण्यवती बभूव सा पार्वतीवेष्टतमा भवस्य ॥ ६
तस्यात्मजा नामयुतम्बभूव धर्मात्मनामग्र्यधनुर्धराणाम् ।
तदात्मनः सर्वमवेक्ष्य राजा मुहुर्मुहुर्विस्मयमाससाद ।
सोऽभ्यागतं वीक्ष्य मुनिप्रवीरं प्राचेतसं वाक्यमिदं बभाषे ।
राजोवाच । कस्माद्विभूति रमलामरमर्त्यपूज्या
जाता च सा विजितामरसुन्दरीणाम् ।
भार्या ममात्मतपसा परितोषितेन
दत्तं ममाम्बुजगृहञ्च मुनीन्द्र ! धात्रा ॥ ८ ॥
यस्मिन् प्रविष्टमपि कोटिशतं नृपाणाम्
सामात्यकुञ्जररथौघजनावृतानाम् ।
नोलक्ष्यते क्व गतमम्बरमध्य इन्दु-
स्तारागणैरिव गतः परितः स्फुरद्भिः ॥ ९ ॥
तस्मात् किमन्यजननी जठरोद्भवेन

धर्मादिकं जनमशेषफलाप्तिहेतुः।
भगवन्मयाथ तनयैरथ वा नयापि
भद्रं वदितदखिलं कथय प्रचेतः ॥ १० ॥
मुनिरभ्यधादथ भवान्तरितं समीक्ष्य
पृथ्वीपतेः प्रसभमद्भुतहेतुवृत्तम्।
जन्माभवत्तव तु लुब्धकुलेति घोरे-
जातस्त्वमप्यनुदिनं किल पापकारी ॥ ११ ॥
वपुरप्यभूत्तव पुनः परुषाङ्गसन्धि
दुर्गन्धिसत्वभुजगावरणं समन्तात्।
न धृते सुहृन्नसुतबन्धुजनोन तात
स्वादृक् स्वसा न जननी च तदाभिशस्ता।
अभिसक्तापरमभीष्टतमा
विमुखी महीश ! तव योषिदियम् ॥ १२ ॥
अभूदनावृष्टिरतीव रौद्रा कदाचिदाचारनिमित्तमस्मिन्।
क्षुत्पीडितेनाथ तदा न किञ्चिदासादितं धान्यफलामिषञ्च ॥ १३
अथाभिदृष्टं महदम्बुजाढ्यं सरोवरं पङ्कपरीतरोधः।
पद्मान्यथादाय ततो बहुनिगतः पुरं वैदिशनामधेयम् ॥ १४ ॥
तन्मौल्यलाभाय पुरं समस्तं भ्रान्तं त्वया शेष महस्तदासीत्।
क्रेता न कश्चित् कमलेषु जातः श्रान्तो भृशं क्षुत्परिपीडितश्च ॥ १५ ॥
उपविष्टस्त्वमेकस्मिन् सभार्यो भवनाङ्गणे।
अथ मङ्गलशब्दश्च त्वया रात्रौ महान् श्रुतः ॥ १६ ॥
सभार्यस्तत्र गतवान् यत्रासौ मङ्गलध्वनिः।
तत्र मण्डपमध्यस्था विष्णोरर्चावलोकिता ॥ १७ ॥
वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम्।

समाप्तौ माघमासस्य लवणाचलमुत्तमम् ॥ १८ ॥
निवेदयन्ति गुरवे शय्यां चोपस्करान्विताम्।
अलङ्कृत्य हृषीकेशं सौवर्णामरपादपम् ॥ १९ ॥
तान्तु दृष्ट्वा ततस्ताभ्यामिदं च परिकीर्तितम्।
किमेभिः कमलैः कार्यं वरं विष्णु रलङ्कृतः ॥ २० ॥
इति भक्तिस्तदा जाता दम्पत्योश्च नराधिप ! ।
तत्प्रसङ्गात् समभ्यर्च्य केशवं लवणाचलम्।
शय्या च पुण्यप्रकारैः पूजिता भूप सर्वतः ॥ २१ ॥
अथानङ्गवती दृष्ट्वा तयोर्धनशतत्रयम्।
दातुं त्वामाददे साथ कलधौतशतत्रयम् ॥ २२ ॥
न गृहीतं ततस्ताभ्यां बहुसत्त्वावलम्बनात्।
अनङ्गवत्या च पुनस्तयोरन्नं चतुर्विधाम्।
आनीय व्याहृतन्त्वान्न भुज्यतामिति भूपते ! ॥ २३ ॥
ताभ्यान्तु तदपि त्यक्तं भोक्ष्यावो वै वरानने ! ।
प्रसङ्गादुपवासेन तवाद्य सुखमावयोः ॥ २४ ॥
जन्म प्रभृति पापिष्ठौ कुकर्माणौ दृढव्रते ! ।
तत्प्रसङ्गात्तयोर्मध्ये धर्मलेशस्तु तेऽनघ ! ॥ २५ ॥
इति जागरणं ताभ्यां तत्प्रसङ्गादनुष्ठितम्।
प्रभाते च तया दत्ता शय्या सलवणाचला ॥ २६ ॥
ग्रामाश्च गुरवे भक्त्या विप्रेषु द्वादशैव तु।
वस्त्रालङ्कारसंयुक्ता गावश्च करकान्विताः ॥ २७ ॥
भोजनञ्च सुहृन्मित्रदीनान्धकृपणैः समम्।
तच्च लुब्धकदाम्पत्यं पूजयित्वा विसर्जितम् ॥ २८ ॥
स भवान् लुब्धको जातः सपत्नीको नृपेश्वरः।

पुष्करप्रकरात्तस्मात्केशवस्य च पूजनात् ॥ २९ ॥
विनष्टाशेषपापस्य तव पुष्करमन्दिरम् ।
तस्य सत्वस्य माहात्म्यादल्पेन तपसा नृप ! ॥ ३० ॥
यथाकामगमं जातं लोकनाथचतुर्मुखः ।
सन्तुष्टस्तव राजेन्द्र ! ब्रह्मरूपी जनार्दनः ॥ ३१ ॥
साप्यनङ्गवती वेश्या कामदेवस्य साम्प्रतम् ।
पत्नी सपत्नी सञ्जाता रत्याः प्रीतिरिति श्रुता ।
लोकेष्वानन्दजननी सकलामरपूजिता ॥ ३२ ॥
तस्मादुत्सृज्य राजेन्द्र ! पुष्करं तन्महीतले ।
गङ्गातटं समाश्रित्य विभूतिद्वादशीव्रतम् ।
कुरु राजेन्द्र ! निर्वाणमवश्यं समवाप्स्यसि ॥ ३३ ॥

नन्दिकेश्वर उवाच ।

इत्युक्त्वा स मुनिर्ब्रह्मन् ! तत्रैवान्तरधीयत ।
राजा यथोक्तञ्च पुनरकरोत् पुष्पवाहनः ॥ ३४ ॥
इदमाचरतो ब्रह्मन्नखण्डव्रतमाचरेत् ।
यथाकथञ्चित्कमलैर्द्वादशद्वादशीर्मुने ! ॥ ३५ ॥
कर्तव्याः शक्तितो देया विप्रेभ्यो दक्षिणा नघ ! ।
न वित्तशाठ्यं कुर्वीत भक्त्या तुष्यति केशवः ॥ ३६ ॥
इति कलुषविदारणं जनाना
मपि पठति शृणोति चाथभक्त्या ।
मतिमपि च ददाति देवलोके वसति
स कोटिशतानि वत्सराणाम् ॥ ३७ ॥

---

## अथ शततमोऽध्यायः ।

---

नन्दिकेश्वर उवाच । अथातः सम्प्रवक्ष्यामि व्रतषष्टिमनुत्तमाम् ।
रुद्रेणाभिहितां दिव्यां महापातकनाशिनीम् ॥ १ ॥
नक्तमब्दं चरित्वा तु गवा सार्द्धं कुटुम्बिने ।
हैमं चक्रं त्रिशूलञ्च दद्याद्विप्राय वाससी ॥ २ ॥
शिवरूपस्ततोऽस्माभिः शिवलोके स मोदते ।
एतद्देवव्रतं नाम महापातकनाशनम् ॥ ३ ॥
यस्त्वेकभक्तेन समां शिवं हैमवृषान्वितम् ।
धेनुं तिलमयीं दद्यात् स पदं याति शाङ्करम् ।
एतद्रुद्रव्रतं नाम पापशोकविनाशनम् ॥ ४ ॥
यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम् ।
एकान्तरितनक्ताशी समान्ते वृषसंयुतम् ।
स वैष्णवं पदं याति लीलाव्रतमिदं स्मृतम् ॥ ५ ॥
आषाढ़ादिचतुर्मासमभ्यङ्गं वर्जयेन्नरः ।
भोजनापस्करं दद्यात् स याति भवनं हरेः ।
जने प्रीतिकरं नृणां प्रीतिव्रतमिहोच्यते ॥ ६ ॥
वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवम् ।
दद्याद्वस्त्राणि सूक्ष्माणि रसपात्रैश्च संयुतम् ॥ ७ ॥
सम्पूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ।
एतद्गौरीव्रतं नाम भवानीलोकदायकम् ॥ ८ ॥
पुष्यादौ यस्त्रयोदश्यां कृत्वा नक्तं मधौ पुनः ।

अशोकं काञ्चनं दत्त्वा इक्षुयुक्तं दशाढकम् ॥ ९ ॥
विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति ।
कल्पं विष्णुपदे स्थित्वा विशोकः स्यात् पुनर्नरः ।
एतत् कामव्रतं नाम सदा शोकविनाशनम् ॥ १० ॥
आषाढादिव्रतं यस्तु वर्जयेन्नखकर्त्तनम् ।
वार्त्ताकं च चतुर्मासं मधुसर्पिर्घटान्वितम् ॥ ११ ॥
कार्त्तिक्यां तत् पुनर्हैमं ब्राह्मणाय निवेदयेत् ।
स रुद्रलोकमाप्नोति शिवव्रतमिदं स्मृतम् ॥ १२ ॥
वर्जयेद्यस्तु पुष्पाणि हेमन्तशिशिरावृतू ।
पुष्पत्रयं च फाल्गुन्यां कृत्वा शक्त्या च काञ्चनम् ॥१३॥
दद्याद्द्विकालवेलायां प्रीयेतां शिवकेशवौ ।
दत्त्वा परम्पदं याति सौम्यव्रतमिदं स्मृतम् ॥ १४॥
फाल्गुनादितृतीयायां लवणं यस्तु वर्जयेत् ।
समाप्ते शयनं दद्यात् गृहञ्चोपस्करान्वितम् ॥ १५॥
संपूज्य विप्रमिथुनं भवानी प्रीयतामिति ।
गौरीलोके वसेत्कल्पं सौभाग्यव्रतमुच्यते ॥१६॥
सन्ध्या मौनं ततः कृत्वा समान्ते घृतकुम्भकम् ।
वस्त्रयुग्मं तिलान् घण्टां ब्राह्मणाय निवेदयेत् ॥१७॥
सारस्वतं पदं याति पुनरावृत्तिदुर्लभम् ।
एतत्सारस्वतं नाम रूपविद्याप्रदायकम् ॥ १८ ॥
लक्ष्मीमभ्यर्च्य पञ्चम्यामुपवासी भवेन्नरः ।
समान्ते हेमकमलं दद्याद्धेनुसमन्वितम् ॥ १९ ॥
स वैष्णवं पदं याति लक्ष्मीवान् जन्मजन्मनि ।
एतत् सम्पद्व्रतं नाम सदा पापविनाशनम् ॥२०॥

कृत्वोपलेपनं शम्भोरग्रतः केशवस्य च ।
यावदब्दं पुनर्दद्याद्धेनुं जलघटान्विताम् ॥ २१ ॥
जन्मायुतं स राजा स्यात्ततः शिवपुरं व्रजेत् ।
एतदायुर्व्रतं नाम सर्वकामप्रदायकम् ॥ २२ ॥
अश्वत्थं भास्करं गङ्गां प्रणम्यैकत्र वाग्यतः ।
एकभक्तं नरः कुर्यादब्दमेकं विमत्सरः ॥ २३ ॥
व्रतान्ते विप्रमिथुनं पूज्यं धेनुत्रयान्वितम् ।
वृक्षं हिरण्मयं दद्यात् सोऽश्वमेधफलं लभेत् ।
एतत् कीर्त्तिव्रतं नाम भूतिकीर्त्तिफलप्रदम् ॥२४॥
घृतेन स्नपनं कुर्याच्छम्भोर्वा केशवस्य च ।
अक्षताभिः सपुष्पाभिः कृत्वा गोमयमण्डलम् ॥२५॥
तिलधेनुसमोपेतं समान्ते हेमपङ्कजम् ।
शुद्धमष्टाङ्गुलं दद्याच्छिवलोके महीयते ।
सामगाय ततश्चैतत् सामव्रतमिहोच्यते ॥ २६ ॥
नवम्यामेकभक्तन्तु कृत्वा कन्याश्च शक्तितः ।
भोजयित्वा समां दद्याद्धैमकञ्चुकवाससी ॥ २७ ॥
हैमं सिंहञ्च विप्राय दत्त्वा शिवपदं व्रजेत् ।
जन्मार्बुदं सुरूपः स्याच्छत्रुभिश्चापराजितः ।
एतद्वीरव्रतं नाम नारीणां च सुखप्रदम् ॥ २८ ॥
यावत् समा भवेद्यस्तु पञ्चदश्यां पयोव्रतः ।
समान्ते [illegible]यात् पञ्च गास्तु पयस्विनीः ॥ २९ ॥
वासांसि च पिशङ्गानि जलकुम्भयुतानि च ।
स याति वैष्णवं लोकं पितॄणां तारयेच्छतम् ।

कल्पान्ते राजराजः स्यात् पितृव्रतमिदं स्मृतम् ॥२०॥
चैत्रादिचतुरो मासान् जलं दद्यादयाचितम् ।
व्रतान्ते मणिकं दद्यादन्नवस्त्रसमन्वितम् ॥ २१ ॥
तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते ।
कल्पान्ते भूपतिर्नूनमानन्दव्रतमुच्यते ॥ २२ ॥
पञ्चामृतेन स्नपनं कृत्वा संवत्सरं विभोः ।
वत्सरान्ते पुनर्दद्याद्धेनुं पञ्चामृतेन हि ॥ २३ ॥
विप्राय दद्याच्छङ्खञ्च स पदं याति शाङ्करम् ।
राजा भवति कल्पान्ते धृतिव्रतमिदं स्मृतम् ॥२४॥
वर्जयित्वा पुनर्मांसमब्दान्ते गोप्रदो भवेत् ।
तद्वद्धेममृगं दद्यात् सोऽश्वमेधफलं लभेत् ।
अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत् ॥ २५ ॥
माघमास्युषसि स्नानं कृत्वा दाम्पत्यमर्चयेत् ।
भोजयित्वा यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सूर्य्यलोके वसेत् कल्पं सूर्य्यव्रतमिदं स्मृतम् ॥ २६ ॥
आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः ।
विप्रेषु भोजनं दद्यात् कार्तिक्यां गोप्रदो भवेत् ।
स वैष्णवं पदं याति विष्णुव्रतमिदं शुभम् ॥ २७ ॥
अयनादयनं यावद्वर्जयेत् पुष्पसर्पिषी ।
तदन्ते पुष्पदामानि घृतधेन्वा सहैव तु ॥ २८ ॥
दत्त्वा शिवपदं गच्छेद्विप्राय घृतपायसम् ।
एतच्छीलव्रतं नाम शीलारोग्यफलप्रदम् ॥ २९ ॥
सन्ध्यादीपप्रदो यस्तु समां तैलं विवर्जयेत् ।
समान्ते दीपिकां दद्यात् चक्रशूले च काञ्चने ॥४०॥

वस्त्रयुग्मञ्च विप्राय तेजस्वी स भवेदिह ।
रुद्रलोकमवाप्नोति रौद्रव्रतमिदं स्मृतम् ॥ ४१ ॥
कार्त्तिकादितृतीयायां प्राश्य गोमूत्रयावकम् ।
नक्ताश्चरेदब्दमेकमब्दान्ते गोप्रदो भवेत् ॥ ४२ ॥
गौरीलोके वसेत् कल्पं ततो राजा भवेदिह ।
एतद्रुद्रव्रतं नाम सदा कल्याणकारकम् ॥ ४३ ॥
वर्जयेच्चैत्रमासे च यश्च गन्धानुलेपनम् ।
शुक्तिं गन्धभृतां दत्त्वा विप्राय सितवाससी ।
वारुणं पदमाप्नोति दृढव्रतमिदं स्मृतम् ॥ ४४ ॥
वैशाखे पुष्पलवणं वर्जयित्वाथ गोप्रदः ।
भूत्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह ।
एतत्कान्तिव्रतं नाम कान्तिकीर्त्तिफलप्रदम् ॥ ४५ ॥
ब्रह्माण्डं काञ्चनं कृत्वा तिलराशिसमन्वितम् ।
त्र्यहं तिलप्रदो भूत्वा वह्निं सन्तर्प्य स द्विजम् ॥ ४६ ॥
संपूज्य विप्रदाम्पत्यं माल्यवस्त्रविभूषणैः ।
शक्तितस्त्रिपलादूर्द्ध्वं विश्वात्मा प्रीयतामिति ॥ ४७ ॥
पुण्येऽह्नि दद्यात् स परं ब्रह्म यात्यपुनर्भवम् ।
एतद्ब्रह्मव्रतं नाम निर्वाणपददायकम् ॥ ४८ ॥
यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
दिनं पयोव्रतस्तिष्ठेत् स याति परमम्पदम् ।
एतद्धेनुव्रतं नाम पुनरावृत्तिदुर्लभम् ॥ ४९ ॥
त्र्यहं पयोव्रते स्थित्वा काञ्चनं कल्पपादपम् ।
पलादूर्द्ध्वं यथाशक्त्या तण्डुलैस्तूपसंयुतम् ।
दत्त्वा ब्रह्मपदं याति कल्पव्रतमिदं स्मृतम् ॥ ५० ॥

मासोपवासी यो दद्याद्धेनुं विप्राय शोभनाम् ।
स वैष्णवं पदं याति भीमव्रतमिदं स्मृतम् ॥ ५१ ॥
दद्याद्विंशत्पलादूर्द्धं महीं कृत्वा तु काञ्चनीम् ।
दिनं पयोव्रतस्तिष्ठेद्रुद्रलोके महीयते ।
धराव्रतमिदं प्रोक्तं सप्तकल्पशतानुगम् ॥ ५२ ॥
माघे मासेऽथवा चैत्रे गुडधेनुप्रदो भवेत् ।
गुडव्रतस्तृतीयायां गौरीलोके महीयते ।
महाव्रतमिदं नाम परमानन्दकारकम् ॥ ५३ ॥
पक्षोपवासी यो दद्याद् विप्राय कपिलाद्वयम् ।
ब्रह्मलोकमवाप्नोति देवासुरसुपूजितम् ।
कल्पान्ते राजराजः स्यात्प्रभाव्रतमिदं स्मृतम् ॥५४॥
वत्सरन्त्वेकभक्ताशी सभक्ष्यजलकुम्भदः ।
शिवलोके वसेत्कल्पं प्राप्तिव्रतमिदं स्मृतम् ॥ ५५ ॥
नक्ताशी चाष्टमीषु स्याद्वत्सरान्ते च धेनुदः ।
पौरन्दरं पुरं याति सुगतिव्रतमुच्यते ॥ ५६ ॥
विप्रायेन्धनदो यस्तु वर्षादिचतुरो ऋतून् ।
घृतधेनुप्रदोऽन्ते च स परं ब्रह्म गच्छति ।
वैश्वानरव्रतं नाम सर्वपापविनाशनम् ॥ ५७ ॥
एकादश्यान्तु नक्ताशी यश्चक्रं विनिवेदयेत् ।
समाप्ते वैष्णवं हैमं स विष्णोः पदमाप्नुयात् ।
एतत्कृष्णव्रतं नाम कल्पान्ते राज्यभाग्भवेत् ॥५८॥
पायसाशी समाप्ते तु दद्याद्विप्राय गोयुगम् ।
लक्ष्मीलोकमवाप्नोति ह्येतद्देवीव्रतं स्मृतम् ॥ ५९ ॥
सप्तम्यां नक्तभुग्दद्यात्समाप्ते गाम्पयस्विनीम् ।

सूर्यलोकमवाप्नोति भानुव्रतमिदं स्मृतम् ॥ ६० ॥
चतुर्थ्यां नक्तभुग्दद्यादब्दान्ते हेमवारणम्।
व्रतं वैनायकं नाम शिवलोकफलप्रदम् ॥ ६१ ॥
महाफलानि यस्त्यक्त्वा चतुर्मासं द्विजातये।
हैमानि कार्त्तिके दद्याद्गोयुगेन समन्वितम्।
एतत् फलव्रतं नाम विष्णुलोकफलप्रदम् ॥ ६२ ॥
यश्चोपवासी सप्तम्यां समान्ते हेमपङ्कजम्।
गावश्च शक्तितो दद्याद्धेमान्नघटसंयुताः।
एतत् सौरव्रतं नाम सूर्य्यलोकफलप्रदम् ॥ ६३ ॥
द्वादश द्वादशीर्यस्तु समाप्योपोषणेन च।
गोवस्त्रकाञ्चनैर्विप्रान् पूजयेच्छक्तितो नरः।
परमम्पदमाप्नोति विष्णुव्रतमिदं स्मृतम् ॥ ६४ ॥
कार्त्तिक्यान्तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत्।
शैवम्पदमवाप्नोति वार्षव्रतमिदं स्मृतम् ॥ ६५ ॥
कृच्छ्रान्ते गोप्रदः कुर्य्याद्भोजनं शक्तितः पदम्।
विप्राणां शाङ्करं याति प्राजापत्यमिदं व्रतम् ॥ ६६ ॥
चतुर्दश्यान्तु नक्ताशी समान्ते गोधनप्रदः।
शैवम्पदमावप्नोति त्रैयम्बकमिदं व्रतम् ॥ ६७ ॥
सप्तरात्रोषितो दद्यादघृतकुम्भं द्विजातये।
घृतव्रतमिदम्प्राहुर्ब्रह्मलोकफलप्रदम् ॥ ६८ ॥
आकाशशायी वर्षासु धेनुमन्ते पयस्विनीम्।
शक्रलोके वसेन्नित्यमिन्द्रव्रतमिदं स्मृतम् ॥ ६९ ॥
अनग्निपक्वमश्नाति तृतीयायान्तु यो नरः।
गान्दत्वा शिवमभ्येति पुनरावृत्तिदुर्लभम्।

इह चानन्दकृत् पुंसां श्रेयोव्रतमिदं स्मृतम् ॥ ७० ॥
हैमं पलद्वयादूर्द्धं रथमश्वयुगान्वितम् ।
ददत् कृतोपवासः स्याद्दिवि कल्पशतं वसेत् ।
कल्पान्ते राजराजः स्यादश्वव्रतमिदं स्मृतम् ॥ ७१ ॥
तद्वद्धेमरथं दद्यात्करिभ्यां संयुतं नरः ।
सत्यलोके वसेत्कल्पं सहस्रमथ भूपतिः ॥ ७२ ॥
उपवासं परित्यज्य समान्ते गोप्रदो भवेत् ।
यक्षाधिपत्यमाप्नोति वारुणं व्रतमुच्यते ॥ ७३ ॥
निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत् ।
वारुणं लोकमाप्नोति वरुणव्रतमुच्यते ॥ ७४ ॥
चान्द्रायणञ्च यः कुर्य्याद्धैमचन्द्रं निवेदयेत् ।
चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकफलप्रदम् ॥ ७५ ॥
ज्यैष्ठे पञ्चतपाः सायं हेमधेनुप्रदो दिवम् ।
यात्यष्टमी चतुर्दश्यो रुद्रव्रतमिदं स्मृतम् ॥ ७६ ॥
सकृद्वितानकं कुर्य्यात्तृतीयायां शिवालये ।
समान्ते धेनुदो याति भवानीव्रतमुच्यते ॥ ७७ ॥
माघे निश्यार्द्रवासाः स्यात् सप्तम्यां गोप्रदो भवेत् ।
दिवि कल्पमुषित्वेह राजा स्यात् पवनं व्रतम् ॥ ७८ ॥
त्रिरात्रोपोषितो दद्यात् फाल्गुन्यां भवनं शुभम् ।
आदित्यलोकमाप्नोति धामव्रतमिदं स्मृतम् ॥ ७९ ॥
त्रिसन्ध्यं पूज्य दाम्पत्यमुपवासी विभूषणैः ।
भवद्भावः समाप्नोति मोक्षमिन्द्रव्रतादिह ॥ ८० ॥
दत्त्वा सितद्वितीयायामिन्दोर्लवणभाजनम् ।
समान्ते गोप्रदो याति विप्राय शिवमन्दिरम् ।

कल्पान्ते राजराजः स्यात् सोमव्रतमिदं स्मृतम् ॥८१॥
प्रतिपद्येकभक्ताशी समान्ते कपिलाप्रदः।
वैश्वानरपदं याति शिवव्रतमिदं स्मृतम् ॥ ८२ ॥
दशम्यामेकभक्ताशी समान्ते दशधेनुदः।
दिशश्च काञ्चनैर्दद्यात् ब्रह्माण्डाधिपतिर्भवेत्।
एतद्विश्वव्रतं नाम महापातकनाशनम् ॥ ८३ ॥
यः पठेच्छृणुयाद्वापि व्रतषष्टिमनुत्तमाम्।
मन्वन्तरशतं सोऽपि गन्धर्वाधिपतिर्भवेत् ॥ ८४ ॥
षष्टिव्रतं नारद ! पुण्यमेतत्तवोदितं विश्वजनीनमन्यत्।
श्रोतुन्तवेच्छा तदुदीरयामि प्रियेषु किं वा कथनीयमस्ति ॥८५॥

---

## अथैकाधिकशततमोऽध्यायः।

नन्दिकेश्वर उवाच। मर्त्यं भावशुद्धिश्च विना स्नानं न विद्यते।
तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते ॥ १ ॥
अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्।
तीर्थञ्च कल्पयेद्विद्वान्मूलमन्त्रेण मन्त्रवित्।
नमो नारायणायेति मूलमन्त्र उदाहृतः ॥ २ ॥
दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः।
चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः।
प्रकल्प्यावाहयेद्गङ्गामेभिर्मन्त्रैर्विचक्षणः ॥ ३ ॥
विष्णोः पादप्रसूतासि वैष्णवी विष्णुदेवता।
त्राहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥ ४ ॥
तिस्रः कोटयोऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्।
दिवि भुव्यन्तरिक्षे च तानि ते सन्तु जाह्नवि ! ॥ ५॥

नन्दिनीत्येव ते नाम देवेषु नलिनीति च ।
दक्षा पृथ्वी च विहगा विश्वकायाऽमृता शिवा ॥६॥
विद्याधरी सुप्रशान्ता तथा विश्वप्रसादिनी ।
क्षेमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी ॥७॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् ।
भवेत्सन्निहिता तत्र गङ्गा त्रिपथगामिनी ॥ ८ ॥
सप्तवाराभिजप्तेन करसंपुटयोजितः ।
मूर्द्धि कुर्य्याज्जलं भूयस्त्रिचतुःपञ्चसप्तकम् ।
स्नानं कुर्य्यान्मृदा तद्वदामन्त्र्य तु विधानतः ॥९॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके ! हर मे पापं जन्मया दुष्कृतं कृतम् ॥१०॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
नमस्ते सर्वलोकानां प्रभवारणि सुव्रते ! ॥११॥
एवं स्नात्वा ततः पश्चादाचम्य च विधानतः ।
उत्थाय वाससी शुक्ले शुद्धे तु परिधाय वै ।
ततस्तु तर्पणं कुर्य्यात्त्रैलोक्याप्यायनाय वै ॥ १२ ॥
देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसः सुराः ।
क्रूराः सर्पाः सुवर्णाश्च तरवो जम्बुकाः खगाः ॥१३॥
वाय्वाधारा जलाधारास्तथैवाकाशगामिनः ।
निराधाराश्च ये जीवा ये तु धर्म्मरतास्तथा ॥ १४ ॥
तेषामाप्यायनायैतद्दीयते सलिलं मया ।
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ॥ १५ ॥
मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा ।
सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ १६ ॥

कपिलश्चासुरिश्चैव वोढ़ः पञ्चशिखस्तथा।
सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥ १७ ॥
मरीचिमत्र्याङ्गिरसं पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुन्नारदमेव च।
देवब्रह्म ऋषीन् सर्वांस्तर्पयेदक्षतोदकैः ॥ १८ ॥
अपसव्यं ततः कृत्वा सव्यं जान्वाच्यभूतले।
अग्निष्वात्तास्तथा सौम्या हविष्मन्तस्तथोष्मपाः॥१९॥
सुकालिनो बर्हिषदस्तथान्ये वाजपाः पुनः।
सन्तर्प्य पितरो भक्त्या सतिलोदकचन्दनैः ॥ २० ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ २१ ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः।
दर्भपाणिस्तु विधिना पितृन् सन्तर्पयेद् बुधः ॥ २२ ॥
पित्रादीन्नामगोत्रेण तथा मातामहानपि।
सन्तर्प्य विधिना भक्त्या इमं मन्त्रमुदीरयेत् ॥ २३ ॥
ये बान्धवा बान्धवेया येऽन्यजन्मनि बान्धवाः।
ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥ २४॥
ततश्चाचम्य विधिवदालिखेत्पद्ममग्रतः।
अक्षताभिः सपुष्पाभिः सजलारुणचन्दनम्।
अर्घ्यं दद्यात्प्रयत्नेन सूर्य्यनामानि कीर्तयेत् ॥ २५ ॥
नमस्ते विष्णुरूपाय नमो विष्णुमुखाय वै।
सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ॥ २६ ॥
नमस्ते शिव ! सर्वेश ! नमस्ते सर्ववत्सल।

जगत्स्वामिन्नमस्तेऽस्तु दिव्यचन्दनभूषित ! ॥ २७ ॥
पद्मासन ! नमस्तेऽस्तु कुण्डलाङ्गदभूषित ! ।
नमस्ते सर्वलोकेश ! जगत्सर्वं विबोधसे ॥ २८ ॥
सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वग ।
सत्यदेव ! नमस्तेऽस्तु प्रसीद मम भास्कर ! ॥ २९ ॥
दिवाकर ! नमस्तेऽस्तु प्रभाकर ! नमोऽस्तु ते ।
एवं सूर्यं नमस्कृत्य त्रिः कृत्वाथ प्रदक्षिणम् ।
द्विजङ्गां काञ्चनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत् ॥३०॥

---

द्व्यधिकशततमोऽध्यायः ।

नन्दिकेश्वर उवाच । अतःपरं प्रवक्ष्यामि प्रयागस्योपवर्णनम् ।
मार्कण्डेयेन कथितं यत् पुरा पाण्डुसूनवे ॥ १ ॥
भारते तु यदा वृत्ते प्राप्तराज्ये पृथासुते ।
एतस्मिन्नन्तरे राजा कुन्तिपुत्रो युधिष्ठिरः ॥ २ ॥
भ्रातृशोकेन सन्तप्तश्चिन्तयन् स पुनः पुनः ।
आसीत् सुयोधनो राजा एकादशचमूपतिः ॥३॥
अस्मान् सन्ताप्य बहुशः सर्वे ते निधनं गताः ।
वासुदेवं समाश्रित्य पञ्चशेषास्तु पाण्डवाः ॥ ४ ॥
हत्वा भीष्मं च द्रोणञ्च कर्णं चैव महाबलम् ।
दुर्योधनं च राजानं पुत्रभ्रातृसमन्वितम् ॥ ५ ॥
राजानो निहताः सर्वे ये चान्ये शूरमानिनः ।
किन्नो राज्येन गोविन्द ! किम्भोगैर्जीवितेन वा ॥६॥
धिक्कष्टमिति सञ्चिन्त्य राजा वैक्लव्यमागतः ।
निर्विचेष्टो निरुत्साहः किञ्चित्तिष्ठत्यधोमुखः ॥७॥

लब्धसंज्ञो यदा राजा चिन्तयन् स पुनः पुनः।
कतरो विनियोगो वा नियमं तीर्थमेव च ॥ ८ ॥
येनाहं शीघ्रमामुच्ये महापातककिल्बिषात्।
यत्र स्थित्वा नरो याति विष्णुलोकमनुत्तमम् ॥९॥
कथं पृच्छामि वै कृष्णं येनेद्कारितोऽस्म्यहम्।
धृतराष्ट्रं कथं पृच्छे यस्य पुत्रशतं हतम् ॥ १० ॥
एवं वैक्लव्यमापन्नो धर्म्मराजो युधिष्ठिरः।
रुदन्ति पाण्डवाः सर्व्वे भ्रातृशोकपरिप्लुताः ॥ ११ ॥
ये च तत्र महात्मानः समेताः पाण्डवाः स्मृताः।
कुन्ती च द्रौपदी चैव ये च तत्र समागताः।
भूमौ निपतिताः सर्व्वे रुदन्तस्तु समन्ततः ॥ १२ ॥
वाराणस्यां मार्कण्डेयस्तेन ज्ञातो युधिष्ठिरः।
यथा वैक्लव्यमापन्नो रुदमानस्तु दुःखितः ॥ १३ ॥
अचिरेणैव कालेन मार्कण्डेयो महातपाः।
संप्राप्तो हास्तिनपुरं राजद्वारे ह्यतिष्ठत ॥ १४ ॥
द्वारपालोऽपि तं दृष्ट्वा राज्ञः कथितवान् द्रुतम्।
त्वां द्रष्टुकामो मार्कण्डो द्वारि तिष्ठत्यसौ मुनिः।
त्वरितो धर्म्मपुत्रस्तु द्वारमागादतः परम् ॥ १५ ॥
युधिष्ठिर उवाच। स्वागतं ते महाभाग! स्वागतं ते महामुने!।
अद्य मे सफलं जन्म अद्य मे तारितं कुलम् ॥१६ ॥
अद्य मे पितरस्तुष्टास्त्वयि दृष्टे महात्मनि!।
अद्याहं पूतदेहोऽस्मि यत्त्वया सह दर्शनम् ॥ १७ ॥
नन्दिकेश्वर उवाच। सिंहासने समास्थाप्य पादशौचार्चनादिभिः।
युधिष्ठिरो महात्मा वै पूजयामास तं मुनिम् ॥१८॥

तत: स तुष्टो मार्कण्डः पूजितश्चाह तं नृपम् ।
आख्याहि त्वरितं राजन् ! किमर्थं रुदितं त्वया ।
केन वा विक्लवीभूतः का बाधा ते किमप्रियम् ॥१८॥
युधिष्ठिर उवाच । अस्माकं चैव यद्वृत्तं राज्यस्यार्थे महामुने ! ।
एतत् सर्वं विदित्वा तु चिन्तावशमुपागतः ॥ २० ॥
मार्कण्डेय उवाच । शृणु राजन् ! महाबाहो ! क्षत्रधर्मव्यवस्थितम्
नैव दृष्टं रणे पापं युध्यमानस्य धीमतः ॥ २१ ॥
किम्पुना राजधर्मेण क्षत्रियस्य विशेषत: ।
तदेवं हृदयं कृत्वा तस्मात् पापं न चिन्तयेत् ॥२२॥
ततो युधिष्ठिरो राजा प्रणम्य शिरसा मुनिम् ।
पप्रच्छ विनयोपेतः सर्वपातकनाशनम् ॥ २३ ॥
युधिष्ठिर उवाच । पृच्छामि त्वां महाप्राज्ञ ! नित्यं त्रैलोक्यदर्शिनम् ।
कथय त्वं समासेन येन मुच्येत किल्बिषात् ॥ २४ ॥
मार्कण्डेय उवाच । शृणु राजन् ! महाबाहो सर्वपातकनाशनम् ।
प्रयागगमनं श्रेष्ठं नराणां पुण्यकर्मणाम् ॥ २५ ॥

---

अथ त्र्यधिकशततमोऽध्याय: ।

युधिष्ठिर उवाच । भगवन् ! श्रोतुमिच्छामि पुराकल्पे यथास्थितम्
ब्रह्मणा देवमुख्येन यथावत् कथितं मुने ! ॥ १ ॥
कथं प्रयागे गमनं नराणां तत्र कीदृशम् ।
मृतानां का गतिस्तत्र स्नातानां तत्र किम्फलम् ।
ये वसन्ति प्रयागे तु ब्रूहि तेषां च किम्फलम् ॥ २ ॥
मार्कण्डेय उवाच ।
कथयिष्यामि ते वत्स ! यच्छ्रेष्ठं तत्र यत् फलम् ।

पुरा हि सर्वविप्राणां कथ्यमानं मया श्रुतम् ॥ ३ ॥
आप्रयागप्रतिष्ठानाद्वा पुराद्वासुकेर्ह्रदात्।
कम्बलाश्वतरौ नागौ नागश्च बहुमूलकः।
एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ॥ ४ ॥
तत्र स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः।
ततो ब्रह्मादयो देवा रक्षां कुर्वन्ति सङ्गताः ॥ ५ ॥
अन्ये च बहवस्तीर्थाः सर्वपापहराः शुभाः।
न शक्याः कथितुं राजन्! बहुवर्षशतैरपि।
संक्षेपेण प्रवक्ष्यामि प्रयागस्य तु कीर्तनम् ॥ ६ ॥
षष्टिर्धनुःसहस्राणि यानि रक्षन्ति जाह्नवीम्।
यमुनां रक्षति सदा सविता सप्तवाहनः ॥ ७ ॥
प्रयागं तु विशेषेण सदा रक्षति वासवः।
मण्डलं रक्षति हरिर्दैवतैः सह सङ्गतः ॥ ८ ॥
तं वटं रक्षति सदा शूलपाणिर्महेश्वरः।
स्थानं रक्षन्ति वै देवाः सर्वपापहरं शुभम् ॥ ९ ॥
अधर्मेणावृतो लोके नैव गच्छति तत्पदम्।
स्वल्पमल्पतरं पापं यदा ते स्यान्नराधिप!।
प्रयागं स्मरमाणस्य सर्वमायाति संक्षयम् ॥ १० ॥
दर्शनात्तस्य तीर्थस्य नाम संकीर्त्तनादपि।
मृत्तिका लम्भनाद्वापि नरः पापात् मुच्यते ॥ ११ ॥
पञ्चकुण्डानि राजेन्द्र! तेषां मध्ये तु जाह्नवी ॥
प्रयागस्य प्रवेशे तु पापं नश्यति तत्क्षणात् ॥ १२ ॥
योजनानां सहस्रेषु गङ्गायाः स्मरणान्नरः।

अपि दुष्कृतकर्मा तु लभते परमाङ्गतिम् ॥ १३ ॥
कीर्त्तनान्मुच्यते पापाद् दृष्ट्वा भद्राणि पश्यति ।
अवगाह्य च पीत्वा तु पुनात्या सप्तमं कुलम् ॥ १४ ॥
सत्यवादी जितक्रोधो अहिंसायां व्यवस्थितः ।
धर्मानुसारी तत्त्वज्ञो गोब्राह्मण हिते रतः ॥ १५ ॥
गङ्गायमुनयोर्मध्ये स्नातो मुच्येत किल्बिषात् ।
मनसा चिन्तयन् कामानवाप्नोति सुपुष्कलान् ॥१६॥
ततो गत्वा प्रयागं तु सर्वदेवाभिरक्षितम् ।
ब्रह्मचारी वसेन्मासं पितॄन् देवांश्च तर्पयेत् ।
ईप्सितान् लभते कामान् यत्र यत्राभिजायते ॥ १७॥
तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता ।
समागता महाभागा यमुना तत्र निम्नगा ।
तत्र सन्निहितो नित्यं साक्षाद्देवो महेश्वरः ॥ १८ ॥
दुष्प्राप्यं मानुषैः पुण्यं प्रयागन्तु युधिष्ठिरः ।
देवदानवगन्धर्वा ऋषयः सिद्धचारणाः ।
तदुपस्पृश्य राजेन्द्र ! स्वर्गलोकमुपासते ॥१९ ॥

---

अथ चतुरधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच। शृणु राजन्! प्रयागस्य माहात्म्यं पुनरेव तु।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥
आर्त्तानां हि दरिद्राणां निश्चितव्यवसायिनाम् ।
स्थानमुक्तं प्रयागन्तु नाख्येयन्तु कदाचन ॥ २ ॥
व्याधितो यदि वा दीनो वृद्धो वापि भवेन्नरः ।
गङ्गायमुनयोर्मध्ये यस्तु प्राणान् परित्यजेत् ॥ ३ ॥

दीप्तकाञ्चनवर्णाभैर्विमानैः सूर्य्यसन्निभैः ।
गन्धर्वाप्सरसां मध्ये स्वर्गे क्रीड़ति मानवः ।
ईप्सितान् लभते कामान् वदन्ति ऋषिपुङ्गवाः ॥ ४ ॥
सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः ।
वराङ्गनासमाकीर्णैर्मोदते शुभलक्षणैः ॥ ५ ॥
गीतवाद्यविनिर्घोषैः प्रसुप्तः प्रतिबुद्ध्यते ।
यावन्न स्मरते जन्म तावत् स्वर्गे महीयते ॥ ६ ॥
ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ।
हिरण्यरत्नसंपूर्णे समृद्धे जायते कुले ।
तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति ॥ ७ ॥
देशस्थो यदि वारण्ये विदेशस्थोऽथवा गृहे ।
प्रयागं स्मरमाणोऽपि यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति वदन्ति ऋषिपुङ्गवाः ॥ ८ ॥
सर्वकामफला वृक्षा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥ ९ ॥
स्त्रीसहस्राकुले रम्ये मन्दाकिन्यास्तटे शुभे ।
मोदते ऋषिभिः सार्द्धं सुकृतेनेह कर्म्मणा ॥ १० ॥
सिद्धचारणगन्धर्वैः पूज्यते दिवि दैवतैः ।
ततः स्वर्गात्परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥ ११ ॥
ततः शुभानि कर्माणि चिन्तयानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥ १२ ॥
कर्म्मणा मनसा वाचा धर्मसत्यप्रतिष्ठितः ।
गङ्गायमुनयोर्मध्ये यस्तु गां सम्प्रयच्छति ॥ १३ ॥
सुवर्णमणिमुक्ताश्च यदिवान्यत् परिग्रहम् ।

स्वकार्ये पितृकार्ये वा देवताभ्यर्चनेऽपि वा।
सफलं तस्य तत्तीर्थं यथावत् पुण्यमाप्नुयात् ॥ १४ ॥
एवं तीर्थेन गृह्णीयात् पुण्येष्वायतनेषु च।
निमित्तेषु च सर्वेषु ह्यप्रमत्तो भवेद्द्विजः ॥ १५ ॥
कपिलां पाटलावर्णां यस्तु धेनुं प्रयच्छति।
स्वर्णशृङ्गीं रौप्यखुरां कांस्यदोहां पयस्विनीम् ॥ १६ ॥
प्रयागे श्रोत्रियं सन्तं ग्राहयित्वा यथा विधि।
शुक्लाम्बरधरं शान्तं धर्मज्ञं वेदपारगम् ॥ १७ ॥
सा गौस्तस्मै प्रदातव्या गङ्गायमुनसङ्गमे।
वासांसि च महार्हाणि रत्नानि विविधानि च ॥१८॥
यावद्रोमाणि तस्यागोः सन्ति गात्रेषु सत्तम !।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १९ ॥
यत्राऽसौ लभते जन्म सा गौस्तस्याभिजायते।
न च पश्यति तं घोरं नरकं तेन कर्मणा।
उत्तरान् स कुरून् प्राप्य मोदते कालमक्षयम् ॥२०॥
गवां शतसहस्रेभ्यो दद्यादेकां पयस्विनीम्।
पुत्रान् दारांस्तथा भृत्यान् गौरेका प्रतितारयेत् ॥२१॥
तस्मात् सर्वेषु दानेषु गोदानन्तु विशिष्यते।
दुर्गमे विषमे घोरे महापातकसम्भवे।
गौरेव रक्षां कुरुते तस्माद्देया द्विजोत्तमे ॥ २२ ॥

---

पञ्चाधिकशततमोऽध्यायः।

युधिष्ठिर उवाच। यथा यथा प्रयागस्य माहात्म्यं कथ्यते त्वया।
तथा तथा प्रमुच्येऽहं सर्वपापैर्न संशयः ॥ १ ॥

भगवन्! केन विधिना गन्तव्यं धर्म्मनिश्चयैः।
प्रयागे यो विधिः प्रोक्तस्तन्मे ब्रूहि महामुने! ॥२॥
मार्कण्डेय उवाच। कथयिष्यामि ते राजन्! तीर्थयात्राविधिक्रमम्।
आर्षेण विधिनानेन यथादृष्टं यथाश्रुतम् ॥ ३ ॥
प्रयागतीर्थयात्रार्थी यः प्रयाति नरः क्वचित्।
बलिवर्द्दसमारूढः शृणु तस्यापि यत् फलम्। ४ ॥
नरके वसते घोरे गवां क्रोशो हि दारुणे।
सलिलं न च गृह्णन्ति पितरस्तस्य देहिनः ॥ ५ ॥
यस्तु पुत्रांस्तथा बालान् स्नापयेत् पाययेत्तथा।
यथात्मना तथा सर्वं दानं विप्रेषु दापयेत् ॥ ६ ॥
ऐश्वर्य्यलोभमोहाद्वा गच्छेद्यानेन यो नरः।
निष्फलं तस्य तत् सर्वं तस्माद्यानं विवर्जयेत् ॥७॥
गङ्गायमुनयोर्मध्ये यस्तु कन्यां प्रयच्छति।
आर्षेणैव विवाहेन यथाविभवसम्भवम् ॥ ८ ॥
न स पश्यति तद्घोरं नरकं तेन कर्म्मणा।
उत्तरान् स कुरून् गत्वा मोदते कालमक्षयम्।
पुत्रान्दारांश्च लभते धार्म्मिकान् रूपसंयुतान् ॥ ९ ॥
तत्र दानं प्रकर्त्तव्यं यथाविभवसम्भवम्।
तेन तीर्थफलञ्चैव वर्धते नात्रसंशयः।
स्वर्गे तिष्ठति राजेन्द्र! यावदाभूतसंप्लवम् ॥ १० ॥
वटमूलं समासाद्य यस्तु प्राणान् विमुञ्चति।
सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति ॥ ११ ॥
तत्र ते द्वादशादित्यास्तपन्ति रुद्रसंश्रिताः।
निर्दहन्ति जगत् सर्वं वटमूलं न दह्यते ॥ १२॥

नष्टचन्द्रार्कभुवनं यदा चैकार्णवं जगत् ।
स्थीयते तत्र वै विष्णुर्यजमानः पुनः पुनः ॥ १३ ॥
देवदानवगन्धर्वा ऋषयः सिद्धचारणाः ।
सदा सेवन्ति तत्तीर्थं गङ्गायमुनसङ्गमम् ॥१४ ॥
ततो गच्छेत राजेन्द्र ! प्रयागं संस्तुवंश्च यत् ।
यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ॥ १५ ॥
लोकपालाश्च साध्याश्च पितरो लोकसंमताः ।
सनत्कुमारप्रमुखास्तथैव परमर्षयः ॥ १६ ॥
अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयः परे ।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रधरास्तथा ॥ १७ ॥
सागराः सरितः शैला नागा विद्याधराश्च ये ।
हरिश्च भगवानास्ते प्रजापतिपुरःसरः ॥ १८ ॥
गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम् ।
प्रयागं राजशार्दूल ! त्रिषु लोकेषु भारत ! ॥ १९ ॥
श्रवणात्तस्य तीर्थस्य नामसंकीर्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥ २० ॥
तत्राभिषेकं यः कुर्यात् सङ्गमे शंसितव्रतः ।
तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः ॥ २१ ॥
न देववचनात्तात ! न लोकवचनात्तथा ।
मतिरुत्क्रमणीया ते प्रयागगमनम्प्रति ॥ २२ ॥
दशतीर्थसहस्राणि षष्टिकोटयस्तथापराः ।
तेषां सान्निध्यमत्रैव ततस्तु कुरुनन्दन ! ॥ २३ ॥
या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः ।
सा गतिस्त्यजतः प्राणान् गङ्गायमुनसङ्गमे ॥ २४ ॥

न ते जीवन्ति लोकेऽस्मिन् तत्र तत्र युधिष्ठिर !।
ये प्रयागं न सम्प्राप्तास्त्रिषु लोकेषु वञ्चिताः॥ २५ ॥
एवं दृष्ट्वा तु तत्तीर्थं प्रयागं परमम्पदम्।
मुच्यते सर्वपापेभ्यो शशाङ्क इव राहुणा॥ २६ ॥
कम्बलाश्वतरौ नागौ विपुले यमुनातटे।
तत्र स्नात्वा च पीत्वा च सर्वपापैः प्रमुच्यते॥ २७ ॥
तत्र गत्वा च संस्थानं महादेवस्य धीमतः।
नरस्तारयते सर्वान् दशपूर्वान् दशापरान्॥ २८ ॥
कृत्वाभिषेकन्तु नरः सोऽश्वमेधफलं लभेत्।
स्वर्गलोकमवाप्नोति यावदाभूतसंप्लवम्॥ २९ ॥
पूर्वपार्श्वे तु गङ्गायास्त्रिषु लोकेषु भारत।
कूपश्चैव तु सामुद्रं प्रतिष्ठानञ्च विश्रुतम्॥ ३० ॥
ब्रह्मचारी जितक्रोधस्त्रिरात्रं यदि तिष्ठति।
सर्वपापविशुद्धात्मा सोऽश्वमेधफलं लभेत्॥ ३१ ॥
उत्तरेण प्रतिष्ठानात् भागीरथ्यास्तु पूर्वतः।
हंसप्रपतनं नाम तीर्थं त्रैलोक्यविश्रुतम्॥ ३२ ॥
अश्वमेधफलं तस्मिन् स्नानमात्रेण भारत !।
यावच्चन्द्रश्च सूर्य्यश्च तावत् स्वर्गे महीयते॥ ३३ ॥
उर्वशीरमणे पुण्ये विपुले हंसपाण्डुरे।
परित्यजति यः प्राणान् शृणु तस्यापि यत् फलम्॥ ३४ ॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च।
सेवते पितृभिः सार्द्धं स्वर्गलोके नराधिप !॥ ३५ ॥
उर्वशीन्तु सदा पश्येत् स्वर्गलोके नरोत्तम !।
पूज्यते सततं पुत्र ! ऋषिगन्धर्वकिन्नरैः॥ ३६ ॥

ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ।
उर्वशीसदृशीनान्तु कन्यानां लभते शतम् ॥ ३७ ॥
मध्ये नारीसहस्राणां बहूनाञ्च पतिर्भवेत् ।
दशग्रामसहस्राणां भोक्ता भवति भूमिपः ॥ ३८ ॥
काञ्चीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते ।
भुक्त्वा तु विपुलान् भोगान् तत्तीर्थं भजते पुनः ॥३९
शुक्लाम्बरधरो नित्यं नियतः संयतेन्द्रियः ।
एकं कालन्तु भुञ्जानो मासं भूमिपतिर्भवेत् ॥ ४० ॥
सुवर्णालङ्कृतानान्तु नारीणां लभते शतम् ।
पृथिव्यां सासमुद्रायां महाभूमिपतिर्भवेत् ॥ ४१ ॥
धनधान्यसमायुक्तो दाता भवति नित्यशः ।
भुक्त्वा तु विपुलान् भोगान् तत्तीर्थं लभते पुनः ॥४२॥
अथ सन्ध्यावटे रम्ये ब्रह्मचारी जितेन्द्रियः ।
उपवासी शुचिः सन्ध्यां ब्रह्मलोकमवाप्नुयात् ॥ ४३॥
कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
कोटिवर्षसहस्राणि स्वर्गलोके महीयते ॥ ४४ ॥
ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ।
सुवर्णमणिमुक्ताढ्यकुले जायेत रूपवान् ॥ ४५ ॥
ततो भोगवतीं गत्वा वासुकेरुत्तरेण तु ।
दशाश्वमेधकं नाम तीर्थं तत्रापरं भवेत् ॥ ४६ ॥
कृताभिषेकस्तु नरः सोऽश्वमेधफलं लभेत् ।
धनाढ्यो रूपवान् दक्षो दाता भवति धार्मिकः ॥४७॥
चतुर्वेदेषु यत् पुण्यं यत् पुण्यं सत्यवादिषु ।
अहिंसायान्तु यो धर्मो गमनादेव तत् फलम् ॥४८॥

कुरुक्षेत्रसमा गङ्गा यत्र यत्रावगाह्यते ।
कुरुक्षेत्राद्दशगुणा यत्र विन्ध्येन सङ्गता ॥ ४९ ॥
यत्र गङ्गा महाभागा बहुतीर्था तपोधना ।
सिद्धक्षेत्रं हि तत् ज्ञेयं नात्र कार्य्या विचारणा ॥५०॥
क्षितौ तारयते मर्त्यान्नागांस्तारयतेऽप्यधः ।
दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ॥ ५१ ॥
यावदस्थीनि गङ्गायां तिष्ठन्ति हि शरीरिणः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ५२ ॥
तीर्थानान्तु परं तीर्थं नदीनां तु महानदी ।
मोक्षदा सर्वभूतानां महापातकिनामपि ॥ ५३ ॥
सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
तत्र स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः ॥ ५४ ॥
सर्वेषामेव भूतानां पापोपहतचेतसाम् ।
गतिमन्विष्यमाणानां नास्ति गङ्गासमा गतिः ॥५५॥
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम् ।
महेश्वरशिरोभ्रष्टा सर्वपापहरा शुभा ॥ ५६ ॥

---

## षडधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच ।

शृणु राजन् ! प्रयागस्य माहात्म्यं पुनरेव तु ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥
मानसं नाम तत्तीर्थं गङ्गाया उत्तरे तटे ।
त्रिरात्रोपोषितो भूत्वा सर्वकामानवाप्नुयात् ॥ २ ॥

गोभूहिरण्यदानेन यत् फलं प्राप्नुयान्नरः ।
स तत् फलमवाप्नोति तत्तीर्थं स्मरते पुनः ॥ ३ ॥
अकामो वा सकामो वा गङ्गायां योऽभिपद्यते ।
मृतस्तु लभते स्वर्गं नरकञ्च न पश्यति ॥ ४ ॥
अप्सरोगणसङ्गीतैः सुप्तोऽसौ प्रतिबुध्यते ।
हंससारसयुक्तेन विमानेन स गच्छति ।
बहुवर्षसहस्राणि स्वर्गं राजेन्द्र ! भुञ्जति ॥ ५ ॥
ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ।
सुवर्णमणिमुक्ताढ्ये जायते विपुले कुले ॥ ६ ॥
षष्टितीर्थसहस्राणि षष्टिकोट्यस्तथापगाः ।
माघमासे गमिष्यन्ति गङ्गायमुनसङ्गमम् ॥ ७ ॥
गवां शतसहस्रस्य सम्यक् दत्तस्य यत् फलम् ।
प्रयागे माघमासे तु त्र्यहस्नानात्तु तत् फलम् । ८ ॥
गङ्गायमुनयोर्मध्ये कर्षाग्निं यस्तु साधयेत् ।
अहीनाङ्गो ह्यरोगश्च पञ्चेन्द्रियसमन्वितः ॥ ९ ॥
यावन्ति रोमकूपाणि तस्य गात्रेषु देहिनः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १० ॥
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ।
स भुक्त्वा विपुलान् भोगांस्तत्तीर्थं स्मरते पुनः ॥११॥
जलप्रवेशं यः कुर्यात् सङ्गमे लोकविश्रुते ।
राहुग्रस्ते तथा सोमे विमुक्तः सर्वकिल्बिषैः ॥ १२ ॥
सोमलोकमवाप्नोति सोमेन सह मोदते ।
षष्टिवर्षसहस्राणि स्वर्गलोके महीयते ॥ १३
स्वर्गे च शक्रलोकेऽस्मिन् ऋषिगन्धर्वसेविते ।

परिभ्रष्टस्तु राजेन्द्र ! समृद्धे जायते कुले ॥ १४ ॥
अधःशिरस्तु यो ज्वालामूर्द्धपादः पिबेन्नरः ।
शतवर्षसहस्राणि स्वर्गलोके महीयते ॥ १५ ॥
परिभ्रष्टस्तु राजेन्द्र ! सोऽग्निहोत्री भवेन्नरः ।
भुक्त्वा तु विपुलान् भोगान् तत्तीर्थं भजते पुनः ॥१६॥
यः स्वदेहन्तु कर्त्तित्वा शकुनिभ्यः प्रयच्छति ।
विहगैरुपभुक्तस्य शृणु तस्यापि यत् फलम् ॥ १७ ॥
शतं वर्षसहस्राणां सोमलोके महीयते ।
तस्मादपि परिभ्रष्टो राजा भवति धार्म्मिकः ॥ १८ ॥
गुणवान् रूपसम्पन्नो विद्वांश्च प्रियवाचकः ।
भुक्त्वा तु विपुलान् भोगांस्तत्तीर्थं भजते पुनः ॥ १९ ॥
या मुने चोत्तरे कूले प्रयागस्य तु दक्षिणे ।
ऋणप्रमोचनं नाम तत्तीर्थं परमं स्मृतम् ॥ २० ॥
एकरात्रोषितः स्नात्वा ऋणैः सर्वैः प्रमुच्यते ।
स्वर्गलोकमवाप्नोति अनृणश्च सदा भवेत् ॥ २१ ॥

---

## अथ सप्ताधिकशततमोऽध्यायः ।

युधिष्ठिर उवाच । एतच्छ्रुत्वा प्रयागस्य यत्त्वया परिकीर्त्तितम् ।
विशुद्धं मेऽद्य हृदयं प्रयागस्य तु कीर्त्तनात् ॥ १ ॥
अनाशकफलं ब्रूहि भगवंस्तत्र कीदृशम् ।
यच्च लोकमवाप्नोति विशुद्धः सर्वकिल्बिषैः ॥ २ ॥
मार्कण्डेय उवाच । शृणु राजन् ! प्रयागे तु अनाशकफलं विभो !
प्राप्नोति पुरुषो धीमान् श्रद्दधानो जितेन्द्रियः ॥ ३ ॥
अहीनाङ्गोऽप्यरोगश्च पञ्चेन्द्रियसमन्वितः ।

अश्वमेधफलं तस्य गच्छतस्तु पदे पदे ॥ ४ ॥
कुलानि तारयेद्राजन् दशपूर्वान् दशापरान् ।
मुच्यते सर्वपापेभ्यो गच्छेत्तु परमं पदम् ॥ ५ ॥

युधिष्ठिर उवाच ।

महाभाग्यं हि धर्मस्य यत्त्वं वदसि मे प्रभो ! ।
अल्पेनैव प्रयत्नेन बहून्धर्मानवाप्नुते ॥ ६ ॥
अश्वमेधैस्तु बहुभिः प्राप्यते सुव्रतैरिह ।
इमं मे संशयं छिन्धि परं कौतूहलं हि मे ॥ ७ ॥

मार्कण्डेय उवाच । शृणु राजन् ! महावीर ! यदुक्तं ब्रह्मयोनिना ।
ऋषीणां सन्निधौ पूर्वं कथ्यमानं मया श्रुतम् ॥ ८ ॥
पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डलम् ।
प्रविष्टमात्रे तद्भूमावश्वमेधः पदे पदे ॥ ९ ॥
व्यतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश ।
नरस्तारयते सर्वान् यस्तु प्राणान् परित्यजेत् ॥ १० ॥
एवं ज्ञात्वा तु राजेन्द्र ! सदा सेवापरो भवेत् ।
अश्रद्दधानाः पुरुषाः पापोपहतचेतसः ।
न प्राप्नुवन्ति तत्स्थानं प्रयागं देवरक्षितम् ॥ ११ ॥

युधिष्ठिर उवाच । स्नेहाद्वा द्रव्यलोभाद्वा ये तु कामवशङ्गताः ।
कथं तीर्थफलं तेषां कथं पुण्यफलं भवेत् ॥ १२ ॥
विक्रयः सर्वभाण्डानां कार्य्याकार्य्यमजानतः ।
प्रयागे का गतिस्तस्य तन्मे ब्रूहि पितामह ! ॥ १३ ॥

मार्कण्डेय उवाच । शृणु राजन् ! महागुह्यं सर्वपापप्रणाशनम् ।
मासमेकन्तु यः स्नायात् प्रयागे नियतेन्द्रियः ।
मुच्यते सर्वपापेभ्यः स गच्छेत् परमं पदम् ॥ १४ ॥

विस्रब्धवातकामात्तु प्रयागे शृणु यत् फलम्।
त्रिकालमेव स्नायीत आहारं भैक्ष्यमाचरेत्।
त्रिभिर्मासैः स मुच्येत प्रयागे तु न संशयः॥ १५॥
अज्ञानेन तु यस्येह तीर्थयात्रादिकं भवेत्।
सर्वकामसमृद्धेतु स्वर्गलोके महीयते।
स्थानञ्च लभते नित्यं धनधान्यसमाकुलम्॥ १६॥
एवं ज्ञानेन संपूर्णः सदा भवति भोगवान्।
तारिताः पितरस्तेन नरकात् प्रपितामहाः॥ १७॥
धर्मानुसारि तत्त्वज्ञ! पृच्छतस्ते पुनः पुनः।
त्वत्प्रियार्थं समाख्यातं गुह्यमेतत् सनातनम्॥१८॥
युधिष्ठिर उवाच। अद्य मे सफलं जन्म अद्य मे तारितं कुलम्।
प्रीतोऽस्म्यनुगृहीतोऽस्मि दर्शनादेव ते मुने!॥१९॥
त्वद्दर्शनात्तु धर्मात्मन्! मुक्तोऽहञ्चाद्य किल्बिषात्।
इदानीं वेद्मि चात्मानं भगवन्! गतकल्मषम्॥२०॥
मार्कण्डेय उवाच। दिष्ट्या ते सफलं जन्म दिष्ट्या ते तारितं कुलम्
कीर्त्तनाद्वर्धते पुण्यं श्रुतात्पापप्रणाशनम्॥ २१॥
युधिष्ठिर उवाच। यमुनायान्तु किं पुण्यं किं फलन्तु महामुने!।
एतन्मे सर्वमाख्याहि यथा दृष्टं यथा श्रुतम्॥२२॥
मार्कण्डेय उवाच। तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता।
समाख्याता महाभागा यमुना तत्र निम्नगा॥ २३॥
येनैव निःसृता गङ्गा तेनैव यमुनागता।
योजनानां सहस्रेषु कीर्त्तनात् पापनाशिनी॥ २४॥
तत्र स्नात्वा च पीत्वा च यमुनायां युधिष्ठिर!।

कीर्त्तनाल्लभते पुण्यं दृष्ट्वा भद्राणि पश्यति ॥ २५ ॥
अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्।
प्राणांस्त्यजति यत्रैव स याति परमाङ्गतिम् ॥ २६ ॥
अग्नितीर्थमितिख्यातं यमुनादक्षिणे तटे।
पश्चिमे धर्मराजस्य तीर्थन्तु नरकं स्मृतम् ॥ २७ ॥
तत्र स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः।
एवं तीर्थसहस्राणि यमुनादक्षिणे तटे ॥ २८ ॥
उत्तरेण प्रवक्ष्यामि आदित्यस्य महात्मनः।
तीर्थं निरञ्जनं नाम यत्र देवाः सवासवाः ॥ २९ ॥
उपासते च सन्ध्यां ये त्रिकालं हि युधिष्ठिर!।
देवाः सेवन्ति तत्तीर्थं ये चान्ये विबुधा जनाः ॥३०॥
श्रद्दधानपरो भूत्वा कुरु तीर्थाभिषेचनम्।
अन्येच बहवस्तीर्थाः सर्वपापहरा स्मृताः।
तेषु स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः ॥३१॥
गङ्गा च यमुना चैव उभे तुल्यफले स्मृते।
केवलं ज्येष्ठभावेन गङ्गा सर्वत्र पूज्यते ॥ ३२ ॥
एवं कुरुष्व कौन्तेय! सर्वतीर्थाभिषेचनम्।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥ ३३ ॥
यस्त्विमं कल्य उत्थाय पठते च शृणोति च।
मुच्यते सर्वपापेभ्यः स्वर्गलोकं स गच्छति ॥ ३४ ॥

---

अथाष्टोत्तरशततमोऽध्यायः।

मार्कण्डेय उवाच। श्रुतं मे ब्रह्मणा प्रोक्तं पुराणे ब्रह्मसम्भवे।
तीर्थानान्तु सहस्राणि शतानि नियुतानि च।

सर्वे पुण्याः पवित्राश्च गतिश्च परमा स्मृता ॥ १ ॥
सोमतीर्थं महापुण्यं महापातकनाशनम् ।
स्नानमात्रेण राजेन्द्र ! पुरुषांस्तारयेच्छतान् ।
तस्मात् सर्वप्रयत्नेन तत्र स्नानं समाचरेत् ॥ २ ॥
युधिष्ठिर उवाच । पृथिव्यां नैमिषं पुण्यं अन्तरीक्षे च पुष्करम् ।
त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥ ३ ॥
सर्वाणि तानि सन्त्यज्य कथमेकं प्रशंससि ।
अप्रमाणन्तु तत्रोक्तं अश्रद्धेय मनुत्तमम् ॥ ४ ॥
गतिञ्च परमां दिव्यां भोगांश्चैव यथेप्सितान् ।
किमर्थमल्पयोगेन बहु धर्मं प्रशंससि ।
एतन्मे संशयं ब्रूहि यथादृष्टं यथाश्रुतम् ॥ ५ ॥
मार्कण्डेय उवाच । अश्रद्धेयं न वक्तव्यं प्रत्यक्षमपि यद् भवेत् ।
नरस्याश्रद्दधानस्य पापोपहतचेतसः ॥ ६ ॥
अश्रद्दधानोऽप्यशुचिर्दुर्मतिस्त्यक्तमङ्गलः ।
एते पातकिनः सर्वे तेनेदं भाषितं त्वया ॥ ७ ॥
शृणु प्रयागमाहात्म्यं यथादृष्टं यथाश्रुतम् ।
प्रत्यक्षञ्च परोक्षञ्च यथान्यस्तं भविष्यति ॥ ८ ॥
यथैवान्यदृदृष्टञ्च यथादृष्टं यथाश्रुतम् ।
शास्त्रं प्रमाणं कृत्वा च युज्यते योगमात्मनः ॥ ९ ॥
क्लिश्यते चापरस्तत्र नैव योगमवाप्नुयात् ।
जन्मान्तरसहस्रेभ्यो योगो लभ्येत मानवैः ॥ १० ॥
यथा योगसहस्रेण योगो लभ्येत मानवैः ।
यस्तु सर्वाणि रत्नानि ब्राह्मणेभ्यः प्रयच्छति ॥ ११ ॥
तेन दानेन दत्तेन योगं नाप्नोति मानवः ।

प्रयागे तु मृतस्येदं सर्वं भवति नान्यथा ॥ १२ ॥
प्रधानहेतुं वक्ष्यामि श्रद्दधत्स्व च भारत !
यथा सर्वेषु भूतेषु ब्रह्म सर्वत्र दृश्यते ॥ १३ ॥
ब्राह्मणे चास्ति यत् किञ्चिद्ब्राह्ममितिचोच्यते ।
एवं सर्वेषु भूतेषु ब्रह्म सर्वत्र पूज्यते ॥ १४ ॥
यथा सर्वेषु लोकेषु प्रयागं पूजयेद्बुधः ।
पूज्यते तीर्थराजस्तु सत्यमेव युधिष्ठिर ! ॥ १५ ॥
ब्रह्मापि स्मरते नित्यं प्रयागं तीर्थमुत्तमम् ।
तीर्थराजमनुप्राप्य न चान्यत् किञ्चिदर्हति ॥ १६ ॥
को हि देवत्वमासाद्य मनुष्यत्वं चिकीर्षति ।
अनेनैवोपमानेन त्वं ज्ञास्यसि युधिष्ठिर ! ।
यथा पुण्यतमं चास्ति तथैव कथितं मया ॥ १७ ॥

युधिष्ठिर उवाच । श्रुतं चेदं त्वया प्रोक्तं विस्मितोऽहं पुनः पुनः ।
कथं योगेन तत्प्राप्तिः स्वर्गवासस्तु कर्मणा ॥ १८ ॥
दाता वै लभते भोगान् गां च यत्कर्मणः फलम् ।
तानि कर्माणि पृच्छामि पुनस्तैः प्राप्यते मही ॥ १९ ॥

मार्कण्डेय उवाच । शृणु राजन्महाबाहो ! यथोक्तकरणं महीम्
गामग्निं ब्राह्मणं शास्त्रं काञ्चनं सलिलं स्त्रियः ॥ २० ॥
मातरं पितरञ्चैव ये निन्दन्ति नराधमाः ।
न तेषामूर्द्ध्वगमनमिदमाह प्रजापतिः ॥ २१ ॥
एवं योगस्य सम्प्राप्तिस्थानं परमदुर्लभम् ।
गच्छन्ति नरकं घोरं ये नराः पापकर्मिणः ॥ २१ ॥
हस्त्यश्वगामनडुहं मणिमुक्तादिकाञ्चनम् ।
परोक्षं हरते यस्तु यश्च दानं प्रयच्छति ॥ २२ ॥

न ते गच्छन्ति वै स्वर्गं दातारो यत्र भोगिनः ।
अनेककर्मणा युक्ताः पच्यन्ते नरके पुनः ॥ २३ ॥
एवं योगश्च धर्मश्च दातारश्च युधिष्ठिर ! ।
यथा सत्यमसत्यं वा अस्ति नाप्नोति यत् फलम् ।
निवृत्तान्तु प्रवक्ष्यामि यथाह स्वयमंशुमान् ॥ २४ ॥

---

## अथ नवोत्तरशततमोऽध्यायः ।

### मार्कण्डेय उवाच ।

शृणु राजन् ! प्रयागस्य माहात्म्यं पुनरेव तु ।
नैमिषं पुष्करञ्चैव गोतीर्थं सिन्धुसागरम् ॥ १ ॥
गया च चैत्रकं चैव गङ्गासागरमेव च ।
एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः ॥ २ ॥
दशतीर्थसहस्राणि त्रिंशत्कोट्य स्तथा पराः ।
प्रयागे संस्थिता नित्यमेव माहुर्मनीषिणः ॥ ३ ॥
त्रीणि चाप्यग्निकुण्डानि येषां मध्ये तु जाह्नवी ।
प्रयागादभिनिष्क्रान्ता सर्वतीर्थनमस्कृता ॥ ४ ॥
तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता ।
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी ॥ ५ ॥
गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम् ।
प्रयागं राजशार्दूल ! कलां नार्हन्ति षोडशीम् ॥ ६ ॥
तिस्रः कोट्योऽर्द्धकोटिश्च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरिक्षे च तत्सर्वं जाह्नवी स्मृता ॥ ७ ॥
प्रयागं समधिष्ठानं कम्बलाश्वतरा उभौ ।
भोगवत्यथ या चैषा वेदिरेषा प्रजापतेः ॥ ८ ॥

तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो युधिष्ठिर ! ।
प्रजापतिमुपासन्ते ऋषयश्च तपोधनाः ॥ ९ ॥
यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ।
ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत ! ॥ १० ॥
प्रभावात् सर्वतीर्थेभ्यः प्रभवत्यधिकं विभो ! ।
दशतीर्थसहस्राणि तिस्रः कोट्यस्तथापराः ॥ ११ ॥
यत्र गङ्गा महाभागा स देशस्तत्तपोधनम् ।
सिद्धक्षेत्रञ्च विज्ञेयं गङ्गातीरसमन्वितम् ॥ १२ ॥
इदं सत्यं विजानीयात् साधूनामात्मनश्च वै ।
सुहृदश्च जपेत् कर्णे शिष्यस्यानुगतस्य च ॥ १३ ॥
इदं धन्यमिदं स्वर्ग्यमिदं सत्यमिदं सुखम् ।
इदं पुण्यमिदं धर्म्यं पावनं धर्ममुत्तमम् ॥ १४ ॥
महर्षीणामिदं गुह्यं सर्वपापप्रणाशनम् ।
अधीत्य च द्विजोऽप्येतन्निर्मलः स्वर्गमाप्नुयात् ॥ १५ ॥
य इदं शृणुयान्नित्यं तीर्थं पुण्यं सदा शुचिः ।
जातिस्मरत्वं लभते नाकपृष्ठे च मोदते ॥ १६ ॥
प्राप्यन्ते तानि तीर्थानि सद्भिः शिष्टानुदर्शिभिः ।
स्नाहि तीर्थेषु कौरव्य ! न च वक्रमतिर्भवेत् ॥ १७ ॥
त्वया च सम्यक् पृष्टेन कथितं वै मया विभो ! ।
पितरस्तारिताः सर्वे तथैव च पितामहाः ।
प्रयागस्य तु सर्वे ते कलां नार्हन्ति षोड़शीम् ॥ १८ ॥
एवं ज्ञानञ्च योगञ्च तीर्थं चैव युधिष्ठिर ! ।
बहुक्लेशेन युज्यन्ते तेन यान्ति पराङ्गतिम् ।
त्रिकालं जायते ज्ञानं स्वर्गलोकं गमिष्यति ॥ १९ ॥

अथ दशोत्तरशततमोऽध्यायः।

---

युधिष्ठिर उवाच। कथं सर्वमिदं प्रोक्तं प्रयागस्य महामुने।

एतन्नः सर्वमाख्याहि यथा हि मम तारयेत्॥ १॥

मार्कण्डेय उवाच।

शृणु राजन्! प्रयागे तु प्रोक्तं सर्वमिदं जपेत्।

ब्रह्मा विष्णुस्तथेशानो देवताः प्रभुरव्ययः॥ २॥

ब्रह्मा सृजति भूतानि स्थावरं जङ्गमञ्च यत्।

तान्येतानि परं लोके विष्णुः संवर्द्धते प्रजाः॥३॥

कल्पान्ते तत्समग्रं हि रुद्रः संहरते जगत्।

तदा प्रयागतीर्थञ्च न कदाचिद्विनश्यति॥ ४॥

ईश्वरः सर्वभूतानां यः पश्यति स पश्यति।

यत्नेनानेन तिष्ठन्ति ते यान्ति परमाङ्गतिम्॥ ५॥

युधिष्ठिर उवाच। आख्याहि मे यथातथ्यं यथैषा तिष्ठति श्रुतिः।

केन वा कारणेनैव तिष्ठन्ते लोकसत्तमाः॥ ६॥

मार्कण्डेय उवाच। प्रयागे निवसन्ते ते ब्रह्मविष्णुमहेश्वराः।

कारणं तत्प्रवक्ष्यामि शृणु तत्त्वं युधिष्ठिर!॥ ७॥

पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डलम्।

तिष्ठन्ति रक्षणायात्र पापकर्मनिवारणात्॥ ८॥

उत्तरेण प्रतिष्ठानाच्छद्मना ब्रह्म तिष्ठति।

वेणी माधवरूपी तु भगवांस्तत्र तिष्ठति ॥ ९ ॥
माहेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः ।
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
रक्षन्ति मण्डलं नित्यं पापकर्मनिवारणात् ॥ १० ॥
यस्मिन् जुह्वन् स्वकं पापं नरकञ्च न पश्यति ।
एवं ब्रह्मा च विष्णुश्च प्रयागे स महेश्वरः ॥ ११ ॥
सप्तद्वीपाः समुद्राश्च पर्वताश्च महीतले ।
रक्षमाणाश्च तिष्ठन्ति यावदाभूतसंप्लवम् ॥ १२ ॥
ये चान्ये बहवः सर्वे तिष्ठन्ति युधिष्ठिर ! ।
पृथिवी तत्समाश्रित्य निर्मिता दैवतैस्त्रिभिः ॥ १३ ॥
प्रजापतेरिदं क्षेत्रं प्रयागमिति विश्रुतम् ।
एतत् पुण्यं पवित्रं वै प्रयागञ्च युधिष्ठिर ! ।
स्वराज्यं कुरु राजेन्द्र ! भ्रातृभिः सहितोऽनघ ! ॥ १४ ॥

---

अथैकादशोत्तरशततमोऽध्यायः ।

नन्दिकेश्वर उवाच ।

भ्रातृभिः सहितः सर्वैः द्रौपद्या सह भार्यया ।
ब्राह्मणेभ्यो नमस्कृत्य गुरून् देवानतर्पयत् ॥ १ ॥
वासुदेवोऽपि तत्रैव क्षणेनाभ्यागतस्तदा ।
पाण्डवैः सहितैः सर्वैः पूज्यमानस्तु माधवः ॥ २ ॥
कृष्णेन सहितैः सर्वैः पुनरेव महात्मभिः ।
अभिषिक्तः स्वराज्ये च धर्मपुत्रो युधिष्ठिर ! ॥ ३ ॥
एतस्मिन्नन्तरे चैव मार्कण्डेयो महामुनिः ।
ततः स्वस्तीति चोक्त्वा तु क्षणादाश्रममागमत् ॥ ४ ॥

युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितोऽवसत्।
महादानं ततो दत्त्वा धर्मपुत्रो महामनाः॥ ५॥
यश्चेदं कल्य उत्थाय माहात्म्यं पठते नरः।
प्रयागं स्मरते नित्यं स याति परमं पदम्।
मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति॥ ६॥
वासुदेव उवाच। मम वाक्यञ्च कर्तव्यं महाराज! ब्रवीम्यहम्।
नित्यं जपस्व जुहुस्व प्रयागे विगतज्वरः॥ ७॥
प्रयागं स्मर वै नित्यं सहास्माभिर्युधिष्ठिर!।
स्वयं प्राप्स्यसि राजेन्द्र! स्वर्गलोकं न संशयः॥ ८॥
प्रयागमनुगच्छेद्वा वसते वापि यो नरः।
सर्वपापविशुद्धात्मा रुद्रलोकं स गच्छति॥ ९॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो नियतः शुचिः।
अहङ्कारनिवृत्तश्च स तीर्थफलमश्नुते॥ १०॥
अकोपनश्च सत्यश्च सत्यवादी दृढव्रतः।
आत्मोपमश्च भूतेषु स तीर्थ फलमश्नुते॥ ११॥
ऋषिभिः क्रतवः प्रोक्ता देवैश्चापि यथाक्रमम्।
न हि शक्या दरिद्रेण यज्ञाः प्राप्तुं महीयते॥ १२॥
बहूपकरणा यज्ञा नानासम्भारविस्तराः।
प्राप्यन्ते पार्थिवैरेतैः समृद्धैर्वा नरैः क्वचित्॥ १३॥
यो दरिद्रैरपि विधिः शक्यः प्राप्तुं नरेश्वर!।
तुल्यो यज्ञफलैः पुण्यैस्तन्निबोध युधिष्ठिर!॥ १४॥
ऋषीणां परमं गुह्यमिदं भरतसत्तम!।
तीर्थानुगमनं पुण्यं यज्ञेभ्योऽपि विशिष्यते॥ १५॥
दशतीर्थसहस्राणि तिस्रः कोट्यस्तथापगाः।

माघमासे गमिष्यन्ति गङ्गायां भरतर्षभ ! ॥ १६॥
स्वस्थो भव महाराज ! भुंक्ष्व राज्यमकण्टकम् ।
पुनर्द्रक्ष्यसि राजेन्द्र ! यजमानो विशेषतः ॥ १७ ॥
नन्दिकेश्वर उवाच ।
इत्युक्त्वा स महाभागो मार्कण्डेयो महातपाः ।
युधिष्ठिरस्य नृपतेस्तत्रैवान्तरधीयत ॥ १८ ॥
ततस्तत्र समाप्लाव्य गात्राणि सगणो नृपः ।
यथोक्तेनाथ विधिना परां निर्वृतिमागमत् ॥ १९॥
तथा त्वमपि देवर्षे ! प्रयागाभिमुखोभव ।
अभिषेकन्तु कृत्वाद्य कृतकृत्यो भविष्यसि ॥ २० ॥
सूत उवाच । एवमुक्त्वाथ नन्दीशस्तत्रैवान्तरधीयत ।
नारदोऽपि जगामाशु प्रयागाभिमुखस्तदा ॥ २१ ॥
तत्र स्नात्वा च जप्त्वा च विधिदृष्टेन कर्मणा ।
दानन्दत्त्वा द्विजाग्रेभ्यो गतः स्वभवनं तदा ॥ २२ ॥

---

अथ द्वादशोत्तरशततमोऽध्यायः ।

ऋषय ऊचुः । कति द्वीपाः समुद्रा वा पर्वता वा कति प्रभो ! ।
कियन्ति चैव वर्षाणि तेषु नद्यश्च काः स्मृताः ॥ १ ॥
महाभूमिप्रमाणञ्च लोकालोक स्तथैव च ।
पर्याप्तिं परिमाणञ्च गतिश्चन्द्रार्कयो स्तथा ॥ २ ॥
एतत् ब्रवीहि नः सर्वं विस्तरेण यथार्थवित् ।
त्वदुक्तमेतत् सकलं श्रोतुमिच्छामहे वयम् ॥ ३ ॥
सूत उवाच । द्वीपभेदसहस्राणि सप्तस्वन्तर्गतानि च ।
न शक्यन्ते क्रमेणेह वक्तुं वै सकलं जगत् ॥ ४ ॥

अतैव तु प्रवक्ष्यामि चन्द्रादित्यग्रहैः सह।
तेषां मनुष्यतर्केण प्रमाणानि प्रचक्षते ॥ ५ ॥
अचिन्त्याः खलु ये भावा नांस्तु तर्केण साधयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम् ॥ ६ ॥
सप्तवर्षाणि वक्ष्यामि जम्बुद्वीपं यथाविधम्।
विस्तरं मण्डलं यच्च योजनैस्तन्निबोधत ॥ ७ ॥
योजनानां सहस्राणि शतं द्वीपस्य विस्तरः।
नानाजनपदाकीर्णं पुरैश्च विविधैः शुभैः ॥ ८ ॥
सिद्धचारणसङ्कीर्णं पर्वतैरुपशोभितम्।
सर्वधातुपिनद्धैश्च शिलाजालसमुद्गतैः ॥ ९ ॥
पर्वतप्रसवाभिश्च नदीभिश्च समन्ततः।
प्रागायता महापार्श्वाः षडिमे वर्षपर्वताः ॥ १० ॥
अवगाह्य ह्युभयतः समुद्रौ पूर्वपश्चिमौ।
हिमप्रायश्च हिमवान् हेमकूटश्च हेमवान् ॥११॥
चातुर्वर्ण्यस्तु सौवर्णो मेरुश्चोल्वमयः स्मृतः।
चतुर्विंशत्सहस्राणि विस्तीर्णश्च चतुर्दिशम् ॥ १२ ॥
वृत्ताकृतिप्रमाणश्च चतुरस्रः समाहितः।
नानावर्णैः समः पार्श्वैः प्रजापतिगुणान्वितः ॥ १३ ॥
नाभीबन्धनसम्भूतो ब्रह्मणो व्यक्तजन्मनः।
पूर्वतः श्वेतवर्णस्तु ब्राह्मण्यं तस्य तेन वै ॥ १४ ॥
पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते।
भृङ्गिपत्रनिभश्चैव पश्चिमेन समन्वितः।
तेनास्य शूद्रता सिद्धा मेरोर्नामार्थकर्मतः ॥ १५ ॥
पार्श्वमुत्तरतस्तस्य रक्तवर्णं स्वभावतः।

तेनास्य चलभावः स्यादिति वर्णाः प्रकीर्तिताः ॥१६॥
नलस्य वैदूर्यमयः श्वेतः पीतो हिरण्मयः।
मयूरबर्हवर्णस्य शातकौम्भः स शृङ्गवान् ॥ १७ ॥
एते पर्वतराजानः सिद्धचारणसेविताः।
तेषामन्तरविष्कम्भो नवसाहस्रमुच्यते ॥ १८ ॥
मध्ये त्विलावृतं नाम महामेरोः समन्ततः।
चतुर्विंशत्सहस्राणि विस्तीर्णो योजनैः समः ॥ १९ ॥
मध्ये तस्य महामेरुर्विधूम इव पावकः।
वेद्यर्द्धं दक्षिणं मेरोरुत्तरार्द्धं तथोत्तरम् ॥ २० ॥
वर्षाणि यानि सप्तात्र तेषां वै वर्षपर्वताः।
द्वे द्वे सहस्रे विस्तीर्णा योजनैर्दक्षिणोत्तरम् ॥ २१ ॥
जम्बूद्वीपस्य विस्तारस्तेषामायाम उच्यते।
नीलश्च निषधश्चैव तेषां हीनाश्च ये परे ॥ २२ ॥
श्वेतश्च हेमकूटश्च हिमवान् शृङ्गवांश्च यः।
जम्बूद्वीपप्रमाणेन ऋषभः परिकीर्त्यते ॥ २३ ॥
तस्माद्द्वादशभागेन हेमकूटोऽपि हीयते।
हिमवान् विंशभागेन तस्मादेव प्रहीयते।
अष्टाशीतिसहस्राणि हेमकूटो महागिरिः ॥ २४ ॥
अशीतिर्हिमवांश्चैव आयतः पूर्वपश्चिमे।
द्वीपस्य मण्डलीभावाद्ध्रासवृद्धी प्रकीर्त्तिते ॥ २५ ॥
वर्षाणां पर्वतानाञ्च यथाभेदं तथोत्तरम्।
तेषां मध्ये जनपदास्तानि वर्षाणि सप्त वै ॥ २६ ॥
प्रपातविषमैस्तैस्तु पर्वतैरावृतानि तु।
सप्त तानि नदीभेदैरगम्यानि परस्परम् ॥ २७ ॥

वसन्ति तेषु सत्त्वानि नानाजातीनि सर्वशः ।
इमं हैमवतं वर्षं भारतं नाम विश्रुतम् ॥ २८ ॥
हेमकूटं परं तस्मान्नाम्ना किंपुरुषं स्मृतम् ।
हेमकूटाच्च निषधं हरिवर्षं तदुच्यते ॥ २९ ॥
हरिवर्षात्परञ्चापि मेरोस्तु तदिलावृतम् ।
इलावृतात् परं नीलं रम्यकं नाम विश्रुतम् ॥ ३० ॥
रम्यकादपरं श्वेतं विश्रुतं तद्धिरण्यकम् ।
हिरण्यकात्परञ्चैव शृङ्गशाकं कुरं स्मृतम् ॥ ३१ ॥
धनुःसंस्थे तु विज्ञेये द्वे वर्षे दक्षिणोत्तरे ।
दीर्घाणि तत्र चत्वारि मध्यमं तदिलावृतम् ॥ ३२ ॥
पूर्वतो निषधस्येदं वेद्यर्द्धं दक्षिणं स्मृतम् ।
परन्त्विलावृतं पश्चाद्वेद्यर्द्धन्तु तदुत्तरम् ॥ ३३ ॥
तयोर्मध्ये तु विज्ञेयो मेरुर्यत्र त्विलावृतम् ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥ ३४ ॥
उदगायतो महाशैलो माल्यवान् नाम पर्वतः ।
द्वात्रिंशता सहस्रेण प्रतीच्यां सागरानुगः ॥ ३५ ॥
माल्यवान् वै सहस्रैक आनील निषधायतः ।
द्वात्रिंशत्त्वेवमप्युक्तः पर्वतो गन्धमादनः ॥ ३६ ॥
परिमण्डलयोर्मध्ये मेरुः कनकपर्वतः ।
चातुर्वर्ण्यसमोवर्णैश्चतुरस्रः समुच्छ्रितः ॥ ३७ ॥
नानावर्णः सपार्श्वेषु पूर्वान्ते श्वेत उच्यते ।
पीतन्तु दक्षिणं तस्य भृङ्गिपत्रनिभम्परम् ।
उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः ॥ ३८ ॥

मेरुस्तु सुशुभे दिव्यो राजवत्स तु वेष्टितः।
आदित्यतरुणाभासो विधूम इव पावकः॥ ३९॥
योजनानां सहस्राणि चतुराशीति रुच्छ्रितः।
प्रविष्टः षोडशाधस्तादष्टाविंशतिविस्तृतः॥ ४०॥
विस्ताराद्द्विगुणश्चास्य परीणाहः समन्ततः।
स पर्वतो महादिव्यो दिव्यौषधिसमन्वितः॥ ४१॥
भुवनैरावृतः सर्वैर्जातरूपपरिष्कृतैः।
तत्र देवगणाश्चैव गन्धर्वासुरराक्षसाः।
शैलराजे प्रमोदन्ते सर्वतोऽप्सरसाङ्गणैः॥ ४२॥
स तु मेरुः परिवृतो भुवनैर्भूतभावनैः।
यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः॥ ४३॥
भद्राश्वं भारतञ्चैव केतुमालञ्च पश्चिमे।
उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः॥ ४४॥
विष्कम्भपर्वतास्तद्वन्मन्दरो गन्धमादनः।
विपुलश्च सुपार्श्वश्च सर्वरत्नविभूषितः॥ ४५॥
अरुणोदं मानसञ्च सितोदं भद्रसंज्ञितम्।
तेषामुपरि चत्वारि सरांसि च वनानि च॥ ४६॥
तथा भद्रकदम्बस्तु पर्वते गन्धमादने।
जम्बूवृक्षस्तथाश्वत्थो विपुलेऽथ वटः परम॥ ४७॥
गन्धमादनपार्श्वे तु पश्चिमेऽमरगण्डिकः।
द्वात्रिंशति सहस्राणि योजनैः सर्वतः समः॥ ४८॥
तत्र ते शुभकर्माणः केतुमालाः परिश्रुताः।
तत्र काला नराः सर्वे महासत्त्वा महाबलाः॥ ४९॥
स्त्रियश्चोत्पलवर्णाभाः सुन्दर्यः प्रियदर्शनाः।

तत्र दिव्यो महावृक्षः पनसः पत्रभासुरः ॥ ५० ॥
तस्य पीत्वा फलरसं संजीवन्ति समायुतम् ।
तस्य माल्यवतः पार्श्वे पूर्वे पूर्वा तु गण्डिका ।
द्वात्रिंशच्च सहस्राणि तत्रापि शतमुच्यते ॥ ५१ ॥
भद्रश्च तत्र विज्ञेयो नित्यं मुदितमानसः ।
भद्रमालवनं तत्र कालाम्रश्च महाद्रुमः ॥ ५२ ॥
तत्र ते पुरुषाः श्वेता महासत्त्वा महाबलाः ।
स्त्रियः कुमुदवर्णाभाः सुन्दर्यः प्रियदर्शनाः ॥ ५३ ॥
चन्द्रप्रभाश्चन्द्रवर्णाः पूर्णचन्द्रनिभाननाः ।
चन्द्रशीतलगात्राश्च स्त्रियोह्युत्पलगन्धिकाः ॥ ५४ ॥
दशवर्षसहस्राणि आयुस्तेषामनामयम् ।
कालाम्रस्य रसं पीत्वा ते सर्वे स्थिरयौवनाः ॥ ५५ ॥
सूत उवाच । इत्युक्तवान् ऋषीन् ब्रह्मा वर्षाणि च निसर्गतः
पूर्वं ममानुग्रहकृद् भुयः किं वर्णयामि वः ॥ ५६ ॥
एतच्छ्रुत्वा वचस्ते तु ऋषयः संशितव्रताः ।
जातकौतूहलाः सर्वेः प्रत्यूचुस्ते मुदान्विताः ॥ ५७ ॥
ऋषय ऊचुः । पूर्वापरौ समाख्यातौ यौ देशौ तौ त्वया मुने ! ।
उत्तराणाञ्च वर्षाणां पर्वतानाञ्च सर्वशः ॥ ५८ ॥
आख्याहि नो यथातथ्यं ये च पर्वतवासिनः ।
एवमुक्तस्तु ऋषिभिस्तेभ्यस्त्वाख्यातवान् पुनः ॥ ५९ ॥
सूत उवाच । शृणुध्वं यानि वर्षाणि पूर्वोक्तानि च वै मया ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥ ६० ॥
वर्षं रमणकं नाम जायन्ते यत्र वै प्रजाः ।
रतिप्रधाना विमला जायन्ते यत्र मानवाः ।

शुक्लाभिजनसम्पन्नाः सर्वे ते प्रियदर्शनाः ॥ ६१ ॥
तत्रापि च महावृक्षोन्यग्रोधो रोहिणो महान् ।
तस्यापि ते फलरसं पिबन्तो वर्तयन्ति हि ॥ ६२ ॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
जीवन्ति ते महाभागाः सदा हृष्टा नरोत्तमाः ॥६३॥
उत्तरेण तु श्वेतस्य पार्श्वे शृङ्गस्य दक्षिणे ।
वर्षं हिरण्वतं नाम यत्र हैरण्वती नदी ॥ ६४ ॥
महाबला महासत्वा नित्यं मुदितमानसाः ।
शुक्लाभिजनसम्पन्नाः सर्वे च प्रियदर्शनाः ॥ ६५ ॥
एकादशसहस्राणि वर्षाणां ते नरोत्तमाः ।
आयुः प्रमाणं जीवन्ति शतानि दशपञ्च च ॥ ६६ ॥
तस्मिन् वर्षे महावृक्षोलकुचः फलसंश्रयः ।
तस्य पीत्वा फलरसं तत्र जीवन्ति मानवाः ॥ ६७ ॥
शृङ्गसाह्वस्य शृङ्गाणि त्रीणि तानि महान्ति वै ।
एकं मणिमयं तत्र एकन्तु कनकान्वितम् ।
सर्वरत्नमयं चैकं भुवनैरुपशोभितम् ॥ ६८ ॥
उत्तरे चास्य शृङ्गस्य समुद्रान्ते च दक्षिणे ।
कुरवस्तत्र तद्वर्षं पुण्यं सिद्धनिषेवितम् ॥ ६९ ॥
तत्र वृक्षा मधु फलादिव्यामृतमयापगाः ।
वस्त्राणि ते प्रसूयन्ते फलेष्वाभरणानि च ॥ ७० ॥
सर्वकामप्रदातारः केचिद् वृक्षा मनोरमाः ।
अपरे क्षीरिणो नाम वृक्षास्तत्र मनोरमाः ।
ये क्षरन्ति सदा क्षीरं षड्रसञ्चामृतोपमम् ॥ ७१ ॥
सर्वा मणिमयी भूमिः सूक्ष्मा काञ्चनवालुका ।

सर्वत्र सुखसंस्पर्शा निःशब्दाः पवनाः शुभाः ॥ ७२ ॥
देवलोकच्युतास्तत्र जायन्ते मानवाः शुभाः ।
शुक्लाभिजनसम्पन्नाः सर्वे ते स्थिरयौवनाः ॥ ७३ ॥
मिथुनानि प्रजायन्ते स्त्रियश्चाप्सरसोपमाः ।
तेषान्ते क्षीरिणां क्षीरं पिबन्ति ह्यमृतोपमम् ॥ ७४ ॥
एकाह्नाज्जायते युग्मं समञ्चैव विवर्द्धते ।
समं रूपं च शीलञ्च समञ्चैव म्रियन्ति वै ॥ ७५ ॥
एकैक मनुरक्ताश्च चक्रवाकमिव ध्रुवम् ।
अनामया ह्यशोकाश्च नित्यं मुदितमानसाः ॥ ७६ ॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
जीवन्ति च महासत्वा न चान्या स्त्री प्रवर्त्तते ॥ ७७ ॥
सूत उवाच । एवमेव निसर्गो वै वर्षाणां भारते युगे ।
दृष्टः परमधर्मज्ञाः किम्भूयः कथयामि वः ॥ ७८ ॥
आख्यातास्त्वेव ऋषयः सूतपुत्रेण धीमता ।
उत्तरश्रवणे भूयः पप्रच्छुः सूतनन्दनम् ।॥ ७९ ॥

अथ त्रयोदशोत्तरशततमोऽध्यायः ।

ऋषय ऊचुः । यदिदं भारतं वर्षं यस्मिन् स्वायम्भुवादयः ।
चतुर्दशैव मनवः प्रजा सर्गं ससर्जिरे ॥ १ ॥
एतद्वेदितु मिच्छामः सकाशात्तव सुव्रत ! ।
उत्तरश्रवणं भूयः प्रब्रूहि वदतां वर ! ॥ २ ॥
एतच्छ्रुत्वा ऋषीणां तु प्राब्रवील्लोमहर्षणिः ।
पौराणिकस्तदा सूत ! ऋषीणां भावितात्मनाम् ॥ ३ ॥
बुद्ध्या विचार्य्य बहुधा विमृश्य च पुनः पुनः ।
तेभ्यस्तु कथयामास उत्तरश्रवणं तदा ॥ ४ ॥

सूत उवाच। अथाहं वर्णयिष्यामि वर्षेऽस्मिन् भारते प्रजाः
भरणाच्च प्रजानाञ्चैव मनुर्भरत उच्यते ॥ ५ ॥
निरुक्तवचनैश्चैव वर्षं तद्भारतं स्मृतम्।
यतः स्वर्गश्च मोक्षश्च मध्यमश्चापि हि स्मृतः ॥ ६ ॥
न खल्वन्यत्र मर्त्यानां भूमौ कर्मविधिः स्मृतः।
भारतस्यास्य वर्षस्य नवभेदान्निबोधत ॥ ७ ॥
इन्द्रद्वीपः कसेरुश्च ताम्रपर्णो गभस्तिमान्।
नागद्वीप तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥ ८ ॥
अयं तु नवमस्तेषां द्वीपः सागरसंवृतः।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ॥ ९ ॥
आयतस्तु कुमारीतो गङ्गायाः प्रवहावधिः।
तिर्य्यगूर्द्ध्वन्तु विस्तीर्णः सहस्राणि दशैव तु ॥ १० ॥
द्वीपो ह्युपनिविष्टोऽयं म्लेच्छैरन्तेषु सर्वशः।
यवनाश्च किराताश्च तस्यान्ते पूर्वपश्चिमे ॥ ११ ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः।
इज्यायुतवणिज्याद्यैर्वर्तयन्तो व्यवस्थिताः ॥ १२ ॥
तेषां संव्यवहारोऽयं वर्त्तनन्तु परस्परम्।
धर्मार्थकामसंयुक्तो वर्णानान्तु स्वकर्मसु ॥ १३ ॥
सङ्कल्पपञ्चमानान्तु आश्रमाणां यथाविधि।
इह स्वर्गापवर्गार्थं प्रवृत्तिरिह मानुषे ॥ १४ ॥
यस्त्वयं मानवो द्वीप स्तिर्य्यग्यामः प्रकीर्त्तितः।
य एनं जयते कृत्स्नं स सम्राडिति कीर्त्तितः ॥ १५ ॥
अयं लोकस्तु वै सम्राडन्तरिक्षजितां स्मृतः।
स्वराडसौ स्मृतो लोकः पुनर्वक्ष्यामि विस्तरात् ॥ १६ ॥

सप्त चास्मिन् महावर्षे विश्रुताः कुलपर्वताः।
महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षवानपि॥ १७॥
विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्वताः।
तेषां सहस्रशश्चान्ये पर्वतास्तु समीपतः॥ १८॥
अभिज्ञातास्ततश्चान्ये विपुलाश्चित्रसानवः।
अन्ये तेभ्यः परिज्ञाता ह्रस्वा ह्रस्वोपजीविनः॥ १९॥
तैर्विमिश्रा जानपदा आर्या म्लेच्छाश्च सर्वतः।
पिबन्ति बहुला नद्यो गङ्गा सिन्धुः सरस्वती॥ २०॥
शतद्रूश्चन्द्रभागा च यमुना शरयू तथा।
ऐरावती वितस्ता च विशाला देविका कुहूः॥ २१॥
गोमती धौतपापा च बाहुदा च दृषद्वती।
कौशिकी तु तृतीया च निश्चला गण्डकी तथा।
इक्षुर्लौहितमित्येता हिमवत्पार्श्वनिःसृताः॥ २२॥
वेदस्मृति र्वेत्रवती वृत्रघ्नीसिन्धुरेव च।
पर्णाशा नर्मदा चैव कावेरी महती तथा॥ २३॥
पारा च धन्वतीरूपा विदुषा वेणुमत्यपि।
शिप्रा ह्यवन्ती कुन्ती च पारियात्राश्रिताः स्मृताः॥ २४॥
मन्दाकिनी दशार्णा च चित्रकूटा तथैव च।
तमसा पिप्पली श्येनी तथा चित्रोत्पलापि च॥ २५॥
विमला चञ्चला चैव तथा च धूतवाहिनी।
शुक्तिमन्ती शुनी लज्जामुकुटा ह्रदिकापि च।
ऋक्षवन्त प्रसूतास्तानथामलजलाः शुभाः॥ २६॥
तापी पयोष्णी निर्विन्ध्या शिप्रा च ऋषभा नदी।
वेणा वैतरणी चैव विश्वमाला कुमुद्वती॥ २७॥

तोया चैव महागौरी दुर्गमा तु शिला तथा ।
विन्ध्यपादप्रसूतास्ताः सर्वाः शीतजलाः शुभाः ॥ २८ ॥
गोदावरी भीमरथी कृष्णवेणी च वञ्जुला ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥ २९ ॥
कृतमाला ताम्रपर्णी पुष्पजा ह्युत्पलावती ।
मलयप्रसूता नद्यः सर्वाः शीतजलाः शुभाः ॥३०॥
त्रिभागा ऋषिकुल्या च इक्षुदा त्रिदिवाचला ।
ताम्रपर्णी तथा मूली शरवा विमला तथा ।
महेन्द्रतनयाः सर्वाः प्रख्याताः शुभगामिनीः ३१ ॥
काशिका सुकुमारी च मन्दगा मन्दवाहिनी ।
कृपा च पाशिनी चैव शुक्तिमत्तात्मजास्तु ताः ॥ ३२ ॥
सर्वाः पुण्यजलाः पुण्याः सर्वगाश्च समुद्रगाः ।
विश्वस्य मातरः सर्वाः सर्वपापहराः शुभाः ॥ ३३ ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
तास्विमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः ॥३४॥
शूरसेना भद्रकारा वाह्याः सहपटच्चराः ।
मत्स्याः किराताः कुल्याश्च कुन्तलाः काशिकोशलाः ॥३५॥
आवन्ताश्च कलिङ्गाश्च मूकाश्चैवान्धकैः सह ।
मध्यदेशा जनपदाः प्रायशः परिकीर्त्तिताः ॥ ३६ ॥
सह्यस्यानन्तरे चैते तत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥ ३७ ॥
यत्र गोवर्धनो नाम मन्दरो गन्धमादनः ।
रामप्रियार्थं स्वर्गीया वृक्षा दिव्यास्तथौषधीः ॥ ३८ ॥

भरद्वाजेन मुनिना प्रियार्थमवतारिताः।
ततः पुष्पवरो देशस्तेन जज्ञे मनोरमः॥ ३९॥
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः।
पुरन्ध्राश्चैव शूद्राश्च पह्लवाश्चात्तखण्डिकाः॥ ४०॥
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः।
शका ह्रद्याः पुलिन्दाश्च पारदाहारमूर्त्तिकाः॥ ४१॥
रामठाःकण्टकाराश्च कैकेया दशनामकाः।
क्षत्रियोपनिवेश्याश्च वैश्याः शूद्रकुलानि च॥ ४२॥
अत्रयोऽथ भरद्वाजाः प्रस्थलाः सदसेरकाः।
लम्पकास्तलगानाश्च सैनिकाः सह जाङ्गलैः।
एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत॥४३॥
अङ्गा वङ्गा मद्गुरका अन्तर्गिरिबहिर्गिरी।
सुह्मोत्तराः प्रविजयाः मार्गवागेयमालवाः॥ ४४॥
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः।
शाल्वमागधगोनर्द्दा प्राच्या जनपदाः स्मृताः॥ ४५॥
तेषां परे जनपदा दक्षिणापथवासिनः।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च॥४६॥
सेतुकाः सूतिकाश्चैव कुपथा वाजिवासिकाः।
नवराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्वशः॥ ४७॥
कारूषाश्च सहैषीका आटव्याः शवरास्तथा।
पुलिन्दा विन्ध्यपुषिका वैदर्भा दण्डकैः सह॥४८॥
कुलीयाश्च सिरालाश्च रूपसास्तापसैः सह।
तथा तैत्तिरिकाश्चैव सर्वे कारस्करास्तथा॥ ४९॥
वासिकाश्चैव ये चान्ये ये चैवान्तरनर्मदाः।

भारुकच्छाः समाहेयाः सह सारस्वतैस्तथा ॥ ५० ॥
काच्छीकाश्चैव सौराष्ट्रा आनर्ता अर्बुदैः सह ।
इत्येते अपरांस्तांस्तु शृणु ये विन्ध्यवासिनः ॥ ५१ ॥
मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
औण्ड्रा माषादशार्णाश्च भोजाः किष्किन्धकैः सह॥५२॥
स्तोशलाः कोसलाश्चैव त्रैपुरा वैदिशास्तथा ।
तुमुरास्तुम्बराश्चैव पद्गमा नैषधैः सह ॥ ५३ ॥
अरूपाः शौण्डिकेराश्च वीतिहोत्रा अवन्तयः ।
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः ॥ ५४ ॥
अतो देशान् प्रवक्ष्यामि पर्वताश्रयिणश्च ये ।
निराहाराः सर्वगाश्च कुपथा अपथास्तथा ॥ ५५ ॥
कुथप्रावरणाश्चैव ऊर्णादर्वाः समुद्गकाः ।
त्रिगर्ता मण्डलाश्चैव किराताश्चामरैः सह ॥ ५६ ॥
चत्वारि भारते वर्षे युगानि मुनयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
तेषां निसर्गं वक्ष्यामि उपरिष्टाच्च कृत्स्नशः ॥५७ ॥
मत्स्य उवाच । एतच्छ्रुत्वा तु ऋषय उत्तरं पुनरेव ते ।
शुश्रूषवस्तमूचुस्तेप्रकामं लोमहर्षणिम् ॥ ५८ ॥
ऋषय ऊचुः । यश्च किंपुरुषं वर्षं हरिवर्षं तथैव च ।
आचक्ष्व नो यथातत्त्वं कीर्तितं भारतं त्वया ॥ ५९॥
जम्बूखण्डस्य विस्तारं तथान्येषां विदाम्वर ! ।
द्वीपानां वासिनां तेषां वृक्षाणां प्रब्रवीहि नः ॥ ६० ॥
पृष्टस्त्वेवं तदा विप्रैर्यथाप्रश्नं विशेषतः ।
उवाच ऋषिभिर्दृष्टं पुराणाभिमतं यथा ॥ ६१ ॥

सूत उवाच। शुश्रूषवस्तु यद्विप्राः शुश्रूषध्वमतन्द्रिताः।
जम्बूवर्षः किंपुरुषः सुमहान्नन्दनोपमः॥ ६२॥
दशवर्षसहस्राणि स्थितिः किम्पुरुषे स्मृता।
जायन्ते मानवास्तत्र सुतप्तकनकप्रभाः॥ ६३॥
वर्षे किम्पुरुषे पुण्ये प्लक्षो मधुवहः स्मृतः।
तस्य किम्पुरुषाः सर्वे पिबन्तो रसमुत्तमम्॥ ६४॥
अनामया ह्यशोकाश्च नित्यं मुदितमानसाः।
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसः स्मृताः॥ ६५॥
ततः परं किम्पुरुषात् हरिवर्षं प्रचक्षते।
महारजतसङ्काशा जायन्ते यत्र मानवाः॥ ६६॥
देवलोकच्युताः सर्वे बहुरूपाश्च सर्वशः।
हरिवर्षे नराः सर्वे पिबन्तीक्षुरसं शुभम्॥ ६७॥
न जरा बाधते तत्र तेन जीवन्ति ते चिरम्।
एकादशसहस्राणि तेषामायुः प्रकीर्तितम्॥ ६८॥
मध्यमं तन्मया प्रोक्तं नाम्ना वर्षमिलावृतम्।
न तत्र सूर्यस्तपति न च जीर्यन्ति मानवाः॥ ६९॥
चन्द्रसूर्य्यौ सनक्षत्रावप्रकाशाविलावृते।
पद्मप्रभाः पद्मवर्णाः पद्मपत्रनिभेक्षणाः॥ ७०॥
पद्मगन्धाश्च जायन्ते तत्र सर्वे च मानवाः।
जम्बूफलरसाहाराः अनिष्पन्दाः सुगन्धिनः॥ ७१॥
देवलोकच्युताः सर्वे महारजतवाससः।
त्रयोदशसहस्राणि वर्षाणान्ते नरोत्तमाः॥ ७२॥
आयुः प्रमाणं जीवन्ति ये तु वर्षे इलावृते।
मेरोस्तु दक्षिणे पार्श्वे निषधस्योत्तरेण वा ७३॥

सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
नित्यपुष्पफलोपेतः सिद्धचारणसेवितः ॥ ७४ ॥
तस्य नाम्ना समाख्यातो जम्बूद्वीपो वनस्पतेः ।
योजनानां सहस्रञ्च शतधाच महान् पुनः ॥ ७५ ॥
उत्सेधो वृक्षराजस्य दिवमावृत्य तिष्ठति ।
तस्य जम्बूफलरसो नदी भूत्वा प्रसर्पति ॥ ७६ ॥
मेरुं प्रदक्षिणं कृत्वा जम्बूमूलगता पुनः ।
तं पिबन्ति सदा हृष्टा जम्बूरसमिलावृते ॥ ७७ ॥
जम्बूफलरसं पीत्वा न जरा बाधतेऽपि तान् ।
न क्षुधा न क्लमो वापि न दुःखञ्च तथाविधम् ॥७८॥
तत्र जाम्बूनदं नाम कनकं देवभूषणम्
इन्द्रगोपकसङ्काशं जायते भास्वरञ्च यत् ॥ ७९ ॥
सर्वेषां वर्षवृक्षाणां शुभः फलरसस्तु सः ।
स्कन्नन्तु काचनं शुभ्रं जायते देवभूषणम् ॥ ८० ॥
तेषां मूत्रं पुरीषं वा दिक्ष्वष्टासु च सर्वशः ।
ईश्वरानुग्रहाद्भूमिर्मृतांश्च ग्रसते तु तान् ॥ ८१ ॥
रक्षः पिशाचा यक्षाश्च सर्वे हैमवतास्तु ते ।
हेमकूटे तु विज्ञेया गन्धर्व्वाः साप्सरोगणाः ॥ ८२ ॥
सर्वे नागा निषेवन्ते शेष वासुकितक्षकाः ।
महामेरौ त्रयस्त्रिंशत् क्रीडन्ते यज्ञियाः शुभाः ॥८३॥
नीलवैदूर्य्ययुक्ते ऽस्मिन् सिद्धाब्रह्मर्षयोवसन् ।
दैत्यानां दानवानाञ्च श्वेतः पर्वत उच्यते ॥ ८४ ॥
शृङ्गवान् पर्वतश्रेष्ठः पितॄणां प्रतिसञ्चरः ।
इत्येतानि मयोक्तानि नववर्षाणि भारत ॥ ८५ ॥

भूतैरपि निविष्टानि गतिमन्ति ध्रुवाणि च।
तेषां वृद्धिर्बहुविधा दृश्यते देवमानुषैः।
अशक्या परिसंख्यातुं श्रेया च बुभूषता॥ ८६॥

---

अथ चतुर्दशोत्तरशततमोऽध्यायः।

मनुरुवाच। चरितं बुधपुत्रस्य जनार्दन! मया श्रुतम्।
श्रुतः श्राद्धविधिः पुण्यः सर्वपापप्रणाशनः॥ १॥
धेन्वाः प्रसूतमानायाः फलं दानस्य मे श्रुतम्।
कृष्णाजिनप्रदानञ्च वृषोत्सर्गस्तथैव च॥ २॥
श्रुत्वा रूपं नरेन्द्रस्य बुधपुत्रस्य केशव!।
कौतूहलं समुत्पन्नं तन्ममाचक्ष्व पृच्छतः॥ ३॥
केन कर्म्मविपाकेन स तु राजा पुरूरवाः।
अवाप तादृशं रूपं सौभाग्यमपि चोत्तमम्॥ ४॥
देवांस्त्रिभुवनश्रेष्ठान् गन्धर्वांश्च मनोरमान्।
उर्वशी सङ्गता त्यक्त्वा सर्वभावेन तं नृपम्॥ ५॥

मत्स्य उवाच। शृणु कर्म्मविपाकेन येन राजा पुरूरवाः।
अवाप तादृशं रूपं सौभाग्यमपि चोत्तमम्॥ ६॥
अतीते जन्मनि पुरा योऽयं राजा पुरूरवाः।
पुरूरवा इति ख्यातो मद्रदेशाधिपो हि सः॥ ७॥
चाक्षुषस्यान्वये राजा चाक्षुषस्यान्तरे मनोः।
स वै नृपगुणैर्युक्तः केवलं रूपवर्जितः॥ ८॥

ऋषय ऊचुः। पुरूरवा मद्रपतिः कर्म्मणा केन पार्थिवः।
बभूव कर्म्मणा केन रूपवांश्चैव सूतज!॥ ९॥

सूत उवाच। द्विजग्रामे द्विजश्रेष्ठो नाम्ना चासीत् पुरूरवाः
नद्याः कूले महाराजः पूर्वजन्मनि पार्थिवः ॥ १० ॥
स तु मद्रपती राजा यस्तु नाम्ना पुरूरवाः।
तस्मिन् जन्मन्यसौ विप्रो द्वादश्यान्तु सदनघ ! ॥११॥
उपोष्य पूजयामास राज्यकामो जनार्दनम्।
चकार सोपवासश्च स्नानमभ्यङ्गपूर्वकम् ॥ १२ ॥
उपवास फलात्प्राप्तं राज्यं मद्रेष्वकण्टकम्।
उपोषितस्तथाभ्यङ्गाद्रूपहीनो ह्यजायत ॥ १३ ॥
उपोषितैर्नरैस्तस्मात् स्नानमभ्यङ्गपूर्वकम्।
वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप ! ॥ १४॥
एतद्वः कथितं सर्वं यद्वृत्तं पूर्वजन्मनि।
मद्रेश्वरत्वचरितं शृणु तस्य महीपतेः ॥ १५ ॥
तस्य राजगुणैः सर्वैः समुपेतस्य भूपतेः।
जनानुरागो नैवासीद्रूपहीनस्य तस्य वै ॥ १६ ॥
रूपकामः स मद्रेशस्तपसे कृतनिश्चयः।
राज्यं मन्त्रिगतं कृत्वा जगाम हिमपर्वतम् ॥ १७ ॥
व्यवसाय द्वितीयस्तु पद्भ्यामेव महायशाः।
द्रष्टुं स तीर्थसदनं विषयान्ते स्वके नदीम्।
ऐरावतीति विख्याताम्ददर्शातिमनोरमाम् ॥ १८ ॥
तुहिनगिरिमहौघवेगान्तुहिनगभस्तिसमानशीतलोदाम्।
तुहिनसदृशहैमवर्णपुष्पान्तुहिनयशाः सरितन्ददर्श राजा ॥१९॥

---

अथ पञ्चदशोत्तरशततमोऽध्यायः।

सूत उवाच। स ददर्श नदीं पुण्यां दिव्यां हैमवतीं शुभाम्।

गन्धर्वैश्च समाकीर्णां नित्यं यक्षैश्च सेविताम् ॥ १ ॥
सुरेभमदसंसिक्तां समन्तात्तु विराजिताम् ।
मध्येन यक्षचापाभां तस्मिन्नहनि सर्वदा ॥ २ ॥
तपस्विमरणोपेतां महाब्राह्मणसेविताम् ।
ददर्श तपनीयाभां महाराजः पुरूरवाः ॥ ३ ॥
सितहंसावलिच्छन्नाङ्गागचामरराजिताम् ।
साभिषिक्तामिव सतां पश्यन् प्रीतिं परां ययौ ॥४ ॥
पुण्यां सुशीतलां हृद्यां मनसः प्रीतिवर्द्धिनीम् ।
क्षयवृद्धियुतां रम्यां सोमभूर्तिमिवापराम् ॥ ५ ॥
सुशीतशीघ्रपानीयां द्विजसङ्घनिषेविताम् ।
सुतां हिमवतः श्रेष्ठां चञ्चद्वीचिविराजिताम् ॥ ६ ॥
अमृतस्वादुसलिलां तापसैरुपशोभिताम् ।
स्वर्गारोहणनिःश्रेणीं सर्वकल्मषनाशिनीम् ॥ ७ ॥
अग्र्यां समुद्रमहिषीं महर्षिगणसेविताम् ।
सर्वलोकस्य चौत्सुक्यकारिणीं सुमनोहराम् ॥ ८ ॥
हितां सर्वस्य लोकस्य नाकमार्गप्रदायिकाम् ।
गोकुलाकुलतीरान्तां रम्यां शैवालवर्जिताम् ॥ ९ ॥
हंससारससङ्घुष्टां जलजैरुपशोभिताम् ।
आवर्तनाभिगम्भीरां द्वीपोरुजघनस्थलीम् ॥ १० ॥
नीलनीरजनेत्राभां उत्फुल्लकमलाननाम् ।
हिमाभफेनवसनाञ्चक्रवाकाधरां शुभाम् ।
बलाकापङ्क्तिदशनाञ्चलन्मत्स्यावलिभ्रुवम् ॥ ११ ॥
स्वजलोद्भूतमातङ्गरम्यकुम्भपयोधराम् ।
हंसनूपुरसङ्घुष्टां मृणालवलयावलीम् ॥ १२ ॥

तस्यां रूपमहोत्सत्ता गन्धर्वानुगताः सदा।
मध्याह्नसमये राजन्! क्रीडन्त्यप्सरसाङ्गणाः ॥१३॥
तामप्सरोविनिर्मुक्तां वहन्तीं कुङ्कुमं शुभम्।
स्वतीरद्रुमसम्भूतनानावर्णसुगन्धिनीम् ॥ १४ ॥
नरञ्जव्रातसंक्रान्तसूर्य्यमण्डलदुर्द्दर्शम्।
सुरेभजनिताघातविकूलद्वयभूषिताम् ॥ १५ ॥
शक्रेभगण्डसलिलैर्देवलोकाकुलचन्दनैः।
संयुतं सलिलं तस्याः षट्पदैरुपसेव्यते ॥ १६ ॥
तस्यास्तीरभवा वृक्षाः सुगन्धकुसुमान्विताः।
तथापकृष्टसम्भ्रान्तभ्रमरस्तनिताकुलाः ॥ १७ ॥
यस्यास्तीरे रतिं यान्ति सदा कामवशा मृगाः।
तपोधनाश्च ऋषयस्तथा देवाः सहाप्सराः ॥ १८ ॥
लभन्ते यत्र पूताङ्गा देवेभ्यः प्रतिमानिताः।
स्त्रियश्च नाकबहुलाः पद्मेन्दुप्रतिमाननाः ॥ १९ ॥
या बिभर्ति सदा तोयं देवसंघैरपीडितम्।
पुलिन्दैर्नृपसङ्घैश्च व्याघ्रवृन्दैरपीडितम् ॥ २० ॥
सतामरसपानीयां सतारगगनामलाम्।
सतां पश्यन् ययौ राजा सतामीप्सितकामदाम् ॥२१॥
यस्यास्तीरवृहैः कार्यैः पूर्णचन्द्रांशुसन्निभैः।
राजते विविधाकारै रम्यं तीरं महाद्रुमैः।
या सदा विविधैर्विप्रैर्देवैश्चापि निषेव्यते ॥ २२ ॥
या च सदा सकलौघविनाशं भक्तजनस्य करोत्यचिरेण।
यानुगता सरितां हि कदम्बैर्यानुगता सततं हि मुनीन्द्रैः२३
या हि सुतानिव पाति मनुष्यान् या च युता सततं हिमसंघैः।

या च युता सततं सुरवृन्दैर्या च जनैः स्वहिताय श्रिता वै॥२४॥
युक्ता च केसरिगणैः करिवृन्दजुष्टा
सन्तानयुक्तसलिलापि सुवर्णयुक्ता ।
सूर्य्यांशुतापपरिवृद्धिविवृद्धशीता
शीतांशुतुल्ययशसा ददृशे नृपेण ॥ २५ ॥

---

## अथ षोड़शोत्तरशततमोऽध्यायः ।

सूत उवाच । आलोकयन्नदीं पुण्यान्तत्समीरहृतश्रमः ।
स गच्छन्नेव ददृशे हिमवन्तं महागिरिम् ॥ १ ॥
खमुल्लिखद्भिर्बहुभिर्वृतं शृङ्गैस्तु पाण्डुरैः ।
पक्षिणामपि सञ्चारैर्विना सिद्धगतिं शुभम् ॥ २ ॥
नदीप्रवाहसञ्जातमहाशब्दैः समन्ततः ।
असंश्रुतान्यशब्दन्तं शीततोयं मनोरमम् ॥ ३ ॥
देवदारुवनैर्नीलैः कृतार्धावसनं शुभम् ।
मेघोत्तरीयकं शैलं ददृशे स नराधिपः ॥ ४ ॥
श्वेतमेघकृतोष्णीषं चन्द्रार्कमुकुटं क्वचित् ।
हिमानुलिप्तसर्वाङ्गं क्वचिद्धातुविमिश्रितम् ॥ ५ ॥
चन्दनेनानुलिप्ताङ्गं दत्तपञ्चाङ्गुलं यथा ।
शीतप्रदं निदाघेऽपि शिलाविकटसङ्कटम् ।
सालक्तकैरप्सरसां मुद्रितं चरणैः क्वचित् ॥ ६ ॥
क्वचित् संसृष्टसूर्य्यांशुं क्वचिच्च तमसावृतम् ।
दरीमुखैः क्वचिद्भीमैः पिबन्तं सलिलं महत् ॥ ७ ॥
क्वचिद्विद्याधरगणैः क्रीड़द्भिरुपशोभितम् ।
उपगीतं तथा मुख्यैः किन्नराणाङ्गणैः क्वचित् ॥ ८ ॥

आपानभूमौ गलितैर्गन्धर्वाप्सरसां क्वचित्।
पुष्पैः सन्तानकादीनां दिव्यैस्तमुपशोभितम् ॥ ९ ॥
सुप्तोत्थिताभिः शय्याभिः कुसुमानां तथा क्वचित्।
मृदिताभिः समाकीर्णं गन्धर्वाणां मनोरमम् ॥ १० ॥
निरुद्धपवनैर्देशैर्नीलशाद्वलमण्डितैः।
क्वचिच्च कुसुमैर्युक्तमत्यन्तरुचिरं शुभम् ॥ ११ ॥
तपस्विशरणं शैलं कामिनामतिदुर्लभम्।
मृगैर्यथानुचरितन्दन्तिभिन्नमहाद्रुमम् ॥ १२ ॥
यत्र सिंहनिनादेन त्रस्तानां भैरवं रवम्।
दृश्यते न च संशान्तं गजानामाकुलं कुलम् ॥ १३ ॥
तटाश्च तापसैर्यत्र कुञ्जदेशैरलङ्कृताः।
रत्नैर्यस्य समुत्पन्नैस्त्रैलोक्यं समलङ्कृतम् ॥ १४ ॥
महीनशरणं नित्यमहीनजनसेवितम्।
अहीनः पश्यति गिरिं महीनं रत्नसम्पदा ॥ १५ ॥
अल्पेन तपसा यत्र सिद्धिं प्राप्स्यन्ति तापसाः।
यस्य दर्शनमात्रेण सर्वकल्मषनाशनम् ॥ १६ ॥
महाप्रपातसम्पातप्रपातादिगताम्बुभिः।
वायुनीतैः सदा क्लिन्नतदेशं क्वचित् क्वचित् ॥ १७ ॥
समालब्धजलैः शृङ्गैः क्वचिच्चापि समुच्छ्रितैः।
नित्यार्कतापविषमैरगम्यैर्मनसा युतम् ॥ १८ ॥
देवदारुमहावृक्षव्रजशाखानिरन्तरैः।
वंशस्तम्बवनाकारैः प्रदेशैरुपशोभितम् ॥ १९ ॥
हिमच्छन्नमहाशृङ्गं प्रपातशतनिर्झरम्।
शब्दलभ्याम्बुविषमं हिमसंरुद्धकन्दरम् ॥ २० ॥

दृष्ट्वैव तं चारुनितम्बभूमिं महानुभावः स तु मद्रनाथः।
बभ्राम तत्रैव मुदा समेतस्थानं तदा किञ्चिदथाससाद ॥२१

---

अथ सप्तदशोत्तरशततमोऽध्यायः।

तस्यैव पर्वतेन्द्रस्य प्रदेशं सुमनोरमम्।
अगम्यं मानुषैरन्यैर्दैवयोगादुपागतः ॥ १ ॥
ऐरावती सरिच्छ्रेष्ठा यस्माद्देशाद्विनिर्गता।
मेघश्यामश्च तं देशन्द्रुमखण्डैरनेकशः ॥ २ ॥
शालैस्तालैस्तमालैश्च कर्णिकारैः सशामलैः।
न्यग्रोधैश्च तथाश्वत्थैः शिरीषैः शिंशपाद्रुमैः ॥ ३ ॥
महानिम्बैस्तथा निम्बैर्निर्गुण्डीभिर्हरिद्रुमैः।
देवदारुमहावृक्षैस्तथा कालेयकद्रुमैः ॥ ४ ॥
पद्मकैश्चन्दनैर्बिल्वैः कपित्थैः रक्तचन्दनैः।
बाताम्ररिष्टकाक्षोटैरङ्कोटैश्च तथार्जुनैः ॥ ५॥
हरिकर्णैः सुमनसैः कोविदारैः सुपुष्पितैः।
प्राचीनामलकैश्चापि धनकैः समराटकैः ॥ ६ ॥
खर्जूरैर्नारिकेलैश्च प्रियालाम्रातकेङ्गुदैः।
तन्तुमालैर्धवैर्भव्यैः काश्मीरीपर्णिभिस्तथा ॥ ७ ॥
जातीफलैः पूगफलैः कट्फलैलावलीफलैः।
मन्दारैः कोविदारैश्च किंशुकैः कुसुमांशुकैः ॥ ८ ।
यवासैः शमिपर्णासैर्वेतसैरम्बुवेतसैः।
रक्तातिरक्तनारङ्गैर्हिङ्गुभिः सप्रियङ्गुभिः ॥ ९ ॥
रक्ताशोकैस्तथाशोकैराकल्लैरविचारकैः।
सुचकुन्दैस्तथा कुन्दैराटरूषपरूषकैः ॥ १० ॥

किरातैः किङ्किरातैश्च केतकैः श्वेतकेतकैः ।
सौभाञ्जनैरञ्जनैश्च सुकलिङ्गनिकोटकैः ॥ ११ ॥
सुवर्णचारुत्रसनैर्द्रुमश्रेष्ठैस्तथासनैः ।
मन्मथस्य शराकारैः सहकारैर्मनोरमैः ॥ १२ ॥
पीतयूथिकया चैव श्वेतयूथिकया तथा ।
जात्या चम्पकजात्या च तुम्बरैश्चाप्यतुम्बरैः ॥ १३ ॥
मोचैर्लोचैश्च लकुचैस्तिलपुष्पकुशेशयैः ।
तथा सुपुष्पावरणैः चव्यकैः कामिवल्लभैः ॥ १४ ॥
पुष्पाङ्कुरैश्च वकुलैः पारिभद्रैश्च रिद्रकैः ।
धाराकदम्बैः कुटजैः कदम्बैर्गिरिकूटजैः ॥ १५ ॥
आदित्यमुस्तकैः कुम्भैः कुङ्कुमैः कामवल्लभैः ।
कट्फलैर्वदरैर्नीपैर्दीपैरिव महोज्ज्वलैः ॥ १६ ॥
रक्तैः पालीवनैः श्वेतैर्दाड़िमैश्चम्पकद्रुमैः ।
बन्धूकैश्च सुबन्धूकैः कुब्जकानान्तु जातिभिः ॥१७॥
कुसुमैः पाटलाभिश्च मल्लिकाकरवीरकैः ।
कुरवकैर्हिमवरैर्जम्बुभिर्नृपजम्बुभिः ॥ १८ ॥
वीजपूरैः सकर्पूरैर्गुरुभिश्चागरुद्रुमैः ।
विम्बैश्च प्रतिविम्बैश्च सन्तानकवितानकैः ॥ १९ ॥
तथा गुग्गुलवृक्षैश्च हिन्तालधवलेक्षुभिः ।
तृणशून्यैः करवीरैरशोकैश्चक्रमर्दनैः ॥ २० ॥
पीलुभिर्धातकीभिश्च चिरिविल्वैः समाकुलैः ।
तिन्तिडीकैस्तथा लोध्रैर्विलङ्गैः चोरिकाद्रुमैः ॥२१॥
अश्मन्तकैस्तथा कालैर्जम्बीरैः श्वेतकद्रुमैः ।
भल्लातकैरिन्द्रयवैर्वलगुजैः सिद्धिसाधकैः ॥ २२ ॥

करमर्दैः कासमर्दैररिष्टकवरिष्टकैः।
रुद्राक्षैर्द्राक्षसम्भूतैः सप्ताह्वैः पुत्रजीवकैः ॥ २३ ॥
काकोलैर्लवङ्गैश्च त्वग्द्रुमैः पारिजातकैः।
प्रतानैः पिप्पलीनाञ्च नागवल्ल्या स्वाभागशः ॥ २४ ॥
मरीचस्य तथा गुल्मैर्नवमल्लिकया तथा।
मृद्वीकामण्डपैर्मुख्यैरतिमुक्तकमण्डपैः ॥ २५ ॥
त्रपुसैर्नर्तिकानाञ्च प्रतानैः सफलैः शुभैः।
कूष्माण्डानां प्रतानैश्च अलाबूनां तथा क्वचित् ॥ २६॥
चिर्भिटस्य प्रतानैश्च पटोलीकारवल्लिकैः।
कर्कोटकीवितानैश्च वार्ताकैर्बृहतीफलैः ॥ २७ ॥
कण्टकैर्मूलकैर्मूलशाकैस्तु विविधैस्तथा।
कह्लारैश्च विदार्या च वरूटैः स्वादुकण्टकैः ॥ २८ ॥
सभण्डीरविदूसारराजजम्बूकवालुकैः।
सुवर्चलाभिः सर्वाभिः सर्षपाभिस्तथैव च ॥ २९ ॥
काकोलीक्षीरकाकोलीच्छत्रया चातिच्छत्रया।
कासमर्दीसहायैश्च मकन्दलसकाण्डकैः ॥ ३० ॥
तथा चीरकशाकेन कालशाकेन चाप्यथ।
शिम्बिधान्यैस्तथा धान्यैः सर्वैर्निरवशेषितः ॥ ३१ ॥
औषधीभिर्विचित्राभिर्दीप्यमानाभिरेव च।
आयुष्याभिर्यशस्याभिर्बल्याभिश्च नराधिप! ॥ ३२ ॥
जरामृत्युभयघ्नीभिः क्षुद्भयघ्नीभिरेव च।
सौभाग्यजननीभिश्च कल्याभिश्चाप्यनेकशः ॥ ३३ ॥
तत्र वेणुलताभिश्च तथा कीचकवेणुभिः।
काशैः शराह्वकाशैश्च शरगुल्मैस्तथैव च ॥ ३४ ॥

कुम्भगुल्मैस्तथा रम्यैर्गुल्मैश्चैव मनोरमैः ।
कर्पासजातिवर्गैश्च दुर्लभेन शुभेन च ॥ ३५ ॥
तथा च कदलीखण्डैर्मनोहारिभिरुत्तमैः ।
तथा मरकतप्रख्यैः प्रदेशैः शाद्वलान्वितैः ॥ ३६ ॥
इरापुष्पसमायुक्तैः कुङ्कुमस्य च भागशः ।
तगरातिविषामांसीग्रन्थिकैश्च सुरागदैः ॥ ३७ ॥
सुवर्णपुष्पैश्च तथा भूमिपुष्पैस्तथापरैः ।
जम्बीरकैर्भूस्तृणकैः सरसैः सर्पकैस्तथा ॥ ३८ ॥
शृङ्गवेराजमोदाभिः कुवेरकप्रियालकैः ।
जलजैश्च तथा वर्णैर्नानावर्णैः सुगन्धिभिः ॥ ३९ ॥
उदयादित्यसङ्काशैः सूर्य्यचन्द्रनिभैस्तथा ।
तपनीयसवर्णैश्च अतसीपुष्पसन्निभैः ॥ ४० ॥
शुकपत्रनिभैश्चान्यैः स्थलपत्रैश्च भागशः ।
पञ्चवर्णैः समाकीर्णैर्बहुवर्णैस्तथैव च ॥ ४१ ॥
दृष्टं दृष्ट्वा स्थितमुदैः कुमुदैश्चन्द्रसन्निभैः ।
तथा वह्निशिखाकारैर्गजवक्त्रोत्पलैः शुभैः ॥ ४२ ॥
नीलोत्पलैः सकर्पूरैर्गुल्फातककसेरुकैः ।
शृङ्गाटकमृणालैश्च करटै राजतोत्पलैः ॥ ४३ ॥
जलजैः स्थलजैर्मूलैः फलैः पुष्पैर्विशेषतः ।
विविधैश्चैव नीवारैर्मुनिभोज्यैर्नराधिप ! ॥ ४४ ॥
न तत् धान्यं न तत् शस्यं न तच्छाकं न तत् फलम् ।
न तन्मूलं न तत् कन्दं न तत् पुष्पं नराधिप ! ॥४५ ॥
नागलोकोद्भवं दिव्यं नरलोकभवञ्च यत् ।
अनूपोत्थं वनोत्थञ्च तत्र यन्नास्ति पार्थिव ! ॥ ४६ ॥

सदा पुष्पफलं सर्वमजय्यं ऋतुयोगतः।
महेश्वरः स ददृशे तपसा ह्यतियोगतः॥ ४७॥
ददृशे च तथा तत्र नानारूपान् पतत्रिणः।
मयूरान् शतपत्रांश्च कलविङ्कांश्च कोकिलान्॥ ४८॥
तदा कादम्बकान् हंसान् कोयष्टीन् खञ्जरीटकान्।
कुररान् कालकूटांश्च खट्वाङ्गान् लुब्धकांस्तथा॥४९॥
गोक्ष्वेडकान् तथा कुम्भान् धार्तराष्ट्रान् शुकान् बकान्।
दात्यूहांश्चक्रवाकांश्च कटुकान् टिट्टिभान् भटान्॥५०॥
पुत्रप्रियान् लोहपृष्ठान् गोचर्मगिरिवर्तकान्।
पारावतांश्च कमलान् सारिकाजीवजीवकान्॥५१॥
लाववर्तकवार्ताकान् रक्तावर्त्मप्रभद्रकान्।
ताम्रचूडान् स्वर्णचूडान् कुक्कुटान् काष्ठकुक्कुटान्॥ ५२॥
कपिञ्जलान् कलविङ्कान् तथा कुङ्कुमचूडकान्।
भृङ्गराजान् चीरपादान् भुलिङ्गान् डिण्डिमान् नवान्॥५३॥
मञ्जुलीतकदात्यूहान् भारद्वाजांस्तथा चषान्।
एतांश्चान्यांश्च सुबहून् पक्षिसङ्घान् मनोहरान्।
श्वापदान् विविधाकारान् मृगांश्चैव महामृगान्।
व्याघ्रान् केसरिणः सिंहान् द्वीपिनः शरभान् वृकान्॥५५॥
ऋक्षांस्तरक्षूंश्च बहून् गोलाङ्गूलान् सवानरान्।
शशलोमान् सकादम्बान् मार्जारान् वायुवेगिनः॥ ५६॥
तथा मत्तांश्च मातङ्गान् महिषान् गवयान् वृषान्।
चमरान् सृमरांश्चैव तथा गौरखरानपि॥ ५७॥
उरभ्रांश्च तथा मेषान् सारङ्गानथ कूकुरान्।
नीलांश्चैव महानीलान् करालान् मृगमातृकान्॥५८

सदंष्ट्रा रामसरभान् कोशाकारश्च शम्बरान् ।
करालान् शतमालांश्च काल पुच्छांश्च तोरणान् ॥५८॥
दंष्ट्रान् खड्गान् वराहांश्चतुरङ्गान् खरगर्दभान् ।
एतानदिष्टान् मद्रेशोविरुद्धांश्च परस्परम् ॥ ६० ॥
अविरुद्धान् वने दृष्ट्वा विस्मयं परमं ययौ ।
तथाश्रम पदं पुण्यं बभूवालेः पुरा नृप ! ।
तत्प्रसादात् प्रभायुक्तं स्थावरैर्जङ्गमैस्तथा ।
हिंसन्ति हि न चान्योन्यं हिंसकास्तु परस्परम् ॥६१॥
क्रव्यादाः प्राणिनस्तत्र सर्वेक्षीरफलाशनाः ।
निर्मितास्तत्र चात्यर्थमत्रिणा सुमहात्मना ॥ ६३ ॥
शैलान् नितम्बदेशेषु व्यवसच्च स्वयं नृपः ।
पयः स्रवन्ति ते दिव्य ममृतस्वादुकण्टकाम् ॥ ६४ ॥
क्वचिद्राजन् ! मन्दिषयश्च क्वचिद्राजाश्च सर्वशः ।
शिलाः क्षीरेणसंपूर्णादध्ना चान्यत्र वा बहिः ॥६५॥
सम्पश्यन् परमां प्रीति मवाप वसुधाधिपः ।
सरांसि तत्र दिव्यानि नद्यश्च विमलोदकाः ॥ ६६ ॥
प्रवालिकानि चोष्णानि शीतलानि च भागशः ।
कन्दराणि च शैलस्य सुसेव्यानि पदे पदे ॥ ६७ ॥
हिमपातो न तत्रास्ति समन्तात् पञ्च योजनम् ।
उपत्यका सुशैलस्य शिखरस्य न विद्यते ॥ ६८ ॥
तत्रास्ति राजन् ! शिखरं पर्वतेन्द्रस्य पाण्डुरम् ।
हिमपातघनायत कुर्वन्ति सहिताः सदा ॥ ६९ ॥
तत्रास्ति चापरं शृङ्गं यत्र तोय घनाघनाः ।
नित्यमेवाभिवर्षन्ति शिलाभिः शिखरं वरम् ॥ ७० ॥

तदाश्रमं मनोहारि यत्र कामधरा धरा।
सुरमुख्योपयोगित्वात् शाखिनां सफलाः फलाः ॥७१॥
सदोपगीतभ्रमरं सुरस्त्रीसेवितं परम्।
सर्व्वपापक्षयकरं शैलस्येव प्रहारकम् ॥ ७२ ॥
वानरैः क्रीडमानैश्च देशाद् शान्नराधिप!।
हिमपुञ्जाः कृतास्तत्र चन्द्रबिम्बसमप्रभाः ॥ ७३ ॥
तदाश्रमं समन्ताच्च हिमसंरुद्धकन्दरैः।
शैलवाटैः परिवृतमगम्यमनुजैः सदा ॥ ७४ ॥
पूर्व्वाराधितभावोऽसौ महाराजः पुरूरवाः।
तदाश्रमपदं प्राप्तो देवदेवप्रसादतः ॥ ७५ ॥
तदाश्रमं श्रमशमनं मनोहरं मनोहरैः कुसुमशतैरलङ्कृतम्।
कृतं स्वयं रुचिरमथाब्जिणा शुभं शुभावहं हि ददृशे स मद्रराट् ॥७६॥

---

अथ अष्टादशोत्तरशततमोऽध्यायः।

सूत उवाच। तत्र यौ तौ महाशृङ्गौ महावर्णौ महाहिमौ
तृतीयन्तु तयोर्मध्ये शृङ्गमत्यन्तमुच्छ्रितम् ॥ १ ॥
नित्यातपशिलाजालं सदाभ्रपरिवर्जितम्।
तस्याधस्ताद्वृक्षगणो दिशा भागे च पश्चिमे ॥ २ ॥
जातीलतापरिच्छिन्नं विवरं चारुदर्शनम्।
दृष्ट्वैव कौतुकाविष्टस्तं विवेश महीपतिः ॥ ३ ॥
तमसा चातिनिविडं नल्वमात्रं सुसङ्कटम्।
नल्वमात्रमतिक्रम्य स्वप्रभाभरणोज्ज्वलम् ॥ ४ ॥
तमुच्छ्रितमथात्यन्तं गम्भीरं परिवर्त्तुलम्।

न तत्र सूर्य्यस्तपति न विराजति चन्द्रमाः ॥ ५ ॥
तथापि दिवसाकारं प्रकाशं तदहर्निशम् ।
क्रोशाधिकपरीमाणं सरसा च विराजितम् ॥ ६ ॥
समन्तात्सरसस्तस्य शैललग्ना तु वेदिका ।
सौवर्णै राजतैर्वज्रैर्वैदूर्य्यैरुपशोभितम् ॥ ७ ॥
नानामाणिक्यकुसुमैः सुप्रभाभरणोज्ज्वलैः ।
तस्मिन् सरसि पद्मानि पद्मरागच्छदानि तु ॥ ८ ॥
वज्रकेसरजालानि सुगन्धीनि तथा पुनः ।
पत्रैर्मरकतैर्नीलवैदूर्य्यैश्च महीपते ! ॥ ९ ॥
कर्णिकाश्च तथा तेषां जातरूपस्य पार्थिव ! ।
तस्मिन् सरसि या भूमिर्न सा वज्रसमाकुला ॥ १० ॥
नानारत्नैरुपचिता जलजानां समाश्रया ।
कपर्दिकानां शुक्तीनां शङ्खानाञ्च महीपते ! ॥ ११ ॥
मकराणाञ्च मत्स्यानां चण्डानां कच्छपैः सह ।
तत्र मरकतखण्डानि वज्राणाञ्च सहस्रशः ॥ १२ ॥
पद्मरागेन्द्रनीलानि महानीलानि पार्थिव ! ।
पुष्परागाणि सर्वाणि तथा कर्केटकानि च ॥ १३ ॥
तुत्थकस्य तु खण्डानि तथा शेषस्य भागशः ।
राजावर्तस्य मुख्यस्य रुचिराक्षस्य चाप्यथ ॥ १४ ॥
सूर्य्येन्दुकान्तयश्चैव नीलो वर्णान्तिमश्च यः ।
ज्योतीरसस्य रम्यस्य स्यमन्तस्य च भागशः ॥ १५ ॥
सुगारुगवलमाणां स्फटिकस्य तथैव च ।
गोमेदपित्तकानाञ्च धूलीमरकतस्य च ।
वैदूर्यसौगन्धिकयोस्तथा राजमणेर्नृप ! ।

वज्रस्यैव च मुख्यस्य तथा ब्रह्ममणेरपि।
मुक्ताफलानि मुक्तानाम्नारात्रिग्रहधारिणाम्॥ १८॥
सुवर्णानाञ्चैव तत्तोयं स्नानाच्छीतविनाशनम्।
वैदूर्यस्य शिलामध्ये सरसस्तस्य शोभना॥ १९॥
प्रमाणेन तथा सा च द्वे च राजन्! धनुःशते।
चतुरस्रा तथा रम्या तपसा निर्मिताऽग्निना॥ २०॥
त्रिलद्वारसमो देशो यत्र तत्र हिरण्मयः।
प्रदेशः स तु राजेन्द्र! द्वीपे तस्मिन् मनोहरे॥२१॥
तथा पुष्करिणी रम्या तस्मिन् राजन्! शिलातले।
सुशीतामलपानीया जलजैश्च विराजिता॥ २२॥
आकाशप्रतिमा राजन्! चतुरस्रा मनोहरा।
तस्यास्तदुदकं स्वादु लघु शीतं सुगन्धिकम्॥ २३॥
न चिणोति यथा कण्ठं कुक्षिन्नापूरयत्यपि।
तृप्तिं विधत्ते परमां शरीरे च महत् सुखम्॥२४॥
मध्ये तु तस्याः प्रासादं निर्मितं तपसाग्निना।
कुसुमेतुप्रवेशान्तं सर्वरत्नमयं शुभम्॥ २५॥
शशाङ्करश्मेः सङ्काशं प्रासादं राजितं स्थितम्।
रम्यवैदूर्यसोपानं विद्रुमामलसारकम्॥ २६॥
इन्द्रनीलमहास्तम्भं मरकतासक्तवेदिकम्।
वज्रांशुजालैः स्फुरितं रम्यं दृष्टिमनोरमम्॥ २७॥
प्रासादे तत्र भगवान् देवदेवो जनार्दनः।
भोगिभोगावलीसुप्तः सर्वालङ्कारभूषितः॥ २८॥
जाम्बा च कुञ्चितस्त्वेको देवदेवस्य चक्रिणः।
फणीन्द्रसन्निविष्टोऽङ्घ्रिर्द्वितीयश्च तथानघ!॥ २९॥

लक्ष्म्युत्सङ्गगतो ह्यस्तु शेषभोगप्रशायिनः ।
फणीन्द्रभोगसन्यस्तबाहुः केयूरभूषणः ॥ ३० ॥
अङ्गुलीपृष्ठविन्यस्तदेवशीर्षधरम्भुजम् ।
एकं वै देवदेवस्य द्वितीयन्तु प्रसारितम् ॥ ३१ ॥
समाकुञ्चितजानुस्थमणिबन्धेन शोभितम् ।
किञ्चिदाकुञ्चितं चैव नाभिदेशकरस्थितम् ॥ ३२ ॥
तृतीयन्तु भुजं तस्य चतुर्थन्तु तथा शृणु ।
आत्तसन्तानकुसुमं घ्राणदेशानुसर्पिणम् ॥ ३३ ॥
लक्ष्म्या संवाह्यमानाङ्घ्रिः पद्मपत्रनिभैः करैः ।
सन्तानमालामुकुटं हारकेयूरभूषितम् ॥ ३४ ॥
भूषितञ्च तथा देवमङ्गदैरङ्गुलीयकैः ।
फणीन्द्रफणविन्यस्तचारुरत्नशिरोज्ज्वलम् ॥ ३५ ॥
अज्ञातवस्तुचरितं प्रतिष्ठितमथात्रिणा ।
सिद्धानुपूजितं सततं सन्तानकुसुमार्चितम् ॥ ३६ ॥
दिव्यगन्धानुलिप्ताङ्गं दिव्यधूपेन धूपितम् ।
सुरसैः सुफलैर्हृद्यैः सिद्धैरुपहृतैः सदा ॥ ३७ ॥
शोभितोत्तमपार्श्वन्तं देवमुत्पलशीर्षकम् ।
ततः सम्मुखमुद्वीक्ष्य ववन्दे स नराधिपः ॥ ३८ ॥
जानुभ्यां शिरसा चैव गत्वा भूमिं यथाविधि ।
नाम्नां सहस्रेण तदा तुष्टाव मधुसूदनम् ॥ ३९ ॥
प्रदक्षिणमथो चक्रे स नृत्याय पुनः पुनः ।
रम्यमायतनं दृष्ट्वा तपोवासाश्रमे पुनः ॥ ४० ॥
जलाद्बहिर्गुहां काञ्चित् आश्रित्य सुमनोहराम् ।
तपश्चचार तत्रैव पूजयन् मधुसूदनम् ॥ ४१ ॥

नानाविधैस्तथा पुष्पैः फलमूलैः सगोरसैः।
नित्यं त्रिषवणस्नायी वह्निपूजापरायणः॥ ४२॥
देववापीजलैः कुर्वन् सततं प्राणधारणम्।
सर्वाहारपरित्यागं कृत्वा तु मनुजेश्वरः॥ ४३॥
अनास्तृतगुहाशायी कालं नयति पार्थिवः।
त्यक्ताहारक्रियश्चैव केवलं तोयतो नृपः॥ ४४॥
न तस्य ग्लानिमायाति शरीरस्य तदद्भुतम्।
एवं स राजा तपसि प्रसक्तः संपूजयन् देववरं सदैव।
तत्राश्रमे कालमुवास कञ्चित् स्वर्गोपमे दुःखमविन्दमानः॥४५॥

---

अथ ऊनविंशत्यधिकशततमोऽध्यायः।

सूत उवाच। तत्राश्रमपदे रम्ये त्यक्ताहारपरिच्छदः।
क्रीडाविहारं गन्धर्वैः पश्यत्यप्सरसां सह॥ १॥
कृत्वा पुष्पोच्चयं भूरि ग्रथयित्वा तथा स्रजः।
अर्घं निवेश्य देवाय गन्धर्वेभ्यस्तदा ददौ॥ २॥
पुष्पाश्रयप्रसक्तानां क्रीडन्तीनां यथा सुखम्।
चेष्टा नानाविधाकाराः पश्यन्नपि न पश्यति॥ ३॥
काचित् पुष्पोच्चये सक्ता लताजालेन वेष्टिता।
सखीजनेन सन्त्यक्ता कान्तेनाभिसमुज्झिता॥४॥
काचित् कमलगन्धाभा निश्वासपवनाहृतैः।
मधुपैराकुलमुखी कान्तेन परिमोचिता॥ ५॥
मकरन्दसमाक्रान्तनयना काचिदङ्गना।
कान्तनिश्वासवातेन नीरजस्कृतेक्षणा॥ ६॥
काचिदुच्चीयपुष्पाणि ददौ कान्तस्य भामिनी।

कान्तसंग्रथितैः पुष्पै रराज क्षतशेखरा ॥ ७ ॥
उद्वीय स्वयमुद्गृह्य कान्तेन क्षतशेखरा ।
कृतकृत्यमिवात्मानं मेने मन्मथवर्धिनी ॥ ८ ॥
मत्स्यजिनाह्वने कुञ्जे विशिष्टकुसुमा लता ।
काचिदेवं रहो नीता रमणेन रिरंसुना ॥ ९ ॥
कान्तसन्नामितलता कुसुमानि विचिन्वती ।
सर्वाभ्यः काचिदात्मानं मेने सर्वगुणाधिकम् ॥ १० ॥
काश्चित् पश्यन्ति भूपालं नलिनीषु पृथक् पृथक् ।
क्रीडमानास्तु गन्धर्वैं रम्भाद्या मनोरमाः ॥ ११ ॥
काचिदाताडयत्कान्तमुदकेन शुचिस्मिता ।
ताड्यमानाथ कान्तेन प्रीतिं काचिदुपाययौ ॥ १२ ॥
कान्तश्च ताडयामास जातखेदा वराङ्गना ।
अदृश्यत वरारोहा श्वासनृत्यत्पयोधरा ॥ १३ ॥
कान्तास्य ताडनोत्सृष्टकेशपाशनिबन्धना ।
केशाकुलमुखी भाति मधुपैरिव पद्मिनी ॥ १४ ॥
स्वचक्षुःसदृशैः पुष्पैः संच्छन्ने नलिनीवने ।
कृत्वा काचिच्चिरात् प्राप्ता कान्तेनान्विष्य यत्नतः ॥ १५ ॥
खाता शीतापदेशेन काचित् प्राहाङ्गना भृशम् ।
रमणालिङ्गनं चक्रे मनोऽभिलषितश्चिरम् ॥ १६ ॥
जलार्द्रं वसनं सूक्ष्ममङ्गलीनं शुचिस्मिता ।
धारयन्ती जनं चक्रे काचित्तत्र समन्मथम् ॥ १७ ॥
कण्ठमाल्यगुणैः काचित् कान्ते नाक्षयताभसि ।
त्रुटत्स्रग्दामपतितं रमणं प्राह सश्चिरम् ॥ १८ ॥
काचिन्मग्ना सखीदत्तजानुदेशे नखक्षता ।

संभ्रान्ता कान्तशरणं मग्ना काचिन्नता चिरम् ॥१९॥
काचित् पुष्ठकृतादित्या केशनिस्तोयकारिणी ।
शिलातलगता भर्त्रा दृष्टा कामार्तचक्षुषा ॥ २० ॥
कृतमाल्यं विलुलितं संक्रान्तकुचकुङ्कुमम् ।
रतिक्रीडितकान्तेव रराज तत् सरोदकम् ॥ २१ ॥
सुस्नातदेवगन्धर्वैर्दैवरामागणेन च ।
पूज्यमानश्च ददृशे देवदेवं जनार्दनम् ॥ २२ ॥
क्वचिच्च ददृशे राजा लतागृहगताः स्त्रियः ।
मण्डयन्तीः स्वगात्राणि कान्तसंन्यस्तमानसाः ॥२३॥
काचिदादर्शनकरा व्यग्रा दूतीमुखोद्गतम् ।
शृण्वन्ती कान्तवचनम् अधिका तु तथा बभौ ॥ २४ ॥
काचित् सत्वरिता दूत्या भूषणानां विपर्ययम् ।
कुर्वाणा नैव बुबुधे मन्मथाविष्टचेतना ॥२५॥
वायुनुन्नातिसुरभिकुसुमोत्करमण्डिते ।
काश्चित् पिबन्ती ददृशे मैरेयं नीलशाद्वले ॥ २६ ॥
पाययामास रमणं स्वयं काचिद्वराङ्गना ।
काचित् पपौ वरारोहा कान्तपाणिसमर्पितम् ॥२७॥
काचित् स्वनेत्रचपलनीलोत्पलयुतम्पयः ।
पीत्वा पप्रच्छ रमणं क्व गतौ तौ ममोत्पलौ ॥ २८॥
त्वयैव पीतौ तौ नूनमित्युक्ता रमणेन सा ।
तथा विदित्वा मुग्धत्वादबभूव व्रीडिता भृशम् ॥ २९ ॥
काचित् कान्तार्पितं सुभ्रूः कान्तपीतावशेषितम् ।
सविशेषरसं पानं पपौ मन्मथवर्धनम् ॥ ३० ॥
उद्यानगोष्ठीषु तथा तासां स नरपुङ्गवः ।

शुश्राव विविधङ्गीतं तन्त्रीस्वरविमिश्रितम् ॥ ३१ ॥
प्रदोषसमये तास्तु देवदेवं जनार्दनम् ।
राजन्! सदोपनृत्यन्ति नानावाद्यपुरःसराः ॥ ३२ ॥
याममात्रे गते रात्रौ विनिर्गत्य गुहामुखात् ।
आवसन् संयुताः कान्तैः परर्धिरचिताङ्गणाम् ॥३३॥
नानागन्धान्वितलतां नानागन्धसुगन्धिनीम् ।
नानाविचित्रवदनां कुसुमोत्करमण्डिताम् ॥ ३४ ॥
एवमप्सरसां पश्यन् क्रीडितानि स पर्वते ।
तपस्तेपे महाराजन्! केशवार्पितमानसः ॥ ३५ ॥
तमूचुर्नृपतिं गत्वा गन्धर्वाप्सरसाङ्गणाः ।
राजन्! स्वर्गोपमन्देशमिमं प्राप्तोऽस्यरिन्दम! ॥३६॥
वयं हि ते प्रदास्यामो मनसः काङ्क्षितान्वरान् ।
तानादाय गृहङ्गच्छ तिष्ठेह यदि वा पुनः ॥३७॥
राजोवाच। अमोघदर्शनाः सर्वे भवन्तस्त्वमितौजसः ।
वरं वितरताद्यैव प्रसादं मधुसूदनात् ॥ ३८ ॥
एवमस्त्वित्यथोक्तस्तैः स तु राजा पुरूरवाः ।
तत्रोवास सुखी मासं पूजयानो जनार्दनम् ॥ ३९ ॥
प्रिय एव सदैवाभीद्गन्धर्वाप्सरसां नृपः ।
तुतोष सजनो राज्ञस्तस्या लौल्येन कर्मणा ॥ ४० ॥
मासस्य मध्ये स नृपः प्रविष्टस्तदाश्रमं रत्नसहस्रचित्रम् ।
तांयागनस्तत्र उवास मासं यावत् सितान्तो नृप! फाल्गुनस्य ४१
फाल्गुनामलपक्षान्ते राजा स्वप्ने पुरूरवाः ।
तस्यैव देवदेवस्य श्रुतवान् गदितं शुभम् ॥ ४२ ॥
रात्रामस्यां व्यतीतायामप्सिणा त्वं समेष्यसि ।

तेन राजन् ! समागम्य कृतकृत्यो भविष्यसि ॥ ४३ ॥
स्वप्नमेवं स राजर्षिर्दृष्ट्वा देवेन्द्रविक्रमः ।
प्रत्यूषकाले विधिवत् स्नातः स प्रयतेन्द्रियः ॥ ४४ ॥
कृतकृत्यो यथाकामं पूजयित्वा जनार्दनम् ।
ददर्शात्रिं मुनिं राजा प्रत्यक्षं तपसां निधिम् ॥४५॥
स्वप्नन्तु देवदेवस्य न्यवेदयत धार्मिकः ।
ततः शुश्राव वचनं देवतानां समीरितम् ॥ ४६ ॥
एवमेतन् महीपाल ! नात्र कार्य्या विचारणा ।
एवं प्रसादं संप्राप्य देवदेवाज्जनार्दनात् ॥ ४७ ॥
कृतदेवार्चनो राजा तथा हुतहुताशनः ।
सर्व्वान् कामानवाप्नोऽसौ वरदानेन केशवात् ॥ ४८ ॥

---

विंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । तस्याश्रमस्योत्तरतस्त्रिपुरारिनिषेवितः ।
नानारत्नमयैः शृङ्गैः कल्पद्रुमसमन्वितैः ॥ १ ॥
मध्ये हिमवतः पृष्ठे कैलासो नाम पर्व्वतः ।
तस्मिन्निवसति श्रीमान् कुवेरः सह गुह्यकैः ॥ २ ॥
अप्सरोऽनुगतो राजा मोदते ह्यलकाधिपः ।
कैलासपादसम्भूतं रम्यं शीतजलं शुभम् ॥ ३ ॥
मन्दारपुष्परजसा पूरितं देवसन्निभम् ।
तस्मात् प्रवहते दिव्या नदी मन्दाकिनी शुभा ॥ ४ ॥
दिव्यञ्च नन्दनं तत्र तस्यास्तीरे महद्वनम् ।
प्रागुत्तरेण कैलासाद्दिव्यं सौगन्धिकं गिरिम् ॥५॥
सर्व्वधातुमयं दिव्यं सुवेलं पर्व्वतं प्रति ।

चन्द्रप्रभो नाम गिरिः स शुभ्रो रत्नसन्निभः ॥ ६ ॥
तत्समीपे सरो दिव्यमच्छोदं नाम विश्रुतम् ।
तस्मात् प्रभवते दिव्या नदी ह्यच्छोदिका शुभा ॥ ७ ॥
तस्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ॥ ८ ॥
यक्षसेनापतिः क्रूरो गुह्यकैः परिवारितः ।
पुण्या मन्दाकिनी नाम नदी ह्यच्छोदिका शुभा ॥ ९ ॥
महीमण्डलमध्ये तु प्रविष्टे तु महोदधिम् ।
कैलासदक्षिणे प्राच्यां शिवं सर्वौषधिं गिरिम् ॥ १० ॥
मनःशिलामयं दिव्यं सुवेलं पर्वतं प्रति ।
लोहितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान् ॥ ११ ॥
तस्य पादे महद्दिव्यं लोहितं सुमहत्सरः ।
तस्मात् प्रभवते पुण्यो लौहित्यश्च नदो महान् ॥ १२ ॥
दिव्यारण्यं विशोकञ्च तस्य तीरे महद्वनम् ।
तस्मिन् गिरौ निवसति यक्षो मणिधरो वशी ॥ १३ ॥
सौम्यैः सुधार्मिकैश्चैव गुह्यकैः परिवारितः ।
कैलासात् पश्चिमोदीच्यां ककुद्मानौषधी गिरिः ॥ १४ ॥
ककुद्मति च रुद्रस्य उत्पत्तिश्च ककुद्मिनः ।
तदञ्जनन्त्रैः ककुदं शैलन्त्रिककुदं प्रति ॥ १५ ॥
सर्वधातुमयस्तत्र सुमहान् वैद्युतो गिरिः ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥ १६ ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजं नाम विश्रुतम् ॥ १७ ॥
कुबेरानुचरस्तस्मिन् प्रहेति तनयो वशी ।

वस्त्रधाता निवसति राक्षसोऽनन्तविक्रमः ॥ १८॥
कैलासात् पश्चिमामाशां दिव्यः सर्वौषधिर्गिरिः।
अरुणः पर्वतश्रेष्ठो रुक्मधातुविभूषितः ॥ १९ ॥
भवस्य दयितः श्रीमान् पर्वतो हेमसन्निभः।
शातकौम्भमयैर्दिव्यैः शिलाजालैः समाचितः ॥२०॥
शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन्।
शृङ्गवान् सुमहादिव्यो दुर्गः शैलो महाचितः ॥२१॥
तस्मिन् गिरौ निवसति गिरिशो धूम्रलोचनः।
तस्य पादात् प्रभवति शैलोदं नाम तत्सरः ॥ २२ ॥
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा।
सा चक्षुषी तयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ॥ २३॥
अरुणात्तरेणा कैलासाच्छिवः सर्वौषधो गिरिः।
गौरन्तु पर्वतश्रेष्ठं हरितालमयं प्रति ॥ २४ ॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः।
तस्य पादे महद्दिव्यं सरः काञ्चनबालुकम् ॥ २६ ॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः।
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ॥ २७ ॥
दिवं यास्यन्तु मे पूर्वे गङ्गा तोयाप्लुतास्थिकाः।
तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता ॥ २८ ॥
सोमपादात् प्रसृता सा सप्तधा प्रविभज्यते।
यूपा मणिमयास्तत्र विमानाश्च हिरण्मयाः ॥ २९ ॥
तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह।
दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम् ॥ ३० ॥
दृश्यते भासुरा रात्रौ देवी त्रिपथगा तु सा।

अन्तरिक्षं दिवं चैव भावयित्वा भुवङ्गता ॥ ३१ ॥
भवोत्तमाङ्गे पतिता संरुद्धा योगमायया ।
तस्या ये बिन्दवः केचित् क्रुद्धायाः पतिता भुवि ॥३२॥
कृतन्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम् ।
ततस्तस्या निरुद्धाया भवेन सहसा रुषा ॥ ३३ ॥
ज्ञात्वा तस्या ह्यभिप्रायं क्रूरं दुर्व्याप्यकोपितम् ।
भित्त्वा विशामि पातालं स्रोतमाक्षिप्य शङ्करम् ॥३४॥
अथावलेपनं ज्ञात्वा तस्याः क्रुद्धस्तु शङ्करः ।
तिरोभावयितुं बुद्धिरासीदङ्गेषु तां नदीम् ॥ ३५ ॥
एतस्मिन्नेव काले तु दृष्ट्वा राजानमग्रतः ।
धमनीसन्ततं क्षीणं क्षुधाव्याकुलितेन्द्रियम् ॥ ३६ ॥
अनेन तोषितश्चाहं नद्यर्थं पूर्वमेव तु ।
बुद्ध्वास्य वरदानन्तु ततः कोपं न यच्छत ॥ ३७ ॥
ब्रह्मणो वचनं श्रुत्वा यदुक्तं धारयन्नदीम् ।
ततो विसर्जयामास संरुद्धां स्वेन तेजसा ॥ ३८ ॥
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ।
ततो विसर्जयामास सप्तस्रोतांसि गङ्गया ॥ ३९ ॥
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु ।
स्रोतांसि त्रिपथयास्तु प्रत्यपद्यन्त सप्तधा ॥ ४० ॥
नलिनी ह्रादिनी चैव पावनी चैव प्राच्यगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥ ४०॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ।
तस्मात् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम् ॥४१॥
सप्त चैताः प्लावयन्ति वर्षन्तु हिमसाह्वयम् ।

प्रसूताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भवाः ॥४२॥
तान्देशान् प्लावयन्तिस्म म्लेच्छप्रायांश्च सर्वशः ।
सशैलान् कुकुरान् रौध्रान् बर्बरान् यवनान् खसान् ॥ ४३ ॥
पुलिकांश्च कुलत्थांश्च अङ्गलोक्यान्वरांश्च यान् ।
कृत्वा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम् ॥४४॥
अथ वीरमरूंश्चैव कालिकांश्चैव शूलिकान् ।
तुषारान् बर्बरानङ्गान्पह्लवान्पारदान् शकान् ॥ ४५ ॥
एतान् जनपदांश्चक्षुः प्लावयित्वोदधिङ्गता ।
दरदोर्जगुडांश्चैव गान्धारानौरसान् कुहून् ॥ ४६ ॥
शिवपौरानिन्द्रमरून् वसतीन् समतेजसम् ।
सैन्धवानुर्वसान् वर्वान् कुपथान् भीमरोमकान् ॥४७॥
शुनामुखांश्चोर्दमरून् सिन्धुरेतान्निषेवते ।
गन्धर्वान् किन्नरान्यक्षान् रक्षोविद्याधरोरगान् ॥४८॥
कलापग्रामकांश्चैव तथा किंपुरुषान्नरान् ।
किरातांश्च पुलिन्दांश्च कुरून् वै भारतानपि ॥ ४९ ॥
पाञ्चालान् कौशिकान् मत्स्यान् मागधाङ्गांस्तथैव च ।
ब्रह्मोत्तरांश्च वङ्गांश्च ताम्रलिप्तांस्तथैव च ॥ ५० ॥
एतान् जनपदानार्यान् गङ्गा भावयते शुभा ।
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम् ॥ ५१ ॥
ततस्तु ह्लादिनी पुण्या प्राचीनाभिमुखा ययौ ।
प्लावयन्त्युपकांश्चैव निषादानपि सर्वशः ॥ ५२ ॥
धीवरानृषिकांश्चैव तथा नीलमुखानपि ।
कोकरानेकवर्णांश्च किरातानपि चैव हि ॥ ५३ ॥

कालिन्दगतिकांश्चैव कुलिकान् स्वर्गभौमकान्।
सा मण्डले समुद्रस्य तीरे भूत्वा तु सर्वशः ॥ ५४ ॥
ततस्तु नलिनी चापि प्राचीमेव दिशं ययौ।
कुपथान् प्लावयन्ती सा इन्द्रद्युम्नसरांस्यपि ॥ ५५ ॥
तथा खरपथान् देशान् वेत्रशङ्कुपथानपि।
मध्येनोज्जानकमरून् कुथप्रावरणान् ययौ ॥ ५६ ॥
इन्द्रद्वीपसमीपे तु प्रविष्टा लवणोदधिम्।
ततस्तु पावनी प्रायात् प्राचीमाशाञ्जवेन तु।
तोमरान् प्लावयन्ती च हंसमार्गान् समूहकान्।
पूर्वान्देशांश्च सेवन्ती भित्वा सा बहुधा गिरिम्।
कर्णप्रावरणान् प्राप्य गता साश्वमुखानपि ॥ ५८ ॥
सिक्ता पर्वतमेरुं सा गत्वा विद्याधरानपि।
शैमिमण्डलकोष्ठन्तु सा प्रविष्टा महत्सरः ॥ ५९ ॥
तासां नद्युपनद्योऽन्याः शतशोऽथ सहस्रशः।
उपगच्छन्ति ता नद्यो यतो वर्षति वासवः ॥ ६० ॥
तीरे वंशौकसारायाः सुरभिर्नाम तद्वनम्।
हिरण्यशृङ्गो वसति विद्वान् कौबेरको वशी ॥ ६१ ॥
यज्ञादपेतः सुमहानमितौजाः सुविक्रमः।
तत्रागस्त्यैः परिवृता विद्वद्भिर्ब्रह्मराक्षसैः ॥ ६२ ॥
कुबेरानुचरा ह्येते चत्वारस्तत्समाश्रिताः।
एवमेव तु विज्ञेया सिद्धिः पर्वतवासिनाम् ॥ ६३ ॥
परस्परेण द्विगुणा धर्मतः कामतोऽर्थतः।
हेमकूटस्य पृष्ठे तु सर्पाणां तत् सरः स्मृतम् ॥ ६४ ॥
सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या।

अवगाढे ह्युभयतः समुद्रौ पूर्वपश्चिमौ ॥ ६५ ॥
सरो विष्णुपदं नाम निषधे पर्वतोत्तमे ।
यस्माद्द्वे प्रभवति गन्धर्वानुकुले च ते ॥ ६६ ॥
मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ।
जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्मृतम् ॥ ६७ ॥
पयोदश्च ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्माद्द्वे सम्प्रसूयताम् ॥ ६८ ॥
सरसस्तु सरस्त्वेतत् स्मृतमुत्तरमानसम् ।
मृग्या च मृगकान्ता च तस्माद्द्वे सम्प्रसूयताम् ॥ ६९ ॥
ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः ।
नाम्ना ते वै जया नाम द्वादशोदधिसन्निभाः ॥ ७० ॥
तेभ्यः शान्ती च मध्वी च द्वे नद्यौ सम्प्रसूयताम् ।
किंपुरुषाद्यानि यान्यष्टौ तेषु देवो न वर्षति ॥ ७१ ॥
उद्भिदान्युदकान्यत्र प्रवहन्ति सरिद्वराः ।
बलाहकश्च ऋषभो चक्रो मैनाक एव च ॥ ७२ ॥
विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम् ।
चन्द्रकान्तस्तथा द्रोणः सुमहांश्च शिलोच्चयः ॥ ७३ ॥
उदगायता उदीच्यान्तु अवगाढा महोदधिम् ।
चक्रो बधिरकश्चैव तथा नारदपर्वतः ॥ ७४ ॥
प्रतीचीमायतास्ते वै प्रतिष्ठास्ते महोदधिम् ।
जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्वतः ॥ ७५ ॥
आयतास्ते महाशैलाः समुद्रं दक्षिणम्प्रति ।
चक्रमैनाकयोर्मध्ये दिवि संदक्षिणापथे ॥ ७६ ॥
तत्र संवर्तको नाम सोऽग्निः पिबति तज्जलम् ।

अग्निः समुद्रवासस्तु ग्रौर्वोऽसौ वडवामुखः ॥ ७७ ॥
इत्येते पर्वता विष्टाश्चत्वारो लवणोदधिम् ।
छिद्यमानेषु पक्षेषु पुरा इन्द्रस्य वै भयात् ॥ ७८ ॥
तेषान्तु दृश्यते चन्द्रे शुक्ले कृष्णे समाप्लुतिः ।
ते भारतस्य वर्षस्य भेदा येन प्रकीर्त्तिताः ॥ ७९ ॥
इहोदितस्य दृश्यन्ते अन्ये त्वन्यत्र चोदिताः ।
उत्तरोत्तरमेतेषां वर्षमुद्रिच्यते गुणैः ॥ ८० ॥
आरोग्यायुःप्रमाणाभ्यां धर्म्मतः कामतोऽर्थतः ।
समन्वितानि भूतानि तेषु वर्षेषु भागशः ॥ ८१ ॥
वसन्ति नानाजातीनि तेषु सर्वेषु तानि वै ।
इत्येतद्धारयद्विश्वं पृथ्वी जगदिदं स्थिता ॥ ८२ ॥

---

अथ एकविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् ।
कथ्यमानं निबोधध्वं शाकं द्वीपं द्विजोत्तमाः ! ॥ १ ।
जम्बूद्वीपस्य विस्ताराद्‌द्विगुणस्तस्य विस्तरः ।
विस्तारात् त्रिगुणश्चापि परीणाहः समन्ततः ॥ २ ॥
तेनावृतः समुद्रोऽयं द्वितीयो लवणोदकः ।
तत्र पुण्या जनपदा चिराच्च म्रियते जनः ॥ ३ ॥
कुत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह ।
तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः ॥ ४ ॥
शाकद्वीपादिषु त्वेषु सप्त सप्त नगास्त्रिषु ।
ऋज्वायताः प्रतिदिशं निविष्टाः पर्वतोत्तमाः ॥ ५ ॥
रत्नाकराद्रिनामानः सानुमन्तो महाचिताः ।

समोदिताः प्रतिदिशं द्वीपविस्तारमानतः॥ ६॥
उभयत्रावगाढौ च लवणक्षीरसागरौ।
शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान्॥७॥
देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते।
प्रागायतः स सौवर्ण उदयो नाम पर्वतः॥८॥
तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्त्यपयान्ति च।
तस्यापरेण सुमहान् जलधारो महागिरिः॥ ९॥
स वै चन्द्रः समाख्यातः सर्वौषधिसमन्वितः।
तस्मान्नित्यमुपादत्ते वासवः परमञ्जलम्॥ १०॥
नारदो नाम चैवोक्तो दुर्गशैलो महाचितः।
तत्राचलौ समुत्पन्नौ पूर्वं नारदपर्वतौ॥ ११॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः।
यत्र श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः किल॥ १२॥
स एव दुन्दुभिर्नाम श्यामपर्वतसन्निभः।
शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः॥ १३॥
रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्।
तस्यापरेण रजतो महानस्तोगिरिः स्मृतः॥ १४॥
स वै सोमक इत्युक्तो देवैर्यत्रामृतं पुरा।
संभृतश्च हृतश्चैव मातुरर्थे गरुत्मता॥ १५॥
तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः।
हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः॥१६॥
आम्बिकेयात् परो रम्यः सर्वौषधिनिषेवितः।
विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः॥१७॥
यस्माद्विभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः।

सर्वेष्व वेष्ववेत्युक्तो यतो वायुः प्रवाति च ॥ १८ ॥
तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः ! ।
शृणुध्वं नामत स्तानि यथावदनुपूर्वशः ॥ १९ ॥
द्विनामान्येव वर्षाणि यथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥ २० ॥
नाम्नागतभयं नाम वर्षं तत् प्रथमं स्मृतम् ।
द्वितीयं जलधारस्य सुकुमारमिति स्मृतम् ॥ २१ ॥
तदेव शैशिरं नाम वर्षं तत् परिकीर्त्तितम् ।
नारदस्य च कौमारस्तदेव च सुखोदयम् ॥ २२ ॥
श्यामपर्वतवर्षं तदनीचकमिति स्मृतम् ।
आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम् ॥ २३ ॥
सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्करम् ।
तदेवासितमित्युक्तं वर्षं सोमकसंज्ञितम् ॥ २४ ॥
आम्बिकेयस्य मैनाकं क्षेमकञ्चैव तत् स्मृतम् ।
तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् ॥ २५ ॥
द्वीपस्य परिणाहञ्च ह्रस्वदीर्घत्वमेव च ।
जम्बूद्वीपेन संख्यातं तस्य मध्ये वनस्पतिम् ॥ २६ ॥
शाको नाम महावृक्षः प्रजास्तस्य महानुगाः ।
एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥ २७ ॥
विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह ।
तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः ॥ २८ ॥
तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्रगाः ।
द्विनाम्ना चैव ताः सर्वा गङ्गा सप्तविधा स्मृता ॥ २९
प्रथमा सुकुमारीति गङ्गा शिवजला शुभा ।

मुनितप्ता च नाम्नैषा नदी सम्परिकीर्त्तिता ॥ २० ॥
सुकुमारी तपःसिद्धा द्वितीया नामतः सती।
नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥ ३१ ॥
शिविका च चतुर्थी स्यात् द्विविधा च पुनः स्मृता।
इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः कुहूः ॥ ३२ ॥
वेणुका चामृता चैव षष्ठी सम्परिकीर्त्तिता।
सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता ॥ ३३ ॥
एताः सप्त महाभागाः प्रतिवर्षं शिवोदकाः।
भावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् ॥ ३४ ॥
अभिगच्छन्ति ताश्चान्या नदनद्यः सरांसि च।
बहूदकपरिस्रावा यतो वर्षति वासवः ॥ ३५ ॥
तासान्तु नामधेयानि परिमाणं तथैव च।
न शक्यं परिसंख्यातुं पुण्यास्ता सरिदुत्तमाः ॥३६॥
ताः पिबन्ति सदा हृष्टा नदीर्जनपदाश्च ते।
एते शान्तभयाः प्रोक्ताः प्रमोदा ये च वै शिवाः ॥ ३७ ॥
आनन्दाश्च सुखाश्चैव क्षेमकाश्च नवैः सह।
वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः ॥ ३८ ॥
आरोग्या बलिनश्चैव सर्वे मरणवर्जिताः।
अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः ॥ ३९ ॥
न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित्।
त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते ॥ ४० ॥
शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्वशः।
देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः ॥४१॥
न तेषु सङ्करः कश्चित् वर्णाश्रमकृतः क्वचित्।

धर्मस्य चाव्यभीचारादेकान्तसुखिनः प्रजाः ॥ ४२ ॥
न तेषु माया लोभो वा ईर्ष्यासूया भयं कुतः ।
विपर्य्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम् ॥ ४३ ॥
कालो नैव च तेष्वस्ति न दण्डो न च दाण्डिकः ।
स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम् ॥ ४४ ॥
परिमण्डलस्तु सुमहान् द्वीपो वै कुशसंज्ञकः ।
नदीजलैः परिवृतः पर्वतैश्चाभ्रसन्निभैः ॥ ४५ ॥
सर्वधातुविचित्रैश्च मणिविद्रुमभूषितैः ।
अन्यैश्च विविधाकारै रम्यैर्जनपदैस्तथा ॥ ४६ ॥
वृक्षैः पुष्पफलोपेतैः सर्वतो धनधान्यवान् ।
नित्यं पुष्पफलोपेतः सर्वरत्नसमावृतः ॥ ४७ ॥
आवृतः पशुभिः सर्वैर्ग्रामारण्यैश्च सर्वशः ।
आनुपूर्व्यात् समासेन कुशद्वीपं निबोधत ॥ ४८ ॥
अथ तृतीयं वक्ष्यामि कुशद्वीपस्य तत्त्वशः ।
कुशद्वीपेन क्षीरोदः सर्वतः परिवारितः ॥ ४९ ॥
शाकद्वीपस्य विस्ताराद्द्विगुणेन समन्वितः ।
तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः ॥ ५० ॥
रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु ।
द्विनामानश्च ते सर्वे शाकद्वीपे यथा तथा ॥ ५१ ॥
प्रथमः सूर्य्यसङ्काशः कुमुदो नाम पर्वतः ।
विद्रुमोच्चय इत्युक्तः स एव च महीधरः ॥ ५२ ॥
सर्वधातुमयैः शृङ्गैः शिलाजालसमन्वितैः ।
द्वितीयः पर्वतस्तत्र उन्नतो नाम विश्रुतः ॥ ५३ ॥
हेमपर्वत इत्युक्तः स एव च महीधरः ।

हरितालमयैः शृङ्गै र्द्वीपमावृत्य सर्वशः ॥ ५४ ॥
बलाहकस्तृतीयस्तु जात्यञ्जनमयो गिरिः ।
द्युतिमान्नामतः प्रोक्तः स एव च महीधरः ॥ ५५ ॥
चतुर्थः पर्वतो द्रोणो यत्रौषध्यो महागिरौ ।
विशल्यकरणी चैव मृतसञ्जीवनी तथा ॥ ५६ ॥
पुष्पवान्नाम सैवोक्तः पर्वतः सुमहाचितः ।
कङ्कस्तु पञ्चमस्तेषां पर्वतो नाम सारवान् ॥ ५७ ॥
कुशेशय इति प्रोक्तः पुनः स पृथिवीधरः ।
दिव्यपुष्पफलोपेतो दिव्यवीरुत्समन्वितः ॥ ५८ ॥
षष्ठस्तु पर्वतस्तत्र महिषो मेघसन्निभः ।
स एव तु पुनः प्रोक्तो हरिरित्यभिविश्रुतः ॥ ५९ ॥
तस्मिन् सोऽग्निर्निवसति महिषो नाम योऽप्सुजः ।
सप्तमः पर्वतस्तत्र ककुद्मान् स हि भाषते ॥ ६० ॥
मन्दरः सैव विज्ञेयः सर्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरपामर्थे प्रकाशकः ॥ ६१ ॥
अपां विदारणाच्चैव मन्दरः स निगद्यते ।
तत्र रत्नान्यनेकानि स्वयं रक्षति वासवः ॥ ६२ ॥
प्रजापतिमुपादाय प्रजाभ्यो विदधत् स्वयम् ।
तेषामन्तरविष्कम्भो द्विगुणः समुदाहृतः ॥ ६३ ॥
इत्येते पर्वताः सप्त कुशद्वीपे प्रभाषिताः ।
तेषां वर्षाणि वक्ष्यामि सप्तैव तु विभागशः ॥ ६४ ॥
कुमुदस्य स्मृतः श्वेत उन्नतस्यैव स स्मृतः ।
उन्नतस्य तु विज्ञेयं वर्षं लोहितसंज्ञकम् ॥ ६५ ॥
वेणुमण्डलकञ्चैव तथैव परिकीर्त्तितम् ।

बलाहकस्य जीमूतः स्वैरथाकारमित्यपि ॥ ६६ ॥
द्रोणस्य हरिकं नाम लवणस्य पुनः स्मृतम् ।
कङ्कस्यापि ककु नाम धृतिमच्चैव तत् स्मृतम् ॥ ६७ ॥
महिषं महिषस्यापि पुनश्चापि प्रभाकरम् ।
ककुद्मिनस्तु तद्वर्षं कपिलं नाम विश्रुतम् ॥ ६८ ॥
एतान्यपि विशिष्टानि सप्त सप्त पृथक् पृथक् ।
वर्षाणि पर्वताश्चैव नदीस्तेषु निबोधत ॥ ६९ ॥
तत्रापि नद्यः सप्तैव प्रतिवर्षं हि ताः स्मृताः ।
द्विनामवत्यस्ताः सर्वाः सर्वाः पुण्यजलाः स्मृताः ॥ ७० ॥
धूतपापा नदी नाम योनिश्चैव पुनः स्मृता ।
सीता द्वितीया निशा या या चैव हि निशा स्मृता ॥ ७१ ॥
पवित्रा तृतीया ज्ञेया वितृष्णापि च या पुनः ।
चतुर्थी ह्लादिनीत्युक्ता चन्द्रभा इति च स्मृता ॥ ७२ ॥
विद्युच्च पञ्चमी प्रोक्ता शुक्ला चैव विभाव्यते ।
पुण्ड्रा षष्ठी तु विज्ञेया पुनश्चैव विभावती ॥ ७३ ॥
महती सप्तमी प्रोक्ता पुनश्चैषा धृतिः स्मृता ।
अन्यास्ताभ्योऽपि सञ्जाताः शतशोऽथ सहस्रशः ॥ ७४ ॥
अभिगच्छन्ति ता नद्यो यतो वर्षति वासवः ।
इत्येष सन्निवेशो वः कुशद्वीपस्य वर्णितः ॥ ७५ ॥
शाकद्वीपेन विस्तारः प्रोक्तस्तस्य सनातनः ।
कुशद्वीपः समुद्रेण घृतमण्डोदकेन च ॥ ७६ ॥
सर्वतः सुमहान् द्वीपश्चन्द्रवत् परिवेष्टितः ।
विस्तारान्मण्डलाच्चैव क्षीरोदाद्द्विगुणो मतः ॥ ७७ ॥
ततः परं प्रवक्ष्यामि क्रौञ्चद्वीपं यथा तथा ।

कुशद्वीपस्य विस्तारादृद्विगुणस्तस्य विस्तरः ॥ ७८ ॥
घृतोदकः समुद्रो वै क्रौञ्चद्वीपेन संवृतः ।
चक्रनेमिप्रमाणेन वृतो वृत्तेन सर्वशः ॥ ७९ ॥
तस्मिन् द्वीपे नराः श्रेष्ठा देवनो गिरिरुच्यते ।
देवनात्परतश्चापि गोविन्दो नाम पर्वतः ॥ ७९ ॥
गोविन्दात् परतश्चापि क्रौञ्चस्तु प्रथमो गिरिः ।
क्रौञ्चात्परे पावनकः पावनादन्धकारकः ॥ ८० ॥
अन्धकारात्परे चापि देवावृन्नाम पर्वतः ।
देवावृतः परेणापि पुण्डरीको महान् गिरिः ॥ ८१ ॥
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्वताः ।
परस्परस्य द्विगुणो विष्कम्भो वर्षपर्वतः ॥ ८२ ॥
वर्षाणि तस्य वक्ष्यामि नामतस्तु निबोधत ।
क्रौञ्चस्य कुशलो देशो वामनस्य मनोऽनुगः ॥ ८३॥
मनोऽनुगात्परे चोष्णस्तृतीयोऽपि स उच्यते ।
उष्णात्परे पावनकः पावनादन्धकारकः ॥ ८४ ॥
अन्धकारकदेशात्तु मुनिदेशस्तथापरः ।
मुनिदेशात् परे चापि प्रोच्यते दुन्दुभिस्वनः ॥ ८५ ॥
सिद्धचारणसंकीर्णो गौरप्रायः शुचिर्जनः ।
स्मृतास्तत्रैव नद्यस्तु प्रतिवर्षङ्गताः शुभाः ॥ ८६ ॥
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
ख्यातो च पुण्डरीका च गङ्गाः सप्तविधाः स्मृताः ॥८७॥
तासां सहस्रशश्चान्या नद्यः पार्श्वसमीपगाः ।
अभिगच्छन्ति ता नद्यो बहुलाश्च बहूदकाः ॥ ८८ ॥
तेषां निसर्गो देशानामानुपूर्व्येण सर्वशः ।

न शक्यो विस्तराद्वक्तुमपि वर्षशतैरपि ॥ ८९ ॥
सर्गो यश्च प्रजानान्तु संहारो यश्च तेषु वै ।
अत ऊर्द्धं प्रवक्ष्यामि शाल्मलस्य निबोधत ॥ ९० ॥
शाल्मलो द्विगुणो द्वीपः क्रौञ्चद्वीपस्य विस्तरात् ।
परिवार्य्य समुद्रन्तु दधिमण्डोदकं स्थितम् ॥ ९१ ॥
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ।
कुत एव तु दुर्भिक्षं क्षमातेजोयुता हि ते ॥ ९२ ॥
प्रथमः सूर्य्यसङ्काशः सुमना नाम पर्वतः ।
पीतस्तु मध्यमश्चासीत्ततः कुम्भमयो गिरिः ॥ ९३ ॥
नाम्ना सर्वसुखो नाम दिव्यौषधिसमन्वितः ।
तृतीयश्चैव सौवर्णो भृङ्गपत्रनिभो गिरिः ॥ ९४ ॥
सुमहान् रोहितो नाम दिव्यो गिरिवरो हि सः ।
सुमनाः कुशली देशः सुखोदकः सुखोदयः ॥ ९५ ॥
रोहितो यस्तृतीयस्तु रोहिणो नाम विश्रुतः ।
तत्र रत्नान्यनेकानि स्वयं रक्षति वासवः ॥ ९६ ॥
प्रजापतिमुपादाय प्रभवो विदधत् स्वयम् ।
न तत्र मेघा वर्षन्ति शीतोष्णञ्च न तद्विधम् ॥ ९७ ॥
वर्णाश्रमाणां वार्ता वा त्रिषु द्वीपेषु विद्यते ।
न यज्ञेन च चन्द्रोऽस्ति ईर्ष्यासूया भयं तथा ॥ ९८ ॥
उद्भिदान्युदकान्यत्र गिरिप्रस्रवणानि च ।
भोजनं षड्रसं तत्र तेषां स्वयमुपस्थितम् ॥ ९९ ॥
अधर्मोत्तमं न तेष्वस्ति न लोभो न परिग्रहः ।
आरोग्यबलवन्तश्च एकान्तसुखिनो नराः ॥ १०० ॥
त्रिंशद्वर्षसहस्राणि मानसीं सिद्धिमास्थिताः ।

सुखमायुश्च रूपञ्च धर्मैश्वर्यन्तथैव च ॥ १०१ ॥
शाल्मलान्ते तु विज्ञेयं द्वीपेषु त्रिषु सर्वतः ।
व्याख्यातः शाल्मलान्तानां द्वीपानान्तु विधिः शुभः १०२
परिमण्डलस्तु द्वीपस्य चक्रवत् परिवेष्टितः ।
सुरोदेन समुद्रेण द्विगुणेन समन्वितः ॥ १०३ ॥

---

## द्वाविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । गोमेदकं प्रवक्ष्यामि षष्ठं द्वीपं तपोधनाः ! ।
सुरोदकसमुद्रस्तु गोमेदेन समावृतः ॥ १ ॥
शाल्मलस्य तु विस्तारात् द्विगुणस्तस्य विस्तरः ।
तस्मिन् द्वीपे तु विज्ञेयौ पर्वतौ द्वौ समाहितौ ॥२॥
प्रथमः सुमना नाम जात्यञ्जनमयो गिरिः ।
द्वितीयः कुमुदो नाम सर्वौषधिसमन्वितः ॥ ३ ॥
शातकौम्भमयः श्रीमान् विज्ञेयः सुमहाचितः ।
समुद्रे ष्टुरसोदेन वृतो गोमेदकश्च सः ॥ ४ ॥
षष्ठेन तु समुद्रेण सुरोदाद् द्विगुणेन च ।
धातकी कुमुदश्चैव द्व्यपुत्रौ सुविश्रुतौ ॥ ५ ॥
सौमनं प्रथमं वर्षं धातकीखण्डमुच्यते ।
धातकिनः स्मृतं तद्वै प्रथमं प्रथमस्य तु ॥ ६ ॥
गोमेदं यत् स्मृतं वर्षं नाम्ना सर्वसुखन्तु तत् ।
कुमुदस्य द्वितीयस्य द्वितीयं कुमुदं ततः ॥ ७ ॥
एतौ द्वौ पर्वतौ वृत्तौ शेषौ सर्वसमुच्छ्रितौ ।
पूर्वेण तस्य द्वीपस्य सुमनाः पर्वतः स्थितः ॥ ८ ॥

प्राक् पश्चिमायतैः पादैरासमुद्रादिति स्थितः ।
पश्चार्द्धे कुमुदस्तस्य एवमेव स्थितस्तु वै ॥ ९॥
एतैः पर्वतपादैस्तु सदेशो वै द्विधाकृतः ।
दक्षिणार्द्धं तु द्वीपस्य धातकीखण्डमुच्यते ॥ १० ॥
कुमुदस्तूत्तरे तस्य द्वितीयं वर्षमुत्तमम् ।
एतौ जनपदौ द्वौ तु गोमेदस्य तु विस्तृतौ ॥ ११ ॥
अतःपरं प्रवक्ष्यामि सप्तमं द्वीपमुत्तमम् ।
समुद्रेक्षुरसं चैव गोमेदाद्द्विगुणं हि सः ॥ १२ ॥
आवृत्य तिष्ठति द्वीपः पुष्करः पुष्करैर्वृतः ।
पुष्करेण वृतः श्रीमांश्चित्रसानुर्महागिरिः ॥ १३ ॥
कूटैश्चित्रैर्मणिमयैः शिलाजालसमुद्भवैः ।
द्वीपस्यैव तु पूर्वार्द्धे चित्रसानुः स्थितो महान् ॥ १४॥
परिमण्डलसहस्राणि विस्तीर्णः पञ्चविंशतिः ।
ऊर्द्ध्वं स वै चतुर्विंशद्योजनानां महाबलः ॥ १५ ॥
द्वीपार्द्धस्य परिच्छिन्नः पश्चिमे मानसो गिरिः ।
स्थितो वेलासमीपे तु पूर्णचन्द्र इवोदितः ॥ १६ ॥
योजनानां सहस्राणि सार्द्धं पञ्चाशदुच्छ्रितः ।
तस्य पुत्रो महावीतः पश्चिमार्द्धस्य रक्षिता ॥ १७ ॥
पूर्वार्द्धे पर्वतस्यापि द्विधा देशस्तु स स्मृतः ।
स्वादूदकेनोदधिना पुष्करः परिवारितः ॥ १८ ॥
विस्तारान्मण्डलाच्चैव गोमेदाद्द्विगुणेन तु ।
त्रिंशद्वर्षसहस्राणि तेषु जीवन्ति मानवाः ॥ १९ ॥
विपर्य्ययो न तेष्वस्ति एतत् स्वाभाविकं स्मृतम् ।
आरोग्यं सुखबाहुल्यं मानसीं सिद्धिमास्थिताः ॥२०

सुखमायुश्च रूपञ्च त्रिषु द्वीपेषु सर्वशः ।
अधमोत्तमौ न तेष्वासां तुल्यास्ते वीर्य्यरूपतः ॥ २१॥
न तत्र बध्यबधकौ नेर्ष्यासूया भयं तथा ।
न लोभो न च दम्भो वा न च द्वेषः परिग्रहः ॥२२॥
सत्यानृतेन तेष्वासां धर्माधर्मौ तथैव च ।
वर्णाश्रमाणां वार्ता च पाशुपाल्यं वणिक् कृषिः ॥२३॥
त्रयीविद्या दण्डनीतिः शुश्रूषा दण्ड एव च ।
न तत्र वर्षं नद्यो वा शीतोष्णञ्च न विद्यते ॥ २४ ॥
उद्भिदान्युदकानि स्युर्गिरिप्रस्रवणानि च ।
तुल्योत्तरकुरूणान्तु कालस्तत्र तु सर्वदा ॥ २५ ॥
सर्वतः सुखकालोऽसौ जराक्लेशविवर्जितः ।
सर्गस्तु धातकीखण्डे महावीते तथैव च ॥ २६ ॥
एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः
द्वीपस्यानन्तरो यस्तु समुद्रस्तत्समस्तु वै ॥ २७ ॥
एवं द्वीपसमुद्राणां वृद्धिर्ज्ञेया परस्परम्
अपाञ्चैव समुद्रेकात् समुद्र इति संज्ञितः ॥ २८ ॥
ऋषदसन्त्यो वर्षेषु प्रजा यत्र चतुर्विधाः ।
ऋषिरित्येव रमणे वर्षन्स्तेतेन तेषु वै ॥ २९ ॥
उदयतीन्दौ पूर्वे तु समुद्रः पूर्य्यते सदा
प्रक्षीयमाणे बहुले क्षीयतेऽस्तमिते च वै ॥ ३० ॥
आपूर्य्यमाणोह्युदधिरात्मनैवापि पूर्य्यते ।
ततो वै क्षीयमाणे तु स्वात्मन्येव ह्यपां क्षयः ॥३१॥
उदयात् पयसां योगात् पुष्णन्त्यापो यथास्वयम् ।
तथा स तु समुद्रोऽपि वर्द्धते शशिनोदये ॥ ३२ ॥

अन्यूनानतिरिक्ताश्च वर्द्धन्त्यापो हसन्ति च ।
उदयेऽस्तमये चेन्दोः पक्षयोः शुक्लकृष्णयोः ॥ ३३ ॥
क्षयवृद्धी समुद्रस्य शशिवृद्धिक्षये तथा ।
दशोत्तराणि पञ्चाहुरङ्गुलानां शतानि च ॥ ३४ ॥
अपां वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्वसु ।
द्विरापत्वात् स्मृतो द्वीपो दधनाच्चोदधिः स्मृतः ॥ ३५ ॥
अपगीर्णाश्च गिरयो पर्वबन्धाच्च पर्वताः ।
शाकद्वीपे तु वै शाकः पर्वतस्तेन चोच्यते ॥ ३६ ॥
कुशद्वीपे कुशस्तम्बो मध्ये जनपदस्य तु ।
क्रौञ्चद्वीपे गिरिः क्रौञ्चस्तस्य नाम्ना निगद्यते ॥ ३७ ॥
शाल्मलिः शाल्मलद्वीपे पूज्यते च महाद्रुमः ।
गोमेदके तु गोमेदः पर्वतस्तेन चोच्यते ॥ ३८ ॥
न्यग्रोधः पुष्करद्वीपे पद्मवत्तेन सः स्मृतः ।
पूज्यते स महादेवैर्ब्रह्मांशो व्यक्तसम्भवः ॥ ३९ ॥
तस्मिन् स वसति ब्रह्मा साध्यैः सार्द्धं प्रजापतिः ।
तत्र देवा उपासन्ते त्रयस्त्रिंशन्महर्षिभिः ॥ ४० ॥
स तत्र पूज्यते देवो देवैर्महर्षिसत्तमैः ।
जम्बूद्वीपात् प्रवर्त्तन्ते रत्नानि विविधानि च ॥ ४१ ॥
द्वीपेषु तेषु सर्वेषु प्रजानां क्रमशस्तु वै ।
आर्जवात् ब्रह्मचर्य्येण सत्येन च दमेन च ॥ ४२ ॥
आरोग्यायुःप्रमाणाभ्यां द्विगुणं द्विगुणं ततः ।
द्वीपेषु तेषु सर्वेषु यथोक्तं वर्षकेषु च ॥ ४३ ॥
गोपायन्ते प्रजास्तत्र सर्वैः सहजपण्डितैः ।
भोजनञ्चाप्रयत्नेन सदा स्वयमुपस्थितम् ॥ ४४ ॥

षड्रसं तन्महावीर्यं तत्र ते भुञ्जते जनाः ।
परेण पुष्करस्याथ आवृत्यावस्थितो महान् ॥ ४५ ॥
स्वादूदकसमुद्रस्तु स समन्तादवेष्टयत् ।
स्वादूदकस्य परितः शैलस्तु परिमण्डलः ॥ ४६ ॥
प्रकाशश्चाप्रकाशश्च लोकालोकः स उच्यते ।
आलोकस्तत्र चार्वाक् च निरालोकस्ततः परम् ॥४७॥
लोकविस्तारमात्रन्तु पृथिव्यार्द्धन्तु बाह्यतः ।
प्रतिच्छन्नं समन्तात्तु उदकेनावृतं महत् ॥ ४८ ॥
भूमेर्दशगुणाश्चापः समन्तात् पालयन्ति गाम् ।
अद्भ्यो दशगुणश्चाग्निः सर्वतो धारयत्यपः ॥ ४९ ॥
अग्नेर्दशगुणो वायुर्धारयन् ज्योतिरास्थितः ।
तिर्य्यक् च मण्डलो वायुर्भूतान्यावेष्ट्य धारयन् ॥५०॥
दशाधिकं तथाकाशं वायोर्भूतान्यधारयत् ।
भूतादिर्धारयन् व्योम तस्माद्दशगुणस्तु वै ॥ ५१ ॥
भूतादितो दशगुणं महद्भूतान्यधारयत् ।
महत्तत्वं ह्यनन्तेन अव्यक्तेन तु धार्य्यते ॥ ५२ ॥
आधाराधेयभावेन विकारास्ते विकारिणाम् ॥ ५३॥
पृथ्व्यादयो विकारास्ते परिच्छिन्नाः परस्परम् ।
परस्पराधिकाश्चैव प्रविष्टाश्च परस्परम् ॥ ५४ ॥
एवं परस्परोत्पन्ना धार्य्यन्ते च परस्परम् ।
यस्मात् प्रविष्टास्तेऽन्योन्यं तस्मात्ते स्थिरतां गताः ।
आसंस्ते ह्यविशेषाश्च विशेषा अन्यवेशनात् ॥ ५५ ॥
पृथ्व्यादयस्तु वाय्वन्ताः परिच्छिन्नास्तु तत्र वै ।
भूतेभ्यः परतस्तेभ्यो ह्यलोकः सर्वतः स्मृतः ॥ ५६ ॥

तथाह्यालोक आकाशे परिच्छिन्नानि सर्वशः ।
पात्रे महति पात्राणि यथा ह्यन्तगतानि च ॥ ५७ ॥
भवन्त्यन्योन्यहीनानि परस्परसमाश्रयात् ।
तथाह्यालोक आकाशे भेदास्त्वन्तर्गता गताः ॥५८ ॥
कृतान्येतानि तत्त्वानि अन्योन्यस्याधिकानि तु ।
यावदेतानि तत्त्वानि तावदुत्पत्तिरुच्यते ॥ ५९ ॥
जन्तूनामिह संस्कारो भूतेष्वन्तर्गतेषु वै ।
प्रत्याख्यायेह भूतानि कार्य्योत्पत्तिर्न विद्यते ॥ ६० ॥
तस्मात्परिमिता भेदाः स्मृताः कार्य्यात्मकास्तु वै ।
ते कारणात्मकाश्चैव स्युर्भेदा महदादयः ॥ ६१ ॥
इत्येवं सन्निवेशो यः पृथ्व्याः कात्स्नस्तु भागशः ।
सप्तद्वीपसमुद्राणां याथातथ्येन वै मया ॥ ६२ ॥
विस्तारान् मण्डलाश्चैव प्रसंख्यानेन चैव हि ।
विश्वरूपं प्रधानस्य परिमाणैकदेशिनः ॥ ६३ ॥
एतावत्सन्निवेशस्तु मया सम्यक् प्रकाशितः ॥ ६४ ॥
एतावदेव श्रोतव्यं सन्निवेशस्य पार्थिव ! ।
अत ऊर्द्धं प्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम् ॥६५ ॥

---

अथ त्रयोविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । अत ऊर्ध्वं प्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम् ।
सूर्य्याचन्द्रमसावेतौ भ्राजन्तौ यावदेव तु ॥ १ ॥
सप्तद्वीपसमुद्राणां द्वीपानां भाति विस्तरः ।
विस्तरार्द्धं पृथिव्यास्तु भवेदन्यत्र बाह्यतः ॥ २ ॥
पर्य्यासपरिमाणञ्च चन्द्रादित्यौ प्रकाशतः ।

पर्य्यासपारिमाण्यात्तु बुधैस्तुल्यं दिवः स्मृतम् ॥ ३ ॥
त्रीन् लोकान् प्रतिसामान्यात् सूर्य्यो यात्यविलम्बतः।
अचिरात्तु प्रकाशेन अवनात्तु रविः स्मृतः ॥ ४ ॥
भूयो भूयः प्रवक्ष्यामि प्रमाणं चन्द्रसूर्य्ययोः।
महितत्वान् महच्छब्दो ह्यस्मिन्नर्थे निगद्यते ॥
अस्य भारतवर्षस्य विष्कम्भात्तुल्यविस्तृतम्।
मण्डलं भास्करस्याथ योजनैस्तन्निबोधत ॥ ६ ॥
नवयोजनसाहस्रो विस्तारो मण्डलस्य तु।
विस्तारात्त्रिगुणश्चापि परिणाहोऽत्र मण्डले ॥ ७ ॥
विष्कम्भान्मण्डलाच्चैव भास्कराद् द्विगुणः शशी।
अतः पृथिव्या वक्ष्यामि प्रमाणं योजनैः पुनः ॥ ८ ॥
सप्तद्वीपसमुद्राया विस्तारो मण्डलस्य तु।
इत्येतदिह संख्यातं पुराणे परिमाणतः ॥ ९ ॥
तद्वक्ष्यामि प्रसंख्याय साम्प्रतञ्चाभिमानिभिः।
अभिमानिनो ह्यतीता ये तुल्यास्ते साम्प्रतैस्त्विह॥१०॥
देवद्वै रतीतास्तु रूपैर्नामभिरेव च।
तस्माद्वै साम्प्रतैर्देवैर्वक्ष्यामि वसुधातलम् ॥ ११ ॥
दिव्यस्य सन्निवेशोवै साम्प्रतैरेव कृत्स्नशः।
शतार्द्धकोटिविस्तारा पृथिवी कृत्स्नशः स्मृता ॥ १२॥
तस्याश्चार्द्धप्रमाणञ्च मेरोश्चैवान्तरोत्तरम्।
मेरोर्मध्ये प्रतिदिशं कोटिरेका तु सा स्मृता ॥१३॥
तथा शतसहस्राणामेकोननवतिं पुनः।
पञ्चाशच्च सहस्राणि पृथिव्यर्द्धस्य विस्तरः ॥ १४ ॥
पृथिव्या विस्तरं कृत्स्नं योजनैस्तन्निबोधत ।

तिस्रः कोटयस्तु विस्तारात् संख्यातास्तु चतुर्द्दिशम् ॥ १५ ॥
तथा शतसहस्राणा मेकोनाशीति रुच्यते ।
सप्तद्वीपसमुद्रायाः पृथिव्याः स तु विस्तरः ॥ १६ ॥
विस्तारं त्रिगुणश्चैव पृथिव्यन्तरमण्डलम् ।
गणितं योजनानान्तु कोटयस्त्वेकादश स्मृताः ॥ १७ ॥
तथा शतसहस्राणां सप्तत्रिंशाधिकास्तु ताः ।
इत्येतद्वैप्रसंख्यातं पृथिव्यन्तरमण्डलम् ॥ १८ ॥
तारकासन्निवेशस्य दिवि यावत्तु मण्डलम् ।
पर्य्याप्तसन्निवेशस्य भूमेस्तावत्तु मण्डलम् ॥ १८ ॥
पर्य्यासपरिमाणञ्च भूमेस्तुल्यं दिवः स्मृतम् ।
मेरोः प्राच्यां दिशायान्तु मानसोत्तरमूर्द्धनि ॥ १८ ॥
वस्वौकसारामाहेन्द्री पुण्या हेमपरिष्कृता ।
दक्षिणेन पुनर्मेरोर्मानसस्य तु पृष्ठतः ॥ २० ॥
वैवस्वतो निवसति यमः संयमने पुरे ।
प्रतीच्यान्तु पुनर्मेरोर्मानसस्य तु मूर्द्धनि ॥ २१ ॥
सुषा नाम पुरी रम्या वरुणस्यापि धीमतः ।
दिश्युत्तरायां मेरोस्तु मानसस्यैव मूर्द्धनि ॥ २२ ॥
तुल्या महेन्द्रपुर्य्यापि सोमस्यापि विभावरी ।
मानसोत्तरपृष्ठे तु लोकपालाश्चतुर्द्दिशम् ॥ २३ ॥
स्थिता धर्म्मव्यवस्थार्थं लोकसंरक्षणाय च ।
लोकपालोपरिष्टात्तु सर्वतो दक्षिणायने ॥ २४ ॥
काष्ठागतस्य सूर्य्यस्य गतिस्तत्र निबोधत ।
दक्षिणाप्रक्रमे सूर्य्यः क्षिप्तेषुरिव सर्पति ॥ २५ ॥
ज्योतिषाञ्चक्रमादाय सततं परिगच्छति ।

मध्यगश्चामरावत्यां यदा भवति भास्करः ॥ २६ ॥
वैवस्वते संयमने उद्यन् सूर्य्यः प्रदृश्यते ।
सुषायामर्द्धरात्रस्तु विभावर्य्यास्तमेति च ॥ २७ ॥
वैवस्वते संयमने मध्याह्ने तु रविर्यदा ।
सुषायामथ वारुण्यामुत्तिष्ठन् स तु दृश्यते ॥ २८ ॥
विभावर्य्यामर्द्धरात्रं माहेन्द्र्यामस्तमेव च ।
सुषायामथ वारुण्यां मध्याह्ने तु रविर्यदा ॥ २९ ॥
विभावर्य्यां सोमपुर्य्यां उत्तिष्ठति विभावसुः ।
महेन्द्रस्यामरावत्यामुद्गच्छति दिवाकरः ॥ ३० ॥
अर्द्धरात्रं संयमने वारुण्यामस्तमेति च ।
स शीघ्रमेव पर्य्येति भानुरालातचक्रवत् ॥ ३१ ॥
भ्रमन् वै भ्रममाणानि ऋक्षाणि चरते रविः ।
एवं चतुर्षु पार्श्वेषु दक्षिणां तेषु सर्पति ॥ ३२ ॥
उदयास्तमये वा सावुत्तिष्ठति पुनः पुनः ।
पूर्वाह्णे चापराह्णे च द्वौ द्वौ देवालयौ तु सः ॥३३॥
पतत्येकन्तु मध्याह्ने भाभिरेव च रश्मिभिः ।
उदितो वर्द्धमानाभिर्मध्याह्ने तपते रविः ॥ ३४ ॥
अतः परं ह्रसन्तीभिर्गोभिरस्तं स गच्छति ।
उदयास्तमयाभ्यां च स्मृते पूर्वापरे तु वै ॥ ३५ ॥
यादृक् पुरस्तात्तपति यादृक् पृष्ठे तु पार्श्वयोः ।
यत्रोदयस्तु दृश्येत तेषां स उदयः स्मृतः ।
प्रणाशं गच्छते यत्र तेषामस्तः स उच्यते ।
सर्वेषामुत्तरे मेरुर्लोकालोकस्य दक्षिणे ॥ ३७ ॥
विदूरभावादर्कस्य भूमेरेखा गतस्य च ।

अयन्ते रश्मयो यस्मात्तेन रात्रौ न दृश्यते ॥ ३८ ॥
ऊर्द्धं शतसहस्रांशुः स्थितस्तत्र प्रदृश्यते ।
एवं पुष्करमध्ये तु यदा भवति भास्करः ॥ ३९ ॥
त्रिंशद्भागस्तु मेदिन्या मुहूर्त्तेन स गच्छति ।
योजनानां सहस्रस्य इमां संख्यां निबोधत ॥ ४० ॥
पूर्णं शतसहस्राणां एकत्रिंशच्च सा स्मृता ।
पञ्चाशच्च सहस्राणि तथान्यान्यधिकानि च ॥ ४१ ॥
मौहूर्त्तिकी गतिर्ह्येषा सूर्य्यस्य तु विधीयते ।
एतेन क्रमयोगेन यदा काष्ठान्तु दक्षिणाम् ॥ ४२ ॥
परिगच्छति सूर्य्योऽसौ मासं काष्ठामुदक् दिनात् ।
मध्येन पुष्करस्याथ भ्रमते दक्षिणायने ॥ ४३ ॥
मानसोत्तरमेरोस्तु अन्तरं त्रिगुणं स्मृतम् ।
सर्वतो दक्षिणायान्तु काष्ठायां तन्निबोधत ॥ ४४ ॥
नवकोटयः प्रसंख्याता योजनैः परिमण्डलम् ।
तथा शतसहस्राणि चत्वारिंशच्च पञ्च च ॥ ४५ ॥
अहोरात्रात् पतङ्गस्य गतिरेषा विधीयते ।
दक्षिणादिङ् निवृत्तोऽसौ विषुवस्थो यदा रविः॥४६॥
क्षीरोदस्य समुद्रस्योत्तरतोऽपि दिशं चरन् ।
मण्डलं विषुवच्चापि योजनैस्तन्निबोधत ॥ ४७ ॥
तिस्रः कोटयस्तु सम्पूर्णा विषुवस्यापि मण्डलम् ।
तथा शतसहस्राणि विंशत्येकाधिकानि तु ॥ ४८ ॥
श्रावणे चोत्तरां काष्ठां चित्रभानुर्यदा भवेत् ।
गोमेदस्य परद्वीपे उत्तराञ्च दिशं चरन् ॥ ४९ ॥
उत्तरायाः प्रमाणन्तु काष्ठाया मण्डलस्य तु ।

दक्षिणोत्तरमध्यानि तानि विन्द्याद्यथाक्रमम् ॥ ५० ॥
स्थानं जरद्गवं मध्ये तथैरावतमुत्तरम्।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥ ५१ ॥
नागवीथ्युत्तरा वीथी ह्यजवीथिस्तु दक्षिणा।
उभे आषाढ़मूलन्तु अजवीथ्यादयस्त्रयः ॥ ५२ ॥
अभिजित् पूर्वतः स्वातिर्नागवीथ्युत्तरास्त्रयः।
अश्विनी कृत्तिका याम्या नागवीथ्यस्त्रयः स्मृताः ॥५३॥
रोहिण्यार्द्रा मृगशिरो नागवीथिरिति स्मृता।
पुष्याश्लेषा पुनर्वस्वोर्वीथी चैरावती स्मृता ॥ ५४ ॥
तिस्रस्तु वीथयो ह्येता उत्तरामार्ग उच्यते।
पूर्वं उत्तरफल्गुन्यौ मघा चैवार्षभी भवेत् ॥ ५५ ॥
पूर्वोत्तरप्रोष्ठपदौ गोवीथी रेवती स्मृता।
श्रवणञ्च धनिष्ठा च वारुणञ्च जरद्गवम् ॥ ५६ ॥
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते।
हस्त चित्रा तथा स्वाती ह्यजवीथिरिति स्मृता ॥५७॥
जेष्ठा विशाखा मैत्रञ्च मृगवीथी तथोच्यते।
मूलं पूर्वोत्तराषाढ़े वीथी वैश्वानरी भवेत् ॥ ५८ ॥
स्मृतास्तिस्रस्तु वीथ्यास्ता मार्गे वै दक्षिणे पुनः।
काष्ठयोरन्तरञ्चैत दृश्यते योजनैः पुनः ॥ ५९ ॥
एतच्छतसहस्राणामेकत्रिंशत्तु वै स्मृतम्।
शतानि त्रीणि चान्यानि त्रयस्त्रिंशत्तथैव च ॥ ६० ॥
काष्ठयोरन्तरं ह्येतद्योजनानां प्रकीर्त्तितम्।
काष्ठयोर्लेखयोश्चैव अयने दक्षिणोत्तरे ॥ ६१ ॥
ते वक्ष्यामि प्रसंख्याय योजनैस्तु निबोधत।

एकैकमन्तरं तद्वदुक्तान्येतानि सप्तभिः ६२ ॥
सहस्रेणातिरिक्ता च ततोऽन्या पञ्चविंशतिः ।
लेखयोः काष्ठयोश्चैव बाह्याभ्यन्तरयोश्चरन् ॥ ६३ ॥
अभ्यन्तरं स पर्य्येति मण्डलान्युत्तरायणे ।
बाह्यतो दक्षिणेनैव सततं सूर्य्यमण्डलम् ॥ ६४ ॥
चरन्नसौ वृ (?) शीत्याश्च ह्यशीत्या मण्डलान् शतम् ।
अभ्यन्तरं स पर्य्येति क्रमते मण्डलानि तु ॥ ६५ ॥
प्रमाणं मण्डलस्यापि योजनानान्निबोधत ।
योजनानां सहस्राणि दश चाष्टौ तथा कृतम् ॥६६॥
अधिकान्यष्टपञ्चाशद्योजनानि तु वै पुनः ।
विष्कम्भो मण्डलस्यैव तिर्य्यक् स तु विधीयते ॥६७॥
अहस्तु चरते नाभेः सूर्य्यो वै मण्डलं क्रमात् ।
कुलालचक्रपर्य्यन्तो यथा चन्द्रो रविस्तथा ॥ ६८ ॥
दक्षिणे चक्रवत् सूर्य्य तथा शीघ्रं निवर्त्तते ।
तस्मात् प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ॥६९॥
सूर्य्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्दक्षिणायने ।
त्रयोदशार्द्धं ऋक्षाणां मध्ये चरति मण्डलम् ॥ ७० ॥
मुहूर्त्तैस्तानि ऋक्षाणि नक्तमष्टादशैश्चरन् ।
कुलालचक्रमध्यस्थो यथा मन्दं प्रसर्पति ॥ ७१ ॥
उदग्याने तथा सूर्य्यः सर्पते मन्दविक्रमः ।
तस्माद्दीर्घेण कालेन भूमिं सोऽल्पां प्रसर्पति ॥ ७२ ॥
सूर्य्योऽष्टादशभिरह्नो मुहूर्त्तैरुदगायने ॥ ७३ ॥
त्रयोदशानां मध्ये तु ऋक्षाणां चरते रविः ।
मुहूर्त्तैस्तानि ऋक्षाणि रात्रौ द्वादशभिश्चरन् ॥ ७४ ॥

ततो मन्दतरं ताभ्यां चक्रन्तु भ्रमते पुनः ।
मृत्पिण्ड इव मध्यस्थो भ्रमतेऽसौ ध्रुव स्तथा ॥ ७४ ॥
मुहूर्त्तैस्त्रिंशता तावदहोरात्रं ध्रुवो भ्रमन् ।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि तु ॥ ७५ ॥
उत्तरक्रमणेऽर्कस्य दिवा मन्दगतिः स्मृता ।
तस्यैव तु पुनर्नक्तं शीघ्रा सूर्य्यस्य वै गतिः ॥७६॥
दक्षिणप्रक्रमे वापि दिवा शीघ्रं विधीयते ।
गतिः सूर्यस्य वै नक्तं मन्दा चापि विधीयते ॥७७॥
एवं गतिविशेषेण विभजन् रात्र्यहानि तु ।
अजवीथ्यां दक्षिणायां लोकालोकस्य चोत्तरम् ॥७८॥
लोकसन्तानतोह्येष वैश्वानरपथाद्बहिः ।
व्युष्टिर्यावत् प्रभा सौरी पुष्करात् संप्रवर्तते ॥ ७९ ॥
पार्श्वेभ्यो बाह्यतस्तावल्लोकालोकश्च पर्वतः ।
योजनानां सहस्राणि दशोर्द्धं चोच्छ्रितो गिरिः ॥८०॥
प्रकाशश्चा प्रकाशश्च पर्वतः परिमण्डलः ।
नक्षत्रचन्द्रसूर्याश्च ग्रहास्तारागणैः सह ॥ ८१ ॥
अभ्यन्तरे प्रकाशन्ते लोकालोकस्य वै गिरेः ।
एतावानेव लोकस्तु निरालोकस्ततः परम् ॥ ८२ ॥
लोक आलोकने धातुर्निरालोकस्त्वलोकता ।
लोकालोकौ तु सन्धत्ते तस्मात् सूर्यः परिभ्रमन्॥८३॥
तस्मात् सन्ध्येति तामाहुरुषाव्युष्ट्यैर्यथान्तरम् ।
उषारात्रिः स्मृता विप्रैर्व्युष्टिश्चापि अहः स्मृतम् ॥८४॥
त्रिंशत्कलो मुहूर्त्तस्तु अहस्ते दशपञ्च च ।

ह्रासो वृद्धिरहर्भागैर्दिवसानां यथा तु वै ॥ ८५ ॥
सन्ध्या मुहूर्तमात्रायां ह्रासवृद्धी तु ते स्मृते ।
लेखाप्रभृत्यथादित्ये त्रिमुहूर्तागते तु वै ॥ ८६ ॥
प्रातः स्मृतस्ततः कालो भागांश्चाहुस्स पञ्च च ।
तस्मात् प्रातर्गतात् कालात् मुहूर्ताः सङ्गवस्त्रयः ॥८७॥
मध्याह्नस्त्रिमुहूर्तस्तु तस्मात्कालादनन्तरम् ।
तस्मान्मध्यन्दिनात्कालात् अपराह्ण इति स्मृतः ॥८८॥
त्रय एव मुहूर्तास्तु काल एषस्मृतो बुधैः ।
अपराह्णव्यतीताच्च कालः सायं स उच्यते ॥ ८९ ॥
दशपञ्च मुहूर्ताह्नो मुहूर्तास्त्रय एव च ।
दशपञ्च मुहूर्तं वै अहस्तु विषुवे स्मृतम् ॥ ९० ॥
वर्धत्यतो ह्रसत्येव अयने दक्षिणोत्तरे ।
अहस्तु ग्रसते रात्रिं रात्रिस्तु ग्रसते अहः ॥ ९१ ॥
शरद्वसन्तयोर्मध्यं विषुवत्तु विधीयते ।
आलोकान्तः स्मृतो लोको लोकाच्चालोक उच्यते॥९२॥
लोकपालाः स्थितास्तत्र लोकालोकस्य मध्यतः ।
चत्वारस्ते महात्मानस्तिष्ठन्त्याभूतसंप्लवम् ॥ ९३ ॥
सुधामा चैव वैराजः कर्दमश्च प्रजापतिः ।
हिरण्यरोमा पर्जन्यः केतुमान् राजसश्च सः ॥ ९४॥
निर्द्वन्द्वा निरभीमाना निस्तन्द्रा निष्परिग्रहाः ।
लोकपालाः स्थितास्त्वेते लोकालोके चतुर्दिशम् ॥९५
उत्तरं यदगस्त्यस्य शृङ्गं देवर्षिसेवितम् ।
पितृयानः स्मृतः पन्था वैश्वानरपथाद्बहिः ॥ ९६ ॥
तत्रासते प्रजाकामा ऋषयो येऽग्निहोत्रिणः ।

लोकस्य सन्तानकराः पितृयाने पथि स्थिताः ॥९७॥
भूतारम्भकृतं कर्म आशिषश्च विशाम्पते!।
प्रारभन्ते लोककामास्तेषां पन्थाः स दक्षिणः ॥ ९८॥
चलितन्ते पुनर्धर्मं स्थापयन्ति युगेयुगे।
सन्ततपसा चैव मर्यादाभिः श्रुतेन च ॥ ९९ ॥
जायमानास्तु पूर्वे वै पश्चिमानां गृहेषु ते।
पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेष्विह ॥ १०० ॥
एवमावर्तमानास्ते वर्तन्त्याभूतसंप्लवम्।
अष्टाशीतिसहस्राणि ऋषीणां गृहमेधिनाम् ॥ १०१ ॥
सवितुर्दक्षिणं मार्गं माश्रित्याभूतसंप्लवम्।
क्रियावतां प्रसंख्येषा ये श्मशानानि भेजिरे ॥ १०२ ॥
लोकसंव्यवहारार्थं भूतारम्भकृतेन च।
इच्छाद्वेषरताच्चैव मैथुनोपगमाच्च वै ॥ १०३ ॥
तथा कामकृतेनेह सेवनाद्विषयस्य च।
इत्येतैः कारणैः सिद्धाः श्मशानानीह भेजिरे ॥ १०४॥
प्रजैषिणः सप्त ऋषयो द्वापरेष्विह जज्ञिरे।
सन्ततिन्ते जुगुप्सन्ते तस्मान्मृत्युर्जितस्तु तैः ॥ १०५ ॥
अष्टाशीतिसहस्राणि तेषा मप्यूर्ध्वरेतसाम्।
उदक्पन्था न पर्यन्त माश्रित्याभूतसंप्लवम् ॥ १०६ ॥
ते सम्प्रयोगाल्लोकस्य मिथुनस्य च वर्जनात्।
ईर्ष्याद्वेषनिवृत्त्या च भूतारम्भविवर्जनात् ॥ १०७ ॥
इत्येतैः कारणैः शुद्धैस्तेऽमृतत्वं हि भेजिरे।
आभूतसंप्लवस्थानाममृतत्वं विभाव्यते ॥ १०८ ॥
त्रैलोक्यस्थितिकालो हि न पुनर्मारगामिनाम्।

भ्रूणहत्याश्वमेधाद्यैः पापपुण्यनिभैः परम् ॥ १०९ ॥
आभूतसंप्लवान्ते तु क्षीयन्ते चोर्ध्वरेतसः ।
ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्रानुसंस्थितः ॥ ११० ॥
एतद्विष्णुपदं दिव्यं तृतीयं व्योम्नि भास्वरम् ।
यत्र गत्वा न शोचन्ति तद्विष्णोः परमम्पदम् ।
धर्मे ध्रुवस्य तिष्ठन्ति ये तु लोकस्य काङ्क्षिणः ॥१११ ॥

---

अथ चतुर्विंशत्यधिकशततमोऽध्यायः ।

एवं श्रुत्वा कथां दिव्यां मब्रुवन् लोमहर्षणिम् ।
सूर्याचन्द्रमसोश्चारं ग्रहाणाञ्चैव सर्वशः ॥ १ ॥
ऋषय ऊचुः । भ्रमन्ति कथमेतानि ज्योतींषि रविमण्डले ।
अव्यूहेनैव सर्वाणि तथा चासङ्करेण वा ॥ २ ॥
कश्च भ्रामयते तानि भ्रमन्ति यदि वा स्वयम् ।
एतद्वेदितुमिच्छामस्ततो निगद सत्तम ! ॥ ३ ॥
सूत उवाच । भूतसंमोहनं ह्येतद्ब्रुवतो मे निबोधत ।
प्रत्यक्षमपि दृश्यं तत् संमोहयति वै प्रजाः ॥ ४ ॥
योऽसौ चतुर्दशर्क्षेषु शिंशुमारो व्यवस्थितः ।
उत्तानपादपुत्रोऽसौ मेढीभूतो ध्रुवो दिवि ॥ ५ ॥
सैष भ्रमन् भ्रामयते चन्द्रादित्यौ ग्रहैः सह ।
भ्रमन्त मनुसर्पन्ति नक्षत्राणि च चक्रवत् ॥ ६ ॥
ध्रुवस्य मनसा यो वै भ्रमते ज्योतिषाङ्गणः ।
वातानीकमयैर्बन्धैर्ध्रुवे बद्धः प्रसर्पति ॥ ७ ॥
तेषां भेदश्च योगश्च तथा कालस्य निश्चयः ।
अस्तोदयास्तथोत्पाता अयने दक्षिणोत्तरे ॥ ८ ॥

विषुवद्ग्रहवर्णाश्च सर्वमेतत् ध्रुवेरितम् ।
जीमूता नाम ते मेघा यदेभ्यो जीवसम्भवः ॥ ९ ॥
द्वितीय आवहन् वायुर्मेघास्ते त्वभिसंश्रिताः ।
इतो योजनमात्राच्च अध्यर्द्धविकृता अपि ॥ १० ॥
वृष्टिसर्गस्तथा तेषां धाराधाराः प्रकीर्तिताः ।
पुष्करावर्तका नाम ये मेघाः पक्षसम्भवाः ॥ ११ ॥
शक्रेण पक्षाश्छिन्ना वै पर्वतानां महौजसा ।
कामगानां प्रवृद्धानां भूतानां नाशमिच्छता ॥ १२ ॥
पुष्करा नाम ते पक्षा बृहन्तस्तोयधारिणः ।
पुष्करावर्तका नाम कारणेनेह शब्दिताः ॥ १३ ॥
नानारूपधराश्चैव महाघोरस्वराश्च ते ।
कल्पान्तवृष्टिकर्तारः कल्पान्ताग्नेर्नियामकाः ॥ १४ ॥
वाय्वाधारा वहन्ते वै साम्रताः कल्पसाधकाः ।
यान्यस्याण्डस्य भिन्नस्य प्राकृतान्यभवंस्तदा ॥ १५ ॥
यस्मिन् ब्रह्मा समुत्पन्नश्चतुर्वक्त्रः स्वयं प्रभुः ।
तान्येवाण्डकपालानि सर्वे मेघाः प्रकीर्तिताः ॥ १६ ॥
तेषामप्यायनं धूमः सर्वेषामविशेषतः ।
तेषां श्रेष्ठश्च पर्जन्यश्चत्वारश्चैव दिग्गजाः ॥ १७ ॥
गजानां पर्वतानाञ्च मेघानां भोगिभिः सह ।
कुलमेकं द्विधाभूतं योनिरेका जलं स्मृतम् ॥ १८ ॥
पर्जन्यो दिग्गजाश्चैव हेमन्ते शीतसम्भवम् ।
तुषारवर्षं वर्षन्ति सदा सस्यविवृद्धये ॥ १९ ॥
षष्ठः परिवहो नाम वायुस्तेषां परायणः ।
योऽसौ बिभर्ति भगवन् ! गङ्गा माकाशगोचराम् ॥ २० ॥

दिव्यामृतजलां पुण्यां निपत्रामिति विश्रुताम् ।
तस्या विप्रुष्मितस्तोयं दिग्गजाः पृथुभिः करैः ॥ २१ ॥
शीकरान् सम्प्रमुञ्चन्ति नीहार इति स स्मृतः ।
दक्षिणेन गिरिर्योऽसौ हेमकूट इति स्मृतः ॥ २२ ॥
उदग्धिमवतः शैलस्योत्तरे चैव दक्षिणे ।
पुण्ड्रं नाम समाख्यातं सम्यक् दृष्टिविवृद्धये ॥ २३ ॥
तस्मिन् प्रवर्त्तते वर्षं तत्तुषारसमुद्भवम् ।
ततो हिमवतो वायुर्हिमं तत्र समुद्भवम् ॥ २४ ॥
आनयत्यात्मवेगेन सिञ्चयानो महागिरिम् ।
हिमवन्तमतिक्रम्य वृष्टिशेषं ततः परम् ॥ २५ ॥
इभास्ये च ततः पश्चाद्दिदन्तू तविवृद्धये ।
वर्षद्वयं समाख्यातं सम्यग् वृष्टिविवृद्धये ॥ २६ ॥
मेघाश्चाप्यायनं चैव सर्वमेतत् प्रकीर्त्तितम् ।
सूर्य्य एव तु वृष्टीनां स्रष्टा समुपदिश्यते ॥ २७ ॥
वर्षं धर्मं हिमं रात्रिं सन्ध्ये चैव दिनं तथा ।
शुभाशुभफलानीह ध्रुवात् सर्वं प्रवर्त्तते ॥ २८ ॥
ध्रुवेणाधिष्ठिताश्चापः सूर्य्यो वै ग्टह्य तिष्ठति ।
सर्वभूतशरीरेषु त्वापो ह्यनुश्रिताश्च याः ॥ २९ ॥
दह्यमानेषु तेष्वेह जङ्गमस्थावरेषु च ।
धूमभूतास्तु ता ह्यापो निष्क्रामन्तीह सर्वशः ॥ ३० ॥
तेन चाभ्राणि जायन्ते स्थानमभ्रमयं स्मृतम् ।
तेजोभिः सर्वलोकेभ्य आदत्ते रश्मिभिर्जलम् ॥ ३१ ॥
समुद्राद्वायुसंयोगात् वहन्त्यापो गभस्तयः ।
ततस्त्वृतुवशात्काले परिवर्त्तन् दिवाकरः ॥ ३२ ॥

नियच्छन्त्यापो मेघेभ्यः शुक्लाः शुक्लैस्तु रश्मिभिः।
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः॥ ३३॥
ततो वर्षति षण्मासान् सर्वभूतविवृद्धये।
वायुभिस्तनितं चैव विद्युतस्त्वग्निजाः स्मृताः॥ ३४॥
मेघनाच्च मिहेर्धातोर्मेघत्वं व्यञ्जयन्ति च।
न भ्रश्यन्ते ततोऽप्याप तस्मादभ्रस्य वै स्थितिः।
स्रष्टाऽसौ वृष्टिसर्गस्य ध्रुवेणाधिष्ठितो रविः॥ ३५॥
ध्रुवेणाधिष्ठितो वायुर्वृष्टिं संहरते पुनः।
ग्रहान्निःसृत्य सूर्य्यात्तु चरते ऋक्षमण्डलम्॥ ३६॥
चारस्यान्ते विशत्यर्कं ध्रुवेण समधिष्ठितम्।
अतः सूर्य्यरथस्यापि सन्निवेशं प्रचक्षते॥ ३७॥
स्थितेन त्वेकचक्रेण पञ्चारेण त्रिनाभिना।
हिरण्मयेनाणुना वै अष्टचक्रैकनेमिना।
चक्रेण भास्वता सूर्य्यः स्यन्दनेन प्रसर्पिणा॥ ३८॥
शतयोजनसाहस्रो विस्तारायाम उच्यते।
द्विगुणा च रथोपस्थादीषा दण्डः प्रमाणतः॥ ३९॥
स तस्य ब्रह्मणा सृष्टो रथोऽह्यर्थवशेन तु।
असङ्गः काञ्चनो दिव्यो युक्तः पवनगैर्हयैः॥ ४०॥
छन्दोभिर्वाजिरूपैस्तैर्यथाचक्रं समास्थितैः।
वारुणस्य रथस्येह लक्षणैः सदृशश्च सः॥ ४१॥
तेनाऽसौ चरति व्योम्नि भास्वाननुदिनन्दिवि।
अथाङ्गानि तु सूर्य्यस्य प्रत्यङ्गानि रथस्य च।
सम्वत्सरस्यावयवैः कल्पितानि यथाक्रमम्॥ ४२॥
अहर्नाभिस्तु सूर्य्यस्य एकचक्रस्य वै स्मृतः।

अरात्सस्यात्सरात्तस्य नेम्यः षडृतवः स्मृताः ॥४३॥
रात्रिर्वरूथो धर्मश्च ध्वज ऊर्ध्वं व्यवस्थितः ।
अक्षकोट्योर्युगान्यस्य आर्तवाश्वाः कलाः स्मृताः ॥४४॥
तस्य काष्ठा स्मृता घोणा दन्तपङ्क्तिः क्षणास्तु वै ।
निमेषश्चानुकर्षोऽस्य ईषा चास्य कला स्मृता ॥ ४५ ॥
युगाक्षकोटी ते तस्य अर्थकामावुभौ स्मृतौ ।
सप्ताश्वरूपाश्छन्दांसि वहन्ते वायुरंहसा ॥ ४६ ॥
गायत्री चैव त्रिष्टुप् च जगत्यनुष्टुप् तथैव च ।
पङ्क्तिश्च बृहती चैव उष्णिगेव तु सप्तमः ॥ ४७ ॥
चक्रमक्षे निबद्धन्तु ध्रुवे चाक्षः समर्पितः ।
सहचक्रो भ्रमत्यक्षः सहाक्षो भ्रमति ध्रुवम् ॥ ४८ ॥
अक्षः सहैव चक्रेण भ्रमतेऽसौ ध्रुवेरितः ।
एवमर्थवशात्तस्य सन्निवेशो रथस्य तु ॥ ४९ ॥
तथा संयोगभागेन सिद्धो वै भास्करो रथः ।
तेनाऽसौ तरणिर्देवो नभसः सर्पते दिवम् ॥ ५० ॥
युगाक्षकोटी ते तस्य दक्षिणे स्यन्दनस्य तु ।
भ्रमतो भ्रमतो रश्मी तौ चक्रयुगयोस्तु वै ॥ ५१ ॥
मण्डलानि भ्रमे तेऽस्य खेचरस्य रथस्य तु ।
कुलालचक्रभ्रमवन्मण्डलं सर्वतोदिशम् ॥ ५२ ॥
युगाक्षकोटि ते तस्य वातोर्मीस्यन्दनस्य तु ।
संक्रमे ते ध्रुवमहीमण्डले सर्वतोदिशम् ॥ ५३ ॥
भ्रमतस्तस्य रश्मी ते मण्डले तूत्तरायणे ।
वर्द्धते दक्षिणेष्वत्र भ्रमतो मण्डलानि तु ॥ ५४ ॥
युगाक्षकोटी सम्बद्धौ द्वे रश्मी स्यन्दनस्य ते ।

ध्रुवेण प्रगृहीतौ तौ रश्मी धारयता रविम् ॥ ५५ ॥
आकृष्यते यदा ते तु ध्रुवेण समधिष्ठिते ।
तदा सोऽभ्यन्तरे सूर्य्यो भ्रमते मण्डलानि तु ॥ ५६ ॥
अशीतिमण्डलशतं काष्ठयोरुभयोश्चरन् ।
ध्रुवेण मुच्यमानेन पुनारश्मियुगेन च ॥ ५७ ॥
तथैव बाह्यतः सूर्य्यो भ्रमते मण्डलानि तु ।
उद्वेष्टयन्वै वेगेन मण्डलानि तु गच्छति ॥ ५८ ॥

---

अथ पञ्चविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । स रथोऽधिष्ठितो देवैर्मासि मासि यथाक्रमम् ।
ततो वहत्यथादित्यं बहुभिर्ऋषिभिः सह ॥ १ ॥
गन्धर्वैरप्सरोभिश्च सर्पग्रामणि राक्षसैः ।
एते वसन्ति वै सूर्य्ये मासौ द्वौ द्वौ क्रमेण च ॥ २ ॥
धातार्यमा पुलस्त्यश्च पुलहश्च प्रजापती ।
उरगौ वासुकिश्चैव सङ्कीर्णश्चैव तावुभौ ॥ ३ ॥
तुम्बरुर्नारदश्चैव गन्धर्वौ गायताम्वरौ ।
क्रतस्थलाप्सराश्चैव याच सा पुञ्जिकस्थली ॥ ४ ॥
ग्रामण्यौ रथकृत्तस्य रथौजाश्चैव तावुभौ ।
रक्षोहेतिः प्रहेतिश्च यातु धानादुभौ स्मृतौ ॥ ५ ॥
मधुमाधवयोर्ह्येष गणो वसति भास्करे ।
वसन् ग्रीष्मे तु द्वौ मासौ मित्रश्च वरुणश्च वै ॥ ६ ॥
ऋषी अत्रि र्वशिष्ठश्च नागौ तक्षकरम्भकौ ।
मेनका सहधन्या च हाहा हूहूश्च गायकौ ॥ ७ ॥
रथन्तरश्च ग्रामण्यौ रथकृच्चैव ता वुभौ ।

पौरुषेयो वधश्चैव यातुधानौ तु तौ स्मृतौ ॥ ८ ॥
एते वसन्ति वै सूर्ये मासयोः शुचिशुक्रयोः ।
ततः सूर्ये पुनस्त्वन्या निवसन्तिस्म देवताः ॥ ९ ॥
इन्द्रश्चैव विवस्वांश्च अङ्गिरा भृगुरेव च ।
एलापत्रस्तथा सर्पः शङ्खपालश्च पन्नगः ॥ १० ॥
विश्वावसुसुषेनौ च प्रातश्चैव रथश्च हि ।
प्रम्लोचेत्यप्सराश्चैव निम्लोचन्ती च ते उभे ॥ ११ ॥
यातुधानस्तथा हेतिर्व्याघ्रश्चैव तु तावुभौ ।
नभस्य नभसोरे ते वसन्तश्च दिवाकरे ॥ १२ ॥
मासौ द्वौ देवताः सूर्ये वसन्ति च शरद्दतौ ।
पर्जन्यश्चैव पूषा च भरद्वाजः सगौतमः ॥ १३ ॥
चित्रसेनश्च गन्धर्वस्तथा वा सुरुचिश्च यः ।
विश्वाची च घृताची च उभे ते पुण्यलक्षणे ॥ १४ ॥
नागश्चैरावतश्चैव विश्रुतश्च धनञ्जयः ।
सेनजिच्च सुषेणश्च सेनानी ग्रामणीस्तथा ॥ १५ ॥
चारोवातश्च द्वावेतौ यातुधाना वुभौ स्मृतौ ।
वसन्त्येते च वै सूर्ये मासयोश्च त्विषोर्जयोः ॥ १६ ॥
हैमन्तिकौ च द्वौ मासौ निवसन्ति दिवाकरे ।
अंशोभगश्च द्वावेतौ कश्यपश्च क्रतुश्च तौ ॥ १७ ॥
भुजङ्गश्च महापत्मसर्पः कर्कोटकस्तथा ।
चित्रसेनश्च गन्धर्वः पूर्णायुश्चैव गायनौ ॥ १८ ॥
अप्सराः पूर्वचित्तिश्च गन्धर्वा ह्युर्वशीच या ।
तथा वारिष्टनेमिश्च सेनानीर्ग्रामणीश्च तौ ॥ १९ ॥
विद्युत् स्फूर्यश्च तावुभौ यातुधानौ तु तौ स्मृतौ ।

सहे चैव सहस्ये च वसन्त्येते दिवाकरे ॥ २० ॥
ततश्च शिशिरे चापि मासयोर्निवसन्ति ते।
त्वष्टा विष्णुर्जमदग्निर्विश्वामित्रस्तथैव च ॥ २१ ॥
काद्रवेयौ तथा नागौ कम्बलाश्वतरा वुभौ।
गन्धर्वौ धृतराष्ट्रश्च सूर्यवर्चाश्च ता वुभौ ॥ २२ ॥
तिलोत्तमाप्सराश्चैव देवी रम्भा मनोरमा।
ग्रामणीर्ऋतजिच्चैव सत्यजिच्च महाबलः ॥ २३ ॥
ब्रह्मोपेतश्च वै रक्षो यज्ञोपेतस्तथैव च।
इत्येते निवसन्तिस्म द्वौ द्वौ मासौ दिवाकरे ॥ २४॥
स्थानाभिमानिनो ह्येते गणा द्वादशसप्तकाः।
सूर्यमापादयन्त्येते तेजसा तेज उत्तमम् ॥ २५ ॥
ग्रथितैस्तु वचोभिश्च स्तुवन्ति ऋषयो रविम्।
गन्धर्वाप्सरसश्चैव गीतनृत्यैरुपासते ॥ २६ ॥
विद्याग्रामणिनो यक्षाः कुर्वन्त्याभीषु संग्रहम्।
सर्पाः सर्पन्ति वै सूर्य्ये यातुधानानुयान्ति च ॥ २७॥
बालखिल्या नयन्त्यस्तं परिवार्योदयाद्रविम्।
एतेषामेव देवानां यथावीर्य्यं यथा तपः ॥ २८ ॥
यथायोगं यथाधर्मं यथातत्त्वं यथाबलम्।
तथा तपत्यसौ सूर्य्यस्तेषामिद्धस्तु तेजसा ॥ २९ ॥
भूतानामशुभं सर्वं व्यपोहति स्वतेजसा।
मानवानां शुभैर्ह्येतैर्ह्रियते दुरितन्तु वै ॥ ३० ॥
दुरितं शुभचाराणां व्यपोहन्ति क्वचित् क्वचित्।
एते सहैव सूर्येण भ्रमन्ति सानुगा दिवि ॥ ३१ ॥
तपन्तश्च जपन्तश्च ह्लादयन्तश्च वै प्रजाः।

गोपायन्तीह भूतानि ईहन्ते ह्यनुकम्पया ॥ ३२ ॥
स्थानाभिमानिनां ह्येतत् स्थानं मन्वन्तरेषु वै ।
अतीतानागतानाञ्च वर्तन्ते साम्प्रतञ्च ये ॥ ३३ ॥
एवं वसन्ति वै सूर्य्ये सप्तकास्ते चतुर्दश ।
चतुर्दशेषु वर्त्तन्ते गणा मन्वन्तरेषु वै ॥ ३४ ॥
ग्रीष्मे हिमे च वर्षासु च मुञ्चमानो
घर्मं हिमञ्च वर्षञ्च निशां दिनञ्च ।
गच्छत्यसावनुदिनं परिवृत्य रश्मीन्
देवान् पितॄंश्च मनुजांश्च सुतर्पयन्वै ॥ ३५ ॥
शुक्ले च कृष्णे तदहः क्रमेण कालत्रये चैव सुराः पिबन्ति ।
मासेन तच्चामृतमस्य सृष्टं सुतृप्तये रश्मिषु रक्षितं तु ॥३६ ॥
सर्वेऽमृतं तत् पितरः पिबन्ति देवाश्च सौम्याश्च तथैव काव्याः ।
सूर्य्येण गोभिर्हिविवर्द्धिताभिरद्भिः पुनश्चैव समुच्छ्रिताभिः॥३७॥
वृष्ट्याभिवृष्टाभि रथौषधीभिर्मर्त्या अन्नेन क्षुधं जयन्ति ।
तृप्तिश्चाप्यमृतेनार्द्धमासं सुराणां मासे स्वाहाभिः स्वधया पितॄणाम्
अनेन जीवन्त्यनिशं मनुष्याः सूर्य्यः श्रितन्हि बिभर्ति गोभिः॥३८॥
इत्येष एकचक्रेण सूर्य्यस्तूर्णं प्रसर्पति ।
तत्र तै रक्रमैरश्वैः सर्पतेऽसौ दिनक्षये ॥ ३९ ॥
हरिर्हरिद्भिर्ह्रियते तुरङ्गमैः पिबत्यथापोऽथ हरिभिः सहस्रधा ।
पुनः प्रमुञ्चत्यथ ताश्च यो हरिः समुह्यमानो हरिभिस्तुरङ्गमैः॥४०
अहोरात्रं रथेनासावेकचक्रेण वै भ्रमन् ।
सप्तद्वीपसमुद्रांस्तु सप्तभिः सप्तभिर्द्रुतम् ॥ ४१ ॥
छन्दोरूपैश्च तैरश्वैर्यतश्चक्रं ततः स्थितिः ।
कामरूपैः सकृद्युक्तैः कामगैस्तैर्मनोजवैः ॥ ४२ ॥

हरितै रव्ययैः पिङ्गैरीश्वरैर्ब्रह्मवादिभिः ।
वाह्यतोऽमन्तरश्चैव मण्डलं दिवसः क्रमात् ॥ ४३ ॥
कल्पादौ सम्प्रयुक्ताश्च वहन्त्याभूतसंप्लवम् ।
आहतो बालखिल्यैश्च भ्रमते रात्र्यहानि तु ॥ ४४ ॥
ग्रथितैः स्ववचोभिश्च स्तूयमानो महर्षिभिः ।
सेव्यते गीतनृत्यैश्च गन्धर्वाप्सरसाङ्गणैः ॥ ४५ ॥
पतङ्गैः पतगैरश्वैर्भ्राम्यमाणो दिवस्पतिः ।
वीथ्याश्रयाणि चरति नक्षत्राणि तथा शशी ॥ ४६ ॥
ह्रासवृद्धी तथैवास्य रश्मयः सूर्यवत् स्मृताः ।
त्रिचक्रो भयतोऽश्वश्च विज्ञेयः शशिनो रथः ॥ ४७ ॥
अपाङ्गर्भसमुत्पन्नो रथः साश्वः ससारथिः ।
सहारैर्वै त्रिभिश्चक्रैर्युक्तः शुक्लैर्हयोत्तमैः ॥ ४८ ॥
दशभिस्तुरगैर्दिव्यैरसङ्गैस्तन्मनोजवैः ।
सकृद्युक्ते रथे तस्मिन् वहन्तस्त्वायुगक्षयम् ॥ ४९ ॥
संग्रहीता रथे तस्मिन् श्वेत चक्षुःश्रवाश्च वै ।
अश्वास्तमेक वर्णास्ते वहन्ते शङ्खवर्चसः ॥ ५० ॥
अजश्च त्रिपथश्चैव वृषो वाजी नरो हयः ।
अंशुमान् सप्तधातुश्च हंसो व्योम मृग स्तथा ॥ ५१ ॥
इत्येते नामभिश्चैव दश चन्द्रमसोहयाः ।
एवं चन्द्रमसं दिवं वहन्ति त्वायुगक्षयम् ॥ ५२ ॥
देवैः परिवृतः सोमः पितृभिः सह गच्छति ।
सोमस्य शुक्लपक्षादौ भास्करे परतः स्थिते ॥ ५३ ॥
आपूर्यते परो भागः सोमस्य तु अहःक्रमात् ।

ततः पीतक्षयं सोमं युगपद्व्यापयन् रविः ॥ ५४ ॥
पीतं पञ्चदशाहञ्च रश्मिनैकेन भास्करः ।
आपूरयन् ददौ तेन भागं भागमहःक्रमात् ॥ ५५॥
सुषुम्नाप्यायमानस्य शुक्ले वर्द्धन्ति वै कलाः ।
तस्माद्ध्रसन्ति वै कृष्णे शुक्ले ह्याप्याययन्ति च ॥५६॥
इत्येवं सूर्य्यवीर्य्येण चन्द्रस्याप्यायते तनुः ।
पूर्णमास्यां प्रदृश्येत शुक्लः सम्पूर्णमण्डलः ॥ ५७ ॥
एवमाप्यायते सोमः शुक्लपक्षेष्वहःक्रमात् ।
ततो द्वितीयाप्रभृति बहुलस्य चतुर्दशी ॥ ५८ ॥
अपां सारमयस्येन्दो रसमात्रात्मकस्य च ।
पिबन्त्यम्बुमयं देवा मधुसौम्यं तथामृतम् ॥ ५९॥
संभृतन्त्वर्द्धमासेन अमृतं सूर्य्यतेजसा ।
भक्षार्थमागतं सोमं पौर्णमास्यामुपासते ॥ ६० ॥
एकरात्रं सुराः सार्द्धं पितृभिरृषिभिश्च वै ।
सोमस्य कृष्णपक्षादौ भास्कराभिमुखस्य वै ॥ ६१ ॥
प्रक्षीयते परे ह्यात्मा पीयमानकलाक्रमात् ।
त्रयश्च त्रिंशता सार्द्धं त्रयस्त्रिंशच्छतानि तु ॥ ६२ ॥
त्रयस्त्रिंशत्सहस्राणि देवाः सोमं पिबन्ति वै ।
इत्येवं पीयमानस्य कृष्णे वर्द्धन्ति ताः कलाः ॥ ६३ ॥
क्षीयन्ते च ततः शुक्लाः कृष्णा ह्याप्याययन्ति च ।
एवं दिनक्रमात् पीते देवैश्चापि निशाकरे ॥ ६४ ॥
पीत्वार्द्धमासं गच्छन्ति अमावास्यां सुराश्च ते ।
पितरश्चोपतिष्ठन्ति अमावास्यां निशाकरम् ॥ ६५ ॥
ततः पञ्चदशे भागे किञ्चिच्छेषे निशाकरे ।

ततोऽपराह्णे पितरो यदन्यद्दिवसे पुनः ॥ ६६ ॥
पिबन्ति द्विकलं कालं शिष्टास्तास्तु कलास्तु याः।
विनिःसृष्टं त्वमावास्यां गभस्तिभ्यस्तदामृतम् ॥ ६७ ॥
अर्द्धमाससमाप्तौ तु पीत्वा गच्छन्ति ते सुतम्।
सौम्या वर्हिषदश्चैव अग्निष्वात्ताश्च ये स्मृताः ॥ ६८ ॥
काव्याश्चैव तु ये प्रोक्ताः पितरः सर्व एव ते।
सम्वत्सराश्च ये काव्याः पञ्चाब्दा वै द्विजाः स्मृताः॥६९
सौम्याः सुतपसो ज्ञेया सोमपा बर्हिषदस्तथा।
अग्निष्वात्तास्त्रयश्चैव पितृसर्गस्थिता द्विजाः ॥ ७० ॥
पितृभिः पीयमानायां पञ्चदश्यान्तु वै कलाम्।
यावच्च क्षीयते तस्माद् भागः पञ्चदशस्तु सः ॥ ७१ ॥
अमावास्यां तथा तस्य अन्तरा पूर्य्यते परः।
वृद्धिक्षयौ वै पक्षादौ षोडश्यां शशिनः स्मृतौ।
एवं सूर्य्यनिमित्ते ते क्षयवृद्धी निशाकरे ॥ ७२ ॥

---

अथ षड्विंशत्यधिकशततमोऽध्यायः।

सूत उवाच। ताराग्रहाणां वक्ष्यामि स्वर्भानोश्च रथं पुनः।
अथ तेजोमयः शुभ्रः सोमपुत्रस्य वै रथः ॥ १ ॥
युक्तोहयैः पिशङ्गैस्तु दशभिर्वातरंहसैः।
श्वेतः पिशङ्गः सारङ्गो नीलः श्यामो विलोहितः ॥२॥
श्वेतश्च हरितश्चैव पृषतो वृष्णिरेव च।
दशभिस्तु महाभागैस्तुरगैर्वातसम्भवैः ॥ ३ ॥
ततो भौमरथश्चापि अष्टाङ्गः काञ्चनः स्मृतः।
अष्टभिर्लोहितै रश्मैः सध्वजैरग्निसम्भवैः ॥ ४ ॥

सर्पतेऽसौ कुमारो वै ऋजुवक्रानुवक्रगः ।
अतश्चाङ्गिरसो विद्वान् देवाचार्यो बृहस्पतिः ॥ ५ ॥
गौराश्वेन तु रौप्येण स्यन्दनेन विसर्पति ।
युक्तेनाष्टाभिरश्वैश्च ध्वजैरग्निसमुद्भवैः ॥ ६ ॥
अब्दं वसति यो राशौ स्वदिग्यन्तेन गच्छति ।
ततः शनैश्चरोऽप्यश्वैः शबलैर्वातरंहसैः ॥ ७ ॥
काष्ठायसं समारुह्य स्यन्दनं यात्यसौ शनिः ।
स्वर्भानोश्च तथाष्टाश्वाः कृष्णा वै वातरंहसः ॥ ८ ॥
रथन्तमोमयं तस्य वहन्ति स्म सुदंशिताः ।
आदित्यनिलयो राहुः सोमं गच्छति पर्वसु ॥ ९ ॥
आदित्यमेति सोमाच्च तमसां तेषु पर्वसु ।
ततः केतुमतस्त्वश्वा अष्टौ ते वातरंहसः ॥ १० ॥
पलालधूमवर्णाभाः क्षामदेहाः सुदारुणाः ।
एते वाहा ग्रहाणां वै मया प्रोक्ता रथैः सह ॥ ११ ॥
सर्वे ध्रुवे निबद्धास्ते निबद्धा वातरश्मिभिः ।
एते वै भ्राम्यमाणास्ते यथायोगं वहन्ति वै ॥ १२ ॥
वायव्याभिरदृश्याभिः प्रबद्धा वातरश्मिभिः ।
परिभ्रमन्ति तद्बद्धाश्चन्द्रसूर्यग्रहा दिवि ॥ १३ ॥
यावत्तमनुपर्येति ध्रुवं वै ज्योतिषाङ्गणः ।
यथा नद्युदके नौस्तु उदकेन सहोह्यते ॥ १४ ॥
तथा देवगृहाणि स्युरुह्यन्ते वातरंहसा ।
तस्माद्यानि प्रदृश्यन्ते व्योम्नि देवगृहा इति ॥ १५ ॥
यावन्त्यश्चैव ताराः स्युस्तावन्तोऽस्य मरीचयः ।
सर्वा ध्रुवनिबद्धास्ता भ्रमन्त्यो भ्रामयन्ति च ॥ १६ ॥

तैलपीडं यथा चक्रं भ्रामते भ्रामयन्ति वै।
तथा भ्रमन्ति ज्योतींषि वातबद्धानि सर्वशः॥ १७॥
अलातचक्रवद्यान्ति वातचक्रेरितानि तु।
यस्मात् प्रवहते तानि प्रवहस्तेन स स्मृतः॥ १८॥
एवं ध्रुवे नियुक्तोऽसौ भ्रमते ज्योतिषाङ्गणः।
एष तारामयः प्रोक्तः शिशुमारे ध्रुवो दिवि॥ १९॥
यदह्ना कुरुते पापन्तं दृष्ट्वा निशि मुञ्चति।
शिशुमारशरीरस्था यावन्त्यस्तारकास्तु ताः॥ २०॥
वर्षाणि दृष्ट्वा जीवेत तावदेवाधिकानि तु।
शिशुमाराकृतिं ज्ञात्वा प्रविभागेन सर्वशः॥ २१॥
उत्तानपादस्तस्याथ विज्ञेयः सोत्तरा हनुः।
यज्ञोऽधरस्तु विज्ञेयो धर्मो मूर्द्धानमाश्रितः॥ २२॥
हृदि नारायणः साध्या अश्विनौ पूर्वपादयोः।
वरुणाश्चार्यमा चैव पश्चिमे तस्य सक्थिनी॥ २३॥
शिश्ने सम्वत्सरो ज्ञेयो मित्रश्चापानमाश्रितः।
पुच्छेऽग्निश्च महेन्द्रश्च मरीचिः कश्यपो ध्रुवः॥ २४॥
एष तारामयः स्तम्भो नास्तमेति नचोदयम्।
नक्षत्रचन्द्रसूर्याश्च ग्रहास्तारागणैः सह॥ २५॥
तन्मुखाभिमुखाः सर्वे चक्रभूता दिवि स्थिताः।
ध्रुवेणाधिष्ठिताश्चैव ध्रुवमेव प्रदक्षिणम्॥ २६॥
परियान्ति सुरश्रेष्ठं मेढीभूतं ध्रुवं दिवि।
आग्नीध्रकाश्यपानान्तु तेषां स परमो ध्रुवः॥ २७॥
एकएव भ्रमत्येष मेरोरन्तरमूर्द्धनि।
ज्योतिषाञ्चक्रमादाय चाकर्षंस्तमधोमुखः॥ २८॥

मेरुमालोकयन्नेव प्रति याति प्रदक्षिणम् ।

---

अथ सप्तविंशत्यधिकशततमोऽध्यायः ।

ऋषय ऊचुः । यदेतद्भवता प्रोक्तं श्रुतं सर्वमशेषतः ।
कथं देवगृहाणि स्युः पुनर्ज्योतींषि वर्णय ॥ १ ॥
सूत उवाच । एतत्सर्वं प्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिम् ।
यथा देवगृहाणि स्युः सूर्याचन्द्रमसोस्तथा ॥ २ ॥
अग्नेर्व्युष्टौ रजन्यां वै ब्रह्मणा व्यक्तयोनिना ।
अव्याकृतमिदं त्वासीन्नैशेन तमसावृतम् ॥ ३ ॥
चतुर्भूतावशिष्टेऽस्मिन् ब्रह्मणा समधिष्ठिते ।
स्वयम्भूर्भगवांस्तत्र लोकतत्त्वार्थसाधकः ॥ ४ ॥
खद्योतरूपी विचरन्नाविर्भावं व्यचिन्तयत् ।
ज्ञात्वाग्निं कल्पकालादावपः पृथ्वीञ्च संश्रिताः ॥५॥
स सम्भृत्य प्रकाशार्थन्त्रिधात्वंसोऽभवत् पुनः ।
पावको यस्तु लोकेऽस्मिन् पार्थिवः सोऽग्निरुच्यते ॥६॥
यश्चासौ तपते सूर्य्ये शुचिरग्निश्च स स्मृतः ।
वैद्युतो जठरः सौम्यो वैद्युतश्चाप्यनिन्धनः ॥ ७ ॥
तेजोभिश्चाप्यते कश्चित् कश्चिदेवाप्यनिन्धनः ।
काष्ठेन्धनस्तु निर्मथ्यः सोऽग्निः शाम्यति पावकः ॥८॥
अर्चिष्मान् पवनोऽग्निस्तु निष्प्रभः सौम्यलक्षणः ।
यश्चासौ मण्डले शुक्ले निरूष्मा न प्रकाशते ॥ ९ ॥
प्रभा सौरी तु पादेन अस्तं याति दिवाकरे ।
अग्निमाविशते रात्रौ तस्मादग्निः प्रकाशते ॥ १० ॥
उदिते तु पुनः सूर्य्ये ऊष्माग्नेस्तु समाविशत् ।

पादेन तेजसश्चाग्नेस्तस्मात् सन्तपते दिवा ॥ ११ ॥
प्राकाश्यञ्च तथोष्णञ्च सौर्याग्नेये तु तेजसी ।
परस्परानु प्रवेशादाप्यायेते दिवानिशम् ॥ १२ ॥
उत्तरे चैव भूम्यर्द्धे तथा ह्यस्मिंस्तु दक्षिणे ।
उत्तिष्ठति पुनः सूर्य्ये रात्रिमाविशते ह्यपः ॥१३॥
तस्मात्ताम्रा भवन्त्यापो दिवारात्रि प्रवेशनात् ।
अस्तङ्गते पुनः सूर्य्ये अहो वै प्रविशत्यपः ॥ १४ ॥
तस्माच्छुक्ला पुनः रक्ता ह्यापो दृश्यन्ति भास्वराः ।
एतेन क्रमयोगेन भूम्यर्द्धे दक्षिणोत्तरे ॥ १५ ॥
उदयास्तमये ह्यत्र अहोरात्रं विशत्यपः ।
यश्चासौ तपते सूर्य्यः सोऽपः पिबति रश्मिभिः ॥ १६ ॥
सहस्रपादस्त्वेषोऽग्नी रक्तकुम्भनिभस्तु सः ।
आदत्ते स तु नाडीनां सहस्रेण समन्ततः ॥ १८ ॥
आपो नदीसमुद्रेभ्यो ह्रदकूपेभ्य एव च ।
तस्य रश्मिसहस्रेण शीतवर्षोष्णनिःस्रवः ॥ १९ ॥
तासाञ्चतुः शतं नाड्यो वर्षन्ते चित्रमूर्त्तयः ।
चन्दनाश्चैव मेध्याश्च केतनाश्चेतनास्तथा ॥२० ॥
अमृता जीवनाः सर्वा रश्मयो वृष्टिसर्जनाः
हिमोद्वहाश्च ताश्चान्यं रश्मयस्त्रिंशतः स्मृताः ।
चन्द्रताराग्रहैः सर्वैः पीता भानोर्गभस्तयः ॥ २१ ॥
एता मध्यास्तथान्याश्च ह्लादिन्यो हिमसर्जनाः ।
शुक्लाश्च ककुभश्चैव गावो विश्वभृतश्च याः ॥ २२ ॥
शुक्लास्ता नामतः सर्वास्त्रिंशत्या धर्म्मसर्जनाः ।
समं बिभर्त्ति हिताः सर्वाः मनुष्यान्देवताः पितॄन् ॥२३॥

मनुष्यानौषधीभिश्च स्वधया च पितॄनपि ।
अमृतेन सुरान् सर्वान् सन्ततम्परि तर्पयन् ॥ २४ ॥
वसन्ते चैव ग्रीष्मे च शनैः सन्तपते त्रिभिः ।
वर्षास्त्र च शरद्येवं चतुर्भिः संप्रवर्षति ॥ २५ ॥
हेमन्ते शिशिरे चैव हिमोत्सर्गस्त्रिभिः पुनः ।
ओषधीषु बलन्धत्ते सुधाञ्च स्वधया पुनः ॥ २६ ॥
सूर्योऽमरत्वं अमृतं त्रयस्त्रिषु नियच्छति ।
एवं रश्मिसहस्रन्तु सौरं लोकार्थसाधनम् ॥ २७ ॥
भिद्यते ऋतुमासाद्य सहस्रं बहुधा पुनः ।
इत्येवं मण्डलं शुक्लं भास्वरं लोकसंज्ञितम् ॥ २८॥
नक्षत्रग्रहसोमानां प्रतिष्ठायोनिरेव च ।
चन्द्र ऋक्षग्रहाः सर्वे विज्ञेयाः सूर्यसम्भवाः ॥ २९ ॥
सुषुम्णा सूर्यरश्मिर्या क्षीणं शशिनमेधते ।
हरिकेशः पुरस्तात्तु यो वै नक्षत्रयोनिकृत् ॥ ३० ॥
दक्षिणे विश्वकर्मा तु रश्मिराप्याययद्बुधम् ।
विश्वावसुश्च यः पश्चाच्छुक्रयोनिश्च स स्मृतः ॥ ३१ ॥
सम्वर्द्धनस्तु यो रश्मिः सयोनिर्लोहितस्य च ।
षष्ठस्तु ह्यश्वभूरश्मिः योनिः स हि बृहस्पतेः ॥ ३२ ॥
शनैश्चरं पुनश्चापि रश्मिराप्यायते सुराट् ।
न क्षीयते यतस्तानि तस्मान्नक्षत्रता स्मृता ॥ ३३ ॥
क्षेत्राण्येतानि वै सूर्यमापतन्ति गभस्तिभिः ।
क्षेत्राणि तेषामादत्ते सूर्यो नक्षत्रता ततः ॥ ३४ ॥
अस्माल्लोकादमुं लोकं तीर्णानां सुकृतात्मनाम् ।
तारणात्तारका ह्येताः शुक्लत्वाच्चैव शुक्लिकाः ॥ ३५ ॥

दिव्यानां पार्थिवानाञ्च वंशानाञ्चैव सर्वशः।
तपसस्तेजसो योगादादित्य इति गद्यते ॥ ३६ ॥
स्रवतिः स्यन्दनार्थे धातुरेष निगद्यते।
स्रवणात्ते जसश्चैव तेनासौ सविता स्मृतः ॥ ३७ ॥
बह्वर्थश्चन्द इत्येष प्रधानो धातुरुच्यते।
शुक्लत्वे ह्यमृतत्वे च शीतत्वे ह्लादनेऽपि च ॥ ३८ ॥
सूर्याचन्द्रमसोर्दिव्ये मण्डले भास्वरे खगे।
ज्वलतेजोमये शुक्ले वृत्तकुम्भनिभे शुभे ॥ ३९ ॥
वसन्ति कर्मदेवास्तु स्थानान्येतानि सर्वशः।
मन्वन्तरेषु सर्वेषु ऋषिसूर्यग्रहादयः ॥ ४० ॥
तानि देवगृहाणि स्युः स्थानाख्यानि भवन्ति हि।
सौरं सूर्योऽविशत् स्थानं सौम्यं सोमस्तथैव च ॥ ४१ ॥
शौक्रं शुक्रोऽविशत् स्थानं षोडशारं प्रभास्वरम्।
बृहस्पतिर्बृहत्त्वञ्च लोहितञ्चापि लोहितः ॥ ४२ ॥
शनैश्चरोऽविशत् स्थानमेवं शानैश्चरं तथा।
बुधोऽपि वै बुधस्थानं भानुं स्वर्भानुरेव च ॥ ४३ ॥
नक्षत्राणि च सर्वाणि नाक्षत्राण्यविशन्ति च।
ज्योतींषि सुकृतामेते ज्ञेया देवगृहास्तु वै ॥ ४४ ॥
स्थानान्येतानि तिष्ठन्ति यावदाभूतसंप्लवम्।
मन्वन्तरेषु सर्वेषु देवस्थानानि तानि वै ॥ ४५ ॥
अभिमानेन तिष्ठन्ति तानि देवाः पुनः पुनः।
अतीतास्तु सहातीतैर्भाव्या भाव्यैः सुरैः सह ॥ ४६ ॥
वर्तन्ते वर्तमानैश्च सुरैः सार्द्धन्तु स्थानिनः।
सूर्यो देवो विवस्वांश्च अष्टमस्त्वदितेः सुतः ॥ ४७ ॥

द्युतिमान् धर्मपुत्रश्च सोमो देवो वसुः स्मृतः ।
शुक्रो दैत्यस्तु विज्ञेयो भार्गवो सुरयाजकः ॥ ४८ ॥
बृहस्पतिर्बृहत्तेजा देवाचार्योऽङ्गिरःसुतः ।
बुधो मनोहरश्चैव शशिपुत्रस्तु स स्मृतः ॥ ४९ ॥
शनैश्चरो विरूपश्च संज्ञापुत्रो विवस्वतः ।
अग्निर्विकेश्यां जज्ञे तु युवाऽसौ लोहिताधिपः ॥ ५० ॥
नक्षत्रनाम्न्यः क्षेत्रेषु दाक्षायण्यः सुताः स्मृताः ।
स्वर्भानुः सिंहिकापुत्रो भूतसंसाधनोसुरः ॥ ५१ ॥
चन्द्रार्कग्रहनक्षत्रेष्वभिमानी प्रकीर्त्तितः ।
स्थानान्येतानि चोक्तानि स्थानिन्यश्चैव देवताः ॥ ५२ ॥
शुक्लमग्निसमं दिव्यं सहस्रांशोर्विवस्वतः ।
सहस्रांशत्विषः स्थानमम्मयं तैजसं तथा ॥ ५३ ॥
आप्यास्थानं मनोज्ञस्य रवि रश्मिगृहे स्थितम् ।
शुक्रः षोडशरश्मिस्तु यस्तु देवो ह्यपोमयः ॥ ५४ ॥
लोहितो नवरश्मिस्तु स्थानमापस्तु तस्य वै ।
बृहद्द्वादशरश्मीकं हरिद्राभन्तु वेधसः ॥ ५५ ॥
अष्टरश्मिशनेस्तत्तु कृष्णं दृढमयस्मयम् ।
स्वर्भानोस्त्वायसं स्थानं भूतसन्तापनालयम् ॥ ५६ ॥
शुक्लतामाश्रया स्तारा स्त्रमयस्तु हिरण्मयाः ।
तारणात्तारका ह्येताः शुक्लत्वाच्चैव तारकाः ॥ ५७ ॥
नवयोजनसाहस्रो विष्कम्भः सवितुः स्मृतः ।
मण्डलं त्रिगुणं चास्य विस्तारो भास्करस्य तु ॥ ५८ ॥
द्विगुणः सूर्य्यविस्ताराद्विस्तारः शशिनः स्मृतः ।
त्रिगुणं मण्डलं चास्य वैपुल्याच्छशिनः स्मृतम् ॥ ५९ ॥

सर्वोपरिनिकृष्टानि मण्डलानि तु तारकाः ।
योजनार्द्धप्रमाणानि ताभ्योऽन्यानि गणानि तु ॥६०॥
तस्यो भूत्वा तु स्वर्भानुस्तद्धस्तात्प्रसर्पति ।
उद्धृत्य पार्थिवीं छायां निर्मितां मण्डलाकृतिम् ६१
ब्रह्मणा निर्मितं स्थानं तृतीयन्तु तमोमयम् ।
आदित्यात् स तु निष्क्रम्य सोमं गच्छति पर्वसु ॥६२
आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु ।
स्वभासा नुदते यस्मात् स्वर्भानुरिति स स्मृतः ॥ ६३॥
चन्द्रतः षोडशो भागो भार्गवस्य विधीयते ।
विष्कम्भान्मण्डलाच्चैव योजनानान्तु स स्मृतः ॥६४॥
भार्गवात्पादहीनश्च विज्ञेयो वै बृहस्पतिः ।
बृहस्पतेः पादहीनौ केतुवक्रावुभौ स्मृतौ ॥ ६५ ॥
विस्तारमण्डलाभ्यान्तु पादहीनस्तयोर्बुधः ।
तारानक्षत्ररूपाणि वपुष्मन्तीह यानि वै ॥ ६६ ॥
बुधेन समरूपाणि विस्तारान्मण्डलात्तु वै ।
तारानक्षत्ररूपाणि हीनानि तु परस्परम् ॥ ६७ ॥
शतानि पञ्चचत्वारि त्रीणि द्वे चैकमेव च ।
सर्वोपरिनिकृष्टानि मण्डलानि तु तारकाः ॥ ६८ ॥
योजनार्द्धप्रमाणानि तेभ्यो ह्रस्वं न विद्यते ।
उपरिष्टात्तु ये तेषां ग्रहा ये क्रूरसात्त्विकाः ।
सौरश्चाङ्गिरसो वक्रो विज्ञेया मन्दचारिणः ।
तेभ्योऽधस्तात्तु चत्वारः पुनरन्ये महाग्रहाः ॥७०॥
सोमः सूर्य्यो बुधश्चैव भार्गवश्चेति शीघ्रगाः ।
यावन्ति चैव ऋक्षाणि कोटयस्तावन्ति तारकाः॥७१॥

सर्वेषान्तु ग्रहाणां वै सूर्य्योऽधस्तात् प्रसर्पति ।
विस्तीर्णं मण्डलं कृत्वा तस्योर्द्धं चरते शशी ॥७२॥
नक्षत्रमण्डलञ्चापि सोमादूर्द्धं प्रसर्पति ।
नक्षत्रेभ्यो बुधश्चोर्द्धं बुधाच्चोर्द्धन्तु भार्गवः ॥ ७३ ॥
वक्रस्तु भार्गवादूर्द्धं वक्रादूर्द्ध्वं बृहस्पतिः ।
तस्माच्छनैश्चरश्चोर्द्ध्वं देवाचार्य्योपरि स्थितः ॥ ७४ ॥
शनैश्चरात्तथा चोर्द्ध्वं ज्ञेयं सप्तर्षिमण्डलम् ।
सप्तर्षिभ्यो ध्रुवश्चोर्द्ध्वं समस्तं त्रिदिवं ध्रुवे ॥ ७५ ॥
द्विगुणेषु सहस्रेषु योजनानां शतेषु च ।
ग्रहान्तरमथैकैकमूर्द्ध्वं नक्षत्रमण्डलात् ॥ ७६ ॥
ताराग्रहान्तराणि स्युरुपर्युपर्य्यवस्थितम् ।
ग्रहाश्चन्द्रसूर्य्यौ च दिवि दिव्येन तेजसा ॥ ७७ ॥
नक्षत्रेषु च युज्यन्ते गच्छन्तो नियतक्रमात् ।
चन्द्रार्कग्रहनक्षत्रा नीचोच्चगृहमाश्रिताः ॥ ७८ ॥
समागमे च भेदे च पश्यन्ति युगपत्प्रजाः ।
परस्परं स्थिता ह्येवं युज्यन्ते च परस्परम् ॥७९॥
असङ्करेण विज्ञेय तेषां योगस्तु वै बुधैः ।
इत्येवं सन्निवेशो वै पृथिव्या ज्योतिषाश्रयः ॥ ८० ॥
द्वीपानामुदधीनाञ्च पर्वतानां तथैव च ।
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै ॥ ८१ ॥
इत्येषोऽर्कवशेनैव सन्निवेशस्तु ज्योतिषाम् ।
आवर्त्तः सान्तरो मध्ये संक्षिप्तश्च ध्रुवाश्रयः ॥ ८२ ॥
सर्वतस्तु विस्तीर्णो वृत्ताकार इवोच्छ्रितः ।
लोकसंव्यवहारार्थमीश्वरेण विनिर्मितः ॥ ८३ ॥

कल्पादौ बुद्धिपूर्वन्तु स्थापितोऽसौ स्वयम्भुवा।
इत्येव सन्निवेशो वै सर्वस्य ज्योतिरात्मकः॥ ८४॥
वैश्वरूपं प्रधानस्य परिणामोऽस्य यः स्मृतः।
तेषां शक्यं न सङ्ख्यातुं याथातथ्येन केनचित्।
गतागतं मनुष्येण ज्योतिषां मांसचक्षुषा॥ ८५॥

---

अथाष्टाविंशत्यधिकशततमोऽध्यायः।

ऋषय ऊचुः। कथं जगाम भगवन् पुरारित्वं महेश्वरः।
ददाह च कथं देवस्तन्नो विस्तरतो वद॥ १॥
पृच्छामस्त्वां वयं सर्वे बहुमानात् पुनः पुनः।
त्रिपुरन्त्वथा दुर्गं मयमायाविनिर्मितम्।
दैवतकेषुणा दग्धं तथा नो वद मानद!॥ २॥
सूत उवाच। शृणुध्वं त्रिपुरं देवो यथा दारितवान् भवः।
मयो नाम महामायो मायानां जनकोऽसुरः॥ ३॥
निर्जितः स तु संग्रामे तताप परमन्तपः।
तपस्यतन्तु तं विप्रा दैत्यावन्यावनुपह्वात्॥ ४॥
तस्यैव कृत्यमुद्दिश्य तेपतुः परमन्तपः।
विद्युन्माली च बलवान् तारकाख्यश्च वीर्यवान्॥५॥
मयतेजः समाक्रान्तौ तेपतुर्मयपार्श्वगौ।
लोका इव यथामूर्तास्त्रयस्त्रय इवाग्नयः॥ ६॥
लोकत्रयं तापयन्तस्ते तेपुर्दानवास्तपः।
हेमन्ते जलशय्यासु ग्रीष्मे पञ्चतपे तथा॥ ७॥
वर्षासु च तथाकाशे क्षपयन्तः स्तनूः प्रियाः।

शैवालाः फलमूलानि पुष्पाणि च जलानि च ॥ ८ ॥
अब्धवल्काचरिताहाराः पङ्केनाचितवल्कलाः ।
मग्नाः शैवालपङ्केषु विमला विमलेषु च ॥ ९ ॥
निर्मांसाश्च ततो जाताः कृशा धमनिसन्तताः ।
तेषां तपःप्रभावेन प्रभावविधुतं यथा ॥ १० ॥
निष्प्रभन्तु जगत् सर्वं मन्दमेवाभिभाषितम् ।
दह्यमानेषु लोकेषु तैर्दानवाग्निभिः ॥ ११ ॥
तेषामग्रे जगद्बन्धुः प्रादुर्भूतः पितामहः ।
ततः साहसकर्तारः प्राहुस्ते सहसागतम् ॥ १२ ॥
स्वकम्पितामहं दैत्यास्तं वै तुष्टुवुरेव च ।
अथ तान् दानवान् ब्रह्मा तपसा तपनप्रभान् ॥ १३ ॥
उवाच हर्षपूर्णाक्षो हर्षपूर्णमुखस्तदा ।
वरदोऽहं हि वोऽद्यास्मात्तपसा तोषित आगतः ॥ १४ ॥
व्रियतामीप्सितं यच्च साभिलाषं तदुच्यताम् ।
इत्येवमुच्यमानस्तु प्रतिपन्नं पितामहम् ॥ १५ ॥
विश्वकर्मा मयः प्राह प्रहर्षोत्फुल्ललोचनः ।
देवैर्दैत्याः पुरा देवैः संग्रामे तारकामये ॥ १६ ॥
निर्जितास्ताडिताश्चैव हताश्चाप्यायुधैरपि ।
देवैर्वैरानुबन्धाच्च धावन्तो भयवेपिताः ॥ १७ ॥
शरणञ्च न जानीमः शर्म्म वाशरणार्थिनः ।
सोऽहं तपःप्रभावेन तव भक्त्या तथैव च ॥ १८ ॥
इच्छामि कर्तुं तद्दुर्गं यद्देवैरपि दुस्तरम् ।
तस्मिंश्च त्रिपुरे दुर्गे मत्कृते कृतिनां वर ! ॥ १९ ॥
भूमराणां जलजानाञ्च शापानां मुनितेजसाम् ।

देवप्रहरणानाञ्च देवानाञ्च प्रजापते ! ॥ २० ॥
अलङ्घनीयं भवतु त्रिपुरं यदि ते प्रियम् ।
विश्वकर्मा इतीवोक्तः स तदा विश्वकर्मणा ॥ २१ ॥
उवाच प्रहसन् वाक्यं मयं दैत्यगणाधिपम् ।
सर्वामरत्वं नैवास्ति असद्वृत्तस्य दानव ! ॥ २२ ॥
तस्माद् दुर्गविधानं हि तृणादपि विधीयताम् ।
पितामहवचः श्रुत्वा तदेवं दानवो मयः २३ ॥
प्राञ्जलिः पुनरप्याह ब्रह्माणं पद्मसम्भवम् ।
शम्भुरेकेषुणा दुर्गं सकृन्मुक्तेन निर्दहेत् ॥ २४ ॥
समं स संयुगे हन्यादवध्यं शेषतो भवेत् ।
एवमस्त्विति चाप्युक्तामयं देवः पितामहः ॥ २५ ॥
स्वप्ने लब्धो यथार्थो वै तत्रैवादर्शनं ययौ ।
गते पितामहे दैत्या गता मयरविप्रभाः ॥ २६ ॥
वरदानाद्धिरेजुस्ते तपसा च महाबलाः ।
समयस्तु महाबुद्धिर्दानवो हुतसत्तमः ॥ २७ ॥
दुर्गं व्यवसितः कर्तुमिति चाचिन्तयत्तदा ।
कथं नाम भवेद्दुर्गं तन्मया त्रिपुरं कृतम् ॥ २८ ॥
वत्स्यं हि तत् पुरं दिव्यं मत्तो नान्यैर्न संशयः ।
यथा चैकेषुणा तेन तत्पुरं न हि हन्यते ॥ २९ ॥
देवै स्तथा विधातव्यं मया मतिविचारणम् ।
विस्तारो योजनशतमेकैकस्य पुरस्य तु ॥ ३० ॥
कार्यस्तेषाञ्च विष्कम्भस्त्वेकशतयोजनम् ।
पुष्ययोगेन निर्माणं पुराणाञ्च भविष्यति ॥ ३१ ॥
पुष्ययोगेन च दिवि समेष्यन्ति परस्परम् ।

पुष्ययोगेन युक्तानि यस्तान्या धादयिष्यति ॥ २२ ॥
पुराण्येकप्रहारेण शतानि निहनिष्यति ।
आयसन्तु चितितले राजतन्तु नभस्तले ॥ २३ ॥
राजतस्योपरिष्टात्तु सौवर्णं भविता पुरम् ।
एवं त्रिभिः पुरैर्युक्तं त्रिपुरं तद्भविष्यति ।
शतयोजनविष्कम्भैरन्तरैस्तद्दुरासदम् ॥ २४ ॥
अट्टालकैर्यन्त्रशतघ्निभिश्च सचक्रशूलोपलकम्पनैश्च ।
द्वारैर्महामन्दरमेरुकल्पैः प्राकारशृङ्गैः सुविराजमानम् ॥ २५ ॥
सतारकाख्येन मयेन गुप्तं खस्थञ्च गुप्तं तडिन्मालिनापि ।
को नाम हन्तुं त्रिपुरं समर्थो मुक्त्वा त्रिनेत्रं भगवन्तमेकम् ॥ २६ ॥

---

एकोनत्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच । इति चिन्त्यमयो दैत्यो दिव्योपायप्रभावजम् ।
चकार त्रिपुरं दुर्गं मनःसङ्कल्पचारितम् ॥ १ ॥
प्राकारोऽनेन मार्गेण इह वामुत्र गोपुरम् ।
इह चाट्टालकद्वारमिह चाट्टालगोपुरम् ॥ २ ॥
राजमार्ग इतश्चापि विपुलो भवतामिति ।
रथ्योपरथ्याः कनिका इह चत्वर एव च ॥ ३ ॥
इदमन्तःपुरस्थानं रुद्रायतनमत्र च ।
सवटानि तडागानि स्रवन्ति वाप्यः सरांसि च ॥ ४ ॥
आरामाश्च सभाश्चात्र उद्यानान्यत्र वा तथा ।
उपनिर्गमो दानवानां भवत्वत्र मनोहरः ॥ ५ ॥
इत्येवं मानसं तत्राकल्पयत् पुरकल्पवित् ।
मयेन मत्पुरं सृष्टं त्रिपुरं त्विति नः श्रुतम् ॥ ६ ॥

कार्ष्णायसमयं यत्तु मयेन विहितं पुरम्।
तारकाख्योऽधिपस्तत्र शतस्थानाधिपोऽवसत्॥ ७॥
यत्तु पूर्णेन्दुसङ्काशं राजतं निर्मितं पुरम्।
विद्युन्माली प्रभुस्तत्र विद्युन्मालीतिवाम्बुदः॥ ८॥
सुवर्णविकृतं यच्च मयेन विहितं पुरम्।
स्वयमेव मयस्तत्र गतस्तदधिपः प्रभुः॥ ९॥
तारकस्य पुरं तत्र शतयोजनमन्तरम्।
विद्युन्मालिपुरञ्चापि शतयोजनकेऽन्तरम्॥ १०॥
मेरुपर्वतसङ्काशं मयस्यापि पुरं महत्।
पुष्यसंयोगमात्रेण कालेन समयः पुरा॥ ११॥
एतत्त्रिपुरं दैत्यैस्त्रिभिः पुष्यकं यथा।
येन येन मयो याति प्रकुर्वाणः पुरं पुरात्॥ १२॥
प्रयस्तास्तत्र तत्रैव वारण्यामालयाः स्वयम्।
कल्पकल्प्यायमानाश्च शतशोऽथ सहस्रशः॥ १३॥
रत्नाचितानि शोभन्ते पुराण्यमरविद्विषाम्।
प्रासादशतजुष्टानि कूटागारोत्कटानि च॥ १४॥
सर्वेषां कामगानि स्युः सर्वलोकातिगानि च।
सोद्यानवापीकूपानि सपद्मसरवन्ति च॥ १५॥
अशोकवनभूतानि कोकिलारुतवन्ति च।
चित्रशालाविशालानि चतुःशालोत्तमानि च॥१६॥
सप्ताष्टदशभौमानि सत्कृतानि मयेन च।
बहुध्वजपताकानि स्रग्दामालङ्कृतानि च॥ १७॥
किङ्किणीजालशब्दानि गन्धवन्ति महान्ति च।
सुसंयुक्तोपलिप्तानि पुष्पनैवेद्यवन्ति च॥ १८॥

यैश्च धूमान्धकाराणि संपूर्णकलशानि च ।
गगनावरणाभानि हंसपङ्क्तिनिभानि च ॥१९॥
पङ्क्तीकृतानि राजन्ते गृहाणि त्रिपुरे पुरे ।
मुक्ताकलापैर्लम्बद्भिर्हसन्तीव शशिश्रियम् ॥ २० ॥
मल्लिकाजातिपुष्पाद्यैर्गन्धधूपाधिवासितैः ।
पञ्चेन्द्रियसुखैर्नित्यं समैः सत्पुरुषैरिव ॥ २१ ॥
हैमराजतलोहाश्च मणिरत्नाञ्जनाङ्किताः ।
प्राकारास्त्रिपुरे तस्मिन् गिरिप्राकारसन्निभाः ॥ २२॥
एकैकस्मिन् पुरे तस्मिन् गोपुराणां शतं शतम् ।
सपताका ध्वजवतीर्दृश्यन्ते गिरिशृङ्गवत् ॥ २३ ॥
नूपुरारावरम्याणि त्रिपुरे तत् पराण्यपि ।
स्वर्गातिरिक्तश्रीकाणि तत्र कन्यापुराणि च ॥ २४॥
आरामैश्च विहारैश्च तडागवटचत्वरैः ।
सरोभिश्च सरिद्भिश्च वनैश्चोपवनैरपि ॥ २५ ॥
दिव्यभोगोपभोगानि नानारत्नयुतानि च ।
पुष्पोत्करैश्च सुभगास्त्रि पुरस्योपनिर्गमाः ।
परिखाशतगम्भीराः कृतामाया निवारणैः ॥ २६ ॥

निशम्य तद्दुर्गविधानमुत्तमम्
कृतं मयेनाद्भुत वीर्यकर्मणा ।
दितेःसुता दैवत राजवैरिणः
सहस्रशः प्रापुरनन्त विक्रमाः ॥ २७ ॥

तदासुरैर्दर्पितवैरिमर्दनैर्जनार्दनैः शैलकरीन्द्रसन्निभैः ।
बभूव पूर्णं त्रिपुरं तथा पुरा यथाम्बरं भूरिजलैर्जलप्रदैः २८

अथ त्रिंशदधिकशततमोऽध्यायः।

सूत उवाच। निर्मिते त्रिपुरे दुर्गे मयेनासुरशिल्पिना।
तद्दुर्गं दुर्गतां प्राप बद्धवैरैः सुरासुरैः॥ १॥
सकलत्राः सपुत्राश्च शस्त्रवन्तोऽथकोपमाः।
मयादिष्टानि विविशुर्गृहाणि हृषिताश्च ते॥ २॥
सिंहा वनमिवानेके मकरा इवसागरम्।
रोगैश्चातिपारुष्यैः शरीर मिव संहतैः॥ ३॥
तद्वद्बलिभिरध्यस्तं तत्पुरं देवतारिभिः।
त्रिपुरं संकुलं जातं दैत्यकोटिशताकुलम्॥ ४॥
सुतलादपि निष्पत्य पातालाद्दानवालयात्।
उपतस्थुः पयोदाभा ये च गिर्य्युपजीविनः॥ ५॥
योयं प्रार्थयते कामं संप्राप्त स्त्रिपुरात्मयात्।
तस्य तस्य मयस्तत्र मायया विदधाति सः॥ ६॥
सचन्द्रेषु च दोषेषु साम्बुजेषु सरःसु च।
आरामेषु स चूतेषु तपोधन वनेषु च॥ ७॥
सङ्गाचन्दनदिग्धाङ्गा मातङ्गाः समदा इव।
मृष्टाभरणवस्त्राश्च सृष्टस्रगनुलेपनाः॥ ८॥
प्रियाभिः प्रियकामाभिर्हावभावप्रसूतिभिः।
नारीभिः सततं रेमुर्मुदिताश्चैव दानवाः॥ ९॥
मयेन निर्मिते स्थाने मोदमाना महासुराः।
अर्थं धर्मं च कामं च निदधुस्ते मतीः स्वयम्॥ १०॥
तेषां त्रिपुरयुक्तानां त्रिपुरे त्रिदशारिणाम्।
व्रजतिस्म सुखं कालः स्वर्गस्थानां यथा तथा॥११॥
शुश्रूषन्ते पितॄन् पुत्रा पत्न्यश्चापि पतींस्तथा।

विमुक्तकलहाश्चापि प्रीतयः प्रचुराभवन् ॥ १२ ॥
नाधर्मस्त्रिपुरस्थानां बाधते वीर्य्यवानपि ।
अर्चयन्तो दितेः पुत्रा त्रिपुरायतने हरम् ॥ १३ ॥
पुण्याहशब्दानुच्चैश्चाशीर्वादांश्च वेदगान् ।
स्वनूपुररवान् मिश्रान् वेणुवीणारवानपि ॥ १४ ॥
हासांश्च वरनारीणां चित्तव्याकुलकारकः ।
त्रिपुरे दानवेन्द्राणां रमतां श्रूयते सदा ॥ १५ ॥
तेषामर्चयतां देवान् ब्राह्मणांश्च नमस्यताम् ।
धर्मार्थकामतत्त्वानां महान् कालोऽभ्यवर्तत ॥ १६ ॥
अथालक्ष्मीरसूया च तृड्बुभुक्षे तथैव च ।
कलिश्च कलहश्चैव त्रिपुरं विविशुः सह ॥ १७ ॥
सन्ध्याकालं प्रविष्टास्ते त्रिपुरस्य भयावहाः ।
समभ्यासुः समं घोराः शरीराणि यथामयाः ॥ १८ ॥
सर्व एते विशन्तस्तु मयेन त्रिपुरान्तरम् ।
स्वप्ने भयावहा दृष्टा आविशन्तस्तु दानवान् ॥ १९ ॥
उदिते च सहस्रांशौ प्रभाभासाकरे रवौ ।
मयः सभामाविवेश भास्कराभ्यामिवाम्बुदः ॥ २० ॥
मेरुकूटनिभे रम्ये आसने स्वर्णमण्डिते ।
आसीनाः काञ्चनगिरेः शृङ्गे तोयमुचो यथा ॥ २१ ॥
पार्श्वयोस्तारकाख्यश्च विद्युन्माली च दानवः ।
उपविष्टो मयस्यान्ते हस्तिनः कलभाविव ॥ २२ ॥
ततः सुरारयः सर्वे रोषकोपारणाजिरे ।
उपविष्टा दृढं विद्धा दानवा देवशत्रवः ॥ २३ ॥
तेष्वासीनेषु सर्वेषु सुखासनगतेषु च ।

मयो मायाविजनक इत्युवाच स दानवान्॥ २४ ॥
खेचराः खेचराराचा भो भो दाक्षायणीसुताः!।
निशामयध्वं स्वप्नोऽयं मया दृष्टोभयावहः॥ २५ ॥
चतस्रः प्रमदास्तत्र त्रयोमर्त्या भयावहाः।
कोपानला दीप्तमुखाः प्रविष्टास्त्रिपुरादिनः॥ २६॥
प्रविश्य कुपितास्ते च पुराण्यतुलविक्रमाः।
प्रविष्टास्त्वच्छरीराणि भूत्वा बहुशरीरिणः॥ २७ ॥
नगरं त्रिपुरञ्चेदं तमसा समवस्थितम्।
सगृहं सह युष्माभिः सागराम्भसि मज्जितम्॥ २८ ॥
उलूकं रुचिरा नारी नग्ना रूढा खरं तथा।
पुरुषः सिन्दुतिलक स्तुरङ्गि स्त्रिलोचनः॥ २९ ॥
येन सा प्रमदा गुप्ता अहञ्चैव विशोषितः।
ईदृशी प्रमदा दृष्टा मया चाति भयावहा॥ ३० ॥
एष ईदृशिकः स्वप्नो दृष्टो वै दितिनन्दनाः!।
दृष्टः कथं हि कष्टाय असुराणां भविष्यति॥ ३१ ॥
यदि वोऽहं क्षमो राजा यदिदं वेत्थ चेङ्गितम्।
निबोधध्वं सुमनसो न चासूयितु मर्हथ॥ ३२ ॥
कामं चेर्ष्याञ्च कोपञ्च असूयां संविहाय च।
सत्ये दमे च धर्मे च मुनिवादे च तिष्ठत॥ ३३ ॥
शान्तयश्च प्रयुञ्जन्तां पूज्यताञ्च महेश्वरः।
यदि नामास्य स्वप्नस्य ह्येवञ्चोपरमोभवेत्॥ ३४ ॥
कुप्यति नो ध्रुवं रुद्रो देवदेवस्त्रिलोचनः।
भविष्याणि च दृश्यन्ते यतो न त्रिपुरे सुराः॥ ३५ ॥
कलहं वर्जयन्तश्च अर्जयन्त स्तथार्जवम्।

स्वप्नोदयं प्रतीचध्वं कालोदयमथापि च ॥ ३६ ॥
श्रुत्वा दानवयोषितो ह्येवं भयभावितम् ।
क्रोधेर्ष्यावश्यया युक्ता दृश्यन्ते च विनाशगाः ॥ ३७ ॥
विनाशमुपपश्यन्तो ह्यलक्ष्म्याध्यासिता सुराः ।
तत्रैव दृष्ट्वा तेऽन्योऽन्यं संक्रोधापूरितेक्षणाः ॥ ३८ ॥
अथ दैवपरिध्वस्ता दानवास्त्रिपुरालयाः ।
हित्वा सत्यञ्च धर्मञ्च अकार्याण्यपि चक्रमुः ॥ ३९ ॥
द्विषन्ति ब्राह्मणान् पुण्यान्नार्चयन्ति हि देवताः ।
गुरुं चैव न मन्यन्ते ह्यन्योन्यञ्चापि चुक्रुधुः ॥ ४० ॥
कलहेषु च सज्जन्ते स्वधर्मेषु हसन्ति च ।
परस्परञ्च निन्दन्ति अहमित्येववादिनः ॥ ४१ ॥
उच्चैर्गुरून् प्रभाषन्ते नाभिभाषन्ति पूजिताः ।
अकस्मात् साश्रुनयना जायन्ते च समुत्सुकाः ॥ ४२ ॥
दधिसक्तून् पयश्चैव कपित्थानि च रात्रिषु ।
भक्षयन्ति च शेरन्त उच्छिष्टाः संवृता तथा ॥ ४३ ॥
मूत्रं कृत्वोपस्पृशन्ति चाकृत्वा पादधावनम् ।
संविशन्ति च शय्यासु शौचाचारविवर्जिताः ॥ ४४ ॥
संकुचन्ति भयाच्चैव मार्जाराणां यथाखुकाः ।
भार्यां गत्वा न शुध्यन्ति रहोवृत्तिषु निस्त्रपाः ॥ ४५ ॥
पुरा सुशीला भूत्वा च दुःशीलत्वमुपागताः ।
देवांस्तपोधनांश्चैव बाधन्ते त्रिपुरालयाः ॥ ४६ ॥
मयेन वार्यमाणापि ते विनाशमुपस्थिताः ।
विप्रियाण्येव विप्राणां कुर्वाणाः कलहैषिणः ॥ ४७ ॥
वैभ्राजं नन्दनं चैव तथा चैत्ररथं वनम् ।

अशोकं च वराशोकं सर्वर्त्तुकमथापि च ॥ ४८ ॥
स्वर्गं च देवतावासं पूर्वदेववशानुगाः ।
विध्वंसयन्ति संक्रुद्धास्तपोधनवनानि च ॥ ४९ ॥
विध्वस्तदेवायतनाश्रमं च संभग्नदेवद्विजपूजकं तु ।
जगद्बभूवामरराजदुष्टै रभिद्रुतं सस्यमिवालिवृन्दैः ॥ ५० ॥

---

अथ एकत्रिंशत्यधिकशततमोऽध्यायः ।

सूत उवाच । अशीलेषु प्रदुष्टेषु दानवेषु दुरात्मसु ।
लोकेषूत्सादयमानेषु तपोधनवनेषु च ॥ १ ॥
सिंहनादे व्योमगानान्तेषु भीतेषु जन्तुषु ।
त्रैलोक्ये भयसंमूढे तमोन्धत्व मुपागते ॥ २ ॥
आदित्यावसवः साध्याः पितरो मरुताङ्गणाः ।
भीताः शरणमाजग्मुर्ब्रह्माणं प्रपितामहम् ॥ ३ ॥
तं ते स्वर्णोत्पलासीनं ब्रह्माणं समुपागताः ।
नेमुरूचुश्च सहिताः पञ्चास्यं चतुराननम् ॥ ४ ॥
वरगुप्तास्त्वेवेह दानवास्त्रिपुरालयाः ।
बाधन्ते स्मान्यथाप्रेष्य नमुशाधि ततोऽनघ ! ॥ ५ ॥
मेघागमे यथा हंसामृगाः सिंहभयादिव ।
दानवानां भयात्तद्वद्भ्रामः प्रपितामह ॥ ६ ॥
पुत्राणां नामधेयानि कलत्राणां तथैव च ।
दानवैर्भ्राम्य माणानां विस्मृतानि ततोऽनघ ! ॥ ७ ॥
देववेश्म प्रभग्नाश्च आश्रमस्थं शनानि च ।
दानवैर्लोभमोहान्धैः क्रियन्ते च भ्रमन्ति च ॥ ८ ॥
यदि न त्रायसे लोकं दानवैर्विद्रुतं द्रुतम् ।

धर्षणानेन निर्देवं निर्मनुष्याश्रमं जगत् ॥ ९ ॥
इत्येवं त्रिदशैरुक्तः पद्मयोनिः पितामहः ।
प्रत्याह त्रिदशान् देवानि इन्दुतुल्याननः प्रभुः ॥१०॥
मयस्य योवरो दत्तो मया मति मताम्वराः ! ।
तस्यान्त एषसंग्रामो यः पुरोक्तो मया सुराः ! ॥ ११॥
तच्च तेषां मधिष्ठानं त्रिपुरं त्रिदशर्षभाः ।
एकेषु पातमोचेण हन्तव्यं नेषु इष्टिभिः ॥ १२ ॥
भवताञ्च न पश्यामि कमप्यत्र सुरर्षभाः ।
यस्तु चैक प्रहारेण पुरं हन्यात् सदानवम् ॥ १३ ॥
त्रिपुरं नाल्पवीर्येण शक्यं हन्तुं शरेण तु ।
एकं मुक्ता महादेवं महेशानं प्रजापतिम् ॥ १४ ॥
ते यूयं यदि अन्ये च क्रतुविघ्नं सकं हरम् ।
या चामः सहिता देवं त्रिपुरं स हनिष्यति ॥ १५ ॥
क्रतः पुराणां विष्कम्भो योजनानां शतं शतम् ।
यथा चैक प्रहारेण हन्यते वैभवेन तु ।
पुष्य योगेन युक्तानि तानि चैकक्षणेन तु ॥ १६ ॥
ततो देवैश्च संप्रोक्तोगास्याम इति दुःखितैः ।
पितामहश्च तैः सार्द्धं भवसंसदमागतः ॥ १७ ॥
तं भवं भूत भव्येशं गिरिशं शूलपाणिनम् ।
पश्यन्ति चोमया सार्द्धंनन्दिना च महात्मना ॥ १८ ॥
अग्निवर्णमजन्देवमग्नि कुण्डनिभेक्षणम् ।
अग्न्यादित्य सहस्राभ मग्निवर्णं विभूषितम् ॥ १९ ॥
चन्द्रावय वलक्ष्माणं चन्द्रसौम्य तराननम् ।
आगम्य तमजन्देव मथ तं नीललोहितम् ॥ २० ॥

स्तुवन्तो वरदं शम्भुं गोपतिं पार्वतीपतिम् ॥ २१॥
देवा ऊचुः। नमो भगवते शाय रुद्राय वरदाय च।
पशूनाम्पतये नित्य मुग्राय च कपर्दिने ॥ २२ ॥
महादेवाय भीमाय त्र्यम्बकाय च शान्तये।
ईशानाय भयघ्नाय नमस्त्वन्धकघातिने ॥ २३ ॥
नीलग्रीवाय भीमाय वेधसे वेधसाम्नु ते।
कुमार शत्रु निघ्नाय कुमार जनकाय च ॥ २४ ॥
विलोहिताय धूम्राय वराय क्रथनाय च।
नित्यं नीलशिखण्डाय शूलिने दिव्यशायिने ॥ २५ ॥
उरगाय त्रिनेत्राय हिरण्यवसुरेतसे।
अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ॥ २६ ॥
वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे।
तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ॥ २७ ॥
विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते।
नमोऽस्तु दिव्यरूपाय प्रभवे दिव्यशम्भवे ॥ २८ ॥
अभिगम्याय काम्याय स्तुत्यायार्च्याय सर्वदा।
भक्तानुकम्पिने नित्यं दिशते यन्मनोगतम् ॥ २९ ॥

---

अथ द्वात्रिंशदधिकशततमोऽध्यायः।

सूत उवाच। ब्रह्माद्यैः स्तूयमानस्तु देवदेवो महेश्वरः।
प्रजापतिमुवाचेदं देवानां च भवं जहत् ॥ १
भो ! देवाः ! स्वागतं वोऽस्तु ब्रूत यद्वो मनोगतम्।
तावदेव प्रयच्छामि नास्त्वदेयं मया हि वः ॥ २ ॥

युष्माकं नितरां यं वै कर्ताहं विबुधर्षभाः ! ।
चरामि महदत्युग्रं यथापि परमं तपः ॥ ३ ॥
विद्विष्टा वो मम द्विष्टाः कष्टाः कष्टपराक्रमाः ।
तेषामभावः सम्पाद्यो युष्माकं भव एव च ॥ ४ ॥
एवमुक्तास्तु देवेन प्रेम्णा सब्रह्मकाः सुराः ।
रुद्रमाहुर्महाभागं भागार्हाः सर्व एव ते ॥ ५ ॥
भगवंस्तैस्तपस्तप्तं रौद्रं रौद्रपराक्रमैः ।
असुरैर्बाध्यमानाः स्म वयं त्वां शरणं गताः ॥ ६ ॥
मयो नाम दितेः पुत्रस्त्रिनेत्र कलहप्रियः ।
त्रिपुरं येन तद्दुर्गं कृतं पाण्डुरगोपुरम् ॥ ७ ॥
तदाश्रित्य पुरं दुर्गं दानवा वरनिर्भयाः ।
बाधन्तेऽस्मान् महादेव प्रेष्यमस्वामिनं यथा ॥ ८ ॥
उद्यानानि च भग्नानि नन्दनादीनि यानि च ।
वराश्चाप्सरसः सर्वा रम्भाद्या दनुजैर्हृताः ॥ ९ ॥
इन्द्रस्य वाह्याश्च गजाः कुमुदाञ्जनवामनाः ।
ऐरावताद्यापहृता देवतानां महेश्वर ! ॥ १० ॥
ये चेन्द्ररथमुख्याश्च हरयोऽपहृतासुरैः ।
जाताश्च दानवानां ते रथयोग्यास्तुरङ्गमाः ॥ ११ ॥
ये रथा ये गजाश्चैव याः स्त्रियो वसु यच्च नः ।
तन्नोऽप्यपहृतं दैत्यैः संशयो जीविते पुनः ॥ १२ ॥
त्रिनेत्र एवमुक्तस्तु देवैः शक्रपुरोगमैः ।
उवाच देवान् देवेशो वरदो वृषवाहनः ॥ १३ ॥
व्यपगच्छतु वो देवा महद्दानवजं भयम् ।
तदहं त्रिपुरं धक्ष्ये क्रियतां यद्ब्रवीमि तत् ॥ १४ ॥

यदीच्छथ मया दग्धुं तत्पुरं सह दानवम् ।
रथमौपयिकं मह्यं सज्जयध्वं किलाद्यते ॥ १५ ॥
दिग्वाससा तथोक्तास्ते सपितामहकाः सुराः ।
तथेत्युक्त्वा महादेवञ्चक्रुस्ते रथमुत्तमम् ॥ १६ ॥
धरां कूवरकौ तु द्वौ रुद्रपार्श्वचरा शुभौ ।
अधिष्ठानं शिरो मेरो रथो मन्दर एव च ॥१७ ॥
चक्रुश्चन्द्रञ्च सूर्य्यञ्च चक्रे काञ्चनराजते ।
कृष्णपक्षं शुक्लपक्षं पक्षद्वयमपीश्वराः ॥ १८ ॥
रथनेमिद्वयं चक्रुर्देवा ब्रह्मपुरःसराः ।
आदिद्वयं पक्षयन्त्रं यन्त्रमेताश्च देवताः ॥ १९ ॥
कम्बलाश्वतराभ्याञ्च नागाभ्यां समवेष्टितम् ।
भार्गवश्चाङ्गिराश्चैव बुधोऽङ्गारक एव च ॥ २० ॥
शनैश्चरस्तथाचात्र सर्वे ते देवसत्तमाः ।
वरूथं गगनं चक्रुश्चारुरूपं रथस्य ते ॥ २१ ॥
कृतं द्विजिह्वनयनं त्रिवेणुं शातकौम्भिकम् ।
मणिमुक्तेन्द्रनीलैश्च वृतं ह्यष्टमुखैः सुरैः ॥ २२ ॥
गङ्गा सिन्धुः शतद्रूश्च चन्द्रभागा सरस्वती ।
वितस्ता च विपाशा च यमुना गण्डकी तथा ॥२३ ॥
सरस्वती देविका च तथा च शरयूरपि ।
एताः सरिद्वराः सर्वा वेणुसंज्ञाः कृता रथे ॥ २४॥
धृतराष्ट्राश्च ये नागास्ते च वेण्वात्मकाः कृताः ।
वासुके कुलजाये च ये च रैवतवंशजाः ॥ २५ ॥
ते सर्पा दर्पसम्पूर्णाश्चापतूणेष्वनूनगाः ।
अवतस्थुः शरा भूत्वा नानाजातिशुभाननाः ॥ २६ ॥

सुरसा सरमा कद्रूर्विनता शुचिरेव च ।
तृषा बुभुक्षा सर्वाद्या मृत्युः सर्वशमस्तथा ॥ २७ ॥
ब्रह्मवध्या च गोवध्या बालवध्याः प्रजाभयाः ।
गदा भूत्वा यज्ञयश्च तदा देवरथेऽभ्ययुः ॥ २८ ॥
युगं कृतयुगञ्चास चातुर्होत्रप्रयोजकाः ।
चतुर्वर्णाः सलीलाश्च बभूवुः स्वर्णकुण्डलाः ॥ २९ ॥
तद्युगं युगशार्दूलं रथशीर्षे प्रतिष्ठितम् ।
धृतराष्ट्रेण नागेन बद्धं बलवता महत् ॥ ३० ॥
ऋग्वेदः सामवेदश्च यजुर्वेदस्तथापरः ।
वेदाश्चत्वार एवैते चत्वारस्तुरगा भवन् ॥ ३१ ॥
अन्नदानपुरोगाणि यानि दानानि कानिचित् ।
तान्यासन्वाजिनां तेषां भूषणानि सहस्रशः ॥ ३२
पद्मद्वयं तक्षकश्च कर्कोटकधनञ्जयौ ।
नागा बभूवुरेवैते हयानां वालबन्धनाः ॥ ३३ ॥
ओङ्कारप्रभवास्ता वा मन्त्रयज्ञक्रतुक्रियाः ।
उपद्रवाः प्रतीकाराः पशुबन्धेष्टय स्तथा ॥ ३४ ॥
यज्ञोपवाह्यान्येतानि तस्मिन् लोकरथे शुभे ।
मणिमुक्ताप्रवालैस्तु भूषितानि सहस्रशः ॥ ३५ ॥
प्रतोदोङ्कार एवासीत्तदग्रञ्च वषट्कृतम् ।
सिनीवाली कुहूराका तथा चानुमती शुभा ॥ ३६
योक्त्राण्यासंस्तुरङ्गाणामपसर्पणविग्रहाः ॥ ३७ ॥
कृष्णान्यथ च पीतानि श्वेतमाञ्जिष्ठकानि च ।
अवदाताः पताकाश्च बभूवुः पवनेरिताः ॥ ३८ ॥
ऋतुभिश्च कृतः षड्भिर्धनुः सम्वत्सरोऽभवत् ।

अजरा ज्याभवच्चापि साम्बिका धनुषो दृढ़ा ॥ ३९ ॥
कालो हि भगवान् रुद्रस्तञ्च सम्वत्सरं विदुः ।
तस्मादुमा कालरात्रिर्धनुषोऽजरा ज्याभवत् ॥ ४० ॥
सगर्भं त्रिपुरं येन दग्धवान् स त्रिलोचनः ।
स इषुर्विष्णुसोमाग्नित्रिदैवतमयोऽभवत् ॥ ४१ ॥
आननं ह्यग्निरभवच्छल्यं सोमस्तमोनुदः ।
तेजसः समवायोऽथ चेषोस्तेजो रथाङ्गभृत् ॥ ४२ ॥
तस्मिंश्च वीर्य्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः ।
तेजः सम्वसनार्थं वै मुमोचातिविषो विषम् ॥ ४३ ॥
कृत्वा देवा रथञ्चापि दिव्यं दिव्यप्रभावतः ।
लोकाधिपतिमभ्येत्य रुद्रं वचनमब्रुवन् ॥ ४४ ॥
संस्कृतोऽयं रथोऽस्माभिस्तव दानवशत्रुजित् ।
इदमापत्परित्राणं देवान् सेन्द्रपुरोगमान् ॥ ४५ ॥
तं मेरुशिखराकारं त्रैलोक्यरथमुत्तमम् ।
प्रशस्य देवान् साध्विति रथं पश्यति शङ्करः ॥ ४६ ॥
मुहुर्दृष्ट्वा रथं साधु साध्वित्युक्त्वा मुहुर्मुहुः ।
उवाच सेन्द्रानमरानमराधिपतिः स्वयम् ॥ ४७ ॥
यादृशोऽयं रथः कॢप्तो युष्माभिर्मम सत्तमाः ।
ईदृशो रथसम्पत्त्या यन्ता शीघ्रं विधीयताम् ॥ ४८ ॥
इत्युक्ता देवदेवेन देवा विद्धा इवेषुभिः ।
अवापुर्महतीं चिन्तां कथं कार्य्यमिति ब्रुवन् ॥ ४९ ॥
महादेवस्य देवोऽन्यः कोनाम सदृशो भवेत् ।
मुक्ता चक्रायुधं देवं सोपास्य इषुमाश्रितः ॥ ५० ॥
धुरि युक्ता इवोक्षाणो घटन्त इव पर्वतैः ।

निश्वसन्तः सुराः सर्वे कथमेतदिति ब्रुवन् ॥ ५१ ॥
देवो दृष्ट्वाथ देवांस्तु शोकमापन्न भूर्गताम् ।
अहं सारथिरित्युक्ता जग्राहाश्वांस्ततोऽग्रजः ॥ ५२॥
ततो देवैः सगन्धर्वैः सिंहनादो महान् कृतः ।
प्रतोदहस्तं संप्रेक्ष्य ब्रह्माणं सूततां गतम् ॥ ५३॥
भगवानपि विश्वेशो रथस्थे वै पितामहे ।
सदृशः सूत इत्युक्त्वा चारुरोह रथं हरः ॥ ५४ ॥
आरोहति रथं देवे ह्यश्वा हरभरातुराः ।
जानुभिः पतिता भूमौ रजोग्रासश्च ग्रासितः ॥ ५५ ॥
देवो दृष्ट्वाथ वेदांस्तानभीषुभयहयान् भयात् ।
उज्जहार पितॄनार्तान् सुपुत्र इव दुःखितान् ॥ ५६॥
ततः सिंहरवोभूयो बभूव रथभैरवः ।
जयशब्दश्च देवानां संवभूवार्णवोपमः ॥ ५७ ॥
तदोङ्कार मयं गृह्य प्रतोदं वरदः प्रभुः ।
स्वयम्भूः प्रययौ वाहानतुमन्त्र्य यथाजवम् ॥ ५८ ॥
ग्रसमाना इवाकाशं मुष्णन्त इव मेदिनीम् ।
मुखेभ्यः ससृजुः श्वासानुच्छ्वसन्त इवोरगाः ॥ ५९ ॥
स्वयम्भुवा चोद्यमानाश्चोदितेन कपर्दिना ।
व्रजन्ति तेऽश्वा जवनाः क्षयकाल इवानिलाः ॥ ६०॥
ध्वजोच्छ्रयविनिर्माणे ध्वजयष्टिमनुत्तमाम् ।
आक्रम्य नन्दीवृषभं तस्थौ तस्मिं श्शिवेच्छया ॥ ६१॥
भार्गवाङ्गिरसौ देवौ दण्डहस्तौ रविप्रभौ ।
रथचक्रे तु रक्षेते रुद्रस्य प्रियकाङ्क्षिणौ ॥ ६२ ॥
शेषश्च भगवान्नागः अनन्तोऽन्तकरोऽरिणाम् ।

शरद्घनो रथम्याति शयनं ब्रह्मणस्तदा ॥ ६३ ॥
यमस्तूर्णं समास्थाय महिषघातिदारुणम् ।
द्रविणाधिपतिर्व्यालं सुराणामधिपो द्विपम् ॥ ६४ ॥
चरघत मयूरं निकूजन्तं किन्नरं यथा ।
गुह आस्थाय वरदोयुगोपमरथं पितुः ॥ ६५ ॥
नन्दीश्वरश्च भगवान् शूलमादाय दीप्तिमान् ।
पृष्ठतश्चापि पार्श्वाभ्यां लोकस्य चयलक्ष्यथा ॥ ६६ ॥
प्रमथाश्चाग्निवर्णाभाः साग्निज्वाला इवाचलाः ।
अनुजग्मू रथं शार्वं नक्रा इव महार्णवम् ॥ ६७ ॥
भृगुभरद्वाजवसिष्ठगौतमाः क्रतुः पुलस्त्यः पुलहस्तपोधनाः ।
मरीचिरत्रिर्भगवानथाङ्गिराः पराशरागस्त्यमुखा महर्षयः ॥ ६८ ॥
हरमजितमजं प्रतुष्टुवुर्वचनविशेषैर्विचित्रभूषणैः ।
रथस्त्रिपुरे सकाञ्चनाचलोव्रजति सपक्ष इवाद्रिरम्बरे ॥ ६९ ॥
करिगिरिरविमेघसन्निभाः सजलपयोदनिनादनादिनः ।
प्रमथगणाः परिवार्य देवगुप्तं रथममराधिययुर्म्म दर्पयुक्ताः ॥ ७० ॥
मकरतिमितिमिङ्गिलाहतः प्रलय इवातिसमुद्धतोऽर्णवः ।
व्रजति रथवरोऽतिभास्वरो ह्यशनिनिपातपयोदनिस्वनः ॥ ७१ ॥

---

अथ त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच । पूज्यमाने रथे तस्मिन् लोकैर्देवे रथे स्थिते ।
प्रमथेषु नदत्सूग्रं प्रवदत्सु च साध्विति ॥ १ ॥
ईश्वरस्वरघोषेण नर्दमाने महावृषे ।
जयत्सु विप्रेषु तथा गर्जत्सु तुरगेषु च ॥ २ ॥
रथाङ्गणात् समुत्पत्य देवर्षिर्नारदः प्रभुः ।

कान्त्या चन्द्रोपमस्तूर्णं त्रिपुरं पुरमागतः ॥ ३ ॥
औत्पातिकन्तु दैत्यानां त्रिपुरे वर्त्तते ध्रुवम् ।
नारदश्चात्र भगवान् प्रादुर्भूत स्तपोधनः ॥ ४ ॥
आगतं जलदाभासं समेताः सर्वदानवाः ।
उत्तस्थुर्नारदं दृष्ट्वा अभिवादनवादिनः ॥ ५ ॥
तमर्घ्येण च पाद्येन मधुपर्केण चेश्वराः ।
नारदं पूजयामासुर्ब्रह्माणमिव वासवः ॥ ६ ॥
तेषां स पूजां पूजार्हः प्रतिगृह्य तपोधनः ।
नारदः सुखमासीनः काञ्चने परमासने ॥ ७ ॥
मयस्तु सुखमासीने नारदे नारदोद्भवे ।
यथार्हं दानवैः सार्द्धमासीनो दानवाधिपः ॥ ८ ॥
आसीनं नारदं प्रेक्ष्य मयस्त्वथ महासुरः ।
अब्रवीद्वचनं तुष्टो हृष्टरोमाननेक्षणः ॥ ९ ॥
औत्पातिकं पुरेऽस्माकं यथा नान्यत्र कुत्रचित् ।
वर्त्तते वर्तमानज्ञ ! वद त्वं हि च नारद ! ॥ १० ॥
दृश्यन्ते भयदाः स्वप्ना भज्यन्ते च ध्वजाः परम् ।
विना च वायुना केतुः पतते च तथा भुवि ॥ ११ ॥
अट्टालकाश्च नृत्यन्ते सपताकाः सगोपुराः ।
हिंस हिंसेति श्रूयन्ते गिरश्च भयदाः पुरे ॥ १२ ॥
नाहं बिभेमि देवानां सेन्द्राणामपि नारद ! ।
मुक्त्वैकं वरदं स्थाणुं भक्ताभयकरं हरम् ॥ १३ ॥
भगवन्नास्त्यविदितमुत्पातेषु तवानघ ! ।
अनागतमतीतञ्च भवान् जानाति तत्त्वतः ॥ १४ ॥
तदितस्त्वोभयस्थानमुत्पाताभिनिवेदितम् ।

अवयस्व मुनिश्रेष्ठ! प्रपन्नस्य तु नारद! ॥ १५ ॥
इत्युक्तो नारदस्तेन मयेनामयवर्जितः।
नारद उवाच। शृणु दानव! तत्त्वेन भवस्यौत्पातिका यथा ॥१६॥
धर्मेति धारणे धातुर्माहात्म्ये चैव पठ्यते।
धारणाच्च महत्त्वेन धर्म्म एव निरुच्यते ॥ १७ ॥
स इष्टप्रापको धर्म्म आचार्य्यैरुपदिश्यते।
इतरश्चानिष्टफल आचार्य्यैर्नोपदिश्यते ॥ १८ ॥
उत्पथान् मार्गमागच्छेन्मार्गाच्चैव विमार्गताम्।
विनाशस्तस्य निर्देश्य इति वेदविदो विदुः ॥ १९ ॥
स त्वधर्म्मे रथारूढ़ः सहैभिस्त्वं दानवैः।
अपकारिषु देवानां कुरुषे त्वं सहायताम् ॥ २० ॥
तदेतान्येवमादीनि उत्पातावेदितानि च।
वैनाशिकानि दृश्यन्ते दानवानां तथैव च ॥ २१ ॥
एष रुद्रः समास्थाय महालोकमयं रथम्।
आयाति त्रिपुरं हन्तुं मय! त्वामसुरानपि ॥२२॥
स त्वं महौजसं नित्यं प्रपद्यस्व महेश्वरम्।
यास्यसे सह पुत्रैश्च दानवैः सह मानद! ॥ २३ ॥
इत्येव मावेद्यभयं दानवोपस्थितं महत्।
दानवानां पुनर्देवो देवेशपदमागतः ॥ २४ ॥
नारदे तु मुनौ याते मयो दानवनायकः।
शूरसम्मतमित्येवं दानवानाह दानवः ॥ २५ ॥
शूराः स्थ जातपुत्राः स्थ कृतकृत्याः स्थ दानवाः।
युध्यध्वं दैवतैः सार्द्धं कर्तव्यं चापिमोऽभयम् ॥ २६ ॥
जित्वा वयं भविष्यामः सर्वेऽमरसभासदः।

दिवांश्च वेन्द्रकान् हत्वा लोकान् भोक्ष्या महेश्वराः ॥२७॥
महातलेषु च तथा तिष्ठध्वं मत्सपाश्रयः ।
एवंमिता युक्तस्त्वाव तिष्ठध्वं भोग्यतायुधाः ॥ २८ ॥
पुराणि नोचि चैतानि यथास्थानेषु दानवाः ।
तिष्ठध्वं सङ्गनीयानि भविष्यन्ति पुराणि च ॥ २९ ॥
न भोगतास्तथा मूरा दिवता विदिता हि वः ।
ताः प्रयत्नेन वार्याश्च विद्वार्याश्चैव सायकैः ॥ ३० ॥
इति दनु तनयान्मय स्तथोक्ता
सुरगणवारणवारणे वचांसि ।
युवतिजनविषया मानसं तत्
त्रिपुरपुरं सहसा विवेश राजा ॥ ३१ ॥
अथ रजतविषयभाव भावो भवमभिपूज्य दिगम्बरं सुगीर्भिः ।
शरण मुपजगाम देवदेवं मदनायंम्बक यत्र देहघातम् ॥३२॥
मय मभयपदैषिणं प्रपन्नं
भक्तिस बुबोध वतीयदीप्तनेत्रः ।
तदभिमतमदान्ततः प्रमाणी
स च किल निर्भय एव दानवोऽभूत् ॥ ३३ ॥
चतुस्त्रिंशदधिकशततमोऽध्यायः ।
सूत उवाच । ततो रम्ये देववरो नारदोऽभ्यगमत् पुनः ।
आगत्य चैव त्रिपुरात्सभायामासितः स्वयम् ॥ १ ॥
इत्यादत मितिख्यातं तदस्य विक्रतायतम् ।
मय यत्नोचवेति लोकत्रियंम च संयतः ॥ २ ॥
देवानां जन्मभूमिर्या त्रिषु लोकेषु विश्रुता ।
विवाहाः क्रतवश्चैव जातकर्मादिकाः क्रियाः ॥ ३ ॥

देवानां यत्र हर्म्याणि कन्यादानानि यानि च।
रेमे नित्यं भवो यत्र सहायैः पार्षदैर्गणैः॥ ४॥
लोकपालाः सदा यत्र तस्थुर्मेरुगिरौ यथा।
मधुपिङ्गलनेत्रस्तु चन्द्रावयवभूषणः।
देवानामधिपं प्राह गणपांश्च महेश्वरः॥ ५॥
वासवैतद्दरीशां ते त्रिपुरं परिदृश्यते।
विमानैश्च पताकाभिर्ध्वजैश्च समलङ्कृतम्॥ ६॥
इदं हर्म्यमिदं ख्यातं वह्निवदभ्रतापनम्।
एते जना गिरिप्रख्याः सकुण्डलकिरीटिनः॥ ७॥
प्राकारगोपुराट्टेषु कक्षान्ते दानवा स्थिताः।
इमे च तोयदाभासा दनुजा विकृताननाः॥ ८॥
निर्गच्छन्ति पुरीदैत्याः सा युधाविजयैषिणः।
स त्वं शरशतैः सार्द्धं ससहायो वरायुधः।
सहस्रैर्भीमकैर्भृत्यैर्व्यापादय महासुरान्॥ १०॥
अहं च रथवर्येण निश्चलाचलवत्स्थितः।
पुरः पुरस्य रन्ध्रार्थी स्थास्यामि विजयाय वः॥११॥
यदा तु पुष्ययोगेन एकत्वं यास्यते परम्।
तदैतन्निर्दहिष्यामि शरेणैकेन वासव!॥ १२॥
इत्युक्तो वै भगवता रुद्रेणेह सुरेश्वरः।
ययौ तत्त्रिपुरं जेतुं तेन सैन्येन संवृतः॥ १३॥
प्रक्रान्तरथभीमैस्तैः स देवैः पार्षदाग्रणीः।
कृतसिंहरवोपेतैर्गच्छद्भिरिवाम्बुदैः॥ १४॥
तेन नादेन त्रिपुराद्दानवा युद्धलालसाः।
उत्पत्य दुद्रुवुश्चेलुः सायुधाः खे गणेश्वरान्॥१५॥

अन्ये पयोधराराबाः पयोधरसमा बभुः ।
ससिंहनादं वादित्रं वादयामासुरुद्धताः ॥ १६ ॥
देवानां सिंहनादश्च सर्वं तूर्यरवो महान् ।
अस्तोभूद्दैत्य नादेश्च चन्द्रस्तोयधरैरिव ॥ १७॥
चन्द्रोदयात् समुद्भूतः पौर्णमास इवार्णवः
त्रिपुरं प्रभवत्तद्वद्भीमरूप महासुरैः ॥ १८ ॥
प्राकारेषु पुरे तत्र गोपुरेष्वपिचापरे ।
अट्टालकान् समारुह्य केचिच्चलितवादिनः ॥ १९ ॥
स्वर्णमालाधराः शूराः प्रभासितकराम्बराः ।
केचिन्नदन्ति दनुजाक्रोधमुक्ता इवाम्बुदाः ॥ २० ॥
इतश्चेतश्च धावन्तः केचिदुद्धूतवाससः ।
किमेतदिति पप्रच्छुरन्योन्यं रूढमाश्रिताः ॥ २१ ॥
किमेतन्नैव जानामि ज्ञानमन्तर्हितं हि मे ।
ज्ञास्य सेनन्तरेणेति कालोऽभिस्तारतो महान् ॥ २२॥
सोऽप्यसौ पृथ्वी भारं सिंहश्च रथमास्थितः ।
निहतं त्रिपुरं पीड्य देहं व्याधिरिवोच्छ्रितः ॥ २३ ॥
य एषोऽस्मि स एषोऽस्तु काचिन्ता संभ्रमे सति ।
एहिमायुध मादाय क्वमे पृच्छा भविष्यति ॥ २४ ॥
इति तेऽन्योन्यमाविश्य उत्तरोत्तरभाषिणः ।
आसाद्य पृच्छन्ति तदा दानवा त्रिपुरालयाः ॥ २५ ॥
तारकाख्य पुरे दैत्यास्तारकाख्यपुरःसराः ।
निर्गताः कुपितास्तूर्णं बिलादिव महोरगाः ॥ २६ ॥
निर्द्धावन्तस्तु ते [illegible] [illegible]भिर् गुप्तैः ।
निरुद्धा [illegible] [illegible] यथा कैरवियूथपैः ॥ २७ ॥

दर्पितानां ततस्तेषां दर्पितानामिवाग्निनाम्।
रूपाणि जज्वलुस्तेषामग्नीनामिव धम्यताम् ॥ २८ ॥
ततो ह्रष्टन्ति चापानि भीमनादानि सर्वशः।
निकृष्य जघ्नुरन्योन्यमिषुभिः प्राणभोजनैः ॥ २९ ॥
मार्जारमृगभीमास्यान् पार्षदान्विकृताननान्।
दृष्ट्वा दृष्ट्वा हसन्तुर्दैत्या दानवा रूपसम्पदा ॥ ३० ॥
बाहुभिः परिघाकारैः कृष्यतां धनुषां शराः।
भटवर्मसु विविशुस्तडागानीव पक्षिणः ॥ ३१ ॥
मृताः स्थ क्व नु यास्येथ हनिष्यामो निवर्त्तताम्।
इत्येवं परुषाण्युक्त्वा दानवाः पार्षदर्षभान् ॥ ३२ ॥
विभिदुः सायकैस्तीक्ष्णैः सूर्यपादा इवाम्बुदान्।
प्रमथा अपि सिंहाक्ताः सिंहविक्रान्तविक्रमाः।
खण्डशैलशिलावृक्षैर्विभिदुर्दैत्यदानवान् ॥ ३३ ॥
अम्बुदैराकुलमिव हंसाकुलमिवाम्बरम्।
दानवाकुलमत्यर्थं तत्पुरं सकलं बभौ ॥ ३४ ॥
विकृष्टचापा दैत्येन्द्राः सृजन्ति शरदुर्दिनम्।
इन्द्रचापाङ्कितोरस्का जलदा इव दुर्दिनम् ॥ ३५ ॥
इषुभिस्ताड्यमानास्ते भूयो भूयो गणेश्वराः।
चक्रुस्ते देहनिर्यासं स्वर्णधातुमिवाचलाः ॥ ३६ ॥
तथा वृक्षशिला वज्रशूलपट्टिपरश्वधैः।
चूर्ण्यन्तेऽभिहता दैत्याः काचाष्टङ्कहता इव ॥ ३७ ॥
चन्द्रोदयात् समुद्भूतः पौर्णमास इवार्णवः।
त्रिपुरं प्रभवत्तद्वद्भीमरूपमहासुरैः ॥ ३८ ॥
तारकाक्षो जयत्येष इति दैत्या अघोषयन्।

जयतीन्द्रश्च रुद्रश्च इत्येव च गणेश्वराः ॥ ३९ ॥
वारिता दारिता बाणैर्योधास्तस्मिन् बलोभये ।
निःस्वनन्तोऽम्बुसमये जलगर्भा इवाम्बुदाः ॥ ४० ॥
करैश्छिन्नैः शिरोभिश्च ध्वजैश्छत्रैश्च पाण्डुरैः ।
युद्धभूमिर्भयवती मांसशोणितपूरिता ॥ ४१ ॥
व्योम्नि चोत्पत्य सहसा तालमात्रं वरायुधैः ।
दृढाहताः पतन्पूर्वं दानवाः प्रमथा स्तथा ॥ ४२ ॥
सिद्धाश्चाप्सरसश्चैव चारणाश्च नभोगताः ।
दृढप्रहारहर्षिताः साधु साध्विति चुक्रुशुः ॥ ४३ ॥
अनाहताश्च वियति देवदुन्दुभय स्तथा ।
नदन्तो मेघशब्देन सरभा इव रोषिताः ॥ ४४ ॥
ते तस्मिंस्त्रिपुरे दैत्यानद्यः सिन्धुपताविव ।
विशन्ति क्रुद्धवदना वल्मीकमिव पन्नगाः ॥ ४५ ॥
तारकाख्यपुरे तस्मिन् सुराः शूराः समन्ततः ।
सशस्त्रा निपतन्तिस्म सपक्षा इव भूधराः ॥ ४६ ॥
योधयन्ति त्रिभागेन त्रिपुरे तु गणेश्वराः ।
विद्युन्माली मयश्चैव भग्नौ च द्रुमवद्रणे ॥ ४७ ॥
विद्युन्माली स दैत्येन्द्रो गिरीन्द्रसदृशद्युतिः ।
आदाय परिघं घोरं ताडयामास नन्दिनम् ॥ ४८ ॥
स नन्दी दानवेन्द्रेण परिघेण दृढाहतः ।
भ्रमते मधुना व्यक्तः पुरा नारायणो यथा ॥ ४९ ॥
नन्दीश्वरे गते तत्र गणपाः ख्यातविक्रमाः ।
दुद्रुवुर्जातसंरम्भा विद्युन्मालिन मासुरम् ।
घण्टाकर्णः शङ्कुकर्णो महाकालश्च पार्षदाः ॥ ५१ ॥

ततश्च सायकैः सर्वान् गणपांश्च गणपाकृतीन्।
भूयो भूयः स विव्याध गणेश्वरमहत्तमान्॥ ५२ ॥
भित्वा भित्वा शरावोघैर्नभस्यम्बुधरो यथा।
तथाऽरञ्जितशब्देन नन्दी दिनकरप्रभः।
संज्ञां लब्ध्वा ततः सोऽपि विद्युन्मालिनमाद्रवत् ॥५३॥
रुद्रदत्तं तदा दीप्तं दीप्तानलसमप्रभम्।
वज्रं वज्रनिभाङ्गस्य दानवस्य ससर्ज ह ॥ ५४ ॥
तन्नन्दिभुजनिर्मुक्तं मुक्ताफलविभूषितम्।
पपात वक्षसि तदा वज्रं दैत्यस्य भीषणम् ॥ ५५ ॥
स वज्रं विहतो दैत्यो वज्रसंहननोपमः।
पपात वज्राभिहतः शक्रेणाद्रिरिवाहतः ॥ ५६ ॥
दैत्येश्वरं विनिहतं नन्दिना कुलनन्दिना।
चुक्रुशुर्दानवाः प्रेक्ष्य दुद्रुवुश्च गणाधिपाः ॥ ५७ ॥
दुःखामर्षितरोषास्ते विद्युन्मालिनिपातिते।
द्रुमशैलमहावृष्टिं पयोदाः ससृजुर्यथा ॥ ५८ ॥
ते पीड्यमाना गुरुभिर्गिरिभिश्च गणेश्वराः।
कर्तव्यं न विदुः किञ्चिदवन्धनाधार्मिका इव ॥५९॥
ततोऽसुरवरः श्रीमांस्तारकाख्यः प्रतापवान्।
स तरूणां गिरीणां वै तुल्यरूपधरोबभौ ॥ ६० ॥
भिन्नोत्तमाङ्गा गणपा भिन्नपादाङ्कितानना।
विरेजुर्भुजगा मन्त्रैर्वार्यमाणा यथा तथा ॥ ६१ ॥
मयेन मायावीर्येण वध्यमाना गणेश्वराः।
भ्रमन्ति बहुशब्दालाः पञ्जरे शकुना इव ॥ ६२ ॥
तथा सुरवरः श्रीमांस्तारकाख्यः प्रतापवान्।

ददाह च बलं सर्वं शुष्केन्धनमिवानलः ॥ ६३ ॥
तारकाक्षेण वार्यन्ते शरवर्षैस्तदा गणाः ।
मयेन मायानिहतास्तारकाक्षेण चेषुभिः ॥ ६४ ॥
गणेशा विधुरा जाता जीर्णमूला यथा द्रुमाः ॥ ६५ ॥
भूयः सम्पतते चाग्निर्वृक्षान् ग्राहान् भुजङ्गमान् ।
गिरीन्द्रांश्च हरीन् व्याघ्रान् वृक्षान् सृमरतर्णकान् ॥६६॥
शरभानष्टपादांश्च आपः पवन मेव च ।
मयो मायाबलेनैव पातयत्येव शत्रुषु ॥ ६७ ॥
ते तारकाक्षेण मयेन मायया
संमुह्यमाना विवशा गणेश्वराः ।
न शक्नुवन्ते मनसापि चेष्टितुम्
यथेन्द्रियार्था मुनिनाभिसंयताः ॥ ६८ ॥
महाजलाग्न्याद्रि सकुञ्जरोरगै-
र्हरीन्द्रव्याघ्रर्क्षतरक्षुराक्षसैः ।
विबाध्यमानास्तमसा विमोहिताः
समुद्रमध्येष्विव गाधकाङ्क्षिणः ॥ ६९ ॥
संमर्द्यमानेषु गणेश्वरेषु समर्द्यमानेषु सुरेतरेषु ।
ततः सुराणां प्रवराभिरक्षितुं रिपोर्बलं सम्विविशुः सहायुधाः ॥७०॥
यमोगदाभ्रो वरुणश्च भास्कर स्तथा कुमारोऽमरकोटिसंयुतः ।
स्वयं च शक्रः सितनागवाहनः कुलीशपाणिः सुरलोकपुङ्गवः ॥ ७१
स चोडुनाथः समुतो दिवाकरः ससान्तकश्चाग्रचपतिर्महाद्युतिः ।
एते रिपूणां प्रबलाभिरक्षितं तदा बलं सम्विविशुर्मदोद्धताः ॥ ७२॥
यथा वनं दर्पितकुञ्जराधिपा यथानभः साम्बुधरं दिवाकरः ।
यथा च सिंहैर्विजनेषु गोकुलं तथा बलं तन्निदशैरभिद्रुतम् ७३॥

कृतप्रहारातुरदीनदानवं
ततस्त्वभञ्जन बलं हि पार्षदाः ।
स्वर्ज्योतिषां ज्योतिरिवोष्मवान् हरि-
र्यथा तमो घोरतरं नराणाम् ॥ ७४ ॥
विशान्तयामास यथा सदैव
निशाकरः सञ्चितशार्वरं तमः ।
ततोऽपकृष्टे च तमःप्रभावे
स्वप्रभावे च विवर्द्धमाने ॥ ७५ ॥
दिग्लोकपालैर्गणनायकैश्च
कृतो महान् सिंहरवो मुहूर्तम् ।
संख्ये त्रिभग्ना त्रिकरा विपादा-
श्छिन्नोत्तमाङ्गाः शरपूरिताङ्गाः ॥ ७६ ॥
देवेतरा देववरैर्विभिन्नाः
सीदन्ति पङ्केषु यथा गजेन्द्राः ।
वज्रेण भीमेन च वज्रपाणिः
शक्त्या च शक्त्या च मयूरकेतुः ॥ ७७ ॥
दण्डेन चोग्रेण च धर्मराजः
पाशेन चोग्रेण च वारिगोप्ता ।
शूलेन कालेन च यक्षराजो
वीर्येण तेजस्वितया सुकेशः ॥ ७८ ॥
गणेश्वरास्ते सुरसन्निकाशाः
पूर्णाहुतीसिक्तशिखिप्रकाशाः ।
उत्सादयन्ते दनुपुत्रवृन्दा-
न्यथैव इन्द्राशनयः पतन्त्यः ॥ ७९ ॥

मयस्तु देवान् परिरक्षितारमु-
मात्मजं देववरं कुमारम् ।
शरेण भित्वा सहि तारकासुतं
स तारकाख्यासुरमाबभाषे ॥ ८० ॥
कृत्वा प्रहारं प्रविशामि वीरं पुरं हि दैत्येन्द्र बलेन युक्तः ।
विश्राममभूर्जस्करमप्यवाप्य पुनः करिष्यामि रणं प्रपन्नैः ॥८१॥
वयं हि शस्त्रक्षतवै.क्षिताङ्गा विशीर्णशस्त्रध्वजवर्मवाहाः ।
जयैषिण स्ते जयकाशिनश्च गणेश्वरा लोकवराधिपाश्च ॥८२॥
मयस्य श्रुत्वा दिवि तारकाख्योवचोऽभिकाङ्क्षन् क्षतजोपमाक्षः ।
विवेश तूर्णं त्रिपुरन्दितैः सुतैः सुतैरदित्या युधि हृष्टहर्षैः ॥८३॥
ततः सशङ्खानकभेरिभीमं ससिंहनादं हरसैन्यमाबभौ ।
मयानुगर्म्भीरगभीरगह्वरं यथा हिमाद्रे र्गजसिंहनादितम्॥८४॥

---

अथ पञ्चत्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच । मयः प्रहारं कृत्वा तु मायावी दानवर्षभः ।
विवेश तूर्णं त्रिपुरमभ्रं नीलमिवाम्बरम् ॥ १ ॥
सदीर्घमुष्णं निश्वस्य दानवान् वीक्ष्य मध्यगान् ।
दध्यौ लोकक्षये प्राप्ते कालं काल इवापरः ॥ २ ॥
इन्द्रोऽपि बिभ्यते यस्य स्थिता युद्देष्वपुरप्सतः ।
स चापि निधनं प्राप्तो विद्युन्माली महायशाः ॥३॥
दुर्गं वै त्रिपुरस्यास्य न समं विद्यते पुरम् ।
तस्याप्येषो नयः प्राप्तो न दुर्गं कारणं क्वचित् ॥ ४॥
कालस्यैव वशे सर्वं दुर्गं दुर्गतरञ्च यत् ।
काले क्रुद्धे कथं कालात्त्राणं नोऽद्य भविष्यति ॥५॥

लोकेषु त्रिषु यत् किञ्चिद्बलं वै सर्वजन्तुषु ।
कालस्य तद्वशं सर्वमिति पैतामहोविधिः ॥ ६ ॥
अस्मिन् कः प्रभवोद्योगोह्यसम्धार्य्ये मितात्मनि ।
सहने कः समर्थः स्याद्दृते देवं महेश्वरम् ॥ ७ ॥
बिभेमि नेन्द्रादि यमाद्वरुणाच्च च वित्तपात् ।
स्वामी चैषान्तु देवानां दुर्जयः स महेश्वरः ॥ ८ ॥
ऐश्वर्यस्य फलं यत्तत् प्रभुत्वस्य च यत् फलम् ।
तदद्य दर्शयिष्यामि यावद्वीराः समन्ततः ॥ ९ ॥
वापीममृततोयेन पूर्णां स्रक्ष्ये वरौषधीः ।
जीविष्यन्ति तदा दैत्याः सञ्जीवनवरौषधीः ॥ १० ॥
इति सञ्चिन्त्य बलवान् मयो मायाविनां वरः ।
मायया ससृजे वापीं रम्भामिव पितामहः ॥ ११ ॥
द्वियोजनायतां दीर्घां पूर्णयोजनविस्तृताम् ।
आरोहसंक्रमवतीं चन्द्ररूपां तथैव च ॥ १२ ॥
दुग्धैः किरणकल्पेन मृष्टेनामृतगन्धिना ।
पूर्णां परमतोयेन गुणपूर्णामिवाङ्गनाम् ॥ १३ ॥
उत्पलैः कुमुदैः पद्मैर्वृतां कादम्बकैस्तथा ।
चन्द्रभास्करवर्णाभैर्भीमैरावरणैर्वृताम् ॥ १४ ॥
खगैर्मधुररावैश्च चारुचामीकरप्रभैः ।
कामैर्विविधैरिवाकीर्णां जीवानामरणीमिव ॥ १५ ॥
तां वापीं सृज्य स मयो गङ्गामिव महेश्वरः ।
तस्यामस्नापयामास विद्युन्मालिनमादितः ॥ १६ ॥
स वाप्यां मज्जितो दैत्यो देवशत्रुर्महाबलः ।
उत्तस्थाविन्धनैरिद्धः सद्योहुत इवानलः ॥ १७ ॥

मयस्य चाञ्जलिं कृत्वा तारकाख्योऽभिवादितः ।
विद्युन्मालीति वचनं मयमुत्थाय चाब्रवीत् ॥ १८ ॥
क्व नन्दी सह रुद्रेण हतः प्रमथजम्बुकैः ।
युद्धकामो नन्दिनं पौत्य दयादेहेषु का क्षिनः ॥१९॥
पन्त्रास्यैव च रुद्रस्य भवामः प्रभविष्णवः ।
तैर्वा विनिहता युद्धे भविष्यामो यमागताः ॥ २० ॥
विद्युन्मालेर्निशम्यैतन्मयो वचनमूर्जितम् ।
तं परिष्वज्य साद्रोक्ष इदमाह महासुरः ॥ २१ ॥
विद्युन्मालिन्न मे राज्यमभिप्रेतन्न जीवितम् ।
त्वया विना महावाहो ! किमन्येन महासुर ! ॥२२ ॥
महामृतमयी वापी ह्येषा मायाभिरीश्वर ! ।
सृष्टा दानवदैत्यानां हतानां जीववर्द्धिनी ॥ २३ ॥
दिष्ट्या त्वां दैत्य ! पश्यामि यमलोकादिहागतम् ।
दुर्गीता वनयग्रन्तं भोक्ष्यमाऽद्य महानिधिम् ॥ २४॥
दृष्ट्वा दृष्ट्वा च तां वापीं मायया मयनिर्मिताम् ।
हृष्टाननास्ता दैत्येन्द्रा इदं वचनमब्रुवन् ॥ २५ ॥
दानवा ! युद्ध्यतेदानीं प्रमथैः सह निर्भयाः ।
मयेन निर्मिता वापी हतान् सञ्जीवयिष्यति ॥ २६ ॥
ततः क्षुब्धाम्बुधिनिभाभेरी सानुभयङ्करी ।
वाद्यमाना ननादोच्चैर्घोरवो सा पुनः पुनः ॥ २७ ॥
श्रुत्वा भेरीरवं घोरं मेघास्फितसन्निभम् ।
न्यपतन्नसुराः पूर्णां त्रिपुराद्युद्धलालसाः ॥ २८ ॥
लोहराजतसौवर्णैः कटकैर्मणिराजितैः ।
आमुक्तैः कुण्डलैर्हारैर्मुकुटैरपिचोत्कटैः ॥ २९ ॥

धूमायिता ह्यविरमा ज्वलन्त इव पावकाः।
आयुधानि समादाय कामिनो दृढ़विक्रमाः॥ ३० ॥
नृत्यमाना इव नटा गर्जन्त इव तोयदाः।
करोच्छ्रया इव गजाः सिंहा इव च निर्भयाः॥३१ ॥
ह्रदा इव च गम्भीराः सूर्य्या इव प्रतापिताः।
द्रुमा इव च दैत्येन्द्रा स्तामयन्तो बलं महत्॥ ३२ ॥
प्रमथा अपि सोत्साहा गरुडोत्पातपातिनः।
युयुत्सवोऽभिधावन्ति दानवान् दानवारयः॥ ३३ ॥
नन्दीश्वरेण प्रमथा स्तारकाख्येण दानवाः।
चक्रुः संहत्य संग्रामञ्चोद्यमाना बलेन च॥ ३४ ॥
तेऽसिभिश्चन्द्रसङ्काशैः शूलैश्चानलपिङ्गलैः।
वाणैश्च दृढ़निर्मुक्तैरभिजघ्नुः परस्परम्॥ ३५ ॥
शराणां सृज्यमानानामसीनाञ्च निपात्यताम्।
रूपाण्यासन्महोल्कानां पतन्तीनामिवाम्बरात्॥ ३६॥
शक्तिभिर्भिन्नहृदया निर्दया इवपातिताः।
निरयेष्विव निर्मग्नाः कूजन्ति प्रमथासुराः॥ ३७ ॥
हेमकुण्डलयुक्तानि किरीटोत्कटवन्ति च।
शिरांस्युर्व्यां पतन्तिस्म गिरिकूटानिवात्यये॥ ३८ ॥
परश्वधैः पट्टिशैश्च खड्गैश्च परिघै स्तथा।
छिन्नाः करिवराकारा निपेतुस्ते धरातले॥ ३९ ॥
गर्जन्ति सहसा हृष्टाः प्रमथा भीमगर्जनाः।
साधयन्त्यपरे सिद्धा युद्धगान्धर्वमद्भुतम्॥ ४० ॥
बलवान्भासि प्रमथदर्पितो भासि दानव!।
इति चोच्चारयन्वाचं वारणौ रणधूर्गताः॥ ४१ ॥

परिघैराहताः केचिद्दानवैः प्रमथानुगाः ।
वमन्ते रुधिरं वक्त्रैः स्वर्णधातुमिवाचलाः ॥ ४२ ॥
प्रमथैरपि नाराचैरसुराः सुरमानव: ।
द्रुमैश्च गिरिशृङ्गैश्च गाढमेवाहवे हता: ॥ ४३ ॥
सूदितानथ तान् दैत्यानन्ये दानवपुङ्गवाः ।
उत्क्षिप्य चिक्षिपुर्वाप्यां मयदानवनोदिता: ॥४४ ॥
ते चापि भास्वरैर्देहैः स्वर्गलोक इवामराः ।
उत्तस्थुर्वापीमासाद्य सद्रूपाभरणाम्बराः ॥ ४५ ॥
अथैके दानवाः प्राप्य वापीप्रक्षेपणादसून् ।
आस्फोटय सिंहनादञ्च कृत्वाधावंस्तथा सुराः ॥४६॥
दानवा: प्रमथानेतान् प्रसर्पत किमास्थ ।
हतानपि हि वो वापी पुनरुज्जीवयिष्यति ॥ ४७ ॥
एवं श्रुत्वा शङ्कुकर्णोवचोऽम्बुदसन्निभः ।
द्रुतमेवेत्य देवेशमिदं वचनमब्रवीत् ॥ ४८ ॥
सूदिताः सूदिता देव ! प्रमथैरसुरा ह्यमी ।
उत्तिष्ठन्ति पुनर्भीमाः सस्याइव जलोक्षिता: ॥ ४९ ॥
अस्मिन् किल पुरे वापी पूर्णा मृतरसाम्भसा ।
निहतानिहता यत्र क्षिप्ता जीवन्ति दानवाः ॥ ५० ॥
इति विज्ञापयद्देवं शङ्कुकर्णो महेश्वरम् ।
अभवन् दानवबलउत्पाता वै सुदारुणाः ॥ ५१ ॥
तारकाख्यः सुभीमाक्षो दारितास्यो हरिर्यथा ।
अभ्यधावत् सुसंक्रुद्धो महादेवरथं प्रति ॥ ५२ ॥
त्रिपुरे तु महान् घोरो भेरी शङ्खरवो बभौ ।
दानवा निःसृता दृष्ट्वा देवदेवरथे सुरम् ॥ ५३ ॥

भूकम्पश्चाभवत्तत्र शताङ्गो भुगतोऽभवत् ।
दृष्ट्वा चोभमगाद्रुद्रः स्वयम्भूश्च पितामहः ॥ ५४ ॥
ताभ्यां देववरिष्ठाभ्यामन्वितः स रथोत्तमः ।
धनायतनमासाद्य सीदति गुणवानिव ॥ ५५ ॥
धातुक्षये देह इव ग्रीष्मे चाल्पमिवोदकम् ।
शैथिल्यं याति स रथः स्नेहो विप्रकृतो यथा ॥ ५६ ॥
रथादुत्पत्याशुभुवि सीदन्तं तु रथोत्तमम् ।
उज्जहार महाप्राणो रथं त्रैलोक्यरूपिणम् ॥ ५७ ॥
तदा शराद्विनिष्पत्य पीतवासा जनार्दनः ।
वृषरूपं महत् कृत्वा रथं जग्राह दुर्धरम् ॥ ५८ ॥
सविषाणाभ्यां त्रैलोक्यं रथमेव महारथः ।
प्रगृह्योद्वहते सज्जं कुलं कुलवहो यथा ॥ ५९ ॥
तारकाख्योऽपि दैत्येन्द्रो गिरीन्द्र इव पक्षवान् ।
अभ्यद्रवत्तदा देवं ब्रह्माणं हतवांश्च सः ॥ ६० ॥
स तारकाख्याभिहतः प्रतोदं न्यस्य कूबरे ।
विजज्वाल मुहुर्वह्निर्व्या श्वासं वक्त्रात् समुद्गिरन् ॥ ६१ ॥
तत्र दैत्यैर्महानादो दानवैरपि भैरवः ।
तारकाख्यस्य पूजार्थं कृतो जलधरोपमः ॥ ६२ ॥
रथ चरणकरोऽथ महामृधे वृषभवपुर्वृषभेन्द्रपूजितः ।
दितितनय बलं विमर्द्य सर्वं त्रिपुरपुरं प्रविवेशकेशवः ॥ ६३ ॥

सजलजलदराजितां समस्ताम्
कुमुदवरोत्पल फुल्लपङ्कजाढ्याम् ।
सुरगुरुरपिवत्पयो स्मृतन्त
दर्वविवसञ्चित गात्ररक्तमोऽम्बम् ॥ ६४ ॥

वापीं पीत्वा सुरेन्द्राणां पीतवासा जनार्दनः ।
मर्दमानो महाबाहुः प्रविवेश गरस्ततः ॥ ६५ ॥
ततोऽसुरा भीमगणेश्वरैर्हताः प्रहारसम्वर्द्धित शोणितापगाः ।
पराङ्मुखा भीममुखैः कृतारणे यथा नगाभ्युद्यततत्परैर्नरः ॥ ६६ ॥
स तारकाख्यस्तडिमालिरेव च भयेन सार्द्धं प्रमथैरभिद्रुता ।
पुरं पराद्रुत्यनुतैः शरार्दिता यथा शरीरं पवनाद्द्वेगता ॥ ६७ ॥
गणेश्वराभ्युद्यतदर्पकारिणो महेन्द्रनन्दीश्वरषण्मुखायुधि ।
विनेदुरुच्चैर्जहसुश्च दुर्मदा जयेच्च चन्द्रादि दिगीश्वरैः सह ॥ ६८ ॥

---

अथ षट्त्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच । प्रमथैः समरे भिन्नास्ते पुरास्ते सुरारयः ।
पुरं प्रविविशुर्भीताः प्रमथैर्भग्नगोपुरम् ॥ १ ॥
शीर्णदंष्ट्रा यथा नागा भग्नशृङ्गा यथा वृषाः ।
यथा विपक्षाः शकुनानद्यः शीर्णोदका यथा ॥ २ ॥
मृतप्रायास्तथा दैत्या दैवतविक्षताननाः ।
बभूवुस्ते विमनसः कथं कार्यमिति ब्रुवन् ॥ ३ ॥
अथ तान् म्लान मनसस्त्रातामरमाननः ।
उवाच दैत्यो दैत्यानां परमाधिपतिर्मयः ॥ ४ ॥
कृत्वा युद्धानि घोराणि प्रमथैः सह सामरैः ।
तोषयित्वा तथा युद्धे प्रमथानमरैः सह ॥ ५ ॥
युयं यत् प्रथमं दैत्याः पश्चाच्च बलपीडिताः ।
प्रविष्टा नगरन्त्रासात् प्रमथैर्भृशमर्दिताः ॥ ६ ॥
अप्रियं क्रियते व्यक्तं देवैनोऽस्य नसंशयः ।
यत्र नाम महाभागाः प्रविशन्ति गिरिर्वनम् ॥ ७ ॥

अहो हि कालस्य बलमहो कालो हि दुर्जयः।
यन्नेदृशस्य दुर्गस्य उपरोधोऽयमागतः॥ ८॥
मये विवदमाने तु नर्दमाने इवाम्बुदे।
बभूवुर्निष्प्रभा दैत्या यद्दा इन्दूदये यथा॥ ९॥
वापीपालास्ततोऽभ्येत्य नभःकाल इवाम्बुदाः।
मयमाहुर्यमप्रख्यं साञ्जलिप्रग्रहाः स्थिताः॥ १०॥
या साऽमृतरसा गूढा वापी वै निर्मिता त्वया।
समाकुलोत्पलवना समीनाकुलपङ्कजा॥ ११॥
पीता सा वृषरूपेण केनचिद्दैत्यनायक!।
वापी सा साम्प्रतं दृष्टामृतसंज्ञा इवाङ्गना॥ १२॥
वापीपालवचः श्रुत्वा मयोऽसौ दानवप्रभुः।
कष्टमित्यसकृत् प्रोच्य दितिजानिदमब्रवीत्॥ १३॥
मया मायाबलकृता वापी पीता त्वियं यदि।
विनष्टाः स्म न सन्देह त्रिपुरं दानवागतम्॥ १४॥
निहतान्निहतान् दैत्यानाजीवयति दैवतैः।
पीता वा यदि वा वापी पीता वै पीतवाससा॥ १५॥
कोऽन्योऽमममायया गुप्तां वापीममृततोयिनीम्।
पास्यति विष्णुमजितं वर्जयित्वा गदाधरम्॥ १६॥
सुगुह्यमपि दैत्यानां नास्त्यस्याविदितम्भुवि।
यत्र महत्कौशल्यं विज्ञातं न हतं बुधैः॥ १७॥
समोऽयं रुचिरोदेशो निद्रुमो निद्रुमाचलः।
लभेमन्दूरतः कृत्वा बाधन्तेऽस्मान् गणामराः॥ १८॥
ते यूयं यदि मन्यध्वं सागरोपरिधिष्ठिताः।
प्रमथानां महावेगं सहामः श्वसनोपमम्॥ १९॥

एतेषाञ्च समारम्भास्तस्मिन् सागरसंप्लवे ।
निवृत्तसाध्वसा भविष्यन्ति एतद्भयपराहताः ॥ २० ॥
युध्यतां निघ्नतां शत्रून् भीतानाञ्च द्रविष्यताम् ।
सागरोऽम्बरसङ्काशः शरण्यो भविष्यति ॥ २१ ॥
इत्युक्त्वा स मयो दैत्यो दैत्यानामधिपस्तदा ।
त्रिपुरेण ययौ तूर्णं सागरं सिन्धुबान्धवम् ॥ २२ ॥
सागरे जलगम्भीरे उत्पपात पुरं वरम् ।
प्रवतस्थुः पुराण्येव गोपुराभरणानि च ॥ २३ ॥
अपक्रान्ते तु त्रिपुरे त्रिपुरारिस्त्रिलोचनः ।
पितामहमुवाचेदं वेदवादविशारदम् ॥ २४ ॥
पितामह ! दृढं भीता भगवन् ! दानवा हि नः ।
त्रिपुरं सागरान्ते तु दानवाः समुपाश्रिताः ॥ २५ ॥
यतएव हि ते याता स्त्रिपुरेण तु दानवाः ।
ततएव रथं तूर्णं प्रापयस्व पितामह ! ॥ २६ ॥
सिंहनादं ततः कृत्वा देवा देवरथस्य तम् ।
परिवार्य ययुर्हृष्टाः सायुधाः पश्चिमोदधिम् ॥ २७ ॥
ततोऽमरामरगुरुं परिवार्य भवं हरम् ।
मर्दयन्तो ययुस्तूर्णं सागरं दानवालयम् ॥ २८ ॥
अथ चारुपताकभूषितं पटहाडम्बरशङ्खनादितम् ।
त्रिपुरमभिसमीक्ष्य दैवता विविधबला ननदुर्यथा घनाः ॥२९॥
असुरवरपुरेऽपि दारुणो जलधरारवमृदङ्गगह्वरः ।
स्तुतमयनिनादमिश्रितः प्रतिनिधिसंक्षुभितार्णवोपमः ॥३०॥
अथ भुवनपतिर्गतिः सुराणा-
मरिमृगयां प्रददात् सुलब्धबुद्धिः ।

त्रिदशगणपतिस्तु वाच शक्रम्
त्रिपुरगतं सहसा निरीक्ष्य शत्रुम् ॥ २१ ॥
त्रिदशगणपते ! निशामयैतत्
त्रिपुरनिकेतनमुत्तमं सुरेन्द्र ! ।
यमवरुणकुबेरषण्मुखैस्तत्
सह गणपैरपि हन्मि तावदेव ॥ २२ ॥
विहितपरबलाभिघातभूतम्
व्रज जलधेस्तु यतः पुराणि तस्थुः ।
स रथवरगतोऽभवः समर्थो
युदधिमगात् त्रिपुरं पुनर्निहन्तुम् ॥ २३ ॥
इति परिगणयन्तोदितिः सुता
अवतस्थुर्लवणार्णवोपरिष्टात् ।
अभिभवत् त्रिपुरं स दानवेन्द्रम्
शरवर्षैर्मुसलैश्च वज्रमिश्रैः ॥ २४ ॥
अहमपि रथवर्यमास्थितः
सुरवरवर्य ! भवेय पृष्ठतः ।
असुरवरवधार्थमुद्यतानाम्
प्रतिविदधामि सुखयतेऽनघ ! ॥ २५ ॥
इति भववचनप्रचोदितो
दशशतनयन वपुःसमुद्यतः ।
त्रिपुरपुरजिघांसया हरिः
प्रविकसिताम्बुजलोचनो ययौ ॥ २६ ॥

---

## अथ सप्तत्रिंशदधिकशततमोऽध्यायः ।

---

सूत उवाच । मघवा तु निहन्तुं तानसुरानमरेश्वरः ।
लोकपाला ययुः सर्वे गणपालाश्च सर्वशः ॥ १ ॥
ईश्वरामोदिताः सर्वे उत्पेतुश्चाम्बरे तदा ।
खगतास्तु विरेजुस्ते पक्षवन्त इवाचलाः ॥ २ ॥
प्रययुस्तत्पुरं हन्तुं शरीरमिव व्याधयः ।
महाडम्बरनिर्घोषैः पणवान् पटहानपि ।
नादयन्तः पुरो देवा दृष्टा त्रिपुरवासिभिः ॥ ३ ॥
हरः प्राप्त इतीवोक्त्वा वल्गन्ते महासुराः ।
आजग्मुः परमं क्षोभमत्यर्थेष्विव सागराः ॥ ४ ॥
सुरतूर्यरवं श्रुत्वा दानवा भीमदर्शनाः ।
निनेदुर्वादयन्तश्च नानावाद्यान्यनेकशः ॥ ५ ॥
भूयोदीरितवीर्यास्ते परस्परकृतागसः ।
पूर्वदेवाश्च देवाश्च सूदयन्तः परस्परम् ॥ ६ ॥
आक्रोशेऽपि समप्रख्ये तेषां देहनिकृन्तनम् ।
प्रवृत्तं युद्धमतुलं प्रहारकृतनिस्वनम् ॥ ७ ॥
श्वसन्त इव नागेन्द्रा भ्रमन्त इव पक्षिणः ।
गिरीन्द्रा इव कम्पन्तो गर्जन्त इव तोयदाः ॥ ८ ॥
जृम्भन्त इव शार्दूलाः प्रवान्त इव वायवः ।
महोर्मितरङ्गाढ्याः क्षुभ्यन्त इव सागराः ॥ ९ ॥

प्रमथाश्च महाशूरा दानवाश्च महाबलाः।
युयुधुर्निश्चला भूत्वा वज्रा इव महाचलैः॥ १० ॥
कार्मुकाणां निकृष्टानां बभूवुर्दारुणा रवाः।
कालानुगानां मेघानां यथा विशति वायुना॥ ११ ॥
आहूय युद्धे मा भैषीः क यास्यसि हतोऽस्यसि।
प्रहराशु स्थितोऽस्मात एहि दर्शय पौरुषम्॥ १२ ॥
गृहाण छिन्धि भिन्धीति खाद मारय दारय।
इत्यन्योऽन्यं समुच्चार्य प्रययुर्यमसादनम्॥ १३ ॥
खड्गापवर्जिताः केचित्केचिच्छिन्नाः परश्वधैः।
केचिन्मुद्गरचूर्णाश्च केचिद्बाणैर्मराहताः॥ १४ ॥
पट्टिशैः मर्द्दिताः केचित्केचिच्छूलविदारिताः।
दानवाः शरपुष्पाभाः सवना इव पर्वताः।
निपतन्त्यर्णवजले भीमनक्रतिमिङ्गिले॥ १५ ॥
व्यसुभिः सुनिबद्धाङ्गैः पतमानैः सुरेतरैः।
सम्भूताणि शब्दः सञ्जलाम्बुदनिस्वनः॥ १६ ॥
तेन शब्देन मकरा नक्राश्चिमितिमिङ्गिलाः।
मत्ता लोहितगन्धेन चोभयन्तो महार्णवम्॥ १७ ॥
परस्परेण कलहं कुर्वाणा भीममूर्त्तयः।
भ्रमन्तो भक्षयन्तश्च दानवानाञ्च लोहितम्॥ १८ ॥
सरथान् सायुधान् साश्वान् सवस्त्राभरणावृतान्।
जग्रसुस्तिमयो दैत्यान् द्रावयन्तो जलेचरान्॥ १९ ॥
यथं यथा सुराणाञ्च प्रमथानां प्रवर्त्तते।
अम्बरेऽम्भसि च तथा युद्धं चक्रुर्जलेचराः॥ २० ॥
यथा भ्रमन्ति प्रमथाः सदैत्यास्तथा भ्रमन्ते तिमयः समकराः।

यथैव छिन्दन्ति परस्परन्तु तथैव क्रन्दन्ति विभिन्नदेहाः ॥२१॥
प्रधाननैरन्तरसं स्रवद्भिः सुरासुरैर्नक्रतिमिङ्गिलैश्च।
कृतो मुहूर्त्तेन समुद्रदेशः सरक्ततोयः समुदीर्णतोयः ॥२२॥
पूर्वं महाम्भोधरपर्वताभन्द्वारं महान्तं त्रिपुरस्य शक्रः।
निपीड्य तस्थौ महता बलेन युक्तोऽमराणां महता बलेन ॥२३॥
तथोत्तरं सत्तनुजो हरस्य बालार्कजाम्बूनदतुल्यवर्णः।
स्कन्दः पुरद्वारमथारुरोह हर्षोऽस्तशृङ्गं प्रपतन्निवार्कः ॥२४॥
यमश्च वित्ताधिपतिश्च देवो दण्डान्वितः पाशवरायुधश्च।
द्वैवारिणस्तस्य पुरस्य द्वारं ताभ्यां तु तत्पश्चिमतोनिरुद्धम् ॥२५॥
दृष्टारिरुद्रस्तपनायुताभः स भास्वता दैवरथेन देवः।
तद्दक्षिणद्वारमरेः पुरस्य रुद्ध्वा यतस्थौ भगवांस्त्रिनेत्रः ॥२६॥
तुङ्गानि वेश्मानि सगोपुराणि स्वर्णानि कैलासमहागिरिप्रभाणि।
प्रह्लादरूपाः प्रमथावरुद्धा ज्योतींषि मेघा इव चाश्मवर्षाः ॥२७॥

उत्पाट्य चोत्पाट्य गृहाणि तेषाम्
सशैलमालासमवेदिकानि।
प्रक्षिप्य प्रक्षिप्य समुद्रमध्ये
कालाम्बुदाभाः प्रमथा विनेदुः ॥२८॥
रक्तानि चाशोकवनैर्युतानि
साशोकखण्डानि सकोकिलानि।
गृहाणि हे नाथ! पितः! सुतेति
भ्रातेति कान्तेति प्रियेति चापि।
उत्पाट्यमानेषु गृहेषु नार्यः,
घनार्थमप्याह्वविधान् प्रचक्रुः ॥२९॥
कालत्रयुतसंचयमाप्य नाशे तस्मिन् पुरे युद्धमति प्रवृत्ते।

महासुराः सागरतुल्यवेगा गणेश्वराः कोपवृताः प्रतीयुः ॥ ३० ॥
परश्वधैस्तत्र शिलोपलैश्च त्रिशूलवज्रोत्तमकम्पनैश्च ।
शरीरसङ्घातघनं सुघोरं युद्धं प्रवृत्तं दृढवैरबद्धम् ॥ ३१ ॥
अन्योन्यमुद्दिश्य विमर्दतां च प्रधावतां चैव विनिघ्नताञ्च ।
शब्दो बभूवामरदानवानां युगान्तकालेष्विव सागराणाम् ॥ ३२ ॥
मार्गाः पुरे लोहितकर्दमालाः स्वर्णेष्टकास्फाटिकभिन्नचित्राः ।
कृता मुहूर्त्तेन सुखेन गन्तुं छिन्नोत्तमाङ्गाङ्घ्रिकराः कराला: ॥ ३३ ॥
कोपावृतास्यः स तु तारकाख्यः सखेन्द्रसङ्घः सगिरिर्निलीनः ।
तस्मिन् क्षणे द्वारवरं रिरक्षो रुद्रं भवेनाद्भुतविक्रमेण ॥ ३४ ॥
स तत्र प्राकारगतांश्च भूतांश्छातन्महानद्भुतवीर्य्यसत्वः ।
चचार चातीन्द्रियगर्वदृप्तः पुराद्विनिष्क्रम्य रणासवोरम् ॥ ३५ ॥
ततः स दैत्योत्तम पर्वताभो यथाञ्जना नाग इवाभिमत्तः ।
निवारितो रुद्ररथं जिघृक्षुर्यथार्णवः सर्पति चातिवेलः ॥ ३६ ॥
शेषः सुधन्वा गिरिशश्च देवश्चतुर्मुखो यः सत्रिलोचनश्च ।
ते तारकाख्याभिगता गताजौ क्षोभं यथा वायुवशात् समुद्राः ॥ ३७ ॥
शेषो गिरीशः सपितामहेशश्चोत्क्षुभ्यमाणः स रथोऽम्बरस्थः ।
विभेद सन्धीषु बलाभिपन्नः कूजन्निनादांश्च करोति घोरान् ॥ ३८ ॥
एकन्तु ऋग्वेदतुरङ्गमस्य पृष्ठे पदं न्यस्य वृषस्य चैकम् ।
तस्थौ भवः सोद्यतबाणचापः पुरस्य तत्सङ्गमभीक्षमाणः ॥ ३९ ॥
तदा भवपदन्यासाद्धयस्य वृषभस्य च ।
पितुस्तनाश्च दन्ताश्च पीडिताभ्यां त्रिशूलिना ॥ ४० ॥
ततः प्रभृति चाश्वानां स्तना दन्ता गवांस्तथा ।
गूढाः समभवंस्तेन चादृश्यत्वमुपागताः ॥ ४१ ॥
तारकाख्यस्तु भीमाख्यो रौद्रस्त्वान्तरेचरः ।

रुद्राग्निके सुसंरब्धो नन्दिना कुलनन्दिना ॥ ४२ ॥
परश्वधेन तीक्ष्णेन स नन्दी दानवेश्वरम् ।
तक्षयामास वै तत्र चन्दनं गन्धदो यथा ॥ ४२ ॥
परश्वधहतः शूरः शैलादिः शरभो यथा ।
दुद्राव खड्गं निष्कृष्य तारकाख्यो गणेश्वरम् ॥ ४४ ॥
यज्ञोपवीतमादाय चिच्छेद च ननाद च ।
ततः सिंहरवो घोरः शङ्खशब्दश्च भैरवः ।
गणेश्वरैः कृतस्तत्र तारकाख्ये निपातिते ॥ ४५ ॥
प्रमथा रमितं श्रुत्वा वादित्रजन तेन च ।
पार्श्वस्थः सुमहापार्श्वं विद्युन्मालिं मयोऽब्रवीत् ॥ ४६ ॥

बहुवदनवतां किमेष शब्दो-
ऽवदतां श्रूयते भिन्नसागराभः ।
वद वचनमतो डिमालिन् किं कृत-
महगणपाला युयुधुर्गणेन्द्राः ॥ ४७ ॥
इति मयवचनाङ्कुशार्दित-
स्तडिन्माली रविबिम्बरोचमाली ।
रणशिरसि समागतः सुराणां
निजगादेन्द्रसमिन्द्रमोऽतिदर्पात् ॥ ४८ ॥
यमवरुणमहेन्द्ररुद्रवीर्य-
स्तवयशमो निधिर्धीरतारकाख्यः ।
सकलममरशीर्षपर्वतेन्द्रो
युद्धायकपति हि तवरको गणेन्द्रैः ॥ ४९ ॥
कृदित मुपनिशम्य तारकाख्याम्
रविदीप्तानलभीषणायताक्षम् ।

हृषित सकलनेत्रलोमसत्वाः
प्रमथगणोयमुखो यथा नदन्ति ॥ ५० ॥
इति सुहृदो वचनं निशम्य तत्वम्
तडिमालिः स मयस्तु वर्णमाली।
रणगिरस्यसिताञ्जनाचलाभो
जगदे वाक्य मिदं नवेन्दुमालिम् ॥ ५१ ॥
विद्युन्मालिन्न नः कालः साधितुं ह्यवहेलया।
करोमि विक्रमेणैतत् पुरं व्यसनवर्जितम् ॥ ५२ ॥
विद्युन्माली ततः क्रुद्धोमयश्च त्रिपुरेश्वरः।
गणान् जघ्नुरुद्राधिष्ठाः सहितास्तैर्महासुरैः ॥ ५३ ॥
येन येन ततो विद्युन्माली याति मयश्च सः।
तेन तेन पुरं शून्यं प्रमथोपहृतक्रतम् ॥ ५४ ॥
अथ यमवरुणमृदङ्गघोषैः पणवडिण्डिमज्भास्वनप्रघोषैः।
करतलपुटैश्च सिंहनादैर्भवमभिपूज्य सुराश्चतस्थुः ॥ ५५ ॥
संपूज्यमानो दितिजैर्महात्मभिः
सहस्ररश्मिप्रतिमौजसैर्विभुः।
अभिष्टुतः सत्यरतेस्तपोधने-
र्यथास्तश्रृङ्गाभिगतो दिवाकरः ॥ ५६ ॥

---

अथाष्टात्रिंशदधिकशततमोऽध्यायः।

सूत उवाच। तारकाख्ये हते युद्धे उत्सार्य प्रमथान् मयः।
उवाच दानवान् भूयो भूयः सतु भयाहतान् ॥ १ ॥
भोः सुरेन्द्राधुना सर्वे निबोधध्वं प्रभाषितम्।
यत् कर्तव्यं मया चैव युष्माभिश्च महाबलैः ॥ २ ॥

पुष्यं समेष्यते काले चन्द्रश्चन्द्रनिभानना: ।
यदैकं त्रिपुरं सर्वं क्षणमेकं भविष्यति ॥ ३ ॥
कुरुध्वं निर्भया ! काले कोकिलाशंसितेन च ।
स कालः पुष्ययोगस्य पुरस्य च मया कृतः ॥ ४ ॥
काले तस्मिन् पुरे यस्तु सम्भावयति संहतिम् ।
स एनं कारयेच्चूर्णं बलिनैकेषुणा सुरः ॥५ ॥
योधा प्राणा बलं यच्च याश्च वो वैरिता सुराः ॥
तत् कृत्वा हृदये चैव पालयध्वमिदं पुरम् ॥ ६ ॥
महेश्वरस्थं त्र्यैकं सर्वप्राणेन भीषणम् ।
विमुखीकुर्वतात्यर्थं यथा नोत्सृजते शरम् ॥ ७ ॥
मत एवं कृतेऽस्माभि स्त्रिपुरस्यापि रक्षणे ।
प्रतीक्षिष्यन्ति विवशाः पुष्ययोगं दिवौकसः ॥ ८ ॥
निशम्य तन्मयस्यैवं दानवा स्त्रिपुरालयाः ।
मुहुः सिंहरवं कृत्वा मयमूचुर्मोपमाः ॥ ९ ॥
प्रयत्नेन वयं सर्वे कुर्मस्तव प्रभाषितम् ।
तथा कर्मो यथा रुद्रो न मोक्ष्यति पुरेशरम् ॥ १० ॥
अद्य यास्यामः संग्रामे तद्रुद्रस्य जिघांसवः ।
कथयन्ति दितेः पुत्रा हृष्टा भिन्नतनूरुहाः ॥ ११ ॥
कल्पं स्थास्यन्ति वास्तव्यं त्रिपुरं शाश्वतं ध्रुवम् ।
अदानवं वा भविता नारायणपदत्रयम् ॥ १२ ॥
वयं न धर्मं हास्यामो यस्मिन् प्रीयति नो भवान् ।
अदैवतमदैत्यं वा लोकं द्रक्ष्यन्ति मानवाः ॥ १३ ॥
इति संमन्त्र्य हृष्टास्ते पुरान्तर्विबुधारयः ।
प्रदोषे मुदिता भूत्वा चेरुर्मन्मथचारताम् ॥ १४ ॥

मुहुर्मुहुः क्षीरोदयो भाति उदयाग्रं महामणिः
तमांस्युत्सार्य भगवांश्चन्द्रो जृम्भति सोऽम्बरम् ॥१५॥
कुमुदालङ्कृते हंसो यथा सरसि विद्युते ।
सिंहो यथा चोपविष्टो वैदूर्यशिखरे महान् ॥ १६ ॥
विष्णुर्यथा च विस्तीर्णे हारयोरसि संस्थितः ।
तथावगाढे नभसि चन्द्रो त्रिनयनोद्भवः ।
भ्राजते भ्राजयन् लोकान् सृजन् ज्योत्स्नारसं बलात् ॥१७॥
शीतांशावुदिते चन्द्रे ज्योत्स्नापूर्णे पुरे सुराः ।
प्रदोषे ललितं चक्रुर्गृहमात्मानमेव च ॥ १८ ॥
रथ्यासु राजमार्गेषु प्रासादेषु गृहेषु च ।
दीपाश्चम्पकपुष्पाभा नाल्पस्नेहप्रदीपिताः ।
तदा मठेषु ते दीपाः स्नेहपूर्णाः प्रदीपिताः ॥ १९ ॥
गृहाणि वसुमन्त्येषां सर्वरत्नमयानि च ।
ज्वलन्ती दीपयन्तीयान् चन्द्रोदयमिव ग्रहाः ॥ २० ॥
चन्द्रांशुभिर्भासमानमन्तर्दीपैः सुदीपितम् ॥ ।
उपद्रवैः कुलमिव पीयते त्रिपुरे तमः ॥ २१॥
तस्मिन् पुरे वै तरुणप्रदोषे
चन्द्राट्टहासे तरुणप्रदोषे ।
रत्यर्थिनो वै दनुजा गृहेषु
सहाङ्गनाभिः सुचिरं विरेमुः ॥ २२ ॥
विनोदिता ये तु वृषध्वजस्य पक्षे पवने मकरध्वजेन ।
तमासुरेष्वासुरपुङ्गवेषु स्वाङ्गाङ्गनाः खेदयुता बभूवुः ॥ २३ ॥
कलप्रलापेषु च दानवीनां वीणाप्रलापेषु च मूर्च्छितांस्तु ।
मत्तप्रलापेषु च कोकिलानां सचापबाणो मदनोममन्थ ॥ २४ ॥

तमांसि नैशानि द्रुतं निहत्य
ज्योत्स्नावितानेन जगद्वितत्य ।
खे रोहिणीं तां च प्रियां समेत्य
चन्द्रः प्रभाभिः कुरुतेऽधिराज्यम् ॥ २५ ॥
स्थित्वैव कान्तस्य तु पादमूले
काचिद्वरस्त्रीखलशीलमूले ।
धत्ते विशोकं रुदती करोति
तेनाननं स्वं समलङ्करोति ॥ २६ ॥

दृष्ट्वाननं मण्डलदर्पणस्थं महाप्रभा मे मुखजेति जल्पा ।
स्मृत्वा वराङ्गीरमणेरितानि तेनैव भावेन रतीमवाप ॥ २७ ॥
रोमाञ्चितैर्गात्रवरैर्युवत्यो रतानुरागाद्रमणेन चान्याः ।
स्वयं द्रुतं यान्ति मदाभिभूताः क्षपा यथा चार्कदिनावसाने ॥ २८ ॥
पपौ यतं चातिरसानुविद्धा त्रिमार्गितान् याच प्रियं प्रमत्ता ।
काचित्प्रियस्यातिचिरात्प्रसन्ना आभीतलापेषु च सम्प्रसन्ना ॥ २९ ॥
गोशीर्षयुक्तैर्हरिचन्दनैश्च पङ्काङ्किताचीरधरा सुरीणाम् ।
मनोज्ञरूपा रुचिरा बभूवुः पूर्णामृतस्येव सुवर्णकुम्भाः ॥ ३० ॥
क्षताधरोष्ठा द्रुतदोषरक्ता लसन्ति दैत्या दयितासु रक्ताः ।
तन्त्रीप्रलापास्त्रिपुरेषु रक्ताः स्त्रीणां प्रलापेषु पुनर्विरक्ताः ॥ ३१ ॥
क्वचित् प्रवृत्तं मधुराभिगानं कामस्य बाणैः सुकृतं निधानम् ।
आपानभूमीषु सुखप्रमेयं गेयं प्रवृत्तं त्वथ साधयन्ति ॥ ३२ ॥
गेयं प्रवृत्तं त्वथ शोधयन्ति केचित् प्रियां तत्र च साधयन्ति ।
केचित् प्रियां सम्प्रति बोधयन्ति सम्बुध्य सम्बुध्य च रामयन्ति ॥ ३३ ॥
चूतप्रसूनप्रभवः सुगन्धः सूर्ये गते वै त्रिपुरे बभूव ।
समर्मरो नूपुरमेखलानां शब्दश्च सम्बाधति कोकिलानाम् ॥ ३४ ॥

प्रियावगूढा दयितोपगूढा काचित्प्रकृष्टाङ्गरुहापि नारी।
सुचारुशाखाङ्कुरपल्लवानां नवाम्बुसिक्ता इव भूमिरासीत् ॥३७॥
शशाङ्कपादैरुपशोभितेषु प्रासादवर्येषु वराङ्गनानाम्।
पानेन खिन्नादयितातिवेलं कपोलमाघ्रासि च किं ममेदम्।
आरोह मे श्रोणिमिमां विशालां पीनोन्नताङ्गाञ्चनमेखलाढ्याम्

रथ्यासु चन्द्रोदयभासितासु
सुरेन्द्रमार्गेषु च विस्तृतेषु।
दैत्याङ्गना यूथगता विभान्ति
तारा यथा चन्द्रमसोदिवान्ते ॥ ३८ ॥
घण्टाट्टहासेषु च चामरेषु
प्रेङ्खासु चान्यामदलोलभावात्।
सन्दोलयन्ते कलसम्प्रहासाः
प्रावाच काञ्ची गुणसूक्ष्मनादा ॥ ३९ ॥
अम्लान मालान्वित सुन्दरीणाम्
पर्याय पर्याऽस्ति च हर्षितानाम्।
स्फुरन्ति वाचः कलशीतकल्पा
वापीषु चान्ये कलहंसशब्दाः ॥ ४० ॥
काञ्चीकलापश्च सहाङ्गरागः
प्रेङ्खासु तद्वालकृताश्च भावाः।
छिन्दन्ति तासामसुराङ्गनानाम्
प्रियाम्बराणाम्मधुरागणानाम् ॥ ४१ ॥
चित्राम्बरश्चोद्धृतकेशपाशः सन्त्रोभ्रमानः शशुभे ऽसुरीणाम्।
सुचारु वेषाभरणैरुपेतस्ताराणगैर्ज्योतिरिवास चन्द्रः ॥४२॥

चन्द्रोलसादुच्छ्रसितैश्छिन्नमूलैः काञ्चीभ्रष्टैर्मणिभिर्विप्रकीर्णैः
दोलाभूमिस्तैर्विचित्रा विभाति चन्द्रस्य पार्श्वोपगतैर्विचित्रा॥४३
स चन्द्रिके सोपवने प्रदोषे रुतेषु वृन्देषु च कोकिलानाम् ।
शरव्ययं प्राप्य पुरेऽसुराणां प्रक्षीणवाणो मदनश्चचार ॥४४ ॥
इति तत्र पुरेऽमरद्विषाणां सपदि हि पश्चिमकौमुदी तदासीत् ।
रणशिरसि पराभविष्यतां वै भवतुरगैः क्षतसञ्ज्ञया श्रीणाम्॥४५॥

चन्द्रोऽथकुन्दकुसुमाकरहारवर्णो
ज्योत्स्नावितानरहितोऽभ्रसमानवर्णः ।
विच्छायतां हि समुपेत्य न भाति तद्व-
द्भाग्यक्षये धनपतिश्च नरोविवर्णः ॥ ४६ ॥
चन्द्रप्रभामरुणसारथिनाभिभूय
सन्तप्तकाञ्चनरथाङ्गसमानबिम्बः ।
स्थित्वोदयाग्रमुकुटे वसुरेव सूर्यो
भात्यम्बरे तिमिरतोयवहान्तरिष्यन् ॥ ४७ ॥

---

एकोनचत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच । उदिते तु सहस्रांशौ मेरौ भासाकरे रवौ ।
नद्येव कुलं क्षुब्धं युगान्त इव सागराः ॥ १ ॥
सहस्रनयनो देव स्ततः शक्रः पुरन्दरः ।
सविस्मदः सवरुण स्त्रिपुरं प्रययौ हरः ॥ २ ॥
तं नानाविधरूपाश्च प्रमथाति प्रमाथिनः ।
ययुः सिंहरवैर्घोरैर्वादित्र निनदैरपि ॥ ३ ॥
ततोवादितवादित्रैश्छातपत्रैर्महाद्रुमैः ।
बभूव तद्बलं दिव्यं वनं प्रचलितं यथा ॥४ ॥

तदा पतन्तं संप्रेक्ष्य रौद्रं रुद्रबलं महत्।
सङ्क्षोभो दानवेन्द्राणां समुद्र प्रतिमो बभौ ॥ ५ ॥
तेचासीन् पट्टिशान्चक्रैः शूलदण्डपरश्वधान्।
शरासनानि वज्राणि गुरूणि मुसलानि च ॥ ६ ॥
प्रगृह्य कोपरक्ताक्षाः सपक्षा इव पर्वताः।
निजघ्नुः पर्वतप्राय घना इव तपात्यये ॥ ७ ॥
स विद्युन्मालिनस्ते वै समयादिति नन्दनाः।
मोदमानाः समासेदुर्देवदेवैः सुरारयः ॥ ८ ॥
मर्त्यव्यक्तबुद्धीनां जये चानिश्चितात्मनाम्।
बलानाञ्च मृधासीद्बलावयवा इव ॥ ९ ॥
विगर्जन्त इवाम्भोदा अम्भोद सदृशत्विषः।
प्रयुद्धा युद्धकुशलाः परस्पर कृतागसः ॥ १० ॥
धूमायन्तो ज्वलन्तश्च आयुधैश्चन्द्रवर्चसैः।
कोपाद्वा युद्धलुब्धाश्च कुट्टयन्ते परस्परम् ॥ ११ ॥
वज्राहताः पतन्त्यन्ये बाणैरन्ये विदारिताः।
अन्ये विदारिताश्चक्रैः पतन्तिस्मुदधेर्जले ॥ १२ ॥
छिन्नस्रग्दामहाराश्च प्रमृष्टाम्बरभूषणाः।
तिमिनक्रगणे चैव पतन्ति प्रमथाः सुराः ॥ १३ ॥
गदानां मुसलानाञ्च तोमराणां परश्वधाम्।
वज्रशूलर्ष्टिपातानां पट्टिशानाञ्च सर्वतः ॥ १४ ॥
गिरिशृङ्गोपलानाञ्च प्रेरितानां प्रमन्युभिः।
सजवानां दानवानां सधूमानां रवित्विषाम्।
आयुधानां महानोघः सागरौघे पतत्यपि ॥ १५ ॥
प्रहृष्ट वेगैस्तैस्तत्र सुरासुरकरेरितैः।

चायुधैस्तस्य नघ्नतः क्रियते सङ्गयो महान् ॥ १६ ॥
शुक्राङ्गारकयोर्युद्धे यथा भवति सङ्कयः ।
देवासुरगणैस्तद्वत्तिमिरमञ्चयोऽभवत् ॥ १७ ॥
विद्युन्माली च वेगेन विद्युन्माली इवाम्बुदः ।
विद्युन्माल घनोन्नादो नन्दीश्वरमभिद्रुतः ॥ १८ ॥
सतन्तमोऽरि वदनं प्रनदन् वदताम्बरः ।
उवाच युधि शैलादिं दानवोऽम्बुधि निस्वनः ॥ १९ ॥
युद्धाकाङ्क्षी तु बलवान् विद्युन्मालत्वमागतः ।
यदि त्विदानीं मे जीवन्मुच्यसे नन्दिकेश्वर ! ।
न विद्युन्मालि हननं चक्षोभिर्युधि दानवः ॥ २० ॥
तमेवं वादिनं दैत्यं नन्दीशस्तपताम्बरः ।
उवाच प्रहरंस्तत्र वाक्यलङ्कारवद्वचः ॥ २१ ॥
दानवा ! धर्मकामानां मेघोऽस्वच्छ इत्यतः ।
गञ्जो हन्तुं विमानानं जाति दोषाद्विहंद्दषि ॥ २२ ॥
यदि तावन्मया पूर्वं हतोऽसि पशुवद्यथा ।
इदानीं वा कथं नाम न हिंस्ये क्रतु दूषणम् ॥ २३ ॥
सागरं तरते दोर्भ्यां पातयेच्चो दिवाकरम् ।
सोऽपि मां शक्नुयान्नैव चक्षुर्भ्यां समवोचितुम् ॥ २४ ॥
इत्येवं वादिनं तत्र नन्दिनं तमिभोवले ।
विभेदेकेषुणा दैत्यः करणार्कं इवाम्बुदम् ॥ २५ ॥
वक्षसः शरस्तस्य पपौ रुधिरमुत्तमम् ।
सूर्यस्याक्ष प्रभावेण मयूखैव जलं यथा ॥ २६ ॥
स तेन सुप्रहारेण प्रथमञ्चाति रोषितः ।
हस्तेन वृक्षमुत्पाट्य चिक्षेप गजराडिव ॥ २७ ॥

वायुपुत्रः स च तत्रः शौर्य्यं पुष्पो महारवः ।
विद्युन्मालि शरैश्छिन्नः पपात पतगेशवत् ॥ २८ ॥
वृषमालोक्य तं छिन्नं दानवेन शरेषुभिः ।
रोषमाहारयत्तीव्रं नन्दीश्वर सुविग्रहः ॥ २९ ॥
सोऽस्य करमारावे रविशक्र करप्रभम् ।
दुद्राव हन्तुं स क्रूरं महिषं गजराडिव ॥ ३० ॥
तमापतन्तं वेगेन वेगवान् प्रसभं बलात् ।
विद्युन्माली शरशतैः पूरयामास नन्दिनम् ॥ ३१ ॥
शर कण्टकिताङ्गो वै शैलादिः सोऽभवत् पुनः ।
चरेर्गृह्य रथं तस्य महतः प्रययौ जवात् ॥ ३२ ॥
विलम्बिताश्वोविशिरो भ्रमितश्च रणे रथः ।
पपात मुनिशापेन सादित्योऽर्क रथो यथा ॥ ३३ ॥
अन्तरान्निर्गतश्चैव मायया स दितेः सुतः ।
आजघान तदा शक्त्या शैलादिं समवस्थितम् ॥ ३४ ॥
तामेव तु विनिष्कृष्य शक्तिं शोणितभूषिताम् ।
विद्युन्मालिं समुद्दिश्य चिक्षेप प्रमथाग्रणीः ॥ ३५ ॥
तया भिन्न तनुत्राणो विभिन्न हृदयस्त्वपि ।
विद्युन्माल्य पतद् भूमौ वज्राहत इवाचलः ॥ ३६ ॥
विद्युन्मालिनि निहते सिद्धचारण किन्नराः ।
साधु साध्विति चोक्त्वा ते पूजयन्त उमापतिम् ॥ ३७ ॥
नन्दिना सादिते दैत्ये विद्युन्माली हते मयः ।
ददाह प्रमथानीकं वनमग्निरिवोद्धतः ॥ ३८ ॥
शूलनिर्दारितोरस्का गदाचूर्णितमस्तकाः ।
इषुभिर्गाढ विद्धाश्च पतन्ति प्रमथार्णवे ॥ ३९ ॥

अथ वज्रधरो यमोऽर्थदः स च नन्दी स च षण्मुखो गुहः ।
मयमसुरवीरसम्मतं विविशुः शक्रवरैर्हतारयः ॥ ४० ॥
नागन्तु नागाधिपतिः प्रताड्य मयोविदार्येव वरेण तूर्णम् ।
मयश्च विद्याधिपतिश्च विद्वान् ररास मत्ताम्बुदवत्तदानीम् ॥४१॥

ततः शरैः प्रमथगणैश्च दानवा
हताहताश्चोत्तमतेजविक्रमाः ।
भयान्विता त्रिपुरं प्रवेशिता
यथा शिवश्चक्रधरेण संयुगे ॥ ४२ ॥
ततश्च शङ्खानकभेरिमर्दलाः
ससिंहनादा दनुपुत्रभङ्गदाः ।
कपर्दिसैन्ये प्रबभुः समन्ततो
निपात्यमाना युधि वज्रसन्निभाः ॥ ४३ ॥

अथ दैत्यपुराभावे पुष्ययोगो बभूव ह ।
बभूव चापि संयुक्तं तद्योगेन पुरत्रयम् ॥ ४४ ॥
ततो बाणं त्रिधा देव त्रिदैवतमयं हरः ।
मुमोच त्रिपुरे तूर्णं त्रिनेत्रस्त्रिपदाधिपः ॥ ४५ ॥
तेन मुक्तेन बाणेन बाणपुष्पसमप्रभम् ।
आकाशं स्वर्णसङ्काशं कृतं सूर्येण रञ्जितम् ॥ ४६ ॥
मुक्त्वा त्रिदैवतमयं त्रिपुरे त्रिदशः शरम् ।
धिग्धिङ् मामिति चक्रन्द कष्टं कष्टमिति ब्रुवन् ॥४७॥
वैधुर्यं दैवतं दृष्ट्वा शैलादिर्गजवक्त्रतः ।
किमिदन्त्विति पप्रच्छ शूलपाणिं महेश्वरम् ॥ ४८ ॥
ततः शशाङ्कतिलकः कपर्दी परमार्तवत् ।
उवाच नन्दिनं भक्तः स मयोऽद्य विनंक्ष्यति ॥४९॥

अथ नन्दीश्वरस्तूर्णं मनोमारुतवद्बली।
शरे त्रिपुरमायाति त्रिपुरं प्रविवेश सः॥ ५०॥
स मयम्प्रेक्ष्य गणपः प्राह काञ्चनसन्निभः।
विनाशं त्रिपुरस्यास्य प्राप्तो मय! सुदारुणः॥५१॥
अनेनैव गृहेण त्वमपक्राम ब्रवीम्यहम्।
श्रुत्वा तन्नन्दि वचनं दृढभक्तो महेश्वरे।
तेनैव गृहमुख्येन त्रिपुरादपसर्पितः॥ ५२॥
सोऽपीषुः पत्रपुटवद्दग्ध्वा तन्नगरत्रयम्।
त्रिधा इव हुताशश्च सोमो नारायणस्तथा॥ ५३॥
शरतेजःपरीतानि पुराणि द्विजपुङ्गवाः!।
दुष्टवद्दोषादह्यन्ते कुलान्यूर्ध्वं यथा तथा॥ ५४॥
मेरुकैलासकल्पानि मन्दराग्रनिभानि च।
सकपाट गवाक्षाणि वलिभिः शोभितानि च॥५५॥
सप्रासादानि रम्याणि कूटागारोत्कटानि च।
सजलानि समाखराणि सावलोकनकानि च॥ ५६॥
बहुध्वज पताकानि स्वर्णरौप्य मयानि च।
गृहाणि तस्मिं स्त्रिपुरे दानवानामुपद्रवे।
दह्यन्ते दहनाभानि दहनेन सहस्रशः॥ ५७॥
प्रासादाग्रेषु रम्येषु वनेषू पवनेषु च।
वातायन गताश्चान्याश्चाकाशस्य तलेषु च॥ ५८॥
रमणैरुपगूढाश्च रमन्त्यो रमणैः सह।
दह्यन्ते दानवेन्द्राणामग्निना श्च पिताः स्त्रियः॥५९॥
काचित् प्रियं परित्यज्य अशक्ता गन्तु मन्यतः।
पुरः प्रियस्य पञ्चत्वङ्गताग्नि वदने स्वयम्॥ ६०॥

उवाच शतपत्राक्षी साश्रुकण्ठी कृताञ्जलिः ।
हव्यवाहन ! भार्याहं परस्य परतापन ! ।
धर्मसाक्षी त्रिलोकस्य न मां स्प्रष्टुमिहार्हसि ॥ ६१ ॥
शापितश्च मया देव ! शिवया च शिवप्रभ ! ।
परेण प्रेहि मुक्तेदं गृहञ्च दयितं हि मे ॥ ६२ ॥
एका पुत्रमुपादाय बालकं दानवाङ्गना ।
हुताशनं समीपस्था इत्युवाच हुताशनम् ॥ ६३ ॥
बालोऽयं दुःखलब्धश्च मया पावक ! पुत्रकः ।
नार्हस्येनमुपादातुं दयितं षण्मुखप्रिय ! ॥ ६४ ॥
काश्चित् प्रियान् परित्यज्य पीडिता दानवाङ्गनाः ।
निपतन्त्यर्णवजले शिञ्जमानविभूषणाः ॥ ६५ ॥
तात पुत्रेति मातेति मातुलेति च विह्वलम् ।
चक्रन्दुस्त्रिपुरे नार्यः पावकज्वालवेपिताः ॥ ६६ ॥
यथा दहति शैलाग्निः साम्बुजं जलजाकरम् ।
तथा स्त्रीवक्त्रपद्मानि चादहत्त्रिपुरेऽनलः ॥ ६७ ॥
तुषारराशिः कमलाकराणां यथा दहत्यम्बुजकानि शीते ।
तथैव सोऽग्निस्त्रिपुराङ्गनानां ददाह वक्त्रेक्षणपङ्कजानि ॥ ६८ ॥
शराग्निपातात् समभिद्रुतानां तत्राङ्गनानामतिकोमलानाम् ।
बभूव काञ्चीगुणनूपुराणामाक्रन्दितानाञ्च रवोऽतिमिश्रः ॥ ६९ ॥
दग्धार्द्धचन्द्राणि सवेदिकानि विशीर्णहर्म्याणि सतोरणानि ।
दग्धानि दग्धानि गृहाणि तत्र पतन्ति रक्षार्थमिवार्णवौघे ॥ ७० ॥
गृहैः पतद्भिर्ज्वलनावलीढैरासीत्समुद्रे सलिलं प्रतप्तम् ।
कुपुत्रदोषैः प्रहतानुविद्धं यथाकुलं याति धनान्वितस्य ॥ ७१ ॥
गृहप्रतापैः क्वथितं समन्तात्तदार्णवे तोयमुदीर्णवेगम् ।

विवासयामास तिमीन् सनक्रां
स्तिमिङ्गिलांस्तत्क्षुभितांस्तथान्यान् ॥ ७२ ॥
सगोपुरो मन्दरपादकल्पः प्राकारवर्यस्त्रिपुरे च सोऽथ।
तैरेव सार्द्धं भवनैः पपात शब्दं महान्तं जनयन् समुद्रे ॥७३॥
[redacted] शृङ्गैर्भवनैर्यदासीत् सहस्रशृङ्गः स इवाचलेशः।
नामावशेषं त्रिपुरं प्रजज्ञे हुताशनाहार बलिप्रयुक्तम् ॥७४॥
प्रदह्यमानेन पुरेण तेन जगत्सपातालदिवं प्रतप्तम्।
दुःखं महत्प्राप्य जलावमग्नं यस्मिन् महान् सौधवरो मयस्य ॥७५
तद्दैवेशोवचः श्रुत्वा इन्द्रो वज्रधरस्तदा।
शशाप तद्गृहञ्चापि मयस्यादितिनन्दनः ॥ ७६ ॥
अप्रसेव्यम प्रतिष्ठञ्च भयेन च समावृतम्।
भविष्यति मय गृहं नित्यमेव यथाऽनलः ॥ ७७ ॥
यस्य यस्य तु देशस्य भविष्यति पराभवः।
द्रक्ष्यन्ति त्रिपुरं खण्डं तत्रेदं नाशगा जनाः।
तदेतद्द्यापि गृहं मयस्यामयवर्जितम् ॥ ७८ ॥
ऋषय ऊचुः। भगवन्! स मयो येन गृहेण प्रपलायितः।
तस्य नो गतिमाख्याहि मयस्य च मसोद्भव! ॥ ७९ ॥
सूत उवाच। दृश्यते दृश्यते यत्र ध्रुवस्तत्र मयास्पदम्।
देवद्विड् तु मयस्तातः स तदाखिन्नमानसः।
ततश्च ततोऽन्यलोकेऽस्मिंस्त्राणार्थं वै चकार सः॥८०॥
तत्रापि दैवताः सन्ति भासीर्यामाः सुरोत्तमाः।
तत्राशक्तं ततो गन्तुं तच्चैकं पुरमुत्तमम् ॥ ८१ ॥
शिवः स्रष्टा गृहं प्रादान् मयस्यैव गृहार्थिनम्।
विरराम सहस्राक्षः पूजयामास चेश्वरम्।

पूज्यमानश्च भूतेशं सर्व तुष्टुवुरीश्वरम् ॥ ८२ ॥
संपूज्यमानं त्रिदशैः समोक्षगणैर्गणेशाधिपतिन्तु मुख्यम् ।
हर्षाद्ववल्गुर्जहसुश्च देवा जगमुर्ननर्दुश्च विषाणहस्ताः ॥८३॥
पितामहं वन्द्य ततो महेशं प्रगृह्य चापं प्रविसृज्य भूतान् ।
रथाच्च सम्पत्य हरेषु दग्धं त्रिपं पुरं तत्करालये च ॥८४॥
य इमं रुद्रविजयं पठते विजयावहम् ।
विजयन्तस्य कार्येषु ददाति वृषभध्वजः ॥ ८५ ॥
पितॄणां चापि श्राद्धेषु य इमं श्रावयिष्यति ।
अनन्तं तस्य पुण्यं स्यात् सर्वयज्ञफलप्रदम् ॥ ८६ ॥
इदं स्वस्त्ययनं पुण्यमिदं पुंसवनं महत् ।
इदं श्रुत्वा पठित्वा च यान्ति रुद्रसलोकताम् ॥८७॥

---

अथ चत्वारिंशदधिकशततमोऽध्यायः ।

ऋषय ऊचुः । कथं गच्छत्यमावास्यां मासिमासि दिवं नृपः ।
ऐलः पुरूरवाः सूत ! तर्पयेत कथं पितॄन् ।
एतमिच्छामहे श्रोतुं प्रभावन्तस्य धीमतः ॥ १ ॥
सूत उवाच । तस्य चाहं प्रवक्ष्यामि प्रभावं विस्तरेण तु ।
ऐलस्य दिवि संयोगं सोमेन सह धीमता ॥ २ ॥
सोमाच्चैवामृतप्राप्तिः पितॄणां तर्पणं तथा ।
सौम्या बर्हिषदः काव्या अग्निष्वात्तास्तथैव च ॥ ३ ॥
यदा चन्द्रश्च सूर्य्यश्च नक्षत्रेण समागतौ ।
अमावास्यां निवसत एकस्मिन्नथ मण्डले ॥ ४ ॥
तदा स गच्छति द्रष्टुं दिवाकरनिशाकरौ ।
अमावास्याममावास्यां मातामहपितामहौ ॥ ५ ॥

अभिवाद्य तु तौ तत्र कालापेक्षः स तिष्ठति।
प्रचस्कन्द ततः सोममर्चयित्वा परिश्रमात्॥ ६॥
ऐलः पुरूरवा विद्वान् मासि श्राद्धचिकीर्षया।
ततः स दिवि सोमं वै ह्युपतस्थे पितॄनपि॥ ७॥
द्विलवङ्कुहुमात्रञ्च तावुभौ तु निधाय सः।
सिनीवाली प्रमाणात्तु कुहूमात्र व्रतोदये॥ ८॥
कुहूमात्रं पितृद्देशं ज्ञात्वा कुहूमुपासते।
तमुपास्य ततः सोमं कलापेक्षी प्रतीक्षेत॥ ९॥
स्वधा मृतन्तु सोमाद्वै वसंक्षिप्तञ्च तृप्तये।
दशभिः पञ्चभिश्चैव स्वधा मृतपरिस्रवैः।
कृष्णपक्ष भुजां प्रीतिर्दुह्यते परमांशुभिः॥ १०॥
सद्योभिक्षरता तेन सौम्येन मधुना च सः।
निवापेष्वथ दत्तेषु पित्र्येण विधिना तु वै॥ ११॥
स्वधा मृतेन सौम्येन तर्पयामास वै पितॄन्।
सौम्या बर्हिषदः काव्या अग्निष्वात्ता तथैव च॥१२॥
ऋतुरग्निः स्मृतो विप्रैर्ऋतुं सम्वत्सरं विदुः।
जज्ञिरे ऋतवस्तस्मादृतुभ्यो ह्यार्त्तवाभवन्॥ १३॥
पितरोऽर्त्तवोऽर्द्धमासा विज्ञेया ऋतुसूनवः।
पितामहास्तु ऋतवोऽह्यमावास्याब्दसूनवः।
प्रपितामहाः स्मृता देवाः पञ्चाब्द ब्रह्मणः सुताः॥१४॥
सौम्या बर्हिषदः काव्या अग्निष्वात्ता इति त्रिधा।
गृहस्था ये तु यज्वानो हविर्यज्ञार्त्तवाश्च ये।
स्मृता बर्हिषदस्ते वै पुराणे निश्चयं गताः॥ १५॥
गृहमेधिनश्च यज्वानो अग्निष्वात्तार्त्तवाः स्मृताः।

अष्टका पतयः काव्याः पञ्चाब्दांस्तु निबोधत ॥ १६ ॥
तेषु सम्वत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः।
सोमस्त्विद्वत्सरश्चैव वायुश्चैवानुवत्सरः ॥ १७ ॥
रुद्रस्तु वत्सरस्तेषां पञ्चाब्दाये युगात्मकाः।
कालेनाधिष्ठितस्तेषु चन्द्रमाः स्रवते सुधाम् ॥ १८ ॥
एते स्मृता देव कृत्याः सोमपास्सोमपाश्च ये।
तां तेन तर्पयामास यावदासीत्पुरूरवाः ॥ १९ ॥
यस्मात्प्रसूयते सोमो मासि मासि विशेषतः।
ततः स्वधामृतं तद्वै पितृणां सोमपायिनाम्।
एतत्तदमृतं सोममवाप मधुचैव हि ॥ २० ॥
ततः पीतसुधं सोमं सूर्य्योऽसावेकरश्मिना।
आप्याययते सुषुम्नेन सोमन्तु सोमपायिनम् ॥ २१ ॥
निःशेषा वैकलाः पूर्वायुगपद्व्यापयन् पुरा।
सुषुम्णाप्याय मानस्य भागं भागमहः क्रमात् ॥२२॥
कलाः क्षीयन्ति कृष्णास्ताः शुक्लाह्याप्याययन्ति च।
एवं सा सूर्य्यवीर्येण चन्द्रस्याप्यायितातनुः ॥ २३ ॥
पौर्णमास्यां सदृश्येत शुक्लः सम्पूर्णमण्डलः।
एवमाप्यायितः सोमः शुक्लपक्षेप्यहः क्रमात्।
देवैः पीत सुधं सोमं पुराप्यात्पिबेद्रविः ॥ २४ ॥
पीतं पञ्चदशाहन्तु रश्मिनैकेनभास्करः।
आपयाय यत् सुषुम्णेन भागं भागमहः क्रमात् ॥२५
सुषुम्णाप्यायमानस्य शुक्ला वर्द्धन्ति वै कलाः।
तस्माद्ध्रसन्ति वै कृष्णाः शुक्लाप्याय यन्ति च ॥२६॥
एवमाप्याय्यते सोमः क्षीयते च पुनः पुनः।

सम्भूतिरेवं सोमस्य पक्षयोः शुक्लकृष्णयोः ॥ २७ ॥
इत्येष पितृमान् सोमः स्मृतस्तद्वत् सुधात्मकः।
कान्तः पञ्चदशैः सार्द्धं सुधामृतपरिस्रवैः ॥ २८ ॥
अतः परं प्रवक्ष्यामि पर्वाणां सन्धयश्च याः।
यथा ग्रथ्नन्ति पर्वाणि आवृत्तादिक्षुवेणुवत् ॥ २९ ॥
तथाब्दमासाः पक्षाश्च शुक्लाः कृष्णास्तु वै स्मृताः।
पौर्णमास्यास्तु यो भेदो ग्रन्थयः सन्धयस्तथा ॥ ३० ॥
अर्द्धमासस्य पर्वाणि द्वितीयाप्रभृतीनि च।
अग्न्याधानक्रिया यस्मात्नीयन्ते पर्वसन्धिषु ॥ ३१ ॥
तस्मात्तु पर्वणोह्यादौ प्रतिपत्त्यादिसन्धिषु।
सायाह्ने अनुमत्याश्च द्वौ लवौ काल उच्यते।
लवौ द्वावेव राकायाः कालो ज्ञेयोऽपराह्णिकः ॥ ३२ ॥
प्रकृतिः कृष्णपक्षस्य कालेऽतीतेऽपराह्णिके।
सायाह्ने प्रतिपद्येष स कालः पौर्णमासिकः ॥ ३४ ॥
व्यतीपाते स्थिते सूर्ये लेखादूर्द्धं युगान्तरम्।
युगान्तरोदिते चैव चन्द्रे लेखोपरिस्थिते ॥ ३५ ॥
पूर्णमासव्यतीपातौ यदा पश्येत्परस्परम्।
तौ तु वै प्रतिपद्यावत्तस्मिन् काले व्यवस्थितौ ॥ ३६ ॥
तत्कालं सूर्यमुद्दिश्य दृष्ट्वा संख्यातु मर्हसि।
स चैव सत्क्रियाकालः षष्ठः कालोऽभिधीयते ॥ ३७ ॥
पूर्णेन्दुः पूर्णपक्षे तु रात्रिसन्धिषु पूर्णिमा।
तस्मादाप्यायते नक्तं पौर्णमास्यां निशाकरः ॥ ३८ ॥
यदान्योन्यवतीं पाते पूर्णिमां प्रेक्षते दिवा।

चन्द्रादित्योऽपराह्णे तु पूर्णत्वात् पूर्णिमा स्मृता ॥३९
यस्मात्ता मनुमन्यन्ते पितरो दैवतैः सह ।
तस्मादनुमतिर्नाम पूर्णत्वात् पूर्णिमा स्मृता ॥ ४० ॥
अत्यर्थं राजते यस्मात् पौर्णमास्यां निशाकरः ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयो विदुः ॥ ४१ ॥
अमावसेतामृक्षे तु यदा चन्द्रदिवाकरौ ।
एका पञ्चदशी रात्रिरमावास्या ततः स्मृता ॥ ४२ ॥
उद्दिश्य तामवामास्यां यदा दर्शं समागतौ ।
अन्योऽन्यं चन्द्रसूर्यौ तु दर्शनाद्दर्श उच्यते ॥ ४३ ॥
द्वौ द्वौ लवावमावास्यां सकालः पर्वसन्धिषु ।
द्व्यक्षरः कुहुमात्रश्च पर्वकालस्तु स स्मृतः ॥ ४४ ॥
दृष्टचन्द्रा त्वमावास्या मध्याह्नप्रभृतीह वै ।
दिवा तदूर्ध्वं रात्र्यां तु सूर्ये प्राप्ते तु चन्द्रमाः ।
सूर्येण सहसोद्गच्छेत्ततः प्रातस्तनात्तु वै ॥ ४५ ॥
समागम्य लवौ द्वौ तु मध्याह्नान्निपतन्रविः ।
प्रतिपच्छुक्लपक्षस्य चन्द्रमाः सूर्यमण्डलात् ॥ ४६ ॥
निर्मुच्यमानयोर्मध्ये तयोर्मण्डलयोस्तु वै ।
स तदाह्याहुतेः कालो दर्शस्य च वषट्क्रियाः ।
एतदृतुमुखं ज्ञेयममावास्यास्तु पार्वणम् ॥ ४७ ॥
दिवा पर्व त्वमावास्यां क्षीणेन्दौ धवले तु वै ।
तस्माद्दिवा त्वमावास्यां गृह्यते यो दिवाकरः ॥ ४८ ॥
कुहेति कोकिलेनोक्तं यस्मात् कालात् समाप्यते ।
तत्कालसंज्ञिता ह्येषा अमावास्या कुहूः स्मृता ॥४९॥
सिनीवालीप्रमाणं तु क्षीणशेषो निशाकरः ।

अमावास्या विशत्यर्के सिनीवाली तदा स्मृता ॥५०॥
अनुमतिश्च राका च सिनीवाली कुहूस्तथा ।
एतासां द्विलवः कालः कुहूमात्रा कुहूः स्मृता ॥५१॥
इत्येष पर्वसन्धीनां कालो वै द्विलवः स्मृतः ।
पर्वणान्तुल्यकालस्तु तुल्याहुतिवषट्क्रियाः ॥ ५२ ॥
चन्द्रसूर्य्यव्यतीपाते समे वै पूर्णिमे उभे ।
प्रतिपत्प्रतिपन्नस्तु पर्वकालो द्विमात्रकः ॥ ५३ ॥
कालः कुहूसिनीवाल्योः समुद्रोद्विलवः स्मृतः ।
अर्कनिर्मण्डले सोमे पर्वकालः कलाः स्मृताः ॥ ५४ ॥
यस्मादापूर्यते सोमः पञ्चदश्यान्तु पूर्णिमा ।
दशभिः पञ्चभिश्चैव कलाभिर्दिवसक्रमात् ॥ ५५ ॥
तस्मात् पञ्चदशे सोमे कला वै नास्ति षोडशी ।
तस्मात् सोमस्य विप्रोक्तः पञ्चदश्यां मया क्षयः ॥५६॥
इत्येते पितरो देवाः सोमपाः सोमवर्द्धनाः ।
आर्त्तवा ऋतवोऽशाब्दा देवास्तान् भवयन्ति हि ॥५७
अतः परं प्रवक्ष्यामि पितॄन् श्राद्धभुजस्तु ये ।
तेषां गतिश्च सत्तत्त्वं प्राप्तिं श्राद्धस्य चैव हि ॥ ५८ ॥
न मृतानाङ्गतिः शक्या ज्ञातुं वा पुनरागतिः ।
तपसा हि प्रसिद्धेन किं पुनर्मांसचक्षुषा ॥ ५९ ॥
अत्र देवान् पितॄंश्चैते पितरो लौकिकाः स्मृताः ।
तेषान्ते धर्म्मसामर्थ्यात् स्मृताः सायुज्यगा द्विजैः ॥६०॥
यदि वाश्रमधर्म्मेण प्रश्नानेषु व्यवस्थितान् ।
अन्ये चात्र प्रसीदन्ति श्राद्धयुक्तेषु कर्म्मसु ॥ ६१ ॥
ब्रह्मचर्य्येण तपसा यज्ञेन प्रजया भुवि ।

श्राद्धेन विद्यया चैव चान्नदानेन सप्तधा ॥ ६२ ॥
कर्म्मस्वेतेषु ये सक्तावर्त्तन्त्या देहपातनात् ।
देवैस्ते पितृभिः सार्द्धं मूष्मपैः सोमपैस्तथा ।
स्वर्गता दिवि मोदन्ते पितृमन्त उपासते ॥ ६३ ॥
प्रजायतां प्रसिद्धैषा उक्ता श्राद्धकृताश्च वै ।
तेषां निवापे दत्तं हि तत् कुलीनैस्तु बान्धवैः ॥ ६४ ॥
मासश्राद्धं हि भुञ्जानास्तेऽप्येते सोमलौकिकाः ।
एते मनुष्याः पितरो मासश्राद्धभुजस्तु वै ॥ ६५ ॥
तेभ्योऽपरे तु येऽत्वन्ये सङ्कीर्णाः कर्म्मयोनिषु ।
भ्रष्टाश्चाश्रमधर्म्मेषु स्वधास्वाहाविवर्जिताः ॥ ६६ ॥
भिन्ने देहे दुरापन्नाः प्रेतभूता यमक्षये ।
स्वकर्माण्यनुशोचन्तो यातनास्थानमागताः ॥ ६७ ॥
दीर्घाश्चैवातिशुष्काश्च श्मश्रुलाश्च विवाससः ।
क्षुत्पिपासाभिभूतास्ते विद्रवन्ति त्वितस्ततः ॥ ६८ ॥
सरित्सरस्तडागानि पुष्करिण्यश्च सर्वशः ।
परान्नान्यभिकाङ्क्षन्तः काल्यमाना इतस्ततः ॥ ६९ ॥
स्थानेषु पात्यमाना ये यातनास्थेषु तेषु वै ।
शाल्मल्यां वैतरिण्याञ्च कुम्भीपाकेऽथ वालुके ॥ ७० ॥
असिपत्रवने चैव यात्यमानाः स्वकर्म्मभिः ।
तत्र स्थानान्तु तेषां वै दुःखिता नाम शायिनाम् ॥ ७१
तेषां लोकान्तरस्थानां बान्धवैर्नामगोत्रतः ।
भूमावसव्यं दर्भेषु दत्ताः पिण्डास्त्रयस्तु वै ।
प्राप्तांस्तु तर्पयन्त्येव प्रेतस्थानेष्वधिष्ठितान् ॥ ७२ ॥
अप्राप्ता यातनास्थानं प्रभ्रष्टा ये च पञ्चधा ।

पश्चाद्ये स्थावरान्ते वै भूतानीके स्वकर्मभिः ॥ ७३ ॥
नानारूपासु जातीनां तिर्य्यग्योनिषु मूर्त्तिषु ।
यदाहारा भवन्त्येते तासु तास्विह योनिषु ॥ ७४ ॥
तस्मिंस्तस्मिंस्तदाहारे श्राद्धं दत्तन्तु प्रीणयेत् ।
काले न्यायागतम्पात्रे विधिना प्रतिपादितम् ।
प्राप्नुवन्त्यन्नमादत्तं यत्र यत्रावतिष्ठति ॥ ७५ ॥
यथा गोषु प्रनष्टासु वत्सो विन्दति मातरम् ।
तथा श्राद्धेषु दृष्टान्तो मन्त्रः प्रापयते तु तम् ॥ ७६ ॥
एवं ह्यविकलं श्राद्धं श्रद्धादत्तं मनुर्ब्रवीत् ।
सनत्कुमारः प्रोवाच पश्यन् दिव्येन चक्षुषा ॥ ७७ ॥
गतागतज्ञः प्रेतानां प्राप्तिं श्राद्धस्य चैव हि ।
कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी ॥ ७८ ॥
इत्येते पितरो देवा देवाश्च पितरश्च वै ।
अन्योन्यपितरो ह्येते देवाश्च पितरो दिवि ॥ ७९ ॥
एते तु पितरो देवा मनुष्याः पितरश्च ये ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥ ८० ॥
इत्येष विषयः प्रोक्तः पितृणां सोमपायिनाम् ।
एतत् पितृमहत्त्वं हि पुराणे निश्चयं गतम् ॥ ८१ ॥
इत्येष सोमसूर्य्याभ्यामैलस्य च समागमः ।
अवाप्तिं श्रद्धया चैव पितृणाञ्चैव तर्पणम् ॥ ८२ ॥
पर्वणाञ्चैव यः कालो यातनास्थानमेव च ।
समासात् कीर्तितन्तुभ्यं सर्ग एष सनातनः ॥ ८३ ॥
वैरूप्यं येन तत्सर्वं कथितन्त्वेकदेशिकम् ।
अशक्यं परिसंख्यातुं श्रद्धेयं भूतिमिच्छता ॥ ८४ ॥

स्वायम्भुवस्य देवस्य एष सर्गो मयेरितः ।
विस्तरेणानुपूर्व्याच्च भूयः किं कथयामि वः ॥ ८५ ॥

---

एकचत्वारिंशदधिकशततमोऽध्यायः ।

ऋषय ऊचुः । चतुर्युगानि यानि स्युः पूर्वं स्वायम्भ वेऽन्तरं ।
एषां निसर्गं संख्याञ्च श्रोतुमिच्छाम विस्तरात् ॥ १ ॥
सूत उवाच । पृथिवी द्युप्रसङ्गेन मया तु प्रागुदाहृतम् ।
एतच्चतुर्युगं त्वेवं तद्वक्ष्यामि निबोधत ।
तत्प्रमाणं प्रसंख्याय विस्तराच्चैव कृत्स्नशः ॥ २ ॥
लौकिकेन प्रमाणेन निष्पाद्याब्दन्तु मानुषम् ।
तेनापीह प्रसंख्याय वक्ष्यामि तु चतुर्युगम् ॥ ३ ॥
काष्ठानि मेषा दशपञ्च चैव त्रिंशच्च काष्ठाङ्गणयेत् कलान्तु ।
त्रिंशत्कलाश्चैव भवेन्मुहूर्तस्तैस्त्रिंशता रात्र्यहनी समेते॥४॥
अहोरात्रे विभजते सूर्यो मानुषलौकिके ।
रात्रिः स्वप्नाय भूतानाञ्चेष्टायै कर्म्मणामहः ॥ ५ ॥
पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ।
कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी ॥ ६ ॥
त्रिंशद्ये मानुषा मासाः पैत्रो मासः स उच्यते ।
शतानि त्रीणि मासानां षष्ठ्या चाभ्यधिकानि तु ।
पैत्रः संवत्सरो ह्येष मानुषेण विभाव्यते ॥ ७ ॥
मानुषेणैव मानेन वर्षाणां यच्छतं भवेत् ।
पितृणां तानि वर्षाणि संख्या तानि तु त्रीणि वै ।
दशच ह्यधिका मासाः पितृसंख्येह कीर्तिता ॥ ८ ॥
लौकिकेन प्रमाणेन अब्दो यो मानुषः स्मृतः ।

एतद्दिव्यमहोरात्रमित्येषा वैदिकी श्रुतिः ॥ ९ ॥
दिव्ये रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ।
अहस्तु यदुदक् चैव रात्रिर्या दक्षिणायनम् ।
एते रात्र्यहनी दिव्ये प्रसंख्याते तयोः पुनः ॥१०॥
त्रिंशद्यानि तु वर्षाणि दिव्यो मासस्तु स स्मृतः ।
मानुषाणां शतं यच्च दिव्या मासास्त्रयस्तु वै ।
तथैव सह संख्यातो दिव्य एष विधिः स्मृतः ॥ ११ ॥
त्रीणि वर्षशतान्येवं षष्टिवर्षा स्तथैव च ।
दिव्यः सम्वत्सरो ह्येष मानुषेण प्रकीर्तितः ॥ १२ ॥
त्रीणि वर्षसहस्राणि मानुषेण प्रमाणतः ।
त्रिंशदन्यानि वर्षाणि स्मृतः सप्तर्षिवत्सरः ॥ १३ ॥
नव यानि सहस्राणि वर्षाणां मानुषाणि च ।
वर्षाणि नवतिश्चैव ध्रुवसम्वत्सरः स्मृतः ॥ १४ ॥
षट्त्रिंशत्तु सहस्राणि वर्षाणां मानुषाणि च ।
षष्टिश्चैव सहस्राणि संख्यातानि तु संख्यया ।
दिव्यं वर्षसहस्रन्तु प्राहुः संख्याविदो जनाः ॥१५॥
इत्येतदृषिभिर्गीतं दिव्यया संख्यया द्विजाः ।
दिव्येनैव प्रमाणेन युगसंख्या प्रकल्पिता ॥ १६ ॥
चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन् ।
कृतन्त्रेता द्वापरञ्च कलिश्चैवं चतुर्युगम् ॥ १७ ॥
पूर्वं कृतयुगं नाम ततस्त्रेताभिधीयते ।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयेत् ॥ १८ ॥
चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥१९॥

इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकपादे निवर्त्तन्ते सहस्राणि शतानि च ॥ २० ॥
त्रेता त्रीणि सहस्राणि युगसंख्याविदो विदुः ।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥ २१ ॥
द्वे सहस्रे द्वापरन्तु सन्ध्यांशौ तु चतुःशतम् ।
सहस्रमेकं वर्षाणां कलिरेव प्रकीर्त्तितः ।
द्वे शते च तथान्ये च सन्ध्यासन्ध्यांशयोः स्मृते ॥ २२ ॥
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता ।
कृतन्त्रेता द्वापरश्च कलिश्चेति चतुष्टयम् ॥ २३ ॥
तत्र सम्वत्सराः सृष्टा मानुषास्तान्निबोधत ।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया ।
अष्टाविंशत्सहस्राणि कृतं युगमथोच्यते ॥ २४ ॥
प्रयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः ।
षण्णवतिसहस्राणि संख्या तानि च संख्यया ॥ २५ ॥
त्रेतायुगस्य संख्येषा मानुषेण तु संज्ञिता ।
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥ २६ ॥
चत्वारि नियुतानि स्युर्वर्षाणि तु कलियुगम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ।
एतत्कलियुगं प्रोक्तं मानुषेण प्रमाणतः ॥ २७ ॥
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता ।
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकैः सह ॥ २८ ॥
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥ २९ ॥

मन्वन्तरस्य संख्या तु मानुषेण निबोधत।
एकत्रिंशत्तथा कोट्यः संख्याताः संख्यया द्विजैः॥२०॥
तथा शतसहस्राणि दश चान्यानि भागशः।
सहस्राणि तु द्वात्रिंशच्छतान्यष्टाधिकानि च॥ २१॥
अशीतिश्चैव वर्षाणि मासाश्चैवाधिकास्तु षट्।
मन्वन्तरस्य संख्यैषा मानुषेण प्रकीर्तिता॥ २२॥
दिव्येन च प्रमाणेन प्रवक्ष्याम्यन्तरं मनोः।
सहस्राणां शतान्याहुः सच वै परिसंख्यया॥ २३॥
चत्वारिंशत् सहस्राणि मनोरन्तरमुच्यते।
मन्वन्तरस्य कालस्तु युगैः सह प्रकीर्तितः॥ २४॥
एषा चतुर्युगाख्या तु साधिका ह्येकसप्ततिः।
क्रमेण परिवृत्ता सा मनोरन्तरमुच्यते॥ २५॥
एतच्चतुर्दशगुणं कल्पमाहुस्तु तद्विदः।
ततस्तु प्रलयः कृत्स्नः स तु संप्रलयो महान्॥२६॥
कल्पप्रमाणो द्विगुणो यथा भवति संख्यया।
चतुर्युगाख्या व्याख्याता कृतं त्रेतायुगञ्च वै॥ २७॥
त्रेतासृष्टिं प्रवक्ष्यामि द्वापरं कलिमेव च।
युगपत्समवेतौ द्वौ द्विधा वक्तुं न शक्यते॥ २८॥
क्रमागतं मयाप्येतत्तुभ्यं नोक्तं युगद्वयम्।
ऋषिवंशप्रसङ्गेन व्याकुलत्वात्तथा क्रमात्॥ २९॥
नोक्तं त्रेतायुगे शेषं तद्वक्ष्यामि निबोधत।
अथ त्रेतायुगस्यादौ मनुः सप्तर्षयश्च ये।
श्रौतस्मार्तं ब्रुवन्धर्मं ब्रह्मणा तु प्रचोदिताः॥ ४०॥
दाराग्निहोत्रसम्बन्धं ऋग्यजुःसामसंहिताः।

इत्यादिबहुलं श्रौतं धर्मं सप्तर्षयोऽब्रुवन् ॥ ४१ ॥
परम्परागतं धर्मं स्मार्तत्वाचारलक्षणम् ।
वर्णाश्रमाचारयुक्तं मनुः स्वायम्भुवोऽब्रवीत् ॥ ४२ ॥
सत्येन ब्रह्मचर्येण श्रुतेन तपसा तथा ।
तेषां सुतप्ततपसा मार्गेणानुक्रमेण ह ॥ ४३ ॥
सप्तर्षीणां मनोश्चैव आदौ त्रेतायुगे ततः ।
अबुद्धिपूर्वकं तेन सकृत् पूर्वकमेव च ॥ ४४ ॥
अभिव्यक्तास्तु ते मन्त्रा दर्शनैस्तारकादिभिः ।
आदिकल्पे तु देवानां प्रादुर्भूतास्तु ते स्वयम् ॥ ४५ ॥
प्रमाणेष्वथ सिद्धानामन्येषाञ्च प्रवर्तते ।
मन्त्रयोगो व्यतीतेषु कल्पेष्वथ सहस्रशः ।
ते मन्त्रा वै पुनस्तेषां प्रति मायामुपस्थिताः ॥ ४६ ॥
ऋचो यजूंषि सामानि मन्त्राश्चाथर्वणास्तु ये ।
सप्तर्षिभिश्च ये प्रोक्ताः स्मार्त्तन्तु मनुरब्रवीत् ॥ ४७ ॥
त्रेतादौ संहता वेदाः केवलं धर्मसेतवः ।
संरोधादायुषश्चैव व्यस्यन्ते द्वापरे च ते ।
ऋषयस्तपसा वेदानहोरात्रमधीयत ॥ ४८ ॥
अनादिनिधना दिव्याः पूर्वं प्रोक्ताः स्वयम्भुवा ।
स्वधर्मसंवृताः साङ्गा यथा धर्मं युगे युगे ।
विक्रियन्ते स्वधर्मन्तु वेदवादाद्यथायुगम् ॥ ४९ ॥
आरम्भयज्ञः क्षत्रस्य हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्राश्च जपयज्ञाश्च ब्राह्मणाः ॥ ५० ॥
ततः समुदिता वर्णा त्रेतायां धर्मशालिनः ।
क्रियावन्तः प्रजावन्तः समृद्धाः सुखिनश्च वै ॥ ५१ ॥

ब्राह्मणैश्च विधीयन्ते क्षत्रियाः क्षत्रियैर्विशः।
वैश्यान् शूद्रान् वर्तन्ते शूद्रान् परमनुग्रहात्॥ ५२॥
शुभाः प्रकृतयस्तेषां धर्मा वर्णाश्रमाश्रयाः।
सङ्कल्पितेन मनसा वाचा वा हस्तकर्म्मणा।
त्रेतायुगे ह्यविकले कर्मारम्भः प्रसिध्यति॥ ५३॥
आयूरूपं बलं मेधा आरोग्यं धर्म्मशीलता।
सर्वसाधारणं ह्येत दासीत्त्रेतायुगे तु वै॥ ५४॥
वर्णाश्रम व्यवस्थान मेषां ब्रह्मा तथा करोत्।
संहिताश्च तथा मन्त्रा आरोग्यं धर्म्मशीलता॥ ५५॥
संहिताश्च तथा मन्त्रा ऋषिभिर्ब्रह्मणः सुतैः।
यज्ञः प्रवर्तितश्चैव तदा ह्येव तु देवतैः॥ ५६॥
यामैः शुक्लैर्जयैश्चैव सर्वसाधनसंभृतैः।
विश्वसृड्भिस्तथा सार्द्धं देवेन्द्रेण महौजसा।
स्वायम्भुवेऽन्तरे देवैस्ते यज्ञाः प्राक् प्रवर्तिताः॥ ५७॥
सत्यं जपस्तपोदानं पूर्वं धर्मोय उच्यते।
यदा धर्म्मस्य ह्रसते शाखा धर्म्मस्य वर्द्धते॥ ५८॥
जायन्ते च तदा शूरा आयुष्मन्तो महाबलाः।
न्यस्तदण्डा महायोगा यज्वानो ब्रह्मवादिनः॥ ५९॥
पद्मपत्रायताक्षाश्च पृथुवक्ताः सुसंहताः।
सिंहोरस्का महासत्वा मत्तमातङ्ग गामिनः॥ ६०॥
महाधनुर्द्धराश्चैव त्रेतायां चक्रवर्त्तिनः।
सर्वलक्षण पूर्णास्ते न्यग्रोध परिमण्डलाः॥ ६१॥
न्यग्रोधौ तु स्मृतौ बाहू व्यामोन्यग्रोध उच्यते।
व्यामेन तूच्छ्रयो यस्य अत ऊर्द्धन्तु देहिनः।

समुच्छ्रयो परीणाहो न्यग्रोध परिमण्डलः ॥ ६२ ॥
चक्रं रथो मणिर्भार्य्या निधिरश्वो गजस्तथा ।
प्रोक्तानि सप्तरत्नानि पूर्वं स्वायम्भुवेऽन्तरे ॥ ६३ ॥
विष्णोरंशेन जायन्ते पृथिव्यां चक्रवर्त्तिनः ।
मन्वन्तरेषु सर्वेषु ह्यतीता नागतेषु वै ॥ ६४ ॥
भूतभव्यानि यानीह वर्त्तमानानि यानि च ।
त्रेतायुगानि तेष्वत्र जायन्ते चक्रवर्त्तिनः ॥ ६५ ॥
भद्राणमानि तेषाञ्च विभाव्यन्ते महीक्षिताम् ।
अत्यद्भुतानि चत्वारि बलं धर्मं सुखं धनम् ॥६६॥
अन्योन्यस्याविरोधेन प्राप्यन्ते नृपतेः समम् ।
अर्थोधर्म्मश्च कामश्च यशोविजय एव च ॥ ६७ ॥
ऐश्वर्य्येणाणिमाद्येन प्रभुशक्ति बलान्विताः ।
श्रुतेन तपसा चैव ऋषींस्तेऽभिभवन्ति हि ॥ ६८ ॥
बलेनाभि भवन्त्येते तेन दानवमानवान् ।
लक्षणैश्चैव जायन्ते शरीरस्थैरमानुषैः ॥ ६९ ॥
केशास्थिता ललाटेन जिह्वा च परिमार्जनी ।
श्यामप्रभाश्चतुर्द्दंष्ट्राः श्रवसाश्चोर्ध्व रेतसः ॥ ७० ॥
आजानु बाहवश्चैव तालहस्तौ वृषाकृती ।
परिणाहप्रमाणाभ्यां सिंहस्कन्धाश्च मेधिनः ॥ ७१ ॥
पादयोश्चक्र मत्स्यौ तु शङ्खपद्मे च हस्तयोः ।
पञ्चाशीतिसहस्राणि जीवन्तिह्यजरामयाः ॥ ७२ ॥
असङ्गा गतयस्तेषां चतस्रश्चक्रवर्त्तिनाम् ।
अन्तरिक्षे समुद्रेषु पाताले पर्व्वतेषु च ॥ ७३ ॥
इज्यादानन्तपः सत्यन्त्रेताधर्मास्तु वै स्मृताः ।

तदा प्रवर्त्तते धर्म्मो वर्णाश्रमविभागशः ।
मर्य्यादास्थापनार्थञ्च दण्डनीतिः प्रवर्त्तते ॥ ७४ ॥
हृष्टपुष्टा जनाः सर्व्वे अरोगाः पूर्णमानसाः ।
एको वेदश्चतुष्पादस्त्रेतायान्तु विधिः स्मृतः ।
त्रीणि वर्षसहस्राणि जीवन्ते तत्र ताः प्रजाः ॥ ७५ ॥
पुत्रपौत्रसमाकीर्णा म्रियन्ते च क्रमेण ताः ।
एष त्रेतायुगे भावस्त्रेतासंख्यां निबोधत ॥ ७६ ॥
त्रेतायुगस्वभावेन सन्ध्यापादेन वर्त्तते ।
सन्ध्यापादः स्वभावाच्च योऽंशः पादेन तिष्ठति ॥ ७७॥

---

द्विचत्वारिंशदधिकशततमोऽध्यायः ।

ऋषय ऊचुः । कथं त्रेतायुगमुखे यज्ञस्यासीत् प्रवर्त्तनम् ।
पूर्व्वे स्वायम्भुवे सर्गे यथावत् प्रब्रवीहि नः ॥ १ ॥
अन्तर्हितायां सन्ध्यायां सार्द्धं कृतयुगेन हि ।
कालाख्यायां प्रवृत्तायां प्राप्ते त्रेतायुगे तथा ॥ २ ॥
औषधीषु च जातासु प्रवृत्ते वृष्टिसर्जने ।
प्रतिष्ठितायां वार्त्तायां ग्रामेषु च पुरेषु च ॥ ३ ॥
वर्णाश्रमप्रतिष्ठानं कृत्वा मन्त्रैश्च तैः पुनः ।
संहितास्तु सुसंहृत्य कथं यज्ञः प्रवर्त्तितः ।
एतच्छ्रुत्वाब्रवीत् सूतः श्रूयतां तत् प्रचोदितम् ॥४॥
सूत उवाच । मन्त्रान्वै योजयित्वा तु इहामुत्र च कर्म्मसु ।
तथा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ॥ ५ ॥
दैवतैः सह संहृत्य सर्व्वसाधनसंवृतः ।

तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ॥ ६ ॥
यज्ञकर्मण्यवर्तन्त कर्मण्यग्रे तथर्त्विजः।
हूयमाने देवहोत्रे अग्नौ बहुविधं हविः ॥ ७ ॥
सम्प्रतीतेषु देवेषु सामगेषु च सुस्वरम्।
परिक्रान्तेषु लघुषु अध्वर्युपुरुषेषु च ॥ ८ ॥
आलब्धेषु च मध्ये तु तथा पशुगणेषु वै।
आहूतेषु च देवेषु यज्ञभुक्षु ततस्तदा ॥ ९ ॥
य इन्द्रियात्मका देवा यज्ञभागभुजस्तु ते।
तान्यजन्ति तदा देवाः कल्पादिषु भवन्ति ये ॥ १० ॥
अध्वर्युप्रैषकाले तु व्युत्थिता ऋषयस्तथा।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा।
विश्वभुजन्ते त्वपृच्छन् कथं यज्ञविधिस्तव ॥ ११ ॥
अधर्मो बलवानेष हिंसा धर्मेप्सया तव।
नवः पशुविधिस्त्विष्टस्तव यज्ञे सुरोत्तम! ॥ १२ ॥
अधर्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया।
नायं धर्मोह्यधर्मोऽयं न हिंसा धर्म्म उच्यते।
आगमेन भवान् धर्मं प्रकरोतु यदीच्छति ॥ १३ ॥
विधिदृष्टेन यज्ञेन धर्म्मेणा व्यसनेन तु।
यज्ञबीजैः सुरश्रेष्ठ! त्रिवर्गपरिमोषितैः ॥ १४ ॥
एष यज्ञो महानिन्द्रः स्वयम्भुविहितः पुरा।
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः।
उक्तो न प्रति जग्राह मान मोह समन्वितः ॥ १५ ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षिणाम्।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥ १६ ॥

ते तु खिन्ना विवादेन शक्त्या युक्ता महर्षयः।
सन्धाय सममिन्द्रेण पप्रच्छुः खचरं वसुम्॥ १७॥
ऋषय ऊचुः। महाप्राज्ञ! त्वया दृष्टः कथं यज्ञविधिर्नृप!।
औत्तानपादे प्रब्रूहि संशयं नस्तुद प्रभो!॥ १८॥
सूत उवाच। श्रुत्वा वाक्यं वसुस्तेषामविचार्य बलाबलम्।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह॥ १९॥
यथोपनीतैर्यष्टव्यमिति होवाच पार्थिवः।
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि॥ २०॥
हिंसास्वभावो यज्ञस्य इति मे दर्शनागमः।
तथैते भाविता मन्त्रा हिंसालिङ्गा महर्षिभिः॥२१॥
दीर्घेण तपसा युक्तैस्तारकादिनिदर्शिभिः।
तत्प्रमाणं मया प्रोक्तं तस्मात्क्षमितुमर्हथ॥ २२॥
यदि प्रमाणं स्वान्येव मन्त्रवाक्यानि वो द्विजाः!।
तथा प्रवर्त्ततां यज्ञो ह्यन्यथा मा नृतं वचः॥ २३॥
एवं कृतोत्तरास्ते तु युञ्ज्यात्मानं ततोधिया।
अवश्यम्भाविनं दृष्ट्वा तमधो ह्यशपंस्तदा॥ २४॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम्।
ऊर्द्ध्वचारी नृपो भूत्वा रसातलचरोऽभवत्॥ २५॥
वसुधातलचारी तु तेन वाक्येन सोऽभवत्।
धर्माणां संशयच्छेत्ता राजा वसुधरोगतः॥ २६॥
तस्मान्नवाचयो ह्येकेन बहुज्ञेनापि संशयः।
बहुधारस्य धर्म्मस्य सूक्ष्मा दुरनुगा गतिः॥ २७॥
तस्मान्न निश्चयाद्वक्तुं धर्म्मः शक्यो हि केनचित्।
देवानृषीनुपादाय स्वायम्भुवमृते मनुम्॥ २८॥

तस्मान्न हिंसा यज्ञे स्याद्यदुक्तमृषिभिः पुरा ।
ऋषिकोटिसहस्राणि स्वैस्तपोभिर्दिवङ्गताः ॥ २९ ॥
तस्मान्न हिंसा यज्ञञ्च प्रशंसन्ति महर्षयः ।
उञ्छो मूलं फलं शाकमुदपात्रं तपोधनाः ॥ ३० ॥
एतद्दत्त्वा विभवतः स्वर्गलोके प्रतिष्ठिताः ।
अद्रोहश्चाप्यलोभश्च दमोभूतदया शमः ॥ ३१ ॥
ब्रह्मचर्यं तपः शौच मनुक्रोशं क्षमा धृतिः ।
सनातनस्य धर्म्मस्य मूलमेव दुरासदम् ॥ ३२ ॥
द्रव्यमन्त्रात्मको यज्ञस्तपश्च समतात्मकम् ।
यज्ञैश्च देवानाप्नोति वैराजं तपसा पुनः ॥ ३३ ॥
ब्रह्मणः कर्म्मसंन्यासाद् वैराग्यात्प्रकृतेर्लयम् ।
ज्ञानात् प्राप्नोति कैवल्यं पञ्चैता गतयः स्मृताः ॥ ३४ ॥
एवं विवादः सुमहान् यज्ञस्यासीत् प्रवर्त्तने ।
ऋषीणां देवतानाञ्च पूर्वं स्वायम्भुवेऽन्तरे ॥ ३५ ॥
ततस्ते ऋषयो दृष्ट्वा हृतं धर्मं बलेन ते ।
वसोर्वाक्यमनादृत्य जग्मुस्ते वै यथागतम् ॥ ३६ ॥
गतेषु ऋषिसङ्घेषु देवा यज्ञमवाप्नुयुः ।
श्रूयन्ते हि तपःसिद्धा ब्रह्मक्षत्रादयो नृपाः ॥ ३७ ॥
प्रियव्रतोत्तानपादौ ध्रुवो मेधातिथिर्वसुः ।
सुधामा विरजाश्चैव शङ्खपाद्राजसस्तथा ॥ ३८ ॥
प्राचीनबर्हिः पर्ज्जन्यो हविर्धानादयो नृपाः ।
एते चान्ये च बहवस्ते तपोभिर्दिवङ्गताः ॥ ३९ ॥
राजर्षयो महात्मानो येषां कीर्त्तिः प्रतिष्ठिता ।
तस्माद्विशिष्यते यज्ञात्तपः सर्वैस्तु कारणैः ॥ ४० ॥

ब्रह्मणा तपसा सृष्टं जगद्विश्वमिदं पुरा ।
तस्मान्नाप्नोति तद्यज्ञात्तपो मूलमिदं स्मृतम् ॥ ४१ ॥
यज्ञप्रवर्त्तनं ह्येव मासीत् स्वायम्भुवेऽन्तरे ।
तदा प्रभृति यज्ञोऽयं युगैः सार्द्धं प्रवर्त्तितः ॥ ४२ ॥
इति श्रीमत्स्यपुराणे मन्वन्तरानुकल्पे देवर्षिसंवादे
द्विचत्वारिंशदुत्तरशततमोऽध्यायः ।

---

अथ त्रिचत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच । अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते ॥ १ ॥
द्वापरादौ प्रजानान्तु सिद्धिस्त्रेतायुगे तु या ।
परिवृत्ते युगे तस्मिंस्ततः सा वै प्रणश्यति ॥ २ ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः ।
लोभोधृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः ॥ ३ ॥
प्रध्वंसश्चैव वर्णानां कर्म्मणान्तु विपर्य्ययः ।
याञ्चा वधः परो दण्डो मानो दर्पोऽक्षमा बलम् ॥ ४ ॥
तथा रजस्तमोभूयः प्रवृत्ते द्वापरे पुनः ।
आद्ये कृते नाधर्मोऽस्ति स त्रेतायां प्रवर्त्तितः ॥ ५ ॥
द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे धर्माः सङ्कीर्य्यन्ते तथाश्रमाः ॥ ६ ॥
द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतिस्मृतौ ।
द्विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते ॥ ७ ॥
अनिश्चयावगमनाद्धर्मतत्त्वं न विद्यते ।
धर्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते ॥ ८ ॥

परस्परं विभिन्नास्ते दृष्टीनां विभ्रमेण तु ।
अतो दृष्टिविभिन्नैस्तैः कृतमत्याकुलन्त्विदम् ॥९॥
एको वेदश्चतुष्पादः संहृत्य तु पुनः पुनः ।
संक्षेपादायुषश्चैव व्यस्यते द्वापरेष्विह ॥१०॥
वेदश्चैकश्चतुर्धा तु व्यस्यते द्वापरादिषु ।
ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः ॥ ११ ॥
ते तु ब्राह्मणविन्यासैः स्वरक्रमविपर्ययैः ।
संहृता ऋग्यजुःसाम्नां संहितास्तैर्महर्षिभिः ॥ १२॥
सामान्याद्वैकृताच्चैव दृष्टिभिन्नैः क्वचित् क्वचित् ।
ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च ॥१३॥
अन्ये तु प्रस्थितास्तान्वै केचित्तान् प्रत्यवस्थिताः ।
द्वापरेषु प्रवर्तन्ते भिन्नार्थैस्तैः स्वदर्शनैः ॥ १४ ॥
एकमाध्वर्यवं पूर्वमासीद्द्वैधन्तु तत् पुनः ।
सामान्यविपरीतार्थैः कृतं शास्त्राकुलन्त्विदम् ॥१५॥
आध्वर्यवञ्च प्रस्थानैर्बहुधा व्याकुलीकृतम् ।
तथैवाथर्वणां साम्नां विकल्पैः स्वस्य संचयैः ॥ १६ ॥
व्याकुलो द्वापरेष्वर्थः क्रियते भिन्नदर्शनैः ।
द्वापरे सन्निवृत्ते ते वेदा नश्यन्ति वै कलौ ॥ १७ ॥
तेषां विपर्ययोत्पन्ना भवन्ति द्वापरे पुनः ।
अदृष्टिर्मरणं चैव तथैव व्याध्युपद्रवाः ॥ १८ ॥
वाङ्मनःकर्मभिर्दुःखैर्निर्वेदो जायते ततः ।
निर्वेदाज्जायते तेषां दुःखमोक्षविचारणा ॥ १९ ॥
विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् ।
दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिस्तु जायते ॥ २० ॥

तेषां मेधाविनां पूर्वं मर्त्ये स्वायम्भुवेऽन्तरे।
उत्पत्स्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः॥ २१॥
आयुर्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च।
अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम्॥ २२॥
प्रक्रिया कल्पसूत्राणां भाष्यविद्याविकल्पनम्।
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक्॥२३॥
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम्।
मनसा कर्म्मणा वाचा कृच्छ्राद्वार्त्ता प्रसिध्यति॥२४॥
द्वापरे सर्वभूतानां कालः क्लेशपरः स्मृतः।
लोभो धृतिर्वणिग्युद्धन्तत्त्वानामविनिश्चयः॥ २५॥
वेदशास्त्रप्रणयनं वर्णानां सङ्करस्तथा।
वर्णाश्रमपरिध्वंसः कामद्वेषौ तथैव च॥ २६॥
पूर्णे वर्षसहस्रे द्वे परमायुस्तदा नृणाम्।
निःशेषे द्वापरे तस्मिंस्तस्य सन्ध्या तु पादतः॥ २७॥
गुणहीनास्तु तिष्ठन्ति धर्म्मस्य द्वापरस्य तु।
तथैव सन्ध्या पादेन अंशस्तस्यां प्रतिष्ठितः॥ २८॥
द्वापरस्य तु पर्य्येषा पुष्यस्य च निबोधत।
द्वापरस्यांशशेषे तु प्रतिपत्तिः कलेरथ॥ २९॥
हिंसास्तेया नृतं माया दम्भश्चैव तपस्विनाम्।
एते स्वभावाः पुष्यस्य साधयन्ति च ताः प्रजाः॥ ३०॥
एष धर्म्मः स्मृतः कृत्स्नो धर्म्मश्च परिहीयते।
मनसा कर्म्मणा वाचा वार्त्ताः सिद्ध्यन्ति वा नवा॥३१॥
कलिः प्रमारको रोगः सततं चापि क्षुद्भयम्।
अनावृष्टिभयञ्चैव देशानाञ्च विपर्ययः॥ ३२॥

न प्रमाणे स्थितिं ह्यर्स्ति पुष्ये घोरे युगे कलौ ।
गर्भस्थो म्रियते कश्चिद् यौवनस्थस्तथापरः ॥ ३४ ॥
स्थाविर्य्ये मध्यकौमारे म्रियन्ते च कलौ प्रजाः ।
अल्पतेजोबलाः पापा महाकोपा ह्यधार्मिकाः ॥ ३५॥
अनृतव्रतलुब्धाश्च पुष्ये चैव प्रजाः स्थिताः ।
दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ॥ ३६ ॥
विप्राणां कर्म्मदोषैस्तैः प्रजानां जायते भयम् ।
हिंसा मानस्तथेर्ष्या च क्रोधोऽसूयाऽक्षमाऽधृतिः ॥ ३७ ॥
पुष्ये भवन्ति जन्तूनां लोभो मोहश्च सर्वशः ।
सङ्क्षोभो जायतेऽत्यर्थं कलि मासाद्य वै युगम् ॥३८॥
नाधीयन्ते तथा वेदान्यजन्ते वै द्विजातयः ।
उत्सीदन्ति यथा चैव वैश्यैः सार्द्धन्तु क्षत्रियाः ॥ ३९॥
शूद्राणां मन्त्रयोनिस्तु सम्बन्धो ब्राह्मणैः सह ।
भवतीह कलौ तस्मिन् शयनासनभोजनैः ॥ ४० ॥
राजानः शूद्रभूयिष्ठाः पाषण्डानां प्रवृत्तयः ।
काषायिणश्च निष्कच्छास्तथा कापालिनश्च ह ॥४१॥
ये चान्ये देवव्रतिनस्तथा ये धर्म्मदूषकाः ।
दिव्यवृत्ताश्च ये केचिद् वृत्त्यर्थं श्रुतिलिङ्गिनः ॥४२ ॥
एवम्विधाश्च ये केचिद्भवन्तीह कलौ युगे ।
अधीयते तदा वेदान् शूद्रा धर्मार्थकोविदाः ॥ ४३ ॥
यजन्ति ह्यश्वमेधैस्तु राजानः शूद्रयोनयः ।
स्त्रीबालगोवधं कृत्वा हत्वा चैव परस्परम् ॥ ४४ ॥
उपहृत्य तथान्योन्यं साधयन्ति तदा प्रजाः ।
दुःखप्रचुरताल्पायुर्देशोत्सादः सरोगता ॥ ४५ ॥

अधर्माभिनिवृत्तत्वं तमोवृत्तं कलौ स्मृतम्।
भ्रूणहत्या प्रजानाञ्च तथा ह्येवं प्रवर्त्तते॥ ४६ ॥
तस्मादायुर्बलं रूपं प्रहीयन्ते कलौ युगे।
दुःखेनाभिप्लुतानां च परमायुःशतं नृणाम्॥ ४७ ॥
भूत्वा च न भवन्तीह वेदाः कलियुगेऽखिलाः।
उत्सीदन्ते तथा यज्ञाः केवलं धर्म्महेतवः॥ ४८ ॥
एषा कलियुगावस्था सन्ध्यांशौ तु निबोधत।
युगे युगे तु हीयन्ते त्रींस्त्रीन् पादांश्च सिद्धयः॥४९॥
युगस्वभावाः सन्ध्यासु अवतिष्ठन्ति पादतः।
सन्ध्यास्वभावाः स्वांशेषु पादेनैवावतस्थिरे॥ ५० ॥
एवं सन्ध्यांशके काले सम्प्राप्ते तु युगान्तिके।
तेषामधर्मिणां शास्ता भृगूणाञ्च कुले स्थितः॥ ५१॥
गोत्रेण वै चन्द्रमसे नाम्ना प्रमतिरुच्यते।
कलिसन्ध्यांशभागेषु मनोः स्वायम्भुवेऽन्तरे॥ ५२ ॥
समास्त्रिंशत्तु सम्पूर्णाः पर्यटन्वै वसुन्धराम्।
अस्त्रकर्मा स वै सेनां हस्त्यश्वरथसङ्कुलाम्॥ ५३ ॥
प्रगृहीतायुधैर्विप्रैः शतशोऽथ सहस्रशः।
स तदा तैः परिवृतो म्लेच्छान् सर्वान्निजघ्निवान्॥५४
स हत्वा सर्वशश्चैव राजानः शूद्रयोनयः॥ ५५ ॥
पाषण्डान् स तदा सर्वान्निःशेषानकरोत् प्रभुः॥५५॥
अधार्मिकाश्च ये केचित्तान् सर्वान् हन्ति सर्वशः।
औदीच्यान्मध्यदेशांश्च पार्वतीयांस्तथैव च॥ ५६ ॥
प्राच्यान् प्रतीच्यांश्च तथा विन्ध्यपृष्ठापरान्तिकान्।
तथैव दा[illegible]ात्यांश्च द्रविडान् सिंहलैः सह॥५७॥

गन्धारान् पारदांश्चैव पह्लवान्यवनान् शकान्।
तुषारान् बर्बरान् श्वेतान् पुलिन्दान् बर्बरान् खसान् ॥५८॥
लम्पकानान्ध्रकांश्चापि चोरजातीं स्तथैव च।
प्रवृत्तचक्रो बलवान् शूद्राणा मन्तकृद्बभौ ॥५९॥
विद्रावय सर्वभूतानि चचार वसुधामिमाम्।
मानवस्य तु वंशे तु नृदेवस्येह जज्ञिवान् ॥ ६० ॥
पूर्वजन्मनि विष्णुश्च प्रमतिर्नाम वीर्यवान्।
स्रुतः स वै चन्द्रमसः पूर्वं कलियुगे प्रभुः ॥ ६१ ॥
द्वात्रिंशेऽभ्युदिते वर्षे प्रक्रान्तो विंशतिं समाः।
निजघ्ने सर्वभूतानि मानुषाण्येव सर्वशः ॥ ६२ ॥
कृत्वा बीजावशिष्टान्तां पृथ्वीं क्रूरेण कर्म्मणा।
परस्परनिमित्तेन कालेनाकस्मिकेन च ॥ ६३ ॥
संस्थिता सह सायासे सेना प्रमतिना सह।
गङ्गायमुनयोर्मध्ये सिद्धिं प्राप्ता समाधिना ॥६४॥
ततस्तेषु प्रनष्टेषु सन्ध्यांशे क्रूरकर्म्मसु।
उत्साद्य पार्थिवान् सर्वान् तेष्वतीतेषु वै तदा ॥६५ ॥
ततः सन्ध्यांशके काले संप्राप्ते च युगान्तके।
स्थिताः स्वल्पावशिष्टासु प्रजास्विह क्वचित् क्वचित् ॥६६
स्वाप्रदानास्तदा ते वै लोभाविष्टास्तु वृन्दशः।
उपहिंसन्ति चान्योन्यं प्रलुम्पन्ति परस्परम् ॥ ६७ ॥
अराजके युगांशे तु सङ्क्षये समुपस्थिते।
प्रजास्ता वै तदा सर्वाः परस्परभयार्दिताः ॥ ६८ ॥
व्याकुलास्ताः परावृत्तास्त्यज्य देवगृहाणि तु।
स्वान् स्वान् प्राणानवेक्षन्तो निष्कारुण्यात् सुदुःखिताः ॥६९

नष्टे श्रौतस्मृते धर्मे कामक्रोधवशानुगाः।
निर्मर्यादा निरानन्दा निःस्नेहानिरपत्रपाः॥ ७० ॥
नष्टे धर्मे प्रतिहता ह्रस्वकाः पञ्चविंशकाः।
हित्वा दारांश्च पुत्रांश्च विषादव्याकुलप्रजाः॥ ७१॥
अनावृष्टिहतास्ते वै वार्त्तामुत्सृज्य दुःखिताः।
चीरकृष्णाजिनधरा निष्कृडा निष्परिग्रहाः॥ ७२ ॥
वर्णाश्रमपरिभ्रष्टाः सङ्करङ्घोरमास्थिताः।
एवं कष्ट मनुप्राप्ता ह्यल्पशेषाः प्रजास्ततः॥ ७३ ॥
जन्तवश्च क्षुधाविष्टा दुःखान्निर्वेदमागमन्।
संश्रयन्ति च देशांस्तांश्चक्रवत् परिवर्त्तनाः॥ ७४ ॥
ततः प्रजास्तु ताः सर्वा मांसाहारा भवन्ति हि।
मृगान् वराहान् वृषभान्ये चान्ये वनचारिणः॥७५॥
भक्ष्यांश्चैवाप्यभक्ष्यांश्च सर्वांस्तान् भक्षयन्ति ताः।
समुद्रं संश्रिता यास्तु नदींश्चैव प्रजास्तु ताः॥ ७६ ॥
तेऽपि मत्स्यान् हरन्तीह आहारार्थं च सर्वशः।
अभक्ष्याहारदोषेण एकवर्णगता प्रजाः॥ ७७ ॥
यथा कृतयुगे पूर्वमेकवर्णमभूत्किल।
तथा कलियुगस्यान्ते शूद्रीभूताः प्रजास्तथा॥ ७८ ॥
एवं वर्षशतं पूर्णं दिव्यं तेषां न्यवर्त्तत।
षट्त्रिंशच्च सहस्राणि मानुषाणि तु तानि वै॥७९॥
अथ दीर्घेण कालेन पक्षिणः पशवस्तथा।
मत्स्याश्चैव हताः सर्वैः क्षुधाविष्टैश्च सर्वशः॥ ८० ॥
निःशेषेष्वथ सर्वेषु मत्स्यपक्षिपशुष्वथ।
सन्ध्यांशे प्रतिपन्ने तु निःशेषास्तु तदा कृताः॥८१॥

ततः प्रजास्तु सम्भूय कन्दमूलमथोऽखनन् ।
फलमूलाशनाः सर्वे अनिकेतास्तथैव च ॥ ८२ ॥
तत्कलान्यथ वासांसि अधःशय्याश्च सर्वशः ।
परिग्रहो न तेष्वस्ति धनशुद्धिमवाप्नुयुः ॥ ८३ ॥
एवं क्षयं गमिष्यन्ति ह्यल्पशिष्टाः प्रजास्तदा ।
तासामल्पावशिष्टानामाहाराद्वृद्धिरिष्यते ॥ ८४ ॥
एवं वर्षशतं दिव्यं सन्ध्यांशस्य वर्त्तते ।
ततो वर्षसहस्रान्ते अल्पशिष्टाः स्त्रियः सुताः ॥ ८५॥
मिथुनानि तु ताः सर्वा ह्यन्योन्यं सम्प्रजज्ञिरे ।
ततस्तास्तु म्रियन्ते वै पूर्वोत्पन्नाः प्रजास्तु याः ॥ ८६ ॥
जातमात्रेष्वपत्येषु ततः कृतमवर्त्तत ।
यथा स्वर्गे शरीराणि नरके चैव देहिनाम् ॥ ८७ ॥
उपभोगसमर्थानि एवं कृतयुगादिषु ।
एवं कृतस्य सन्तानः कलेश्चैव क्षयस्तथा ॥ ८८ ॥
विचारणात्तु निर्वेदः साम्यावस्थात्मना तथा ।
ततश्चैवात्मसम्बोधः सम्बोधाद्धर्मशीलता ॥ ८९ ॥
कलिशिष्टेषु तेष्वेवं जायन्ते पूर्ववत् प्रजाः ।
भाविनोऽर्थस्य च बलात्ततः कृतमवर्त्तत ॥ ९० ॥
अतीतानागतानि स्युर्यानि मन्वन्तरेष्विह !
एते युगस्वभावास्तु मयोक्तास्तु समासतः ॥ ९१ ॥
विस्तरेणानुपूर्व्याच्च नमस्कृत्य स्वयम्भुवे ।
प्रवृत्ते तु ततस्मिन् पुनः कृतयुगे तु वै ॥ ९२ ॥
उत्पन्नाः कलिशिष्टेषु प्रजाः कार्त्तयुगास्तथा ।
तिष्ठन्ति चेह ये सिद्धा अदृष्टा विहरन्ति च ॥ ९३ ॥

सह सप्तर्षिभिर्ये तु तत्र ये च व्यवस्थिताः ।
ब्रह्मक्षत्रविशः शूद्रा बीजार्थं य इह स्मृताः ॥ ९४ ॥
तेषां सप्तर्षयो धर्मं कथयन्तीह तेषु च ॥ ९५ ॥
वर्णाश्रमाचारयुतं श्रौतस्मार्त्तविधानतः ।
एवं तेषु क्रियावत्सु प्रवर्त्तन्तीह वै कृते ॥ ९६ ॥
श्रौतस्मार्त्तस्थितानान्तु धर्मे सप्तर्षिदर्शिते ।
ते तु धर्मव्यवस्थार्थं तिष्ठन्तीह कृते युगे ॥ ९७ ॥
मन्वन्तराधिकारेषु तिष्ठन्ति ऋषयस्तु ते ।
यथा दावप्रदग्धेषु तृणेष्वेवापरन्तितौ ॥ ९८ ॥
वनानां प्रथमं दृष्टा तेषां मूलेषु सम्भवः ।
एवं युगाद्युगानां वै सन्तानस्तु परस्परम् ॥ ९९ ॥
प्रवर्त्तते ह्यविच्छेदाद्यावन्मन्वन्तरक्षयः ।
सुखमायुर्बलं रूपं धर्मार्थौ काम एव च ॥ १०० ॥
युगेष्वेतानि हीयन्ते त्रयः पादाः क्रमेण तु ।
इत्येष प्रतिसन्धिर्वः कीर्त्तितस्तु मया द्विजाः ! ॥१०१॥
चतुर्युगाणां सर्वेषामेतदेव प्रसाधनम् ।
एषां चतुर्युगाणान्तु गणिता ह्येकसप्ततिः ॥ १०२ ॥
क्रमेण परिवृत्तास्ता मनोरन्तरमुच्यते ।
युगाख्यासु तु सर्वासु भवतीह यदा च यत् ॥१०३॥
तदेव च तदन्यासु पुनस्तद्वै यथाक्रमम् ।
सर्गे सर्गे यथा भेदा ह्युत्पद्यन्ते तथैव च ॥१०४॥
चतुर्दशसु तावन्तो ज्ञेया मन्वन्तरेष्विह ।
आसुरी यातुधानी च पैशाची यक्षराक्षसी ॥१०५॥

युगे युगे तदा काले प्रजा जायन्ति ताः शृणु।
यथाकल्पं युगैः सार्द्धं भवन्ते तुल्यलक्षणा।
इत्येतल्लक्षणं प्रोक्तं युगानां वै यथाक्रमम् ॥ १०६ ॥
मन्वन्तराणां परिवर्त्तनानि चिरप्रवृत्तानि युगस्वभावात्।
क्षणं न संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्त्तमानः॥१०७॥
एते युगस्वभावा वः परिक्रान्ता यथाक्रमम्।
मन्वन्तराणि यान्यस्मिन् कल्पे वक्ष्यामि तानि च ॥१०८
इति श्रीमत्स्यपुराणे मन्वन्तरानुकीर्त्तने नाम त्रिच-
त्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

---

अथ चतुश्चत्वारिंशदधिकशततमोऽध्यायः।

सूत उवाच। मन्वन्तराणि यानि स्युः कल्पे कल्पे चतुर्दश।
व्यतीतानागतानि स्युर्यानि मन्वन्तरेष्विह ॥ १ ॥
विस्तरेणानुपूर्व्याच्च स्थितिं वक्ष्ये युगे युगे।
तस्मिन् युगे च सम्भूतिर्यासां यावच्च जीवितम् ॥ २ ॥
युगमात्रन्तु जीवन्ति न्यूनं तस्माद्द्वयेन च।
चतुर्दशसु तावन्तो ज्ञेया मन्वन्तरेष्विह ॥ ३ ॥
मनुष्याणां पशूनाञ्च पक्षिणां स्थावरैः सह।
तेषामायुरुपक्रान्तं युगधर्मेषु सर्वशः ॥ ४ ॥
तथैवायुः परिक्रान्तं युगधर्मेषु सर्वशः।
अस्थितिश्च कलौ दृष्टा भूतानां मानुषे तथा ॥ ५ ॥
परमायुः शतन्त्वेतन्मानुषाणां कलौ स्मृतम्।
देवासुरमनुष्याश्च यक्षगन्धर्वराक्षसाः ॥ ६ ॥
परिणाहोच्छ्रये तुल्या जायन्तेह कृते युगे।

षण्णवत्यङ्गुलोत्सेधो अष्टानां देवयोनिनाम् ॥ ७ ॥
नवाङ्गुलप्रमाणेन निष्पन्नेन तथाष्टकम्।
एतत् स्वाभाविकं तेषां प्रमाणमधिकुर्वताम् ॥ ८ ॥
मनुष्या वर्त्तमानास्तु युगसन्ध्यांशकेष्विह।
देवासुरप्रमाणान्तु सप्तसप्ताङ्गुलं क्रमात् ॥ ९ ॥
चतुराशीतिकैश्चैव कलिजैरङ्गुलैः स्मृतम्।
आपादतलमस्तको नवतालो भवेत्तु यः ॥ १० ॥
संहत्याजानु बाहुश्च दैवतैरभिपूज्यते।
गवाश्च हस्तिनां चैव महिषस्थावरात्मनाम् ॥ ११ ॥
क्रमेणैतेन विज्ञेये ह्रासवृद्धी युगे युगे।
षट्सप्तत्यङ्गुलोत्सेधः पशुराककुदो भवेत् ॥ १२ ॥
अङ्गुलानामष्टशतमुत्सेधो हस्तिनां स्मृतः।
अङ्गुलानां सहस्रन्तु द्विचत्वारिंशदङ्गुलम् ॥ १३ ॥
शतार्द्धमङ्गुलानान्तु ह्युत्सेधः शाखिनाम्परः।
मानुषस्य शरीरस्य सन्निवेशस्तु यादृशः ॥ १४ ॥
तल्लक्षणन्तु देवानां दृश्यतेऽन्वयदर्शनात्।
बुद्धातिशयसंयुक्तो देवानां काय उच्यते ॥ १५ ॥
तथा नातिशयश्चैव मानुषः काय उच्यते।
इत्येव हि परिक्रान्ता भावा ये दिव्यमानुषाः ॥१६ ॥
पशूनां पक्षिणां चैव स्थावराणां च सर्वशः।
गावोऽजाश्वाश्च विज्ञेया हस्तिनः पक्षिणो मृगाः ॥१७॥
उपयुक्ताः क्रियास्वेते यज्ञियास्त्विह सर्वशः।
यथाक्रमोपभोगाश्च देवानां पशुमूर्त्तयः ॥ १८ ॥
तेषां रूपानुरूपैश्च प्रमाणैः स्थिरजङ्गमाः।

मनोज्ञैस्तत्र तैर्भोगैः सुखिनो ह्युपपेदिरे ॥ १९ ॥
अथ सन्तः प्रवक्ष्यामि साधूनथ ततश्च वै ।
ब्राह्मणाः श्रुतिशब्दाश्च देवानां व्यक्तमूर्त्तयः ॥ २० ॥
संयुज्य ब्रह्मणा ह्यन्तस्तेन सन्तः प्रचक्षते ।
सामान्येषु च धर्मेषु तथा वैशेषिकेषु च ॥ २१ ॥
ब्रह्मक्षत्रविशो युक्ताः श्रौतस्मार्तेन कर्म्मणा ।
वर्णाश्रमेषु युक्तस्य सुखोदर्कस्य स्वर्गतौ ॥ २२ ॥
श्रौतस्मार्तो हि यो धर्मो ज्ञानधर्मः स उच्यते ।
दिव्यानां साधनात् साधुर्ब्रह्मचारी गुरोर्हितः ॥२३॥
कारणात् साधनाच्चैव गृहस्थः साधुरुच्यते ।
तपसश्च तथा रण्येसाधुर्वैखानसः स्मृतः ॥ २४ ॥
यतमानो यतिः साधुः स्मृतोयोगस्य साधनात् ।
धर्मो धर्मगतिः प्रोक्तः शब्दोह्येष क्रियात्मकः ॥ २५ ॥
कुशलाकुशलौ चैव धर्माधर्मौ ब्रवीत् प्रभुः ।
अथ देवाश्च पितर ऋषयश्चैव मानुषाः ॥ २६ ॥
अयं धर्मो ह्ययं नेति ब्रुवते मौनमूर्त्तिना ।
धर्मेति धारणे धातुर्महत्त्वे चैव मुच्यते ॥ २७ ॥
आधारणे महत्त्वे वा धर्म्मः स तु निरुच्यते ।
तत्रेष्टप्रापको धर्म्म आचार्यैरुपदिश्यते ॥ २८ ॥
अधर्म्मश्चानिष्टफल आचार्यैर्नोपदिश्यते ।
वृद्धाश्चालोलुपाश्चैव आत्मवन्तोह्यदाम्भिकाः ॥ २९ ॥
सम्यग्विनीता मृदवस्तानाचार्यान् प्रचक्षते ।
धर्मज्ञैर्विहितो धर्म्मः श्रौतस्मार्तोद्विजातिभिः ॥ ३० ॥
दाराग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम् ।

स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ॥३१॥
पूर्वेभ्यो वेदयित्वेह श्रौतं सप्तर्षयोऽब्रुवन् ।
ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि वै श्रुतिः ॥३२॥
मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत् ।
तस्मात् स्मार्तः स्मृतो धर्म्मो वर्णाश्रमविभागशः ॥३३॥
एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते ।
शिषेर्धातोश्च निष्ठान्ताच्छिष्टशब्दं प्रचक्षते ॥ ३४ ॥
मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्म्मिकाः ।
मनुः सप्तर्षयश्चैव लोकसन्तानकारिणः ॥ ३५ ॥
तिष्ठन्तीह च धर्मार्थं तांश्छिष्टान् सम्प्रचक्षते ।
तैः शिष्टैश्चलितो धर्मः स्थाप्यते वै युगे युगे ॥ ३६ ॥
त्रयीवार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेप्सया ।
शिष्टैराचर्य्यते यस्मात् पुनश्चैव मनुक्षये ॥ ३७ ॥
पूर्वैः पूर्वैर्मतत्वाच्च शिष्टाचारः स शाश्वतः ।
दानं सत्यं तपो लोको विद्येज्या पूजनन्दमः ॥३८॥
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम् ।
शिष्टा यस्माच्चरन्त्येनं मनुः सप्तर्षयश्च ह ॥ ३९ ॥
मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः ।
विज्ञेयः श्रवणाच्छ्रौतः स्मरणात् स्मार्त्त उच्यते ॥४०॥
इज्यावेदात्मकः श्रौतः स्मार्तो वर्णाश्रमात्मकः ।
प्रत्यङ्गानि प्रवक्ष्यामि धर्मस्येह तु लक्षणम् ॥ ४१ ॥
दृष्टानुभूतमर्थञ्च यः पृष्टो न विगूहते ।
यथाभूतप्रवादस्तु इत्येतद्धर्मलक्षणम् ॥ ४२ ॥
ब्रह्मचर्यं तपो मौनं निराहारत्वमेव च ।

मनोज्ञैस्तत्र तैर्भोगैः सुखिनो ह्युपपेदिरे ॥ १९ ॥
अथ सन्तः प्रवक्ष्यामि साधूनथ ततश्च वै ।
ब्राह्मणाः श्रुतिशब्दाश्च देवानां व्यक्तमूर्त्तयः ॥ २० ॥
संयुज्य ब्रह्मणा ह्यान्तस्तेन सन्तः प्रचक्षते ।
सामान्येषु च धर्म्मेषु तथा वैशेषिकेषु च ॥ २१ ॥
ब्रह्मक्षत्रविशो युक्ताः श्रौतस्मार्तेन कर्म्मणा ।
वर्णाश्रमेषु युक्तस्य सुखोदर्कस्य स्वर्गतौ ॥ २२ ॥
श्रौतस्मार्तो हि यो धर्मो ज्ञानधर्मः स उच्यते ।
दिव्यानां साधनात् साधुर्ब्रह्मचारी गुरोर्हितः ॥२३॥
कारणात् साधनाच्चैव गृहस्थः साधुरुच्यते ।
तपसश्च तथा रण्ये साधुर्वैखानसः स्मृतः ॥ २४ ॥
यतमानो यतिः साधुः स्मृतो योगस्य साधनात् ।
धर्मो धर्मगतिः प्रोक्तः शब्दो ह्येष क्रियात्मकः ॥ २५ ॥
कुशलाकुशलौ चैव धर्माधर्मौ ब्रवीत् प्रभुः ।
अथ देवाश्च पितर ऋषयश्चैव मानुषाः ॥ २६ ॥
अयं धर्मो ह्ययं नेति ब्रुवते मौनमूर्त्तिना ।
धर्मेति धारणे धातुर्महत्त्वे चैव मुच्यते ॥ २७ ॥
आधारणे महत्त्वे वा धर्म्मः स तु निरुच्यते ।
तत्रेष्टप्रापको धर्म्म आचार्यैरुपदिश्यते ॥ २८ ॥
अधर्म्मश्चानिष्टफल आचार्यैर्नोपदिश्यते ।
वृद्धाश्चालोलुपाश्चैव आत्मवन्तो ह्यदाम्भिकाः ॥ २९ ॥
सम्यग्विनीता मृदवस्तानाचार्यान् प्रचक्षते ।
धर्मज्ञैर्विहितो धर्म्मः श्रौतस्मार्तो द्विजातिभिः ॥ ३० ॥
दाराग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम् ।

स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ॥३१॥
पूर्वेभ्यो वेदयित्वेह श्रौतं सप्तर्षयोऽब्रुवन्।
ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि वै श्रुतिः ॥३२॥
मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत्।
तस्मात् स्मार्तः स्मृतो धर्म्मो वर्णाश्रमविभागशः ॥३३॥
एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते।
शिषेर्धातोश्च निष्ठान्ताच्छिष्टशब्दं प्रचक्षते ॥ ३४ ॥
मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्मिकाः।
मनुः सप्तर्षयश्चैव लोकसन्तानकारिणः ॥ ३५ ॥
तिष्ठन्तीह च धर्मार्थं तांश्छिष्टान् सम्प्रचक्षते।
तैः शिष्टैश्चलितो धर्मः स्थाप्यते वै युगे युगे ॥ ३६ ॥
त्रयीवार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेप्सया।
शिष्टैराचर्य्यते यस्मात् पुनश्चैव मनुक्षये ॥ ३७ ॥
पूर्वैः पूर्वैर्मतत्वाच्च शिष्टाचारः स शाश्वतः।
दानं सत्यं तपो लोको विद्येज्या पूजनं दमः ॥३८॥
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम्।
शिष्टा यस्माच्चरन्त्येनं मनुः सप्तर्षयश्च ह ॥ ३९ ॥
मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः।
विज्ञेयः श्रवणाच्छ्रौतः स्मरणात् स्मार्त्त उच्यते ॥४०॥
इज्यावेदात्मकः श्रौतः स्मार्तो वर्णाश्रमात्मकः।
प्रत्यङ्गानि प्रवक्ष्यामि धर्मस्येह तु लक्षणम् ॥ ४१ ॥
दृष्टानुभूतमर्थञ्च यः पृष्टो न विगूहते।
यथाभूतप्रवादस्तु इत्येतद्धर्मलक्षणम् ॥ ४२ ॥
ब्रह्मचर्यं तपो मौनं निराहारत्वमेव च।

इत्येतत्तपसो रूपं सुघोरन्तु दुरासदम् ॥ ४३ ॥
पशूनां द्रव्यहविषा मृक्सामयजुषां तथा ।
ऋत्विजां दक्षिणायाश्च संयोगो यज्ञ उच्यते ॥ ४४ ॥
आत्मवत्सर्वभूतेषु यो हिताय शुभाय च ।
वर्त्तते सततं हृष्टः क्रिया श्रेष्ठा दया स्मृता ॥ ४५ ॥
आक्रुष्टोऽभिहतो यस्तु नाक्रोशेत्प्रहरेदपि ।
अदुष्टो वाङ्मनःकायैस्तितिक्षुः सा क्षमा स्मृता ॥४६॥
स्वामिना रक्ष्यमाणानामुत्सृष्टानाञ्च सम्भ्रमे ।
परस्वानामनादानमलोभ इति संज्ञितः ॥ ४७ ॥
मैथुनस्यासमाचारो जल्पनाच्चिन्तनात्तथा ।
निवृत्तिर्ब्रह्मचर्य्यञ्च तदेतच्छमलक्षणम् ॥ ४८ ॥
आत्मार्थे वा परार्थे वा इन्द्रियाणीह यस्य वै ।
विषये न प्रवर्त्तन्ते दमस्यैतत्तु लक्षणम् ॥ ४९ ॥
पञ्चात्मके यो विषये कारणे चाष्टलक्षणे ।
न क्रुध्येत प्रतिहतः स जितात्मा भविष्यति ॥ ५०॥
यद्यदिष्टतमं द्रव्यं न्यायेनैवागतञ्च यत् ।
तत्तद्गुणवते देयमित्येतद्दानलक्षणम् ॥ ५१ ॥
श्रुतिस्मृतिभ्यां विहितो धर्मो वर्णाश्रमात्मकः ।
शिष्टाचारप्रवृत्तश्च धर्मोऽयं साधुसम्मतः ॥ ५२ ॥
अप्रद्वेषो ह्यनिष्टेषु इष्टं वै नाभिनन्दति ।
प्रीतितापविषादानां विनिवृत्तिर्विरक्तता ॥ ५३ ॥
संन्यासः कर्मणां न्यासः कृतानामकृतैः सह ।
कुशलाकुशलाभ्यां तु प्रहाणं न्यास उच्यते ॥५४॥
अव्यक्तादिविशेषान्तविकारेऽस्मिन्निवर्त्तते ।

चेतनाचेतनं ज्ञात्वा ज्ञाने ज्ञानी स उच्यते ॥ ५५ ॥
प्रत्यङ्गानि तु धर्मस्य चेत्येतल्लक्षणं स्मृतम्।
ऋषिभिर्धर्मतत्त्वज्ञैः पूर्वं स्वायम्भुवेऽन्तरे ॥ ५६ ॥
अत्र वो वर्णयिष्यामि विधिं मन्वन्तरस्य तु।
तथैव चातुर्होत्रस्य चातुर्वर्ण्यस्य चैव हि ॥ ५७ ॥
प्रतिमन्वन्तरं चैव श्रुतिरन्या विधीयते।
ऋचो यजूंषि सामानि यथावत् प्रतिदैवतम् ॥५८॥
विधिस्तोत्रं तथा होत्रं पूर्ववत् संप्रवर्तते।
द्रव्यस्तोत्रं गुणस्तोत्रं कर्मस्तोत्रं तथैव च ॥ ५९ ॥
तथैवाभिजनस्तोत्रं स्तोत्रमेवं चतुर्विधम्।
मन्वन्तरेषु सर्वेषु यथा वेदाङ्गवन्ति हि ॥ ६० ॥
प्रवर्तयन्ति तेषां वै ब्रह्मस्तोत्रं पुनः पुनः।
एवं मन्त्रगुणानान्तु समुत्पत्तिश्चतुर्विधा ॥ ६१ ॥
अथर्वऋग्यजुःसाम्नां वेदेष्विह पृथक् पृथक्।
ऋषीणां तप्यतां तेषां तपः परमदुश्चरम् ॥ ६२ ॥
मन्त्राः प्रादुर्भवन्त्यादौ पूर्वमन्वन्तरस्य ह।
असन्तोषाद्भयाद् दुःखान्मोहाच्छोकाच्च पञ्चधा ॥ ६३॥
ऋषीणां तारका येन लक्षणेन यदृच्छया।
ऋषीणां यादृशत्वं हि तद्वक्ष्यामीह लक्षणम् ॥ ६४ ॥
अतीतानागतानाञ्च पञ्चधा ह्यार्षकं स्मृतम्।
तथा ऋषीणां वक्ष्यामि आर्षस्येह समुद्भवम् ॥ ६५ ॥
गुणसाम्येन वर्त्तन्ते सर्वसम्प्रलये तदा।
अविभागेन वेदानामनिर्द्देश्य तमोमये ॥ ६६ ॥
अबुद्धिपूर्वकं तद्वै चेतनार्थं प्रवर्तते।

तेनार्षं बुद्धिपूर्वन्तु चेतनेनाप्यधिष्ठितम् ॥ ६७ ॥
प्रवर्त्तते यथा ते तु यथा मत्स्योदका वुभौ ।
चेतनाधिष्ठितं सर्वं प्रावर्त्तत गुणात्मकम् ।
कार्यकारणभावेन तथा तस्य प्रवर्त्तते ॥ ६८ ॥
विषयो विषयित्वञ्च तदा ह्यर्थपदात्मकौ ।
कालेन प्रापणीयेन भेदाश्च कारणात्मकाः ॥ ६९ ॥
सांसिद्धिकास्तदा वृत्ताः क्रमेण महदादयः ।
महतोऽसावहङ्कार स्तस्माद्भूतेन्द्रियाणि च ॥ ७० ॥
भूतभेदाश्च भूतेभ्यो जज्ञिरे तु परस्परम् ।
संसिद्धिकारणं कार्य्यं सद्य एव विवर्त्तते ॥ ७१ ॥
यथोल्मुकात्तु विटपा एककालाद्भवन्ति हि ।
तथा प्रवृत्ताः क्षेत्रज्ञाः कालेनैकेन कारणात् ॥ ७२ ॥
यथान्धकारे खद्योतः सहसा सम्प्रदृश्यते ।
तथा निवृत्तो ह्यव्यक्तः खद्योत इव स ज्वलन् ॥ ७३ ॥
स महात्मा शरीरस्थ स्तत्रैवेह प्रवर्त्तते ।
महतस्तमसः पारे वैलक्षण्याद्विभाव्यते ॥ ७४ ॥
तत्रैव संस्थितो विद्वान् तपसान्त इति श्रुतम् ।
बुद्धिर्विवहतस्तस्य प्रादुर्भूता चतुर्विधा ॥ ७५ ॥
ज्ञानं वैराग्यमैश्वर्यं धर्मश्चेति चतुष्टयम् ।
सांसिद्धिकान्यथैतानि अप्रतीतानि तस्य वै ॥ ७६ ॥
महात्मनः शरीरस्य चैतन्यात् सिद्धिरुच्यते ।
पुरि शेते यतः पूर्वं क्षेत्रज्ञानं तथापि च ॥ ७७ ॥
पुरे शयनात् पुरुषः क्षेत्रज्ञानात् क्षेत्रज्ञ उच्यते ।
यस्माद्धर्मात् प्रसूते हि तस्माद्वै धार्मिकस्तु सः ॥ ७८॥

सांसिद्धिके शरीरे च बुद्ध्याव्यक्तस्तु चेतनः।
एवं विवृतः क्षेत्रज्ञः क्षेत्रं ह्यनभिसन्धितः॥ ७६॥
निवृत्तिसमकाले तु पुराणन्तदचेतनम्।
क्षेत्रज्ञेन परिज्ञातं भोग्योऽयं विषयो मम॥ ८०॥
ऋषिर्हिंसागतौ धातुर्विद्या सत्यं तपः श्रुतम्।
एष सन्निचयो यस्माद् ब्रह्मणस्तु ततस्त्वृषिः॥ ८१॥
निवृत्तिसमकालाच्च बुद्ध्याव्यक्तऋषिस्त्वयम्।
ऋषते परमं यस्मात्परमर्षिस्ततः स्मृतः॥ ८२॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता॥ ८३॥
सेश्वराः स्वयमुद्भूता ब्रह्मणो मनसाः सुताः।
निवर्तमानैस्तैर्बुद्ध्या महान् परिगतः परः॥ ८४॥
यस्माद्दृशपरत्वेन सह तस्मानमहर्षयः।
ईश्वराणां सुता स्तेषां मानसाश्चौरसाश्च वै॥ ८५॥
ऋषिस्तस्मात्परत्वेन भूतादिरृषय स्ततः।
ऋषिपुत्रा ऋषीकास्तु मैथुनाद् गर्भसम्भवाः॥ ८६॥
परत्वेन ऋषन्ते वै भूतादीनृषिका स्ततः।
ऋषिकाणां सुता ये तु विज्ञेया ऋषिपुत्रकाः॥ ८७॥
श्रुत्वा ऋषं परत्वेन श्रुतास्तस्माच्छ्रुतर्षयः।
अव्यक्तात्मा महात्मावाहङ्कारात्मा तथैव च॥ ८८॥
भूतात्मा चेन्द्रियात्मा च तेषां तद्ज्ञानमुच्यते।
इत्येव मृषिजातिस्तु पञ्चधा नाम विश्रुता॥ ८९॥
भृगुर्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चापि ते दश॥ ९०॥

ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः ।
परत्वेनर्षयो यस्मान्मतास्तस्मान्महर्षयः ॥ ९१ ॥
ईश्वराणां सुतास्त्वेषा ऋषयस्तान्निबोधत ।
काव्यो बृहस्पतिश्चैव कश्यपश्च्यवनस्तथा ॥ ९२ ॥
उचथ्यो वामदेवश्च अगस्त्यः कौशिकस्तथा ।
कर्दमो वालखिल्याश्च विश्रवाः शक्तिवर्द्धनः ॥ ९३ ॥
इत्येते ऋषयः प्रोक्ता स्तपसा ऋषितां गताः ।
तेषां पुत्रानृषीकांस्तु गर्भोत्पन्नान्निबोधत ॥ ९४ ॥
वत्सरो नग्नहूश्च व भरद्वाजश्च वीर्यवान् ।
ऋषिर्दीर्घतमा चैव बृहद्दुक्षाः शरद्वतः ॥ ९५ ॥
वाजिश्रवाः सुचिन्तश्च शावश्च सपराशरः ।
शृङ्गी च शङ्खपाच्चैव राजा वैश्रवणस्तथा ॥ ९६ ॥
इत्येते ऋषिकाः सर्वे सत्येन ऋषितां गताः ।
ईश्वरा ऋषयश्चैव ऋषीका ये च विश्रुताः ॥ ९७ ॥
एवं मन्त्रकृतः सर्वे कृत्स्नशश्च निबोधत ।
भृगुः काश्यपः प्राचेता दधीचो ह्यात्मवानपि ॥ ९८ ॥
ऊर्वोऽथ जमदग्निश्च वेदः सारस्वतस्तथा ।
आर्ष्टिषेणश्च्यवनश्च वीतहव्यः स वेधसः ॥ ९९ ॥
वैण्यः पृथुर्दिवोदासो ब्रह्मवान् गृत्सशौनकौ ।
एकोनविंशतिर्ह्येते भृगवो मन्त्रकृत्तमाः ॥ १०० ॥
अङ्गिराश्चैव त्रितश्च भरद्वाजोऽथ लक्ष्मणः ।
कृतवाचस्तथा गर्गः स्मृतिसंकृतिरेव च ॥ १०१ ॥
गुरुवीतश्च मान्धाता अम्बरीषस्तथैव च ।
युवनाश्वः पुरुकुत्सः स्वश्रवस्तु सदस्यवान् ॥ १०२ ॥

अजमीढो स्वहार्यश्च हुत्कलः कविरेव च ।
पृषदश्वो विरूपश्च काव्यश्चैवाथ मुद्गलः ॥ १०३ ॥
उतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि ।
अपस्यौषः सुचित्तिश्च वामदेवस्तथैव च ॥ १०४ ॥
ऋषिजो बृहच्छुक्लश्च ऋषिर्दीर्घतमा अपि ।
कक्षीवांश्च नवस्त्रिंशत् स्मृता ह्यङ्गिरसां वराः ॥१०५॥
एते मन्त्रकृतः सर्वे काश्यपांस्तु निबोधत ।
कश्यपः सहवत्सारो नैध्रुवो नित्य एव च ॥ १०६॥
असितो देवलश्चैव षडेते ब्रह्मवादिनः ।
अत्रिरर्द्धस्वनश्चैव शावास्योऽथ गविष्ठिरः ॥ १०७ ॥
कर्णकश्च ऋषिः सिद्धस्तथा पूर्वातिथिश्च यः ॥ १०८ ॥
इत्येते त्वत्रयः प्रोक्ता मन्त्रकृत् षण्महर्षयः ।
वसिष्ठश्चैव शक्तिश्च तृतीयश्च पराशरः ॥ १०९ ॥
ततस्तु इन्द्रप्रतिमः पञ्चमस्तु भरद्वसुः ।
षष्ठस्तु मित्रावरुणः सप्तमः कुण्डिनस्तथा ॥ ११० ॥
इत्येते सप्त विज्ञेया वासिष्ठा ब्रह्मवादिनः ।
विश्वामित्रश्च गाधेयो देवरातस्तथा बलः ॥ १११ ॥
तथा विद्वन्मधुच्छन्दा ऋषिश्चान्योऽघमर्षणः ।
अष्टको लोहितश्चैव भृतकीलश्च माम्बुधिः ॥ ११२॥
देवश्रवा देवरतः पुराणश्च धनञ्जयः ।
शिशिरश्च महातेजाः शालङ्कायन एव च ॥ ११३ ॥
त्रयोदशैते विज्ञेया ब्रह्मिष्ठाः कौशिका वराः ।
अगस्त्योऽथ दृढद्युम्नो इन्द्रबाहु स्तथैव च ॥ ११४ ॥
ब्रह्मिष्ठागस्तयो ह्येते त्रयः परमकीर्त्तयः ।

मनुर्वैवस्वतश्चैव ऐलो राजा पुरूरवाः ॥ ११५ ॥
क्षत्रियाणां वरो ह्येतौ विज्ञेयौ मन्त्रवादिनौ ।
भलन्दकश्च वासाश्वः सङ्कीलश्चैव ते त्रयः ॥ ११६ ॥
एते मन्त्रकृतोज्ञेया वैश्यानां प्रवराः सदा ।
इति द्विनवतिः प्रोक्ता मन्त्रा यैश्च बहिष्कृताः ॥११७ ॥
ब्राह्मणाः क्षत्रिया वैश्या ऋषिपुत्रान्निबोधत ।
ऋषीकाणां सुता ह्येते ऋषिपुत्राः श्रुतर्षयः ॥ ११८॥
इति श्रीमत्स्यपुराणे मन्वन्तरकल्पवर्णनो नाम
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।

---

अथ पञ्चचत्वारिंशदधिकशततमोऽध्यायः ।

ऋषय ऊचुः । कथं मत्स्येन कथित स्तारकस्य बधोमहान् ।
कस्मिन् काले विनिर्वृत्ता कथेयं सूतनन्दन ! ॥ १ ॥
त्वन्मुखक्षीरसिन्धूत्था कथेय ममृतात्मिका ।
कर्णाभ्यां पिबतां तृप्ति रस्माकं न प्रजायते ॥ २ ॥
इदं मुने ! समाख्याहि महाबुद्धे ! मनोगतम् ।
सूत उवाच । पृष्टस्तु मनुना देवो मत्स्यरूपी जनार्दनः ॥३ ॥
कथं शरवने जातो देवः षड्वदनोविभो ! ।
एतत्तु वचनं श्रुत्वा पार्थिवस्यामितौजसः ॥ ४ ॥
उवाच भगवान् प्रीतो ब्रह्मसूनुर्महामतिम् ।
मत्स्य उवाच । वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्रस्तु तारकः ॥५॥
सुरानुद्वासयामास पुरेभ्यः स महाबलः ।
ततस्ते ब्रह्मणोऽभ्यासं जग्मुर्भयनिपीडिताः ॥ ६ ॥
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषा मुवाच ह ।

सन्त्यज्यध्वं भयं देवाः! शङ्करस्यात्मजः शिशुः॥ ७॥
तुहिनाचलदौहित्रस्तं हनिष्यति दानवम्।
ततः काले तु कस्मिंश्चिद्‌दृष्ट्वा वै शैलजां शिवः॥८॥
स्वरेतो वह्निवदने व्यसृजत्कारणान्तरे।
तस्मात्तं वह्निवदने रेतोदेवानतर्पयत्॥ ९॥
विदार्य जठराण्येषां अजीर्णं निर्गतं मुने!।
पतितं तत्सरिद्वरे ततस्तु शरकानने॥ १०॥
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः।
स सप्तदिवसो बालो निजघ्ने तारकासुरम्॥ ११॥
एवं श्रुत्वा ततो वाक्यं तमूचुर्ऋषिसत्तमाः।
ऋषय ऊचुः। अत्याश्चर्यवती रम्या कथेयं पापनाशिनी॥१२॥
विस्तरेण हि नो ब्रूहि यथातथ्येन शृण्वताम्।
वज्राङ्गोनाम दैत्येन्द्रः कस्य वंशोद्भवः पुरा॥ १३॥
तस्याभुत्तारकः पुत्रः सुरप्रमथनो बली।
निर्मितः को वधे चाभुत्तस्य दैत्येश्वरस्य तु॥ १४॥
गुहजन्म तु कार्त्स्न्येन अस्माकं ब्रूहि मानद!।
सूत उवाच। मानसो ब्रह्मणः पुत्रो दक्षो नाम प्रजापतिः॥१५॥
षष्टिं सोऽजनयत्कन्या वैरिण्यामेव नः श्रुतम्।
ददौ स दश धर्माय कश्यपाय त्रयोदश॥ १६॥
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये।
द्वे वै बाहुकपुत्राय द्वे चान्येऽङ्गिरसे तथा॥ १७॥
द्वे कृशाश्वाय विदुषे प्रजापतिसुतः प्रभुः।
अदितिर्दितिर्दनुर्विश्वा ह्यरिष्टा सुरसा तथा॥ १८॥

सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा ।
कद्रूर्मुनिश्च लोकस्य मातरो गोषु मातरः ॥ १९ ॥
तासां सकाशाल्लोकानां जङ्गमस्थावरात्मनाम् ।
जन्म नानाप्रकाराणां ताभ्योऽन्ये देहिनः स्मृताः ॥२०॥
दैत्येन्द्रोपेन्द्रपूजाद्याः सर्वे ते दितिजा मताः
दितेः सकाशाल्लोकास्तु हिरण्यकशिपादयः ॥ २१ ॥
दानवाश्च दनोः पुत्रा गावश्च सुरभीसुताः ।
पक्षिणो विनतापुत्रा गरुड़प्रमुखाः सुताः ॥२२ ॥
नागाः कद्रूसुता ज्ञेयाः शेषाश्चान्येऽपि जन्तवः ।
त्रैलोक्यनाथं शक्रन्तु सर्वामरगणप्रभुम् ॥ २३ ॥
हिरण्यकशिपुश्चक्रे नीत्वा राजत्वं महाबलः ।
ततः केनापि कालेन हिरण्यकशिपादयः ॥ २४ ॥
निहता विष्णुना सर्व्वे शेषाश्चेन्द्रेण दानवाः ।
ततो निहत पुत्रा भूद्दितिर्वरमयाचत ॥ २५ ॥
भर्त्तारं कश्यपं देवं पुत्रमन्यं महाबलम् ।
समरे शक्रहन्तारं स तस्या अददात् प्रभुः ॥ २६ ॥
नियमे वर्त्त हे देवि ! सहस्रं पश्चिमानसा ।
वर्षाणां लप्स्यसे पुत्रमित्युक्ता सा तथाकरोत् ॥२७ ॥
वर्त्तन्त्या नियमे तस्याः सहस्राक्षः समाहितः ।
उपासामाचरत्तस्याः सा चैन मन्वमन्यत ॥ २८ ॥
दशसम्वत्सरशेषस्य सहस्रस्य तदादितिः ।
उवाच शक्रं सुप्रीता वरदा तपसि स्थिता ॥ २९ ॥
दितिरुवाच । पुत्रोत्तीर्णव्रतां प्रायः विद्धि मां पाकशासन ! ।
भविष्यति च ते भ्राता तेन सार्द्धमिमां श्रियम् ॥३०॥

भुङ्क्ष्व वत्स ! यथाकामं त्रैलोक्यं हतकण्टकम् ।
इत्युक्त्वा निद्रयाविष्टा चरणाक्रान्तमूर्द्धजा ॥ ३१ ॥
स्वयं सुष्वापानियता भाविनोऽर्थस्य गौरवात् ।
तत्तु रन्ध्रं समासाद्य जठरं पाकशासनः ॥ ३२ ॥
चकार सप्तधा गर्भं कुलिशेन तु देवराट् ।
एकैकन्तु पुनः खण्डं चकार मघवा ततः ॥ ३३ ॥
सप्तधा सप्तधा कोपात् प्रबुध्यत ततोदितिः ।
विबुध्योवाच मा शक्र ! घातयेथाः प्रजां मम ॥ ३४ ॥
तच्छ्रुत्वा निर्गतः शक्रः स्थित्वा प्राञ्जलिरग्रतः ।
उवाच वाक्यं सन्त्रस्तो मातुर्वै वदनेरितम् ॥ ३५ ॥
शक्र उवाच । दिवास्वप्नपरा मातः ! पादाक्रान्तशिरोरुहा ।
सप्त सप्तभिरेवातस्तव गर्भः कृतो मया ॥ ३६ ॥
एकोनपञ्चाशत्कृता भागा वज्रेण ते सुताः ।
दास्यामि तेषां स्थानानि दिवि देवनपूजिते ॥३७ ॥
इत्युक्ता सा तदा देवी सैवमस्त्वित्यभाषत ।
पुनश्च देवी भर्तारमुवाचासितलोचना ॥ ३८ ॥
पुत्रं प्रजापते ! देहि शक्रजेतारमूर्जितम् ।
यो नास्त्रशस्त्रैर्वध्यत्वं गच्छेत्त्रिदिववासिनाम् ॥३९॥
इत्युक्तः स तथोवाच तां पत्नीमतिदुःखिताम् ।
दशवर्षसहस्राणि तपः कृत्वा तु लप्स्यसे ॥ ४० ॥
वज्रसारमयैरङ्गैरच्छेद्यैरायसैर्दृढैः ।
वज्राङ्गो नाम पुत्रस्ते भविता पुत्रवत्सले ! ॥ ४१ ॥
सा तु लब्धवरा देवी जगाम तपसे वनम् ।
दशवर्षसहस्राणि सा तपो घोरमाचरत् ॥ ४२ ॥

तपसोऽन्ते भगवती जनयामास दुर्जयम् ।
पुत्रमप्रतिकर्माणमजेयं वज्रदुश्छिदम् ॥ ४३ ॥
स जातस्तत्र एवाभूत् सर्वशस्त्रास्त्रपारगः ।
उवाच मातरं भक्त्या मातः! किङ्करवाण्यहम् ॥४४॥
तमुवाच ततो हृष्टा दितिर्दैत्याधिपस्य सा ।
बहवो मे हताः पुत्राः सहस्राक्षेण पुत्रक ! ॥ ४५ ॥
तेषां त्वं प्रतिकर्तुं वै गच्छ शक्रवधाय च ।
बाढमित्येव तां मुक्त्वा जगाम त्रिदिवं बली ॥ ४६ ॥
बद्ध्वा ततः सहस्राक्षं पाशेनामोघवर्चसा ।
मातुरन्तिकमागच्छद्व्याघ्रः क्षुद्रमृगं यथा ॥ ४७ ॥
एतस्मिन्नन्तरे ब्रह्मा कश्यपश्च महातपाः ।
आगतौ तत्र यत्रास्तां मातापुत्रावभीतकौ ॥ ४८ ॥
दृष्ट्वा तु तमुवाचेदं ब्रह्मा कश्यप एव च ।
मुञ्चैनं पुत्र ! देवेन्द्रं किमनेन प्रयोजनम् ॥ ४९ ॥
अपमानो वधः प्रोक्तः पुत्रसम्भावितस्य च ।
अस्मद्वाक्येन यो मुक्तो विद्धि तं मृतमेव च ॥ ५० ॥
परस्य गौरवान्मुक्तः शत्रूणां भारमावहेत् ।
जीवन्नेव मृतो वत्स ! दिवसे दिवसे स तु ॥ ५१ ॥
महतां वशमायाते वैरं नैवास्ति वैरिणि ।
एतच्छ्रुत्वा तु वज्राङ्गः प्रणतो वाक्यमब्रवीत् ॥ ५२ ॥
न मे कृत्य मनेनास्ति मातुराज्ञा कृता मया ।
त्वं सुरासुरनाथो वै मम च प्रपितामहः ॥ ५३ ॥
करिष्ये त्वद्वचो देव ! एष मुक्तः शतक्रतुः ।
तपसे मे रतिर्देव ! निर्विघ्नं चैव मे भवेत् ॥ ५४ ॥

त्वत्प्रसादेन भगवन्नित्युक्त्वा विरराम सः।
तस्मिंस्तूष्णीं स्थिते दैत्ये प्रोवाचेदं पितामहः ॥५५॥
ब्रह्मोवाच। तपस्त्वं क्रूरमापन्नो मच्छासनसंस्थितः।
अनया चित्तशुद्ध्या ते पर्याप्तं जन्मनः फलम् ॥ ५६ ॥
इत्युक्त्वा पद्मजः कन्यां ससर्जायतलोचनाम्।
तामस्मै प्रददौ देवः पत्न्यर्थं पद्मसम्भवः ॥ ५७ ॥
वराङ्गेति च नामास्याः कृत्वायातः पितामहः।
वज्राङ्गोऽपि तया सार्द्धं जगाम तपसे वनम् ॥ ५८॥
ऊर्द्ध्वबाहुः स दैत्येन्द्रोऽचरदब्दसहस्रकम्।
कालं कमलपत्राक्षः शुद्धबुद्धिर्महातपाः ॥ ५९ ॥
तावच्चावाङ्मुखः कालं तावत् पञ्चाग्निमध्यगः।
निराहारो घोरतपास्तपोराशिरजायत ॥ ६० ॥
ततः सोऽन्तर्जले चक्रे कालं वर्षसहस्रकम्।
जलान्तरं प्रविष्टस्य तस्य पत्नी महाव्रता ॥ ६१ ॥
तस्यैव तीरे सरसस्तत्परा स्थितौ मौनमास्थिता।
निराहारा तपो घोरं प्रविवेश महाद्युतिः ॥ ६२ ॥
तस्यां तपसि वर्त्तन्त्यामिन्द्रश्चक्रे विभीषिकाम्।
भूत्वा तु मर्कटस्तत्र तदाश्रमपदं महान् ॥ ६३ ॥
चक्रे विलोलं निःशेषं तुम्बीघटकरण्डकम्।
ततस्तु मेषरूपेण कम्पं तस्याकरोन्महान् ॥ ६४ ॥
ततो भुजङ्गरूपेण बध्वा च चरणद्वयम्।
अपकृष्टा ततो दूरं भ्रमंस्तस्या महीमिमाम् ॥६५॥
तपोबलाढ्या सा तस्य न वध्यत्वं जगाम ह।
ततो गोमायुरूपेण तस्या दूषयदाश्रमम् ॥ ६६ ॥

ततस्तु मेघरूपेण तस्याः क्लेदयदाश्रमम् ।
भीषिकाभि रनेकाभि स्तां क्लिश्यन् पाकशासनः ॥६७॥
विरराम यदा नैवं वज्राङ्गमहिषी तदा ।
शैलस्य दुष्टतां मत्वा शापन्दातुं व्यवस्थिता ॥ ६८ ॥
स शापाभिमुखां दृष्ट्वा शैलः पुरुषविग्रहः ।
उवाच तां वरारोहां वराङ्गीं भीरुचेतनः ॥ ६९ ॥
नाहं वराङ्गने ! दुष्टः सेव्योऽहं सर्वदेहिनाम् ।
विभ्रमन्तु करोत्येष रुषितः पाकशासनः ॥७० ॥
एतस्मिन्नन्तरे जातः कालवर्षसहस्रिकः ।
तस्मिन् गते तु भगवान् काले कमलसम्भवः ।
तुष्टः प्रोवाच वज्राङ्गं तमागम्य जलाश्रयम् ॥ ७१॥
ब्रह्मोवाच । ददामि सर्वकामांस्ते उत्तिष्ठ दितिनन्दन ! ।
एवमुक्त स्तदोत्थाय दैत्येन्द्रस्तपसां निधिः ।
उवाच प्राञ्जलिर्वाक्यं सर्वलोकपितामहम् ॥ ७२ ॥
वज्राङ्ग उवाच । आसुरो मास्तु मे भावः सन्तु लोकाममाव्ययाः
तपस्येव रतिर्मेऽस्तु शरीरस्यास्तु वर्तनम् ॥ ७३ ॥
एवमस्त्विति तन्देवो जगाम स्वकमालयम् ।
वज्राङ्गोऽपि समाप्ते तु तपसि स्थिरसंयमः ॥ ७४ ॥
आहारमिच्छन् भार्यां स्वाम ददर्शाश्रमे स्वके ।
क्षुधाविष्टः स शैलस्य गहनम्प्रविवेश ह ॥ ७५ ॥
आदातुं फलमूलानि स च तस्मिन् व्यलोकयत् ।
रुदन्तीं तां प्रियान्दीनां तनुप्रच्छादिताननाम् ॥७६॥
तां विलोक्य स दैत्येन्द्रः प्रोवाच परिसान्त्वयन् ।
वज्राङ्ग उवाच । केन तेऽपकृतं भीरु यमलोकं यियासुना ७७

कं वा कामं प्रयच्छामि शीघ्रं मे ब्रूहि मानिनि!।

इति श्रीमत्स्यपुराणे तारकासुरोपाख्याने पञ्च-
चत्वारिंशदधिकशततमोऽध्यायः।

---

अथ षट् चत्वारिंशदधिकशततमोऽध्यायः।

वराङ्गगुवाच। त्रासितास्म्यपविद्धास्मि ताडिता पीडितापि च
रौद्रेण देवराजेन नष्टनाथेव भूरिशः॥ १॥
दुःखपारमपश्यन्ती प्राणांस्त्यक्तुं व्यवस्थिता।
पुत्रं मे तारकं देहि दुःखशोकमहार्णवात्॥ २॥
एवमुक्तः स दैत्येन्द्रः कोपव्याकुललोचनः।
शक्तोऽपि देवराजस्य प्रतिकर्तुं महासुरः॥ ३॥
तपः कर्तुं पुनर्दैत्यो व्यवस्यत महाबलः।
ज्ञात्वा तु तस्य संकल्पं ब्रह्मा क्रूरतरं पुनः॥ ४॥
आजगाम तदा तत्र यत्रासौ दितिनन्दनः।
उवाच तस्मै भगवान् प्रभुर्मधुरया गिरा॥ ५॥
ब्रह्मोवाच। किमर्थं पुत्र भूयस्त्वं नियमं क्रूरमिच्छसि।
आहाराभिमुखो दैत्यस्तन्नो ब्रूहि महाव्रत!॥ ६॥
यावदब्दसहस्रेण निराहारास्य यत् फलम्।
क्षणेनैकेन तल्लब्धा त्यक्ताहारमुपस्थितम्॥ ७॥
त्यागो ह्यप्राप्तकामानां कामेभ्यो न तथा गुरुः।
यथा प्राप्तं परित्यज्य कामं कमललोचन!॥ ८॥
श्रुत्वैतद्ब्रह्मणो वाक्यं दैत्यः प्राञ्जलिरब्रवीत्।
चिंतयंस्तपसायुक्तो हृदि ब्रह्ममुखेरितम्॥ ९॥
वज्राङ्ग उवाच। उत्थितेन मया दृष्टा समाधानात्त्वदाज्ञया।

महिषी भीषिता दीना रुदन्ती प्राङ्गिन स्तले ॥१०॥
सा मयोक्ता तु तन्वङ्गी दूयमानेन चेतसा ।
किमेवं वर्त्तसे भीरु ! वद त्वं किञ्चिकीर्षसि ॥ ११ ॥
इत्युक्ता सा मया देव ! प्रोवाच स्खलिताक्षरम् ।
वाक्यं वाचस्पते ! भीता तन्वङ्गा हेतुसंहितम् ॥१२॥
वराङ्गयुवाच । त्रासितास्म्यपविद्धास्मि कर्षिता पीडितास्मि च ।
रौद्रेण देवराजेन नष्टनाथेव भूरिशः ॥ १३ ॥
दुःखस्यान्तमपश्यन्ती प्राणांस्त्यक्तुं व्यवस्थिता ।
पुत्रं मे तारकं देहि ह्यस्माद्दुःखमहार्णवात् ॥१४॥
एवमुक्तस्तु संक्षुब्ध स्तस्याः पुत्रार्थमुद्यतः ।
तपो घोरं करिष्यामि जयाय त्रिदिवौकसाम् ॥ १५॥
एतच्छ्रुत्वा वचो देवः पद्मगर्भोद्भव स्तदा ।
उवाच दैत्यराजानं प्रसन्नश्चतुराननः ॥ १६ ॥
ब्रह्मोवाच । अलन्ते तपसा वत्स ! मा क्लेशे दुस्तरे विश ।
पुत्रस्ते तारको नाम भविष्यति महाबलः ॥ १७ ॥
देवसीमन्तिनी कान्त धम्मिल्लस्य विमोचनः ।
इत्युक्तो दैत्यनाथस्तु प्रणिपत्य पितामहम् ॥ १८ ॥
आगत्यानन्दयामास महिषीं हर्षिताननः ।
तौ दम्पती कृतार्थौ तु जग्मतुः स्वाश्रमं मुदा ॥ १९॥
वज्राङ्गनाहितं गर्भं वराङ्गा वरवर्णिनी ।
पूर्णं वर्षसहस्रञ्च दधारोदर एव हि ॥ २० ॥
ततो वर्षसहस्रान्ते वराङ्गी सुषुवे सुतम् ।
जायमाने तु दैत्येन्द्रे तस्मिन् लोकभयङ्करे ॥ २१ ॥
चचाल सकला पृथ्वी समुद्राश्च चकम्पिरे ।

चेलुर्महीधराः सर्वे ववुर्वाताश्च भीषणाः ॥ २२ ॥
जेपुर्जप्यं मुनिवरा नेदुर्व्यालमृगा अपि।
चन्द्रसूर्यौ जहुः कान्तिं सनीहारा दिशोऽभवन् ॥ २३ ॥
जाते महासुरे तस्मिन् सर्वे चापि महासुराः।
आजग्मुर्हर्षितास्तत्र तथा चासुरयोषितः ॥ २४ ॥
जगुर्हर्षसमाविष्टा ननृतुश्चासुराङ्गनाः।
ततो महोत्सवो जातो दानवानां द्विजोत्तमाः ॥ २५ ॥
विषण्णमनसो देवाः समहेन्द्रास्तदाभवन्।
वराङ्गी स्वसुतं दृष्ट्वा हर्षेणापूरिता तदा ॥ २६ ॥
बहुमेने न देवेन्द्रविजयन्तु तदैव सा।
जातमात्रस्तु दैत्येन्द्रस्तारकश्चण्डविक्रमः ॥ २७ ॥
अभिषिक्तोऽसुरैः सर्वैः कुजम्भमहिषादिभिः।
सर्वासुरमहाराज्ये पृथिवीतलनक्षमैः ॥ २८ ॥
सतु प्राप्य महाराज्यं तारको मुनिसत्तमाः।
उवाच दानवश्रेष्ठान् युक्तियुक्तमिदं वचः ॥ २९ ॥
इति श्रीमत्स्यपुराणे तारकासुरोपाख्याने षट्चत्वा-
रिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

---

अथ सप्तचत्वारिंशदधिकशततमोऽध्यायः।

तारक उवाच। शृणुध्वमसुराः सर्वे वाक्यं मम महाबलाः।
श्रेयसे क्रियतां बुद्धिः सर्वैः कृत्यस्य सन्निधौ ॥ १ ॥
वंशक्षयकरा देवाः सर्वेषामेव दानवाः।
अस्माकं जातिधर्मो वै विरूढं वैरमक्षयम् ॥ २ ॥
वयमद्य गमिष्यामः सुराणां निग्रहाय तु।

स्वबाहुबलमाश्रित्य सर्व एवमसंशयः ॥ ३ ॥
किन्तु मा तपसा युक्तो मन्येऽहं सुरसङ्गमम् ।
अहमादौ करिष्यामि तपो घोरन्दितेः सुताः ! ॥ ४ ॥
ततः सुरान् विजेष्यामो भोक्ष्यामोऽथ जगत्त्रयम् ।
स्थिरोपायोहि पुरुषः स्थिरश्रीरपि जायते ॥ ५ ॥
रक्षितुं नैव शक्नोति चपलश्चपलाः श्रियः ।
तच्छ्रुत्वा दानवाः सर्वे वाक्यं तस्यासुरस्य तु ॥ ६ ॥
साधु साध्वित्यवोचंस्ते तत्र दैत्याः सविस्मयाः ।
सोऽगच्छत्पारियात्रस्य गिरेः कन्दरमुत्तमम् ॥ ७ ॥
सर्वर्तुकुसुमाकीर्णं नानौषधिविदीपितम् ।
नानाधातुरसस्रावचित्रं नानागुहागृहम् ॥ ८ ॥
गहनैः सर्वतो गूढं चित्रकल्पद्रुमाश्रयम् ।
अनेकाकारबहुलं पृथक् पक्षिकुलाकुलम् ॥ ९ ॥
नानाप्रस्रवणोपेतं नानाविधजलाशयम् ।
प्राप्य तत् कन्दरं दैत्यश्चचार विपुलं तपः ॥ १० ॥
निराहारः पञ्चतपा पत्रभुग्वारिभोजनः ।
शतं शतं समानान्तु तपांस्येतानि सोऽकरोत् ॥११॥
ततः स्वदेहादुत्कृत्य कर्षं कर्षं दिने दिने ।
मांसस्याग्नौ जुहावासौ ततो निर्मांसताङ्गतः ॥ १२ ॥
तस्मिन्निर्मांसतां याते तपोराशित्वमागते ।
जज्वलुः सर्वभूतानि तेजसा तस्य सर्वतः ॥ १३ ॥
उद्विग्नाश्च सुराः सर्वे तपसा तस्य भीषिताः ।
एतस्मिन्नन्तरे ब्रह्मा परमं तोषमागतः ॥ १४ ॥
तारकस्य वरं दातुं जगाम त्रिदशालयात् ।

प्राप्य तं शैलराजानं स गिरेः कन्दरस्थितम् ॥ १५ ॥
उवाच तारकं देवो गिरा मधुरया युतः।
ब्रह्मोवाच। पुत्रालं तपसा तेऽस्तु नास्त्यसाध्यं तवाऽधुना॥१६॥
वरं वृणीष्व रुचिरं यत्ते मनसि वर्त्तते।
इत्युक्तस्तारको दैत्यः प्रणम्यात्मभुवं विभुम् ॥ १७ ॥
उवाच प्राञ्जलिर्भूत्वा प्रणतः पृथुविक्रमः।

तारक उवाच।

देव! भूतमनोवास! वेत्सि जन्तुविचेष्टितम् ॥ १८ ॥
क्षतप्रतिकृताकाङ्क्षी जिगीषुः प्रायशो-जनः।
वयञ्च जातिधर्मेण कृतवैराः सहामरैः ॥ १९ ॥
तैश्च निःशेषिता दैत्याः क्रूरैः सन्त्यज्य धर्मिताम्।
तेषामहं समुद्धर्त्ता भवेयमिति मे मतिः ॥ २० ॥
अवध्यं सर्वभूतानामस्त्राणाञ्च महौजसाम्।
स्यामहं परमो ह्येष वरो मम हृदि स्थितः ॥ २१ ॥
एतन्मे देहि देवेश! नान्यो मे रोचते वरः।
तमुवाच ततो दैत्यं विरिञ्चिः सुरनायकः ॥ २२ ॥
न युज्यन्ते विना मृत्युं देहिनो दैत्यसत्तम!।
यतस्ततोऽपि वरय मृत्युं यस्मान्न शङ्कसे ॥ २३ ॥
ततः सञ्चिन्त्य दैत्येन्द्रः शिशोर्वै सप्तवासरात्।
वव्रे महासुरो मृत्युमवलेपनमोहितः ॥ २४ ॥
ब्रह्मा चास्मै वरं दत्वा यत्किञ्चिन्मनसेप्सितम्।
जगाम त्रिदिवं देवो दैत्योऽपि स्वकमालयम् ॥२५ ॥
उत्तीर्णं तपसस्तं तु दैत्यं दैत्येश्वरास्तथा।
परिवव्रुः सहस्राक्षं दिवि देवगणा यथा ॥ २६ ॥
तस्मिन् महति राजस्य तारके दैत्यनन्दने।

ऋतवो मूर्त्तिमन्तश्च स्वकालगुणसंस्थिताः ॥ २७ ॥
अभवन् किङ्करास्तस्य लोकपालाश्च सर्वशः ।
कान्तिश्च तिष्ठति मेधा: श्रीश्चैवेश्य च दानवम् ॥२८॥
परिवव्रुर्गुणा कीर्णा निश्छिद्राः सर्व एव हि ।
कालागुरुविलिप्ताङ्गं महामुकुटभूषणम् ॥ २९ ॥
रुचिराङ्गदनद्धाङ्गं महासिंहासने स्थितम् ।
वीजयन्त्यप्सरः श्रेष्ठाः भृशं मुञ्चन्ति नैव ताः ॥३०॥
चन्द्रार्कौ दीपमार्गेषु व्यजनेषु च मारुतः ।
कृतान्तोऽग्रे सुरस्तस्य बभूवुर्मुनिसत्तमाः ! ॥ ३१ ॥
एवं प्रयाति काले तु वितते तारकासुरः ।
बभाषे सचिवान् दैत्यः प्रभूतवरदर्पितः ॥ ३२ ॥
तारक उवाच । राजेन्द्र कारणं किं मे त्वनाक्रम्य त्रिविष्टपम् ।
अनिर्याप्य सुरैर्वैरं का शान्तिर्हृदये मम ॥ ३३ ॥
भुञ्जतेऽद्यापि यज्ञांशानमरा नाक एव हि ।
विष्णुः श्रियं न जहाति तिष्ठते च गतभ्रमः ॥ ३४ ॥
स्वस्थाभिः स्वर्गनारीभिः पीयन्तेऽमरवल्लभाः ।
सोत्पला मदिरामोदा दिवि क्रीडावनेषु च ॥ ३५ ॥
लब्ध्वा जन्म न यः कश्चिद्घटयेत्पौरुषं नरः ।
जन्म तस्य वृथा भूतमजन्मा तु विशिष्यते ॥ ३६ ॥
मातापितृभ्यां न करोति कामान्
बन्धूनशोकान् न करोति यो वा ।
कीर्त्तिं हि वामार्जयते हिमाभां
पुमान् स जातोऽपि मृतोमतं मे ॥ ३७ ॥
तस्मात् जयाद्यामरपुङ्गवानां त्रैलोक्यलक्ष्मीहरणाय शीघ्रम् ।

संयोज्यतां मे रथमष्टचक्रं बलञ्च मे दुर्जयदैत्यचक्रम् ।
ध्वजञ्च मे काञ्चनपट्टनद्धं छत्रञ्च मे मौक्तिकजालबद्धम् ॥३८॥
तारकस्य वचः श्रुत्वा ग्रसनो नाम दानवः ।
सेनानीर्दैत्यराजस्य तथा चक्रे बलान्वितः ॥ ३९ ॥
आहत्य भेरीं गम्भीरां दैत्यानाहूय सत्वरः ।
तुरगाणां सहस्रेण चक्राष्टकविभूषितम् ॥ ४० ॥
शुक्लाम्बरपरिष्कारं चतुर्योजनविस्तृतम् ।
नानाक्रीडागृहयुतं गीतवाद्यमनोहरम् ॥ ४१ ॥
विमानमिव देवस्य सुरभर्तुः शतक्रतोः ।
दशकोटीश्वरा दैत्या दैत्यास्ते चण्डविक्रमाः ॥ ४२ ॥
तेषामग्रेसरो जम्भः कुजम्भोऽनन्तरस्ततः ।
महिषः कुञ्जरो मेघः कालनेमिर्निमिस्तथा ॥ ४३ ॥
मथनो जम्भकः शुम्भो दैत्येन्द्रा दश नायकाः ।
अन्येऽपि शतशस्तस्य पृथिवीदलनक्षमाः ॥ ४४ ॥
दैत्येन्द्रा गिरिवर्ष्माणः सन्ति चण्डपराक्रमाः ।
नानायुधप्रहरणा नानाशस्त्रास्त्रपारगाः ॥ ४५ ॥
तारकस्याभवत् केतू रौद्रः कनकभूषणः ।
केतुना मकरेणापि सेनानीर्ग्रसनोऽरिहा ॥ ४६ ॥
पैशाचं यस्य वदनं जम्भस्यासीदयोमयम् ।
खरं विधूतलाङ्गूलं कुजम्भस्याभवद्ध्वजे ॥ ४७ ॥
महिषस्य तु गोमायुः केतौ हैमं तदाभवत् ।
ध्वाङ्क्षं ध्वजे तु शुम्भस्य कृष्णायोमयमुच्छ्रितम् ॥४८॥
अनेकाकारविन्यासाश्चान्येषान्तु ध्वजास्तथा ।

शतेन शीघ्रवेगानां व्याघ्राणां हेममालिनाम् ॥ ४९ ॥
ग्रसनस्य रथो युक्तो किङ्किणीजालमालिनाम् ।
शतेनापि च सिंहानां रथो जम्भस्य दुर्जयः ॥ ५० ॥
कुजम्भस्य रथो युक्तः पिशाचवदनैः खरैः ।
रथस्तु महिषस्योष्ट्रैर्गजस्य तु तुरङ्गमैः ॥ ५१ ॥
मेघस्य द्वीपिभिर्भीमैः कुञ्जरैः कालनेमिनः ।
पर्वताभैः समारूढो निर्मिमत्तैर्महागजैः ॥ ५२ ॥
चतुर्दन्तैर्गन्धवद्भिः शिक्षितैर्मेघभैरवैः ।
शतहस्तायते कृष्णे तुरङ्गैर्हेमभूषणैः ॥ ५३ ॥
सितचामरजालेन शोभिते दक्षिणां दिशम् ।
सितचन्दनचार्वङ्गो नानापुष्पस्रजोज्ज्वलः ॥ ५४ ॥
मथनो नाम दैत्येन्द्रः पाशहस्तो व्यराज्यत ।
जम्भकः किङ्किणीजालमालमुष्ट्रं समास्थितः ॥५५॥
कालशुक्लमहामेषमारूढः शुम्भदानवः ।
अन्येऽपि दानवा वीरा नानावाहनगामिनः ॥५६॥
प्रचण्डचित्रकर्माणः कुण्डलोष्णीषभूषणाः ।
नानाविधोत्तरासङ्गा नानामाल्यविभूषणाः ॥ ५७ ॥
नानासुगन्धिगन्धाढ्या नानावन्दिजनस्तुताः ।
नानावाद्यपरिस्पन्दाद्याग्रेसरमहारथाः ॥ ५८ ॥
नानाशौर्यकथासक्तास्तस्मिन् सैन्ये महासुराः ।
तद्बलं दैत्यसिंहस्य भीमरूपं व्यजायत ॥ ५९ ॥
प्रमत्तचण्डमातङ्गतुरङ्गं रथसङ्कुलम् ।
प्रतस्थेऽमरयुद्धाय बहुपत्तिपताकिनम् ॥ ६० ॥
एतस्मिन्नन्तरे वायुर्निवद्गतोऽम्बरालये ।

दृष्ट्वा स दानवबलं जगामेन्द्रस्य शंसितुम् ॥ ६१ ॥
स गत्वा तु सभां दिव्यां महेन्द्रस्य महात्मनः।
शशंस मध्ये देवानां तत्कार्यं समुपस्थितम् ॥ ६२ ॥
तच्छ्रुत्वा देवराजस्तु निमीलितविलोचनः।
बृहस्पतिमुवाचेदं वाक्यं काले महाभुजः ॥ ६३ ॥
इन्द्र उवाच। संप्राप्नोति विमर्दोऽयं देवानां दानवैः सह।
कार्यं किमत्र तद्ब्रूहि नीत्युपायसमन्वितम् ॥ ६४ ॥
एतच्छ्रुत्वा तु वचनं महेन्द्रस्य गिरांपतिः।
इत्युवाच महाभागो बृहस्पतिरुदारधीः ॥ ६५ ॥
सामपूर्वा स्मृता नीतिश्चतुरङ्गाम्पताकिनीम्।
जिगीषतां सुरश्रेष्ठ ! स्थितिरेषा सनातनी ॥ ६६ ॥
सामभेद स्तथा दानं दण्डश्चाङ्गचतुष्टयम्।
नीतौ क्रमाद्देशकालरिपुयोग्यक्रमादिदम् ॥ ६७ ॥
सामदैत्येषु नैवास्ति यतस्ते लब्धसंश्रयाः।
जातिधर्मेण वा भेद्या दानं प्राप्तश्रिये च किम् ॥६८॥
एकोऽभ्युपायो दण्डोऽत्र भवता यदि रोचते।
दुर्जनेषु कृतं साम महद्याति च बन्ध्यताम् ॥ ६९ ॥
भयादिति व्यवस्यन्ति क्रूराः साम महात्मनाम्।
ऋजुतामार्य्यबुद्धित्वं दयानीतिव्यतिक्रमम् ॥ ७०॥
मन्यन्ते दुर्जना नित्यं साम चापि भयोदयात्।
तस्माद् दुर्जनमाक्रान्तुं श्रेयान् पौरुष संश्रयः ॥७१ ॥
आक्रान्ते तु क्रिया युक्ता सतामेतन्महाव्रतम्।
दुर्जनः सुजनत्वाय कल्पते न कदाचन ॥ ७२ ॥
सुजनोऽपि स्वभावस्य त्यागं वाञ्छेत् कदाचन।

एवं मे बुध्यते बुद्धिर्भवन्तोऽत्र व्यवस्यताम् ॥ ७३ ॥
एवमुक्तः सहस्राक्ष एव मेवेत्युवाच तम् ।
कर्त्तव्यतां स सञ्चिन्त्य प्रोवाचामरसंसदि ॥ ७४ ॥
इन्द्र उवाच । सावधानेन मे वाचं शृणुध्वं नाकवासिनः ।
भवन्तो यज्ञभोक्तारस्तुष्टात्मानोऽतिसात्त्विकाः ॥ ७५ ॥
स्वे महिम्नि स्थिता नित्यं जगतः परिपालकाः ।
भवतश्चानिमित्तेन बाधन्ते दानवेश्वराः ॥ ७६ ॥
तेषां सामादि नैवास्ति दण्ड एव विधीयताम् ।
क्रियतां समरोद्योगः सैन्यं संयुज्यतां मम ॥ ७७ ॥
आद्रियन्तां च शस्त्राणि पूज्यन्तामस्त्रदेवताः ।
वाहनानि च यानानि योजयन्तु सहामराः ॥ ७८ ॥
यमं सेनापतिं कृत्वा शीघ्रमेवं दिवौकसः ।
इत्युक्ताः समनह्यन्त देवानां ये प्रधानतः ॥ ७९ ॥
वाजिनामयुतेनाजौ हेमघण्टापरिष्कृतम् ।
नानाश्चर्यगुणोपेतं संप्राप्तं सर्वदैवतैः ॥ ८० ॥
रथं मातलिना क्लृप्तं देवराजस्य दुर्जयम् ।
यमो महिषमास्थाय सेनाग्रे समवर्त्तत ॥ ८१ ॥
चण्डकिङ्करवृन्देन सर्वतः परिवारितः ।
कल्पकालोद्धतज्वालापूरिताम्बरलोचनः ॥ ८२ ॥
हुताशनश्छागरूढः शक्तिहस्तो व्यवस्थितः ।
पवनोऽङ्कुशपाणिस्तु विस्तारितमहाजवः ॥ ८३ ॥
भुजगेन्द्रसमारूढो जलेशो भगवान् स्वयम् ।
नरयुक्तरथे देवो राक्षसेशो वियच्चरः ॥ ८४ ॥
तीक्ष्णखड्गयुतो भीमः समरे समवस्थितः ।

महासिंहरवो देवो धनाध्यक्षो गदायुधः ॥ ८५ ॥
चन्द्रादित्यावश्विनौ च चतुरङ्गबलान्वितौ ।
राजभिः सहितास्तस्थुर्गन्धर्वा हेमभूषणाः ॥ ८६ ॥
हेमपीटोत्तरासङ्गाश्चित्रवर्मरथायुधाः ।
नाकपृष्ठशिखण्डास्तु वैदूर्य्यमकरध्वजाः ॥ ८७ ॥
जपारक्तोत्तरासङ्गा राक्षसा रक्तमूर्द्धजाः ।
गृध्रध्वजा महावीर्य्या निर्मलायोविभूषणाः ॥८८ ॥
मुसलासिगदाहस्ता रथे चोष्ट्रोपदंशिताः ।
महामेघरवा नागा भीमोल्काशनिहेतयः ॥ ८९ ॥
यक्षाः कृष्णाम्बरभृतो भीमबाणधनुर्द्धराः ।
ताम्रोलूकध्वजा रौद्रा हेमरत्नविभूषणाः ॥ ९० ॥
द्वीपिचर्मोत्तरासङ्गं निशाचरबलं बभौ ।
गार्धपत्रध्वजप्रायमस्थिभूषणभूषितम् ॥ ९१ ॥
मुसलायुधदुष्प्रेक्ष्यं नानाप्राणिमहारवम् ।
किन्नराः श्वेतवसनाः सितपत्रिपताकिनः ॥ ९२ ॥
मत्तेभवाहनप्रायास्तीक्ष्णतोमरहेतयः ।
मुक्ताजालपरिष्कारो हंसो रजतनिर्मितः ॥ ९३ ॥
केतुर्जलाधिनाथस्य भीमधूमध्वजानलः ।
पद्मरागमहारत्नविटपं धनदस्य तु ॥ ९४ ॥
ध्वजं समुच्छ्रितं भाति गन्तुकाममिवाम्बरम् ।
वृकेण काष्ठलोहेन यमस्यासीन्महाध्वजः ॥ ९५ ॥
राक्षसेशस्य केतौ वै प्रेतस्य मुखमाबभौ ।
हेमसिंहध्वजौ देवौ चन्द्रार्कावमितद्युती ॥ ९६ ॥
कुम्भेन रत्नचित्रेण केतुरश्विनयोरभूत् ।

हेममातङ्गरचितं चित्ररत्नपरिष्कृतम् ॥ ९७ ॥
ध्वजं शतक्रतोरासीत् सितचामरमण्डितम् ।
सनागयक्षगन्धर्वमहोरगनिशाचरा ॥ ९८ ॥
सेना सा देवराजस्य दुर्जया भुवनत्रये ।
कोटयस्तास्त्रयस्त्रिंशद्दै वै देव निकायिनाम् ॥ ९९ ॥
हिमाचलाभे सितकर्णचामरे सुवर्णपद्मामलसुन्दरस्रजि ।
कृताभिरागोज्ज्वलकुङ्कुमाङ्कुरेकपोललोलालिकदम्बसङ्कुले ॥ १०० ॥
स्थितस्तदैरावतनामकुञ्जरे महाबलश्चित्रविभूषणाम्बरः ।
विशालवज्रांशुवितानभूषितः प्रकीर्णकेयूरभुजाग्रमण्डलः ।
सहस्रदृक् वन्दिसहस्रसंस्तुत स्त्रिविष्टपेऽशोभत पाकशासनः ॥ १०१ ॥
तुरङ्गमातङ्गबलौघसङ्कुला
सितातपत्रध्वजराजिशालिनी ।
चमूश्च सा दुर्जयपत्तिसन्तता
विभाति नानायुधयोधदुस्तरा ॥ १०२ ॥
इति श्रीमत्स्यपुराणे तारकोपाख्याने सप्तचत्वा
रिंशदधिकशततमोऽध्यायः ।

---

अथाष्टचत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच । सुरासुराणां सम्मर्दस्तस्मिन्नत्यन्तदारुणे ।
तुमुलोऽतिमहानासीत् सेनयो रुभयोरपि ॥ १ ॥
गर्जतां देवदैत्यानां शङ्खभेरीरवेण च ।
तूर्याणाञ्चैव निर्घोषैर्मातङ्गानाञ्च बृंहितैः ॥ २ ॥
हेषतां हयवृन्दानां रथनेमिस्वनेन च ।
ज्याघोषेण च शूराणान्तुमुलोऽतिमहानभूत् ॥ ३ ॥

समासाद्योभये सेने परस्परजयैषिणाम् ।
रोषेणातिपरीतानान्त्यक्तजीवितचेतसाम् ॥ ४ ॥
समासाद्य तु तेऽन्योन्यं प्रक्रमेण विलोमतः ।
रथिनासक्तपादातो रथेन चतुरङ्गमः ॥ ५ ॥
हस्ती पदातिसंयुक्तो रथिना च क्वचिद्रथी ।
मातङ्गेनापरो हस्ती तुरङ्गैर्बहुभिर्गजः ॥ ६ ॥
पदातिरेको बहुभिर्गजैर्मत्तैश्च युध्यते ।
ततः प्रासाश्च निगदाभिन्दिपालपरश्वधैः ॥ ७ ॥
शक्तिभिः पट्टिशैः शूलैर्मुद्गरैः कणपैर्गडैः ।
चक्रैश्च शङ्कुभिश्चैव तोमरैरङ्कुशैः शितैः ॥ ८ ॥
कर्णिकालीकनाराचवत्सदन्तार्द्धचन्द्रकैः ।
भल्लैश्च शतपत्रैश्च शुकतुण्डैश्च निर्म्मलैः ॥ ९ ॥
वृष्टिरत्यद्भुताकारा गगने समदृश्यत ।
संप्रच्छाद्य दिशः सर्वास्तमोमयमिवाकरोत् ॥१० ॥
न प्राज्ञायत तेऽन्योऽन्यं तस्मिंस्तमसि सङ्कुले ।
अलक्ष्यं विसृजन्त स्ते हेतिसङ्घातमुद्धतम् ॥ ११ ॥
पतितं सैनयोर्मध्ये निरीक्षन्ते परस्परम् ।
ततोध्वजैर्भुजैश्छत्रैः शिरोभिश्च सकुण्डलैः ॥ १२ ॥
गजैस्तुरङ्गैः पादातैः पतद्भिः पतितैरपि ।
आकाश सरसी भ्रष्टैः पङ्कजैरिव भूस्तृता ॥ १३ ॥
भग्नदन्ता भिन्नकुम्भाश्छिन्नदीर्घमहाकराः ।
गजाः शैलनिभाः पेतुर्धरण्यां रुधिरस्रवाः ॥ १४ ॥
भग्नेषा दण्डचक्राश्च रथाश्च शकलीकृताः ।
पेतुः शकलतां याताः स्तुरङ्गाश्च सहस्रशः ॥ १५ ॥

ततोऽसृक् कर्द्दमक्लेदा पृथिवी समजायत।
नद्यश्च रुधिरावर्त्ता हर्षदाः पिशिताशिनाम्॥ १६॥
वेतालाक्रीड़मभवत्तत् सङ्कुलरणाजिरम्।
इति श्रीमत्स्यपुराणे तारकासुरोपाख्याने देवासुरयुद्धे
अष्टचत्वारिंशदधिकशततमोऽध्यायः॥ १४८॥

---

अथोनपञ्चाशदधिकशततमोऽध्यायः।

सूत उवाच। अथ ग्रसनमालोक्य यमः क्रोधविमूर्च्छितः।
ववर्ष शरवर्षेण विशिखेनाग्निवर्चसाम्॥ १॥
स विद्धो बहुभिर्बाणैर्ग्रसनोऽतिपराक्रमः।
कृतप्रतिकृताकाङ्क्षी धनुरानम्य भैरवम्॥ २॥
शतैः पञ्चभिरत्युग्रैः शराणां यममर्दयन्।
स विचिन्त्य यमो बाणान् ग्रसनस्यातिपौरुषम्॥ ३॥
बाणवृष्टिभिरुग्राभिर्यमो ग्रसनमर्दयन्।
कृतान्तशरवृष्टिन्तां वियति प्रतिसर्पिणीम्॥ ४॥
चिच्छेद शरवर्षेण ग्रसनो दानवेश्वरः।
विफलां तां समालोक्य यमस्तां शरसन्ततिम्॥ ५॥
स विचिन्त्य शरव्रातं ग्रसनस्य रथं प्रति।
चिक्षेप मुद्गरं घोरन्तरसा तस्य चान्तकः॥ ६॥
स तं मुद्गरमायान्तमुत्प्लुत्य गगनस्थितम्।
जग्राह वामहस्तेन याम्यं दानवनन्दनः॥ ७॥
तमेव मुद्गरं गृह्य यमस्य महिषं रुषा।
पातयामास वेगेन स पपात महीतले॥ ८॥
उत्प्लुत्याथ यमस्तस्मान्महिषान्निष्पतिष्यतः।

प्रासेन ताड़यामास ग्रसनं वदने दृढ़म् ॥ ९ ॥
स तु प्रासप्रहारेण मूर्च्छितो न्यपतद्भुवि।
ग्रसनं पतितं दृष्ट्वा जम्भो भीमपराक्रमः ॥ १० ॥
यमस्य भिन्दिपालेन प्रहारमकरोद्धृदि।
यमस्तेन प्रहारेण सुस्राव रुधिरं मुखात् ॥ ११ ॥
कृतान्तमर्दितं दृष्ट्वा गदापाणिर्धनाधिपः।
वृतो यक्षायुतशतैर्जम्भं प्रत्युद्ययौ रुषा ॥ १२ ॥
जम्भो रुषा तमायान्तं दानवानीकसंवृतः।
उवाच प्राज्ञो वाक्यन्तु यथा स्निग्धेन भाषितम् ॥ १३॥
ग्रसनो लब्धसंज्ञोऽथ यमस्य प्राहिणोद्गदाम्।
मणिहेमपरिष्कारां गुर्वीमरिविमर्दिनीम् ॥ १४ ॥
तामप्रतर्क्यां संप्रेक्ष्य गदां महिषवाहनः।
गदायाः प्रतिघातार्थं जगद्दलनभैरवम् ॥ १५ ॥
दण्डं मुमोच कोपेन ज्वालामालासमाकुलम्।
स गदां वियति प्राप्य ररासाम्बुधरो यथा ॥ १६ ॥
सङ्घट्टमभवत्ताभ्यां शैलाभ्यामिव दुःसहम्।
ताभ्यां निष्पेषनिर्ह्रादजड़ीकृतदिगन्तरम् ॥ १७॥
जगद्व्याकुलतां यातं प्रलयागमशङ्कया।
क्षणात् प्रशान्तनिह्रादं ज्वलदुल्कासमाचितम् ॥१८॥
निष्पेषेण तयोर्भीममभूद्गगनगोचरम्।
निहत्याथ गदां दण्डस्ततोऽग्रसनमूर्द्धनि ॥ १९ ॥
कृत्वा श्रियमिवानर्थो दुर्हृत्तस्यापतद्दृढः।
स तु तेन प्रहारेण दृष्ट्वा सतिमिरा दिशः ॥ २० ॥
पपात भूमौ निःसंज्ञो भूमिरेणुविभूषितः।

ततो हाहारवो घोरः सेनयोरुभयोरभूत् ॥ २१ ॥
ततो मुहूर्त्तमात्रेण ग्रसनः प्राप्य चेतनाम् ।
अपश्यत् स्वान्तनुं ध्वस्तां विलोलाभरणाम्बराम्॥२२॥
स चापि चिन्तयामास कृते प्रतिकृतिक्रियाम् ।
मद्विधे वस्तुनि पुंसि प्रभोः परिभवोदयात् ॥ २३ ॥
मय्याश्रितानि सैन्यानि जिते मयि विनाशिता ।
असम्भावित एवास्तु मनःस्वच्छन्दचेष्टितः ॥ २४ ॥
न तु व्यर्थगतोद्घुष्टसम्भावितधनो नरः ।
एवं सञ्चिन्त्य वेगेन समुत्तस्थौ महाबलः ॥ २५ ॥
मुद्गरं कालदण्डाभं गृहीत्वा गिरिसन्निभः ।
ग्रसनो घोरसङ्कल्पः सन्दष्टौष्ठपुटच्छदः ॥ २६ ॥
रथेन त्वरितो गच्छन्नाससादान्तकं रणे ।
समासाद्य यमं युद्धे ग्रसनो भ्राम्य मुद्गरम् ॥ २७ ॥
वेगेन महता रौद्रश्चिक्षेप यममूर्द्धनि ।
विलोक्य मुद्गरं दीप्तं यमः सम्भ्रान्तलोचनः ॥ २८ ॥
वञ्चयामास दुर्द्धर्षं मुद्गरं स महाबलः ।
तस्मिन्नपसृते दूरं चण्डानां भीमकर्मणाम् ॥ २९ ॥
याम्यानां किङ्कराणान्तु सहस्रं निष्पिपेष ह ।
ततस्तां निहतां दृष्ट्वा घोरां किङ्करवाहिनीम् ॥३०॥
अगमत् परमं क्षोभं नानाप्रहरणोद्यतः ।
ग्रसनस्तु समालोक्य तां किङ्करमयीञ्चमूम् ॥ ३१ ॥
मेने यमसहस्राणि सृष्टानि यममायया ।
निगृह्य ग्रसनः सेनां विसृजन्नस्त्रवृष्टयः ॥ ३२ ॥
कल्पान्तघोरसंकाशो बभूवक्रोधमूर्च्छितः ।

कांश्चिद्बिभेद शूलेन कांश्चिद्बाणैरजिह्मगैः ॥ ३३ ॥
कांश्चित्पिपेष गदया कांश्च मुद्गरवृष्टिभिः।
केचित्प्रासप्रहारैश्च दारुणैस्ताडिता मृदा ॥ ३४ ॥
अपरे बहुशस्तस्य ललम्बुर्बाहुमण्डले।
शिलाभिरपरे जघ्नुर्द्रुमैरन्यैर्महोच्छ्रयैः ॥ ३५ ॥
तस्यापरे तु गात्रेषु दशनैरपि दंशयन्।
अपरे मुष्टिभिः पृष्ठं किङ्कराः प्रहरन्ति च ॥ ३६ ॥
अभिद्रुतस्तथा घोरैर्घसनः क्रोधमूर्च्छितः।
उत्सृज्य गात्रं भूपृष्ठे निष्पिपेष सहस्रशः ॥ ३७ ॥
कांश्चिदुत्थाय मुष्टीभिर्जघ्ने किङ्करसंश्रयान्।
स तु किङ्करयुद्धेन घसनः श्रममाप्तवान् ॥ ३८ ॥
तमालोक्य यमः श्रान्तं निहताञ्च स्ववाहिनीम्।
आजगाम समुद्यम्य दण्डं महिषवाहनः ॥ ३९ ॥
घसनस्तु समायान्तमाजघ्ने गदयोरसि।
अचिन्तयित्वा तत्कर्म घसनस्यान्तकोऽरिहा ॥४० ॥
जघ्ने रथस्य मूर्द्धन्यान् व्याघ्रान् दण्डेन कोपनः।
स रथो दण्डमथितैर्व्याघ्रैर्रुद्धैर्विकृष्यते ॥ ४१ ॥
संशयः पुरुषस्येव चित्तं दैत्यस्य तद्रथम्।
समुत्सृजत् रथं दैत्यः पदातिर्धरणीं गतः ॥ ४२ ॥
यमं भुजाभ्यामादाय योधयामास दानवः।
यमोऽपि शस्त्राण्युत्सृजत् बाहुयुद्धे प्रवर्त्तत ॥ ४३ ॥
घसनः कटिवस्त्रेषु यमं गृह्य बलोद्धतः।
भ्रामयामास वेगेन प्रचित्तमिव संभ्रमन् ॥ ४४ ॥
यमोऽपि कण्ठेऽवष्टभ्य दैत्यं बाहुयुगेन तु।

वेगेन भ्रामयामास समुत्क्षिप्य महीतलात् ॥ ४५ ॥
ततो मुष्टिभिराजघ्नुरन्योन्यं तौ परस्परम् ।
दैत्यस्यातिकायत्वात्ततः श्रान्तभुजो यमः ॥ ४६ ॥
स्कन्धे निधाय दैत्यस्य मुखं विश्रान्तिमैच्छत ।
तमालक्ष्य ततो दैत्यः श्रान्तमन्तकमोजसा ॥ ४७ ॥
निष्पिपेष महीपृष्ठे बहुशः पार्ष्णिपाणिभिः ।
यावद्यमस्य वदनात् सुस्राव रुधिरं बहु ॥ ४८ ॥
निर्जीवितं यमं दृष्ट्वा ततः सन्त्यज्य दानवः ।
जयं प्राप्योद्धतं दैत्यो नादं मुक्त्वा महास्वनः ॥४९॥
स्वयं सैन्यं समासाद्य तस्थौ गिरिरिवाचलः ।
धनाधिपस्य जम्भेन सायकैर्मर्मभेदिभिः ॥ ५० ॥
दिशोऽवरुद्धाः क्रुद्धेन सैन्यं चास्य निकृन्तितम् ।
ततः क्रोधपरीतस्तु धनेशो जम्भदानवम् ॥५१॥
हृदि विव्याध बाणानां सहस्रेणाग्निवर्चसाम् ।
सारथिञ्च शतेनाजौ ध्वजं दशभिरेव च ॥५२॥
हस्तौ च पञ्चसप्तत्या मार्गणैर्दशभिर्धनुः ।
मार्गणैर्बर्हिपत्राढ्यैः स्वर्णधौतैरजिह्मगैः ॥ ५३ ॥
सिंहमेकेन तं तीक्ष्णैर्विव्याध दशभिः शरैः ।
जम्भस्य कर्म तद्दृष्ट्वा धनेशस्यातिदुष्करम् ॥ ५४ ॥
हृदि धैर्यं समालम्ब्य किञ्चित् सन्त्रस्तमानसः ।
जग्राह निशितान् बाणान् शतशो मर्मविभेदिनः ॥५५॥
आकर्णाकृष्टचापस्तु जम्भः क्रोधपरिप्लुतः ।
विव्याध धनदं तैस्तैः शरैर्वक्षसि दानवः ॥ ५६ ॥
सारथिं चास्य बाणेन दृढेनाभ्यहनद्धृदि ।

चिच्छेद जगामथैकेन तैलधौतेन दानवः ॥ ५७ ॥
ततस्तु निशितैर्बाणैर्दारुणैर्मर्मभेदिभिः।
विव्याधोरसि वित्तेशं दशभिः क्रूरकर्मभिः ॥ ५८ ॥
मोहं परमतो गच्छन् दृढविद्धोहि वित्तपः।
स क्षणाद्धैर्यमालम्ब्य धनुराकृष्य भैरवम् ॥ ५९ ॥
किरन् बाणसहस्राणि निशितानि धनाधिपः।
दिशः खं विदिशो भूमीरनीकान्यसुरस्य च ॥ ६० ॥
पूरयामास वेगेन संच्छाद्य रविमण्डलम्।
जम्भोऽपि परमेकैकं शरैर्बहुभिराहवे ॥ ६१ ॥
चिच्छेद लघुसन्धानो धनेशस्यातिपौरुषात्।
ततो धनेशः संक्रुद्धो दानवेन्द्रस्य कर्म्मणा ॥ ६२ ॥
व्यधमत्तस्य सैन्यानि नानाशायकवृष्टिभिः।
तद्दृष्ट्वा दुष्कृतं कर्म्म धनाध्यक्षस्य दानवः॥ ६३ ॥
गृहीत्वा मुद्गरं भीममायसं हेमभूषितम्।
धनदानुचरान्यक्षान् निष्पिपेष सहस्रशः ॥ ६४ ॥
ते बध्यमाना दैत्येन मुञ्चन्तो भैरवान् रवान्।
रथं धनपतेः सर्वे परिवार्य्य व्यवस्थिताः ॥ ६५ ॥
दृष्ट्वा तानर्दितान् देवः शूलं जग्राह दारुणम्।
तेन दैत्यसहस्राणि सूदयामास सत्वरः ॥ ६६ ॥
क्षीणभागेषु दैत्येषु दानवः क्रोधमूर्च्छितः।
जग्राह परशुं दैत्यो मर्द्दनं दैत्यविद्विषाम् ॥ ६७ ॥
स तेन सितधारेण धनभर्तुर्म्महारणम्।
चिच्छेद तिलशो दैत्यो शाखुः स्निग्धमिवाम्बरम् ॥ ६८ ॥
पदाति रथ त्रिशिरो गदा मादाय भैरवीम्।

महाहवविमर्देषु दृष्टप्रत्ययविक्रमाम् ॥ ६९ ॥
अधृष्यां सर्वभूतानां बहुवर्षगणार्चिताम् ।
नानाचन्दनदिग्धाङ्गां दिव्यपुष्पविवासिताम् ॥ ७० ॥
निर्मलायोमयीं गुर्वीममोघां हेमभूषणाम् ।
चिक्षेप मूर्ध्नि संक्रुद्धो जम्भस्य तु धनाधिपः ॥ ७१ ॥
आयान्तीं तां समालोक्य तडित्सङ्घातमण्डिताम् ।
दैत्यो गदाभिघातार्थं शस्त्रवृष्टिं मुमोच ह ॥ ७२ ॥
चक्राणि कोणपः प्रासान् भुशुण्डीः पट्टिशानपि ।
हेमकेयूरनद्धाभ्यां बाहुभ्यां चण्डविक्रमः ॥ ७३ ॥
व्यर्थीकृत्य तु तान् सर्वानायुधान् दैत्यवक्षसि ।
प्रस्फुरन्ती पपातोग्रा महोल्केवाद्रिकन्दरे ॥ ७४ ॥
गदयाभिहतो गाढं पपात रथकूवरे ।
स्रोतोभिश्चास्य रुधिरं सुस्राव गतचेतसः ॥ ७५ ॥
जम्भन्तु निहतं मत्वा कुजम्भो भैरवस्वनः ।
धनाधिपस्य संक्रुद्धो वाक्येनातीव कोपितः ॥ ७६ ॥
चक्रे बाणमयं जालं दिक्षु यक्षाधिपस्य तु ।
चिच्छेद बाणजालं तदर्द्धचन्द्रैः शितैस्ततः ॥ ७७ ॥
मुमोच शरवृष्टिन्तु तस्य यक्षाधिपो बली ।
स तं दैत्यः शरव्रातं चिच्छेद निशितैः शरैः ॥ ७८ ॥
व्यर्थीकृतान्तु तां दृष्ट्वा शरवृष्टिं धनाधिपः ।
शक्तिं जग्राह दुर्द्धर्षां हेमघण्टाट्टहासिनीम् ॥ ७९ ॥
बाहुना रत्नकेयूरकान्तिसन्तानहासिना ।
स तां निष्कृष्य वेगेन कुजम्भाय मुमोच ह ॥ ८० ॥
स कुजम्भस्य हृदयं दारयामास दारुणा ।

विक्तोभ्यः स्वल्पसत्वस्य पुरुषस्यातिभाविता ॥ ८१ ॥
अथास्य हृदयं भित्वा जगाम धरणीतलम्।
ततो मुहूर्तादस्वस्थो दानवो दारुणाकृतिः ॥ ८२ ॥
जग्राह पत्त्रिणं दैत्यः प्रांशुं शितशिलीमुखम्।
स तेन पत्त्रिणाजौ धनदस्य स्तनान्तरम् ॥ ८३ ॥
वाक्येन तीक्ष्णरूपेण मर्मान्तरविसर्पिणा।
निर्बिभेदाभिजातस्य हृदयं दुर्जनो यथा ॥ ८४ ॥
तेन पत्त्रिप्रघातेन धनेशः परिमूर्छितः।
निपपात रथोपस्थे जर्जरो धूर्वहो यथा ॥ ८५ ॥
तथागतन्तु तं दृष्ट्वा धनेशं नरवाहनम्।
खड्गास्त्रो निर्ऋतिर्देवो निशाचरबलानुगः ॥ ८६ ॥
अभिदुद्राव वेगेन कुजम्भं भीमविक्रमम्।
अथ दृष्ट्वा तु दुर्धर्षं कुजम्भो राक्षसेश्वरम् ॥ ८७ ॥
चोदयामास सैन्यानि राक्षसेन्द्रवधं प्रति।
स दृष्ट्वा चोदितां सेनां भग्ननानास्त्रभीषणाम् ॥ ८८ ॥
रथादाप्लुत्य वेगेन भूषणद्युतिभास्वरः।
खड्गेन कमलानीव विकोशेनाम्बरत्विषा ॥ ८९ ॥
चिच्छेद रिपुवक्त्राणि विचित्राणि समन्ततः।
तिर्यक् पृष्ठमधश्चोर्द्धं दीर्घबाहुर्महासिना ॥ ९० ॥
सन्दष्टौष्ठपुटाटोपभ्रूकुटीविकटाननः।
प्रचण्डकोपरक्ताक्षो न्यक्रन्तद्दानवान् रणे ॥ ९१ ॥
ततो निःशेषित प्रायां विलोक्य स्वामनीकिनीम्।
मुक्त्वा कुजम्भो धनदं राक्षसेन्द्र मभिद्रवत् ॥ ९२ ॥

लब्धसंज्ञोऽथ जम्भस्तु धनाध्यक्षपदानुगान् ।
जीवग्राहान् स जग्राह बध्वापाशैः सहस्रशः ॥९३॥
मूर्तिमन्ति तु रत्नानि विविधानि च दानवाः ।
वाहनानि च दिव्यानि विमानानि सहस्रशः ॥९४॥
धनेशो लब्धसंज्ञोऽथ तामवस्थां विलोक्य तु ।
निश्वसन् दीर्घमुष्णञ्च रोषात् ताम्रविलोचनः ॥९५॥
ध्यात्वास्त्रं गारुडन्दिव्यं बाणं सन्धाय कार्मुके ।
मुमोच दानवानीके तं बाणं शत्रुदारणम् ॥ ९६ ॥
प्रथमङ्कार्मुकात्तस्य निश्चेरु र्धूमराजयः ।
अनन्तरं स्फुलिङ्गानां कोटयो दीप्तवर्चसाम् ॥९७॥
ततो ज्वालाकुलं व्योम चकारास्त्रं समन्ततः ।
ततः क्रमेण दुर्वारं नानारूपं तदाभवत् ॥ ९८ ॥
अमूर्तश्चाभवल्लोकोह्यन्धकारसमावृतः ।
ततोऽन्तरिक्षे शंसन्ति तेजस्ते तु परिष्कृतम् ॥९९ ॥
कुजम्भ स्तत्समालोच्य दानवोऽतिपराक्रमः ।
अभिदुद्राव वेगेन पदातिर्धनदं नदन् ॥ १०० ॥
अथाभिमुखमायान्तं दैत्यं दृष्ट्वा धनाधिपः ।
बभूव संभ्रमाविष्टः पलायनपरायणः ॥ १०१ ॥
ततः पलायतस्तस्य मुकुटं रत्नमण्डितम् ।
पपात भूतले दीप्तं रविबिम्बमिवाम्बरात् ॥ ९२ ॥
शूराणा मभिजातानां भर्तर्यपसृते रणात् ।
भर्तुः संग्रामशिरसि युक्तान्तश्शूपणायतः ॥ १०३ ॥
इति व्यवस्य दुर्धर्षा नानाशस्त्रास्त्रपाणयः ।
युयुत्सवः स्थिता यत्रा मुकुटं परिवार्य तम् ॥ १०४ ॥

अभिमानधना वीरा धनदस्य पदानुगाः ।
तानमर्षाच्च संप्रेक्ष्य दानवाश्चण्डपौरुषाः ॥ १०५ ॥
भुशुण्डीं भैरवाकारां गृहीत्वा शैलगौरवाम् ।
रथिर्गी मुकुटस्याथ निक्षिपेष निशाचरान् ॥ १०६ ॥
तान् प्रमथ्याथ दनुजो मुकुटस्तत् स्वके रथे ।
समारोप्यामररिपुर्जित्वा धनदमाहवे ॥ १०७ ॥
धनानि रत्नानि च मूर्तिमन्ति
तथा निधानानि शरीरिणश्च ।
आदाय सर्वाणि जगाम दैत्यो
जम्भः स्वसैन्यन्दनुजेन्द्रसिंहः ।
धनाधिपो वै विनिकीर्णमूर्धजो
जगाम दीनः सुरभर्तुरन्तिकम् ॥ १०८ ॥
कुजम्भ नाथ संसक्तो रजनीचरनन्दनः ।
मायाममोघामाश्रित्य तामसीं राक्षसेश्वरः ॥ १०९ ॥
मोहयामास दैत्येन्द्रं जगत् कृत्वा तमोमयम् ।
ततो विफलनेत्राणि दानवानां दलानि तु ॥ ११० ॥
नशेकुश्चलितुन्तत्र पदादपि पदन्तदा ।
ततो नानास्त्रवर्षेण दानवानां महाचमूम् ॥ १११ ॥
जघान घननीहारतिमिरासुरवाहनाम् ।
बध्यमानेषु दैत्येषु कुजम्भे मूढचेतसि ॥ ११२ ॥
महिषो दानवेन्द्रस्तु कल्पान्ताम्भोदसन्निभः ।
अस्त्रञ्चकार सावित्रं मुल्कासङ्घातमण्डितम् ॥ ११३ ॥
विजृम्भत्यथ सावित्रे परमास्त्रे प्रतापिनि ।
प्रणाशमगमत्तीव्रं तमोघोरं भनन्तरम् ॥ ११४ ॥

ततोऽस्त्रं विस्फुलिङ्गाङ्कं तमः क्षतस्तं व्यनाशयत् ।
प्रफुल्लारुणपद्माभं शरदीवामलं सरः ॥ ११५ ॥
ततस्तमसि संभ्रान्ता दैत्येन्द्राः प्राप्तचक्षुषः ।
चक्रुः क्रूरेण मनसा देवानीकैः सहाद्भुतम् ॥ ११६ ॥
शस्त्रैरमर्षनिर्मुक्तैर्भुजङ्गास्त्रं विनोदितम् ।
अथादाय धनुर्घोरमिषूंश्चाशीविषोपमान् ॥ ११७ ॥
कुजम्भोऽधावत क्षिप्रं रक्षोराजबलम्प्रति ।
राक्षसेन्द्रस्तमायान्तं विलोक्य स पदानुगः ॥ ११८ ॥
विव्याध निशितैर्बाणैः क्रूराशीविषभीषणैः ।
तदादानस्य सन्धानं न मोक्षश्चापि लक्ष्यते ॥ ११९
चिच्छेदास्य शरव्रातान् स्वशरैरतिलाघवात् ।
ध्वजं परमतीक्ष्णेन चित्रकर्मा महाद्विषः ॥ १२० ॥
सारथिञ्चास्य भल्लेन रथनीडात् पातयत् ।
कुजम्भः कर्म तद् दृष्ट्वा राक्षसेन्द्रस्य संयुगे ॥ १२१ ॥
रोषरक्तेक्षणयुतो रथादाप्लुत्य दानवः ।
खड्गं जग्राह वेगेन शरदम्बरनिर्मलम् ॥ १२२ ॥
चर्म चोदयखण्डेन्दुदशकेन विभूषितम् ।
अभ्यद्रवद्रणे दैत्यो रक्षोऽधिपतिमोजसा ॥ १२३ ॥
तं रक्षोऽधिपतिः प्राप्तं मुद्गरेणाहनद्धृदि ।
स तु तेन प्रहारेण क्षीणः संभ्रान्तमानसः ॥ १२४ ॥
तस्थावचेष्टो दनुजो यथा धीरो धराधरः ।
स मुहूर्तं समाश्वस्तो दानवेन्द्रोऽतिदुर्जयः ॥ १२५ ॥
रथमारुह्य जग्राह रक्षोवामकरेण तु ।
केशेषु निर्ऋतिं दैत्यो जानुनाक्रम्यधिष्ठितम् ॥ १२६ ॥

ततः खड्गेन च शिरश्छेत्तु मैच्छदमर्षणः।
तस्मिन् तदन्तरे देवो वरुणोऽपांपतिर्द्रुतम्॥ १२७॥
पाशेन दानवेन्द्रस्य बबन्ध च भुजद्वयम्।
ततो बद्धभुजं दैत्यं विफलीकृतपौरुषम्॥ १२८॥
ताडयामास गदया दया मुत्सृज्य पाशधृक्।
स तु तेन प्रहारेण स्रोतोभिः क्षतजं वमन्॥ १२९॥
दधार रूपं मेघस्य विद्युन्मालालतावृतम्।
तदवस्थागतं दृष्ट्वा कुजम्भं महिषासुरः॥ १३०॥
व्यावृत्तवदने गाधे पक्ष्म मैच्छत् सुरा वुभौ।
निर्ऋतिं वरुणञ्चैव तीक्ष्णदंष्ट्रोत्कटाननः॥ १३१॥
तावभिप्रायमालक्ष्य तस्य दैत्यस्य दूषितम्।
त्यक्त्वा रथपथं भीतौ महिषस्याग्निरंहसा॥ १३२॥
भग्नं द्रुतौ जवाद्दिग्भ्या शुभाभ्यां भयविह्वलौ।
जगाम निर्ऋतिः क्षिप्रं शरणं पाकशासनम्॥१३३॥
क्रुद्धस्तु महिषो दैत्यो वरुणं समभिद्रुतः।
तमन्तकमुखासक्त मालोक्य हिमवद्द्युतिः॥ १३४॥
चक्रे सोमास्त्रनिसृष्टं हिमसङ्घातकण्टकम्।
वायव्यं चास्त्रमतुलं चन्द्रश्चक्रे द्वितीयकम्॥ १३५॥
वायुना तेन चन्द्रेण सं शुष्केण हिमेन च।
व्यथिता दानवाः सर्वे शीतोच्छिन्ना विपौरुषाः॥१३६॥
नशेकुश्चलितुं पद्मां नास्त्राण्यादातु मेव च।
महाहिमनिपातेन शस्त्रैश्चन्द्रप्रचोदितैः॥ १३७॥
गात्राण्यसुरसैन्यानामदह्यन्त समन्ततः।
महिषो निष्प्रयत्नस्तु शीतेनाकम्पिताननः॥ १३८॥

वेत्तोवालम्ब्य पाणिभ्या मुपविष्टो ह्यधोमुखः।
सर्वे ते निष्प्रतीकारा दैत्याश्चन्द्रमसा जिताः ॥१३६॥
रणेच्छां दूरतस्त्यक्त्वा तस्थुस्ते जीवितार्थिनः।
तत्राब्रवीत् कालनेमिर्दैत्यान् कोपेन दीपितः ॥ १४० ॥
भो भोः शृङ्गारिणः शूराः! सर्वे! शस्त्रास्त्रपारगाः।
एकैकोऽपि जगत्सर्वं शक्तस्तुलयितुं भुजैः ॥ १४१ ॥
एकैकोऽपि क्षमोऽत्तुं जगत्सर्वं चराचरम्।
एकैकस्यापि पर्याप्ता न सर्वेऽपि दिवौकसः ॥ १४२ ॥
कलां पूरयितुं यत्नात् षोडशीमतिविक्रमाः।
किं प्रयाताश्च तिष्ठध्वं समरेऽमरनिर्जिताः ॥ १४३ ॥
न युक्तमेतच्छूराणां विशेषा दैत्यजन्मनाम्।
राजा चास्त्वरितोऽस्माकं तारको लोकमारकः ॥१४४॥
विरतानां रणादस्मात् क्रुद्धः प्राणान् हरिष्यति।
शीतेन नष्टस्मृतयो भ्रष्टवाक् पाटवास्तथा ॥ १४५ ॥
मूकास्तदाभवन् दैत्या रणदशनपङ्क्तयः।
तान् दृष्ट्वा नष्टचेतस्कान् दैत्यान् शीतेन सादितान् ॥ १४६॥
मत्वा कालक्षमं कार्यं कालनेमिर्महासुरः।
आश्रित्य दानवीं मायां वितत्य स्वं महावपुः ॥१४७॥
पूरयामास गगनं दिशो विदिश एव च।
निर्ममे दानवेन्द्रेणः शरीरे भास्करायुतम् ॥ १४८ ॥
दिशश्च मायया चण्डैः पूरयामास पावकैः।
ततो ज्वालाकुलं सर्वं त्रैलोक्यमभवत् क्षणात् ॥१४९॥
तेन ज्वालासमूहेन हिमांशुरगमत्क्लमम्।
ततः क्रमेण विभ्रष्टशीतदुर्दिनमावभौ ॥ १५० ॥

तद्बलं दानवेन्द्राणां मायया कालनेमिनः ।
तद्दृष्ट्वा दानवानीकं लब्धसंज्ञं दिवाकरः ॥ १५१ ॥
उवाचारुणमुद्भ्रान्तकोपाङ्गोत्कैकलोचनः ।
दिवाकर उवाच । नयारुणरथं शीघ्रं कालनेमिरथोऽयतः ॥१५२॥
विमर्दस्तत्र विषमो भविता शूरसंक्षयः ।
एषोऽजितः पराक्रोऽत्र तद्बलं बलमाश्रितम् ॥१५३॥
इत्युक्तश्चोदयामास रथं गरुडपूर्वजः ।
प्रयत्नविधृतैरश्वैः सितचामरमालिभिः ॥ १५४ ॥
जगद्दीपोऽथ भगवान् जग्राह विततं धनुः ।
शरौ च द्वौ महाभागौ दिव्यावाशीविषद्युती ॥१५५॥
सञ्चारास्त्रेण सन्धाय बाणमेकं ससर्ज सः ।
द्वितीयमिन्द्रजालेन योजितं प्रमुमोच ह ॥ १५६ ॥
सञ्चारास्त्रेण रूपाणां चणाच्चक्रे विपर्ययम् ।
देवानां दानवं रूपं दानवानाञ्च दैविकम् ॥१५७॥
मत्वा सुरान् स्वकानेव जघ्ने घोरास्त्रलाघवात् ।
कालनेमीरुषाविष्टः कृतान्त इव संक्षये ॥ १५८ ॥
कांश्चित् खड्गेन तीक्ष्णेन कांश्चिन्नाराचवृष्टिभिः ।
कांश्चिद् गदाभिर्घोराभिः कांश्चिद् घोरैः परश्वधैः ॥१५९॥
शिरांसि केषाञ्चिदपातयच्च
भुजान् रथान् सारथींश्चोग्रवेगः ।
कांश्चित् पिपेषाथ रथस्य वेगात्
कांश्चित् क्रुधा चोद्धतमुष्टिपातैः ॥ १६० ॥
रणे विनिहतान् दृष्ट्वा नेमिः स्वान् दानवाधिपः ।
रूपं स्वनं प्रपद्यन्त ह्यसुराः सुरधर्षिताः ॥ १६१ ॥

कालनेमी रुषाविष्टस्तेषां रूपं न बुद्धवान् ।
नेमिर्दैत्यस्तु तान् दृष्ट्वा कालनेमिमुवाच ह ॥१६२॥
अहं नेमिः सुरो नैव कालनेमे ! विदस्व माम् ।
भवता मोहितेनाजौ निहता भूरिविक्रमाः ॥ १६३॥
दैत्यानां दशलक्षाणि दुर्जयानां सुरैरिह ।
सर्वास्त्रवारणं मुञ्च ब्राह्ममस्त्रं त्वरान्वितः ॥ १६४ ॥
स तेन बोधितो दैत्यः सम्भ्रमाकुलचेतनः ।
योजयामास बाणं हि ब्रह्मास्त्रविहितेन तु ॥ १६५ ॥
मुमोच चापि दैत्येन्द्रः स स्वयं सुरकण्टकः ।
ततोऽस्त्रतेजसा व्याप्तं त्रैलोक्यं स चराचरम् ॥१६६॥
देवानां चाभवत् सैन्यं सर्वमेव भयान्वितम् ।
सञ्चराच्च संग्रान्तं स्वयमाग्नेयनं बभौ ॥ १६७ ॥
तस्मिन् प्रतिहते ह्यस्त्रे भ्रष्टतेजा दिवाकरः ।
महेन्द्रजालमाश्रित्य चक्रे स्वां कोटिशस्तनुम् ॥ १६८॥
विस्फूर्जत्करसम्पातसमाक्रान्तजगत्त्रयम् ।
ततापं दानवानीकं गतमज्जास्थिशोणितम् ॥ १६९ ॥
ततश्चावर्षदनलं समन्तादतिसंहतम् ।
चक्षूंषि दानवेन्द्राणां चकारान्धानि च प्रभुः ॥ १७०॥
गजानामगलन्मेदः पेतुश्चाप्यरवा भुवि ।
तुरगा निश्वसन्तश्च घर्मार्त्ता रथिनोऽपि च ॥ १७१ ॥
इतश्चेतश्च सलिलं प्रार्थयन्तस्तृषातुराः ।
प्रच्छायविटपांश्चैव गिरीणां गह्वराणि च ॥१७२॥
दावाग्निः प्रज्वलंश्चैव घोराचिर्दग्धपादपः ।
तोयार्थिनः पुरो दृष्ट्वा तोयं कल्लोलमालितम् ॥१७३ ॥

पुरस्थितमपि प्राप्तुं न शेकुरवमर्दिताः ।
अप्राप्य सलिलं भूमौ व्यात्तास्यागतचेतसः ॥ १७४॥
तत्र तत्र व्यदृश्यन्त मृता दैत्येश्वरा भुवि ।
रथे गजाश्च पतितास्तुरगाश्च समापिताः ॥ १७५ ॥
स्थिता वमन्तो धावन्तो गलद्रक्तवसास्रजः ।
दानवानां सहस्राणि व्यदृश्यन्त मृतानि तु ॥१७६॥
सङ्क्षये दानवेन्द्राणां तस्मिन्महति वर्तिते ।
प्रकोपोद्भूतताम्राक्षः कालनेमिरुषातुरः ॥ १७७ ॥
अभवत्कल्पमेघाभः स्फुरद्भूरिगतच्छदः ।
गम्भीरास्फोटनिर्ह्रादजगद्धृदयघट्टकः ॥ १७८ ॥
प्रच्छाद्य गगनाभोगं रश्मिमायां व्यनाशयत् ।
शीतं ववर्ष सलिलं दानवेन्द्रबलं प्रति ॥ १७९ ॥
दैत्यास्तां वृष्टिमासाद्य समाश्वस्तास्ततः क्रमात् ।
बीजाङ्कुरा इवाम्लाना: प्राप्य वृष्टिं धरातले ॥ १८०॥
ततः स मेघरूपी तु कालनेमिर्महासुरः ।
शस्त्रवृष्टिं ववर्षोग्रां देवानीकेषु दुर्जयः ॥ १८१ ॥
तया वृष्ट्या बाध्यमाना दैत्येन्द्राणां महौजसाम् ।
गतिं काञ्चन पश्यन्तो गावः शीतार्दिता इव ॥१८२॥
परस्परं व्यलीयन्त पृष्ठेषु व्यस्तपाणयः ।
केचित्सुबाधे व्यलीयन्त गजेषु तुरगेषु च ॥ १८३ ॥
रथेषु त्वमरास्त्रस्ता यत्र तत्र निलिल्यिरे ।
अपरे कुञ्चितैर्गात्रैः स्वहस्तपिहिताननाः ॥ १८४ ॥
इतश्चेतश्च सम्भ्रान्ता बभ्रमुर्वै दिशो दश ।
एवं विधे तु संग्रामे तुमुले देवसंक्षये ॥ १८५ ॥

हयास्ते पतिता भूमौ शस्त्रभिन्नाङ्गसन्धयः ।
विभुजा भिन्नमूर्धानस्तथाच्छिन्नोरुजानवः ॥ १८६ ॥
विपर्यस्तरथा सङ्गा निष्पिष्टध्वजपंक्तयः ।
निर्भिन्नाङ्गैस्तुरङ्गैस्तु गजैश्चाचलसन्निभैः ॥ १८७ ॥
सृतरक्तह्रदैर्भूमिर्विकृताऽविकृता बभौ ।
एवमाजौ बलो दैत्यः कालनेमिर्महासुरः ॥ १८८ ॥
जघ्ने मुहूर्त्तमात्रेण गन्धर्वाणां दशायुतम् ।
यक्षाणां पञ्चलक्षाणि रक्षसामयुतानि षट् ॥ १८९ ॥
त्रीणि लक्षाणि जघ्ने स किन्नराणां तरस्विनाम् ।
जघ्ने पिशाचमुख्यानां सप्तलक्षाणि निर्भयः ॥ १९० ॥
इतरेषामसंख्याताः सुरजातिनिकायिनाम् ।
जघ्ने स कोटीः संक्रुद्धस्त्विनाश्वै रथकोविदः ॥ १९१ ॥
एवं परिभवे भीमे तदा त्वमरसङ्क्षये ।
संक्रुद्धावश्विनौ देवौ चित्राङ्ककवचोज्ज्वलौ ॥ १९२ ॥
जघ्नतुः समरे दैत्यं कृतान्तानलसन्निभम् ।
तमासाद्य रणे घोरमेकैकः षष्टिभिः शरैः ॥ १९३ ॥
जघ्ने मर्मसु तीक्ष्णाग्रैरसुरं भीमदर्शनम् ।
ताभ्यां वाणप्रहारैः स किञ्चिदायस्तचेतनः ॥१९४॥
जग्राह चक्रमष्टारं नलधौतं रणान्तकम् ।
तेन चक्रेण सोऽश्विभ्यां चिच्छेद रथकूवरम् ॥१९५॥
जग्राहाथ धनुर्दैत्यः शरांश्चाशीविषोपमान् ।
ववर्ष भिषजां मूर्ध्नि संछाद्याकाशगोचरम् ॥ १९६॥
तावप्यस्त्रैश्चिच्छिदतुः शितैर्दैत्यसायकान् ।
तच्च कर्म तयोर्दृष्ट्वा विस्मितः कोपमाविशत् ॥१९७॥

महता स तु कोपेन सर्वायोमयसादनम्।
जग्राह मुद्गरं भीमं कालदण्डविभीषणम्॥ १९८॥
स ततो भ्राम्य वेगेन चिक्षेपाश्विरथं प्रति।
तन्तु मुद्गरमायान्तमालोक्याम्बरगोचरौ॥ १९९॥
त्यक्त्वा रथौ तु तौ वेगादाप्लुतौ तरसाश्विनौ।
तौ रथौ स तु निष्पिष्य मुद्गरोऽचलसन्निभः॥ २००॥
दारयामास धरणीं हेमजालपरिष्कृतः।
तस्य कर्माश्विनौ दृष्ट्वा भिषजौ चित्रयोधिनौ॥ २०१॥
वज्रास्त्रन्तु प्रकुर्वाते दानवेन्द्रनिवारणम्।
ततो वज्रमयं वर्षम्प्रावर्तदतिदारुणम्॥ २०२॥
घोरवज्रप्रहारैस्तु दैत्येन्द्रः स परिष्कृतः।
रथो ध्वजो धनुश्चक्रं कवचं चापि काञ्चनम्॥ २०३॥
क्षणेन तिलशो जातं सर्वेषान्त्वस्य पश्यतः।
तद्दृष्ट्वा दुष्करं कर्म सोऽश्विभ्यां भीमविक्रमः॥ २०४॥
नारायणास्त्रं बलवान् मुमोच रणमूर्द्धनि।
वज्रास्त्रं शमयामास दानवेन्द्रोऽस्त्रतेजसा॥ २०५॥
तस्मिन् प्रशान्ते वज्रास्त्रे कालनेमिरनन्तरम्।
जीवग्राहं ग्राहयितुमश्विनौ तु प्रचक्रमे॥ २०६॥
तावश्विनौ रणाद्भीतौ सहस्राक्षरथं प्रति।
प्रयातौ वेपमानौ तु यदा शस्त्रविवर्जितौ॥ २०७॥
तयोरनुगतो दैत्यः कालनेमिर्महाबलः।
प्राप्येन्द्रस्य रथं क्रूरो दैत्यानीकपदानुगः॥ २०८॥
तं दृष्ट्वा सर्वभूतानि वित्रेसुर्विह्वलानि तु।

दृष्ट्वा दैत्यस्य तत् कौर्यं सर्वभूतानि मेनिरे ॥ २०९॥
पराजयं महेन्द्रस्य सर्वलोकभयावहम् ।
चेलुः शिखरिणो मुख्याः पेतुरुल्का नभस्तलात् ॥२१०॥
जगर्जुर्जलदा दिक्षु चुक्षुभुश्च महार्णवाः ।
तां भूतविकृतिं दृष्ट्वा भगवान् गरुडध्वजः ॥ २१०॥
व्यबुध्यताहिपर्यङ्के योगनिद्रां विहाय तु ।
लक्ष्मीकरयुगाजस्रलालिताङ्घ्रिसरोरुहः ॥ २११ ॥
शरदम्बरनीलाभकान्तदेहच्छविर्विभुः ।
कौस्तुभोद्भासितोरस्को कान्तकेयूरभास्वरः ॥ २१२ ॥
विमृश्य सुरसंक्षोभं वैनतेयं समाह्वयत् ।
आहूतेऽवस्थिते तस्मिन् नागावस्थितवर्ष्मणि ॥ २१३॥
दिव्यनानास्त्रतीक्ष्णार्चिरारुह्यागात् सुरान् स्वयम् ।
तत्रापश्यत देवेन्द्र मभिद्रुत मभिद्रुतैः ॥ २१४ ॥
दानवेन्द्रैर्नवाम्भोदसच्छायैः पौरुषोत्कटैः ।
प्रयात्वा पुरुषैर्वीरैरभाग्यैर्धनशालिभिः ॥ २१५ ॥
परित्राणायाशुकृतं सुचेतः कर्म निर्मलम् ।
अथापश्यन्त दैतेया वियति ज्योतिमण्डलम् ॥ २१६॥
स्फुरन्त मुदयाद्रिस्थं सूर्यमुष्णत्विषा इव ।
प्रभावं ज्ञातुमिच्छन्तो दानवास्तस्य तेजसः ॥ २१७॥
गरुत्मन्त मपश्यन्त कल्पान्तानलसन्निभम् ।
तमास्थितश्च मेघौघद्युतिमव्ययमच्युतम् ॥ २१८ ॥
तमालोक्यासुरेन्द्रास्तु हर्षसंपूर्णमानसाः ।
अयं वै देव! सर्वस्वम्भितेऽस्मिन्निर्जिताः सुराः ॥२१९॥
अयं स दैत्यचक्राणां कृतान्तः केशवोऽरिहा ।

एनमाश्रित्य लोकेषु यज्ञभागभुजोऽमराः॥ २२० ॥
इत्युक्ता दानवाः सर्वे परिवार्य समन्ततः।
निजघ्नुर्विविधैरस्त्रैस्ते तमायान्तमाहवे॥ २२१ ॥
कालनेमिप्रभृतयो दशदैत्या महारथाः।
षष्ट्या विव्याध बाणानां कालनेमिर्जनार्दनम्॥ २२२॥
निमिः शतेन बाणानां मथनोऽशीतिभिः शरैः।
जम्भकश्चैव सप्तत्या शुम्भो दशभिरेव च॥ २२३ ॥
शेषा दैत्येश्वराः सर्वे विष्णुमेकैकशः शरैः।
दशभिश्चैव यत्तास्ते जघ्नुः सगरुडं रणे॥ २२४ ॥
तेषा ममृष्य तत् कर्म विष्णुर्दानवसूदनः।
एकैकं दानवं जघ्ने षड्भिः षड्भिरजिह्मगैः॥ २२५
आकर्णाकृष्टैर्भूयश्च कालनेमिस्त्रिभिः शरैः।
विष्णुं विव्याध हृदये क्रोधाद्रक्तविलोचनः॥ २२६॥
तस्याशोभन्त ते बाणा हृदये तप्तकाञ्चनाः।
मयूखानीव दीप्तानि कौस्तुभस्य स्फुटत्विषः॥ २२७॥
तैर्बाणैः किञ्चिदायस्तो हरिर्जग्राह मुद्गरम्।
सततं भ्राम्य वेगेन दानवाय व्यसर्जयत्॥ २२८ ॥
दानवेन्द्रस्तमप्राप्तं वियत्येव शितैः शरैः।
चिच्छेद तिलशः क्रुद्धो दर्शयन् पाणिलाघवम्॥२२९॥
ततो विष्णुः प्रकुपितः प्रासञ्जग्राह भैरवम्।
तेन दैत्यस्य हृदयं ताडयामास गाढतः॥ २३० ॥
क्षणेन लब्धसंज्ञस्तु कालनेमिर्महासुरः।
शक्तिञ्जग्राह तीक्ष्णाग्रां हेमघण्टाट्टहासिनीम्॥२३१॥
तया वामभुजं विष्णोर्बिभेद दितिनन्दनः।

भिन्नः शक्त्या भुजस्तस्य सुतशोणित आबभौ ॥२३२॥
पद्मरागमयेनेव केयूरेण विभूषितः ।
ततो विष्णुः प्रकुपितो जग्राह विपुलन्धनुः ॥ २३३॥
सप्तदश च नाराचांस्तीक्ष्णान् मर्मविभेदिनः ।
दैत्यस्य हृदयं षड्भिर्विव्याध च त्रिभिः शरैः ॥२३४॥
चतुर्भिः सारथिञ्चास्य ध्वजञ्चैकेन पत्रिणा ।
द्वाभ्यां ज्याधनुषी चापि भुजं सव्यञ्च पत्रिणा ॥२३५॥
स भिन्नो हृदये गाढं दैत्यो हरिशिलीमुखैः ।
सुतरक्तारुणप्रांशुः पीडाकुलितमानसः ॥ २३६ ॥
चकम्पे मारुतेनेव नोदितः किंशुकद्रुमः ।
तमाकम्पितमालक्ष्य गदां जग्राह केशवः ॥ २३७ ॥
ताञ्च वेगेन चिक्षेप कालनेमिरथं प्रति ।
सा पपात शिरस्युग्रा विपुला कालनेमिनः ॥२३८॥
सञ्चूर्णितोत्तमाङ्गस्तु निष्पिष्टमुकुटोऽसुरः ।
स्रुतरक्तौघरन्ध्रस्तु स्रुतधातुरिवाचलः ॥ २३९ ॥
प्रापतत् स्वे रथे भग्ने विसंज्ञः शिष्टजीवितः ।
पतितस्य रथोपस्थे दानवस्याच्युतोऽरिहा ॥ २४० ॥
स्मितपूर्वमुवाचेदं वाक्यं चक्रायुधः प्रभुः ।
गच्छासुर ! विमुक्तोऽसि साम्प्रतं जीवनिर्भयः ॥२४१॥
ततः स्वल्पेन कालेन अहमेव तवान्तकः ।
एतच्छ्रुत्वा वचस्तस्य सारथिः कालनेमिनः ॥ २४२ ॥
अपवाह्य रथं दूरमनयत् कालनेमिनः ।

इति श्रीमत्स्यपुराणे देवासुरसंग्रामे कालनेमिपराजयो नाम
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

## अथ पञ्चाशदधिकशततमोऽध्यायः ।

---

सूत उवाच । तं दृष्ट्वा दानवाः क्रुद्धाश्चेरुः स्वैः स्वैर्बलैर्वृताः ।
सरघा इव माक्षीकहरणे सर्वतो दिशम् ॥ १ ॥
कृष्णचामरजालाढ्ये सुधाविरचिताङ्कुरे ।
चित्रपक्षपताके तु प्रभिन्नकरटामुखे ॥ २ ॥
पर्वताभे गजे भीमे मदस्राविणि दुर्द्धरे ।
आरुह्याजौ निमिर्दैत्यो हरिं प्रत्युद्ययौ बली ॥ ३ ॥
तस्यासन् दानवा रौद्रा गजस्य पदरक्षिणः ।
सप्तविंशतिसाहस्राः किरीटकवचोज्ज्वलाः ॥ ४ ॥
अश्वारूढश्च मथनो जम्भकश्चोष्ट्रवाहनः ।
शम्भोऽपि विपुलं मेषं समारुह्याव्रजद्रणम् ॥ ५ ॥
अपरे दानवेन्द्रास्तु यत्ता नानास्त्रपाणयः ।
आजघ्नुः समरे क्रुद्धा विष्णुमक्लिष्टकारिणम् ॥ ६ ॥
परिघेण निमिर्दैत्यो मथनो मुद्गरेण तु ।
शुम्भः शूलेन तीक्ष्णेन प्रासेन पवनस्तथा ॥ ७ ॥
चक्रेण महिषः क्रुद्धो जम्भः शक्त्या महारणे ।
जघ्नुर्नारायणं सर्वे शेषास्तीक्ष्णैश्च मार्गणैः ॥ ८ ॥
तान्यस्त्राणि प्रयुक्तानि शरीरं विविशुर्हरेः ।
गुरूक्तानुपदिष्टान्वै सच्छिष्यस्य श्रुतानिव ॥ ९ ॥

असम्भ्रान्तो रणे विष्णु रथ जग्राह कार्मुकम् ।
शरांश्चाशीविषाकारांस्तैलधौतानजिह्मगान् ॥१०॥
ततोऽभिसन्ध्य दैत्यांस्तानाकर्णाकृष्टकार्मुकः ।
अभ्यद्रवद्रणे क्रुद्धो दैत्यानीके तु पौरुषान् ॥ ११ ॥
निमिं विव्याध विंशत्या बाणानामग्निवर्चसाम् ।
मथनं दशभिर्बाणैः शुम्भं पञ्चभिरेव च ॥ १२ ॥
एकेन महिषं क्रुद्धो विव्याधोरसि पत्त्रिणा ।
जम्भं द्वादशभिस्तीक्ष्णैः सर्वांश्चैकैकशोऽष्टभिः ॥ १३ ॥
तस्य तल्लाघवं दृष्ट्वा दानवाः क्रोधमूर्च्छिताः ।
मर्दमानाः प्रयत्नेन चक्रुरत्यद्भुतं रणम् ॥ १४ ॥
चिच्छेदाथ धनुर्विष्णोर्निमिर्भल्लेन दानवः ।
सन्ध्यमानं शरं हस्ते चिच्छेद महिषासुरः ॥ १५ ॥
पीडयामास गरुडं जम्भस्तीक्ष्णैस्तु सायकैः ।
भुजं तस्याहनद्गाढं शुम्भो भूधरसन्निभः ॥ १६ ॥
छिन्ने धनुषि गोविन्दो गदां जग्राह भीषणाम् ।
तां प्राहिणोत्स वेगेन मथनाय महाहवे ॥ १७ ॥
तामप्राप्तां निमिर्बाणैश्चिच्छेद तिलशो रणे ।
तां नाशमागतां दृष्ट्वा हीनार्ये प्रार्थनामिव ॥ १८ ॥
जग्राह मुद्गरं घोरं दिव्यरत्नपरिष्कृतम् ।
तं मुमोचाथ वेगेन निमिमुद्दिश्य दानवम् ॥ १९ ॥
तमायान्तं वियत्येव त्रयो दैत्या न्यवारयन् ।
गदया जम्भदैत्यस्तु मथनः पट्टिशेन तु ॥ २० ॥
शक्त्या च महिषो दैत्यः स्वपक्षजयकाङ्क्षया ।
निराकृतं तमालोक्य दुर्जने प्रणयं यथा ॥ २१ ॥

जग्राह शक्तिमुग्राभामष्टघण्टोत्कटस्वनाम् ।
जम्भाय तां समुद्दिश्य प्राहिणोद्रणभीषणाः ॥ २२ ॥
तामम्बरस्थां जग्राह गजो दानवनन्दनः ।
गृहीतां तां समालोक्य शिचामिव विवेकिभिः ॥२३॥
दृढं भारसहं सारमन्यदादाय कार्मुकम् ।
रौद्रास्त्रमभिसन्धाय तस्मिन् वाणं मुमोच ह ॥ २४ ॥
ततोऽस्त्रतेजसा सर्वं व्याप्तं लोकं चराचरम् ।
ततो वाणमयं सर्वमाकाशं समदृश्यत ॥ २५ ॥
भूर्दिशो विदिशश्चैव वाणजालमया बभुः ।
दृष्ट्वा तदस्त्रमाहात्म्यं सेनानीर्ग्रसनोऽसुरः ॥ २६ ॥
ब्राह्ममस्त्रञ्चकारासौ सर्वास्त्रविनिवारणम् ।
तेन तत् प्रशमं यातं रौद्रास्त्रं लोकभ्रम्मरम् ॥ २७ ॥
अस्त्रे प्रतिहते तस्मिन् विष्णुर्दानवसूदनः ।
कालदण्डास्त्रमकरोत् सर्वलोकभयङ्करम् ॥ २८ ॥
सन्धीयमाने तस्मिंस्तु मारुतः परुषो ववौ ।
चकम्पे च मही देवी दैत्या भिन्नधियोऽभवन् ॥२९॥
तदस्त्रमुग्रं दृष्ट्वा तु दानवा युद्धदुर्मदाः ।
चक्रुरस्त्राणि दिव्यानि नानारूपाणि संयुगे ॥३०॥
नारायणास्त्रं ग्रसनो गृहीत्वा चक्रं निमिः स्वास्त्रवरं मुमोच ।
एकैकमस्त्रञ्च चकार जम्भस्तत्कालदण्डास्त्रनिवारणाय ॥३१॥
यावन्न सन्धानदशां प्रयान्ति दैत्येश्वराश्चास्त्रनिवारणाय ।
तावत् क्षणेनैव जघान कोटीर्दैत्येश्वराणां सगजान् सवाश्वान् ३२
अनन्तरं शान्तमभूत्तदस्त्रं दैत्यास्त्रयोगेन तु कालदण्डम् ।
शान्तं तदालोक्य हरिः स्वशस्त्रं स्वविक्रमे मन्युपरीतमूर्तिः ३३

पाह चक्रं तपनायुताभमुपारमात्मानमिव द्वितीयम् ।
चिक्षेप सेनापतयेऽभिसन्ध्य कण्ठस्थलं वज्रकठोरमुग्रम् ॥ ३४ ॥
चक्रं तदाकाशगतं विलोक्य सर्वात्मना दैत्यवराः स्ववीर्यैः ।
अशक्नुवन् वारयितुं प्रचण्डं दैवं यथा कर्म मुधा प्रपन्नम् ॥३५॥
अपतर्क्यं जनयद्जय्यं चक्रं पपात ग्रसनस्य कण्ठे ।
धा तु कृत्वा ग्रसनस्य कण्ठं तद्रक्तधारारुणघोरनाभि ।
गाम भूयोऽपि जनार्दनस्य पाणिं प्रवृद्धानलतुल्यदीप्ति ॥३६॥

इति श्रीमत्स्यपुराणे देवासुरसंग्रामे ग्रसनवधोनाम
पञ्चाशदधिकशततमोऽध्यायः ।

---

अथैकपञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच । तस्मिन् विनिहते दैत्ये ग्रसने लोकनायके ।
निर्मर्यादमयुध्यन्त हरिणा सह दानवाः ॥ १ ॥
पट्टिशैर्मुसलैः पाशैर्गदाभिः कुणपैरपि ।
तीक्ष्णाननैश्च नाराचैश्चक्रैः शक्तिभिरेव च ॥ २ ॥
तानस्त्रान् दानवैर्मुक्तान् चित्रयोधी जनार्दनः ।
एकैकं शतशश्चक्रे बाणैरग्निशिखोपमैः ॥ ३ ॥
ततः क्षीणायुधप्राया दानवा भ्रान्तचेतसः ।
अस्त्राण्यादातुमभवन्न समर्था यदा रणे ॥ ४ ॥
तदा मृतेर्गजैरश्वैर्जनार्दन मयोधयन् ।
समन्तात् कोटिशो दैत्याः सर्वतः प्रत्ययोधयन् ॥५॥
बहु कृत्वा वपुर्विष्णुः किञ्चित्क्लान्तभुजोऽभवत् ।
उवाच च गरुत्मन्तं तस्मिन् सुतुमुले रणे ॥ ६ ॥
गरुत्मन् ! कच्चिदश्रान्तस्त्वमस्मिन्नपि साम्प्रतम् ।

यद्यश्रान्तोऽसि तद्याहि मथनस्य रथम्प्रति ॥ ७ ॥
श्रान्तोऽस्यथ मुहूर्त्तन्त्वं रणादपसृतोभव।
इत्युक्तो गरुडस्तेन विष्णुना प्रभविष्णुना ॥ ८ ॥
आससाद रणे दैत्यं मथनं घोरदर्शनम्।
दैत्यस्त्वभिमुखं दृष्ट्वा शङ्खचक्रगदाधरम् ॥ ९ ॥
जघान भिन्दिपालेन शितवाणेन वक्षसि।
तत् प्रहारमचिन्त्यैव विष्णुस्तस्मिन् महाहवे ॥ १० ॥
जघान पञ्चभिर्वाणैर्मार्जितैश्च शिलाशितैः।
पुनर्दशभिराकृष्टैस्तन्तताड स्तनान्तरे ॥ ११ ॥
विद्धो मर्मसु दैत्येन्द्रो हरिवाणैरकम्पत।
स मुहूर्त्तं समाश्वास्य जग्राह परिघन्तदा ॥ १२ ॥
जघ्ने जनार्दने चापि परिघेणाग्निवर्चसा।
विष्णुस्तेन प्रहारेण किञ्चिदाघूर्णितोऽभवत् ॥ १३ ॥
ततः क्रोधविवृत्ताक्षो गदाञ्जग्राह माधवः।
मथनं सरथं रोषान्निष्पिपेषाथ रोपितः ॥ १४ ॥
स पपाताथ दैत्येन्द्रः क्षयकालेऽचलो यथा।
तस्मिन्निपतिते भूमौ दानवे वीर्यशालिनि ॥ १५ ॥
अवसादं ययुर्दैत्याः कर्दमे करिणो यथा।
ततस्तेषु विपन्नेषु दानवेष्वतिमानिषु ॥ १६ ॥
कोपरक्ततया नाम महिषो दानवेश्वरः।
प्रत्युद्ययौ हरिं रौद्रः स्वबाहुबलमास्थितः ॥ १७ ॥
तीक्ष्णधारेण शूलेन महिषो हरिमर्दयन्।
शक्त्या च गरुडं वीरो महिषोऽभ्यहनद्धृदि ॥ १८ ॥
ततो व्यावृत्तवदनं महाचलगुहानिभम्।

यस्तु मेच्छद्रणे दैत्यः स गरुत्मन्तमच्युतम् ॥ १९ ॥
अथाच्युतोऽपि विज्ञाय दानवस्य चिकीर्षितम् ।
वदनं पूरयामास दिव्यैरस्त्रैर्महाबलः ॥ २० ॥
महिषस्याथ सुसृजे बाणौघं गरुडध्वजः ।
पिधाय वदनं दिव्यैर्दिव्यास्त्रपरिमन्त्रितैः ॥ २१ ॥
स तैर्बाणैरभिहतो महिषोऽचलसन्निभः ।
परिवर्तितकायोऽधः पपात न ममार च ॥ २२ ॥
महिषं पतितं दृष्ट्वा भूमौ प्रोवाच केशवः ।
महिषासुर ! मत्तस्त्वं वधनार्हसि ॥ २३ ॥
योषिद्वध्यः पुरोक्तोऽसि साक्षात् कमलयोनिना ।
उत्तिष्ठ जीवितं रक्ष गच्छास्मात् सङ्गरादद्रुतम् ॥२४॥
तस्मिन् पराङ्मुखे दैत्ये महिषे शुम्भदानवः ।
सन्दष्टौष्ठपुटः कोपाद्भ्रूकुटीकुटिलाननः ॥ २५ ॥
निर्मथ्य पाणिना पाणिं धनुरादाय भैरवम् ।
सज्जञ्चकार स धनुः शरांश्चाशीविषोपमान् ॥ २६ ॥
स चित्रयोधी दृढमुष्टिपातस्ततस्तु विष्णुं गरुडञ्च दैत्यः ।
बाणैर्ज्वलद्वह्निशिखानिकाशैः चिप्रैरसंख्यैः परिघातहीनैः२७
विष्णुश्च दैत्येन्द्रशराहतोऽपि
भ्रशुण्डिमादाय कृतान्ततुल्याम् ।
तया भ्रशुण्ड्या च पिपेष मेषम्
शुम्भस्य पत्रं धरणीधराभम् ॥ २८ ॥
तस्मादवप्लुत्य हताच्च मेषाद्-
भूमौ पदातिः स तु दैत्यनाथः ।
ततो महोग्रस्य हरिः शरौघान्

मुमोच कालानलतुल्यभासः ॥ २९ ॥
शरैस्त्रिभिस्तस्य भुजं बिभेद
सप्तभिश्च शीर्षं दशभिश्च केतुम्।
विष्णुर्विकृष्टैः श्रवणावसानम्
दैत्यस्य विव्याध विवृत्तनेत्रः ॥ ३० ॥
स तेन विद्धो व्यथितो बभूव
दैत्येश्वरो विस्रुतशोणितौघः।
ततोऽस्य किञ्चिच्चलितस्य धैर्या-
दुवाच शङ्खाम्बुजशार्ङ्गपाणिः ॥ ३१ ॥

कुमारिवध्योऽसि रणं विमुञ्च शुम्भासुर! स्वल्पतरैरहोभिः।
वधं न मत्तोऽर्हसि चेह मूढ! वृथैव किं युद्धसमुत्सुकोऽसि ॥३२
शुम्भो वचो विष्णुमुखान्निशम्य निमिश्च निष्पेष्टुमियेष विष्णुम्।
गदामथोद्यम्य निमिः प्रचण्डां जघान गाढं गरुडं शिरस्तः॥३३
जम्भोऽपि विष्णुं परिघेण मूर्ध्नि प्रकृष्टरत्नौघविचित्रभासा।
तौ दानवाभ्यां विषमैः प्रहारैर्निपेतुरुर्व्यां घनपावकाभौ ॥३४॥
तत्कर्म दृष्ट्वा दितिजास्तु सर्वे जगर्जुरुच्चैः कृतसिंहनादाः।
धनूंषि चास्फोटय खुराभिघातैर्व्यदारयन् भूमिमपि प्रचण्डाः।
वासांसि चैवादुधुवुः परे तु दध्मुश्च शङ्खानकगोमुखौघान्॥३५॥

अथ संज्ञामवाप्याशु गरुडोऽपि सकेशवः।
पराङ्मुखो रणात्तस्मात् पलायत महाजवः ॥ ३६ ॥

इति श्रीमत्स्यपुराणे देवासुरसंग्रामे एकपञ्चाश-
दधिकशततमोऽध्यायः ॥ १५१ ॥

---

## अथ द्विपञ्चाशदधिकशततमोऽध्यायः।

---

सूत उवाच। तमालोक्य पलायन्तं विस्रस्तध्वजकार्मुकम्।
हरिं देवः सहस्राक्षो मेने भग्नं दुराहवे ॥ १ ॥
दैत्यांश्च मुदितान् दृष्ट्वा कर्तव्यं नाध्यगच्छत।
अथायान्निकटं विष्णोः सुरेशः पाकशासनः ॥ २ ॥
उवाच चैनं मधुरं प्रोत्साहपरिबृंहकम्।
किमेभिः क्रीडसे देव! दानवैर्दुष्टमानसैः ॥ ३ ॥
दुर्जनैर्लब्धरन्ध्रस्य पुरुषस्य कुतः क्रियाः।
शक्तेनोपेक्षितो नीचो मन्यते बलमात्मनः ॥ ४ ॥
तस्मान्न नीचं मतिमान् दुर्गहीनं हि सन्त्यजेत्।
अत्रापि सरसपत्न्या रथिनो जयमाप्नुयुः ॥ ५ ॥
कस्ते सर्वाभवश्चाग्रे हिरण्याक्षवधे विभो।
हिरण्यकशिपुर्दैत्यो वीर्यशाली महोन्नतः ॥ ६ ॥
त्वां प्राप्यापश्यदसुरो विषमं मृतिविभ्रमम्।
पूर्वेऽप्यतिबला ये च दैत्येन्द्राः सुरविद्विषः ॥ ७ ॥
विनाशमागताः प्राप्य शलभा इव पावकम्।
युगे युगे च दैत्यानां त्वमेवान्तकरो हरे! ॥ ८ ॥
तथैवाद्य हि मग्नानां भव विष्णो! सुराश्रयः।
एवमुक्तस्ततो विष्णुर्व्यवर्धत महाभुजः ॥ ९ ॥

श्रद्धया परमया युक्तः सर्वभूताश्रयोऽरिहा ।
अथोवाच सहस्राक्षं कालज्ञमधोक्षजः ॥ १० ॥
दैत्येन्द्राः सर्वैर्बधोपायैः शक्या हन्तुं हि नान्यतः ।
दुर्जयस्तारको दैत्योमुक्ता सप्तदिनं शिशुम् ॥ ११ ॥
कश्चित् स्त्रीवध्यतां प्राप्तो बधेऽन्यस्य कुमारिका ।
जम्भस्तु बध्यतां प्राप्तो दानवः क्रूरविक्रमः ॥ १२ ॥
तस्माद्वीर्येण दिव्येन जहि जम्भं जगद्धरम् ।
अबध्यः सर्वभूतानां त्वां विना स तु दानवः ॥ १३ ॥
मया गुप्तो रणे जम्भं जगत्कण्टकमुद्धर ।
तद्वैकुण्ठवचः श्रुत्वा सहस्राक्षोऽमरारिहा ॥ १४ ॥
समादिशत् सुरान् सर्वान् सैन्यस्य रचनां प्रति ।
सम्भारं सर्वलोकेषु वीर्यस्य तपसोऽपि च ॥ १५ ॥
तदेकादशरुद्रांस्तु चकाराग्रे सुरान् हरिः ।
व्यालभोगाङ्गसन्नद्धा बलिनो नीलकन्धराः ॥ १६ ॥
चन्द्रलेखनचूडाग्रामण्डितानु शिखण्डिनः ।
शूलज्वालाभिषङ्गाढ्या भुजमण्डलभैरवाः ॥ १७ ॥
पिङ्गोत्तुङ्गजटाजूटाः सिंहचर्मानुषङ्गिनः ।
कपालीशादयो रुद्रा विद्रावितमहासुराः ॥ १८ ॥
कपाली पिङ्गलो भीमो विरूपाक्षो विलोहितः ।
अजेशः शासनः शास्ता शम्भुः चण्डो भुवस्तथा ॥ १९ ॥
एते एकादशानन्तबला रुद्राः प्रभाविनः ।
पालयन्तो बलस्यापि दारयन्तश्च दानवान् ॥ २० ॥
आप्याययन्तस्त्रिदशान् गर्जन्त इव चाम्बुदाः ।

हिमाचलाभे महति काञ्चनाम्बुरुहस्रजि ॥ २१ ॥
प्रचलच्चामरे हेमघण्टासङ्घातमण्डिते ।
ऐरावते चतुर्दन्ते मातङ्गेऽचलसंस्थिते ॥ २२ ॥
महामदजलस्रावे कामरूपी शतक्रतुः ।
तस्थौ हिमगिरेः शृङ्गे भानुमानिव दीप्तिमान् ॥ २३ ॥
तस्यारक्षत् पदं सव्यं मारुतोऽमितविक्रमः ।
जुगोपापरमग्निस्तु ज्वालापूरितदिङ्मुखः ॥ २४ ॥
पृष्ठरक्षोऽभवद्विष्णुः ससैन्यस्य शतक्रतोः ।
आदित्या वसवो विश्वे मरुतश्चाश्विनावपि ॥ २५ ॥
गन्धर्वा राक्षसा यक्षाः सकिन्नरमहोरगाः ।
नानाविधायुधाश्चित्रा दधाना हेमभूषणाः ॥ २६ ॥
कोटिशः कोटिशः कृत्वा वृन्दं चिह्नोपलक्षितम् ।
विश्रावयन्तः स्वाङ्कीर्तिं बन्दिवृन्दपुरःसराः ।
चेरुर्दैत्यवधे हृष्टाः सहेन्द्राः सुरजातयः ॥ २७ ॥

शतक्रतोरमरनिकाय पालिता
पताकिनी गजरथवाजिनादिता ।
सितातपत्र ध्वजपटकोटिमण्डिता
बभूव सा दितिसुतशोकवर्धिनी ॥ २८ ॥

आयान्तीमवलोक्याथ सुरसेनाङ्गजासुरः ।
गजरूपी महाम्भोद सङ्घातो भाति भैरवः ॥ २९ ॥
परश्वधायुधो दैत्यो दंष्ट्रितोष्ठकसंपुटः ।
ममर्द चरणै देवांश्चिक्षेपान्यान् करेण तु ॥ ३० ॥
परान् परशुना जघ्ने दैत्येन्द्रो रौद्रविक्रमः ।
तस्य पातयतः सेनां यक्षगन्धर्वकिन्नराः ॥ ३१ ॥

मुमुचुः संहताः सर्वे चित्रशस्त्रास्त्रसंहतिम्।
पाशान् परश्वधांश्चक्रान् भिन्दिपालान् समुद्गरान् ॥२२॥
कुन्तान् प्रभानसींस्तीक्ष्णान् मुद्गरांश्चापिदुःसहान्।
तान् सर्वान् सोऽग्रसद्दैत्यः कवलानिव यूथपः ॥२३॥
कोपास्फालितदीर्घाग्रकरास्फोटेन पातयन्।
विचचार रणे देवान् दुष्प्रेक्ष्यो गजदानवः ॥ २४ ॥
यस्मिन् यस्मिन्निपतति सुरवृन्दे गजासुरः।
तस्मिन् तस्मिन् महाशब्दो हाहाकारकृतोऽभवत्॥२५॥
अथ विद्रवमाणं तद्बलं प्रेक्ष्य समन्ततः।
रुद्राः परस्परं प्रोचुरहङ्कारोत्थितार्चिषः ॥ २६ ॥
भो! भो! गृह्णीत दैत्येन्द्रं मर्दतैनं हताश्रयम्।
कर्षतैनं शितैः शूलैर्भञ्जतैनञ्च मर्मसु ॥ २७ ॥
कपाली वाक्यमाकर्ण्य शूलं शितशिखामुखम्।
समाज्ये वामहस्तेन संरम्भविवृतेक्षणः ॥ २८ ॥
अधावद् भ्रुकुटीवक्त्रो दैत्येन्द्राभिमुखो रणे।
दृढेन मुष्टिबन्धेन शूलं विष्टभ्य निर्मलम् ॥ २९ ॥
जघान कुम्भदेशे तु कपाली गजदानवम्।
ततो दशापि ते रुद्रा निर्मलायोमये रणे ॥ ४० ॥
जघ्नुः शूलैश्च दैत्येन्द्रं शैलवर्ष्माणमाहवे।
स्रुतशोणितरन्ध्रस्तु शितशूलमुखादितः ॥ ४१ ॥
बभौ कृष्णच्छविर्दैत्यः शरदीवामलं सरः।
प्रोत्फुल्लारुणनीलाब्जसङ्घातः सर्वतो दिशम् ॥४२॥
भस्मशुभ्रतनुच्छायैः रुद्रैर्हंसैरिवावृतः।
उपस्थितार्तिर्दैत्योऽथ प्रचलत्कर्णपल्लवः ॥ ४३ ॥

शम्भुं विभेद दशनैर्नाभिदेशे गजासुरः।
दृष्ट्वा सक्तान्तु रुद्राभ्यां नवरुद्रास्ततोऽद्भुतम्।
ततक्षुर्विविधैः शस्त्रैः शरीरममरद्विषः।
निर्भया बलिनो युद्धे रणभूमौ व्यवस्थिताः॥ ४४॥
मृतं महिषमासाद्य वने गोमायवो यथा।
कपालिनो परित्यज्य गतश्चासुरपुङ्गवः॥ ४५॥
वेगेन कुपितो दैत्यो नवरुद्रानुपाद्रवत्।
ममर्द चरणाघातैर्दन्तैश्चापि करेण च॥ ४६॥
स तैस्तुमुलयुद्धेन श्रममासादितो यदा।
तदा कपाली जग्राह करन्तस्यामरद्विषः॥ ४७॥
भ्रामयामास वेगेन ह्यतीव च गजासुरम्।
दृष्ट्वाश्रमातुरं दैत्यं किञ्चित्स्फुरितजीवितम्॥४८॥
निरुत्साहं रणे तस्मिन् गतयुद्धात्मवीर्यमम्।
ततः पतत एवास्य चर्म चोत्कृत्य भैरवम्॥ ४९॥
स्रवत्सर्वाङ्गरक्तौघं चकाराम्बरमात्मनः।
दृष्ट्वा विनिहतं दैत्यं दानवेन्द्रा महाबलाः॥ ५०॥
वित्रेसुर्दुद्रुवुर्जग्मुर्निपेतुश्च सहस्रशः।
दृष्ट्वा कपालिनो रूपं गजचर्माम्बरावृतम्॥ ५१॥
दिक्षु भूमौ तमेवोग्रं रुद्रं दैत्या व्यलोकयन्।
एवं विलुलिते तस्मिन् दानवेन्द्रे महाबले॥ ५२॥
द्विपाधिरूढो दैत्येन्द्रो हतदुन्दुभिना ततः।
कल्पान्ताम्बुधराभेन दुर्द्धरेणापि दानवः॥ ५३॥
निमिरभ्यपतत्तूर्णं सुरसैन्यानि लोडयन्।
यां यां निमिगजो याति दिशं तां तां सवाहना॥५४

सन्त्यज्य दुद्रुवुर्दैवा भयार्तास्त्यक्तहेतवः।
गन्धेन सुरमातङ्गा दुद्रुवुस्तस्य हस्तिनः॥ ५५॥
पलायितेषु सैन्येषु सुराणां पाकशासनः।
तस्थौ दिक्पालकैः सार्द्धमष्टभिः केशवेन च॥ ५६॥
संप्राप्तो निमिमातङ्गो यावच्छक्रगजं प्रति।
तावच्छक्रगजो यातो मुक्त्वा नादं स भैरवम्॥५७॥
ध्रियमाणोऽपि यत्नेन न स्वकैरवतिष्ठति।
पलायिते गजे तस्मिन्नारूढः पाकशासनः॥ ५८॥
विपरीतमुखो युद्धद्दानवेन्द्रवलं प्रति।
शतक्रतुस्तु वज्रेण निमिं वक्षस्यताडयत्॥ ५९॥
गदया दन्तिनश्चास्य गण्डदेशेऽहनद् दृढम्।
तत्प्रहारमचिन्त्यैव निमिर्निर्भयपौरुषः॥ ६०॥
ऐरावतं कटीदेशे मुद्गरेणाभ्यताडयत्।
स हतो मुद्गरेणाथ शक्रकुञ्जर आहवे॥ ६१॥
जगाम पश्चाच्चरणैर्धरणीं भूधराकृतिः।
लाघवात् क्षिप्रमुत्थाय ततोऽमरमहागजः॥ ६२॥
रणादपससर्पाशु भीषितो निमिहस्तिना।
ततो वायुर्ववौ रूक्षो बहुशर्कर पांसुलः॥ ६३॥
सम्मुखो निमिमातङ्गो जवनाचलकम्पनः।
स्रुतरक्तो बभौ शैलो घनधाराङ्कितो यथा॥ ६४॥
धनेशोऽपि गदां गुर्वीं तस्य दानवहस्तिनः।
चिक्षेप वेगादुत्थाय सोऽनिपपातास्य मूर्द्धनि॥ ६५॥
गजो गदानिपातेन स तेन परिमूर्च्छितः।
दन्तैर्भित्वा धरां वेगात् पपाताचलसन्निभः॥ ६६॥

पतिते तु गजे तस्मिन् सिंहनादो महानभूत् ।
सर्वतः सुरसैन्यानां गजबृंहितबृंहितैः ॥ ६७ ॥
हेषारवेण चाश्वानां गुणास्फोटैश्च धन्विनाम् ।
गजन्तं निहतं दृष्ट्वा निमिषापि पराङ्मुखः ॥ ६८ ॥
श्रुत्वा च सिंहनादञ्च सुराणामतिकोपनः ।
जम्भो जज्वाल कोपेन पीताज्य इव पावकः ॥ ६९ ॥
स सुरान् कोपरक्ताक्षो धनुष्यारोप्य सायकम् ।
तिष्ठतेत्यब्रवीत्तावत् सारथिं चाप्यचोदयत् ॥ ७० ॥
वेगेन चलतस्तस्य तद्रथस्याभवद्द्युतिः ।
यथादित्यसहस्रस्याभ्युदितस्योदयाचले ॥ ७१ ॥
पताकिना रथेनाजौ किङ्किणीजालमालिना ।
शशिशुभ्रातपत्रेण स तेन स्यन्दनेन तु ॥ ७२ ॥
घट्टयन् सुरसैन्यानां हृदयं समदृश्यत ।
तमायान्तमभिप्रेक्ष्य धनुष्याहितसायकम् ॥ ७३ ॥
शतक्रतुरदीनात्मा दृढमाधत्त कार्मुकम् ।
बाणञ्च तैलधौताग्रमर्द्धचन्द्रमजिह्मगम् ॥ ७४ ॥
तेनास्य सशरञ्चापं रणे चिच्छेद वृत्रहा ।
क्षिप्रं सन्त्यज्य तच्चापं जम्भो दानवनन्दनः ॥ ७५ ॥
अन्यत् कार्मुकमादाय वेगवत्सारसाधनम् ।
शरांश्चाशीविषाकारांस्तैलधौतानजिह्मगान् ॥ ७६ ॥
शक्रं विव्याध दशभिर्जत्रुदेशे तु पत्रिभिः ।
हृदये च त्रिभिश्चापि द्वाभ्याञ्च स्कन्धयोर्द्वयोः ॥ ७७ ॥
शक्रोऽपि दानवेन्द्राय बाणजालमपीदृशम् ।
अप्राप्तान् दानवेन्द्रस्तु शरान् शक्रभुजेरितान् ॥ ७८ ॥

चिच्छेद दशधाकाशे शरैरग्निशिखोपमैः ।
ततस्तु शरजालेन देवेन्द्रो दानवेश्वरम् ॥ ७९ ॥
आच्छादयत यत्नेन वर्षास्विव घनैर्नभः ।
दैत्योऽपि बाणजालन्तद्व्यधमत्सायकैः शितैः ॥ ८० ॥
यथा वायुर्घनाटोपं परिवार्य दिशोमुखे ।
शक्रोऽथ क्रोधसंरम्भान्न विशेषयते यदा ॥ ८१ ॥
दानवेन्द्रं तदा चक्रे गन्धर्वास्त्रं महाद्भुतम् ।
तदुत्थतेजसा व्याप्त मभून्नगनगोचरम् ॥ ८२ ॥
गन्धर्वनगरैश्चापि नानाप्राकारतोरणैः ।
मुञ्चद्भिरद्भुताकारैरस्त्रवृष्टिः समन्ततः ॥ ८३ ॥
अथास्त्रवृष्ट्या दैत्यानां हन्यमाना महाचमूः ।
जम्भं शरण मागच्छदप्रमेयपराक्रमम् ॥ ८४ ॥
व्याकुलोऽपि स्वयं दैत्यः सहस्राचास्त्रपीडितः ।
स्मरन् साधुसमाचारं भीतत्राणपरोऽभवत् ॥ ८५ ॥
अथास्त्रं मौसलं नाम मुमोच दितिनन्दनः ।
ततो यो मुसलैः सर्वमभवत् पूरितं जगत् ॥ ८६ ॥
एकप्रहारकरणैरप्रधृष्यैः समन्ततः ।
गन्धर्वनगरन्तेषु गन्धर्वास्त्रविनिर्मितान् ॥ ८७ ॥
गान्धर्वमस्त्रं सन्धाय सुरसैन्येषु चापरम् ।
एकैकेन प्रहारेण गजानश्वान्महारथान् ॥ ८८ ॥
रथाश्वान् सोऽहनत् क्षिप्रं शतशोऽथ सहस्रशः ।
ततः सुराधिपस्त्वाष्ट्र मस्त्रञ्च समुदीरयन् ॥ ८९ ॥
सन्धीयमाने ततस्त्वाष्ट्रे निश्चेरुः पावकार्चिषः ।
ततो यन्त्रमयान् दिव्यानायुधान्दुष्प्रधर्षिणः ॥ ९० ॥

तैर्यन्त्रैरभवद्बद्ध मन्तरिक्षे वितानकम् ।
वितानकेन तेनाथ प्रथमं मौसले गते ॥ ९१ ॥
शैलास्त्रं मुमुचे जम्भो यन्त्रसङ्घातताडनम् ।
व्यामप्रमाणैरुपलैस्ततोवर्ष मवर्तत ॥ ९२ ॥
त्वाष्ट्रस्य निर्मितान्याशु यन्त्राणि तदनन्तरम् ।
तेनोपलनिपातेन गतानि तिलशस्ततः ॥ ९३ ॥
यन्त्राणि तिलशः कृत्वा शैलास्त्रं परिमूर्धसु ।
निपपातातिवेगेनादारयत् पृथिवीं ततः ॥ ९४ ॥
ततो वज्रास्त्र मकरोत् सहस्राक्षः पुरन्दरः ।
तदोपलमहावर्षं व्यशीर्यत समन्ततः ॥ ९५ ॥
ततः प्रशान्ते शैलास्त्रे जम्भो भूधरसन्निभः ।
ऐषीक मस्त्रमकरोद्भीतोऽतिपराक्रमः ॥ ९६ ॥
ऐषीकेनागमन्नाशं वज्रास्त्रं शक्र वल्लभम् ।
विजृम्भत्यथ चैषीके परमास्त्रेति दुर्धरे ॥ ९७ ॥
जज्वलुर्दैवसैन्यानि सस्यन्दनगजानि तु ।
दह्यमानेष्वनीकेषु तेजसा सुरसत्तमः ॥ ९८ ॥
आग्नेय मस्त्रमकरोद्बलवान् पाकशासनः ।
तेनास्त्रेण ततस्त्वैन्द्रमपसत्तादनन्तरम् ॥ ९९ ॥
तस्मिन् प्रतिहते चास्त्रे पावकास्त्रं व्यजृम्भत ।
जज्वाल कायं जम्भस्य सरथस्य ससारथिम् ॥ १०० ॥
ततः प्रतिहतः सोऽथ दैत्येन्द्रः प्रतिभानवान् ।
वारुणास्त्रं मुमोचाथ शमनं पावकार्चिषाम् ॥ १०१ ॥
ततो जलधरैर्व्योमस्फुरद्विद्युल्लताकुलैः ।
गम्भीरमुरजध्वानैरापूरितमिवाम्बरम् ॥ १०२ ॥

करीन्द्रकरतुल्याभिर्जलधाराभिरम्बरम् ।
पतन्तीभिर्जगत् सर्वं क्षणेनापूरितं बभौ ॥ १०३ ॥
शान्तमाग्नेय मस्त्रं तत् प्रविलोक्य सुराधिपः ।
वायव्यमस्त्र मकरोन्मेघसङ्घातनाशनम् ॥ १०४ ॥
वायव्यास्त्रबलेनाथ निर्धूते मेघमण्डले ।
बभूव विमलं व्योम नीलोत्पलदलप्रभम् ॥ १०५ ॥
वायुना चातिघोरेण कम्पितास्ते तु दानवाः ।
न शेकुस्तत्र ते स्थातुं रणेऽतिबलिनोऽपि ये ॥ १०६ ॥
तदा जम्भोऽभवच्छैलो दशयोजनविस्तृतः ।
मारुतप्रतिघातार्थं दानवानां भयापहः ॥ १०७ ॥
मुक्तनानायुधोद्यत्तेजोऽभिज्वलितद्रुमः ॥
ततः प्रशमिते वायौ दैत्येन्द्रे पर्वताकृतौ ॥ १०८ ॥
महाशनीं वज्रमयीं मुमोचाशु शतक्रतुः ।
तयाशन्या पतितया दैत्यस्याचलरूपिणः ॥ १०९ ॥
कन्दराणि व्यशीर्यन्त समन्तान्निर्भराणि तु ।
ततः सा दानवेन्द्रस्य शैलमाया न्यवर्तत ॥ ११० ॥
निवृत्तशैलमायोऽथ दानवेन्द्रो मदोत्कटः ।
बभूव कुञ्जरो भीमो महाशैलसमाकृतिः ॥ १११ ॥
स ममर्द सुरानीकं दन्तैश्चाप्यहनत् सुरान् ।
बभञ्ज पृष्ठतः कांश्चित्करेणाविध्य दानवः ॥ ११२ ॥
ततः क्षपयतस्तस्य सुरसैन्यानि वृत्रहा ।
अस्त्रं त्रैलोक्यदुर्धर्षं नारसिंहं मुमोच ह ॥११३॥
ततः सिंहसहस्राणि निश्चेरुर्मन्त्रतेजसः ।
कृष्णदंष्ट्राट्टहासानि क्रकचाभनखानि च ॥ ११४ ॥

तैर्विपादितगात्रोऽसौ गजमायां व्यपोथयत् ।
ततश्चाशीविषोघोरोऽभवत् फणशताकुलः ॥ ११५ ॥
विषनिश्वासनिर्दग्धं सुरसैन्यं महारथः ।
ततोऽस्त्रं गारुडं चक्रे शक्रश्चारुभुजस्तदा ॥ ११६ ॥
ततो गरुत्मत स्तस्मात् सहस्राणि विनिर्ययुः ।
तैर्गरुत्मभिरासाद्य जम्भं भुजगरूपिणम् ॥ ११७ ॥
कृतन्तु खण्डशो दैत्यं सास्यमाया व्यनश्यत ।
प्रनष्टायान्तु मायायां ततो जम्भो महासुरः ॥ ११८ ॥
चकार रूपमतुलं चन्द्रादित्यपथानुगम् ।
विवृत्तवदनोग्रस्तु सियेष सुरपुङ्गवान् ॥ ११९ ॥
ततोऽस्य विविशुर्वक्त्रं समहारथकुञ्जराः ।
सुरसेनाविशत् भीमं पातालोत्तानतालुकम् ॥ १२० ॥
सैन्येषु ग्रस्यमानेषु दानवेन बलीयसा ।
शक्रो दैन्यं समापन्नः श्रान्तवाहः सवाहनः ॥ १२१ ॥
कर्तव्यतां नाध्यगच्छत् प्रोवाचेदं जनार्दनम् ।
किमनन्तर मत्रास्ति कर्त्तव्यस्यावशेषितम् ॥ १२२ ॥
यदाश्रित्य घटामोऽस्य दानवस्य युयुत्सवः ।
ततो हरिरुवाचेदं वज्रायुध मुदारधीः ॥ १२३ ॥
न साम्प्रतं रणस्त्याज्यस्त्वया कातरभैरवः ।
वर्द्धस्वाशु महामायां पुरन्दर ! रिपुस्मृति ॥ १२४ ॥
मयैष लक्षितो दैत्योऽधिष्ठितः प्राप्तपौरुषः ॥
मा शक्र ! मोहमागच्छ क्षिप्रमस्त्रं स्मर प्रभो ! ॥ १२५ ॥
ततः शक्रः प्रकुपितो दानवं प्रति देवराट् ।
नारायणास्त्रं प्रयतो मुमोचासुरवक्षसि ॥ १२६ ॥

एतस्मिन्नन्तरे दैत्यो विवृतास्योऽग्रसत् क्षणात्।
कोटिं लक्षाणि गन्धर्वकिन्नरोरगराक्षसान्॥ १२७॥
ततो नारायणास्त्रं तत् पपातासुरवक्षसि।
महास्त्रभिन्नहृदयः सुस्राव रुधिरञ्च सः॥ १२८॥
रणागारमिवोद्गारं तत्याजासुरनन्दनः।
तदस्त्रतेजसा तस्य रूपं दैत्यस्य नाशितम्॥ १२९॥
तत एवान्तर्धे दैत्यो वियत्यनुपलक्षितः।
गगनस्थः स दैत्येन्द्रः शस्त्रासनमतीन्द्रियम्॥ १३०॥
मुमोच सुरसैन्यानां संहारे कारणम्परम्।
प्रासान् परश्वधांश्चक्रान् बाणान् वज्रान् समुद्गरान्॥१३१॥
कुठारान् सह खड्गैश्च भिन्दिपालानयोगुडान्।
ववर्ष दानवो रौद्रो ह्यन्यानस्त्रचयानपि॥ १३२॥
तैरस्त्रैर्दानवैर्मुक्तैर्देवानीकेषु भीषणैः।
बाहुभिर्हेरणैः पूर्णा शिरोभिश्च सकुण्डलैः॥ १३३॥
ऊरुभिर्गजहस्ताभैः करीन्द्रैर्वाचलोपमैः।
भग्नेषादण्डचक्राक्षै रथैः सारथिभिः सह॥ १३४॥
दुःसञ्चाराभवत् पृथ्वी मांसशोणितकर्दमा।
रुधिरौघह्रदावर्ता शवराशिशिलोच्चयैः॥ १३५॥
कबन्धनृत्यसङ्कुले स्रवद्वसास्रकर्दमे।
जगत्त्रयोपसंहृतौ समे समस्तदेहिनाम्॥ १३६॥
शृगालगृध्रवायसाः परं प्रमोदमादधुः।
क्वचिद्विकृष्टलोचनः शवस्य रौति वायसः॥ १३७॥
विकृष्टपीवरान्त्रकाः प्रयान्ति जम्बुकाः क्वचित्।
क्वचित् स्थितोऽतिभीषणः स्वतुण्डनिहितोरगः॥१३८॥

मृतस्य मांसमादाय स्वजातयश्च संस्थिताः।
क्वचिद् वृकौ गजासृजम्पपौ निलीयतास्ततः ॥१३९॥
क्वचित्तु रुण्डमण्डलीर्विकृष्यते स्वजातिभिः।
क्वचित् पिशाचजातकैः प्रपीतशोणितासवैः ॥१४०॥
स्वकामिनं युतैर्द्रुतं प्रमोदमत्तसम्भ्रमैः।
ममैतदाननं सुरां समस्तु मे प्रियः ॥ १४१ ॥
करोऽयमब्जसन्निभो ममास्तु कर्णपूरकः।
सरोषमीक्षते परा विना प्रियं तदा ॥ १४२ ॥
परा प्रिया ह्यदर्शयत् छुरीकशोणितासवम्।
विकृष्य शावचर्म तत्प्रवृद्धमांसपक्वयम् ॥ १४३ ॥
चकार यक्षकामिनीतकं कुठारपाटितम्।
गजस्य दन्तमाहृतं प्रगृह्य कुम्भसम्पुटम्।
विपाट्य मौक्तिकं परं प्रियाप्रसादमिच्छते।
समांसशोणितामत्र पपुश्च यक्षराक्षसाः ॥ १४५ ॥
मृताश्च केशवर्जितं रमं प्रगृह्य पाणिना।
प्रियाविमुक्तजीवितं समानयामृगासवम् ॥ १४६ ॥
न पश्यतां पयान्ति मे गतं श्मशानगोचरम्।
नरस्य तज्ज्वालत्यसौ प्रगृह्य किन्नराननम् ॥ १४७ ॥
मनाग एष नाभयं ददाति मुक्तजीवितः।
तदाननस्य शक्यते मया तदेकयाननम् ॥ १४८ ॥
इति प्रियाय वल्लभा वदन्ति यक्षयोषितः।
परं कपालपाणयः पिशाच यक्षराक्षसाः ॥ १४९ ॥
वदन्ति देहि मे मम समातिभक्ष्यचारिणः।
परिप्लवतीर्थशोणितापगासु धौतमूर्तयः १५० ॥

पितॄन् प्रतर्प्य देवताः समर्चयन्ति चामिषैः।
गजोडुपे सुसंस्थितास्तरन्ति शोणितं ह्रदम् ॥ १५१ ॥
इति प्रगाढसङ्कटे सुरासुरे सुसङ्गरे।
भयं समुज्झ्य दुर्जया भटाः स्फुटन्ति मानिनः ॥१५२॥
ततः शक्रो धनेशश्च वरुणः पवनोऽनलः।
यमोऽपि निर्ऋतिश्चापि दिव्यास्त्राणि महाबलाः॥१५३॥
आकाशे मुमुचुः सर्वे दानवानभिसन्ध्य ते।
अस्त्राणि व्यर्थतां जग्मुर्देवानां दानवान् प्रति ॥१५४॥
संरम्भेणाप्ययुध्यन्त संहतास्तुमुलेन च।
गतिं न विविदुश्चापि श्रान्ता दैत्यस्य देवताः ॥१५५॥
दैत्यास्त्रभिन्नसर्वाङ्गा ह्यकिञ्चित्करताङ्गताः।
परस्परं व्यलीयन्त गावः शीतार्दिता इव ॥ १५६॥
तदवस्थान् हरिर्दृष्ट्वा देवान् शक्रमुवाच ह।
ब्रह्मास्त्रं स्मर देवेन्द्र ! यस्याभङ्गो न विद्यते।
विष्णुना चोदितः शक्रः सस्माराऽस्त्रं महोजसम् ॥१५७

संपूजितं नित्यमरातिनाशनम्
समाहितं बाणमभित्रघातने।
धनुष्यजय्ये विनियोज्य बुद्धिमान्
अभूत्ततो मन्त्रसमाधिमानसः ॥ १५८ ॥
स मन्त्रमुच्चार्य यतान्तराशयो
वधाय दैत्यस्य धियाभिसन्ध्य तु।
विकृष्य कर्णान्तमकुण्ठदीधितिम्
मुमोच वीत्याम्बरमार्गसुन्मुखः ॥ १५९ ॥

अथासुरः प्रेक्ष्य महास्त्रमाहितम्
विहाय माया भवनौ व्यतिष्ठत ।
प्रवेपमानेन मुखेन शुष्यता
बलेन गात्रेण च सम्भ्रमाकुलः ॥ १६० ॥
ततस्तु तस्यास्त्रवराभिमन्त्रितः
शरोऽर्द्धचन्द्रप्रतिमो महारणे ।
पुरन्दरस्यासनबन्धुताङ्कतो
नवार्कबिम्बं वपुषा विडम्बयन् ॥ १५६ ॥
किरीटकोटिस्फुटकान्तिसङ्कटम्
सुगन्धिनानाकुसुमाधिवासितम् ।
प्रकीर्णधूमज्वलनाभमूर्द्धजम्
पपात जम्भस्य शिरः सकुण्डलम् ॥ १६२ ॥
तस्मिन् विनिहते जम्भे दानवेन्द्राः पराङ्मुखाः ।
ततस्ते भग्नसंकल्पाः प्रययुर्यत्र तारकः ॥ १६३ ॥
तांस्तु त्रस्तान् समालोक्य श्रुत्वा रोषमगात्तारकः ।
स जम्भं दानवेन्द्रन्तु सुरै रणमुखे हतम् ॥ १६४ ॥
सावलेपं ससंरम्भं सगर्वं सपराक्रमम् ।
साविष्कारमनाकारं तारको भावमाविशत् ॥ १६५ ॥
स जैत्रं रथमास्थाय सहस्रेण गरुत्मताम् ।
स कोपाद्दानवेन्द्राणां सुरैरणामुखे गतः ॥ १६६ ॥
सर्वायुधपरिष्कारः सर्वास्त्रपरिरञ्जितः ।
त्रैलोक्यर्द्धिसंपन्नः सुविस्तृतमहाननः ॥ १६७ ॥
रणायाभ्यपतत्तूर्णं सैन्येन महता वृतः ।
जम्भास्त्रक्षतसर्वाङ्गं त्यक्तैरावतदन्तिनम् ॥ १६८ ॥

सज्जं मातलिना शुभ्रं रथमिन्द्रस्य तेजसा ।
तप्तहेमपरिष्कारं महारत्नसमन्वितम् ॥ १६९ ॥
चतुर्योजनविस्तीर्णं सिद्धसङ्घपरिष्कृतम् ।
गन्धर्वकिन्नरोद्गीतमप्सरोनृत्यसङ्कुलम ॥ १७० ॥
सर्वायुधमसम्बाधं विचित्ररचनोज्ज्वलम् ।
तं रथं देवराजस्य परिवार्य्य समन्ततः ॥ १७१ ॥
दंशिता लोकपालास्तु तस्थुः मगरुडध्वजाः ।
ततश्चचाल वसुधा ततो रूक्षो मरुद्दवौ ॥ १७२ ॥
ततोऽम्बुधय उद्भूतास्ततो नष्टा रविप्रभा ।
ततस्तमःसमुद्भूतं नातोऽदृश्यन्त तारकाः ॥ १७३ ॥
ततो जज्वलुरस्त्राणि ततोऽकम्पत वाहिनी ।
एकतस्तारको दैत्यः सुरसङ्घास्तु चैकतः ॥ १७३ ॥
लोकायमादमेकञ्च जगत्पालनमेकतः ।
चराचराणि भूतानि सुरासुरविभेदतः ॥ १७५ ॥
तद्द्विधाप्येकतां यातं ददृशुः प्रेक्षका इव ।
यदस्तु किञ्चिल्लोकेषु त्रिषु सत्तास्वरूपकम् ।
तत्तत्राद्दृश्यदखिलं खिलीभूतविभूतिकम् ॥ १७६ ॥
शस्त्राणि तेजांसि धनानि धैर्यं सेनाबलं वीर्य्यपराक्रमौ च ।
सत्त्वौजसां तन्निकरं बभूव सुरासुराणां तपसो बलेन ॥ १७७ ॥
अथाभिमुखमायान्तं नवभिर्नतपर्वभिः ।
बाणैरनलकल्पाग्रैर्बिभिदुस्तारकं हृदि ॥ १७८ ॥
स तानचिन्त्य दैत्येन्द्रः सुरबाणान् गतान् हृदि ।
नवभिर्नवभिर्बाणैः सुरान् विव्याध दानवः ॥ १७९ ॥
जगद्भरणसम्भूतैः शल्यैरिव पुरःसरैः ।

ततश्छिन्नं शरव्रातं संग्रामे मुमुचुः सुराः ॥ १८० ॥
अनन्तरं च कान्तानामश्रुपातमिवानिशम् ।
तदप्राप्तं वियत्येव नाशयामास दानवः ॥ १८१ ॥
शरैर्यथा कुचरितैः प्रख्यातं परमागतम् ।
सुनिर्मलं क्रमायातं कुपुत्रः स्वं महाकुलम् ॥ १८२ ॥
ततो निवार्य तद्बाणजालं सुरभुजेरितम् ।
बाणैर्व्योम दिशः पृथ्वीं पूरयामास दानवः ॥ १८३ ॥
चिच्छेद पुङ्खदेशेषु स्वर्कैः स्थाने च लाघवात् ।
बाणजालैः सुतीक्ष्णाग्रैः कङ्कबर्हिणवाजितैः ॥ १८४ ॥
कर्णान्तकृष्टैर्विमलैः सुवर्णरजतोज्ज्वलैः ।
शास्त्रार्थैः संशयप्राप्तान् यथार्थान् वै विकल्पितैः ॥ १८५ ॥
ततः शतेन बाणानां शक्रं विव्याध दानवः ।
नारायणं च सप्तत्या नवत्या च हुताशनम् ॥ १८६ ॥
दशभिर्मारुतं मूर्ध्नि यमं दशभिरेव च ।
धनदञ्चैव सप्तत्या वरुणञ्च तथाष्टभिः ॥ १८७ ॥
विंशत्या निरृतिं दैत्यः पुनश्चाष्टाभिरेव च ।
विव्याध पुनरेकैकं दशभिर्दशभिः शरैः ॥ १८८ ॥
तथा च मातलिं दैत्यो विव्याध त्रिभिराशुगैः ।
गरुडं दशभिश्चैव स विव्याध पतत्रिभिः ॥ १८९ ॥
पुनश्च दैत्यो देवानां तिलशो नतपर्वभिः ।
चकार वर्मजातानि चिच्छेद च धनूंषि तु ।
ततो विकवचा देवा विधानुष्काः शरैः कृताः ॥१९०॥

अथान्यानि चापानि तस्मिन् सरोषा
रणे लोकपाला गृहीत्वा समस्तात् ।

शरैस्त्रयैर्दानवेन्द्रं ततस्तु
तदा दानवोऽमर्षसंरक्तनेत्रः ॥ १९१ ॥
शरानग्निकल्पान् ववर्षामराणाम्
ततो बाणमादाय कल्पानलाभम् ।
जघानोरसि क्षिप्रमिन्द्रं सुबाहुम्
महेन्द्रोऽप्यकम्पद्रथोपस्थ एव ॥ १९२ ॥
विलोक्यान्तरिक्षे सहस्रार्कबिम्बम्
पुनर्दानवो विष्णुमुद्भूतवीर्य्यम् ।
शराभ्यां जघानांसमूले सलीलम्
ततः केशवस्यापतच्छार्ङ्गमग्रे ॥ १९३ ॥
ततस्तारकः प्रेतनाथं पृषत्कै-
र्वसुं तस्य सव्ये स्मरन् क्षुद्रभावम् ।
शरैरग्निकल्पैर्जलेशस्य कायम्
रणे शोषयद् दुर्जयो दैत्यराजः ॥ १९४ ॥
शरैरग्निकल्पैश्चकाराशु दैत्य-
स्तथाराक्षसान् भीतभीतान् दिशासु ।
पृषत्कैश्च रूक्षैर्विकारप्रयुक्तं
चकारानिलं लीलयैवासुरेशः ॥ १९५ ॥
क्षणाल्लुब्धचित्ताः स्वयं विष्णुशक्रा-
नलाद्याः सुसंहत्य तीक्ष्णैः पृषत्कैः ।
प्रचक्रुः प्रचण्डेन दैत्येन सार्द्धम्
महासङ्गरं सङ्गरपासकल्पम् ॥ १९६ ॥
अथानस्य चापं हरिस्तीक्ष्णबाणै-
र्हनत् सारथिं दैत्यराजस्य हयम् ।

ध्वजं धूमकेतुः किरीटं महेन्द्रो
धनेशो धनुः काञ्चनानद्धपृष्ठम् ।
यमो बाहुदण्डं रथाङ्गानि वायु
र्निशाचारिणामीश्वरस्यापि वर्म्म ॥ १९७ ॥
दृष्ट्वा तद्युद्धममरैरकृत्रिमपराक्रमम् ।
दैत्यनाथः कृतं सङ्ख्ये स्वबाहुयुगबान्धवः ॥ १९८ ॥
मुमोच मुद्गरं भीमं सहस्राक्षाय सङ्गरे ।
दृष्ट्वा मुद्गरमायान्तमनिवार्यमथाम्बरे ॥ १९९ ॥
रथादाप्लुत्य धरणीमगमत् पाकशासनः ।
मुद्गरोऽपि रथोपस्थे पपात पवनध्वनः ॥ २०० ॥
स रथं चूर्णयामास न ममार च मातलिः ।
गृहीत्वा पट्टिशं दैत्यो जघानोरसि केशवम् ॥ २०१॥
स्कन्धे गरुत्मतः सोऽपि निषसाद विचेतनः ।
खड्गेन राक्षसेन्द्रस्य चकर्त नरवाहनम् ॥ २०२ ॥
यमञ्च पातयामास भूमौ दैत्यो भृशुण्डिना ।
वह्निञ्च भिन्दिपालेन ताडयामास मूर्द्धनि ॥२०३॥
वायुञ्च दोर्भ्यामुत्क्षिप्य पातयामास भूतले ।
जलेशञ्च धनुष्कोट्या कुट्टयामास कोपनः ॥ २०४ ॥
ततो देवनिकायानामेकैकं समरे ततः
जघान शरैरसंख्येयैर्दैत्येन्द्रोऽमितविक्रमः ॥ २०५ ॥
लब्धसंज्ञः क्षणाद्विष्णुश्चक्रं जग्राह दुर्द्धरम् ।
दानवेन्द्रवसासिक्तं पिशिताशनकोन्मुखम् ॥ २०६॥
मुमोच दानवेन्द्रस्य दृढं वक्षसि केशवः ।
पपात चक्रं दैत्यस्य हृदये भास्करद्युति ॥ २०७ ॥

व्यशीर्यत ततः काये नीलोत्पलमिवाश्मनि ।
ततो वज्रं महेन्द्रस्तु प्रमुमोचार्चितश्चिरम् ॥ २०८ ॥
यस्मिन् जयाशा शक्रस्य दानवेन्द्ररणे त्वभूत् ।
तारकस्य सुसंप्राप्य शरीरं शौर्यशालिनः ॥ २०९ ॥
व्यशीर्यत विकीर्णार्चिः शतधा खण्डताङ्गतम् ।
विनाशमगमन्मुक्तं वायुना सुरवक्षसि ॥ २१० ॥
ज्वलितं ज्वलनाभासमङ्कुशं कुलिशं यथा ।
विनाशमागतं दृष्ट्वा वायुश्चाङ्कुशमाहवे ॥ २११ ॥
रुष्टः शैलेन्द्रमुत्पाट्य पुष्पितद्रुमकन्दरम् ।
चिक्षेप दानवेन्द्राय पञ्चयोजनविस्तृतम् ॥ २१२ ॥
महीधरं तमायान्तं दैत्यः स्मितमुखस्तदा ।
जग्राह वामहस्ते शैलं कन्दुकलीलया ॥ २१३ ॥
ततो दण्डं समुद्यम्य कृतान्तः क्रोधमूर्च्छितः ।
दैत्येन्द्रं मूर्ध्नि चिक्षेप भ्राम्य वेगेन दुर्जयः ॥ २१४ ॥
सोऽसुरस्यापतन्मूर्ध्नि दैत्यस्तच्च न बुद्धवान् ।
कल्पान्तदहनालोक्या मजय्यां ज्वलनस्ततः ॥ २१५ ॥
शक्तिं चिक्षेप दुर्द्धर्षां दानवेन्द्राय संयुगे ।
न वा शिरीषमालेव सास्य वक्षस्यराजत ॥ २१६ ॥
ततः खड्गं समाकृष्य कोशादाकाशनिर्मलम् ।
भासितासितदिग्भागं लोकपालोऽपि निर्ऋतिः ॥ २१७ ॥
चिक्षेप दानवेन्द्राय तस्य मूर्ध्नि पपात च ।
पतितस्यागमत् खड्गः स शीघ्रं शतखण्डताम् ॥ २१८ ॥
जलेशस्तूग्रं दुर्द्धर्षं विषपावकभैरवम् ।
मुमोच पाशं दैत्यस्य भुजबन्धाभिलाषकः ॥ २१९ ॥

स दैत्यभुजमासाद्य सर्पः सद्यो व्यपद्यत ।
स्फुटितक्रूरविक्रूरदशनाहिर्महाहनुः ॥ २२० ॥
ततोऽश्विनौ समरुतःससाध्याः समहोरगाः ।
यक्षराक्षसगन्धर्वा दिव्यनानास्त्रपाणयः ॥ २२१ ॥
जघ्नुर्दैत्येश्वरं सर्वे संभूय सुमहाबलाः ।
न चास्त्राण्यस्य सज्जन्त गात्रे वज्राचलोपमे ॥२२२॥
ततो रथादवप्लुत्य तारको दानवाधिपः ।
जघान कोटिशो देवान् करपार्ष्णिभिरेव च ॥२२३॥
हतशेषाणि सैन्यानि देवानां विप्रदुद्रुवुः ।
दिशो भीतानि सन्त्यज्य रणोपकरणानि तु ॥ २२४ ॥
लोकपालांस्ततो दैत्यो बबन्धेन्द्रमुखान् रणे ।
सकेशवान् दृढैः पाशैः पशुमारः पशूनिव ॥ २२५ ॥
स भूयो रथमास्थाय जगाम स्वकमालयम् ।
सिद्धगन्धर्वसंघुष्टविपुलाचलमस्तकम् ॥ २२६ ॥
स्तूयमानो दिति सुतैरप्सरोभिर्विनोदितः ।
त्रैलोक्यलक्ष्मीस्तद्वेश्म प्राविशत् स्वपुरं यथा ॥ २२७ ॥
निषसादासने पद्मरागरत्नविनिर्मिते ।
ततः किन्नरगन्धर्वनागनारीविनोदितैः ।
सर्वां विनोद्यमानस्तु प्रचलन्मणिकुण्डलः ॥ २२८ ॥

इति श्रीमत्स्यपुराणे देवासुरसंग्रामे तारकजयलाभो नाम द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

## अथ त्रिपञ्चाशदधिकशततमोऽध्यायः

—+++—

सूत उवाच। प्रादुरासीत् प्रतीहारः शुभ्रनीलांशुकाम्बरः।
स जानुभ्यां महीं गत्वा पिहितास्यः स्वपाणिना ॥१॥
उवाचानाविलं वाक्यमल्पाक्षरपरिस्फुटम्।
दैत्येन्द्रमर्कवृन्दानां विभ्रन्तं भास्वरं वपुः ॥ २ ॥
कालनेमिः सुरान् बद्धांश्चादाय द्वारि तिष्ठति।
स विज्ञापयति स्थेयं क्व बन्दिभिरिति प्रभो ! ॥ ३ ॥
तच्छ्रुत्वाब्रवीद् दैत्यः प्रतीहारस्य भाषितम्।
यथेष्टं स्थीयतामेभिर्गृहं मे भुवनत्रयम् ॥ ४ ॥
केवलं पाशबन्धेन विमुक्तैरविलम्बितम्।
एवं कृते ततो देवा दूयमानेन चेतसा ॥ ५ ॥
जग्मुर्जगद्गुरुं द्रष्टुं शरणं कमलोद्भवम्।
निवेदितास्ते शक्राद्याः शिरोभिर्धरणिङ्गताः।
तुष्टुवुः स्पष्टवर्णार्थैर्वचोभिः कमलासनम् ॥ ६ ॥

देवा ऊचुः।

त्वमोङ्कारोऽस्यङ्कुराय प्रसूतो विश्वस्यात्मानन्तभेदस्य पूर्वम्।
सम्भूतस्यानन्तरं सत्त्वमूर्त्ते ! संहारेच्छोस्ते नमो रुद्रमूर्त्ते ! ॥७
व्यक्तिं नीत्वा त्वं वपुः स्वं महिम्ना
तस्मादण्डात् स्वाभिधानादचिन्त्यः।

द्यावापृथिव्यौ ऊर्द्धखण्डावराभ्याम्
ह्यण्डादस्मात्त्वं विभागङ्करोषि ॥ ८ ॥
व्यक्तं मरौ यज्जनायुस्तथाभूदेवं विद्मस्त्वत्प्रणीतश्च कास्ति ।
व्यक्तं देवा जन्मनः शाश्वतस्य द्यौस्ते मूर्द्धा लोचने चन्द्रसूर्यौ ९

व्यालाः केशाः श्रोत्ररन्ध्रा दिशस्ते
पादौ भूमिर्नाभिरन्ध्रे समुद्राः ।
मायाकारः कारणस्त्वं प्रसिद्धो
वेदैः शान्तो ज्योतिषा त्वं विमुक्तः ॥ १० ॥
वेदार्थेषु त्वां विवृण्वन्ति बुद्धा
हृत्पद्मान्तः सन्निविष्टं पुराणम् ।
त्वामात्मानं लब्धयोगा गृणन्ति
साङ्ख्यैर्यास्ताः सप्त सूक्ष्माः प्रणीताः ॥ ११ ॥
तासां हेतुर्याऽष्टमी चापि गीता
तस्यां तस्याङ्गीयसे वै त्वमन्त्यम् ।
दृष्ट्वा मूर्तिं स्थूलसूक्ष्मां चकार
देवैर्भावाः कारणैः कैश्चिदुक्ताः ॥ १२ ॥
सम्भूतास्ते त्वत्त एवादिसर्गे
भूयस्तां तां वासनान्तेऽभ्युपेयुः ।
त्वत्सङ्कल्पे नान्तमायाभिगूढः
कालोमिषोध्वस्तसंख्याविकल्पः ॥ १३ ॥
भावाभावव्यक्तिसंहारहेतु
स्त्वं सोऽनन्तस्त्वामत्र कर्त्तासि चात्मन् ! ।
येऽन्ये सूक्ष्माः सन्ति तेभ्योऽभिगीतः
स्थूला भावाश्चाहृतारश्च तेषाम् ॥ १४ ॥

तेभ्यः स्थूलेस्तैः पुराणैः प्रतीतोभूतम् भव्यं चैव मद्भूतिभाजाम्।
भावे भाते भावितं त्वा युनक्ति युक्तं युक्तं व्यक्तिभावाश्चिरसत्र।
इत्थस्त्वेवो भक्तिभाजां शरण्य स्वाता गोप्ता नो भवानन्तमूर्त्तिः॥१५॥

विरिञ्चिममराः स्तुत्वा ब्रह्माणमविकारिणम्।
तस्थुर्मनोभिरिष्टार्थसम्प्राप्तिप्रार्थना स्ततः॥ १६॥
एवं स्तुतो विरिञ्चिस्तु प्रसादं परमं गतः।
अमरान्वरदेनाह वामहस्तेन निर्द्दिशन्॥ १७॥
ब्रह्मोवाच। नारी याऽभर्तृकाऽकस्मात् तनुस्ते त्यक्तभूषणा।
न राजते तथा शक्र! म्लानवक्त्र शिरोरुहा॥ १८॥
हुताशन! विमुक्तोऽपि न धूमेन विराजसे।
भस्मनेव प्रतिच्छन्नो दग्धदावशिरोषितः॥ १९॥
यमामयमयेनेव शरीरे त्वं विराजसे।
दण्डसंप्रालम्बनेनेव ह्यक्तच्छ्मस्तु पदे पदे॥ २०॥
रजनीचरनाथोऽपि किं भीत इव भाषसे।
राक्षसेन्द्रक्षतारातिं त्वमरातिक्षतो यथा॥ २१॥
तनुस्ते वरुणोच्छुष्का परीतस्येव वह्निना।
विमुक्तरुधिरं पाशं फणिभिः प्रविलोकयन्॥ २२॥
वायो! भवान् विचेतस्कस्त्वं स्निग्धैरिव निर्जितः।
किन्त्वं बिभेषि धनद! संन्यस्येव कुबेरताम्॥ २३॥
रुद्रास्त्रिशूलिनः सन्तो वदध्वं बहुशूलताम्।
भवन्तः केन तत् क्षिप्तं तेजस्तु भवतामपि॥ २४॥
अकिञ्चित्करतां यातः करस्तेन विभासते।
अलं नीलोत्पलाभेन चक्रेण मधुसूदन!॥ २५॥
किं त्वयानुदरालीनभुवनं प्रविलोकनम्।

क्रियते स्मितिताखेण भवता विश्वतोमुख ! ॥ २६ ॥
एवमुक्ताः सुरास्तेन ब्रह्मणा ब्रह्ममूर्तिना ।
वाचां प्रधान भूतत्वान्मारुतं तमचोदतन् ॥ २७ ॥
अथ विष्णु मुखोद्दैवैः श्वसनः प्रतिबोधितः।
चतुर्मुखं तदा प्राह चराचर गुरुं विभुम् ॥ २८ ॥
न तु वेत्सि चराचर भूतगतम्
भवभावमतीव महानुच्छ्रितः प्रभवः ।
पुनरर्थि वचोविस्तृत श्रवणा-
पम कौतुक भावकृतः ॥२६ ॥
त्वमनन्त करोषि जगद्भवताम्
स चराचर गर्भविनिन्न गुणाम् ।
अमरासुर मितन्दशेषमपि
त्वयितुल्य महाजनकोऽसि यतः ।
पितुरस्ति तथापि कृतोविकृतिः
सगुणो विगुणो बलवानव्रतः ॥ ३० ॥
भवतोवरलाभनिवृत्तभयः
कुलिशाङ्क सुतोदितिजोऽतिबलः ।
सचराचर निर्मथनं किमिति
क्रितवसु कृतोविहितो भवता ॥ ३१ ॥
क्विलदेव त्वयास्थित ये जगताम्
महदद्भुत चित्रविचित्र गुणाः ।
अपितुष्टि कृतः श्रुत कामफला
विहितादिजनायक देवगणाः ॥ ३२ ॥
अपिनाकम भूक्तिलयन्न भुजाम्

भवतो विनियोगवशात्ततम्।
अपहृत्य विमानगणं स कृतो-
दितिजेन महामरुभूमिसमः॥२३
कृतवानसि सर्वगुणातिशयम्
यमशेषमहीधरराजतया।
समभिज्ञितभावविधिः स च गिरि-
र्गगनेन सदोच्छ्रयतां हि गतः॥ २४॥
अधिवासविहारविधावुचितो-
दितिजेन पविक्षतशृङ्गतटः।
परिलुण्ठितरत्नगुहानिवहो
बहुदैत्यसमाश्रयताङ्कमितः॥ २५॥
सुरराज! स तस्य भयेन गतम्
व्यदधाद्‍शरीर इतोऽपि वृथा।
उपयोग्यतया विहितं सुचिरम्
विमलद्युति पूरितदिग्वदनम्॥ २६॥
भवतैव विनिर्मितमादियुगे
सुरहेतिसमूहमनल्पमिदम्।
दितिजस्य शरीरमवाप्य गतम्
शतधा मतिभेदमिवाल्पमनाः॥ २७॥
आसारधूलिध्वस्ताङ्गा द्वारस्था स्म कदर्थिनः।
लब्धप्रवेशाः कृच्छ्रेण वयं तस्यामरद्विषः॥ २८॥
सभायाममरा देव! निकृष्टेऽप्युपवेशिताः।
वेत्रहस्तैरजल्पन्तस्ततोऽपहसितास्तु तैः॥ २९॥

महार्याः सिद्धसर्वार्था भवन्तः स्वल्पभाषिणः ।
चाटुयुक्तमथो कर्म्म ह्यमरा बहुभाषत ॥ ४० ॥
सभयं दैत्यसिंहस्य सप्तकक्ष्य तु संस्थिताः ।
वदतीति च दैत्यस्य प्रेष्यैर्विहसिता बहु ॥ ४१ ॥
ऋतवो मूर्तिमन्तस्तमुपासन्ते ह्यहर्निशम् ।
कृतापराधसन्त्रासं न त्यजन्ति कदाचन ॥ ४२ ॥
तन्त्रीत्रयलयोपेतं सिद्धगन्धर्वकिन्नरैः ।
सुरागमुपधानित्यं गीयते तस्य वेश्मसु ॥ ४३ ॥
हन्ताकृतोपकरणैर्मित्राणि गुरुलाघवैः ।
शरणागतसन्त्यागी त्यक्तसत्यपरिग्रहः ॥ ४४ ॥
इति निःशेषमथवा निःशेषं वै न शक्यते ।
तस्याविनयमाख्यातुं स्रष्टा तत्र परायणम् ॥ ४५ ॥
इत्युक्तः स्वात्मभूर्देवः सुरैर्दैत्यविचेष्टितैः ।
सुरानुवाच भगवांस्ततः स्मितमुखाम्बुजः ॥ ४६ ॥
ब्रह्मोवाच । अवध्यस्तारको दैत्यः सर्वैरपि सुरासुरैः ।
यस्य वध्यः स नाद्यापि जातस्त्रिभुवने पुमान् ॥ ४७ ॥
मया स वरदानेन छन्दयित्वा निवारितः ।
तपसः साम्प्रतं राजा त्रैलोक्यदहनात्मकात् ॥ ४८ ॥
स च वव्रे वधं दैत्यः शिशुतः सप्तवासरात् ।
स सप्तदिवसो बालः शङ्कराद्यो भविष्यति ॥ ४९ ॥
तारकस्य निहन्ता स भास्कराभो भविष्यति ।
साम्प्रतं चाप्यपत्नीकः शङ्करो भगवान् प्रभुः ॥ ५० ॥
यच्चाह मुक्तवान् यस्या ह्युत्तानकरता सदा ।
उत्तानो वरदः पाणिरेष देव्याः सदैव तु ॥ ५१ ॥

हिमाचलस्य दुहिता सा तु देवी भविष्यति।
तस्याः सकाशाच्छंभोः शर्वस्त्वरण्यां पावको यथा॥ ५२
जनयिष्यति तं प्राप्य तारकोऽभिभविष्यति।
मयाप्युपायः स कृतो यथैवं हि भविष्यति॥ ५३॥
शिवस्यापत्यस्य विभवो विनश्येत्तदनन्तरम्।
स्तोककालं प्रतीक्षध्वं निर्विशङ्केन चेतसा॥ ५४॥
इत्युक्तास्त्रिदशास्तेन साक्षात् कमलजन्मना।
जग्मुस्तं प्रणिपत्येशं यथायोगं दिवौकसः॥ ५५॥
ततो गतेषु देवेषु ब्रह्मा लोकपितामहः।
निशां सस्मार भगवान् स्वतनोः पूर्वसम्भवाम्॥ ५६॥
ततो भगवती रात्रिरुपतस्थे पितामहम्।
तां विविक्ते समालोक्य ब्रह्मोवाच विभावरीम्॥ ५७॥
ब्रह्मोवाच। विभावरि! महत्कार्यं विबुधानामुपस्थितम्।
तत्कर्त्तव्यं त्वया देवि! शृणु कार्य्यस्य निश्चयम्॥ ५८॥
तारको नाम दैत्येन्द्रः सुरकेतुरनिर्जितः।
तस्याभावाय भगवान् जनयिष्यति चेश्वरः॥ ५९॥
सुतं स भविता तस्य तारकस्यान्तकारकः।
शङ्करस्याभवत् पत्नी सती दक्षसुता तु या॥ ६०॥
सा मृता कुपिता देवी कस्मिंश्चित्कारणान्तरे।
भविता हिमशैलस्य दुहिता लोकभावनी॥ ६१॥
विरहेण हरस्तस्या मत्वा शून्यं जगत्त्रयम्।
तपस्यन् हिमशैलस्य कन्दरे सिद्धसेविते॥ ६२॥
प्रतीक्षमाणस्तज्जन्म कञ्चित्कालं निवत्स्यति।
तयोः सुरतसंसक्तयोर्भविता यो महाबलः॥ ६३॥

स भविष्यति दैत्यस्य तारकस्य विनाशकः ।
जातमात्रा तु सा देवी स्वल्पसंज्ञा च भामिनी ॥६४॥
विरहोत्कण्ठिता गाढं हरसङ्गमलालसा ।
तयोः सुतप्ततपसोः संयोगः स्याच्छुभानने ! ॥ ६५ ॥
तत स्ताभ्यान्तु जनितः स्वल्पो वाक्कलहोऽभवेत् ।
ततोऽपि संशयो भूय स्तारकं प्रतिहृष्यते ॥ ६६ ॥
तयोः संयुक्तयोस्तस्मात् सुरतासक्तिकारणे ।
विघ्नस्त्वया विधातव्यो यथा ताभ्यां तथा शृणु ॥६७॥
गर्भस्थाने च तस्यातुः स्वेन रूपेण रञ्जय ।
ततो विहाय सर्वत्वां विश्रान्तो नर्मपूर्वकम् ॥ ६८ ॥
भर्त्सयिष्यति तां देवीं ततः सा कुपिता सती ।
प्रयास्यति तपश्चर्तुं तत्तस्मात्तपसे पुनः ॥ ६९ ॥
जनयिष्यति यं शर्वादमितद्युतिमण्डितम् ।
स भविष्यति हन्ता वै सुरारीणाममंशयम् ॥ ७० ॥
त्वयापि दानवा देवि ! हन्तव्या लोकदुर्जयाः ।
यावच्च न सती देहसंक्रान्तगुणसञ्चया ॥ ७१ ॥
तत् सङ्गमेन तावत्त्वं दैत्यान् हन्तुं न शक्ष्यसे ।
एवं कृते तपस्तप्ता सृष्टिसंहारकारिणी ॥ ७२ ॥
समाप्तनियमा देवी यदा सोमा भविष्यति ।
तदा त्वमेव तद्रूपं शैलजा प्रतिपत्स्यते ॥ ७३ ॥
तनुरूवापि सहजा सैकानंशा भविष्यति ।
रूपांशेन तु संयुक्ता त्वमुमायां भविष्यसि ॥ ७४ ॥
एकानंशेति लोकस्त्वां वरदे ! पूजयिष्यति ।
भेदैर्बहुविधाकारैः सर्वगा कामसाधिनी ॥ ७५ ॥

ओङ्कारवक्त्रा गायत्रीत्व मिति ब्रह्मवादिभिः।
आक्रान्ति रूर्जिताकारा राजभिश्च महाभुजैः ॥७६॥
त्वं भूरिति विशां माता शूद्रैः शैवीति पूजिता।
क्षान्तिर्मुनीनामक्षोभ्या दयानियमिनामिति ॥७७॥
त्वं महोपायसन्दोहा नीतिर्नयविसर्पिणाम्।
परिच्छित्तिस्त्वमर्थानां त्वं मही प्राणिहृच्छया॥७८॥
त्वं मुक्तिः सर्वभूतानां त्वं गतिः सर्वदेहिनाम्।
त्वञ्च कीर्तिमतां कीर्तिस्त्वं मूर्तिः सर्वदेहिनाम् ॥७९॥
रतिस्त्वं रक्तचित्तानां प्रीतिस्त्वं हृष्टदर्शिनाम्।
त्वं कान्तिः कृतभूषाणां त्वं शान्तिर्दुःखकर्म्मणाम्॥८०॥
त्वं भ्रान्तिः सर्वबोधानां त्वं गतिः क्रतुयाजिनाम्।
जलधीनां महावेला त्वञ्च लीला विलासिनाम् ॥८१॥
सम्भूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकपालिनी।
त्वं कालरात्रिर्निःशेषभुवनावलिनाशिनी ॥८२॥
प्रियकान्तमहानन्ददायिनी त्वं विभावरी।
इत्यनेकविधैर्देवि! रूपैर्लोके त्वमर्चिता ॥ ८३ ॥
ये त्वां स्तोष्यन्ति वरदे! पूजयिष्यन्ति वापि ये।
ते सर्वकामानाप्स्यन्ति नियता नात्र संशयः ॥ ८४ ॥
इत्युक्ता तु निशा देवी तथेत्युक्त्वा कृताञ्जलिः।
जगाम त्वरिता तूर्णं गृहं हिमगिरेः परम् ॥ ८५ ॥
तत्रासीनां महाहर्म्ये रत्नभित्तिसमाश्रयाम्।
ददर्श मेनामापाण्डुच्छविवक्त्रसरोरुहाम् ॥८६॥
किञ्चिच्छ्याममुखोदग्रस्तनभारावनामिताम्।
महौषधिगणाबद्धमन्त्रराजनिषेविताम् ॥ ८७ ॥

उद्वहत्कनकोत्सङ्गजीवरत्नामहोरगाम् ।
मणिदीपगणज्योतिर्महालोकप्रकाशिते ॥ ८८ ॥
प्रकीर्णबहुसिद्धार्थे मनोजपरिवारके ।
पवित्रपुष्पकसच्छन्नभूशय्याकरणोज्ज्वले ॥ ८९ ॥
धूपामोदमनोरम्ये सज्जसर्वोपयोगिके ।
ततः क्रमेण दिवसे गते दूरं विभावरी ॥ ९० ॥
व्यजृम्भत सुखोदर्के ततो मेनामहागृहे ।
प्रसुप्तप्रायपुरुषे निद्राभूतोपचारिके ॥ ९१ ॥
स्फुटालोके गृहभूति भ्रान्तिराशिविहङ्गमे ।
रजनीचरभूतानां सङ्घैरावृतचत्वरे ॥ ९२ ॥
गाढकण्ठग्रहासक्तसुभगेष्टजने ततः ।
किञ्चिदाकुलतां प्राप्ते मेनानिवाम्बुजहृदये ॥ ९३ ॥
आविवेश मुखे रात्रिः सुचिरस्फुटसङ्गमा ।
जन्मादाया जगन्मातुः क्रमेण जठरान्तरे । ९४ ॥
आविवेशान्तरं जन्म मन्यमाना त्रपा तु वै ।
अरज्ञयच्च विन्ध्येऽया गुहारण्ये विभावरी ॥ ९५ ॥
ततो जगत्पतिप्राणहेतुर्हिमगिरिप्रिया ।
ब्राह्मे मुहूर्ते सुभगे वरसूयत गुहारणिम् ॥ ९६ ॥
तस्यान्तु जायमानायां जन्तवः स्थाणुजङ्गमाः ।
अभवन् सुखिनः सर्वे सर्वलोकनिवासिनः ॥ ९७ ॥
नारकाणामपि तदा सुखं स्वर्गसमं महत् ।
अभवत् क्रूरसत्त्वानां चेतः शान्तं च देहिनाम् ॥ ९८ ॥
ज्योतिषामपि तेजस्त्वमभवत् सुरताम्रता ।
वनाश्रिताश्चौषधयः स्वादुवन्ति फलानि च ॥ ९९ ॥

गन्धवन्ति च माल्यानि विमलञ्च नभोऽभवत् ।
मारुतश्च सुखस्पर्शो दिशाश्च सुमनोहराः ॥ १०० ॥
तेन चोद्भूतफलितपरिपाकगुणोज्ज्वलाः ।
अभवत् पृथिवी देवी शालिमालाकुलापि च ॥१०१॥
तपांसि दीर्घचीर्णानि मुनीनां भावितात्मनाम् ।
तस्मिन् गतानि साफल्यं काले निर्मलचेतसाम्॥१०२॥
विस्मृतानि च शस्त्राणि प्रादुर्भावं प्रपेदिरे ।
प्रभावस्तीर्थमुख्यानां तदा पुण्यतमोऽभवत् ॥ १०३॥
अन्तरिक्षे सुराश्चासन् विमानेषु सहस्रशः ।
समहेन्द्रहरिब्रह्मवायुवह्निपुरोगमाः ॥ १०४ ॥
पुष्पवृष्टिं प्रमुमुचुस्तस्मिंस्तु हिमभूधरे ।
जगु गन्धर्वमुख्याश्च ननृतुश्चाप्सरोगणाः ॥ १०५ ॥
मेरुप्रभृतयश्चापि मूर्तिमन्तो महाबलाः ।
तस्मिन् महोत्सवे प्राप्ते दिव्यप्रभृतपाणयः ॥ १०६ ॥
सरितः सागराश्चैव समाजग्मुश्च सर्वगः ।
हिमशैलोऽभवल्लोके तथा सर्वैश्चराचरैः ॥ १०६ ॥
सेव्यश्चाप्यभिगम्यश्च स श्रेयांश्चाचलोत्तमः ।
अनुभूयोत्सवं देवा जग्मुः स्वानालयान् मुदा ॥१०७॥
देवगन्धर्वनागेन्द्रशैलशीलावनीगुणैः ।
हिमशैलसुता देवी स्वयं पूर्विकया ततः ॥ १०८ ॥
क्रमेण वृद्धिं मानीता लक्ष्मीं वा नलसैबुधैः ।
क्रमेण रूपसौभाग्यप्रबोधैर्भुवनत्रयम् ॥ १०९ ॥
अजयद्भूषयश्चापि निःसाधारैर्नगात्मजा ।
एतस्मिन्नन्तरे शक्रो नारदं देवसम्मतम् ॥ ११० ॥

देवर्षिमथ सस्मार कार्य्यसाधनसत्वरम् ।
स्मृतिं शक्रस्य विज्ञाय जातान्तु भगवांस्तदा ॥ १११ ॥
आजगाम मुदा युक्तो महेन्द्रस्य निवेशनम् ।
तं सुदृष्ट्वा सहस्राक्षः समुत्थाय महासनात् ॥ ११२ ॥
यथार्हेण तु पाद्येन पूजयामास वासवः ।
शक्रप्रणीतान्तां पूजां प्रतिगृह्य यथाविधि ॥ ११३ ॥
नारदः कुशलं देवमपृच्छत् पाकशासनम् ।
पृष्टे च कुशले सक्तः प्रोवाच वचनं प्रभुः ॥ ११४ ॥
इन्द्र उवाच । कुशलस्याङ्कुरे तावत् सम्भूते भुवनत्रये ।
तत्फलोद्भवसम्पत्तौ त्वं भवातन्द्रितो मुने ! ॥ ११५ ॥
वेत्सि चैतत् समस्तं त्वं तथापि परिचोदकः ।
निर्वृतिं परमां याति निवेद्यार्थं सुहृज्जने ॥ ११६ ॥
तद्यथा शैलजा देवी योगं यायात् पिनाकिना ।
शीघ्रं तदुद्यमः सर्वैरस्मत्पक्षैर्विधीयताम् ॥ ११७ ॥
अवगम्यार्थ मखिलन्तत आमन्त्र्य नारदः ।
शक्रं जगाम भगवान् हिमशैलनिवेशनम् ॥ ११८ ॥
तत्र द्वारि स विप्रेन्द्रश्चित्रवेत्रलताकुले ।
वन्दितो हिमशैलेन निर्गतेन पुरोमुनिः ।
सह प्रविश्य भवनं भुवोभूषणताङ्गतम् ।
निविदिते स्वयं हैमे हिमशैलेन विष्टृते ॥ १२० ॥
महासने मुनिवरो निषसादातुलद्युतिः ।
यथार्हं चार्घ्यपाद्यञ्च शैलस्तस्मै न्यवेदयत् ॥ १२१ ॥
मुनिस्तु प्रतिजग्राह तमर्घं विधिवत्तदा ।
गृहीतार्घं मुनिवरमपृच्छत्श्लक्ष्णया गिरा ॥ १२२ ॥

कुशलं तपसः शैलः शनैः स्फुल्लाननाम्बुजः।
मुनिरप्यद्रिराजानमपृच्छत् कुशलन्तदा॥ १२३॥
नारद उवाच। अहोऽवतारिताः सर्वे सन्निवेशे महागिरे!।
पृथुत्वं मनसा तुल्यं कन्दराणां तथाचल!॥ १२४॥
गुरुत्वन्ते गुणौघानां स्थावरादतिरिच्यते।
प्रसन्नता च तोयस्य मनसोऽप्यधिका च ते॥ १२५॥
न लक्षयामः शैलेन्द्र! शिष्यते कन्दरोदरात्।
न च लक्ष्मी तथा स्वर्गे कृताधिकतया स्थिता॥१२६॥
नानातपोभिर्मुनिभिः ज्वलनार्कसमप्रभैः।
पावनैः पावितो नित्यं त्वत्कन्दरसमाश्रितैः॥१२७
अवमत्य विमानानि स्वर्गवासविरागिणः।
पितुर्गृह इवासन्ना देवगन्धर्वकिन्नराः॥ २८॥
अहो! धन्योऽसि शैलेन्द्र! यस्य ते कन्दरं हरः।
अध्यास्ते लोकनाथोऽपि समाधानपरायणः॥ १२९॥
इत्युक्तवति देवर्षौ नारदे सादरङ्गिरा।
हिमशैलस्य महिषी मेना मुनिदिदृक्षया॥ १३०॥
अनुयाता दुहिता तु स्वल्पालिपरिचारिका।
लज्जाप्रणयनम्राङ्गी प्रविवेश निवेशनम्॥ १३१॥
तत्र स्थितो मुनिवरः शैलेन सहितो वशी।
दृष्ट्वा तु तेजसोराशिं मुनिं शैलप्रिया तदा॥१३२॥
ववन्दे गूढवदना पाणिपद्मकृताञ्जलिः।
तां विलोक्य महाभागो महर्षिरमितद्युतिः॥१३३॥
आशीर्भिरमृतोद्गाररूपाभिस्तां व्यवर्धयं।
ततो विस्मितचित्ता तु हिमवद्गिरिपुत्रिका॥१३४॥

उद्दैक्षन्नारदं देवी मुनिमद्भुतरूपिणम् ।
एहि वत्सेति चाप्युक्ता ऋषिणा स्निग्धया गिरा॥१३५
कण्ठे गृहीत्वा पितरमुत्सङ्गे समुपाविशत् ।
उवाच माता तां देवी मभिवन्दय पुत्रिके ! ॥ १३६ ॥
भगवन्तं ततो धन्यं पतिमाप्स्यसि सम्मतम् ।
इत्युक्ता तु ततो माता वस्त्रान्तपिहिताभना ॥१३७॥
किञ्चित् कम्पितमूर्द्धा तु वाक्यं नोवाच किञ्चन ।
ततः पुन रुवाचेदं वाक्यं माता सुतान्तदा ॥ १३८ ॥
वत्से ! वन्दय देवर्षिं ततो दास्यामि ते शुभम् ।
रत्नक्रीडनकं रम्यं स्थापितं यच्चिरं मया ॥ १३९ ॥
इत्युक्ता तु ततोवेगा दुद्धृत्य चरणौ तदा ।
ववन्दे मूर्ध्नि सन्धाय करपङ्कजकुड्मलम् ॥ १४० ॥
कृते तु वन्दने तस्या माता सखीमुखेन तु ।
चोदयामास शनकै स्तस्याः सौभाग्यशंसिनाम् ॥१४१॥
शरीरलक्षणानान्तु विज्ञानाय तु कौतुकात् ।
स्त्रीस्वभावाद्दुहितुश्चिन्तां हृदि समुद्वहन् ॥ १४२ ॥
ज्ञात्वा तदिङ्गितं शैलो महिष्या हृदयेन तु ।
अनुदीर्णामतिर्मेने रम्यमेतदुपस्थितम् ॥ १४३ ॥
चोदितः शैलमहिषी सख्या मुनिवरस्तदा ।
स्मिताननो महाभागो वाक्यं प्रोवाच नारदः ॥१४४॥
न जातोऽस्याः पतिर्भद्रे ! लक्षणैश्च विवर्जिता ।
उत्तानहस्ता सततं चरणैर्व्यभिचारिभिः ॥ १४५ ॥
स्वच्छायया भविष्येयं किमन्यद्बहु भाषते ।
श्रुत्वैतत्सम्भ्रमाविष्टो ध्वस्तधैर्यो महाबलः ॥ १४६ ॥

नारदं प्रत्युवाचाथ साश्रुकण्ठो महागिरिः ।
हिमवानुवाच । संसारस्यातिदोषस्य दुर्विज्ञेया गतिर्यतः ॥४७
सृष्ट्यां चावश्यभाविन्यां केनाप्यतिशयात्मना ।
कर्त्रा प्रणीता मर्य्यादा स्थिता संसारिणामियम् ॥१४८॥
यो जायते हि यद्बीजो जनितुः सह्यसार्थकः ।
जनिता चापि जातस्य न कश्चिदिति यत् स्फुटम् ॥१४९
स्वकर्मणैव जायन्ते विविधा भूतजातयः ।
अण्डजो ह्यण्डजाज्जातः पुनर्जायेत मानवः ॥ १५० ॥
मानुषाच्च सरीसृपां मनुष्यत्वे न जायते ।
तत्रापि जातौ श्रेष्ठायां धर्म्मस्योत्कर्षणेन तु ॥१५१॥
अपुत्रजन्मनः शेषाः प्राणिनः समवस्थिताः ।
मनुजास्तत्र जायन्ते यतो न गृहधर्मिणः ॥ १५२ ॥
आश्रमाश्रमं प्राप्तिर्ब्रह्मचारिव्रतादनु ।
तस्य कर्तुर्नियोगेन संसारो येन वर्द्धितः ॥ १५३ ॥
संसारस्य कृतो हेतुः सर्वस्युर्य्येदतिग्रहाः ।
अतः कर्ता तु शास्त्रेषु सुतलाभः प्रशंसितः ॥१५४
प्राणिनां मोहनार्थाय नरकत्राणसंश्रयात् ।
स्त्रिया विरहिता सृष्टिर्जन्तूनां नोपपद्यते ॥ १५५ ॥
स्त्रीजातिस्तु प्रकृत्यैव कृपणा दैन्यभागिनी ।
शास्त्रालोचनसामर्थ्यमुज्झितं तासु वेधसा ॥ १५६ ॥
शास्त्रे सूक्तमसन्दिग्धं बहुवारं महाफलम् ।
दशपुत्रसमा कन्या या न स्याच्छीलवर्जिता ॥१५७॥
वाक्यमेतत् फलभ्रष्टं पुंसि ग्लानिकरम्परम् ।
कन्या हि कृपणाऽशोच्या पितुर्दुःखविवर्द्धिनी ॥१५८॥

यापि स्यात् पूर्णसर्वाङ्गा पतिपुत्रधनादिभिः ।
किं पुनर्दुर्भगा हीना पतिपुत्रधनादिभिः ॥ १५९ ॥
त्वं चोक्तवान् सुता या मे शरीरे दोषसंग्रहम् ।
अहो ! मुह्यामि शुष्यामि ग्लामि सीदामि नारद ! ॥ १६० ॥
अयुक्तमथ वक्तव्यमप्राप्यमपि साम्प्रतम् ।
अनुग्रहेण मे छिन्धि दुःखं कन्याश्रयं मुने ! ॥ १६१ ॥
परिच्छिन्नेऽप्यसन्दिग्धे मनः परिभवाश्रयम् ।
तृष्णा मुष्णाति निष्णाता फललोभाश्रया शुभा ॥ १६२ ॥
स्त्रीणां हि परमं जन्म कुलानामुभयात्मनाम् ।
इहामुत्र सुखायोक्तं सत्पतिप्राप्तिसंज्ञितम् ॥ १६३ ॥
दुर्लभः सत्पतिः स्त्रीणां विगुणोऽपि पतिः किल ।
न प्राप्यते विना पुण्यैः पतिर्नार्या कदाचन ॥ १६४ ॥
यतो निःसाधनो धर्मः परित्राणोज्झिता रतिः ।
धनं जीवितपर्याप्तं पत्यौ नार्याः प्रतिष्ठितम् ॥ १६५ ॥
निर्धनो दुर्भगो मूर्खः सर्वलक्षणवर्जितः ।
दैवतं परमं नार्याः पतिरुक्तः सदैव हि ॥ १६६ ॥
त्वया चोक्तं हि दैवर्षे ! न जातोऽस्याः पतिः किल ।
एतद्दौर्भाग्यमतुलमसंख्यं गुरु दुःसहम् ॥ १६७ ॥
चराचरे भूतसर्गे यद्यापि च नो मुने ।
न स जात इति ब्रूषे तेन मे व्याकुलं मनः ॥ १६८ ॥
मनुष्यदेवजातीनां शुभाशुभनिवेदकम् ।
लक्षणं हस्तपादादौ विहितैर्लक्षणैः किल ॥ १६९ ॥
सेयमुत्तानहस्तेति त्वयोक्ता मुनिपुङ्गव ! ।
उत्तानहस्तता प्रोक्ता याचतामेव नित्यदा ॥ १७० ॥

शुभोदयानां धन्यानां न कदाचित् प्रयच्छताम्।
स्वच्छायया स्याशरणौ त्वयोक्तौ व्यभिचारिणौ ॥१७१॥
तत्रापि श्रेयसां श्वाशा मुने! तु प्रतिभाति नः।
शरीरलक्षणाश्चान्ये पृथक् फलनिवेदिनः॥ १७२॥
सौभाग्यधनपुत्रायुःपतिलाभानुशंसनम्।
तैश्च सर्वैर्विहीनेयं त्वमात्थ मुनिपुङ्गव! ॥ १७३ ॥
त्वं मे सर्वं विजानासि सत्यवागसि चाप्यतः।
मुह्यामि मुनिशार्दूल! हृदयं दीर्यतीव मे ॥ १७४ ॥
इत्युक्त्वा विरतः शैलो महादुःखविचारणात्।
श्रुत्वेतदखिलं तस्माच्छैलराजमुखाम्बुजात् ॥१७५॥
स्मितपूर्वमुवाचेदं नारदो देववादितः।
नारद उवाच। हर्षस्थानेऽपि महति त्वया दुःखं निरूप्यते ॥१७६॥
अपरिच्छिन्नवाक्यार्थे मोहं यासि महागिरे!।
इमां शृणु गिरं मत्तो रहस्यपरिनिष्ठिताम् ॥१७७॥
समाहितो महाशैल! मयोक्तस्य विचारणे।
न जातोऽस्याः पतिर्देव्या यन्मयोक्तं महाबल! ॥१७८॥
न स जातो महादेवो भूतभव्यभवोद्भवः।
शरण्यः शाश्वतः शास्ता शङ्करः परमेश्वरः ॥ १७९ ॥
ब्रह्मविष्णिन्द्रमुनयो जन्ममृत्युजरार्दिताः।
तस्यैते परमेशस्य सर्वे क्रीडनका गिरे! ॥ १८० ॥
आस्ते ब्रह्मा तदिच्छातः संभूतो भुवनप्रभुः।
विष्णुर्युगे युगे जातो नानाजातिर्महातनुः ॥ १८१॥
मन्यसे मायया जातं विष्णुञ्चापि युगे युगे।

आत्मनो न विनाशोऽस्ति स्थावरान्तेऽपि भूधर !॥१८२
संसारे जायमानस्य म्रियमाणस्य देहिनः।
नश्यते देह एवात्र नात्मनोनाश उच्यते॥ १८३॥
ब्रह्मादिस्थावरान्तोऽयं संसारो यः प्रकीर्तितः।
स जन्ममृत्युदुःखार्त्तो ह्यवशः परिवर्त्तते॥ १८४॥
महादेवोऽचलः स्थाणुर्न जातो जनकोऽजरः।
भविष्यति पतिः सोऽस्या जगन्नाथो निरामयः॥१८५॥
यदुक्तञ्च मया देवी लक्षणैर्वर्जिता तव।
शृणु तस्यापि वाक्यस्य सम्यक्त्वेन विचारणम्॥१८६॥
लक्षणं दैविको ह्यङ्कः शरीरावयवाश्रयः।
सर्वायुर्धनसौभाग्यपरिमाणप्रकाशकः॥ १८७॥
अनन्तस्याप्रमेयस्य सौभाग्यस्यास्य भूधर !।
नैवाङ्को लक्षणाकारः शरीरे संविधीयते॥ १८८॥
अतोऽस्या लक्षणं गात्रे शैल ! नास्ति महामते !।
यथाह मुक्तवानस्या ह्युत्तानकरतां सदा॥ १८९॥
उत्तानो वरदः पाणिरेष देव्याः सदैव तु।
सुरासुरमुनिव्रातवरदेयं भविष्यति॥ १९०॥
यथा प्रोक्तं तदा पादौ स्वच्छाया व्यभिचारिणौ।
अस्याः शृणु ममात्रापि वाग्युक्तिं शैलसत्तम !॥१९१॥
चरणौ पद्मसङ्काशावस्याः स्वच्छनखोज्ज्वलौ।
सुरासुराणां नमतां किरीटमणिकान्तिभिः॥१९२॥
विचित्रवर्णैर्भासन्तौ स्वच्छायाप्रतिबिम्बितौ।
भार्या जगद्गुरोरेषा वृषाङ्कस्य महीधर !॥ १९३॥
जननी लोकधर्मस्य सम्भूता भूतभावनी।

शिवेयं पावनायैव त्वत्क्षेत्रे पावकद्युतिः ॥१८४॥
तद्यथा शीघ्रमेवैषा योगं यायात् पिनाकिना।
तथा विधेयं विधिवत्त्वया शैलेन्द्रसत्तम! ॥ १८५ ॥
अत्यन्तं हि महत्कार्यं देवानां हिमभूधर!।
सूत उवाच। एवं श्रुत्वा तु शैलेन्द्रो नारदात् सर्वमेव हि॥१८६
आत्मानं स पुनर्जातं मेने मेनापतिस्तदा।
नमस्कृत्य वृषाङ्काय तदा देवाय धीमते ॥ १८७ ॥
उवाच सोऽपि संहृष्टो नारदन्तु हिमाचलः।
हिमवानुवाच। दुस्तरान्नरकात् घोरादुद्धृतोऽस्मि त्वया मुने! १८
पातालादहमुद्धृत्य सप्तलोकाधिपः कृतः।
हिमाचलोऽस्मि विख्यातस्त्वया मुनिवराधुना॥१८८
हिमाचले चलगुणां प्रापितोऽस्मि समुन्नतिम्।
आनन्दबिन्दुसाहारि हृदयं मेऽधुना मुने! ॥ २०० ॥
नाध्यवस्यति कृत्यानां प्रविभागविचारणम्।
यदि वाचामधीशः स्यात्त्वद्गुणानां विचारणे ॥२०१॥
भवद्विधानां नियतममोघं दर्शनं मुने!।
तवास्मान् प्रति चापल्यं व्यक्तं मम महामुने! ॥२०२
भवद्भिरेव कृत्योऽहं शिवासायात्मरूपिणम्।
मुनीनां देवतानां च स्वयं कर्तापि कल्मषम् ॥२०३॥
तथापि वस्तुन्येकस्मिन्नाज्ञा मे सम्प्रदीयताम्।
इत्युक्तवति शैलेन्द्रे स तदा हर्षनिर्भरे॥ २०४ ॥
तथा च नारदो वाक्यं कृतं सर्वमिति प्रभो!।
सुरकार्यं य एवार्थस्तवापि सुमहत्तरः ॥ २०५ ॥
इत्युक्त्वा नारदः शीघ्रं जगाम त्रिदिवं प्रति।

स गत्वा शक्रभवनममरं सन्ददर्श ह ॥ २०६ ॥
ततोऽभिरूपे स मुनिरुपविष्टो महासने ।
पृष्टः शक्रेण प्रोवाच हिमजासंश्रयां कथाम् ॥ २०७ ॥
नारद उवाच । समूह्य यत्तु कर्तव्यं तन्मया कृतमेव हि ।
किन्तु पञ्चशरस्यैव समयोऽयमुपस्थितः ॥ २०८ ॥
इत्युक्तो देवराजस्तु मुनिना कार्यदर्शिना ।
चूताङ्कुरास्त्रं सस्मार भगवान् पाकशासनः ॥ २०९ ॥
संस्मृतस्तु तदा क्षिप्रं सहस्राक्षेण धीमता ।
उपतस्थे रतियुतः सविलासो झषध्वजः ॥ २१० ॥
प्रादुर्भूतन्तु तं दृष्ट्वा शक्रः प्रोवाच सादरम् ।
शक्र उवाच । उपदेशेन बहुना किं त्वां प्रतिवदे प्रियम् ॥२११॥
मनोभवासि तेन त्वं वेत्सि भूतमनोगतम् ।
तद्यथार्थकमेव त्वं कुरु नाकसदां प्रियम् ॥२१२॥
शङ्करं योजय क्षिप्रं गिरिपुत्र्या मनोभव ! ।
संयुतो मधुना चैव ऋतुराजेन दुर्जय ! ॥ २१३ ॥
इत्युक्तो मदनस्तेन शक्रेण स्वार्थसिद्धये ।
काम उवाच । अनया देवसामग्र्या मुनिदानवभीमया ॥२१४॥
दुःसाध्यः शङ्करो देवः किन्न वेत्सि जगत्प्रभो ! ।
तस्य देवस्य वेत्थ त्वं करणान्तु यदव्ययम् ॥ २१५ ॥
प्रायः प्रसादः कोपोऽपि सर्वो हि महतां महान् ।
सर्वोपभोगसारा हि सुन्दर्यः स्वर्गसम्भवाः ॥२१६॥
अध्याशितश्च यत् सौख्यं भवता नष्टचेष्टितम् ।
प्रमादादथ विभ्रंशेदोषम्प्रति विचिन्त्यताम् ॥२१७॥
प्रागेव चेह दृश्यन्ते भूतानां कार्यसम्भवाः ।

विशेषं काङ्क्षतां शक्र ! सामान्याद्भ्रंशनं फलम् ॥२१८॥
श्रुत्वैतद्वचनं शक्रस्तमुवाचामरैर्युतः ।
शक्र उवाच । वयं प्रमाणास्तेऽत्र रतिकान्त ! न संशयः २१९
सन्देशेन विना शक्ति रुपकारस्य नेष्यते ।
कस्यचिच्च क्वचिद्दृष्टं सामर्थ्यं न तु सर्वतः ॥ २२० ॥
इत्युक्तः प्रययौ कामः सखायं मधुमाश्रितः ।
रतियुक्तो जगामाशु प्रस्थन्तु हिमभूभृतः ॥ २२१ ॥
स तु तत्राकरोच्चिन्तां कार्यस्योपायपूर्विकाम् ।
महार्था ये हि निष्कम्पा मनस्तेषां सुदुर्जयम् ॥२२२॥
तदादावेव संक्षोभ्य नियतं सुजयो भवेत् ।
संसिद्धिं प्राप्नुयुश्चैव पूर्वं संशोध्य मानसम् ॥ २२३ ॥
कथञ्च विविधैर्भावैर्द्वेषानुगमनं विना ।
क्रोधः क्रूरतरासङ्गा द्रावणीयंत्रा महासखीम् ॥२२४॥
चापत्यमूर्ध्नि विध्वस्तधैर्याधारां महाबलाम् ।
तामस्य विनियोक्ष्यामि मनसो विकृतिम्पराम् ॥२२५॥
पिधाय धैर्यद्वाराणि सन्तोष मपकृष्य च ।
अवगन्तुं हि मां तत्र न कश्चिदतिपण्डितः ॥ २२६॥
विकल्पमात्रावस्थाने वैरूप्यं मनसोभवेत् ।
पश्चान्मूलक्रियारम्भगम्भीरावर्तदुस्तरः ॥ २२७ ॥
हरिष्यामि हरस्याहं तपस्तस्य स्थिरात्मनः ।
इन्द्रियग्राममावृत्य रम्यसाधनसंविधिः ॥ २२८ ॥
चिन्तयित्वेति मदनोभूतभर्तुस्तदाश्रमम् ।
जगाम जगतीसारं सरलद्रुमवेदिकम् ॥ २२९ ॥
शान्तसत्वसमाकीर्णमचलप्राणसङ्कुलम् ।

नानापुष्पलताजालं गगनस्थगणेश्वरम् ॥ २१० ॥
निर्व्यग्रवृषभाध्युष्टनीलशाद्वलसानुकम् ।
तत्रापश्यत् त्रिनेत्रस्य रम्यं कञ्चिद्‌द्वितीयकम् ॥२११॥
वीरकं लोकवीरेशमीशानसदृशद्युतिम् ।
शक्रकुङ्कुमकिञ्जल्कपुञ्जपिङ्गजटासटम् ॥ २१२ ॥
वेत्रपाणिनमव्यग्रमुग्रभोगीन्द्रभूषणम् ।
ततो निमीलितोन्निद्रपद्मपत्राभलोचनम् ॥ २१३ ॥
प्रेक्षमाणमृजुस्थानस्थितनासाग्रलोचनम् ।
श्रवस्त्रसिंहेन्द्रचर्मलम्बोत्तरीयकम् ॥ २१४ ॥
श्रवणाहिफणान्मुक्तनिःश्वासानलपिङ्गलम् ।
प्रेङ्खत्कपालपर्यन्तलुम्बिलम्बिजटाचयम् ॥ २१५ ॥
कृतवासुकिपर्यङ्कनाभिमूलनिवेशितम् ।
ब्रह्माञ्जलिस्थपुच्छाग्रनिबद्धोरगभूषणम् ॥ २१६ ॥
ददर्श शङ्करं कामः क्रमप्राप्तान्तिकं शनैः ।
ततो भ्रमरझङ्कारमालम्ब्य द्रुममानुकम् ॥ २१७ ॥
प्रविष्टः कर्णरन्ध्रेण भवस्य मदनो मनः ।
शङ्करस्तमथाकर्ण्य मधुरं मदनाश्रयम् ॥ २१८ ॥
स्मार दक्षदुहितान्दयितां रक्तमानसः ।
ततः सा तस्य शनकैस्तिरोभूयातिनिर्मला ॥२१९॥
समाधिभावना तस्थौ लक्ष्यप्रत्यक्षरूपिणी ।
ततस्तन्मयतां यातः प्रत्यूहपिहिताशयः ॥ २४० ॥
वशित्वेन बुबोधेशो विकृतिं मदनात्मिकाम् ।
ईषत्कोपसमाविष्टो धैर्यमालम्ब्य धूर्जटिः ॥ २४१ ॥
निरासे मदनश्चित्वा योगमायासमावृतः ।

स तया माययाविष्टो जज्वाल मदनस्ततः ॥ २४१ ॥
इच्छाशरीरो दुर्जेयोरोषदोषमहाश्रयः।
हृदयान्निर्गतः सोऽथ वासनाव्यसनात्मकः ॥ २४२ ॥
बहिःस्थलं समालम्ब्य ह्युपतस्थौ झषध्वजः।
अनुयातोऽथ हृद्येन मित्रेण मधुना सह ॥ २४३ ॥
सहकारतरौ दृष्ट्वा मृदुमारुतनिर्धुतम्।
स्तबकं मदनोरम्यं हरवक्षसि सत्वरम् ॥ २४५ ॥
मुमोच मोहनं नाम मार्गणं मकरध्वजः।
शिवस्य हृदये शुद्धे नाम्नशालो महाशरः ॥ २४६ ॥
पपात परुषप्रांशुः पुष्पबाणो विमोहनः।
ततः करणसन्देहोविद्धस्तु हृदये भवः ॥ २४७ ॥
बभूव भूधरौपम्यधैर्योऽपि मदनोन्मुखः।
ततः प्रभुत्वाद्भावानां संक्षोभं समपद्यत ॥ २४८ ॥
बाह्यं च बहु समासाद्य प्रत्यूहप्रसवात्मकम्।
ततः कोपानलोद्भूतघोरहुङ्कार भीषणे ॥ २४९ ॥
बभूव वदने नेत्रं तृतीयमनलाकुलम्।
रुद्रस्य रौद्रवपुषो जगत्संहारभैरवम् ॥ २५० ॥
तदन्तिकस्थे मदने व्यस्फारयत धूर्जटिः।
तं नेत्रविस्फुलिङ्गेन क्रोशतां नाकवासिनाम् ॥२५१॥
गमितोभस्मसात्तूर्णं कन्दर्पः कामिदर्पकः।
स तु तं भस्मसात् कृत्वा हरनेत्रोद्भवोऽनलः ॥ २५२ ॥
व्यजृम्भत जगत् दग्धुं ज्वालाहुङ्कार घस्मरः।
ततो भवोजगद्धेतोर्वैश्रभजज्जातवेदसम् ॥ २५३ ॥
सहकारे मधौ चन्द्रसुमनःसु परेष्वपि।

भृङ्गेषु कोकिलास्येषु विभागेन स्मरानलम् ॥ २५४ ॥
स बाह्यान्तरविद्धेन हरेण स्मरमार्गणः ।
रागस्नेहसमिद्धाग्नर्भावन् तीव्रहुताशनः ॥ २५५ ॥
विभक्तलोकसंक्षोभकरो दुर्वारजृम्भितः ।
संप्राप्य स्नेहसंपृक्तं कामिनां हृदयं किल ॥ २५६ ॥
ज्वलत्यहर्निशं भीमो दुश्चिकित्स्यसुखात्मकः ।
विलोक्य हरहुङ्कारज्वालाभस्मकृतं स्मरम् ॥ २५७ ॥
विललाप रतिः क्रूरं बन्धुना मधुना सह ।
ततो विलप्य बहुशो मधुना परिसान्त्विता ॥ २५८ ॥
जगाम शरणं देव मिन्दुमौलिं त्रिलोचनम् ।
भृङ्गानुयातां संगृह्य पुष्पितां सहकारजाम् ॥ २५९॥
लतां पवित्रकस्थाने पाणौ परभृतां सखीम् ।
निबध्य तु जटाजूटं कुटिलैः कनकैरतिः ॥ २६० ॥
उद्धूल्य गात्रं शुभ्रेण हृद्येन स्मरभस्मना ।
जानुभ्यामवनीं गत्वा प्रोवाचेन्दुविभूषणम् ॥ २६१ ॥

रतिरुवाच ।

नमः शिवायास्तु निरामयाय नमः शिवायास्तु मनोमयाय ।
नमः शिवायास्तु सुरार्चिताय तुभ्यं सदा भक्तकृपापराय ॥२६२॥
नमो भवायास्तु भवोद्भवाय नमोऽस्तु ते ध्वस्तमनोभवाय ।
नमोऽस्तु ते गूढमहाव्रताय नमोऽस्तु मायागहनाश्रयाय ॥२६३॥
नमोऽस्तु शर्वाय नमः शिवाय नमोऽस्तु सिद्धाय पुरातनाय ।
नमोऽस्तु कालाय नमः कलाय नमोऽस्तु ते ज्ञानवरप्रदाय ॥२६४
नमोऽस्तु ते कालकलातिगाय नमो निसर्गामलभूषणाय ।
नमोऽस्त्वमेयान्धकमर्दकाय नमः शरण्याय नमोऽगुणाय ॥२६

.।ऽस्तु ते भीमगणानुगाय नमोऽस्तु नानाभुवनादिकर्त्रे।
नमोऽस्तु नानाजगतां विधात्रे नमोऽस्तु ते चित्र फलप्रयोक्त्रे २६६
सर्वावसाने ह्यविनाशनेत्रे नमोऽस्तु चित्राध्वरभागभोक्त्रे।
नमोऽस्तु भक्ताभिमतप्रदात्रे नमः सदा ते भवसङ्गहर्त्रे॥ २६७
अनन्तरूपाय सदैव तुभ्यमसह्यकोपाय नमोऽस्तु तुभ्यम्।
शशाङ्कचिह्नाय सदैव तुभ्यममेयमानाय नमः स्तुताय॥ २६८॥
वृषेन्द्रयानाय पुरान्तकाय नमः प्रसिद्धाय महौषधाय।
नमोऽस्तु भक्त्याभिमतप्रदाय नमोऽस्तु सर्वार्तिहराय तुभ्यम् २६९
चराचराचारविचारवर्य्यमाचार्य्यमुत्प्रेक्षितभूतसर्गम्।
त्वामिन्दुमौलिं शरणं प्रपन्ना प्रिया प्रमेयं महतां महेशम् २७०
प्रयच्छ मे कामयशः समृद्धिं पुनः प्रभो! जीवतु कामदेवः।
प्रियं विना त्वां प्रियजीवितेषु त्वत्तोऽपरः को भुवनेष्विहास्ति २७१
प्रभुः प्रियायाः प्रसवः प्रियाणां प्रणीतपर्य्यायपरापरार्थः।
त्वमेवमेको भुवनस्य नाथो दयालुरुन्मूलितभक्तभीतिः॥२७२॥
इत्थं स्तुतः शङ्कर ईड्य ईशो वृषाकपिर्मन्मथकान्तया तु।
तुतोष दोषाकरखण्डधारी उवाच चैनां मधुरं निरीक्ष्य २७३॥

शङ्कर उवाच।

भविष्यतीति च कामोऽयं कालात् कान्तोऽचिरादपि।
अनङ्ग इति लोकेषु स विख्यातिं गमिष्यति॥२७४॥
इत्युक्ता शिरसावन्द्य गिरिशङ्कामवल्लभा।
जगामोपवनं रम्यं रतिस्तु हिमभूभृतः॥ २७५॥
रुरोद चापि बहुशो दीना रम्ये स्थले तु सा।
मरणाध्यवसायात्तु निवृत्ता सा हराज्ञया॥ २७६॥
अथ नारदवाक्येन चोदितो हिमभूधरः।

कृताभरणसंस्कारां कृतकौतुकमङ्गलाम् ॥ २७७ ॥
स्वर्गपुष्पकृतापीडां शुभ्रचीनांशुकाम्बराम् ।
सखीभ्यां संयुतां शैलो गृहीत्वा स्वसुतान्ततः ॥२७८॥
जगाम शुभयोगेन तदा संपूर्णमानसः ।
स काननान्युपाक्रम्य वनान्युपवनानि च ॥२७९ ॥
ददर्श रुदतीं नारीमप्रतर्क्यमहौजसम् ।
रूपेणासदृशीं लोके रम्येषु वनसानुषु ॥ २८० ॥
कौतुकेन परामृश्य तां दृष्ट्वा रुदतीं गिरिः ।
उपसर्प्य ततस्तस्या निकटे सोऽभ्यगच्छत ॥ २८१ ॥
हिमवानुवाच। कासि कस्यासि कल्याणि ! किमर्थञ्चापि रोदिषि
नैतदल्पं महासत्वे कारणं लोकसुन्दरि ! ॥ २८२ ॥
सा तस्य वचनं श्रुत्वा उवाच मधुना सह ।
रुदती शोकजननं श्वसती दैन्यवर्द्धनम् ॥ २८३ ॥
रतिरुवाच। कामस्य दयितां भार्यां रतिं मां विद्धि सुव्रत ! ।
गिरावस्मिन्महाभाग ! गिरिशस्तपसि स्थितः ॥२८४ ॥
तेन प्रत्यूहदुष्टेन विस्फार्यालोक्य लोचनम् ।
दग्धोऽसौ झषकेतुस्तु मम कान्तोऽतिवल्लभः ॥ २८५ ॥
अहन्तु शरणं याता तं देवं भयविह्वला ।
स्तुतवत्यथ संस्तुत्या ततो मां गिरिशोऽब्रवीत् ॥ २८६॥
तुष्टोऽहं कामदयिते ! कामोऽयन्ते भविष्यति ।
त्वत्स्तुतिं चाप्यधीयानो नरो भक्त्या मदाश्रयः ॥२८७
लप्स्यते काङ्क्षितं कामं निवर्त्य मरणादितः ।
प्रतीक्ष्यती च तद्वाक्यमाशावेशादिभिश्चिरम् ॥ २८८॥
शरीरं परिरक्षिष्ये कञ्चित् कालं महाद्युते ! ।

इत्युक्तास्तु तदा रत्या शैलः सम्भ्रमभीषितः ॥ २८८ ॥
पाणावादाय हि सुतां गन्तुमैच्छत् स्वकम्पुरम् ।
भाविनोऽवश्यभावित्वाद्भविनी भूतभाविनी ॥ २९० ॥
लज्जमाना सखीमुखैरुवाच पितरङ्गिरिम् ।
शैलदुहितोवाच । दुर्भाग्येन शरीरेण किं ममानेन कारणम् ॥ २९
कथं च तादृशं प्राप्तं सुखं मे स पतिर्भवेत् ।
तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः ॥ २९१
दुर्भगत्वं वृथा लोको वहते सति साधने ।
जीवितात् दुर्भगाच्छ्रेयो मरणं ह्यतपस्यतः ॥ २९२ ॥
भविष्यामि न सन्देहो नियमैः शोषये तनुम् ।
तपसि भ्रष्टसन्देहे उद्यमोऽर्थजिगीषया ॥ २९४ ॥
साहन्तपः करिष्यामि यदहं प्राप्य दुर्लभा ।
इत्युक्तः शैलराजस्तु दुहिता स्नेहविक्लवः ॥ २९५ ॥
उवाच वाचा शैलेन्द्रो स्नेहगद्गदवर्णया ।

हिमवानुवाच ।

उमेति चपले ! पुत्रि ! न क्षमं तावकं वपुः ॥२९६॥
ततः स चिन्तयाविष्टो दुहितां प्रशशंस च ।
ततोऽन्तरिक्षे दिव्या वागभूद्भुवनभूतले ॥ २९७ ॥
उमेति चपले ! पुत्रि ! त्वयोक्ता तनया ततः ।
उमेति नाम तेनास्या भुवनेषु भविष्यति ॥ २९८ ॥
सिद्धिं च मूर्तिमत्येषा साधयिष्यति चिन्तिताम् ।
इति श्रुत्वा तु वचन माकाशात्काशपाण्डुरः ॥२९९॥
अनुज्ञाय सुतां शैलो जगामाशु स्वमन्दिरम् ।
सूत उवाच । शैलजापि ययौ शैलमगम्यमपि दैवतैः ॥३००॥

अपरे तु परिच्छिन्ना नानाकाराभ्युपक्रमाः ॥ १२४ ॥
देहान्तरार्थं मारब्धमापतन्ति हितप्रदम् ।
मम त्वाकाशसम्भूतपुष्पदामविभूषितम् ॥ १२५ ॥
वन्ध्यासुतं प्राप्तुकामा मनः प्रसरते मुहुः ।
अहं किल भवं देवं पतिं प्राप्तुं समुद्यता ॥ १२६ ॥
प्रकृत्यैव दुराधर्षं तपस्यन्तं तु संप्रति ।
सुरासुरैरनिर्णीतपरमार्थक्रियाश्रयम् ॥ १२७ ॥
साम्प्रतं चापि निर्दग्धमदनं वीतरागिणम् ।
कथमाराधयेदीशं मादृशी तादृशं शिवम् ॥ १२८ ॥
इत्युक्ता मुनयस्तेतु स्थिरतां मनसस्ततः ।
ज्ञातुमस्या वचः प्रोचुः प्रक्रमात्मकृतार्थकम् ॥ १२९ ॥

मुनय ऊचुः । द्विविधन्तु सुखन्तावत् पुत्रि ! लोकेषु भाव्यते ।
शरीरस्यास्य सम्भोगैश्चेतसश्चापि निर्वृतिः ॥ १३० ॥
प्रकृत्या स तु दिग्वासा भीमः पितृवनाश्रयः ।
कपाली भिक्षुको नग्नो विरूपाक्षः स्थिरक्रियः ॥ १३१ ॥
प्रमत्तोन्मत्तकाकारो बीभत्सकृतसंग्रहः ।
यतिनानेन कः स्वार्थो मूर्त्तानर्थेन काङ्क्षितः ॥ १३२ ॥
यदि स्वस्य शरीरस्य भोगमिच्छसि साम्प्रतम् ।
तत कथन्ते महादेवात् भयभाजो जुगुप्सितात् ॥ १३३ ॥
स्रवद्रक्तवसाभ्यक्तकपालकृतभूषणात् ।
श्वसदुग्रभुजङ्गेन्द्रकृतभूषणभीषणात् ॥ १३४ ॥
श्मशानवासिनो रौद्रप्रमथानुगतात् सति ! ।
सुरेन्द्रमुकुटव्रातनिघृष्टचरणोऽरिहा ॥ १३५ ॥
हरिरस्ति जगद्धाता श्रीकान्तोऽनन्तमूर्त्तिमान् ।

नाथो यज्ञभुजामस्ति तथेन्द्रः पाकशासनः ॥२३६॥
देवतानां निधिश्चास्ति ज्वलनः सर्वकामकृत्।
वायुरस्ति जगद्धाता यः प्राणः सर्वदेहिनाम् ॥ २३७ ॥
तथा वैश्रवणो राजा सर्वार्थमतिमान् विभुः।
एभ्य एकतमं कस्मात् नत्वं न सम्प्राप्तुमिच्छसि ॥२३८॥
उत्तानदेहसंप्राप्त्या सुखं मनसेप्सितम्।
एवमेतत्त्ववाप्यत्र प्रभवो नाकसम्पदाम् ॥ २३९ ॥
अस्मिन्नेह परत्रापि कल्याणप्राप्तयस्तव।
त्रितुरेवास्ति तत् सर्वं सुरेभ्यो यन्न विद्यते ॥ २४० ॥
अतस्तत्प्राप्तये क्लेशः स वाप्यत्राफलस्तव।
प्रायेण प्रार्थितो भद्रे! सुखल्पोऽप्यतिदुर्लभः ॥ २४१ ॥
अस्यते विधियोगस्य धाता कर्तात्र चैव हि।
सूत उवाच। इत्युक्ता सा तु कुपिता मुनिवर्येषु शैलजा ॥२४२॥
उवाच कोपरक्ताक्षी स्फुरद्भिर्दशनच्छदैः।
देव्युवाच। असद्ग्रहस्य का प्रीतिर्व्यसनस्य क्व यन्त्रणा ॥२४३॥
विपरीतार्थबोद्धारः सत्पथे केन योजिताः।
एवं मां वेत्थ दुष्प्रज्ञां ह्यस्थानासद्ग्रहप्रियाम् ॥२४४॥
न मां प्रति विचारोऽस्ति यत्नेहासद्ग्रहाविती।
प्रजापतिसमाः सर्वे भवन्तः सर्वदर्शिनः ॥ २४५ ॥
नूनं न वेत्थ तं देवं शाश्वतं जगतः प्रभुम्।
अजमीशानमव्यक्तममेयमहिमोदयम् ॥ २४६ ॥
आस्तान्तद्धर्मसद्भावसम्बोधस्तावदद्भुतः।
विदुर्यन्न हरिब्रह्मप्रमुखाहि सुरेश्वराः ॥ २४७ ॥
यत्तस्य विभवात् ख्यातं भुवनेषु विजृम्भितम्।
प्रकटं सर्वभूतानां तदप्यत्र न वेत्थ किम् ॥ २४८ ॥

कस्यैतद्गगनं मूर्तिः कस्याग्निः कस्य मारुतः।
कस्य भूः कस्य वरुणः कश्चन्द्रार्कविलोचनः॥ २४६॥
कस्यार्चयन्ति लोकेषु लिङ्गं भक्त्या सुरासुराः।
यं ब्रुवन्तीश्वरं देवा विधीन्द्राद्या महर्षयः॥ २५०॥
प्रभावं प्रभवञ्चैव तेषामपि न वेत्थ किम्।
अदितिः कस्य मातेयं कस्मात् जातो जनार्दनः॥२५१॥
अदितिः कश्यपाज्जाता देवा नारायणादयः।
मरीचेः कश्यपः पुत्रो ह्यदितिर्दक्षपुत्रिका॥ २५२॥
मरीचिश्चापि दक्षश्च पुत्रौ तौ ब्रह्मणः किल।
ब्रह्मा हिरण्मयात्त्वण्डाद्दिव्यसिद्धिविभूषितात्॥२५३॥
कस्य प्रादुरभूद्ध्यानात् प्रबुद्धाः प्राकृतांशकाः।
प्रकृतौ तु तृतीयायां मधुहिड्जननक्रिया॥ २५४॥
जाता ससैज षड्वर्गान् बुद्धिपूर्वान् स्वकर्मजान्।
अजातकोऽभवद्द्वेधा ब्रह्मणोऽव्यक्तजन्मनः॥ २५५॥
यः स्वयोगेन संक्षोभ्य प्राकृतं कृतवानिदम्।
ब्रह्मणः सिद्धसर्वार्थमैश्वर्यं लोककर्तृताम्॥ २५६॥
विदुर्विष्ण्वादयो यस्य स्वमहिम्ना सदैव हि।
कृत्वान्यं देहमन्यादृक् तादृक् कृत्वा पुनर्हरिः॥२५७
कुरुते जगतः कृत्यमुत्तमाधममध्यमम्।
एवमेव हि संसारो यो जन्ममरणात्मकः॥ २५८॥
कर्मणश्च फलं ह्येतत् नानारूपसमुद्भवम्।
अथ नारायणो देवः स्वकां मायां समाश्रयत्॥ २५९॥
तत्प्रेरितः प्रकुरुते जन्म नानाप्रकारकम्।
सापि कर्मण एवोक्ता प्रेरणी विवशात्मनाम्॥२६०॥

यथोन्मादादिजुष्टस्य मतिरेव हि सा भवेत्।
दृष्टान्येव यथार्थानि विपरीतानि मन्यते ॥ २६१ ॥
लोकस्य व्यवहारेषु दृष्टेषु सहते सदा।
धर्माधर्म्मफलान्तासौ विष्णुरेव निबोधितः ॥ २६२ ॥
अथानादित्वमस्यास्ति सामान्यात्तु तदात्मना।
न ह्यस्य जीवितं दीर्घं दृष्टं देहे तु कुत्रचित् ॥२६३॥
भवन्निर्यस्य नोद्दृष्टमन्त्यमद्यमथापि वा।
देहिनां धर्म्म एवैष क्वचिज्जायेत् क्वचिन् म्रियेत् ॥२६४
क्वचिद्गर्भगतो नश्येत् क्वचिज्जीवेज्जरामयः।
क्वचित्समाः शतं जीवेत् क्वचिद्बाल्ये विपद्यते ॥ २६५॥
शतायुः पुरुषो यस्तु सोऽनन्तः स्वल्पजन्मनः।
जीवितो न म्रियत्यग्रे तस्मात् सोऽमर उच्यते ॥२६६॥
अदृष्टजन्मनिधना ह्येवं विष्ण्वादयोमताः।
एतत् संशुद्धमैश्वर्यं संसारे को लभेदिह ॥ २६७ ॥
तत्र चर्यादियोगात् तु नानाश्चर्य्यस्वरूपिणि।
तस्माद्द्विवस्वरान् सर्व्वान् मलिनान् स्वल्पभूतिकान्२६८
नाहं भद्राः! किलेच्छामि ऋते सर्व्वात् पिनाकिनः।
स्थितं च तारतम्येन प्राणिनां परमन्विदम् ॥ २६९॥
धीबलैश्वर्यकार्यादिप्रमाणं महतां महत्।
यस्मान्न किञ्चिदपरं सर्वं यस्मात् प्रवर्त्तते ॥ २७० ॥
यस्यैश्वर्यमनाद्यन्तं तमहं शरणङ्गता।
एष मे व्यवसायश्च दीर्घोऽतिविपरीतकः ॥ २७१ ॥
यात वा तिष्ठतैवाथ मुनयो! मद्विधायकाः!।
एवं निशम्य वचनं देव्या मुनिवरास्तदा ॥ २७२ ॥

आनन्दाश्रुपरीताक्षाः सस्वजुस्तां तपस्विनीम् ।
ऊचुश्च परमप्रीताः शैलजां मधुरं वचः ॥ २७३ ॥
ऋषय ऊचुः । अत्यद्भुतास्यहो देवि ! ज्ञानमूर्तिरिवामला ।
प्रसादयति नोभावं भवभावप्रतिश्रयात् ॥ २७४ ॥
न तु विद्मो वयन्तस्य देवस्यैश्वर्यमद्भुतम् ।
त्वन्निश्चयस्य दृढतां वेत्तुं वयमिहागताः ॥ २७५ ॥
अचिरादेव तन्वङ्गि ! कामस्रेयं भविष्यति ।
आदित्यस्य प्रभायाति रत्नेभ्यः क्व द्युतिः पृथक् ॥२७६
कोऽर्थोवर्णात्मिका व्यक्ताः कथं त्वं गिरिशं विना ।
यामो नैकाभ्युपायेन तमभ्यर्थयितुं वयम् ॥ २७७ ॥
अस्माकमपि वै सोऽर्थः सुतरां हृदि वर्त्तते ।
अतस्त्वमेव सा बुद्धिर्यतो नीतिस्त्वमेव हि ॥ २७८ ॥
अतोनिःसंशयं कार्यं शङ्करोऽपि विधास्यति ।
इत्युक्ताः पूजिता याता मुनयो गिरिकन्यया ॥ २७९॥
प्रययुर्गिरिशं द्रष्टुं प्रस्थं हिमवतो महत् ।
गङ्गाम्बुप्लावितात्मानं पिङ्गबद्धजटासटम् ॥ २८० ॥
भृङ्गानुयातपाणिस्थमन्दारकुसुमस्रजम् ।
गिरिः संप्राप्य तं प्रस्थं ददृशुः शङ्कराश्रमम् ॥ २८१ ॥
प्रशान्ताशेषसत्त्वौघं नवस्तिमितकाननम् ।
निःशब्दाक्षोभसलिलप्रपातं सर्वतोदिशम् ॥ २८२॥
तत्रापश्यंस्ततो द्वारि वीरकं वेत्रपाणिनम् ।
सप्त ते मुनयः पूज्या विनीताः कार्य्यगौरवात् ॥२८३॥
ऊचुर्मधुरभाषिण्या वाचा ते वाग्मिनाम्वराः ।
द्रष्टुं वयमिहायाताः शरण्यं गणनायकम् ॥२८४॥

त्रिलोचनं विजानीहि सुरकार्य्यप्रचोदिताः।
त्वमेव नोगतिस्तत्त्वं यथाकालानतिक्रमः॥ १८५॥
सत्कारितेष प्रायेण प्रतीहारमयः प्रभुः।
इत्युक्तो मुनिभिः सोऽथ गौरवात्तानुवाच सः॥१८६॥
समन्वास्यापरां सन्ध्यां स्नातुं मन्दाकिनीजले।
क्षणेन भविता विप्रास्तत्र द्रक्ष्यथ शूलिनम्॥ १८७॥
इत्युक्ता मुनयस्तस्मुस्ते तत्कालप्रतीक्षिणः।
गम्भीराम्बुधरं प्रावृट् तृषिताश्चातका यथा॥ १८८॥
ततः क्षणेन निष्पन्नसमाधानक्रियाविधिः।
वीरासनं त्रिभेद्दीशो मृगचर्मनिवासितम्॥ १८९॥
ततो विनीतो जानुभ्यामवलम्ब्य महीस्थितिम्।
उवाच वीरकोदेवं प्रणामैकसमाश्रयः॥ १९०॥
संप्राप्ता मुनयः सप्त त्वां द्रष्टुं दीप्ततेजसः।
विभो! समादिशद्रष्टुमवगन्तुमिहार्हसि॥ १९१॥
इत्युक्तो धूर्जटिस्तेन वीरकेण महात्मना।
भ्रूभङ्गसंज्ञया तेषां प्रवेशाज्ञां ददौ तदा॥ १९२॥
मूर्द्धकम्पेन तान् सर्वान् वीरकोऽपि महामुनीन्।
आजुहाव विदूरस्थान् दर्शनाय पिनाकिनः॥ १९३॥
त्वराबद्धार्द्धचूडास्ते लम्बमानाजिनाम्बराः।
विविशुर्वेदिकां सिद्धां गिरिशस्य विभूतिभिः॥१९४॥
बद्धपाणिपुटाक्षिप्तनाकपुष्पोत्करास्ततः।
पिनाकिपादयुगलं यथानाकनिवासिनः॥ १९५॥
ततः स्निग्धेक्षिताः शान्ता मुनयः शूलपाणिना।
मन्मथारिं ततो हृष्टाः सम्यक् तुष्टुवुरादृताः॥१९६॥

मुनय ऊचुः ।

अहो कृतार्था वयमेव साम्प्रतं सुरेश्वरोऽप्यत्र पुरो भविष्यति ।
वत्प्रसादामलवारिसेकतः फलेन काचित्तपसा नियुज्यते ॥ ३९७
जयत्यसौ धन्यतरो हिमाचलस्तदाश्रयं यस्य सुता तपस्यति ।
सदैत्यराजोऽपि महाफलोदयो विमूलिताशेषसुरोऽहि तारकः ३९८

त्वदीयमंशम्मविलोक्य कश्यपात्
स्वकं शरीरं परिमोक्ष्यते हि यः ।
स धन्यभीर्लोकपिता चतुर्मुखो
हरिश्च यत्सख्यमवाप्तिदीपितः ॥ ३९९ ॥
त्वदङ्घ्रियुग्मं हृदयेन बिभ्रता
महाभितापप्रशमैकहेतुकम् ।
त्वमेव चैको विविधकृतक्रियः
किलेति वाचा विधुरे विभाषसे ॥ ४०० ॥
यथाद्य एकस्त्वमवैषि नान्यथा
जगत्तथा निष्टुपातान्तव स्पृशेत् ।
न वेत्सि वा दुःखमिदं भवात्मकम्
विहन्यते ते खलु सर्वनिष्क्रिया ॥ ४०१ ॥
उपेक्षसे चेज्जगतामुपद्रवम्
दयामयत्वं तव केन कथ्यते ।
स्वयोगमायामहिमागुहाश्रयम्
न विद्यते निर्मलभूतिगौरवम् ॥ ४०२ ॥
वयं च ते धन्यतराः शरीरिणाम्
यदीदृशं त्वं प्रविलोकयामहे ।
अदर्शनं तेन मनोरथो यथा

प्रयाति साफल्यतया मनोगतम् ॥ ४०३ ॥
जगद्विधानैकविधौ जगन्मुखे
करिष्यमेतो वलभिद्वरा वयम्।
विनेमुरित्थं मुनयोविसृज्य ताम्
गिरं गिरीशश्रुतिभूमिसन्निधौ।
उत्कृष्टकेदारइवावनीतले
सुवीजमष्टिं सुफलाय कर्षकाः ॥ ४०४ ॥

तेषां श्रुत्वा ततोरम्यां प्रक्रमोपक्रमक्रियाम्।
वाचं वाचस्पतिरिव प्रोवाच स्मितसुन्दरः ॥ ४०५ ॥

शर्क उवाच। जाने लोकविधानस्य कन्यासत्कार्य्यमुत्तमम्।
जाता प्रलेय शैलस्य सङ्केतक निरूपणाः ॥ ४०६ ॥
सत्यमुत्कण्ठिताः सर्वे देवकार्यार्थ मुद्यताः।
तेषां त्वरन्ति चेतांसि किन्तु कार्यं विवर्त्तितम् ॥४०७॥
लोकयात्रानुगन्तव्या विशेषेण विचक्षणैः।
सेवन्ते ते यतो धर्मं तत्प्रामाण्यात्परे स्थिताः ॥४०८॥
इत्युक्ता मुनयो जग्मुस्त्वरितास्तु हिमाचलम्।
तत्र ते पूजितास्तेन हिमशैलेन सादरम् ॥ ४०९ ॥
ऊचुर्मुनिवराः प्रीताः स्वल्पवर्णाक्षरान्विताः।

मुनय ऊचुः। देवो दुहितरं साक्षात् पिनाकी तव मार्गति॥४१०
तच्छीघ्रं पावयात्मान माहुत्येवानलार्पणात्।
कार्यमेतच्च देवानां सुचिरं परिवर्त्तते ॥ ४११ ॥
जगदुद्धरणायैष क्रियतां वै समुद्यमः।
इत्युक्तस्तै स्तदा शैलो हर्षाविष्टोऽवदन्मुनीन् ॥४१२
असमर्थोऽभवद्वक्तु मुत्तरं प्रार्थयंश्छिवम्।
ततोमेना मुनीन्वन्द्य प्रोवाच स्नेहविक्लवा ॥ ४१३ ॥

दुहितुस्तान् मुनींश्चैव वरणार्थमर्थवित् ।
मेनोवाच । यदर्थं दुहितुर्जन्म नेच्छन्त्यपि महाफलम् ॥
तदेवोपस्थितं सर्वं प्रक्रमेणैव साम्प्रतम् ।
कुलजन्मवयोरूपविभूत्यृद्धियुतोऽपि यः ॥ ४१५ ॥
वरस्तस्यापि चाहूय सुता देया ह्ययाचतः ।
तन्ममस्ततपोघोरं कथं पुत्री प्रयास्यति ॥ ४१६ ॥
पुत्रीवाक्याद्यदत्रास्ति विधेयं तद्विधीयताम् ।
इत्युक्ता मुनयस्ते तु प्रियया हिमभूभृतः ॥ ४१७ ॥
ऊचुः पुनरुदारार्थं नारीचित्तप्रसादकम् ।
मुनय ऊचुः । ऐश्वर्यमवगच्छस्व शङ्करस्य सुरासुरैः ॥ ४१८ ॥
आराध्यमानपादाब्जयुगलत्वात् सुनिर्वृतैः ।
यस्योपयोगि यद्रूपं सा च तत्प्राप्तये चिरम् ॥ ४१९ ॥
घोरं तपस्यति बाला तेन रूपेण निर्वृतिः ।
यस्तद्व्रतानि दिव्यानि नयिष्यति समापनम् ॥ ४२० ॥
तत्र सावहिता तावत्तस्मात् सैव भविष्यति ।
इत्युक्ता गिरिणा सार्द्धन्ते ययुर्यत्र शैलजा ॥ ४२१ ॥
जितार्कज्वलनज्वाला तपस्तेजोमयी शुभा ।
प्रोचुस्तां मुनयः स्निग्धं सन्मान्य पथमागतम् ॥ ४२२ ॥
रम्यं प्रियं मनोहारि मा रूपं तपसा दह ।
प्रातस्ते शङ्करः पाणि मेष पुत्रि ! ग्रहीष्यति ॥ ४२३ ॥
वयमर्थितवन्तस्ते पितरं पूर्वमागताः ।
पित्रा सह गृहङ्गच्छ वयं याम स्वामन्दिरम् ॥ ४२४ ॥
इत्युक्ता तपसः सत्यं फलमस्तीति चिन्त्य सा ।
त्वरमाणा ययौ वेश्म पितुर्दिव्यार्थशोभितम् ॥ ४२५ ॥

सा तत्र रजनीं मेने वर्षायुतसमां सतीम्।
हरदर्शनसञ्जातमहोत्कण्ठा हिमाद्रिजा ॥४२६॥
ततो मुहूर्ते ब्राह्मे तु तस्याश्चक्रुः सुरस्त्रियः।
नानामङ्गलसन्दोहान्यथावक्रमपूर्वकम् ॥ ४२७ ॥
दिव्यमण्डनमङ्गानां मन्दिरे बहुमङ्गले।
उपासत गिरिं मूर्ता ऋतवः सार्वकामिकाः ॥४२८॥
वायवो वारिदाश्चासन् संमार्जनविधौ गिरेः।
हर्म्येषु श्रीः स्वयं देवी कृतनानाप्रसाधना ॥ ४२९॥
कान्तिः सर्वेषु भावेषु ऋद्धिश्चाभवदाकुला।
चिन्तामणिप्रभृतयो रत्नाः शैलं समन्ततः ॥४३० ॥
उपतस्थुर्नगाश्चापि कल्पकाममहाद्रुमाः।
ओषध्यो मूर्तिमत्यश्च दिव्यौषधिसमन्विताः ॥४३१॥
रसाश्च धातवश्चैव सर्वे शैलस्य किङ्कराः।
किङ्करास्तस्य शैलस्य व्यग्राश्चाज्ञानुवर्तिनः ॥ ४३२ ॥
नद्यः समुद्रा निखिलाः स्थावरं जङ्गमञ्च यत्।
तत् सर्वं हिमशैलस्य महिमानमवर्द्धयत् ॥ ४३३ ॥
अभवन्मुनयो नागा यक्षगन्धर्वकिन्नराः।
शङ्करस्यापि विबुधा गन्धमादनपर्वते ॥ ४३४ ॥
सर्वे मण्डनसम्भारास्तस्थुर्निर्मलमूर्तयः।
शर्वस्यापि जटाजूटे चन्द्रखण्डं पितामहः ॥ ४३५ ॥
बबन्ध प्रणयोदारविस्फारितविलोचनः।
कपालमालां विपुलां चामुण्डामूर्द्ध्न्यबन्धत ॥४३६ ॥
उवाच चापि वचनं पुत्रं जनय शङ्कर!।
यो दैत्येन्द्रकुलं हत्वा मारक्तैस्तर्पयिष्यति ॥४३७॥

सौरिर्ज्वलर्ककरो रत्नमुकुटञ्चानलोज्ज्वलम् ।
भुजगाभरणं गृह्य सज्जं शम्भोः पुरोऽभवत् ॥ ४२८ ॥
शक्रो गजाजिनं तस्य वसाभ्यक्तायपल्लवम् ॥ ४२९ ॥
दध्रे सरभसं स्त्रियद्विस्त्रीणांमुखपङ्कजम् ॥ ४३९ ॥
वायुश्च विपुलं तीक्ष्णशृङ्गं हिमगिरिप्रभम् ।
वृषं विभूषयामास हरयानं महौजसम् ॥ ४४० ॥
वितेनुर्नयनान्यस्याः शम्भोः सूर्यानलेन्दवः ।
स्वाम्युतिं लोकनाथस्य जगतः कर्मसाक्षिणः ॥ ४४१ ॥
चिताभस्म समाधाय कपाले रजतप्रभम् ।
मनुजास्थिमयीं मालां माबबन्ध च पाणिना ॥ ४४२ ॥
प्रेताधिपः पुरोद्वारं सगदः समवर्तत ।
नानाकारमहारत्नभूषणं धनदाहृतम् ॥ ४४३ ॥
विहायोद्भसर्पेन्द्रकटकेन स्वपाणिना ।
कर्णोत्तंसमस्त्रकारेगी वासुकिस्तक्षकं स्वयम् ॥ ४४४ ॥
जलाधीशाहृतां स्थाणुः प्रसूनाविष्टितां पृथक् ।
ततस्तु ते गणाधीशा विनयात्तत्र वोदकम् ॥ ४४५ ॥
प्रांचुर्व्याकृते ! त्वयां समाविदश्च शूलिने ।
निष्पन्नाभरणं देवं प्रसाध्ये शम्भसाधनः ॥ ४४६ ॥
समवारिधयस्तस्थुःकर्तुं दर्पणविभ्रमम् ।
ततो विलोकितात्मानं महाम्बुधिजलोदरे ॥ ४४७
धरामालिङ्ग्य जानुभ्यां स्थाणुं प्रोवाच केशवः ।
शोभसे देव ! रूपेण जगदानन्ददायिना ॥ ४४८ ॥
मातरः प्रेरयाकामवधूं वैधव्यचिह्निताम् ।
कालोऽयमिति चालक्ष्य प्रकारेङ्गितसंज्ञया ॥ ४४९ ॥

ततस्ताश्चोदिता देवमूचुः प्रहसिताननाः।
रतिः पुरस्तव प्राप्ता नाभाति मदनोज्झिता ॥४५०॥
ततस्तां सन्निवार्येह वामहस्ताग्रसंज्ञया।
प्रयाणे गिरिजावक्त्रदर्शनोत्सुकमानसः॥ ४५१॥
ततो हरो हिमगिरिकन्दराकृतिम्
समुन्नतं मृदुगतिभिः प्रचोदयन्।
महावृषं झणझणमूलाहितिच्चणम्
स भूधरानवनिरिव प्रकम्पयन् ॥ ४५२ ॥
ततो हरिर्द्रुतपदपङ्क्तिः पुरः
सरः श्रमात् द्रुमनिकरेषु विश्रमन्।
धराग्जःगर्वलितभूषणोऽब्रवीत्
प्रयात मा कुरुत पथोऽस्य संकटम् ॥ ४५३ ॥
प्रभोः पुनः प्रथमनियोगसूर्जयन्
सुतोऽब्रवीद्भृङ्गिमुखोऽपि वीरकः।
वियच्चरा वियति किमस्तिकान्तकम्
प्रयात नोधरणिधराद्विदूरतः ॥ ४५४ ॥
महार्णवाः कुरुत शिलोपमम्पयः
सुरद्विषा गमनमहातिकर्दमान्।
गणेश्वराश्चपलतया न गम्यताम्
सुरेश्वरैः स्थिरमतिभिश्च गम्यताम् ॥ ४५५ ॥
न भृङ्गिणा स्वतनुमवेक्ष्य नीयते
पिनाकिनः पृथुमुखमण्डमध्यतः।
वृथायमप्रकटितदन्तकोटरम्

त्वमायुधं वहसि विहाय पञ्जरम् ॥ ४५६ ॥
पदत्रयद्रथतुरगैः पुरद्विषा
प्रमुच्यते बहुतरमात्तसङ्कुलम् ।
अमी सुराः पृथगनुयायिभिर्वृताः
पदातयो द्विगुणपथान् हरप्रियाः ॥ ४५७॥
स्ववाहनैः पवनविधूतचामरै-
श्चलध्वजैर्व्रजत विहारशालिभिः ।
सुराः स्वकं किमिति न रागमूर्जितम्
विचार्यते नियतलयतयानुगम् ॥ ४५८ ॥
न किन्नरैरभिभवितुं हि शक्यते
विभूषणप्रचयसमुद्भवोध्वनिः ।
स्वजातिकाः किमिति न षड्जमध्यम-
पृथुस्वरं बहुतर मत्र वर्ण्यते ॥ ४५९ ॥
नतानतानतनतवताङ्गताः
पृथक् तया समग्रता विभिन्नताम् ।
विशङ्किता भवदतिभेदशालिनः
प्रयान्त्यमी द्रुतपदमिव गौडकाः ॥ ४६० ॥
विसंहताः किमिति न पाड्गवादयः
सगीतकैर्ललितपदप्रयोगजैः ।
प्रभोः पुरो भवति हि यस्य चाद्भुतम्
समुद्धतार्थकमिति तत्प्रतीयते ॥ ४६१ ॥
अमी पृथग्विरचितरम्यरासकम्
विलासिनो बहुगमकस्वभावकम् ।
प्रयुञ्जते गिरिशयशोविसारिणम्

प्रकीर्णकं बहुतरनागजातयः॥ ४६२॥
श्रमो कथं ककुभि कथाः प्रतिक्षणम्
ध्वनन्ति ते विविधवधूविमिश्रिताः।
न जातयो ध्वनिमुरजासमीरिता
न मूर्च्छिताः किमिति च मूर्च्छनात्मिकाः॥४६३॥
श्रुतिप्रियक्रमगतिभेदसाधनम्
ततादिकं किमिति न तुम्बरेरितम्।
न हन्यते बहुविधवाद्यडम्बरम्
प्रकीर्णवीणामुरजादि नाम यत्॥ ४६४॥
इतीरिते गिरिमवधानशालिनः
सुरासुराः सपदि तु नीरकाज्ञया।
नियामिताः प्रययुरतीव हर्षिता-
श्चराचरं जगदखिलं ह्यपूरयन्॥ ४६५॥
इतिस्वनत्ककुभिरसन्महार्णवे
स्तनद्घने विदलित शैलकन्दरे।
जगत्यभूत्तुमुल इवाकुलीकृतः
पिनाकिना त्वरितगतेन भूधरः॥ ४६६॥
परिज्वलत् कनक सहस्र तोरणं
क्वचिन्मिलन्मरकतवेश्मवेदिकम्।
क्वचित् क्वचिद्विमल वैदूर्य भूमिकं
क्वचिद्गलज्जलधर रम्यनिर्झरम्॥ ४६७॥
चलध्वज प्रवर सहस्रमण्डितं
सुरद्रुमस्तवकविकीर्ण चत्वरम्।
सिता सितारुणरुचिधातुवर्णकं

श्रियोज्ज्वलं प्रविततमार्गं गोपुरम् ॥ ४६८ ॥
विजृम्भिता प्रतिमध्वनिर्वारिदं
सुगन्धिभिः पुरपवनैर्मनोहरम् ।
हरो महागिरि नगरं समासदत्
गणादिव प्रवर सुरासुरस्तुतः ॥ ४६९ ॥
तं प्रविशन्तमगात् प्रविलोक्य व्याकुलतां नगरं गिरिभर्तुः ।
व्यग्रपुरन्ध्रिजनञ्जवियानं धावितमार्गं जनाकुलरथ्यम् ॥ ४७० ॥
हर्म्ये गवाक्षगतामर नारी लोचन नीलसरोरुहमालम् ।
सुप्रकटासम दृश्यत काचित्स्वाभरणां प्रविताम विगूढा ॥ ४७१ ॥
काप्यखिलीकृतमण्डनभूषात्यक्त सखी प्रणया हरमैक्षत् ।
काचिदुवाच कलङ्कत मानाक्रातरतौ सखि माकुरु मूढे ॥ ४७२ ॥
दग्धमनोभव एव पिनाकी कामयते स्वयमेव विहर्तुम् ।
काचिदपि स्वयमेव पतन्ती प्राह परां विरहस्खलिताङ्गीम् ४७३
माचपले मदनव्यतिषङ्गं शङ्करजं स्खलनेन वदत्वम् ।
कापि कृतव्यवधानम दृष्टा युक्त वराद्रिरिरिगोत्र्यमूचे ॥ ४७४ ॥
एष सयत्र सहस्रमखाद्या नाक सदाम्यधिपाः स्वयमुक्ताः ।
नामभिरिन्दुजटं निजमेवा प्राप्तिफलायनताम् घटन्ते ॥ ४७५ ॥
एवनचैष स एष यदृग्विषमं परीत तनुः शशिमौली ।
धावति वज्रधरोऽमर राजो मार्गमसं विहितो करणाय ॥ ४७६ ॥
एष स पद्मभवोऽग्य मुपेत्यप्रांशु जटा मृगचर्मनिगूढः ।
सप्रणयङ्कर घट्टित चक्रं किञ्चिदुवाच मितं श्रुति मूले ॥ ४७७ ॥
एवमभूत् सुरनारिकुलानां चित्तविसंस्थुलता गुररागात् ।
शङ्करसं व्ययगाद्रिरि जागाजन्मफलं परमस्त्विति चोचुः ॥ ४७८ ॥
ततो हिमगिरेर्वेश्मविश्वकर्मनिवेदितम् ।

महानील मयस्तम्भं ज्वलत्काञ्चन कुट्टिमम् ॥४७९॥
मुक्ताजाल परिष्कारं ज्वलितौषधि दीपितम्।
क्रीड़ोद्यान सहस्राढ्यं काञ्चना बद्धदीर्घिकम्॥ ४८०॥
महेन्द्र प्रमुखाः सर्वे सुराद्दृष्ट्वा तदद्भुतम्।
नेत्राणि सफलान्यद्य मनोभि रिति ते दधुः॥ ४८१॥
विमर्दकीर्णकेयूरा हरिणा द्वारिरोधिताः।
कथञ्चित् प्रमुखा स्तत्र विविशुर्नाकवासिनः॥ ४८२॥
प्रणतेना चलेन्द्रेण पूजितोऽथ चतुर्मुखः।
चकार विधिना सर्वं विधिमन्त्र पुरः सरम्॥ ४८३॥
शर्वेण पाणिग्रहणमग्नि साक्षिक मक्षतम्।
दाता महीभृतान्नाथो होतादेवश्चतुर्मुखः॥ ४८४॥
वरः पशुपतिः साक्षात् कन्या विश्वारणिस्तथा।
चराचराणि भूतानि सुरासुर वराणिच॥ ४८५॥
तत्राप्येते नियमतो ह्यभवन्व्यक्तमूर्तयः।
मुक्ताश्चाभि नवान् सर्वान् सस्यशालीन् रसौषधीः॥४८६॥
व्यग्रातु पृथिवी देवी सर्वभाव मनोरमा।
गृहीत्वा वरुणः सर्वरत्नाभ्या भरणानि च॥ ४८७॥
पुण्यानि च पवित्राणि नानारत्नमयानि तु।
तस्थौ स्वाभरणौ देवीहर्षदः सर्वदेहिनाम्॥ ४८८॥
धनदश्चापि दिव्यानिहैमान्या भरणानि च।
जात रूपविचित्राणि प्रयतः समुपस्थितः॥ ४८९॥
वायुर्ववौसुसुरभिः सुखसंस्पर्शनो विभुः।
छत्रमिन्दु करोद्गारं सुसितञ्च शतक्रतुः॥ ४९०॥
जग्राह मुदितः स्रग्वी बाहुभिर्वहु भूषणैः।

जगुर्गन्धर्वमुख्याश्च ननृतुश्चाप्सरोगणाः ॥ ४८१ ॥
वादयन्तोऽतिमधुरं जगुर्गन्धर्वकिन्नराः ।
मूर्त्ताश्च ऋतवस्तत्र जगुश्च ननृतुश्च वै ॥४८२ ॥
चपलाश्च गणास्तस्थुर्लीलयन्तो हिमाचलम् ।
उत्तिष्ठन् क्रमशस्तत्र विश्वभुग्भगनेत्रहा ॥ ४८३ ॥
चकारौद्वाहिकं कृत्यं पत्न्या सह यथोचितम् ।
दत्तार्घो गिरिराजेन सुरवृन्दैर्विनोदितः ॥ ४८४ ॥
अवसत् तां चपान्तत्र पत्न्या सह पुरान्तकः ।
ततो गन्धर्वगीतेन नृत्येनाप्सरसामपि ॥ ४८५ ॥
स्तुतिभिर्देवदैत्यानां विबुधो विबुधाधिपः ।
आमन्त्र्य हिमशैलेन्द्रं प्रभाते चोमया सह ।
जगाम मन्दरगिरिं वायुवेगेन शृङ्गिणा ॥ ४८६ ॥

ततो गते भगवति नीललोहिते
सहोमया रतिमलभन्नभूधरः ।
सबान्धवो भवति च कस्य नो मनो
विह्वलञ्च जगति हि कन्यकापितुः ॥ ४८७ ॥
ज्वलन्मणिस्फटिकहाटकोत्कटम्
स्फुटद्युतिस्फटिकगोपुरं पुरम् ।
हरो गिरौ चिरमनुकल्पितस्तदा
विसर्जितामरनिवहोऽविगत्स्वकम् ॥ ४८८ ॥

तदोमासहितो देवो विजहार भगाक्षिहा ।
पुरोद्यानेषु रम्येषु विविक्तेषु वनेषु च ॥ ४८९ ॥
सुरक्तहृदयो देव्या मकराङ्कपुरःसरः ।
ततो बहुतिथे काले सुतकामा गिरेः सुता ॥ ५००

सखीभिः सहिता क्रीडां चक्रे कृत्रिम पुत्रकैः।
कदाचिद्गन्ध तैलेन गात्रमभ्यज्य शैलजा ॥ ५०१ ॥
चूर्णैरुद्वर्त्तयामास मलिनां तरितान्तनुम्।
तदुद्वर्त्तनकं गृह्य नरं चक्रे गजाननम् ॥ ५०२ ॥
पुत्रकं क्रीडतो देवी तं चाक्षिपयदम्भसि।
जाह्नव्यास्तु शिवासख्या स्ततः सोऽभूद्बृहत् वपुः॥५०३॥
कायेनाति विशालेन जगदा पूरयत्तदा।
पुत्रेत्युवाच तं देवी पुत्रेत्यूचे च जाह्नवी ॥५०४॥
गाङ्गेय इति देवैस्तु पूजितोऽभूद्गजाननः।
विनाय काधिपत्यञ्च ददावस्य पितामहः ॥ ५०५ ॥
पुनः सा क्रीडनं चक्रे पुत्रार्थं वरवर्णिनी।
मनोज्ञमङ्कुरं रूढ मशोकस्य शुभानना ॥ ५०६ ॥
वर्द्धयामास तं चापि कृत संस्कारमङ्गला।
वृहस्पति मुखे विप्रै र्देवस्पति पुरोगमैः ॥ ५०७ ॥
ततो देवैश्च मुनिभिः प्रोक्ता देवी त्विदम्वचः।
भवानि भवतीभव्या संभूता लोकभूयते ॥ ५०८ ॥
प्रायः सुतफलो लोकः पुत्रपौत्रैश्च लभ्यते।
अपुत्राश्च प्रजाः प्रायो दृश्यन्ते देव हेतवः ॥ ५०९ ॥
अधुनादर्शिते मार्गे मर्यादां कर्तु मर्हसि।
फलं किम्भविता देवि! कल्पितैस्तरु पुत्रकैः॥ ५१० ॥
इत्युक्ता हर्षपूर्णाङ्गी प्रोवाचोमा शुभाङ्गिरम्।
देव्युवाच। एवं निरुदके देशे यः कूपं कारयेद्बुधः॥५११॥
बिन्दौ बिन्दौ च तोयस्य वसेत् सम्वत्सरन्दिवि।
दशकूप समा वापी दशवापी समोह्रदः ॥ ५१२ ॥

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।
एषैव मममर्यादा नियता लोकभाविनी ॥ ५१३ ॥
इत्युक्तास्तु ततोविप्रा बृहस्पति पुरोगमाः ।
जग्मुःस्वमन्दिराण्येव भवानीं वन्द्य सादरम् ॥५१४॥
गतेषु तेषु देवोऽपि शङ्करः पर्वतात्मजाम् ।
पाणिना लम्बमानेन शनैः प्राविशयच्छुभाम् ॥ ५१५ ॥
चित्तप्रसाद जननं प्रासाद मनुगोपुरम् ।
लम्बमौक्तिक दामानं मालिका कुलवेदिकम् ॥ ५१६ ॥
निर्धौत कलधौत चक्रीडा गृहमनोरमम् ।
प्रकीर्ण कुसुमोद्दाम मत्तालिकुलकूजितम् ॥ ५१७ ॥
किन्नरोद्गीतसङ्गीत गृहान्तरित भित्तिकम् ।
सुगन्धिधूपसङ्घातमनः प्रार्थ्यमलङ्कृतम् ॥ ५१८ ॥
क्रीडन्मयूर नारीभिर्वृतं चैव ततवादिभिः ।
हंससङ्घात संघुष्टं स्फाटिकस्तम्भवेदिकम् ॥ ५१९ ॥
अनारतमनि प्रोत्था बहुशःकिन्नरा कुलम् ।
शुकोयत्राभिहन्यन्ते पद्मराग विनिर्मिताः ॥ ५२० ॥
भित्तयो दाडिमभ्रान्त्या प्रति बिम्बितमौक्तिकाः ।
तत्राचक्रीडयादेवो विहर्तुं सप चक्रमे ॥ ५२१ ॥
स्वच्छेन्द्रनीलभभागे मोदने यत्रधिष्ठितौ ।
वपुः सहायतां प्राप्तौ विनोदरसनिर्वृतौ ॥ ५२२ ॥
एवं प्रक्रीडतो स्तत्र देवोगङ्करयो स्तदा ।
प्रादुर्भवन्महाशब्दस्तद्गोदर गोचरः ॥ ५२३ ॥
तच्छ्रुत्वा कौतुकादेवी किमेतदिति शङ्करम् ।
पप्रच्छ तं शुभतनुर्हरं विस्मय पूर्वकम् ॥ ५२४ ॥

उवाच देवीं मैतत्ते दृष्टपूर्वं सुविस्मिते !।
एते गणेशाः क्रीडन्ते शैलेऽस्मिन् मत्प्रियाः सदा॥५२५॥
तपसा ब्रह्मचर्य्येण नियमैः क्षेत्रसेवनैः।
यैरहं तोषितः पूर्वं त एते मनुजोत्तमाः॥ ५२६ ॥
मत्समीप मनु प्राप्ता मम हृद्याः शुभानने!।
कामरूपा महोत्साहा महारूपगुणान्विताः॥५२७॥
कर्मभिर्विस्मयं तेषां प्रयामि बलशालिनाम्।
सामरस्यास्य जगतः सृष्टिसंहरणक्षमाः॥ ५२८ ॥
ब्रह्मविष्णीन्द्र गन्धर्वैः स किन्नर महोरगैः।
विवर्जितोऽप्यहं नित्यमेभिर्विरहितोरमे॥ ५२९ ॥
हृद्या मे चारु सर्वाङ्गास्त एते क्रीडते गिरौ।
इत्युक्ता तु ततो देवो त्यक्ता तद्विस्मयाकुला॥ ५३०॥
गवाक्षान्तरमासाद्य प्रेक्षते विस्मितानना।
यावन्तस्ते कृशा दीर्घा ह्रस्वा स्थूला महोदराः॥५३१॥
व्याघ्रेभवदनाः केचित् केचिन्मेषाजरूपिणः।
अनेक प्राणिरूपाश्च ज्वालास्याः कृष्णपिङ्गलाः॥५३२॥
सौम्या भीमाः स्मितमुखाः कृष्णपिङ्गजटासटाः।
नानाविहङ्गवदना नानाविध मृगाननाः॥ ५३३ ॥
कौशेय चर्म्मवसना नग्नाश्चान्ये विरूपिणः।
गोकर्णा गजकर्णाश्च बहुवक्त्रे क्षणोदराः॥ ५३४ ॥
बहुपादा बहुभुजा दिव्य नानास्त्रपाणयः।
अनेक कुसुमा पीडा नानाव्यालविभूषणाः॥ ५३५ ॥
वृत्ताननायुधधरा नाना कवचभूषणाः।
विचित्रवाहनारूढा दिव्यरूपा वियच्चराः॥ ५३६ ॥

वीणा वाद्यरवाघुष्टा नानाख्यानकनर्तकाः ।
गणेशां स्तांस्तथा दृष्ट्वा देवी प्रोवाच शङ्करम् ॥ ५३७॥
देव्युवाच । गणेशाः कतिसङ्ख्याताः किं नामानः किमात्मकाः ।
एकैकशो मम ब्रूहिधिष्ठिता ये पृथक् पृथक् ॥५३८॥
शङ्कर उवाच । कोटिसङ्ख्या ह्यसङ्ख्याता नानाविख्यात पौरुषाः ।
जगदापूरितं सर्वैरेभिर्भीमै महाबलैः ॥ ५३९ ॥
सिद्धक्षेत्रेषु रथ्यासु जीर्णोद्यानेषु वेश्मसु ।
दानवानां शरीरेषु बालेषून्मत्तकेषु च ॥ ५४० ॥
एते विशन्ति मुदिता नानाहार विहारिणः ।
ऊष्मपाः फेनपाश्चैव धूमपा मधुपायिनः ॥ ५४१ ॥
रक्तपाः सर्वभक्षाश्च वायुपा ह्यम्बु भोजनाः ।
गेय नृत्योपहाराश्च नानावाद्यरवप्रियाः ॥ ५४२ ॥
न ह्येषां वै अनन्तत्वाद्गुणान् वक्तुं हि शक्यते ।
देव्युवाच । मार्गत्वगुत्तरासङ्गः शुद्धाङ्गो मुञ्जमेखली ॥ ५४३॥
तामस्थेन च शिक्येन चपलो रञ्जिताननः ।
मृगदंष्ट्रो ह्युत्पलानां स्रग्दामो मधुराकृतिः ॥ ५४४ ॥
पाषाणशकलोत्तान कांस्य तालप्रवर्तकः ।
असौ गणेश्वरो देव ! किन्नामा किन्नरानुगः ॥ ५४५ ॥
य एष गण गीतेषु दत्तकर्णो मुहुर्मुहुः ।
शर्व उवाच । स एष वीरको देवि ! सदा मद्हृदय प्रियः ॥५४६
नानाश्चर्यगुणाधारो गणेश्वर गणार्चितः ।
देव्युवाच । ईदृशस्य सुतस्यास्ति ममोत्कण्ठा पुरान्तक! ५४७
कदाहमीदृशं पुत्रं द्रक्ष्याम्या नन्ददायिनम् ।
शर्व उवाच । एष एव सुतस्तेऽस्तु मयानन्दकेतुकः ॥ ५४८॥

त्वया मात्रा कृतार्थस्तु वीरकोऽपि सुमध्यमे ! ।
इत्युक्त्वा प्रेषयामास विजयां हर्षणोत्सुका ॥५४९॥
वीरकानयनायाशु दुहिता हिमभूभृतः ।
सावरुह्य त्वरायुक्ता प्रासादादम्बरस्पृशः ॥ ५५० ॥
विजयोवाच गणपङ्क्त्यामध्ये प्रवर्तिता ।
विजयोवाच । एहि वीरक!चापल्यात् त्वया देवः प्रकोपितः५५१
किमुत्तरं वदत्यर्थे नृत्यरङ्गे तु शैलजा ।
इत्युक्तस्त्यक्त पाषाण शकलो मार्जिताननः ॥ ५५२ ॥
आहूतस्तु तयोद्भूतमूलप्रस्तावशंसकः ।
देव्याः समीपमागच्छज्जययानुगतः शनैः ॥ ५५३ ॥
प्रासाद शिखरात्फुल्ल रक्ताम्बुजनिभद्युतिः ।
तं दृष्ट्वा प्रस्नुतानल्पस्वादुक्षीरपयोधरा ।
गिरिजोवाच सस्नेहं गिरा मधुरवर्णया ॥ ५५४ ॥

अथ गद्यानि ।

उमोवाच । एह्येहि यातोऽसि मे पुत्रतान्देव देवेन दत्तोऽधुनावीरक! ॥५५५॥ इत्येव मङ्के निधायाथ तं पर्यष्वजत् कपोले कलवादिनम् ॥५५६॥ मूर्ध्न्युपाघ्राय संमार्ज्य गात्राणि भूषयामास दिव्यैः स्वयंभूषणैः किङ्किणी मेखलानूपुरैर्माणिक्य केयूरहारैः कमूलगुणैः॥५५७॥कामलैः पल्लवैश्चित्रितैश्चारुभिर्दिव्यमन्त्राङ्कितैस्तैः शुभैस्तैः भूरिभिश्चाकरोन्मिश्र सिद्धार्थकैरक्षरक्षाविधिः॥५५८॥ एवमादाय चोवाच कृत्वासं मूर्ध्नि गौरीघनां पत्रभङ्गोज्ज्वलैः॥ ५५९॥ गच्छगच्छाधुना क्रीडसार्द्धं गणैरप्रमत्तोवसं श्वभ्रवर्जीशनै र्व्यालमाला कुला शैलसानुद्रुमदन्तिभिर्भिन्नसाराः परैःसङ्गिनः॥५६०॥जाह्नवीयं जलं सुष्ठ तोया

कुलम् कूलं माविशीथा बहुव्याघ्रे दुष्टे वने ॥५६१॥ वत्सा संख्येषु
दुर्गागणेशेष्वे तस्मिन् वीरके पुत्रभावोऽत्र तुष्टान्तः करणातिष्ठ
तु ॥५६२॥ स्वस्य पितृजन प्रार्थितं भवत्रमाया तिभाविन्ध्यसोभवत्र-
ता५६३ सोऽपि निभृत्य सर्वगणैः समय माह बालत्व लीलार-
साविष्टधीः ॥५६४॥ एषमाला स्वयं मे कृतभूषणाऽत्र एषपटः
पटलैर्बिन्दुभिः सिन्दुवारस्य पुष्पैरियं मालतीमिश्रितामा-
लिका मे शिरस्याहृता ॥५६५॥ कोऽयमातीवशारीगणस्तस्य
दास्यामि हस्तादिदं क्रीडनम् ५६६ दक्षिणात् पश्चिमं पश्चिमा-
दुत्तरमुत्तरात् पूर्वमभ्येत्य सख्या युता प्रेक्षता तं गवाक्षान्त-
राद्वीरकं शैलपुत्री बहिः क्रीडनं यत्नगम्यात्तुरेष चित्तभ्रमः
॥ ५६७ ॥ पुत्रलुब्धो जनस्तत्रको मोहमायाति न स्वल्पचेता-
जडोमांसविवर्णं वसङ्घातदेहः ॥५६८॥ दृष्टुमभ्यन्तरद्वाक वासे-
श्वरेरिन्दुमौलिं प्रविष्टेषु कक्षान्तरम् ॥५६९॥ वाहनाल्पावरोहा
गणास्ते युतालोकपालाश्च मृत्योऽयं स्वद्गो विशुद्धकरानि-
र्मम: कृतान्तः कस्यकेनाहतो ब्रूतमौनं भवन्तोऽस्य दण्डेन किं
दुस्पृहा ॥५७०॥ भीमभ्रान्तनं नास्ति कृत्यन्निरोध एषोऽस्य न
किं वध्यते ॥५७१॥ मात्रया लोकपालानुगर्वित्तता एव सर्वं तदि-
त्युच्चरन्तो तदा देवताः ॥५७२॥ देवदेवानुगम्यवीरकं लक्षणमाह
देवी वनं पर्वतानिर्झराण्यग्निर्देवगान्यथो भूतपानिर्झराम्भोनि-
पातेषु निमज्जत ५७३ पुष्प जालावनडेषु धामस्वपिशेत प्रसुङ्गना-
नाद्रिकुञ्जेष्व नुगर्जन्तु के मारुतां स्फोटसंक्षेपणान् कामतः॥
५७४ कान्चनोत्तुङ्ग शृङ्गावरोहाश्रितो हेमरेणूत्करासङ्गद्युतिम्।
खेचराणां वनाधायिनि रम्ये बहुरूपसम्पत् प्रकरैगणान्वा-
सितम् मन्दरकन्दरे सुन्दर मन्दार पुष्पप्रवालाम्बुजे सिद्ध-

नारीभिरापीतरूपामृतं विस्मृतैर्नवपालैरनुनिमेषिभिर्वीरकं
शैलपुत्री निमेषान्तरादस्मरत् पुत्रगृध्नो विनोदार्थिनी ॥५७५॥
सोऽपि तादृक् क्षणावाप्तपुण्योदयो योऽपि जन्मान्तरस्या-
प्यजत्वङ्गतः ॥ ५७६ ॥ क्रीडतस्तस्य तृप्तिः कथं जायते योऽपि
भाविजगद्वेधसा तेजसः कल्पितः प्रतिक्षणं दिव्यगीतक्षणो
नृत्यलीलो गणेशैः खप्रणत्यक्षणः सिंहनादाकुले गण्डशैले
ऽम्बुजद्रवजाले बृहत्सालताले क्षणे फुल्लनानातमाला-
लिकाले क्षणं वृक्षमूले विलोलोमराले क्षणे स्वल्पपङ्कि-
जन्वे पङ्कजाढ्ये क्षणं मातुरङ्के शुभे निष्कलङ्के ॥ ५७७ ॥
परिक्रीडति बाललीलाविहारी गणेशाधिपो देवतानन्दकारी।

निकुञ्जेषु विद्याधरैर्गीतशीलः
पिनाकीव लीलाविलासैः सलीलः ॥ ५७८ ॥

प्रकाश्य भुवनाभोगो ततो दिनकरे गते।
देशान्तरं तदा पश्चाद्दूरमस्तावनीधरम् ॥ ५७९ ॥
उदयास्ते पुराभावी यो हि चास्तेऽवनीधरः।
मित्रत्वमस्य सुदृढं हृदये परिचिन्त्यताम् ॥५८०॥
नित्यमाराधितः श्रीमान् पृथुमूलः समुन्नतः।
नाकरोत् रक्षितुं मित्रमुपहारं पतिष्यतः ॥ ५८१ ॥
इतिप्ये मा व्यवस्येति संश्रयेणाखिलं बुधः।
दिनान्तानुगतो भानुः स्वजनत्वमपूरयत् ॥ ५८२ ॥
सन्ध्याबद्धाञ्जलिपुटा मुनयोऽभिमुखा रविम्।
याचन्त्यागमनं भीता निवार्यात्मनि भाविताम् ॥५८३॥
अजृम्भदथ लोकेऽस्मिन् क्रमाद्विभावरीतमः।

कुटिलस्येव हृदये कालुष्यन्दूषयन्मन: ॥ ५८४ ॥
ज्वलत्फणिफणारत्नदीपोद्योतितभित्तिके ।
शयनं शशिसङ्घातशुभ्रवस्त्रोत्तरच्छदम् ॥ ५८५ ॥
नानारत्नद्युतिलसच्छक्रचापविडम्बकम् ।
रत्नकिङ्किणिकाजालं लम्बमुक्ताकलापकम् ॥ ५८६ ॥
कमनीयचलल्लोलवितानाच्छादिताम्बरम् ।
मन्दिरे मन्दसञ्चार: शनैर्गिरिसुतायुत: ॥ ५८७ ॥
तस्थौ गिरिसुताबाहुलतामीलितकन्धर: ।
शशिमौलिसितज्योत्स्नाशुचिपूरितगोचर: ॥ ५८८ ॥
गिरिजाप्यसितापाङ्गी नीलोत्पलदलच्छवि: ।
विभावर्यां च संपृक्ता बभूवातितमोमयी ।
तामुवाच ततो देव: क्रीडाकेलिकलायुतम् ॥ ५८९ ॥

---

अथ चतु:पञ्चाशदधिकशततमोऽध्याय: ।

मत्स्य उवाच । शरीरे मम तन्वङ्गि ! सिते भास्यसितद्युति: ।
भुजङ्गीवासिता शुद्धा संश्लिष्टा चन्दने तरौ ॥ १ ॥
चन्द्रातपेन संपृक्ता रुचिराम्बरया तथा ।
रजनीवासितपक्षे दृष्टिदोषं ददासि मे ॥ २ ॥
इत्युक्ता गिरिजा तेन मुक्तकण्ठा पिनाकिना ।
उवाच कोपरक्ताक्षी भ्रुकुटीकुटिलानना ॥ ३ ॥
देव्युवाच । स्वकृतेन जन: सर्वो जाड्येन परिभूयते ।
अवश्यमर्थात् प्राप्नोति खण्डनं शशिमण्डन ! ॥ ४ ॥

तपोभिर्दुश्चरितैर्यच्च प्रार्थितवत्यहम्।
तस्या मे नियतस्त्वेष ह्यवमानः पदे पदे ॥ ५ ॥
नैवास्मि कुटिला शर्व ! विषमा नैव धूर्जटे !।
स विषस्त्वङ्गतः ख्यातिं व्यक्तं दोषाकराश्रयात् ॥६॥
नाहं पूष्णोऽपि दशना नेत्रे चास्मि भगस्य हि।
आदित्यश्च विजानाति भगवान् द्वादशात्मकः ॥ ७ ॥
मूर्ध्नि शूलं जनयसि स्वैर्दोषैर्मामधिक्षिपन्।
यस्त्वं मामाह कृष्णेति महाकालेति विश्रुतः ॥८॥
यास्याम्यहं परित्यक्तुं चात्मानं तपसा गिरिम्।
जीवन्त्या नास्ति मे कृत्यं धूर्तेन परिभूतया ॥ ९ ॥
निशम्य तस्या वचनं कोपतीक्ष्णाक्षरम्भवः।
उवाचाधिकसंभ्रान्तः प्रणयेनेन्दुमौलिना ॥ १० ॥
शर्व उवाच। अगात्मजासि गिरिजे ! नाहं निन्दापरस्तव।
त्वद्भक्तिबुद्ध्या कृतवांस्तवाहं नामसंश्रयम् ॥ ११ ॥
विकल्पः स्वस्थचित्तेऽपि गिरिजे ! नैव कल्पना।
यद्येवं कुपिता भीरु ! त्वन्तवाहन्नवै पुनः ॥ १२ ॥
नर्मवादी भविष्यामि जहि कोपं शुचिस्मिते !।
शिरसा प्रणतश्चाहं रचितस्ते मयाञ्जलिः ॥ १३ ॥
स्नेहेनाप्यवमानेन निन्दितेनैति विक्रियाम्।
तस्मान्न जातु रुष्टस्य नर्मस्पृष्टो जनः किल ॥ १४ ॥
अनेकैः स्वादुभिर्देवी देवेन प्रतिबोधिता।
कोपन्तीव्रन्न तत्याज सती मर्मणि घट्टिता ॥ १५ ॥
अवष्टभ्य मथास्फाल्य वासः शङ्करपाणिना।
विपर्यस्तालका वेगाद्यातुमैच्छत शैलजा ॥ १६ ॥

तस्या व्रजन्त्याः कोपेन पुनराह पुरान्तकः ।
सत्यं सर्वैरवयवैः सुतासि सदृशी पितुः ॥ १७ ॥
हिमाचलस्य शृङ्गैस्तैर्मेघजालाकुलैर्नभः ।
तथा दुरवगाहेभ्यो हृदयेभ्य स्तवाशयः ॥ १८ ॥
काठिन्याद्रूस्तमगम्यं वनेभ्यो बहुधा गता ।
कुटिलत्वञ्च वर्त्मभ्यो दुःसेव्यत्वं हिमादपि ॥ १९ ॥
संक्रान्तिं सर्वदैवेति तन्वङ्गि ! हिमशैलराट् ।
इत्युक्ता सा पुनः प्राह गिरिशं शैलजा तदा ॥ २० ॥
कोपकम्पितमूर्द्धा च प्रस्फुरद्दशनच्छदा ।
उमोवाच । मा सर्वान्दोषदानेन निन्दान्सान् गुणिनोजनान्॥२१॥
तवापि दुष्टसम्पर्कात् संक्रान्तं सर्वमेव हि ।
व्यालेभ्योऽधिकजिह्वत्वं भस्मना स्नेहबन्धनम् ॥२२॥
हृत्कालुष्यं शशाङ्कात्तु दुर्बोधित्वं वृषादपि ।
तथा बहु किमुक्तेन श्रन्तं वाचा श्रमेण ते ॥ २३ ॥
श्मशानवासान्निर्भीत्वं नग्नत्वान्न तव त्रपा ।
निर्घृणत्वं कपालित्वाद्दया ते विगता चिरम् ॥२४॥
इत्युक्ता मन्दिरात्तस्मान्निर्जगाम हिमाद्रिजा ।
तस्यां व्रजन्त्यां देवेशगणैः किलकिलाध्वनिः ॥ २५ ॥
क मातर्गच्छसि त्यक्ता रुदन्तो धाविताः पुनः ।
विष्टभ्य चरणौ देव्या वीरको वाष्पगद्गदम् ॥ २६॥
प्रोवाच मातः ! किन्त्वेतत् क यासि कुपितान्तरा ।
अहं त्वा मनुयास्यामि व्रजन्तीं स्नेहवर्जिताम् ॥२७॥
सोऽहं पतिष्ये शिखरात्तपोनिष्ठे त्वयोज्झितः ।
उन्नाम्य वदनं देवी दक्षिणेन तु पाणिना ॥ २८ ॥

उवाच वीरकं माता माशोकं पुत्र ! भावय।
शैलाग्रात् पतितुं नैव नचागन्तुं मया सह ॥ २९ ॥
युक्तन्ते पुत्र ! वक्ष्यामि येन कार्य्येण तच्छृणु।
कृष्णेत्युक्ता हरेणाहं निन्दिता चाप्यनिन्दिता ॥३०॥
साहं तपः करिष्यामि येन गौरीत्वमाप्नुयाम्।
एष स्त्रीलम्पटो देवो यातायां मय्यनन्तरम् ॥ ३१ ॥
द्वाररक्षा त्वया कार्य्या नित्यं रन्ध्रान्ववेक्षिणा।
यथा न काचित् प्रविशेद्योषिदत्र हरान्तिकम् ॥३२ ॥
दृष्ट्वा परस्त्रियञ्चात्र वदेथा मम पुत्रक !।
शीघ्रमेव करिष्यामि यथायुक्तमनन्तरम् ॥ ३३ ॥
एवमस्त्विति देवीं स वीरकः प्राह साम्प्रतम्।
मातुराज्ञामृताह्लादप्लावितांगो गतज्वरः ॥ ३४ ॥
जगाम कक्ष्यां संद्रष्टुं प्रणिपत्य च मातरम्।

---

अथ पञ्चपञ्चाशदधिकशततमोऽध्यायः।

सूत उवाच। देवीं सापश्यदायान्तीं सतीं मातुर्विभूषिताम्।
कुसुमामोदिनीं नाम तस्य शैलस्य देवताम् ॥ १ ॥
सापि दृष्ट्वा गिरिसुतां स्नेहविक्लवमानसा।
क्व पुत्रि ! गच्छसीत्युच्चैरालिङ्ग्योवाच देवता ॥ २ ॥
सा चास्यै सर्वमाचख्यौ शङ्करात् कोपकारणम्।
पुनश्चोवाच गिरिजा देवतां मातृसम्मताम् ॥ ३ ॥
उमोवाच। नित्यं शैलाधिराजस्य देवता त्वमनिन्दिते !।

सर्वतः सन्निधानन्ते मम पातीवेवत्सला ॥ ४ ॥
अतस्तु ते प्रवक्ष्यामि यद्विधेयं तदा धिया ।
अन्यस्त्रीसंप्रवेशस्तु त्वया रक्ष्यः प्रयत्नतः ॥ ५ ॥
रहस्यत्र प्रयत्नेन चेतसा सततं गिरौ ।
पिनाकिनः प्रविष्टायां वक्तव्यं मे त्वयानघे ! ॥ ६ ॥
ततोऽहं संविधास्यामि यत्कृत्यं तदनन्तरम् ।
इत्युक्ता सा तथेत्युक्त्वा जगाम स्वगिरिं शुभम् ॥ ७ ॥
उमापि पितुरुद्यानं जगामाद्रिसुता द्रुतम् ।
अन्तरिक्षं समाविश्य मेघमालामिव प्रभा ॥ ८ ॥
ततो विभूषणान्यस्य वृक्षवल्कलधारिणी ।
ग्रीष्मे पञ्चाग्निसन्तप्ता वर्षासु च जलोषिता ॥ ९ ॥
वन्याहारा निराहारा शुष्का स्थण्डिलशायिनी ।
एवं साधयतो तत्र तपसा संव्यवस्थिता ॥ १० ॥
ज्ञात्वा तु तां गिरिसुतां दैत्यस्तत्रान्तरे बली ।
अन्धकस्य सुतो दृप्तः पितुर्वधं मनुस्मरन् ॥ ११ ॥
देवान् सर्वान् विजित्याजौ बकभ्राता रणोत्कटः ।
आडिर्नामान्तरप्रेप्सुः सततं चन्द्रमौलिनः ॥ १२ ॥
आजगामामररिपुः पुरन्त्रिपुरघातिनः ।
स तत्रागत्य ददृशे वीरकं द्वारिवस्थितम् ॥ १३ ॥
विचिन्त्याभीदरं दत्तं सपुरा पद्मजन्मना ।
हते तदान्धके दैत्ये गिरिशेनामरद्विषि ॥ १४ ॥
आडिश्चकार विपुलं तपः परमदारुणम् ।
तमागत्याब्रवीद् ब्रह्मा तपसा परितोषितः ॥ १५ ॥
किमाडे ! दानवश्रेष्ठ ! तपसा प्राप्तुमिच्छसि ।

ब्रह्माणमाह दैत्यस्तु निर्मृत्युत्वमहं वृणे॥ १६॥

ब्रह्मोवाच। न कश्चिच्च विना मृत्युं नरो दानव! विद्यते॥

यतस्ततोऽपि दैत्येन्द्र! मृत्युः प्राप्यः शरीरिणा॥१७॥

इत्युक्तो दैत्यसिंहस्तु प्रोवाचाम्बुजसम्भवम्।

रूपस्य परिवर्तो मे यदा स्यात् पद्मसम्भव!॥ १८॥

तदा मृत्युर्मम भवेदन्यथात्वमरोह्यहम्।

इत्युक्तस्तु तदोवाच तुष्टः कमलसम्भवः॥ १९॥

यदा द्वितीयो रूपस्य विवर्तस्ते भविष्यति।

तदा ते भविता मृत्युरन्यथा न भविष्यति॥ २०॥

इत्युक्तोऽमरतां मेने दैत्यसूनुर्महाबलः।

तस्मिन् काले तु संस्मृत्य तद्वधोपायमात्मनः॥ २१॥

परिहर्तुं दृष्टिपथं वीरकस्याभवत्तदा।

भुजङ्गरूपी रन्ध्रेण प्रविवेश दृशः पथम्॥ २२॥

परिहृत्य गणेशस्य दानवोऽसौ सुदुर्जयः।

अलक्षितो गणेशेन प्रविष्टोऽथ पुरान्तकम्॥ २३॥

भुजङ्गरूपं सन्त्यज्य बभूवाथ महासुरः।

उमारूपी च्छलयितुं गिरिशं मूढचेतनः॥ २४॥

कृत्वा मायान्ततोरूप मप्रतर्क्यमनोहरम्।

सर्वावयवसंपूर्णं सर्वाभिज्ञानसंवृतम्॥ २५॥

कृत्वा मुखान्तरे दन्तान् दैत्योवज्रोपमान् दृढान्।

तीक्ष्णाग्रान् बुद्धिमोहेन गिरिशं हन्तु मुद्यतः॥२६॥

कृत्वोमारूपसंस्थानं गतो दैत्यो हरान्तिकम्।

पापोरम्या कृतिश्चित्रभूषणाम्बरभूषितः॥ २७॥

तं दृष्ट्वा गिरिशस्तुष्टस्तदालिङ्ग्य महासुरम्।

मन्यमानो गिरिसुतां सर्वैरवयवान्तरैः ॥ २८ ॥
अपृच्छत् साधु ते भावो गिरिपुत्रि ! न कृत्रिमः ।
या त्वं मदाशयं ज्ञात्वा प्राप्तेह वरवर्णिनि ! ॥२९
त्वया विरहितं शून्यं मन्यमानो जगत्त्रयम् ।
प्राप्ता प्रसन्नवदना युक्तमेवं विधन्त्वयि ॥ ३० ॥
इत्युक्तो दानवेन्द्रस्तु तदा भाषत् स्मयं श्छनैः ।
नचाबुध्यदभिज्ञानं प्रायस्त्रिपुरघातिनः ॥ ३१ ॥
देव्युवाच । यातास्म्यहं तपश्चर्तुं वल्लभ्यायतवातुलम् ।
रतिश्च तत्र मेनाभूत्ततः प्राप्ता त्वदन्तिकम् ॥ ३२ ॥
इत्युक्तः शङ्करः शङ्कां काञ्चित् प्राप्यावधारयन् ।
हृदयेन समाधाय देवः प्रहसिताननः ॥ ३३ ॥
कुपिता मयि तन्वङ्गी प्रकृत्या च दृढव्रता ।
अप्राप्तकामा संप्राप्ता किमेतत् संशयो मम ॥ ३४ ॥
इति चिन्त्य हरस्तस्या अभिज्ञानं विचारयन् ।
नापश्यद्वामपार्श्वे तु तदङ्गे पद्मलक्षणम् ॥ ३५ ॥
लोमावर्तन्तु रचितं ततो देवः पिनाकधृक् ।
अबुध्यद्दानवो माया माकारं गूहयंस्ततः ॥ ३६ ॥
मेढ्रे वज्रास्त्र मादाय दानवं तमघातयत् ।
अबुध्यद्वीरकोनैव दानवेन्द्रं निषूदितम् ॥ ३७ ॥
हरेण सूदितं दृष्ट्वा स्त्रीरूपं दानवेश्वरम् ।
अपरिच्छिन्नतत्त्वार्था शैलपुत्र्यै न्यवेदयत् ॥ ३८ ॥
दूतेन मारुतेनाशुगामिना नगदेवता ।
श्रुत्वा वायुमुखाद्देवी क्रोधरक्तविलोचना ।
अशपद्वीरकं पुत्रं हृदयेन विदूयता ॥ ३९ ॥

## अथ षट्पञ्चाशदधिकशततमोऽध्यायः ।

देव्युवाच । मातरं मां परित्यज्य यस्मात्त्वं स्नेहविक्लवात् ।
विहितावसरः स्त्रीणां शङ्करस्य रहोविधौ ॥ १ ॥
तस्मात्ते पुरुषा रूक्षा जडा हृदयवर्जिता ।
गणेशश्चारमदृशो शिला माता भविष्यति ॥ २ ॥
निमित्तमेतद्विख्यातं वीरकस्य शिलोदये ।
सोऽभवत्प्रक्रमेणैव विचित्राख्यानसंश्रयः ॥ ३ ॥
एवमुत्सृष्टशापाया गिरिपुत्र्यास्त्वनन्तरम् ।
निर्जगाम मुखात् क्रोधः सिंहरूपो महाबलः ॥ ४ ॥
स तु सिंहः करालास्यो जटाजटिलकन्धरः ।
प्रोद्गतलम्बलाङ्गूलो दंष्ट्रोत्कटमुखातटः ॥ ५ ॥
व्यावृत्तास्यो ललज्जिह्वः क्षामकुक्षिः शिरादिषु ।
तस्याश्वर्तितुं देवी व्यवस्यत सती तदा ॥ ६ ॥
ज्ञात्वा मनोगतं तस्या भगवांश्चतुराननः ।
आगम्योवाच देवेशो गिरिजां स्पष्टया गिरा ।
ब्रह्मोवाच । किं पुत्रि ! प्राप्तुकामासि किमलभ्यं ददामि ते॥७
विरम्यतामति क्लेशात्तपसोऽस्मान्मदाज्ञया ।
तच्छ्रुत्वोवाच गिरिजा गुरुगौरवगर्भितम् ॥ ८ ॥
वाक्यं वाचा चिरोद्गीर्णवर्णनिर्णीतवाञ्छितम् ।

देव्युवाच । तपसा दुष्करेणाप्तः पतित्वे शङ्करो मया ॥ १० ॥
स मां श्यामलवर्णेति बहुशः प्रोक्तवान् भवः ।
श्यामहं काञ्चनाकारा वाल्लभ्येन च संयुता ॥ ११ ॥
भर्तुर्भूतपते रङ्गमेकतो निर्विशेऽङ्कवत् ।
तस्यास्तद्भाषितं श्रुत्वा प्रोवाच कमलासनः ॥ १२ ॥
एवं भव त्वं भूयश्च भर्तुर्देहार्द्धधारिणी ।
ततस्तस्याजभङ्गाङ्गं फुल्लनीलोत्पलत्वचम् ॥ १३ ॥
त्वचा सा चाभवद्दीप्ता घण्टाहस्ताविलोचना ।
नानाभरणपूर्णाङ्गी पीतकौशेयधारिणी ॥ १४ ॥
तामब्रवीत्ततो ब्रह्मा देवीं नीलाम्बुजत्विषम् ।
निशे भूधरजा देहसम्पर्कात्त्वं ममाज्ञया ॥ १५ ॥
सम्प्राप्ता कृतकृत्यत्वमेकानंशापुराप्नसि ।
य एष सिंहः प्रोद्भूतो देव्याः क्रोधाद्वरानने ! ॥ १६ ॥
स तेऽस्तु वाहनं देवि ! केतौ चास्तु महाबलः ।
गच्छ विन्ध्याचलं तत्र सुरकार्यं करिष्यसि ॥ १७ ॥
पञ्चालो नाम यक्षोऽयं यक्षलक्षपदानुगः ।
दत्तस्ते किङ्करो देवि ! मया मायाशतैर्युतः ॥ १८ ॥
इत्युक्ता कौशिकी देवी विन्ध्यशैलं जगाम ह ।
उमापि प्राप्तसङ्कल्पा जगाम गिरिशान्तिकम् ॥ १९ ॥
प्रविशन्तीति तां द्वारि ह्यपकृष्य समाहितः ।
रुरोध वीरको देवीं हेमवेत्रलताधरः ॥ २० ॥
तामुवाच च कोपेन रूपात्तु व्यभिचारिणीम् ।
प्रयोजनं न तेऽस्तीह गच्छ यावन्न भेत्स्यसि ॥ २१ ॥
देव्या रूपधरो दैत्यो देवं वञ्चयतुं त्विह ।

प्रविष्टो न च दृष्टोऽसौ स वै देवेन घातितः ॥ २२ ॥
घातिते चाहमाज्ञप्तो नीलकण्ठेन कोपिना।
द्वारेषु नावधानं ते यस्मात् पश्यामि वै ततः ॥ २३ ॥
भविष्यसि नमद्द्वास्थो वर्षं पूगान्यनेकशः।
अतस्तेऽद्य न दास्यामि प्रवेशं गम्यतां द्रुतम् ॥ २४ ॥

---

अथ सप्तपञ्चाशदधिकशततमोऽध्यायः।

वीरक उवाच। एवमुक्ता गिरिसुता माता मे स्नेहवत्सला।
प्रवेशं लभते नान्या नारी कमललोचने! ॥ १ ॥
इत्युक्ता तु तदा देवी चिन्तयामास चेतसा।
न सा नारीति दैत्योऽसौ वायुर्मे यामभाषत ॥ २ ॥
वृथैव वीरकः शप्तो मया क्रोधपरीतया।
अकार्यं क्रियते मूढैः प्रायः क्रोधसमीरितैः ॥ ३ ॥
क्रोधेन नश्यते कीर्तिः क्रोधो हन्ति स्थिरां श्रियम्।
अपरिच्छिन्नतत्त्वार्था पुत्रं शापितवत्यहम् ॥ ४ ॥
विपरीतार्थबुद्धीनां सुलभो विपदोदयः।
सञ्चिन्त्यैवमुवाचेदं वीरकं प्रति शैलजा ॥ ५ ॥
लज्जासज्जविकारेण वदनेनाम्बुजत्विषा।
देव्युवाच। अहं वीरक! ते माता मा तेऽस्तु मनसोभ्रमः।
शङ्करस्यास्मि दयिता सुता तु हिमभूभृतः।
मम गात्रच्छविभ्रान्त्या मा शङ्कां पुत्र! भावय ॥ ६ ॥
तुष्टेन गौरता दत्ता ममेयं पद्मजन्मना।

मया शप्तोऽस्य विहिते हृत्काले दैत्यनिर्मिते ॥ ८ ॥
ज्ञात्वा नारीप्रवेशन्तु शङ्करे रहसि स्थिते ।
न निवर्तयितुं शक्यः शापः किन्तु ब्रवीमि ते ॥ ९ ॥
शीघ्रमेष्यसि मातुष्यात् स त्वं कामसमन्वितः ।
शिरसा तु ततो वन्द्य मातरं पूर्णमानसः ।
एवाचार्चितपूर्णेन्दुद्युतिश्च हिमशैलजाम् ॥ १० ॥

वीरक उवाच ।

नतसुरासुरमौलिमिलन्मणिप्रचयकान्तिकरालनखाङ्किते ।
नगसुते ! शरणागतवत्सले ! तव नतोऽस्मि नतार्त्तिविनाशिनि ॥
तपनमण्डलमण्डितकन्धरे !
पृथुसुवर्णसुवर्णनगद्युते ! ।
विषभुजङ्गनिषङ्गविभूषिते !
गिरिसुते ! भवतीमहमाश्रये ॥ १२ ॥
जगति कः प्रणताभिमतन्ददौ झटिति सिद्धनुते भवती यथा ।
जगति काञ्चन वाञ्छति शङ्करो भुवनधृत्तनये ! भवतीं यथा ॥ १३ ॥
विमलयोगविनिर्मितदुर्जयस्वतनुतुल्यमहेश्वरमण्डले ! ।
विदलितान्धकबान्धवसंहतिः सुरवरैः प्रथमन्त्वमभिष्टुता ॥ १४ ॥
सितसटापटलोद्धतकन्धराभरमहामृगराजरथास्थिता ।
विमलशक्तिमुखानलपिङ्गलायतभुजौघविपिष्टमहासुरा ॥ १५ ॥
निगदिता भुवनैरिति चण्डिका जननि ! शुम्भनिशुम्भनिषूदनी ।
प्रणतचिन्तितदानवदानवप्रमथनैकरतिस्तरसा भुवि ॥ १६ ॥
वियति वायुपथे ज्वलनोज्ज्वलेऽवनितले तव देवि ! च यद्वपुः ।
तदजितेऽप्रतिमे प्रणमाम्यहं भुवनभाविनि ! ते भववल्लभे ॥ १७ ॥
जलधयो ललितोद्धतवीचयो हुतवहद्युतयश्च चराचरम् ।

फणसहस्रभृतश्च भुजङ्गमास्त्वदभिधास्यति मय्यभयङ्कराः ॥१८॥
भगवति! स्थिरभक्तजनाश्रये! प्रतिगतो भवतीचरणाश्रयम्।
करणजातमिहास्तु ममाचलम् तिसवाप्तिफलाशयहेतुतः।
प्रशममेहि ममात्मजवत्सले! नमोऽस्तु ते देवि! जगत्त्रयाश्रये॥१९

सूत उवाच। प्रसन्ना तु ततो देवी वीरकस्येति संस्तुता।
प्रविवेश शुभं भर्तुर्भवनं भूधरात्मजा॥ २०॥
द्वारस्थो वीरको देवान् हरदर्शनकाङ्क्षिणः।
व्यसर्जयत् स्वकान्येव गृहाण्यादरपूर्वकः॥ २१॥
नास्त्यत्रावसरो देवा देव्या सह वृषाकपिः।
निभृतः क्रीडतीत्युक्ता ययुस्ते च यथागतम्॥ २२॥
गते वर्षसहस्रे तु देवास्त्वरितमानसः।
ज्वलनं चोदयामासुर्ज्ञातुं शङ्करचेष्टितम्॥ २३॥
प्रविश्य जालरन्ध्रेण शुकरूपी हुताशनः।
ददर्श शयने शर्वं रतं गिरिजया सह॥ २४॥
ददर्श तञ्च देवेशो हुताशं शुकरूपिणम्।
तमुवाच महादेवः किञ्चित् कोपसमन्वितः॥ २५॥
यस्मात्तु त्वत्कृतोविघ्नस्तस्मात्त्वय्युपपद्यते।
इत्युक्तः प्राञ्जलिर्वह्निरपिबद्वीर्यमाहितम्॥ २६॥
तेनापूर्यत तान्देवांस्तत्तत्कायविभेदतः।
विपाट्य जठरन्तेषां वीर्यं माहेश्वरन्ततः॥ २७॥
निष्क्रान्तं तप्तहेमाभं वितते शङ्कराश्रमे।
तस्मिन् सरो महज्जातं विमलं बहुयोजनम्॥२८॥
प्रोत्फुल्लहेमकमलं नानाविहगनादितम्।

तच्छ्रुत्वा तु ततो देवी हेमद्रुममयाम्बुजम् ॥ २८ ॥
तत्र कृत्वा जलक्रीडां तदब्जकृतशेखरा ।
उपविष्टा च तत्रस्य तीरे देवी सखीयुता ॥ ३० ॥
पातुकामा च तत्तोयं स्वादु निर्मलपङ्कजम् ।
अपश्यन् कृत्तिकाः स्नाताः षडर्कद्युतिसन्निभम् ॥ ३१ ॥
पद्मपत्रे तु तद्वारि गृहीत्वोपस्थिता गृहम् ।
हर्षादुवाच पश्यामि पद्मपत्रे स्थितं पयः ॥ ३२ ॥
ततस्ता ऊचुरखिलं कृत्तिका हिमशैलजम् ।
कृत्तिका ऊचुः । दास्यामो यदि ते गर्भः सम्भूतो यो भविष्यति ॥ ३३ ॥
सोऽस्माकमपि पुत्रः स्यादस्मन्नाम्ना च वर्तताम् ।
भवेल्लोकेषु विख्यातः सर्वेष्वपि शुभानने ॥ ३४ ॥
इत्युक्तोवाच गिरिजा कथं मद्गात्रसम्भवः ।
सर्वैरवयवैर्युक्तो भवतीभ्यः सुतो भवेत् ॥ ३५ ॥
ततस्तां कृत्तिका ऊचुर्विधास्यामोऽस्य वै वयम् ।
उत्तमान्युत्तमाङ्गानि यद्येवन्तु भविष्यति ॥ ३६ ॥
उक्ता वै शैलजा प्राह भवत्वेवमनिन्दिताः ।
ततस्ता हर्षसम्पूर्णाः पद्मपत्रस्थितं पयः ॥ ३७ ॥
तस्यै ददुस्तया चापि तत्पीतं क्रमशो जलम् ।
पीते तु सलिले तस्मिंस्तत्रस्तस्मिन् सरोवरे ॥ ३८ ॥
विपाट्य देव्याश्च ततो दक्षिणां कुक्षिमुद्गतः ।
निश्चक्रामाद्भुतो बालः सर्वलोकविभासकः ॥ ३९ ॥
प्रभाकरप्रभाकारः प्रकाशकनकप्रभः ।
गृहीतनिर्मलोदग्रशक्तिशूलः षडाननः ॥ ४० ॥
दीप्तो मारयितुं दैत्यान् कुत्सितान् कनकच्छविः ।

एतस्मात् कारणाद्देवः कुमारश्चापि सोऽभवत् ॥ ४१ ॥

---

## अथाष्टपञ्चाशदधिकशततमोऽध्यायः।

सूत उवाच। वामं विदार्य निष्क्रान्तः सुतो देव्याः पुनः शिशुः।
स्कन्दाश्च वदने वह्नेः शुक्रात् सुवदनोऽरिहा ॥ १ ॥
कृत्तिकामिलनादेव शाखाभिः सविशेषतः।
शाखाभिधाः समाख्याताः षट्सु वक्त्रेषु विस्तृताः ॥ २ ॥
यतस्ततो विशाखोऽसौ ख्यातो लोकेषु षण्मुखः।
स्कन्दो विशाखः षड्वक्त्रो कार्त्तिकेयश्च विश्रुतः ॥ ३ ॥
चैत्रस्य बहुले पक्षे पञ्चदश्यां महाबलौ।
संभूतावर्कसदृशौ विशाले शरकानने ॥ ४ ॥
चैत्रस्यैव सिते पक्षे पञ्चम्यां पाकशासनः।
बालकाभ्याञ्चकारैकं मत्वा चामरभूतये ॥ ५ ॥
तस्यामेव ततः षष्ठ्यामभिषिक्तो गुहः प्रभुः।
सर्वैरमरसङ्घातैर्ब्रह्मेन्द्रोपेन्द्रभास्करैः ॥ ६ ॥
गन्धमाल्यैः शुभैर्धूपैस्तथा क्रीडनकैरपि।
छत्रैश्चामरजालैश्च भूषणैश्च विलेपनैः ॥ ७ ॥
अभ्यर्चितो विधानेन यथावत्षण्मुखः प्रभुः।
सुतामस्मै ददौ शक्रो देवसेनेति विश्रुताम् ॥ ८ ॥
पत्न्यर्थं देवदेवस्य ददौ विष्णुस्तदायुधान्।
यक्षाणां दशलक्षाणि ददावस्मै धनाधिपः ॥ ९ ॥
ददौ हुताशनस्तेजो ददौ वायुश्च वाहनम्।
ददौ क्रीडनकं त्वष्टा कुक्कुटं कामरूपिणम् ॥ १० ॥

एवं सुरास्ते सर्वे परिवारमनुत्तमम् ।
दद्दशुर्दितचेतस्काः स्कन्दायादित्यवर्चसे ॥ ११ ॥
जानुभ्यामवनौ स्थित्वा सुरसङ्घास्तमस्तुवन् ।
स्तोत्रेणानेन वरदं षण्मुखं मुख्यशः सुराः ॥ १२ ॥
देवा ऊचुः ।
नमः कुमाराय महाप्रभाय स्कन्दाय च स्कन्दितदानवाय ।
नवार्कविद्युद्द्युतये नमोऽस्तु नमोस्तु ते षण्मुख कामरूप ॥ १३ ॥
पिनद्धनानाभरणाय भर्त्रे नमो रणे दारुणदारुणाय ।
नमोऽस्तु तेऽर्कप्रतिमप्रभाय नमोऽस्तु गुह्याय गुहाय तुभ्यम् ॥ १४ ॥
नमोऽस्तु त्रैलोक्यभयापहाय नमोऽस्तु ते बाल ! कृपापराय ।
नमो विशालामललोचनाय नमो विशाखाय महाव्रताय ॥ १५ ॥
नमो नमस्तेऽस्तु मनोहराय नमो नमस्तेऽस्तु रणोत्कटाय ।
नमो मयूरोज्ज्वलवाहनाय नमोऽस्तु केयूरधराय तुभ्यम् ॥ १६ ॥
नमो धृतोदग्रपताकिने नमोनमः प्रभावप्रणताय तेऽस्तु ।
नमोनमस्ते वरवीर्यशालिने क्रियापराणां भवभवन्मूर्तये ॥ १७ ॥
क्रियापरा यज्ञपतिश्च स्तुत्वा विरेमुरेव त्वमराधिपाद्याः ।
एवं तदा षड्वदनस्तु सेन्द्रामुदा सुतुष्टश्च गुहस्ततस्तान् ।
निरीक्ष्य नेत्रैरमरैः सुरेशान् ब्रूत हर्षिणघ्नामि गतज्वराः स्थ॥१८
कुमार उवाच । कं वः कामं प्रयच्छामि देवता ! ब्रूत निर्वृताः ।
यद्यप्यसाध्यं हृद्यं वो हृदये चिन्तितम्परम् ॥ १९ ॥
श्रुत्यु तास्तु सुरास्तेन मुत्वा प्रणतमौलयः ।
सर्वएव महात्मानं गुहं तद्गतमानसाः ॥ २० ॥
दैत्येन्द्रस्तारकोनाम सर्वामरकुलान्तकृत् ।
बलवान् दुर्जयोदुष्टो दुराचारोऽतिकोपनः ॥ २१ ॥

तमेव जहि हर्य्योऽश्व एषोऽस्माकं भयापह!।
एवमुक्तस्तथेत्युक्त्वा सर्वामरपदानुगः॥ २२॥
जगाम जगतां नाथ स्तूयमानोऽमरेश्वरैः।
तारकस्य वधार्थाय जगतः कण्टकस्य वै॥ २३॥
ततश्च प्रेषयामास शक्रोलब्धसमाश्रयः।
दूतं दानवसिंहस्य परुषाक्षरवादिनम्॥ २४॥
स तु गत्वाब्रवीद्दैत्यं निर्भयो भीमदर्शनः।
दूत उवाच। शक्रस्त्वामाह देवेशो दैत्यकेतो! दिवस्पतिः॥२५
तारकासुर! तच्छ्रुत्वा घट शक्त्या यथेच्छया।
यज्जगद्दलनादाम किल्बिषं दानव! त्वया॥ २६॥
तस्याहं शासकस्तेऽद्य राजास्मि भुवनत्रये।
श्रुत्वैतद्दूतवचनं कोपसंरक्तलोचनः॥ २७॥
उवाच दूतं दुष्टात्मा नष्टप्रायविभूतिकः।
तारक उवाच। दृष्टं ते पौरुषं शक्र! रणेषु शतशो मया॥२८॥
निस्त्रपत्वान्न ते लज्जा विद्यते शक्र! दुर्मते!।
एवमुक्ते गते दूते चिन्तयामास दानवः॥ २९॥
नालब्धसंश्रयः शक्रो वक्तुमेवं हि चार्हति।
जितः स शक्रो नोऽकस्माज्ज्ञायते संश्रयाश्रयः॥ ३०॥
निमित्तानि च दुष्टानि सोऽपश्यद्दुष्टचेष्टितः।
पांसुवर्षमसृक्पातं गगनादवनीतले॥ ३१॥
भुजनेत्रप्रकम्पं च वक्त्रशोषं मनोभ्रमम्।
स्वकान्तावक्त्रपद्मानां म्लानतां च व्यलोकयत्॥ ३२॥
दुष्टांश्च प्राणिनो रौद्रान् सोऽपश्यद्दुष्टवेदिनः।
तदचिन्त्यैव दितिजोन्यस्तचिन्तोऽभवत् क्षणात्॥३३॥

यावद्गजघटाघण्टारणत्काररवोत्कटाम् ।
तद्वत्तुरगसंघातक्षुण्णभूरेणुपिञ्जराम् ॥ ३४ ॥
चञ्चलस्यन्दनोदग्रध्वजराजिविराजिताम् ।
विमानैश्चाद्भुताकारैश्चलितामरचामरैः ॥ ३५ ॥
तां भूषणनिबद्धाश्च किन्नरोद्गीतनादिताम् ।
नानानाकतरूत्फुल्लकुसुमापीडधारिणीम् ॥ ३६ ॥
विकीर्णास्त्रपरिष्कारां वर्म्मनिर्म्मलदर्शनाम् ।
वन्द्युद्घुष्टस्तुतिरवां नानावाद्यनिनादिताम् ॥ ३७ ॥
सेनां नाकसदां दैत्यः प्रासादस्थो व्यलोकयत् ।
चिन्तयामास स तदा किञ्चिदुद्भ्रान्तमानसः ॥ ३८ ॥
अपूर्वः को भवेद्योद्धा यो मया न विनिर्जितः ।
ततश्चिन्ताकुलो दैत्यः शुश्राव कटुकाक्षरम् ॥ ३९ ॥
सिद्धबन्दिभिरुद्घुष्टमिदं हृदयदारणम् ।
अथ गाथा । जय अतुलशक्तिदीधितिपिञ्जर !
भुजदण्डचण्डरणारभस ! ।
सुखद ! कुमुदकाननविकासनेन्दो !
कुमार ! जय दितिजकुलमहोदधिवडवानल ! ॥ ४० ॥
षण्मुख ! मधुररवमयूररथ !
सुरमुकुटकोटिघट्टितचरणनखाङ्कुरमहासन ! ।
जय ललितचूडाकलापनवविमलदल !
कमलकान्त ! दैत्यवंशदुःसहदावानल ! ॥ ४१ ॥
जय विशाख ! विभो ! जय सकललोकतारक !
स्कन्द ! जय गौरीनन्दन ! घण्टाप्रिय ! ।
प्रिय ! विशाख ! विभो ! धृतपताकप्रकीर्णपटल !

कनकभूषणभासुरदिनकरच्छाय ! ॥ ४२ ॥
जय जनितसंभ्रमलीलालूनाखिलाराते !
जय सकललोकतारक ! दितिजासुरवरतारकान्तक ! ।
स्कन्द ! जय बाल ! सप्तवासर !
जय भुवनावलिशोकविनाशन ! ॥ ४३ ॥

---

## अथोनषष्ट्यधिकशततमोऽध्यायः ।

सूत उवाच । श्रुत्वैतत्तारकः सर्वमदृष्टं देववन्दिभिः ।
सस्मार ब्रह्मणो वाक्यं वधं बालादुपस्थितम् ॥ १ ॥
स्मृत्वा धर्मं सवर्माङ्गः पदातिरपदानुगः ।
मन्दिरान्निर्जगामाशु शोकग्रस्तेन चेतसा ॥ २ ॥
कालनेमिमुखा दैत्याः संरम्भाद्भ्रान्तचेतसः ।
योधा ! धावत गृह्णीत योजयध्वं वरूथिनीम् ॥ ३ ॥
कुमारं तारको दृष्ट्वा बभाषे भीषणाकृतिः ।
किं बाल ! योद्धुकामोऽसि क्रीड कन्दुकलीलया ॥ ४ ॥
त्वया न दानवा दृष्टा यत् सङ्गरविभीषकाः ।
बालत्वादथ ते बुद्धिरेवं स्वल्पार्थदर्शिनी ॥ ५ ॥
कुमारोऽपि तमग्रस्थं बभाषे हर्षयन् सुरान् ।
शृणु तारक ! शास्त्रार्थस्तव चैव निरूप्यते ॥ ६ ॥
शास्त्रैरर्थो न दृश्यन्ते समये निर्भये भटैः ।
शिशुत्वं मावमंस्था मे शिशुः कालभुजङ्गमः ॥ ७ ॥
दुष्प्रेक्ष्यो भास्करो बालस्तथाहं दुर्जयः शिशुः ।
अल्पाक्षरो न मन्त्रः किं सुस्फुरो दैत्य ! दृश्यते ॥ ८ ॥

कुमारे प्रोक्तवत्येवं दैत्यश्चिक्षेप मुद्गरम् ।
कुमारस्तं निरस्याथ वज्रेणामोघवर्चसा ॥ ९ ॥
ततश्चिक्षेप दैत्येन्द्रो भिन्दिपालमयोमयम् ।
करेण तच्च जग्राह कार्त्तिकेयोऽमरारिहा ॥ १० ॥
गदां मुमोच दैत्याय षण्मुखोऽपि खरस्वनाम् ।
तया हतस्ततो दैत्यश्चकम्पेऽचलराडिव ॥ ११ ॥
मेने च दुर्जयं दैत्यस्तदा षड्वदनं रणे ।
चिन्तयामास बुद्ध्या वै प्राप्तः कालो न संशयः ॥ १२ ॥
कुपितस्तु तमालोक्य कालनेमिपुरोगमाः ।
सर्वे दैत्येश्वरा जघ्नुः कुमारं रणदारुणम् ॥ १३ ॥
स तैः प्रहारैरस्पृष्टो युद्धाक्षोभ्यो महाद्युतिः ।
रणशौण्डास्तु दैत्येन्द्राः पुनः प्रासैः शिलीमुखैः ॥ १४ ॥
कुमारं सामरञ्जघ्नुर्बलिनो दैत्यकण्टकाः ।
कुमारस्य व्यथा नाभूद्दैत्यास्त्रनिहतस्य तु ॥ १५ ॥
प्राणान्तकरणी जाता देवानां दानवाहवः ।
देवान्निपीडितान् दृष्ट्वा कुमारः कोपमाविशत् ॥ १६ ॥
ततोऽस्त्रैर्वारयामास दानवानामनीकिनीम् ।
तैरस्त्रैर्निष्प्रतीकारैस्ताडिताः सुरकण्टकाः ॥ १७ ॥
कालनेमिमुखाः सर्वे रणादासन् पराङ्मुखाः ।
विद्रुतेष्वथ दैत्येषु हतेषु च समन्ततः ॥ १८ ॥
ततः क्रुद्धो महादैत्यस्तारकोऽसुरनायकः ।
जग्राह च गदां दिव्यां हेमजालपरिष्कृताम् ॥ १९ ॥
जघ्ने कुमारं गदया निष्टप्तकनकाङ्गदः ।
शरैर्मयूरं चिच्छेद्य चकार विमुखं रणे ॥ २० ॥

दृष्ट्वा पराङ्मुखं देवीमुक्तारक्तं स्ववाहनम् ।
अग्राह शक्तिं विमलां रणे कनकभूषणाम् ॥ २१ ॥
बाहुना हेमकेयूररुचिरेण षडाननः ।
ततो जवान्महासेन तारकं दानवाधिपम् ॥ २२ ॥
तिष्ठ तिष्ठ सुदुर्बुद्धे ! जीवलोकं विलोकय ।
हतोऽस्यद्य मया शक्त्या स्मर शस्त्रं सुशिक्षितम् ॥२३॥
इत्युक्त्वा च ततः शक्तिं मुमोच दितिजम्प्रति ।
स कुमारभुजोत्सृष्टा तत्केयूररवानुगा ॥ २४ ॥
बिभेद दैत्यहृदयं वज्रशैलेन्द्रकर्कशम् ।
गतासुः स पपातोर्व्यां प्रलये भूधरो यथा ॥ २५ ॥
विकीर्णमुकुटोष्णीषो विस्रस्ताखिलभूषणः ।
तस्मिन् विनिहते दैत्ये त्रिदशानां महोत्सवे ॥ २६ ॥
नाभूत् कश्चित्तदा दुःखी नरकेष्वपि पापकृत् ।
स्तुवन्तः षण्मुखं देवाः क्रीडन्तश्चाङ्गनायुताः ॥ २७ ॥
जग्मुः स्वानेव भवनान् भूरिधामान उत्सुकाः ।
ददुश्चापि वरं सर्वे देवाः स्कन्दमुखं प्रति ॥ २८ ॥
तुष्टाः संप्राप्तसर्वेच्छाः सह सिद्धैस्तपोधनैः ।
देवा ऊचुः । यः पठेत् स्कन्दसंबद्धां कथां मर्त्यो महामतिः ॥२९॥
शृणुयाच्छ्रावयेद्वापि स भवेत् कीर्तिमान् नरः ।
बह्वायुः सुभगः श्रीमान् कान्तिमान् शुभदर्शनः ॥३०॥
भूतेभ्यो निर्भयश्चापि सर्वदुःखविवर्जितः ।
सन्ध्यामुपास्य वै पूर्वां स्कन्दस्य चरितं पठेत् ॥ ३१ ॥
स मुक्तः किल्बिषैः सर्वैर्महाधनपतिर्भवेत् ।
बालानां व्याधिजुष्टानां राजद्वारस्य सेवताम् ॥ ३२ ॥

इदं तत्परमन्दिव्यं सर्वदा सर्वकामदम् ।
तमुत्तये च सायुज्यं षण्मुखस्य व्रजेन्नरः ॥ ३१ ॥

अथ षष्ट्यधिकशततमोऽध्यायः ।

ऋषय ऊचुः । इदानीं श्रोतुमिच्छामो हिरण्यकशिपोर्वधम
नरसिंहस्य माहात्म्यं तथा पापविनाशनम् ॥ १ ॥
सूत उवाच । पुरा कृतयुगे विप्रा हिरण्यकशिपुः प्रभुः ।
दैत्यानामादिपुरुषश्चकार स महत्तपः ॥ २ ॥
दशवर्षसहस्राणि दशवर्षशतानि च
जलवासी समभवत् स्नानमौनधृतव्रतः ॥ ३ ॥
ततः शमदमाभ्याञ्च ब्रह्मचर्य्येण चैव हि ।
ब्रह्मा प्रीतोऽभवत्तस्य तपसा नियमेन च ॥ ४ ॥
ततः स्वयम्भूर्भगवान् स्वयमागम्य तत्र ह ।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥ ५ ॥
आदित्यैर्वसुभिः साध्यैर्मरुद्भिर्दैवतैस्तथा ।
रुद्रैर्विश्वसहायैश्च यक्षराक्षसपन्नगैः ॥ ६ ॥
दिग्भिश्चैव विदिग्भिश्च नदीभिः सागरैस्तथा ।
नक्षत्रैश्च मुहूर्तैश्च खेचरैश्च महाग्रहैः ॥ ७ ॥
देवैर्ब्रह्मर्षिभिः सार्द्धं सिद्धैः सप्तर्षिभिस्तथा
राजर्षिभिः पुण्यकृद्भिर्गन्धर्वाप्सरसाङ्गणैः ॥ ८ ॥
चराचरगुरुः श्रीमान् वृतः सर्वैर्दिवौकसैः ।
ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत् ॥ ९

प्रीतोऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत ! ।
वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ॥ १० ॥
हिरण्यकशिपुरुवाच । न देवासुरगन्धर्वा न यक्षोरगराक्षसाः ।
न मानुषाः पिशाचा वा हन्युर्मान्देवसत्तम ! ॥ ११ ॥
ऋषयो वा न मां शापैः शपेयुः प्रपितामह ! ।
यदि मे भगवान् प्रीतो वर एष वृतोमया ॥ १२॥
न चास्त्रेण न शस्त्रेण गिरिणा पादपेन च ।
न शुष्केण न चार्द्रेण नदिवा न निशाथवा ॥ १३॥
भवेय महमेवार्कः सोमोवायुर्हुताशनः ।
सलिलञ्चान्तरिक्षञ्च नक्षत्राणि दिशोदश ॥ १४ ॥
अहं क्रोधश्च कामश्च वरुणो वासवोयमः ।
धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ॥ १५ ॥
ब्रह्मोवाच । एते दिव्या वरास्तात ! मया दत्तास्तवाद्भुताः ।
सर्वान् कामान् सदा वत्स! प्राप्स्यसे त्वं न संशयः॥१६
एवमुक्त्वा स भगवान् जगामाकाश एव हि ।
वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितम् ॥ १७ ॥
ततो देवाश्च नागाश्च गन्धर्वा ऋषिभिः सह ।
वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः ॥ १८ ॥
देवा ऊचुः । वरप्रदानाद्भगवन् ! बधिष्यति स नोऽसुरः ।
तत्प्रसीदाशु भगवन् ! बधोऽप्यस्य विचिन्त्यताम् ॥१९
भगवन् ! सर्वभूतानामादिकर्त्ता स्वयं प्रभुः ।
स्रष्टा त्वं हव्यकव्यानामव्यक्तप्रकृतिर्बुधः ॥ २० ॥
सर्वलोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः ।
आश्वासयामास सुरान् सुशीतैर्वचनाम्बुभिः ॥ २१ ॥

अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् ।
तपसोऽन्तेऽस्य भगवान् बधं विष्णुः करिष्यति ॥ २२ ॥
तच्छ्रुत्वा विबुधा वाक्यं सर्वं पङ्कजजन्मनः ।
स्वानि स्थानानि दिव्यानि विप्रा जग्मुर्मुदान्विताः॥२३॥
लब्धमात्रे वरे चाथ सर्वाः सोऽबाधत प्रजाः ।
हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ॥ २४ ॥
आश्रमेषु महाभागान् स मुनीन् शंसितव्रतान् ।
सत्यधर्म्मपरान् दान्तान् धर्षयामास दानवः ॥ २५ ॥
देवांस्त्रिभुवनस्थांश्च पराजित्य महासुरः ।
त्रैलोक्यं वशमानीय स्वर्गं वसति दानवः ॥ २६ ॥
यदा वरमदोत्सिक्तश्चोदितः कालधर्म्मतः ।
यज्ञियानकरोद्दैत्यानयज्ञियाश्च देवताः ॥ २७ ॥
तदादित्याश्च साध्याश्च विश्वे च वसवस्तथा ।
सेन्द्रा देवगणा यक्षाः सिद्धद्विजमहर्षयः ॥ २८ ॥
शरण्यं शरणं विष्णुमुपतस्थुर्महाबलम् ।
देवदेवं यज्ञमयं वासुदेवं सनातनम् ॥ २९ ॥
देवा ऊचुः । नारायण ! महाभाग ! देवास्त्वां शरणङ्गताः।
त्रायस्व जहि दैत्येन्द्रं हिरण्यकशिपुं प्रभो ! ॥ ३० ॥
त्वं हि नः परमो धाता त्वं हि नः परमो गुरुः ।
त्वं हि नः परमो देवो ब्रह्मादीनां सुरोत्तम ॥३१॥
विष्णुरुवाच । भयन्त्यजध्वममरा ! अभयं वो ददाम्यहम् ।
तथैव त्रिदिवं देवाः प्रतिपद्यत माचिरम् ॥ ३२ ॥
एषोऽहं सगणं दैत्यं वरदानेन दर्पितम् ।
अवध्यममरेन्द्राणां दानवेन्द्रं निहन्म्यहम् ॥ ३३ ॥

एवमुक्त्वा तु भगवान् विसृज्य त्रिदशेश्वरान्।
वधं सङ्कल्पयामास हिरण्यकशिपोः प्रभुः॥ ३४॥
सहायश्च महाबाहुरोङ्कारं गृह्य सत्वरम्।
अथोङ्कारसहायस्तु भगवान् विष्णुरव्ययः॥ ३५॥
हिरण्यकशिपुस्थानं जगाम हरिरीश्वरः।
तेजसा भास्कराकारः शशी कान्त्येव चापरः॥ ३६॥
नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं तथा।
नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना॥ ३७॥
ततोऽपश्यत विस्तीर्णां दिव्यां रम्यां मनोरमाम्।
सर्वकामयुतां शुभ्रां हिरण्यकशिपोः सभाम्॥ ३८॥
विस्तीर्णां योजनशतं शतमध्यर्द्धमायताम्।
वैहायसीङ्कामगमां पञ्चयोजनविस्तृताम्॥ ३९॥
जरागोकक्लमापेतां निष्प्रकम्पां शिवां सुखाम्।
वेश्महर्म्यवतीं रम्यां ज्वलन्तीमिव तेजसा॥ ४०॥
अन्तःसलिलसंयुक्तां विहितां विश्वकर्मणा।
दिव्यरत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युताम्॥ ४१॥
नीलपीतासितश्यामैः कृष्णैर्लोहितकैरपि।
अवतानैस्तथा गुल्मैर्मञ्जरीशतधारिभिः॥ ४२॥
सिताभ्रघनसङ्काशा प्लवन्तीव व्यदृश्यत।
रश्मिवती भास्वरा च दिव्यगन्धमनोरमा॥ ४३॥
सुसुखा न च दुःखा सा न शीता न च घर्मदा।
न क्षुत्पिपासे ग्लानिं वा प्राप्यतां प्राप्नुवन्ति ते॥४४॥
नानारूपैरुपकृतां विचित्रै रतिभास्वरैः।

स्तम्भैर्न विधृता सा वै शाश्वती चापपा सदा ॥४५॥
अतिचन्द्रञ्च सूर्य्यञ्च शिखिनञ्च स्वयंप्रभा।
सर्वे च कामाः प्रचुरा ये दिव्या ये च मानुषाः।
रसयुक्तं प्रभूतञ्च भक्ष्यभोज्य मनन्तकाम् ॥ ४७ ॥
पुण्यगन्धस्रजश्चात्र नित्यपुष्पफलद्रुमाः।
उष्णे शीतानि तोयानि शीते चोष्णानि सन्ति च ॥४८॥
पुष्पिताग्रा महाशाखाः प्रवालाङ्कुरधारिणः।
लतावितानसंच्छन्ना नदीषु च सरःसु च ॥ ४९ ॥
दृष्टवान् वहुविधांस्तत्र मृगेन्द्रो ददृशे प्रभुः।
गन्धवन्ति च पुष्पाणि रसवन्ति फलानि च ॥ ५० ॥
नातिशीतानि नोष्णानि तत्र तत्र सरांसि च।
अपश्यत् सर्वतीर्थानि सभायां तस्य सो विभुः ॥ ५१॥
नलिनैः पुण्डरीकैश्च शतपत्रैः सुगन्धिभिः।
रक्तैः कुवलयैर्नीलैः कुमुदैः संवृतानि च ॥ ५२ ॥
सुकान्तैर्धार्तराष्ट्रैश्च राजहंसैश्च सुप्रियः।
कारण्डवैश्चक्रवाकैः सारसैः कुररैरपि ॥ ५३ ॥
विमलैः स्फाटिकाभैश्च पाण्डुरैश्च दन्तैर्द्विजैः।
वहुहंसोपगीतानि सारसाभिरुतानि च ॥ ५४ ॥
गन्धवत्यः शुभास्तत्र पुष्टमञ्जरिधारिणीः।
दृष्टवान् पर्वताग्रेषु नागपुष्पधरा लताः ॥ ५५ ॥
केतकाशोकसरलाः पुन्नागतिलकार्जुनाः।
चूता नीपाः प्रस्थपुष्पाः कदम्बा वकुलाधवाः ॥ ५६ ॥
प्रियङ्गु, पाटलावृक्षाः शाल्मल्यः सहरिद्रकाः।
सालास्तालास्तमालाश्च चम्पकाश्च मनोरमाः ॥ ५७ ॥

तथैवान्ये व्यराजन्त सभायां पुष्पिता द्रुमाः ।
विद्रुमाश्च द्रुमाश्चैव ज्वलिताग्निसमप्रभाः ॥ ५८ ॥
स्कन्धवन्तः सुशाखाश्च बहुतालसमुच्छ्रयाः ।
अर्जुनाशोकवर्णाश्च बहवश्चित्रका द्रुमाः ॥ ५९ ॥
वरणो वत्सनाभश्च पनसाः सह चन्दनैः ।
नीलाः सुमनसश्चैव निम्बा अश्वत्थतिन्दुकाः ॥६० ॥
पारिजाताश्च लोध्राश्च मल्लिका भद्रदारवः ।
आमलक्यस्तथा जम्बूल कुचाः शैलवालुकाः ॥ ६१ ॥
कालीयकाद्रुकालाश्च हिङ्गवः पारियात्रकाः ।
मन्दारकुन्दलताश्च पतङ्गाः कुटजास्तथा ॥ ६२ ॥
रक्ताः कुरण्टकाश्चैव नीलाश्चागरुभिः सह ।
कदम्बाश्चैव भव्याश्च दाडिमा वीजपूरकाः ॥ ६३ ॥
सप्तपर्णाश्च बिल्वाश्च मधुपैरावतास्तथा ।
अशोकाश्च तमालाश्च नानागुल्मलतावृताः ॥ ६४ ॥
मधूकाः सप्तपर्णाश्च बहवस्तीरगा द्रुमाः ।
लताश्च विविधाकाराः पत्रपुष्पफलोपमाः ॥ ६५ ॥
एते चान्ये च बहवस्तत्र काननजा द्रुमाः ।
नानापुष्पफलोपेता व्यराजन्त समन्ततः ॥ ६६ ॥
चकोराः शतपत्राश्च मत्तकोकिलसारिकाः ।
पुष्पिताः पुष्पितार्थं च सम्पतन्ति महाद्रुमाः ॥६७ ॥
रक्तपीतारुणास्तत्र पादपाग्रगताः खगाः ।
परस्परमवेक्षन्ते प्रहृष्टा जीवजीवकाः ॥ ६८ ॥
तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा ।
स्त्रीसहस्रैः परिवृतो विचित्राभरणाम्बरः ॥ ६९॥

अनर्घ्यं मणिवज्रार्चिःशिखाज्वलितकुण्डलः ।
आसीनश्चासने चित्रे दशनल्वप्रमाणतः ॥ ७० ॥
दिवाकरनिभे दिव्ये दिव्यास्तरणसंस्तृते ।
दिव्यगन्धवहस्तत्र मारुतः सुसुखोववौ ॥ ७१ ॥
हिरण्यकशिपुर्दैत्य आस्ते ज्वलितकुण्डलः ।
उपतस्थुर्महादैत्यं हिरण्यकशिपुं तदा ॥ ७२ ॥
दिव्यतानेन गीतानि जगुर्गन्धर्वसत्तमाः ।
विश्वाची सहजन्या च प्रम्लोचेत्यभिविश्रुता ॥ ७३ ॥
दिव्या च सौरभेयी च समीची पुञ्जिकस्थली ।
मिश्रकेशी च रम्भा च चित्रलेखा शुचिस्मिता ॥ ७४ ॥
चारुकेशी घृताची च मेनका चोर्वशी तथा ।
एताः सहस्रशश्चान्या नृत्यगीतविशारदाः ॥ ७५ ॥
उपतिष्ठन्त राजानं हिरण्यकशिपुं प्रभुम् ।
तत्रासीनं महाबाहुं हिरण्यकशिपुं प्रभुम् ॥ ७६
उपासन्त दितेः पुत्राः सर्वे लब्धवरास्तथा ।
तमप्रतिमकर्माणं शतशोऽथ सहस्रशः ॥ ७७ ॥
बलिर्विरोचनस्तत्र नरकः पृथिवीसुतः ।
प्रह्लादो विप्रचित्तिश्च गविष्ठश्च महासुरः ॥ ७८ ॥
सुरहन्ता दुःखहन्ता सुनामा सुमतिर्वरः ॥
घटोदरो महापार्श्वः क्रथनः कठिनस्तथा ॥ ७९ ॥
विश्वरूपः सुरूपश्च स्वबलश्च महाबलः ।
दशग्रीवश्च वाली च मेघवासा महासुरः ॥ ८० ॥
घटास्यो कम्पनश्चैव प्रजनश्चेन्द्रतापनः ।
दैत्यदानवसंघास्ते सर्वे ज्वलितकुण्डलाः ॥ ८१ ॥

स्रग्विणो वाग्मिनः सर्वे सदैव चरितव्रताः।
सर्वे लब्धवराः शूराः सर्वे विगतमृत्यवः॥ ८२॥
एते चान्येच बहवोहिरण्यकशिपुं प्रभुम्।
उपासन्ति महात्मानं सर्वे दिव्यपरिच्छदाः॥ ८३॥
विमानैर्विविधाकारैर्भ्राजमानै रिवाग्निभिः।
महेन्द्रवपुषः सर्वे विचित्राङ्गदवाहवः॥ ८४॥
भूषिताङ्गा दितेः पुत्रास्त मुपासन्त सर्वशः।
तस्यां सभायान्दिव्यायां असुराः पर्वतोपमाः॥ ८५॥
हिरण्यवपुषः सर्वे दिवाकरसमप्रभाः।
न श्रुतन्नैव दृष्टं हि हिरण्यकशिपोर्यथा। ८६॥
ऐश्वर्यं दैत्यसिंहस्य यथा तस्य महात्मनः।
कनकरजतचित्रवेदिकायां परिहृतरत्नविचित्रवीथिकायाम्।
स ददर्श मृगाधिपः सभायां सुरचितरत्नगवाक्षशोभितायां ८७
कनक विमलहारविभूषिताङ्गं
दितितनयं स मृगाधिपो ददर्श।
दिवसकरमहाप्रभास्वरं त-
न्दितिजसहस्रशतै निषेव्यमाणम्॥ ८८॥

---

## अथैकषष्ठ्यधिकशततमोऽध्यायः।

सूत उवाच। ततो दृष्ट्वा महात्मानं कालचक्रमिवागतम्।
नरसिंहवपुश्छन्नं भस्मच्छन्नमिवानलम्॥ १॥
हिरण्यकशिपोः पुत्रः प्रह्लादोनाम वीर्यवान्।

दिव्येन चक्षुषा सिंहमपश्यद्देवमागतम् ॥ १ ॥
तं दृष्ट्वा रुक्मशैलाभमपूर्वां तनुमाश्रितम् ।
विस्मिता दानवाः सर्वे हिरण्यकशिपुश्च सः ॥ २ ॥
प्रह्लाद उवाच । महाबाहो ! महाराज ! दैत्यानामादिसम्भव ।
न श्रुतं न च नो दृष्टं नारसिंहमिदं वपुः ॥ ४ ॥
अव्यक्तप्रभवन्दिव्यं किमिदं रूपमागतम् ।
दैत्यान्तकरणं घोरं संशतीव मनो मम ॥ ५ ॥
अस्य देवाः शरीरस्थाः सागराः सरितश्च याः ।
हिमवान् पारियात्रश्च ये चान्ये कुलपर्वताः ॥ ६ ॥
चन्द्रमाश्च सनक्षत्रैरादित्यैर्वसुभिः सह ।
धनदो वरुणश्चैव यमः शक्रः शचीपतिः ॥ ७ ॥
मरुतो देवगन्धर्वा ऋषयश्च तपोधनाः ।
नागा यक्षाः पिशाचाश्च राक्षसा भीमविक्रमाः ॥ ८ ॥
ब्रह्मा देवः पशुपतिर्ललाटस्था भ्रमन्ति वै ।
स्थावराणि च सर्वाणि जङ्गमानि तथैव च ॥ ९ ॥
भवांश्च सहितोऽस्माभिः सर्वैर्देवगणैर्वृतः ।
विमानशतसङ्कीर्णा तथैव भवतः सभा ॥ १० ॥
सर्वं त्रिभुवनं राजन् ! लोकधर्माश्च शाश्वताः ।
दृश्यन्ते नारसिंहेऽस्मिंस्तथेदमखिलं जगत् ॥ ११ ॥
प्रजापतिश्चात्र मनुर्महात्मा ग्रहाश्च योगाश्च महीरुहाश्च ।
उत्पातकालश्च धृतिर्मतिश्च रतिश्च सत्यञ्च तपोदमश्च ॥ १२ ॥
सनत्कुमारश्च महानुभावो विश्वे च देवा ऋषयश्च सर्वे ।
क्रोधश्च कामश्च तथैव हर्षो धर्मश्च मोहः पितरश्च सर्वे ॥ १३॥

प्रह्लादस्य वचः श्रुत्वा हिरण्यकशिपुः प्रभुः ।
उवाच दानवान् सर्वान् गणांश्च स गणाधिपः ॥ १४॥
मृगेन्द्रो गृह्यतामेष अपूर्वं सत्वमास्थितः ।
यदि वा संशयः कश्चिद्वध्यतां वनगोचरः ॥ १५ ॥
ते दानवगणाः सर्वे मृगेन्द्रं भीमविक्रमम् ।
परिक्षिपन्तो मुदितास्त्रासयामासुरोजसा ॥ १६ ॥
सिंहनादं विमुच्याथ नरसिंहो महाबलः ।
बभञ्ज तां सभां सर्वां व्यादितास्य इवान्तकः ॥ १७॥
सभायां भज्यमानायां हिरण्यकशिपुः स्वयम् ।
चिक्षेपास्त्राणि सिंहस्य रोषाद्व्याकुललोचनः ॥ १८ ॥
सर्वास्त्राणामथ ज्येष्ठं दण्डमस्त्रं सुदारुणम् ।
कालचक्रं तथा घोरं विष्णुचक्रं तथा परम् ॥ १९ ॥
पैतामहं तथात्युग्रं त्रैलोक्यदहनं महत् ।
विचित्रामशनीञ्चैव शुष्कार्द्रं चाशनिद्वयम् ॥ २० ॥
रौद्रं तथोग्रं शूलञ्च कङ्कालं मुसलं तथा ।
मोहनं शोषणं चैव सन्तापनविलापनम् ॥ २१ ॥
वायव्यं मथनं चैव कापालमथ कैङ्करम् ।
तथाप्रतिहतां शक्तिं क्रौञ्चमस्त्रं तथैव च ॥ २२ ॥
अस्त्रं ब्रह्मशिरश्चैव सोमास्त्रं शिशिरं तथा ।
कम्पनं शतनञ्चैव त्वाष्ट्रञ्चैव सुभैरवम् ॥ २३ ॥
कालमुद्गरमक्षोभ्यं तपनञ्च महाबलम् ।
संवर्तनं मादनञ्च तथा मायाधरं परम् ॥ २४ ॥
गान्धर्वमस्त्रं दयितमसिरत्नं च नन्दकम् ।
प्रस्वापनं प्रमथनं वारुणं चास्त्रमुत्तमम् ।

अस्त्रं पाशुपतञ्चैव यस्याप्रतिहता गतिः ॥ २५ ॥
अस्त्रं हयशिरश्चैव ब्राह्ममस्त्रं तथैव च ।
नारायणास्त्रमैन्द्रञ्च सार्पमस्त्रं तथाद्भुतम् ॥ २६ ॥
पैशाचमस्त्रमजितं शोषदं शामनं तथा ।
महाबलं भावनं च प्रस्थापनविकम्पने ॥ २७ ॥
एतान्यस्त्राणि दिव्यानि हिरण्यकशिपुस्तदा ।
असृजन्नरसिंहस्य दीप्तस्याग्नेरिवाहुतिम् ॥ २८ ॥
अस्त्रैः प्रज्वलितैः सिंहमावृणोदसुरोत्तमाः ।
विवस्वान् धर्मसमये हिमवन्तमिवांशुभिः ॥ २९ ॥
स ह्यमर्षानिलोद्धूतो दैत्यानां सैन्यसागरः ।
क्षणेन प्लावयामास मैनाकमिव सागरः ॥ ३० ॥
प्रासैः पाशैश्च खड्गैश्च गदाभिर्मुसलैस्तथा ।
वज्रैरशनिभिश्चैव साग्निभिश्च महाद्रुमैः ॥ ३१ ॥
मुद्गरैर्भिन्दिपालैश्च शिलोलूखलपर्वतैः ।
शतघ्नीभिश्च दीप्ताभिर्दण्डैरपि सुदारुणैः ॥ ३२ ॥

ते दानवाः पाशगृहीतहस्ता महेन्द्रतुल्याशनिवज्रवेगाः ।
समन्ततोऽभ्युद्यतबाहुकायाः स्थिता त्रिशीर्षा इव नागपाशाः ३३
सुवर्णमालाकुलभूषिताङ्गाः पीतांशुकाभोगविभाविताङ्गाः ।
मुक्तावलीदामसनाथकक्षा हंसा इवा भान्ति विशालपक्षाः ३४॥
तेषां तु वायुप्रतिमौजसां वै केयूरमौलीवलयोत्कटानाम् ।
तान्युत्तमाङ्गान्यभितो विभान्ति प्रभातसूर्यांशुसमप्रभाणि॥ ३५॥
क्षिपद्भिरत्युग्रैर्ज्वलितैर्महाबलैर्महास्त्रपूगैः सुसमावृतो बभौ ।
गिरिर्यथा सन्ततवर्षिभिर्घनैः कृतान्धकारान्तरकन्दरोद्रुमैः ३६॥
तैर्हन्यमानोऽपि महास्त्रजालैर्महाबलैर्दैत्यगणैः समेतैः ।

नाकम्पताजौ भगवान् प्रतापस्थितप्रकृत्या हिमवानिवाचलः ३७
सन्त्रासितास्तेन नृसिंहरूपिणा दितेः सुताः पावकतुल्यतेजसा।
भयाद्विचेलुः पवनोद्धुताङ्गा यथोर्मयः सागरवारिसम्भवाः ॥३८॥

---

## अथ द्विषष्ट्यधिकशततमोऽध्यायः।

सूत उवाच। खराः खरमुखाश्चैव मकराशीविषाननाः।
ईहामृगमुखाश्चान्ये वराहमुखसंस्थिताः ॥ १ ॥
बालसूर्यमुखाश्चान्ये धूमकेतुमुखास्तथा।
अर्द्धचन्द्रार्द्धवक्त्राश्च अग्निदीप्तमुखास्तथा ॥ २ ॥
हंसकुक्कुटवक्त्राश्च व्यादितास्या भयावहाः।
सिंहास्या लेलिहानाश्च काकगृध्रमुखास्तथा ॥ ३ ॥
द्विजिह्वावक्त्रशीर्षास्तथोल्कामुखसंस्थिताः।
महाग्राहमुखाश्चान्ये दानवा बलदर्पिताः ॥ ४ ॥
शैलसंवर्ष्माणस्तस्य शरीरे शरवृष्टिभिः।
अवध्यस्य मृगेन्द्रस्य न व्यथां चक्रुराहवे ॥ ५ ॥
एवं भूयोऽपरान् घोरानसृजन् दानवेश्वराः।
मृगेन्द्रस्योपरि क्रुद्धा निश्वसन्त इवोरगाः ॥ ६ ॥
ते दानवशरा घोरा दानवेन्द्रसमीरिताः।
विलयं जग्मुराकाशे खद्योता इव पर्वते ॥ ७ ॥
ततश्चक्राणि दिव्यानि दैत्याः क्रोधसमन्विताः।
मृगेन्द्रायासृजन्नाशु ज्वलितानि समन्ततः ॥ ८ ॥
तैरासीद्गगनं चक्रैः सम्पतद्भिरितस्ततः।

युगान्ते सम्प्रकाशन्ति चन्द्रादित्यग्रहैर्दिवि ॥ ९ ॥
तानि सर्वाणि चक्राणि मृगेन्द्रेणात्ममात्मना ।
ग्रस्तान्युद्दीर्णानि तदा पावकार्चिःसमानि वै ॥ १० ॥
तानि चक्राणि वदनं विशमानानि भान्ति वै ।
मेघोदरदरीष्विव चन्द्रसूर्यग्रहा इव ॥ ११ ॥
हिरण्यकशिपुर्दैत्यो भूयः प्रासृजदूर्जिताम् ।
शक्तिं प्रज्वलितां घोरां धौतशस्त्रतडित्प्रभाम् ॥१२॥
तामापतन्तीं संप्रेक्ष्य मृगेन्द्रः शक्तिमुज्ज्वलाम् ।
हुङ्कारेणैव रौद्रेण बभञ्ज भगवांस्तदा ॥ १३ ॥
रराज भग्ना सा शक्तिर्मृगेन्द्रेण महीतले ।
स विस्फुलिङ्गा ज्वलिता महोल्केवदिवश्च्युता ॥ १४ ॥
नाराचपङ्क्तिः सिंहस्य प्राप्ता रेजे विदूरतः ।
नीलोत्पलपलाशानां मालेवोज्ज्वलदर्शना ॥ १५ ॥
स गर्जित्वा यथान्यायं विक्रम्य च यथासुखम् ।
तत्सैन्यं समारितवान् तृणाग्राणीव मारुतः ॥ १६ ॥
ततोऽश्मवर्षं दैत्येन्द्रा व्यसृजन्त नभोगताः ।
नगमात्रैः शिलाखण्डैर्गिरिशृङ्गैर्महाप्रभैः ॥ १७ ॥
तदश्मवर्षं सिंहस्य महन्मूर्द्ध्नि निपातितम् ।
दिशोदश विकीर्णा वै खद्योतप्रकरा इव ॥ १८ ॥
तदाश्मौघैर्दैत्यगणाः पुनः सिंहमरिन्दमम् ।
छादयांचक्रिरे मेघा धाराभिरिव पर्वतम् ॥ १९ ॥
न च तं चालयामासुर्दैत्यौघा देवसत्तमम् ।
भीमवेगोऽचलश्रेष्ठं समुद्र इव मन्दरम् ॥ २० ॥
ततोऽश्मवर्षे विहते जलवर्षमनन्तरम् ।

धाराभि रक्षमात्राभिः प्रादुरासीत् समन्ततः ॥२१॥
नभसः प्रच्युता धारास्तिग्मवेगाः समन्ततः।
आवृत्य सर्वतो व्योम दिशश्चोपदिशस्तथा ॥ २२ ॥
धारा दिवि च सर्वत्र वसुधायाञ्च सर्वशः।
न स्पृशन्ति च ता दैत्यं निपतन्त्योऽनिशं भुवि ॥ २३॥
बाह्यतो ववृषुर्वर्षं नोपरिष्टाच्च ववृषुः।
मृगेन्द्रप्रति रूपस्य स्थितस्य युधि मायया ॥ २४ ॥
हतेऽश्मवर्षे तुमुले जलवर्षे च शोषिते।
सोऽसृजद्दानवो मायामग्निवायुसमीरिताम्॥२५॥
महेन्द्रस्तोयदैः सार्द्धं सहस्राक्षो महाद्युतिः।
महता तोयवर्षेण शमयामास पावकम् ॥ २६ ॥
तस्यां प्रतिहतायां तु मायायां युधि दानवः।
असृजत् घोरसंङ्काशं तमस्तीव्रं समन्ततः ॥ २७ ॥
तमसा संवृते लोके दैत्येष्वात्तायुधेषु च।
स्वतेजसा परिवृतो दिवाकर इवाबभौ ॥ २८ ॥
त्रिशाखां भ्रुकुटीञ्चास्य ददृशुर्दानवा रणे।
ललाटस्थां त्रिशूलाङ्कां गङ्गां त्रिपथगामिव ॥ २९ ॥
ततः सर्वासु मायासु हतासु दितिनन्दनाः।
हिरण्यकशिपुं दैत्यं विवर्णाः शरणं ययुः ॥ ३० ॥
ततः प्रज्वलितः क्रोधात् प्रदहन्निव तेजसा
तस्मिन् क्रुद्धे तु दैत्येन्द्रे तमोभूतमभूज्जगत् ॥३१॥
आवहः प्रवहश्चैव विवहोऽथ ह्युदावहः।
परावहः संवहश्च महाबलपराक्रमाः ॥ ३२ ॥
तथा परिवहः श्रीमानुत्पातभयशंसनाः।

इत्येवं क्षुभिताः सप्त मरुतो गगनेचराः ॥ ३३ ॥
ये ग्रहाः सर्वलोकस्य क्षये प्रादुर्भवन्ति वै ।
ते सर्वे गगने दृष्टा व्यचरन्त यथासुखम् ॥ ३४ ॥
अन्यह्नि चाप्यचरन्मार्गं निशि निशाचरः ।
सग्रहः सह नक्षत्रैस्ताकापतिररिन्दमः ॥ ३५ ॥
विवर्णतां च भगवान् गतो दिवि दिवाकरः ।
कृष्णं कबन्धं च तथा लक्ष्यते सुमहद्दिवि ॥ ३६ ॥
अमुञ्चच्चार्चिषां वृन्दं भूमिवृत्तिर्विभावसुः ।
गगनस्थश्च भगवानभीक्ष्णं परिदृश्यते ॥ ३७ ॥
सप्त धूम्रनिभा घोराः सूर्या दिवि समुत्थिताः ।
सोमस्य गगनस्थस्य ग्रहास्तिष्ठन्ति शृङ्गगाः ॥ ३८ ॥
वामेन दक्षिणे चैव स्थितौ शुक्रबृहस्पती ।
शनैश्चरो लोहिताङ्गो ज्वलनाङ्गसमद्युती ॥ ३९ ॥
समं समधिरोहन्तः सर्वे ते गगनेचराः ।
शृङ्गाणि शनकैर्घोरा युगान्तावर्तिनो ग्रहाः ॥ ४० ॥
चन्द्रमाश्च सनक्षत्रैर्ग्रहैः सह तमोनुदः ।
चराचरविनाशाय रोहिणीं नाभ्यनन्दत ॥ ४१ ॥
गृह्यते राहुणा चन्द्र उल्काभिरभिहन्यते ।
उल्काः प्रज्वलिताश्चन्द्रे विचरन्ति यथासुखम् ॥ ४२ ॥
देवानामपि यो देवः सोऽप्यवर्षत शोणितम् ।
अपतन्गगनादुल्का विद्युद्रूपा महास्वनाः ॥ ४३ ॥
अकाले च द्रुमाः सर्वे पुष्प्यन्ति च फलन्ति च ।
लताश्च सफलाः सर्वा ये प्राहुर्दैत्यनाशनम् ॥ ४४ ॥
फलैः फलान्यजायन्त पुष्पैः पुष्पं तथैव च ।

उन्मीलन्ति निमीलन्ति हसन्ति च वदन्ति च ॥ ४५ ॥
विक्रोशन्ति च गम्भीरा धूमयन्ति ज्वलन्ति च।
प्रतिमाः सर्वदेवानां वेदयन्ति महद्भयम् ॥ ४६ ॥
आरण्यैः सह संसृष्टा ग्राम्याश्च मृगपक्षिणः।
चक्रुः सुभैरवं तत्र महायुद्धमुपस्थितम् ॥ ४७ ॥
नद्यश्च प्रतिकूलानि वहन्ति कलुषोदकाः।
न प्रकाशन्ति च दिशो रक्तरेणुसमाकुलाः ॥ ४८ ॥
वानस्पत्यो न पूज्यन्ते पूजनार्हाः कथञ्चन।
वायुवेगेन हन्यन्ते भज्यन्ते प्रणमन्ति च ॥ ४९ ॥
यदा च सर्वभूतानां छाया न परिवर्तते।
अपराह्णगते सूर्ये लोकानां युगसंक्षये ॥ ५० ॥
तदा हिरण्यकशिपो र्दैत्यस्योपरि वेश्मनः।
भाण्डागारे युधागारे निविष्टमभवन्मधु ॥ ५१ ॥
असुराणां विनाशाय सुराणां विजयाय च।
दृश्यन्ते विविधोत्पाता घोरा घोरनिदर्शनाः ॥ ५२ ॥
एते चान्ये च बहवो घोरोत्पाताः समुत्थिताः।
दैत्येन्द्रस्य विनाशाय दृश्यन्ते कालनिर्मिताः ॥ ५३ ॥
मेदिन्यां कम्पमानायां दैत्येन्द्रेण महात्मना।
महीधरा नागगणा निपेतुरमितौजसः ॥ ५४ ॥
विषज्वालाकुलैर्वक्त्रै र्विमुञ्चन्तो हुताशनम्।
चतुःशीर्षाः पञ्चशीर्षाः सप्तशीर्षाश्च पन्नगाः ॥ ५५ ॥
वासुकिस्तक्षकश्चैव कर्कोटकधनञ्जयौ।
एलामुखः कालियश्च महापद्मश्च वीर्यवान् ॥ ५६ ॥

सहस्रशीर्षा नागो वै हेमतालध्वजः प्रभुः ।
शेषोऽनन्तो महाभागो दुष्प्रकम्प्यः प्रकम्पितः ॥५७॥
दीप्तान्यन्तर्जलस्थानि पृथिवीधरणानि च ।
तदा क्रुद्धेन महता कम्पितानि समन्ततः ॥ ५८ ॥
नागास्तेजोधराश्चापि पातालतलचारिणः ।
हिरण्यकशिपुर्दैत्यस्तदा संस्पृष्टवान्महीम् ॥ ५९ ॥
सन्दष्टौष्ठपुटः क्रोधाद्वाराह इव पूर्वजः ।
नदी भागीरथी चैव शरयूः कौशिकी तथा ॥ ६० ॥
यमुना त्वथ कावेरी कृष्णवेणी च निम्नगा ।
सुवेणा च महाभागा नदी गोदावरी तथा ॥ ६१ ॥
चर्मण्वती च सिन्धुश्च तथा नदनदीपतिः ।
कमलप्रभवश्चैव शोणो मणिनिभोदकः ॥ ६२ ॥
नर्मदा शुभतोया च तथा वेत्रवती नदी ।
गोमती गोकुलाकीर्णा तथा पूर्वसरस्वती ॥ ६३ ॥
मही कालमही चैव तमसा पुष्पवाहिनी ।
जम्बुद्वीपं रत्नवटं सर्वरत्नोपशोभितम् ॥ ६४ ॥
सुवर्णप्रकटश्चैव सुवर्णाकरमण्डितम् ।
महानदश्च लौहित्यं शैलकाननशोभितम् ॥ ६५ ॥
पत्तनं कोशकरणं ऋषिवीरजनाकरम् ।
मागधाश्च महाग्रामा मुण्डाः शुङ्गास्तथैव च ॥ ६६ ॥
सुह्मा मल्ला विदेहाश्च मालवाः काशिकोशलाः ।
भवनं वैनतेयस्य दैत्येन्द्रेणाभिकम्पितम् ॥ ६७ ॥
कैलासशिखराकारं यत् कृतं विश्वकर्मणा ।
रक्ततोयो महाभीमो लौहित्योनाम सागरः ॥६८॥

उदयश्च महाशैल उच्छ्रितः शतयोजनम्।
सुवर्णवेदिकः श्रीमान् मेघपङ्क्तिनिषेवितः॥ ६९॥
भ्राजमानोऽर्कसदृशैर्जातरूपमयैर्द्रुमैः।
शालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः॥ ७०॥
अयोमुखश्च विख्यातः सर्वतो धातुमण्डितः।
तमालवनगन्धश्च पर्वतो मलयः शुभः॥ ७१॥
सुराष्ट्राश्च सबाह्लीकाः शूराभीरास्तथैव च।
भोजाः पाण्ड्याश्च वङ्गाश्च कलिङ्गास्ताम्रलिप्तकाः॥ ७२॥
तथैवोड्राश्च पौण्ड्राश्च वामचूडाः सकेरलाः।
क्षोभितास्तेन दैत्येन सदेवाश्चाप्सरोगणाः॥ ७३॥
अगस्त्यभवनञ्चैव यदगम्यकृतं पुरा
सिद्धचारणसङ्घैश्च विप्रकीर्णं मनोहरम्॥ ७४॥
विचित्रनानाविहगं सुपुष्पितमहाद्रुमम्।
जातरूपमयैः शृङ्गैर्गगनं विलिखन्निव॥ ७५॥
चन्द्रसूर्यांशुसङ्काशैः सागराम्बुसमावृतैः।
विद्युत्वान् सर्वतः श्रीमानायतः शतयोजनम्॥ ७६॥
विद्युतो यत्र सङ्घाता निपात्यन्ते नगोत्तमे।
ऋषभः पर्वतश्चैव श्रीमान् वृषभसंस्थितः॥ ७७॥
कुञ्जरः पर्वतः श्रीमानगस्त्यस्य गृहं शुभम्।
विशालाक्षश्च दुर्धर्षः सर्पाणामालयः पुरी॥ ७८॥
तथा भोगवतीचापि दैत्येन्द्रेणाभिकम्पिताः।
महासेनो गिरिश्चैव पारियात्रश्च पर्वतः॥ ७९॥
चक्रवांश्च गिरिश्रेष्ठो वाराहश्चैव पर्वतः।
प्राग्ज्योतिषपुरञ्चापि जातरूपमयं शुभं॥ ८०॥

यस्मिन्वसति दुष्टात्मा नरको नाम दानवः ।
विशालाक्षश्च दुर्धर्षो मेघगम्भीरनिस्वनः ॥ ८१ ॥
षष्टिस्तत्र सहस्राणि पर्वतानां द्विजोत्तमाः ।
तत्रचादित्यसङ्काशो मेरुस्तत्र महागिरिः ॥ ८२ ॥
यत्र राक्षसगन्धर्वैर्नित्यं सेवितकन्दरः ।
हेमगर्भो महाशैलस्तथा हेमसखोगिरिः ८३ ॥
कैलासश्चैव शैलेन्द्रो दानवेन्द्रेण कम्पिताः ।
हेमपुष्करसञ्छन्नं तेन वैखानसं सरः ॥ ८४ ॥
कम्पितं मानसञ्चैव हंसकारण्डवाकुलम् ।
त्रिशृङ्ग पर्वतश्चैव कुमारी च सरिद्वरा ॥ ८५ ॥
तुषारचयसञ्छन्ना मन्दरश्चापि पर्वतः ।
उशीरबिन्दुश्च गिरिश्चन्द्रप्रस्थस्तथाद्रिराट् ॥ ८६ ॥
प्रजापतिगिरिश्चैव तथा पुष्करपर्वतः ।
देवाभ्रपर्वतश्चैव तथा वै रेणुकोगिरिः ॥ ८७ ॥
क्रौञ्चः सप्तर्षिशैलश्च धूम्रवर्णश्च पर्वतः ।
एते चान्ये च गिरयो देशा जनपदास्तथा ॥ ८८ ।
नद्यः ससागराः सर्वाः सोऽकम्पयत दानवः ।
कपिलश्च महीपुत्रो व्याघ्रवांश्चैव कम्पितः ॥ ८९ ॥
खेचराश्च सतीपुत्राः पातालतलवासिनः ।
गणस्तथा परो रौद्रो मेघनामाङ्कुशायुधः ॥ ९० ॥
ऊर्ध्वगो भीमवेगश्च सर्व एवाभिकम्पिताः ।
गदी शूली करालश्च हिरण्यकशिपुस्तदा ॥ ९१ ॥
जीमूतघनसङ्काशो जीमूतघननिस्वनः ।
जीमूतघननिर्घोषो जीमूत इव वेगवान् ॥ ९२ ॥

देवारिर्दितिजो वीरो नृसिंहं समुपाद्रवत्।
समुत्पत्य ततस्तोऽस्य मृगेन्द्रेण महानखैः॥ ९३॥
तदोङ्कारसहायेन विदार्य निहतोयुधि।
मही च कालश्च शशी नभश्च ग्रहाश्च सूर्य्यश्च दिशश्च सर्वाः।
नद्यश्च शैलाश्च महार्णवाश्च गताः प्रसादन्दितिपुत्रनाशात् ९४
ततः प्रमुदिता देवा ऋषयश्च तपोधनाः।
तुष्टुवुर्नामभिर्दिव्यैरादिदेवं सनातनम्॥ ९५॥
यत्त्वया विहितं देव! नारसिंहमिदं वपुः।
एतदेवार्चयिष्यन्ति परावरविदोजनाः॥ ९६॥
ब्रह्मोवाच। भवान् ब्रह्मा च रुद्रश्च महेन्द्रो देवसत्तमाः!।
भवान् कर्ता विकर्ता च लोकानां प्रभवाप्ययः॥९७॥
पराञ्च सिद्धाञ्च परञ्च देवं परञ्च मन्त्रं परमं हविश्च।
परञ्च धर्मं परमञ्च विश्वं त्वामाहुरग्र्यं पुरुषं पुराणम्॥९८॥
परं शरीरं परमञ्च ब्रह्म परञ्च योगं परमाञ्च वाणीम्।
परं रहस्यं परमाङ्गतिञ्च त्वा माहुरग्र्यं पुरुषं पुराणम्॥९९॥
एवं परस्यापि परं पदं यत् परं परस्यापि परञ्च देवम्।
परं परस्यापि परञ्च भूतन्त्वा माहुरग्र्यं पुरुषं पुराणम्॥१००
परं परस्यापि परं निधानं परं परस्यापि परं पवित्रम्।
परं परस्यापि परं च दान्तन्त्वा माहुरग्र्यं पुरुषं पुराणम्१०१
एवमुक्त्वा तु भगवान् सर्वलोक पितामहः।
स्तुत्वा नारायणं देवं ब्रह्मलोकं गतः प्रभुः॥ १०२॥
ततो नदत्सु तूर्येषु नृत्यन्तीष्वप्सरःसु च।
क्षीरोदस्योत्तरं कूलं जगाम हरिरीश्वरः॥ १०३॥
नारसिंहं वपुर्देवः स्थापयित्वा सुदीप्तिमत्।

पौराणं रूपमास्थाय प्रययौ गरुडध्वजः ॥ १०४ ॥
अष्टचक्रेण यानेन भूतयुक्तेन भास्वता ।
अव्यक्तप्रकृतिर्देवः स्वस्थानं गतवान् प्रभुः ॥ १०५ ॥

अथ त्रिषष्ट्यधिकशततमोऽध्यायः ।

ऋषय ऊचुः । कथितं नरसिंहस्य माहात्म्यं विस्तरेण च ।
पुनस्तस्यैव माहात्म्यमन्यद्विस्तरतो वद ॥ १ ॥
पद्मरूपमभूदेतत् कथं हैममयं जगत्
कथञ्च वैष्णवी सृष्टिः पद्ममध्येऽभवत्पुरा ॥ २ ॥
सूत उवाच । श्रुत्वा च नरसिंहस्य माहात्म्यं रविनन्दनः ।
विस्मयोत्फुल्लनयनः पुनः पप्रच्छ केशवम् ॥ ३ ॥
मनुरुवाच । कथं पाद्मे महाकल्पे तव पद्ममयं जगत् ।
जलार्णवगतस्येह नाभौ जातं जनार्दन ! ॥ ४ ॥
प्रभावात् पद्मनाभस्य स्वपतः सागराम्भसि ।
पुष्करे च कथं भूता देवाः सर्षिगणाः पुरा ॥ ५ ॥
एतमाख्याहि निखिलं योगं योगविदाम्पते ! ।
शृण्वतस्तस्य मे कीर्त्तिं न तृप्तिरुपजायते ॥ ६ ॥
कियता चैव कालेन शेते वै पुरुषोत्तमः ।
कियन्तं वा स्वपिति च कोऽस्य कालस्य सम्भवः ॥ ७ ॥
कियता वाथ कालेन ह्युत्तिष्ठति महायशाः ।
कथञ्चोत्थाय भगवान् सृजते निखिलं जगत् ॥ ८ ॥
के प्रजापतयस्तावदासन् पूर्वं महामुने ! ।

कथं निर्मितवांश्चैव चित्रं लोकं सनातनम्॥ ९॥
प्रथमे कार्णवे शून्ये नष्टस्थावरजङ्गमे।
दग्धदेवासुरनरे प्रनष्टोरगराक्षसे॥ १०॥
नष्टानिलानले लोके नष्टाकाशमहीतले।
केवलं गह्वरीभूते महाभूतविपर्य्यये॥ ११॥
विभुर्महाभूतपतिर्महातेजा महाकृतिः।
आस्ते सुरवरश्रेष्ठो विधिमास्थाय योगवित्॥ १२॥
शृणुयां परया भक्त्या ब्रह्मन्नेतदशेषतः।
वक्तुमर्हसि धर्मिष्ठ! यशो नारायणात्मकम्॥ १३॥
श्रद्धया चोपविष्टानां भगवन्! वक्तुमर्हसि।
मत्स्य उवाच। नारायणस्य यशसः श्रवणे या तव स्पृहा॥१४॥
तद्वंश्यान्वयभूतस्य न्याय्यं रविकुलप्रभ!।
शृणुष्वादिपुराणेषु वेदेभ्यश्च यथाश्रुतम्॥ १५॥
ब्राह्मणानाञ्च वदतां श्रुत्वा वै सुमहात्मनाम्।
यथा च तपसा दृष्ट्वा बृहस्पतिसमद्युतिः॥ १६॥
पराशरसुतः श्रीमान् गुरुर्द्वैपायनोऽब्रवीत्।
तत्तेऽहं कथयिष्यामि यथाशक्ति यथाश्रुति॥ १७॥
यद्विज्ञातुं मया शक्यमृषिमात्रेण सत्तमाः!।
कः समुत्सहते ज्ञातुं परं नारायणात्मकम्॥ १८॥
विश्वायनश्च यद्ब्रह्मा न वेदयति तत्त्वतः।
तत्कर्म्म विश्ववेदानां तद्रहस्यं महर्षिणाम्॥ १९॥
तमीज्यं सर्वयज्ञानां तत्तत्त्वं सर्वदर्शिनाम्।
तदध्यात्मविदां चिन्त्यं नरकं च विकर्म्मिणाम्॥ २०॥
अधिदैवञ्च यद्दैवमधियज्ञं सुसंज्ञितम्।

तद्गतमधिभूतश्च तत्परं परमर्षिणाम् ॥ २१ ॥
स यज्ञो वेदनिर्दिष्टस्तत्तपः कवयो विदुः ।
यः कर्ता कारको बुद्धिर्मनः क्षेत्रज्ञ एव च ॥ २२ ॥
प्रणवः पुरुषः शास्ता एकश्चेति विभाव्यते ।
प्राणः पञ्चविधश्चैव ध्रुव अक्षर एव च ॥ २३ ॥
कालः पाकश्च पक्ता च द्रष्टा स्वाध्याय एव च ।
उच्यते विविधैर्देवः स एवायं न तत्परम् ॥ २४ ॥
स एव भगवान् सर्वं करोति विकरोति च ।
सोऽस्मान् कारयते सर्वान् सोऽन्वेति व्याकुलीकृतान् ॥ २५ ॥
यतामहे त मेवाद्यन्तमेवेच्छाम निर्वृताः ।
यो वक्ता यच्च वक्तव्यं यच्चाहन्तद्ब्रवीमि वः ॥ २६ ॥
श्रूयते यच्च वै श्राव्यं यच्चान्यत् परिजल्पते ।
याः कथाश्चैव वर्त्तन्ते श्रुतयो वाथ तत्पराः ॥ २७ ॥
विश्वं विश्वपतिर्यश्च स तु नारायणः स्मृतः ।
यत् सत्यं यदमृतमक्षरं परं यत्
यद्भूतं परममिदं च यद्भविष्यत् ।
यत् किञ्चिच्चरमचरं यदस्ति चान्यत्
तत् सर्वं पुरुषवरः प्रभुः पुराणः ॥ २८ ॥

---

अथ चतुःषष्ट्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या द्विगुणा रविनन्दन ! ॥ १ ॥

यत्र धर्मश्चतुष्पादस्त्वधर्मः पादविग्रहः।
स्वधर्मनिरताः सन्तो जायन्ते यत्र मानवाः ॥ २ ॥
विप्राः स्थिता धर्मपरा राजवृत्तौ स्थिता नृपाः।
कृष्यामभिरता वैश्याः शूद्राः शुश्रूषवः स्थिताः ॥ ३॥
तदा सत्यञ्च शौचञ्च धर्मश्चैव विवर्धते।
सद्भिराचरितं कर्म क्रियते ख्यायते च वै ॥ ४ ॥
एतत् कार्तयुगं वृत्तं सर्वेषामपि पार्थिव !।
प्राणिनां धर्मसङ्गानामपि वै नीचजन्मनाम् ॥ ५ ॥
त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते।
तस्य तावच्छती सन्ध्या द्विगुणा परिकीर्त्यते ॥ ६ ॥
द्वाभ्यामधर्मः पादाभ्यां त्रिभिर्धर्मो व्यवस्थितः।
यत्र सत्यञ्च सत्त्वञ्च त्रेताधर्मो विधीयते ॥ ७ ॥
त्रेतायां विकृतिं यान्ति वर्णास्त्वेतेन संशयः।
चतुर्वर्णस्य वैकृत्याद्यान्ति दौर्बल्यमाश्रमाः ॥ ८ ॥
एषा त्रेतायुगगति र्विचित्रा देवनिर्मिता।
द्वापरस्य तु या चेष्टा तामपि श्रोतुमर्हसि ॥ ९ ॥
द्वापरन्तु सहस्रे तु वर्षाणां रविनन्दन !॥
तस्य तावच्छती सन्ध्या द्विगुणा युगमुच्यते ॥ १० ॥
तत्र चार्थपराः सर्वे प्राणिनो रजसा हताः।
सर्वे नैष्कृतिकाः क्षुद्रा जायन्ते रविनन्दन ! ॥ ११ ॥
द्वाभ्यां धर्मः स्थितः पद्भ्यामधर्मस्त्रिभि रुत्थितः।
विपर्य्ययाच्छनैर्धर्मः क्षयमेति कलौ युगे ॥ १२ ॥
ब्राह्मण्यभावस्य ततो तथौत्सुक्यं व्यशीर्यते।
व्रतोपवासास्त्यज्यन्ते द्वापरे युगपर्य्यये ॥ १३ ॥

तथा वर्षसहस्रन्तु वर्षाणां हे शते अपि ।
सन्ध्यया सह संख्यातं क्रूरङ्कलियुगं स्मृतम् ॥ १४ ॥
यत्राधर्मश्चतुष्पादः स्यात् धर्मः पादविग्रहः ।
कामिनस्तपसा त्यक्ता जायन्ते तत्र मानवाः ॥ १५ ॥
नैवातिसात्त्विकः कश्चिन्न साधुर्न च सत्यवाक् ।
नास्तिका ब्रह्मभक्ता वा जायन्ते तत्र मानवाः ॥ १६ ॥
अहङ्कारगृहीताश्च प्रक्षीणस्नेहबन्धनाः ।
विप्राः शूद्रसमाचाराः सन्ति सर्वे कलौ युगे ॥ १७ ॥
आश्रमाणां विपर्यासः कलौ संपरिवर्तते ।
वर्णानाञ्चैव सन्देहो युगान्ते रविनन्दन ! ॥ १८ ॥
विद्यात् द्वादशसाहस्रीं युगाख्यां पूर्वनिर्मिताम् ।
एवं सहस्रपर्यन्तं तदहो ब्राह्ममुच्यते ॥ १९ ॥
ततोऽहनि गते तस्मिन् सर्वेषामेव जीविनाम् ।
शरीरनिर्वृतिं दृष्ट्वा लोकसंहारबुद्धितः ॥ २० ॥
देवतानाञ्च सर्वासां ब्रह्मादीनां महीपते ! ।
दैत्यानां दानवानाञ्च यक्षराक्षसपक्षिणाम् ॥ २१ ॥
गन्धर्वाणामप्सरसां भुजङ्गानाञ्च पार्थिव ! ।
पर्वतानां नदीनाञ्च पशूनाञ्चैव सत्तम ! ॥ २२ ॥
तिर्य्यग्योनिगतानाञ्च सत्वानां कृमिणान्तथा ।
महाभूतपतिः पञ्च हत्वा भूतानि भूतकृत् ॥ २३ ॥
जगत्संहरणार्थाय कुरुते वेगमं महत् ।
भूत्वा सूर्य्यश्चक्षुषी चाददानो भूत्वा वायुः प्राणिनां प्राणजालम् ।
भूत्वा वह्निर्निर्दहन् सर्वलोकान् भूत्वा मेघो भूय उग्रोऽप्यवर्षत् ॥ २४

## अथ पञ्चषष्ट्यधिकशततमोऽध्यायः ।

---

मत्स्य उवाच । भूत्वा नारायणो योगी सत्वमूर्त्तिर्विभावसुः ।
गभस्तिभिः प्रदीप्ताभिः संशोषयति सागरान् ॥ १ ॥
ततः पीत्वार्णवान् सर्वान् नदीः कूपांश्च सर्वशः ।
पर्वतानाञ्च सलिलं सर्वमादाय रश्मिभिः ॥ २ ॥
भित्त्वा गभस्तिभिश्चैव महीं गत्वा रसातलात् ।
पातालजलमादाय पिबन् रसमुत्तमम् ॥ ३ ॥
मूत्रासृक्क्लेदमन्यच्च यदस्ति प्राणिषु ध्रुवम् ।
तत् सर्वं मरविन्दाक्ष आदत्ते पुरुषोत्तमः ॥ ४ ॥
वायुश्च भगवान् भूत्वा विधुन्वानोऽखिलं जगत् ।
प्राणापानसमानाद्यात् वायूनाकर्षते हरिः ॥ ५ ॥
ततो देवगणाः सर्वे भूतान्येव च यानि तु ।
गन्धो घ्राणं शरीरञ्च पृथिवीं संश्रिता गुणाः ॥ ६ ॥
जिह्वा रसश्च स्नेहश्च संश्रिताः सलिले गुणाः ।
रूपं चक्षुर्विपाकश्च ज्योतिरेवाश्रिता गुणाः ॥ ७ ॥
स्पर्शः प्राणश्च चेष्टा च पवने संश्रिता गुणाः ।
शब्दः श्रोत्रञ्च खान्येव गगने संश्रिता गुणाः ॥ ८ ॥
लोकमाया भगवता मुहूर्त्तेन विनाशिता ।
मनोबुद्धिश्च सर्वेषां क्षेत्रज्ञश्चेति यः श्रुतः ॥ ९ ॥

तं वरेण्यं परमेष्ठिं हृषीकेश मुपाश्रिताः ।
ततो भगवतस्तस्य रश्मिभिः परिवारितः ॥ १० ॥
वायुनाक्रम्यमाणासु द्रुमशाखासु चाश्रितः ।
तेषां सङ्घर्षणोद्भूतः पावकः शतधा ज्वलन् ॥ ११ ॥
अदहच्च तदा सर्वं वृतः सम्वर्तकोऽनलः ।
सपर्वतद्रुमान् गुल्मान् लतावल्लीस्तृणानि च ॥१२॥
विमानानि च दिव्यानि पुराणि विविधानि च ।
यानि चाश्रयणीयानि तानि सर्वाणि सोऽदहत् ॥१३॥
भस्मीकृत्वा ततः सर्वान् लोकान् लोकगुरुर्हरिः ।
भूयो निर्वापयामास युगान्तेन च कर्म्मणा ॥ १४ ॥
सहस्रवृष्टिः शतधा भूत्वा कृष्णो महाबलः ।
दिव्यतोयेन हविषा तर्पयामास मेदिनीम् ॥ १५ ॥
ततः क्षीरनिकाशेन स्वादुना परमात्मना ।
शिवेन पुण्येन मही निर्वाणमगमत् परम् ॥ १६ ॥
तेन रोधेन संछन्ना पयसां वर्षतो धरा ।
एकार्णवजलीभूता सर्वसत्त्वविवर्जिता ॥ १७ ॥
महासत्त्वान्यपि विभुं प्रविष्टान्यमितौजसम् ।
नष्टार्क पवनाकाशे सूक्ष्मे जगति संवृते ॥ १८ ॥
संशोषमात्मना कृत्वा समुद्रानपि देहिनः ।
दग्ध्वा संप्लाव्य च तथा स्वपित्येकः सनातनः ॥१९॥
पौराणं रूपमास्थाय स्वपित्यमित विक्रमः ।
एकार्णव जलव्यापी योगीयोग मुपाश्रितः ॥ २० ॥
अनेकानि सहस्राणि युगान्येकार्णवाम्भसि ।
न चैनं कश्चिदव्यक्त मव्यक्तं वेदितुमर्हति ॥ २१ ॥

कश्चैव पुरुषो नाम किं योगः कश्च योगवान् ।
असौ कियन्तं कालञ्च एकार्णवविधिं प्रभुः ॥ २१ ॥
करिष्यतीति भगवानिति कश्चिन्न बुध्यते ।
न द्रष्टा नैव गमिता न ज्ञाता नैव पार्श्वगः ॥ २१ ॥
तस्य न ज्ञायते किञ्चित्तमृते देवसत्तमम् ।
नमः चितिं पवनमपः प्रकाशं प्रजापतिं भुवनधरं सुरेश्वरम् ।
पितामहं श्रुतिनिलयं महामुनिं प्रशाम्य भूयः शयनं ह्यरोचयत् ॥

---

अथ षट्षष्ठ्यधिकशततमोऽध्यायः ।

मनुष्य उवाच । एवमेकार्णवीभूते शेते लोके महाद्युतिः ।
प्रच्छाद्य सलिलेनोर्वीं हंसो नारायणस्तदा ॥ १ ॥
महतो रजसो मध्ये महार्णवसरःसु वै ।
विरजस्कं महाबाहुमक्षयं ब्रह्म यं विदुः ॥ २ ॥
आत्मरूपप्रकाशेन तमसा संवृतः प्रभुः ।
मनः सात्त्विकमाधाय यत्र तत् सत्यमासत ॥ ३ ॥
याथातथ्यं परं ज्ञानं भूतन्तद्ब्रह्मणा पुरा ।
रहस्यारण्यकोद्दिष्टं यच्चोपनिषदं स्मृतम् ॥ ४ ॥
पुरुषोयज्ञइत्येतत् यत्परं परिकीर्तितम् ।
यश्चान्यः पुरुषाख्यः स्यात् स एष पुरुषोत्तमः ॥ ५ ॥
ये च यज्ञकरा विप्रा ये चर्त्विज इति स्मृताः ।
अस्मादेव परा भूता यज्ञेभ्यः श्रूयतां तथा ॥ ६ ॥
ब्रह्माणं प्रथमं वक्त्रादुद्गातारञ्च सामगम् ।

होतारमपि चाध्वर्युं बाहुभ्यामसृजत् प्रभुः ॥ ७ ॥
ब्रह्माणं ब्राह्मणाच्छंसिं प्रस्तोतारञ्च सर्वशः ।
तौ मित्रावरुणौ पृष्ठात् प्रतिप्रस्तारमेव च ॥ ८ ॥
उदरात् प्रतिहर्त्तारं पोतारञ्चैव पार्थिव ! ।
अच्छावाकमथोरुभ्यां नेष्टारञ्चैव पार्थिव ! ॥ ९ ॥
पाणिभ्यामथ चाग्नीध्रं सुब्रह्मण्यञ्च जानुतः ।
ग्रावस्तुतन्तु पादाभ्यामुन्नेतारञ्च याजुषम् ॥ १० ॥
एवमेवैष भगवान् षोडशैव जगत्पतिः ।
प्रवक्तॄन् सर्वयज्ञानामृत्विजोऽसृजदुत्तमान् ॥ ११ ॥
तदेष वै वेदमयः पुरुषो यज्ञसंस्थितः ।
वेदाश्चैतन्मयाः सर्वे साङ्गोपनिषदक्रियाः ॥ १२ ॥
स्वपित्येकार्णवे चैव यदाश्चर्यमभूत् पुरा ।
श्रूयतां तद्यथा विप्रा ! मार्कण्डेयकुतूहलम् ॥ १३ ॥
गीर्णो भगवतस्तस्य कुक्षावेव महामुनिः ।
बहुवर्षसहस्रायुस्तस्यैव वरतेजसा ॥ १४ ॥
अटंस्तीर्थप्रसङ्गेन पृथिवीं तीर्थगोचरान् ।
आश्रमाणि च पुण्यानि देवतायतनानि च ॥ १५ ॥
देशान् राष्ट्राणि चित्राणि पुराणि विविधानि च ।
जपहोमपरः शान्तस्तपो घोरं समाश्रितः ॥ १६ ॥
मार्कण्डेयस्ततस्तस्य शनैर्वक्त्राद्विनिःसृतः ।
स निष्क्रामन्न चात्मानं जानीते देवमायया ॥ १७ ॥
निष्क्रम्याप्यस्य वदनादेकार्णवमथो जगत् ।
सर्वतस्तमसाच्छन्नं मार्कण्डेयोऽन्ववेक्षत ॥ १८ ॥
तस्योत्पन्नं भयं तीव्रं संशयश्चात्मजीविते ।

देवदर्शनसंहृष्टो विस्मयं परमङ्गतः॥ १९ ॥
चिन्तयन् जलमध्यस्थो मार्कण्डेयोऽन्ववेक्षत।
किन्तु स्यान्मम चिन्तेयं मोहः स्वप्नोऽनुभूयते॥ २० ॥
व्यक्तमन्यतमो भावस्तेषां सम्भावितो मम।
नहीदृशं जगत् क्लेशमयुक्तं सत्यमर्हति॥ २१ ॥
नष्टचन्द्रार्कपवने नष्टपर्वतभूतले।
कतमः स्यादयं लोक इति चिन्तामवस्थितः॥ २२ ॥
ददर्श चापि पुरुषं स्वपन्तं पर्वतोपमम्।
सलिलेऽर्द्धमथो मग्नं जीमूतमिव सागरे॥ २३ ॥
ज्वलन्तमिव तेजोभिर्गोयुक्तमिव भास्करम्।
शर्वर्यां जाग्रतमिव भासन्तं स्वेन तेजसा॥ २४॥
देवन्द्रष्टुमिहायातः को भवानिति विस्मयात्।
तथैव स मुनिः कुक्षिं पुनरेव प्रवेशितः॥ २५ ॥
सम्प्रविष्टः पुनः कुक्षिं मार्कण्डेयोऽतिविस्मयः।
तथैव च पुनर्भूयो विजानन् स्वप्नदर्शनम्॥ २६ ॥
स तथैव यथा पूर्वं यो धरामटते पुरा।
पुण्यतीर्थजलोपेतां विविधांश्चाश्रमाणि च॥ २७ ॥
क्रतुभिर्यजमानांश्च समाप्तवरदक्षिणान्।
अपश्यद्देवकुक्षिस्थान् याजकान् शतशो द्विजान्॥ २८॥
सद्वृत्तमास्थिताः सर्वे वर्णा ब्राह्मणपूर्वकाः।
चत्वारश्चाश्रमाः सम्यग्यथोद्दिष्टा मया तव॥ २९ ॥
एवं वर्षशतं साग्रं मार्कण्डेयस्य धीमतः।
चरतः पृथिवीं सर्वां न कुक्ष्यन्तः समीक्षितः॥ ३० ॥
ततः कदाचिदथ वै पुनर्वक्त्राद्विनिःसृतः।

गुप्तं न्यग्रोधशाखायां बालमेकं निरैक्षत ॥ ३१ ॥
तथैवैकार्णवजले नीहारेणावृताम्बरे ।
अव्यय: क्रीडते लोके सर्वभूतविवर्जिते ॥ ३२ ॥
स मुनिर्विस्मयाविष्ट: कौतूहलसमन्वित: ।
बालमादित्यसङ्काशं नाशक्नोदभिवीक्षितुम् ॥ ३३ ॥
स चिन्तयंस्तथैकान्ते स्थित्वा सलिलसन्निधौ ।
पूर्वदृष्टमिदं मन्ये शङ्कितो देवमायया ॥ ३४ ॥
अगाधसलिले तस्मिन् मार्कण्डेय: सुविस्मय: ।
प्लवंस्तथार्त्तिमगमत् भयात् सन्त्रस्तलोचन: ॥ ३५ ॥
स तस्मै भगवानाह स्वागतं बालयोगवान् ।
बभाषे मेघतुल्येन स्वरेण पुरुषोत्तम: ॥ ३६ ॥
माभैर्वत्स ! न भेतव्यमिहैवायाहि मेऽन्तिकम् ।
मार्कण्डेयो मुनिस्त्वाह बालन्तं श्रमपीडित: ॥ ३७ ॥
मार्कण्डेय उवाच । को मां नाम्ना कीर्तयति तप: परिभवन्मम ।
दिव्यं वर्षसहस्राख्यं धर्षयन्निव मेव य: ॥ ३८ ॥
नह्येष व: समाचारो देवेष्वपि ममोचित: ।
मां ब्रह्मापि हि देवेशो दीर्घायुरिति भाषते ॥ ३९ ॥
कस्तपो घोरमासाद्य मामद्य त्यक्तजीवित: ।
मार्कण्डेयेति मामुक्त्वा मृत्युमीक्षितुमर्हति ॥ ४० ॥
एवमाभाष्य तं क्रोधान्मार्कण्डेयो महामुनि: ।
तथैव भगवान् भूयो बभाषे मधुसूदन: ॥ ४१ ॥
भगवानुवाच । अहं ते जनको वत्स ! हृषीकेश: पिता गुरु: ।
आयु:प्रदाता पौराण: किं मां त्वं नोपसर्पसि ॥४२॥
मां पुत्रकाम: प्रथमं पिता तेऽङ्गिरसो मुनि: ।

पूर्वमाराधयामास तपस्तीव्रं समाश्रितः ॥ ४३ ॥
ततस्त्वां घोरतपसा प्राप्तवानमितौजसम्।
दृष्टवानहमात्मस्थं महर्षिममितौजसम् ॥ ४४ ॥
कः समुत्सहते चान्यो यो न भूतात्मकात्मजः।
दृष्टमेकार्णवगतं क्रीडन्तं योगवर्त्मना ॥ ४५ ॥
ततः प्रहृष्टवदनो विस्मयोत्फुल्ललोचनः।
मूर्ध्नि बद्धाञ्जलिपुटो मार्कण्डेयो महातपाः ॥ ४६ ॥
नामगोत्रे ततः प्रोच्य दीर्घायुर्लोकपूजितः।
तस्मै भगवते भक्त्या नमस्कारमथाकरोत् ॥ ४७ ॥
मार्कण्डेय उवाच। इच्छेयं तत्त्वतो माया मिमां ज्ञातुं त्वयानघ!।
यदेकार्णवमध्यस्थः शेषे त्वं बालरूपवान् ॥ ४८ ॥
किंसंज्ञश्चैव भगवन्! लोके विज्ञायसे प्रभो!।
तर्कये त्वां महात्मानं कोह्यन्यः स्थातुमर्हति ॥ ४९ ॥
श्रीभगवानुवाच। अहं नारायणो ब्रह्मन्! सर्वभूः सर्वनाशनः।
अहं सहस्रशीर्षाख्यैः पदैरभिसंज्ञितः ॥ ५० ॥
आदित्यवर्णः पुरुषो मखे ब्रह्ममयो मखः।
अहमग्निर्हव्यवाहो यादसां पतिरव्ययः ॥ ५१ ॥
अहमिन्द्रपदे शक्रो वर्षाणां परिवत्सरः।
अहं योगी युगाख्यश्च युगान्तावर्त एव च ॥ ५२ ॥
अहं सर्वाणि सत्त्वानि दैवतान्यखिलानि तु।
भुजङ्गानामहं शेषो तार्क्ष्यो वै सर्वपक्षिणाम् ॥५३॥
कृतान्तः सर्वभूतानां विश्वेषां कालसंज्ञितः।
अहं धर्मस्तपश्चाहं सर्वाश्रमनिवासिनाम् ॥ ५४ ॥
अहं चैव सरिद्दिव्या क्षीरोदश्च महार्णवः।

यत्तत् सत्यं च परम महमेकः प्रजापतिः॥ ५५ ॥
अहं सांख्यमहं योगोऽप्यहं तत्परमम्पदम् ।
अहमिज्या क्रिया चाहं महं विद्याधिपः स्मृतः ॥ ५६ ॥
अहं ज्योति रहं वायु रहं भूमि रहं नभः ।
अहमापः समुद्राश्च नक्षत्राणि दिशोदश ॥ ५७ ॥
अहं वर्षमहं सोमः पर्जन्योऽहमहं रविः ।
क्षीरोदसागरे चाहं समुद्रे वडवामुखः ॥ ५८ ॥
वह्निः संवर्तको भूत्वा पिबंस्तोयमयं हविः ।
अहं पुराणः परमं तथैवाहं परायणम् ॥ ५९ ॥
अहं भूतस्य भव्यस्य वर्तमानस्य सम्भवः ।
यत् किञ्चित् पश्यसे विप्र ! यच्छृणोषि च किञ्चन ।
यल्लोके चानुभवसि तत् सर्वं मामनुस्मर ।
विश्वं सृष्टं मया पूर्वं सृज्यं चाद्यापि पश्य माम् ॥
युगे युगे च सृज्यामि मार्कण्डेयाखिलं जगत् ।
तदेतदखिलं सर्वं मार्कण्डेयावधारय ॥ ६२ ॥
शुश्रूषुर्मम धर्मांश्च कुक्षौ चर सुखं मम ।
मम ब्रह्मा शरीरस्थो देवैश्च ऋषिभिः सह ॥ ६३ ॥
व्यक्तमव्यक्तयोगं मामवगच्छासुरद्विषम् ।
अहमेकाक्षरो मन्त्रस्त्र्यक्षरश्चैव तारकः ॥ ६४ ॥
परस्त्रिवर्गादोङ्कारस्त्रिवर्गार्थनिदर्शनः ।
एवमादि पुराणेशो वदन्नेव महामतिः ॥ ६५ ॥
वक्त्रमावृत्य तस्याशु मार्कण्डेयं महामुनिम् ।
ततो भगवतः कुक्षिं प्रविष्टो मुनिसत्तमः ॥ ६६ ॥
स तस्मिन् सुखमेकान्ते शुश्रूषुर्हंसमव्ययम् ।

योऽहमेव विविधतनुं परिस्थितो महार्णवे व्यपगत चन्द्रभास्करे।
शनैश्चरन् प्रभुरपि हंससंज्ञितोऽसृजं जगद्विरहितकालपर्यये॥ ७

---

## अथ सप्तषष्ट्यधिकशततमोऽध्यायः।

मत्स्य उवाच। आप वः स विभुर्भूत्वा चारयामास वै तपः।
छादयित्वात्मनो देहं यादसां सम्भवम्॥ १॥
ततो महात्मातिबलो मतिं लोकस्य सर्जने।
महतां पञ्चभूतानां विश्वो विश्वमचिन्तयत्॥ २॥
तस्य चिन्तयमानस्य निर्वाते संस्थितेऽर्णवे।
निराकाशे तोयमये सूक्ष्मे जगति गह्वरे॥ ३॥
ईषत्सङ्क्षोभयामास सोऽर्णवं सलिलाश्रयः।
अनन्तरोर्मिभिः सूक्ष्ममथ च्छिद्रमभूत् पुरा॥ ४॥
शब्दं प्रति तदोद्भूतो मारुतश्छिद्रसम्भवः।
स लब्ध्वान्तरमक्षोभ्यो व्यवर्धत समीरणः॥ ५॥
विवर्धता बलवता वेगाद्विक्षोभितोऽर्णवः।
तस्यार्णवस्य क्षुब्धस्य तस्मिन्नम्भसि मथ्यिते॥ ६॥
कृष्णवर्त्मा समभवत् प्रभुर्वैश्वानरो महान्।
ततः स शोषयामास पावकः सलिलं बहु॥ ७॥
क्षयाज्जलनिधेश्छिद्रमभवद्विस्तृतं नभः।
आत्मतेजोद्भवाः पुण्या आपोऽमृतरसोपमाः॥ ८॥
आकाशं छिद्रसम्भूतं वायुराकाशसम्भवः।
आभ्यां सङ्घर्षणोद्भूतं पावकं वायुसम्भवम्॥ ९॥

दृष्ट्वा प्रीतो महादेवो महाभूतविभावनः ।
दृष्ट्वा भूतानि भगवांल्लोकसृष्ट्यर्थमुत्तमम् ॥ १० ॥
ब्रह्मणो जन्मसहितं बहुरूपो व्यचिन्तयत् ।
चतुर्युगाभिसंख्याते सहस्रयुगपर्यये ॥ ११ ॥
बहुजन्मविशुद्धात्मब्रह्मणीह निरुच्यते ।
यत् पृथिव्यां द्विजेन्द्राणां तपसा भवितात्मना ॥ १२ ॥
ज्ञानं दृष्टन्तु विश्वार्थे योगिनां याति मुख्यताम् ।
तं योगवन्तं विज्ञाय सम्पूर्णैश्वर्यमुत्तमम् ॥ १३ ॥
पदे ब्रह्मणि विश्वेशं न्ययोजयत योगवित् ।
ततस्तस्मिन् महातोये महायोगी हरिरच्युतः ॥ १४ ॥
स्वयं क्रीडंश्च विधिवन्मोदते सर्वलोककृत् ।
पद्मं नाभ्युद्भवं चैकं समुत्पादितवांस्तदा ॥ १५ ॥
सहस्रपर्णं विरजं भास्कराभं हिरण्मयम् ।
हुताशनज्वलितशिखोज्ज्वलत्प्रभमुपस्थितं शरदमलार्कतेजसम् ।
विराजते कमलमुदारवर्चसं महात्मनस्तनुरुहचारुदर्शनम्॥१६

---

अथाष्टाधिकशततमोऽध्यायः ।

मत्स्य उवाच । अथ योगवतां श्रेष्ठमसृजत् भूरितेजसम् ।
स्रष्टारं सर्वलोकानां ब्रह्माणं सर्वतोमुखम् ॥ १ ॥
यस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते ।
सर्वतेजोगुणमयं पार्थिवैर्लक्षणैर्वृतम् ॥ २ ॥
तच्च पद्मं पुराणज्ञाः पृथिवीरूपमुत्तमम् ।

नारायणसमुद्भूतं प्रवदन्ति महर्षयः॥ ३॥
या पद्मा सा रसा देवी पृथिवी परिचक्षते।
ये पद्मसारगुरवस्तान् दिव्यान् पर्वतान् विदुः॥ ४॥
हिमवन्तं च मेरुं च नीलं निषधमेव च।
कैलासं मुञ्जवन्तं च तथान्यं गन्धमादनम्॥ ५॥
पुण्यं त्रिशिखरञ्चैव कान्तं मन्दरमेव च।
उदयं पिञ्जरं चैव विन्ध्यवन्तं च पर्वतम्॥ ६॥
एते देवगणानाञ्च सिद्धानाञ्च महात्मनाम्।
आश्रयाः पुण्यशीलानां सर्वकामफलप्रदाः॥ ७॥
एतेषामन्तरे देशो जम्बुद्वीप इति स्मृतः।
जम्बुद्वीपस्य संस्थानं यज्ञिया यत्र वै क्रिया॥ ८॥
एभ्यो यत् स्रवते तोयं दिव्यामृतरसोपमम्।
दिव्यास्तीर्थशताधाराः सुरम्याः सरितः स्मृताः॥ ९॥
यतानि यानि पद्मस्य केसराणि समन्ततः।
असंख्येयाः पृथिव्यास्ते विद्धि वै धातुपर्वताः॥ १०॥
यानि पद्मस्य पर्णानि भूरीणि तु नराधिप!।
ते दुर्गमाः शैलचिता म्लेच्छदेशा विकल्पिताः॥ ११॥
यान्यधोभागपर्णानि ते निवासास्तु भागशः।
दैत्याना मुरगाणाञ्च पतङ्गानाञ्च पार्थिव!॥ १२॥
तेषां महार्णवो यत्र तद्रसेत्यभिसंज्ञितम्।
महापातककर्माणो मज्जन्ते यत्र मानवाः॥ १३॥
पद्मस्यान्तरतो यत्तदेकार्णवगता मही।
प्रोक्ताथ दिक्षु सर्वासु चत्वारः सलिलाकराः॥ १४॥
एवं नारायणस्यार्थे मही पुष्करसम्भवा।

प्रादुर्भावोऽप्ययं तस्मान्नाम्ना पुष्करसंज्ञितः ॥ १५ ॥
एतस्मात् कारणात्तज्ज्ञैः पुराणैः परमर्षिभिः ।
याज्ञियैर्वेददृष्टान्तैर्यज्ञे पद्मविधिः स्मृतः ॥ १६ ॥
एवं भगवता तेन विश्वग्रा धरया विधिः ।
पर्वतानां नदीनाञ्च ह्रदानां चैव निर्मितः ॥ १७ ॥
विभुस्तथैवाप्रतिमप्रभावः प्रभाकराभो वरुणासितद्युतिः ।
मनैः स्वयम्भूः शयनं सृजत्तदा जगन्मयं पद्मविधिं महार्णवे ॥

---

अथ त्रिसप्तत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । विघ्नस्तपसि सञ्जातो मधुर्नाम महासुरः ।
तेनैव च सहोद्भूतो रजसा कैटभस्ततः ॥ १ ॥
तौ रजस्तमसौ विघ्नसम्भूतौ तामसौ गणौ ।
एकार्णवे जगत् सर्वं क्षोभयन्तौ महाबलौ ॥ २ ॥
दिव्यरक्ताम्बरधरौ श्वेतदीप्ताग्रदंष्ट्रिणौ ।
किरीटकुण्डलोदग्रौ केयूरवलयोज्ज्वलौ ॥ ३ ॥
महाविवृतताम्राक्षौ पीनोरस्कौ महाभुजौ ।
महागिरेः संहननौ जङ्गमाविव पर्वतौ ॥ ४ ॥
नवमेघप्रतीकाशावादित्यसदृशाननौ ।
विद्युदाभौ गदाग्राभ्यां कराभ्यामतिभीषणौ ॥ ५ ॥
तौ पादयोस्तु विन्यासादुत्क्षिपन्तौ विवार्णवम् ।
कम्पयन्ताविव हरिं शयानं मधुसूदनम् ॥ ६ ॥
तौ तत्र विचरन्तौ स्म पुष्करे विश्वतोमुखम् ।

योगिनां श्रेष्ठमासाद्य दीप्तं दद्दशतुस्तदा॥ ७॥
नारायणसमाज्ञातं सृजन्तमखिलाः प्रजाः।
दैवतानि च विश्वानि मानसानसुरानृषीन्॥ ८॥
ततस्तावूचतुस्तत्र ब्रह्माणमसुरोत्तमौ।
दीप्तौ मुमूर्षू संक्रुद्धौ रोषव्याकुलितेक्षणौ॥ ९॥
कस्त्वं पुष्करमध्यस्थः सितोष्णीषश्चतुर्भुजः।
आधाय नियमं मोहादास्ते त्वं विगतज्वरः॥ १०॥
एह्यागच्छावयोर्युद्धं देहि त्वं कमलोद्भव!।
आवाभ्यां परमौजाभ्यां मग्नस्त्वमिहार्णवे॥ ११॥
तत्र कथोद्भवस्तुभ्यं केन वासि नियोजितः।
कः स्रष्टा कश्च ते गोप्ता केन नाम्ना विधीयसे॥ १२॥
ब्रह्मोवाच। एक इत्युच्यते लोकैरविचिन्त्यः सहस्रदृक्।
तत्संयोगेन भवतोः कर्म नामावगच्छताम्॥ १३॥
मधुकैटभावूचतुः। नावयोः परमं लोके किञ्चिदस्ति महामते!।
आवाभ्यां छाद्यते विश्वं तमसा रजसाथ वै॥ १४॥
रजस्तमौ मयावावां मुषीणामवलङ्घितौ।
छाद्यमानौ धर्मशीलौ दुस्तरौ सर्वदेहिनाम्॥ १५॥
आवाभ्यां मुच्यते लोको दुष्कराभ्यां युगे युगे।
आवामर्थश्च कामश्च यज्ञः स्वर्गपरिग्रहः॥ १६॥
सुखं यत्र मुदा युक्तं यत्र श्रीः कीर्तिरेव च।
येषां यत्काङ्क्षितं चैव तत्तदावां विचिन्तय॥ १७॥
ब्रह्मोवाच। यत्नाद्योगवतो दृष्ट्वा योगः पूर्वं मयार्जितः।
तं समाधाय गुणवत् सत्त्वं चास्मि समाश्रितः॥ १८॥
यः परो योगमतिमान् योगाख्यः सत्त्वमेव च।

रजसस्तमसश्चैव यः स्रष्टा विश्वसम्भवः ॥ १९ ॥
ततो भूतानि जायन्ते सात्त्विकानीतराणि च ।
स एव हि युवां नाशे वशी देवो हनिष्यति ॥ २० ॥
स्वपन्नेव ततः श्रीमान् बहुयोजनविस्तृतम् ।
बाहुं नारायणो ब्रह्म कृतवानात्ममायया ॥ २१ ॥
कृष्यमाणौ ततस्तस्य बाहुना बाहुशालिनः ।
चेरतुस्तौ विगलितौ शकुनाविव पीवरौ ॥ २२ ॥
ततस्तावाहतुर्गत्वा तदा देवं सनातनम् ।
पद्मनाभं हृषीकेशं प्रणिपत्य स्थितावुभौ ॥ २३ ॥
जानीवस्त्वां विश्वयोनिं त्वामेकं पुरुषोत्तमम् ।
त्वामावाम्याहि हेत्वर्थमिदं नौ बुद्धिकारणम् ॥ २४ ॥
अमोघदर्शनः सत्वं यतस्त्वां विद्गणाश्रितम् ।
ततस्त्वामागतावावामभितः प्रसमीक्षितुम् ॥ २५ ॥
तदिच्छामो वरं देव ! त्वत्तोऽद्भुतमरिन्दम ! ।
अमोघदर्शनोऽसि त्वं नमस्ते समितिञ्जय ! ॥ २६ ॥
श्रीभगवानुवाच । किमर्थमसुरौ ब्रूत वरं ह्यसुरसत्तमौ ! ।
दत्तायुष्कौ पुनर्भूयो यन्मत्तो जीवितुमिच्छथः ॥ २७ ॥
मधुकैटभावूचतुः ।
यस्मिन्न कश्चित् मृतवान् देव ! तस्मिन् प्रभो ! वधम् ।
तमिच्छावो वधं चैव त्वत्तो नोऽस्तु महाव्रत ! ॥ २८ ॥
श्रीभगवानुवाच । बाढं युवां तु प्रवरौ भविष्यत्कालसम्भवे ।
भविष्यतो न सन्देहः सत्यमेतद्ब्रवीमि वाम् ॥ २९ ॥
वरं प्रदायाथ महासुराभ्यां सनातनो विश्ववरः सुरोत्तमः ।
रजस्तमोवर्गभवावनीयसौ ममन्थ तावूरुतलेन वै प्रभुः ॥ ३० ॥

## अथ सप्तत्यधिकशततमोऽध्यायः ।

---

मत्स्य उवाच । स्थित्वा च तस्मिंस्तु मले ब्रह्मा ब्रह्मविदाम्वरः ।
ऊर्द्ध्वबाहुर्महातेजास्तपो घोरं समाश्रितः ॥ १ ॥
प्रज्वलन्निव तेजोभिर्भाभिः स्वाभिस्तमोनुदः ।
बभासे सर्वधर्मस्थः सहस्रांशुरिवांशुभिः ॥ २ ॥
अथान्यद्रूपमास्थाय शम्भुर्नारायणोऽव्ययः ।
आजगाम महातेजा योगाचार्यो महायशाः ॥ ३ ॥
सांख्याचार्यो हि मतिमान् कपिलो ब्राह्मणोवरः ।
उभावपि महात्मानौ स्तुवन्तौ चैव तत्परौ ॥ ४ ॥
तौ प्राप्ता वूचतुस्तत्र ब्रह्माणममितौजसम् ।
परावरविशेषज्ञौ पूजितौ च महर्षिभिः ॥ ५ ॥
ब्रह्मात्मदृढबन्धश्च विशालो जगदास्थितः ।
ग्रामणीः सर्वभूतानां ब्रह्मा त्रैलोक्यपूजितः ॥ ६ ॥
तयोस्तद्वचनं श्रुत्वा विप्रोऽभ्याहृतयोगवित् ।
त्रीनिमान् कृतवान् लोकान्यथेयं ब्रह्मणः श्रुतिः ॥ ७
पुत्रञ्च सम्भवे चैकं समुत्पादितवानृषिः ।
तस्याग्रे वागयतस्तस्थौ ब्रह्माणमजमव्ययम् ॥ ८ ॥
सोत्पन्नमात्रो ब्रह्माण मुक्तवान् मानस सुतः ।

किं कुर्मस्तव साहाय्यं ब्रवीतु भागवानृषिः ॥ ९ ॥

ब्रह्मोवाच । य एष कपिलो ब्रह्म नारायणमयस्तथा ।

वदते भवतस्त्वं तत् कुरुष्व महामते ! ॥ १० ॥

ब्रह्माणस्तु तदर्थन्तु तदा भूयः समुत्थितः ।

शुश्रूपुरस्मि युवयोः किं करोमि कृताञ्जलिः ॥ ११ ॥

श्रीभगवानुवाच । यत् सत्य मक्षरं ब्रह्मन् ! अष्टादशविधन्तु तत् ।

यत् सत्यं यदृतं तत्तु परं पदमनुस्मर ॥ १२ ॥

एतद्वचो निशम्यैव ययौ स दिशमुत्तराम् ।

गत्वाच तत्र ब्रह्मत्वमगमत् ज्ञानतेजसा ॥ १३ ॥

ततो ब्रह्मा भुवन्नाम द्वितीय मसृजत् प्रभुः ।

सङ्कल्पयित्वा मनसा तमेव च महात्मना ॥ १४ ॥

ततः सोऽथ ब्रवीद्वाक्यं किं करोमि पितामह ! ।

पितामहसमादिष्टो ब्रह्माणं समुपस्थितः ॥ १५ ॥

ब्रह्माभ्यामन्तु कृतवान् भुवश्च पृथिवीं गतः ।

प्रामश्च परसंस्थानं स तयोः पार्श्वमागतः ॥ १६ ॥

तस्मिन्नपि गते पुनः तृतीय मसृजत् प्रभुः ।

सांख्यप्रवृत्तिकुशलं भूर्भुवं नामतोविभुम् ॥ १७ ॥

गोपतित्वं समासाद्य तयो रेवागमद्गतिम् ।

एवं पुत्रास्त्रयोऽप्येते उक्ताः शम्भोर्महात्मनः ॥ १८ ॥

तान् गृहीत्वा सुतांस्तस्य प्रयातः स्वार्जितां गतिम् ।

नारायणश्च भगवान् कपिलश्च यतीश्वरः ॥ १९ ॥

यत्कालन्तो गतौ मुक्तौ ब्रह्मा तं कालमेव हि ।

ततो घोरतमभ्भूयः संस्थितः परमं व्रतम् ॥ २० ॥

नरीभेद्य ततो ब्रह्मा प्रभुरेकस्तपश्चरन् ।

शरीरार्द्धां ततो भार्य्यां समुत्पादितवान् शुभाम् ॥२१॥
तपसा तेजसा चैव वर्चसा नियमेन च।
सदृशीमात्मनो देवीं समर्थां लोकसर्जने॥ २२॥
ततो जगाद त्रिपदाङ्गायत्रीं वेदपूजिताम्।
सृजन् प्रजानां पतयः सागरांश्चासृजद्विभुः ॥ २३ ॥
ततो जगाद त्रिपदाङ्गायत्रीं वेदपूजिताम्।
अपरांश्चैव चतुरोवेदान् गायत्रिसम्भवान् ॥ २४ ॥
आत्मनः सदृशान् पुत्रान सृजद्वै पितामहः।
विश्वे प्रजानां पतयो येभ्योलोका विनिःसृताः॥ २५॥
विश्वेशं प्रथमं तावन्महातापसमात्मजम्।
सर्वमन्त्रहितं पुण्यं नाम्ना धर्मं स सृष्टवान्॥ २६ ॥
दक्षं मरीचि मत्रिञ्च पुलस्त्यं पुलहं क्रतुम्।
वसिष्ठं गौतमञ्चैव भृगुमङ्गिरसम्मनुम् २७ ॥
अथैवाद्भुतमित्येते ज्ञेयाः पैतामहर्षयः।
त्रयोदशगुणां धर्म्ममालभन्त महर्षयः॥ २८ ॥
अदिति र्दितिर्दनुः काला अनायुः सिंहिका मुनिः।
ताम्रा क्रोधाथ सुरसा विनता कद्रुरेव च ॥ २९ ॥
दक्षस्यापत्य मेता वै कन्या द्वादश पार्थिव!।
मरीचेः कश्यपः पुत्रस्तपसा निर्म्मितः किल ॥ ३० ॥
तस्मै कन्या द्वादशान्या दक्षस्ताः प्रददौ तदा।
नक्षत्राणि च सोमाय तदा वै दत्तवानृषिः ॥ ३१ ॥
रोहिण्यादीनि सर्वाणि पुण्याणि रविनन्दन!।
लक्ष्मी मरुत्वती साध्या विश्वेशाच मता शुभा ॥ ३२ ॥
देवी सरस्वती चैव ब्रह्मणा निर्म्मिताः पुरा।

एताः पञ्च वरिष्ठा वै सुरश्रेष्ठाय पार्थिव ! ॥ ३३ ॥
दत्ता भद्राय धर्माय ब्रह्मणा दृष्टकर्मणा ।
या रूपार्थवती पत्नी ब्रह्मणः कामरूपिणी ॥ ३४ ॥
सुरभिः सा हिता भूत्वा ब्रह्माणं समुपस्थिता ।
ततस्तामगमद्ब्रह्मा मैथुनं लोकपूजितः ॥ ३५ ॥
लोकसर्जनहेत्वर्थं गवामर्थाय सत्तमः ।
जज्ञिरे च सुतास्तस्यां विपुला धूमसन्निभाः ॥ ३६ ॥
नक्तंसन्ध्याभ्रसङ्काशाः प्रारुदंस्तिग्मतेजसः ।
ते रुदन्तो द्रवन्तश्च गर्हयन्तः पितामहम् ॥ ३७ ॥
रोदनाद्द्रवणाच्चैव रुद्रा इति ततः स्मृताः ।
निर्ऋतिश्चैव शम्भुर्वै तृतीयश्चापराजितः ॥ ३८ ॥
मृगव्याधः कपर्दी च दहनोऽथ खरश्च वै ।
अहिर्बुध्न्यश्च भगवान् कपाली चापि पिङ्गलः ॥ ३९
सेनानीश्च महातेजा रुद्रास्त्वेकादश स्मृताः ।
तस्यामेव सुरभ्यां च गावो यज्ञेश्वराश्च वै ॥ ४० ॥
प्रकृष्टाश्च तथा मायाः सुरभ्याः पशवोऽमराः ।
अजाश्चैव तु हंसाश्च तथैवामृतमुत्तमम् ॥ ४१ ॥
ओषध्यः प्रवरा याश्च सुरभ्यास्ताः समुत्थिताः ।
धर्माल्लक्ष्मीस्तथा कामं साध्यासाध्यान्व्यजायत ॥ ४२
भवश्च प्रभवश्चैवहीशश्चासुरहं तथा ।
अरुणं चारुणिश्चैव विश्वावसुबलध्रुवौ ॥ ४३ ॥
हविष्यश्च वितानश्च विधानशमितावपि ।
वत्सरश्चैव भूतिश्च सर्वासुरनिषूदनम् ॥ ४४ ॥
सुपर्वाणं वृहत्कान्तिः साध्या लोकनमस्कृता ।

तमेवानुगता देवी जनयामास वै सुरान्॥ ४५॥
वरं वै प्रथमन्देवं द्वितीयं ध्रुवमव्ययम्।
विश्वावसुं तृतीयञ्च चतुर्थं सोममीश्वरम्॥ ४६॥
ततोऽनुरूपमायञ्च यमस्मादनन्तरम्।
सप्तमञ्च तथा वायुमष्टमन्निर्ऋतिं वसुम्॥ ४७॥
धर्मस्यापत्यमेतद्वै सुदेव्यां समजायत।
विश्वेदेवाश्च विश्वायां धर्माज्जाता इति श्रुतिः॥ ४८॥
दक्षश्चैव महाबाहुः पुष्करस्वन एवच।
चाक्षुषस्तु मनुश्चैव तथा मधुमहोरगौ॥ ४९॥
विशुन्तश्च वसुर्वोजा निस्कुम्भश्च महायशाः।
गरुडश्चातिसत्वौजा भास्करप्रतिमद्युतिः॥ ५०॥
विश्वान् देवान् देवमाता विश्वाजनयत् सुतान्।
मरुत्वतीमरुत्वतो देवानजनयत् सुतान्॥ ५१॥
अग्निं चक्षूरविज्योतिः सावित्रं मित्रमेवच।
अमरं शरवृष्टिञ्च सुकर्षञ्च महाभुजम्॥ ५२॥
विराजञ्चैव वाचञ्च विश्वावसुमतिं तथा।
अश्वमित्रं चित्ररश्मिन्तथा निषधनं नृप!॥ ५३॥
ह्ययन्तं वाडवञ्चैव चारित्रं मन्दपन्नगम्।
बृहन्तं वै बृहद्रूपं तथा वै पूतनानुगम्॥ ५४॥
मरुत्वती पुरा जज्ञे एतान्वै मरुताङ्गणान्।
अदितिः कश्यपाज्जज्ञे आदित्यान् द्वादशैव हि॥ ५५
इन्द्रो विष्णुर्भगस्त्वष्टा वरुणो ह्यर्यमा रविः।
पूषा मित्रश्च धनदो धाता पर्जन्य एव च॥ ५६॥
इत्येते द्वादशादित्या वरिष्ठा स्त्रिदिवौकसः।

आदित्यस्य सरस्वत्यां जज्ञाते द्वौ सुतौ वरौ ॥ ५७ ॥
तपःश्रेष्ठौ गुणिश्रेष्ठौ त्रिदिवस्यापि सम्मतौ ।
दनुस्तु दानवान् जज्ञे दितिर्दैत्यान् व्यजायत ॥ ५८ ॥
काला तु वै कालकेयानसुरान् राक्षसांस्तु वै ।
अनायुषायास्तनया व्याधयः सुमहाबलाः ॥ ५९ ॥
सिंहिका ग्रहमाता वै गन्धर्वजननी मुनिः ।
ताम्रा त्वप्सरसां माता पुण्यानां भारतोद्भव ! ॥ ६० ॥
क्रोधायाः सर्वभूतानि पिशाचाश्चैव पार्थिव ! ।
जज्ञे यक्षगणांश्चैव राक्षसांश्च विशाम्पते ! ॥ ६१ ॥
चतुष्पदानि सत्वानि तथा गावस्तु सौरभाः ।
सुपर्णान् पक्षिणश्चैव विनता चाप्यजायत ॥ ६२ ॥
महोरगान् सर्वनागान् देवी कद्रूर्व्यजायत ।
एवं वृद्धिं समगमन् विश्वे लोकाः परन्तप ! ॥ ६३ ॥
तदा वै पौष्करो राजन् ! प्रादुर्भावो महात्मनः ।
प्रादुर्भावः पौष्करस्ते मया द्वैपायनेरितः ॥ ६४ ॥
पुराणः पुरुषश्चैव मया विष्णुर्हरिः प्रभुः ।
कथितस्तेऽनुपूर्व्वेण संस्तुतः परमर्षिभिः ॥ ६५ ॥
यश्चेदमग्र्यं शृणुयात् पुराणं सदा नरः पर्व्वसु गौरवेण ।
अवाप्य लोकान् स हि वीतरागः परत्र च स्वर्गफलानि भुङ्क्ते ॥ ६६ ॥
चक्षुषा मनसा वाचा कर्म्मणा च चतुर्विधम् ।
प्रसादयति यः कृष्णं तं कृष्णोऽनुप्रसीदति ॥ ६७ ॥
राजा च लभते राज्य मधनश्चोत्तमन्धनम् ।
क्षीणायुर्लभते चायुः पुत्रकामः सुतस्तथा ॥ ६८ ॥
यज्ञा वेदास्तथा कामास्तपांसि विविधानि च ।

प्राप्नोति विविधं पुण्यं विष्णुभक्तो धनानि च ॥ ६८॥
यद्यत् कामयते किञ्चित् तत्तल्लोकेश्वराद्भवेत् ।
सर्वं विहाय य इमं पठेत् पौष्करकं हरेः ॥ ७०॥
प्रादुर्भावं नृपश्रेष्ठ ! न तस्य ह्यशुभं भवेत् ।
एष पौष्करको नाम प्रादुर्भावो महात्मनः ।
कीर्तितस्ते महाभाग ! व्यासश्रुतिनिदर्शनात् ॥ ७१ ॥

---

## अथैकसप्तत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । विष्णुत्वं शृणु विप्रर्षेर्य्य हरित्वञ्च कृते युगे ।
वैकुण्ठत्वञ्च देवेषु कृष्णत्वं मानुषेषु च ॥ १ ॥
ईश्वरस्य हितस्यैषा कर्म्मणां गहना गतिः ।
संप्रत्यतीतान् भव्यांश्च शृणु राजन् ! यथातथम् ॥ २ ॥
अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान् प्रभुः ।
नारायणो ह्यनन्तात्मा प्रभवोऽव्यय एव च ॥ ३ ॥
एष नारायणो भूत्वा हरिरासीत् सनातनः ।
ब्रह्मा वायुश्च सोमश्च धर्म्मः शक्रो बृहस्पतिः ॥ ४ ॥
अदिते रपि पुत्रत्वं समेत्य रविनन्दन ! ।
एष विष्णु रिति ख्यात इन्द्रस्यावरजो विभुः ॥ ५ ॥
प्रसादजं ह्यस्य विभोरदित्याः पुत्रकारणम् ।
वधार्थं सुरशत्रूणां दैत्यदानवरक्षसाम् ॥ ६ ॥
प्रधानात्मा पुरा ह्येष ब्रह्माणमसृजत् प्रभुः ।
सोऽसृजत् पूर्वं पुरुषः पुराकल्पे प्रजापतीन् ॥ ७ ॥

असृजन्मानवांस्तत्र ब्रह्म वंशाननुत्तमान् ।
तिर्यग्भवन्महात्मानो वह्नयो ब्रह्म शाश्वतम् ॥ ८ ॥
एतदाश्चर्यभूतस्य विष्णोः कर्मानुकीर्तनम् ।
कीर्तनीयस्य लोकेषु कीर्त्यमानं निबोध मे ॥ ९ ॥
हते वृत्रवधे तत्र वर्तमाने कृते युगे ।
आसीत्त्रैलोक्यविख्यातः संग्रामस्तारकामयः ॥ १० ॥
यत्र ते दानवा घोराः सर्वे संग्रामदुर्जयाः ।
घ्नन्ति देवगणान् सर्वान् सयक्षोरगराक्षसान् ॥ ११ ॥
ते वध्यमाना विमुखाः क्षीणप्रहरणा रणे ।
त्रातारं मनसा जग्मुर्देवं नारायणं प्रभुम् ॥ १२ ॥
एतस्मिन्नन्तरे मेघा निर्वाणाङ्गारवर्चसः ।
सार्कचन्द्रग्रहगणं छादयन्तो नभस्तलम् ॥ १३ ॥
चित्रविद्युद्गणोपेता घोरनिर्ह्रादकारिणः ।
अन्योन्यवेगाभिहताः प्रववुः सप्त मारुताः ॥ १४ ॥
दीप्ततोयाशनिघनैर्वज्रवेगानलानिलैः ।
रवैः सुघोरैरुत्पातैर्दह्यमानमिवाम्बरम् ॥ १५ ॥
तत उल्कासहस्राणि निपेतुः खगतान्यपि ।
दिव्यानि च विमानानि प्रपतन्त्युत्पतन्ति च ॥ १६ ॥
चतुर्युगान्ते पर्याये लोकानां यद्भयं भवेत् ।
अरूपवन्ति रूपाणि तस्मिन्नुत्पातलक्षणे ॥ १७ ॥
जातञ्च निष्प्रभं सर्वं न प्राज्ञायत किञ्चन ।
तिमिरौघपरिक्षिप्ता न रेजुश्च दिशो दश ॥ १८ ॥
विवेश रूपिणी काली कालमेघावगुण्ठिता ।
द्यौर्न भात्यभिभूतार्का घोरेण तमसा वृता ॥ १९ ॥

तान् घनौघान् सतिमिरान् दोर्भ्यामाक्षिप्य स प्रभुः।
वपुः सन्दर्शयामास दिव्यं कृष्णवपुर्हरिः ॥ २० ॥
बलाहकाञ्जननिभं बलाहकतनूरुहम्।
तेजसा वपुषा चैव कृष्णं कृष्णमिवाचलम् ॥ २१ ॥
दीप्तपीताम्बरधरं तप्तकाञ्चनभूषणम्।
धूमान्धकारवपुषं युगान्ताग्निमिवोत्थितम् ॥ २२ ॥
चतुर्द्विगुणपीनांसं किरीटच्छन्नमूर्द्धजम्।
बभौ चामीकरप्रख्यैरायुधैरुपशोभितम् ॥ २३ ॥
चन्द्रार्ककिरणोद्योतं गिरिकूटमिवोच्छ्रितम्।
नन्दकानन्दितकरं शराशीविषधारिणम् ॥ २४ ॥
शक्तिचित्रफलोदग्रशङ्खचक्रगदाधरम्।
विष्णुशैलं क्षमामूलं श्रीवृक्षं शार्ङ्गधन्विनम् ॥ २५ ॥
त्रिदशोदारफलदं स्वर्गस्त्रीचारुपल्लवम्।
सर्वलोकमनःकान्तं सर्वसत्त्वमनोहरम् ॥ २६ ॥
नानाविमानविटपन्तोयदाम्बुमधुस्रवम्।
विद्याहङ्कारसाराद्यं महाभूतप्ररोहणम् ॥ २७ ॥
विशेषपत्रैर्निचितं ग्रहनक्षत्रपुष्पितम्।
दैत्यलोकमहास्कन्धं मर्त्यलोके प्रकाशितम् ॥ २८ ॥
सागराकारनिर्ह्रादं रसातलमहाश्रयम्।
मृगेन्द्रपाशैर्विततं पक्षिजन्तुनिषेवितम् ॥ २९ ॥
शीलार्थचारुगन्धाढ्यं सर्वलोकमहाद्रुमम्।
अव्यक्तानन्तसलिलं व्यक्ताहङ्कारफेनिलम् ॥ ३० ॥
महाभूततरङ्गौघं ग्रहनक्षत्रबुद्बुदम्।
विमानगरुतव्याप्तं तोयदाडम्बराकुलम् ॥ ३१ ॥

जन्तुमत्स्यजनाकीर्णं शैलशङ्खकुलैर्युतम् ।
त्रैगुण्यविषयावर्तं सर्वलोकतिमिङ्गिलम् ॥ ३२ ॥
वीरवृक्षलतागुल्मं भुजगोत्कृष्टशैवलम् ।
द्वादशार्कमहाद्वीपं रुद्रैकादशपत्तनम् ॥ ३३ ॥
वस्वष्टपर्वतोपेतं त्रैलोक्याम्भोमहोदधिम् ।
सन्ध्यासङ्घोर्मिसलिलं सुपर्णानिलसेवितम् ॥ ३४ ॥
दैत्यरक्षोगणग्राहं यक्षोरगझषाकुलम् ।
पितामहमहावीर्यं सर्वस्त्रीरत्नशोभितम् ॥ ३५ ॥
श्रीकीर्तिकान्तिलक्ष्मीभिर्नदीभिरुपशोभितम् ।
कालयोगो महापर्वप्रलयोत्पत्तिवेगिनम् ॥ ३६ ॥
तं तु योगमहापारं नारायणमहार्णवम् ।
देवाधिदेवं वरदं भक्तानां भक्तवत्सलम् ॥ ३७ ॥
अनुग्रहकरं देवं प्रशान्तिकरणं शुभम् ।
हर्यश्वरथसंयुक्ते सुपर्णध्वजसेविते ॥ ३८ ॥
ग्रहचन्द्रार्करचिते मन्दराक्षवरावृते ।
अनन्तरश्मिभिर्युक्ते विस्तीर्णे मेरुगह्वरे ॥ ३९ ॥
तारकाचित्रकुसुमे ग्रहनक्षत्रबन्धुरे ।
भयेष्वभयदं व्योम्नि देवा दैत्यपराजिताः ॥ ४० ॥
ददृशुस्ते स्थितं देवं दिव्ये लोकमये रथे ।
ते कृताञ्जलयः सर्वे देवाः शक्रपुरोगमाः ॥ ४१ ॥
जयशब्दं पुरस्कृत्य शरण्यं शरणं गताः ।
स तेषां तां गिरं श्रुत्वा विष्णुर्दैवतदैवतम् ॥ ४० ॥
मनश्चक्रे विनाशाय दानवानां महामृधे ।
आकाशे तु स्थितो विष्णुरुत्तमं वपुरास्थितः ॥ ४२ ॥

उवाच देवताः सर्वाः सप्रतिज्ञमिदं वचः।
शान्तिं व्रजत भद्रं वो माभैष्ट मरुताङ्गणाः! ॥४४॥
जिता मे दानवाः सर्वे त्रैलोक्यं परिगृह्यताम्।
ते तस्य सत्यसन्धस्य विष्णोर्वाक्येन तोषिताः ॥४५॥
देवाः प्रीतिं समाजग्मुः प्राश्यामृत मनुत्तमम्।
ततस्तमः संहृतं तद्विनेशुश्च बलाहकाः ॥ ४६ ॥
प्रववुश्च शिवा वाताः प्रशान्ताश्च दिशोदश।
शुद्धप्रभाणि ज्योतींषि सोमञ्चक्रुः प्रदक्षिणम् ॥ ४७ ॥
न विग्रहं ग्रहाश्चक्रुः प्रशान्ताश्चापि सिन्धवः।
विरजस्का भवन्मार्गा नाकवर्गादयस्त्रयः ॥ ४८ ॥
यथार्थमूहुः सरितो नापिचुक्षुभिरेऽर्णवाः।
आसंश्च भानोन्द्रियाणि नराणामन्तरात्मसु ॥ ४९ ॥
महर्षयो वीतशोका वेदानुच्चैरधीयत।
यज्ञेषु च हविः पाकं शिवमाप च पावकः ॥ ५० ॥
प्रवृत्तधर्माः संवृत्ता लोका मुदितमानसाः।
विष्णोर्दत्तप्रतिज्ञस्य श्रुत्वारि निधने गिरम् ॥ ५१ ॥

---

## अथ द्विसप्तत्यधिकशततमोऽध्यायः।

मत्स्य उवाच। ततो भयं विष्णुवचः श्रुत्वा दैत्याश्च दानवाः।
उद्योगविपुलं चक्रुर्युद्धाय विजयाय च ॥ १ ॥
मयस्तु काञ्चनमयं त्रिनल्वायत मव्ययम्।
चतुश्चक्रं सुविपुलं सुकल्पित महायुगम् ॥ २ ॥

किङ्किणीजालनिर्घोषं द्वीपिचर्मपरिष्कृतम् ।
रुचिरं रत्नजालैश्च हेमजालैश्च शोभितम् ॥ ३ ॥
ईहामृगगणाकीर्णं पक्षिपङ्क्तिविराजितम् ।
दिव्यास्त्रतूणिरधरं पयोधरविनादितम् ॥ ४ ॥
स्वक्षं रथवरोदारं सूपस्थं गगनोपमम् ।
गदापरिघसम्पूर्णं मूर्तिमन्तमिवार्णवम् ॥ ५ ॥
हेमकेयूरवलयं स्वर्णमण्डलकूबरम् ।
सपताकध्वजोपेतं सादित्यमिव मन्दरम् ॥ ६ ॥
गजेन्द्राभोगवपुषं क्वचित् केसरिवर्चसम् ।
युक्तं ऋक्षसहस्रेण समृद्धाम्बुदनादितम् ॥ ७ ॥
दीप्तमाकाशगं दिव्यं रथं पररथारुजम् ।
अध्यतिष्ठद्रणाकाङ्क्षी मेरुं दीप्त इवांशुमान् ॥ ८ ॥
तारमुत्क्रोशविस्तारं सर्वं हेममयं रथम् ।
शैलाकारमसम्बाधं नीलाञ्जनचयोपमम् ॥ ९ ॥
कार्ष्णायसमयं दिव्यं लोहेषाबद्धकूबरम् ।
तिमिरोद्गारिकिरणं गर्जन्तमिव तोयदम् ॥ १० ॥
लोहजालेन महता सगवाक्षेण दंशितम् ।
आयसैः परिघैः पूर्णं क्षेपणीयैश्च मुद्गरैः ॥ ११ ॥
प्रासैः पाशैश्च विततैर्नरसंयुक्तकण्टकैः ।
शोभितं त्रासयानैश्च तोमरैश्च परश्वधैः ॥ १२ ॥
उद्यन्तं द्विषतां हेतोर्द्वितीयमिव मन्दरम् ।
युक्तं खरसहस्रेण सोऽध्यारोहद्रथोत्तमम् ॥ १३ ॥
विरोचनश्च संक्रुद्धो गदापाणिरवस्थितः ।
प्रमुखे तस्य सैन्यस्य दीप्तशृङ्ग इवाचलः ॥ १४ ॥

युक्तं रथसहस्रेण हयग्रीवस्तु दानवः ।
स्यन्दनं वाहयामास सपत्नानीकमर्दनः ॥ १५ ॥
व्यायतं विष्कुसाहस्रं धनुर्विस्फारयन्महत् ।
वाराहः प्रमुखे तस्थौ सप्ररोह इवाचलः ॥ १६ ॥
खरस्तु विक्षरन्दर्पान्नेत्राभ्यां रोषजं जलम् ।
स्फुरद्दन्तौष्ठनयनं संग्रामं सोऽभ्यकाङ्क्षत ॥ १७ ॥
त्वष्टा त्वष्टगजं घोरं यानमास्थाय दानवः ।
व्यूहितुं दानवव्यूहं परिचक्राम वीर्यवान् ॥ १८ ॥
विप्रचित्तिवपुश्चैव श्वेतकुण्डलभूषणः ।
श्वेतः श्वेतप्रतीकाशो युद्धायाभिमुखे स्थितः ॥ १९ ॥
अरिष्टो बलिपुत्रस्तु वरिष्ठाद्रिशिलायुधः ।
युद्धायाभिमुखस्तस्थौ धराधरविकम्पनः ॥ २० ॥
किशोरस्त्वभिसंहर्षात् किशोर इति चोदितः ।
सबला दानवाश्चैव सन्नह्यन्ति यथाक्रमम् ॥ २१ ॥
अभवद्दैत्यसैन्यस्य मध्ये रविरिवोदितः ।
लम्बस्तु नवमेघाभः प्रलम्बाम्बरभूषणः ॥ २२ ॥
दैत्यव्यूहगतो भाति सनीहार इवांशुमान् ।
स्वर्भानुरास्ययोधी तु दशनौष्ठेक्षणायुधः ॥ २२ ॥
हसंस्तिष्ठति दैत्यानां प्रमुखे स महाग्रहः ।
अन्ये हयगतास्तत्र गजस्कन्धगताः परे ॥ २४ ॥
सिंहव्याघ्रगताश्चान्ये वराहर्क्षेषु चापरे ।
केचित् खरोष्ट्रयातारः केचिच्छ्वापदवाहनाः ॥ २५ ॥
पत्तिनस्त्वपरे दैत्या भीषणा विकृताननाः ।

एकपादा द्विपादाश्च ननृतुर्युद्धकाङ्क्षिणः ॥ २६ ॥
आस्फोटयन्तो बहवः क्ष्वेडन्तश्च तथापरे ।
हृष्टाः शार्दूलनिर्घोषा नेदुर्दानवपुङ्गवाः ॥ २७ ॥
ते गदापरिघैरुग्रैः शिलामुषलपाणयः ।
बाहुभिः परिघाकारैस्तर्जयन्ति स्म देवताः ॥ २८ ॥
पाशैः प्रासैश्च परिघैस्तोमराङ्कुशपट्टिशैः ।
चिक्रीडुस्ते शतघ्नीभिः शतधारैश्च मुद्गरैः ॥ २९ ॥
गण्डशैलैश्च शैलैश्च परिघैश्चोत्तमायसैः ।
चक्रैश्च दैत्यप्रवराश्चक्रुरानन्दितं बलम् ॥ ३० ॥
एतद्दानवसैन्यं तत्सर्वं युद्धमदोत्कटम् ।
देवानभिमुखं तस्थौ मेघानीकमिवोद्धतम् ॥ ३१ ॥
तदद्भुतं दैत्यसहस्रगाढं वाय्वग्निशैलाम्बुदतोयकल्पम् ।
बलं रणौघाभ्युदयेऽभ्युदीर्णं युयुत्सयोन्मत्तमिवावभासे ॥ ३२ ॥

---

अथ त्रिसप्तत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । श्रुतस्ते दैत्यसैन्यस्य विस्तरो रविनन्दन ! ।
सुराणामपि सैन्यस्य विस्तरं वैष्णवं शृणु ॥ १ ॥
आदित्या वसवो रुद्रा अश्विनौ च महाबलौ ।
सबलाः सानुगाश्चैव सन्नह्यन्त यथाक्रमम् ॥ २ ॥
पुरुहूतस्तु पुरतो लोकपालः सहस्रदृक् ।
ग्रामणीः सर्वदेवानामारुरोह सुरद्विपम् ॥ ३ ॥
मध्ये चास्य रथः सर्वपक्षिप्रवररंहसः ।

सुचारुचक्रचरणो हेमवज्रपरिष्कृतः ॥ ४ ॥
देवगन्धर्वयक्षौघैरनुयातः सहस्रशः ।
दीप्तिमद्भिः सदस्यैश्च ब्रह्मर्षिभिरभिष्टुतः ॥ ५ ॥
वज्रविस्फूर्जितोद्भूतैर्विद्युदिन्द्रायुधोदितैः ।
युक्तो बलाहकगणैः पर्वतैरिव कामगैः ॥ ६ ॥
यमारूढः स भगवान् पर्येति सकलं जगत् ।
हविर्धानेषु गायन्ति विप्रा मखमुखे स्थिताः ॥ ७ ॥
स्वर्गे शक्रानुयातेषु देवतूर्यनिनादिषु ।
सुन्दर्यः परिनृत्यन्ति शतशोऽप्सरसाङ्गणे ॥ ८ ॥
केतुना नागराजेन राजमानो यथा रविः ।
युक्तो हयसहस्रेण मनो मारुतरंहसा ॥ ९ ॥
सस्यन्दनवरो भाति शुभो मातलिना तदा ।
कृत्स्नः परिवृतो मेरुर्भास्करस्येव तेजसा ॥ १० ॥
यमस्तु दण्डमुद्यम्य कालयुक्तश्च मुद्गरम् ।
तस्थौ सुरगणानीके दैत्यान्नादेन भीषयन् ॥ ११ ॥
चतुर्भिः सागरैर्युक्तो लेलिहानैश्च पन्नगैः ।
शङ्खमुक्ताङ्गदधरो बिभ्रत्तोयमयं वपुः ॥ १२ ॥
कालपाशान् समाविध्यन् हयैः शशिकरोपमैः ।
वायोरितैर्जलाकारैः कुर्वन् लीलाः सहस्रशः ॥ १३ ॥
पाण्डुरोद्धूतवसनः प्रचलन् रुचिराङ्गदः ।
मणिश्यामोत्तमवपुर्हरिभारार्पितोवरः ॥ १४ ॥
वरुणः पाशधृङ्मध्ये देवानीकस्य तस्थिवान् ।
युद्धवेलामभिलषन् भिन्नवेल इवार्णवः ॥ १५ ॥
यक्षराक्षससैन्येन गुह्यकानां गणैरपि ।

युक्तश्च शङ्खपद्माभ्यां निधीनामधिपः प्रभुः ॥ १६ ॥
राजराजेश्वरः श्रीमान् गदापाणिरदृश्यत ।
विमानयोधी धनदो विमाने पुष्पके स्थितः ॥ १७ ॥
स राजराजः शुशुभे युद्धार्थी नरवाहनः ।
उक्षाण मास्थितः संख्ये साक्षादिव शिवः स्वयम् ॥ १८ ॥
पूर्वपक्षः सहस्राक्षः पितृराजस्तु दक्षिणः ।
वरुणः पश्चिमं पक्ष मुत्तरं नरवाहनः ॥ १९ ॥
चतुर्षु युक्तास्त्वारो लोकपाला महाबलाः ।
स्वासु दिक्षु स्वरक्षन्त तस्य देवबलस्य ते ॥ २० ॥
सूर्यः सप्ताश्वयुक्तेन रथेनामितगामिना ।
श्रिया जाज्वल्यमानेन दीप्यमानश्च रश्मिभिः ॥ २१ ॥
उदयास्तगचक्रेण मेरुपर्वतगामिना ।
त्रिदिवद्वारचक्रेण तपता लोकमव्ययम् ॥ २२ ॥
सहस्ररश्मियुक्तेन भ्राजमानेन तेजसा ।
चचार मध्ये लोकानां द्वादशात्मा दिनेश्वरः ॥ २३ ॥
सोमः श्वेतहये भाति स्यन्दने शीतरश्मिवान् ।
हिमवत्तोयपूर्णाभिर्भाभिराह्लादयन् जगत् ॥ २४ ॥
तमृक्षपूगानुगतं शिशिरांशुं द्विजेश्वरम् ।
शशच्छायाहिततनुं नैशस्य तमसः क्षयम् ॥ २५ ॥
ज्योतिषामीश्वरं व्योम्नि रसानां रसदं प्रभुम् ।
ओषधीनां सहस्राणां निधान ममृतस्य च ॥ २६ ॥
जगतः प्रथमं भागं सौम्यं सत्त्वमयं रथम् ।
ददृशुर्दानवाः सोमं हिमप्रहरणं स्थितम् ॥ २७ ॥
यः प्राणः सर्वभूतानां पञ्चधा भिद्यते नृप ।

संप्तधातुगतो लोकां स्त्रीन्धार चचार च॥ २८॥
यमाहुर्ग्निकर्तारं सर्वप्रभवमीश्वरम्।
सप्तस्वरंगतोयश्च नित्यङ्गीर्भिरुदीर्यते॥ २९॥
यं वदन्त्युत्तमंभूतं यं वदन्त्यशरीरिणम्।
यमाहुः कारणगणं शीघ्रगंगत्योगिनम्॥ ३०॥
स वायुः सर्वभूतायु रुद्धूतः स्वेन तेजसा।
ववौ प्रच्यावयन् दैत्यान् प्रतिलोमं स तोयदः॥ ३१॥
मरुतो दिव्यगन्धर्वै विद्याधरगणैः सह।
चिक्रीडुरसिभिः शुभ्रैर्निर्मुक्तै रिव पन्नगैः॥ ३२॥
सृजन्तः सर्पपतयस्तीव्रतोयमयं विषम्।
शरभूता दिवोन्द्राणाञ्चेरुर्व्यात्ताननाः दिवि॥ ३३॥
पर्वतैश्च शिलाशृङ्गैः शतशश्च पादपैः।
उपतस्थुः सुरगणाः प्रहर्तुं दानवे बले॥ ३४॥
यः सर्वलोकरूपोऽङ्गिरः पद्मनाभस्त्रिविक्रमः।
युगान्ते ह्यर्णवगामी विसृज्य जगतः प्रभुः॥ ३५॥
सर्वयोनिः स मधुहा हव्यभुक् क्रतुसंस्थितः।
भूम्यपोव्योमभूतात्मा श्यामः शान्तिकरोऽरिहा॥ ३६॥
अर्चिश्च समरादौनाञ्चक्रं गृह्य गदाधरः।
अर्कं सहादिवोद्यन्तं सुदर्शनोत्तमतेजसा॥ ३७॥
सव्येनालम्ब्य महतीं सर्वासुरविनाशिनीम्।
करेण कालीं वपुषा शत्रुकालप्रदाङ्गदाम्॥ ३८॥
अन्यै र्भुजैः प्रदीप्ताभैर्भुजगारिध्वजः प्रभुः।
दधारायुधजातानि शार्ङ्गादीनि महाबलः॥ ३९॥
सकश्यपस्यात्मभुवन्द्विजं भुजगभोजनम्।

पवनाधिकसम्पातं गगनक्षोभणं खरम् ॥ ४० ॥
भुजगेन्द्रेण वदने निविष्टेन विराजितम् ।
अमृतारम्भनिर्मुक्तं मन्दराद्रिपरिष्कृतम् ॥ ४१ ॥
देवासुरविमर्देषु बहुशोदृष्टविक्रमम् ।
महेन्द्रेणामृतस्यार्थे वज्रेण कृतलक्षणम् ॥ ४२ ॥
शिखिनं वलिनञ्चैव ज्वलत्कुण्डलभूषणम् ।
विचित्रपत्रवसनं धातुमन्तमिवाचलम् ॥ ४३ ॥
स्फीतक्रोडावलम्बेन शीतांशुसमतेजसा ।
भोगिभोगावसक्तेन मणिरत्नेन भास्वता ॥ ४४ ॥
पक्षाभ्यां चारुपत्राभ्यामावृत्य दिवि लीलया ।
युगान्ते सेन्द्रचापाभ्यां तोयदाभ्यामिवाम्बरम् ॥ ४५ ॥
नीललोहितपीताभिः पताकाभिरलङ्कृतम् ।
केतुवेषप्रतिच्छन्नं महाकायनिकेतनम् ॥ ४६ ॥
अरुणावरजं श्रीमानारुह्य समरे विभुः ।
सुवर्णस्वर्णवपुषा सुपर्णं खेचरोत्तमम् ॥ ४७ ॥
तमन्वयुर्देवगणा मुनयश्च समाहिताः ।
गीर्भिः परममन्त्राभिस्तुष्टुवुश्च जनार्दनम् ॥ ४८ ॥
तद्वैश्रवणसंश्लिष्टं वैवस्वतपुरःसरम् ।
द्विजराजपरिक्षिप्तं देवराजविराजितम् ॥ ४९ ॥
चन्द्रप्रभाभिर्विपुलं युद्धाय समवर्तत ।
स्वस्त्यस्तु देवेभ्य इति बृहस्पतिरभाषत ।
स्वस्त्यस्तु दानवानीके उशना वाक्यमाददे ॥

---

## अथ चतुःसप्तत्यधिकशततमोऽध्यायः ।

---

मत्स्य उवाच । ताभ्यां बलाभ्यां संजज्ञे तुमुलोविग्रहस्तदा ।
सुराणामसुराणाञ्च परस्परजयैषिणाम् । ॥ १ ॥
दानवा दैवतैः सार्द्धं नानाप्रहरणोद्यताः ।
समीयुर्युध्यमाना वै पर्वता इव पर्वतैः ॥ २ ॥
तत् सुरासुरसंयुक्तं युद्धमत्यद्भुतं बभौ ।
धर्माधर्मसमायुक्तं दर्पेण विनयेन च ॥ ३ ॥
ततो रथैर्विप्रयुक्तैर्वारणैश्च प्रचोदितैः ।
उत्पतद्भिश्च गगनमसिहस्तैः समन्ततः ॥ ४ ॥
क्षिप्यमाणैश्च मुसलैः सम्पतद्भिश्च सायकैः ।
चापैर्विस्फार्यमाणैश्च पात्यमानैश्च मुद्गरैः ॥ ५ ॥
तद्युद्धमभवद्घोरं देवदानवसङ्कुलम् ।
जगतस्त्रासजननं युगसंवर्तकोपमम् ॥ ६ ॥
हस्तमुक्तैश्च परिघैर्विप्रयुक्तैश्च पर्वतैः ।
दानवाः समरे जघ्नुर्देवानिन्द्रपुरोगमान् ॥ ७ ॥
ते बध्यमाना बलिभिर्दानवैर्जयकाङ्क्षिभिः ।
विषण्णवदना देवा जग्मुरार्तिं परां मृधे ॥ ८ ॥
तेऽस्त्रशूलप्रमथिताः परिघैर्भिन्नमस्तकाः ।
भिन्नोरस्का दितिसुतैर्वमूरक्तं व्रणैर्बहु ॥ ९ ॥
वेष्टिताः शरजालैश्च निर्यत्नाश्चासुरैः कृताः ।

प्रविष्टा दानवीं मायान्न शेकुस्ते विचेष्टितुम् ॥ १० ॥
अचलं गतमिवाभाति निष्प्राणमहृगाकृति ।
बलं सुराणामसुरैर्निष्प्रयत्नायुधं कृतम् ॥ ११ ॥
इत्यचापच्युतान् घोरांश्छित्वा वज्रेण तांश्शरान् ।
शक्रो दैत्यबलं घोरं विवेश बहुलोचनः ॥ १२ ॥
स दैत्यप्रमुखान् हत्वा तद्दानवबलं महत् ।
तामसेनास्त्रजालेन तमोभूतमथाकरोत् ॥ १३ ॥
तेऽन्योन्यं नावबध्यन्त देवानां वाहनानि च ।
घोरेण तमसाविष्टाः पुरुहूतस्य तेजसा ॥ १४ ॥
मायापाशैर्विमुक्तास्ते यत्नवन्तः सुरोत्तमाः ।
वपूंषि दैत्यसिंहानां तमोभूतान्यपातयन् ॥ १५ ॥
अपध्वस्ता विसंज्ञाय तमसा नीलवर्चसा ।
पेतुस्ते दानवगणाश्छिन्नपक्षा इवाद्रयः ॥ १६ ॥
तद्घनीभूतदैत्येन्द्रमन्धकारमिवार्णवे ।
दानवं देवकदनं तमोभूतमिवाभवत् ॥ १७ ॥
तदासृजन्महामायां मयस्तां तामसोन्दहन् ।
युगान्तोद्योतजननीं सृष्टां मौर्वेण वह्निना ॥ १८ ॥
सा ददाह ततः सर्वान् मायामयविकल्पिता ।
दैत्याश्चादित्यवपुषः सद्य उत्तस्थुराहवे ॥ १९ ॥
मायामौर्वीं समासाद्य दह्यमाना दिवौकसः ।
भेजिरे चन्द्रविषयं शीतांशुं सलिलप्रदम् ॥ २० ॥
ते दह्यमाना और्वेण वह्निना नष्टचेतसः ।
शशंसुर्वज्रिणो देवाः सन्तप्ताः शरणैषिणः ॥ २१ ॥
सन्तप्ते मायया सैन्ये हन्यमाने च दानवैः ।

चोदितो देवराजेन वरुणो वाक्यमब्रवीत् ॥ २२ ॥
औवों ब्रह्मर्षिजः शक्र ! तपस्तेपे सुदारुणम्।
औवः स पूर्वतेजस्वी सदृशो ब्रह्मणो गुणैः ॥ २३ ॥
तं तपन्तमिवादित्यं तपसा जगदव्ययम्।
उपतस्थुर्मुनिगणा दिव्या देवर्षिभिः सह ॥ २४ ॥
हिरण्यकशिपुश्चैव दानवो दानवेश्वरः।
ऋषिं विज्ञापयामासुः पुरा परमतेजसम् ॥ २५ ॥
ऊचुर्ब्रह्मर्षयस्तं तु वचनं धर्म्मसंहितम्।
ऋषिवंशेषु भगवंश्छिन्नमूलमिदं पदम् ॥ २६ ॥
एकस्त्वमनपत्यश्च गोत्रायान्यो न वर्त्तते।
कौमारं व्रतमास्थाय क्लेशमेवानुवर्त्तसे ॥ २७ ॥
बहूनि विप्र ! गोत्राणि मुनीनां भावितात्मनाम्।
एकदेहानि तिष्ठन्ति विविक्तानि विना प्रजाः ॥२८॥
एवमुच्छिन्नमूलेषु पुत्रैर्नो नास्ति कारणम्।
भवांस्तु तपसा श्रेष्ठो प्रजापतिसमद्युतिः ॥ २९ ॥
तत्र वर्त्तस्व वंशाय वर्धयात्मानमात्मना।
त्वया धर्मोऽर्जितस्तेन द्वितीयाङ्कुरु वै तनुम् ॥ ३० ॥
स एवमुक्तो मुनिभिर्ह्यौर्वोमर्मसु ताडितः।
जगर्हे तान् ऋषिगणान् वचनं चेदमब्रवीत् ॥ ३१॥
यथायं विहितो धर्मो मुनीनां शाश्वतस्तु सः।
आर्षं वै सेवतः कर्म्म वन्यमूलफलाशिनः ॥ ३२ ॥
ब्रह्मयोनौ प्रसूतस्य ब्राह्मणस्यात्मदर्शिनः।
ब्रह्मचर्यं सुचरितं ब्रह्माणमपि चालयेत् ॥ ३३ ॥
जनानां वृत्तय स्तिस्रो यद्गृहाश्रमवासिनाम्।

अस्माकन्तु वरं वृत्तिर्वनाश्रमनिवासिनाम् ॥ ३४ ॥
अब्भक्षा वायुभक्षाश्च दन्तोलूखलिनस्तथा ।
अश्मकुट्टाश्च तथा पञ्चातपसहाश्च ये ॥ ३५ ॥
एते तपसि तिष्ठन्ति व्रतैरपि सुदुष्करैः ।
ब्रह्मचर्यं पुरस्कृत्य प्रार्थयन्ति पराङ्गतिम् ॥ ३६ ॥
ब्रह्मचर्याद् ब्राह्मणस्य ब्राह्मणत्वं विधीयते ।
एवमाहुः परे लोके ब्रह्मचर्यविदो जनाः ॥ ३७ ॥
ब्रह्मचर्ये स्थितं धैर्यं ब्रह्मचर्ये स्थितं तपः ।
ये स्थिता ब्रह्मचर्येषु ब्राह्मणा दिवि संस्थिताः ॥ ३८ ॥
नास्ति योगं विना सिद्धिर्न वा सिद्धिं विना यशः ।
नास्ति लोके यशो मूलं ब्रह्मचर्यात् परन्तपः ॥ ३९ ॥
यो निगृह्येन्द्रियग्रामं भूतग्रामं च पञ्चकम् ।
ब्रह्मचर्यं समाधत्ते किमतः परमं तपः ॥ ४० ॥
अयोगे केशधरणमसङ्कल्पव्रतक्रिया ।
अब्रह्मचर्ये चर्या च त्रयं स्याद् दम्भसंज्ञकम् ॥ ४१ ॥
क्व दाराः क्व च संयोगः क्व च भावविपर्ययः ।
नन्वियं ब्रह्मणा सृष्टा मनसा मानसी प्रजा ॥ ४२ ॥
यद्यस्ति तपसो वीर्यं युष्माकं विदितात्मनाम् ।
सृजध्वं मानसान् पुत्रान् प्राजापत्येन कर्मणा ॥ ४३ ॥
मनसा निर्मिता योनिराधातव्या तपस्विभिः ।
न दारयोगो बीजं वा व्रत मुक्तं तपस्विनाम् ॥ ४४ ॥
यदिदं लुप्तधर्मार्थं युष्माभिरिह निर्भयैः ।
व्याहृतं सद्भिरत्यर्थमसद्भिरिव मे मतम् ॥ ४५ ॥
वपुर्दीप्तान्तरात्मानमेतत् कृत्वा मनोमयम् ।

दारयोगं विना स्रक्ष्ये पुत्रमात्मतनूरुहम् ॥ ४६ ॥
एवमात्मान मात्मा मे द्वितीयं जनयिष्यति।
वन्येनानेन विधिना दिधक्षन्त मिव प्रजाः ॥ ४७॥
और्वस्तु तपसाविष्टो निवेश्योरुं हुताशने।
ममन्थैकेन दर्भेण सुतस्य प्रभवारणिम् ॥ ४८ ॥
तस्योरुं सहसा भित्वा ज्वालामाली ह्यनिन्धनः।
जगतो दहनाकाङ्क्षी पुत्रोऽग्निः समपद्यत ॥ ४९ ॥
ऊर्वस्योरुं विनिर्भिद्य और्वो नामान्तकोऽनलः।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः ॥ ५० ॥
उत्पन्नमात्रश्चोवाच पितरं दीनया गिरा।
क्षुधा मे बाधते तात! जगद्भक्ष्ये त्यजस्व माम् ॥ ५१ ॥
त्रिदिवारोहिभि र्ज्वालैर्जृम्भमाणो दिशोदश।
निर्दहन् सर्वभूतानि ववृधे सोऽन्तकोऽनलः ॥ ५२ ॥
एतस्मिन्नन्तरे ब्रह्मा मुनिमूर्वं सभाजयन्।
उवाच वार्यतां पुत्रो जगतश्च दयाङ्कुरु ॥ ५३ ॥
अस्यापत्यस्य ते विप्र! करिष्ये स्थान मुत्तमम्।
तथ्यमेतद्वचः पुत्र! शृणु त्वं वदतांवर! ॥ ५४ ॥
ऊर्व उवाच। धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवांश्छिशोः।
मतिमेतां ददातीह परमानुग्रहाय वै ॥ ५५ ॥
प्रभातकाले संप्राप्ते काङ्क्षितव्ये समागमे।
भगवन्! तर्पितः पुत्रः कैर्हव्यैः प्राप्स्यते सुखम् ॥५६ ॥
कुत्र चास्य निवासः स्याद्भोजनं वा किमात्मकम्।
विधास्यतीह भगवान् वीर्यतुल्यं महौजसः ॥ ५७ ॥
[ब्रह्मो]वाच। वडवामुखेऽस्य वसतिः समुद्रे वै भविष्यति।

मम योनिर्जलं विप्र ! तस्य पीतवतः सुखम् ॥ ५८ ॥
यत्राहमास नियतं पिबन् वारिमयं हविः ।
तदयिमेव पुत्रस्य विद्धजाल्मालयस्य तत् ॥ ५९ ॥
ततो युगान्ते भूतानामेव चाहञ्च पुत्रक ! ।
सहितो विश्वरिष्यावो निष्पुत्राणां कृपापहः ॥ ६० ॥
एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः ।
दहनः सर्वभूतानां सदेवासुररक्षसाम् ॥ ६१ ॥
एवमस्त्विति तं सोऽग्निः संहृतज्वालमण्डलः ।
प्रविवेशार्णवमुखं प्रक्षिप्य पितरि प्रभाम् ॥ ६२ ॥
प्रतियातस्ततो ब्रह्मा ये च सर्वे महर्षयः ।
और्वस्याग्नेः प्रभां ज्ञात्वा स्वां स्वां गतिमुपाश्रिताः ॥ ६३
हिरण्यकशिपुर्दृष्ट्वा तदा तन्महदद्भुतम् ।
और्वः प्रणतसर्वाङ्गो वाक्यमेतदुवाच ह ॥ ६४ ॥
भगवन्नद्भुतमिदं संवृत्तं लोकसाक्षिकम् ।
तपसा ते मुनिश्रेष्ठ ! परितुष्टः पितामहः ॥ ६५ ॥
अहन्तु तव पुत्रस्य तव चैव महाव्रत ! ।
भृत्य इत्यवगन्तव्यः साध्यो यदिह कर्मणा ॥ ६६ ॥
तन्मां पश्य समापन्नं तवैवाराधने रतम् ।
यदि सीदे मुनिश्रेष्ठ ! तवैव स्यात् पराजयः ॥ ६७ ॥
[और्व उ]वाच । धन्योऽस्म्यनुगृहीतोऽस्मि यस्य तेऽहं गुरुः स्मृतः ।
नास्ति मे तपसानेन भयमद्येह सुव्रत ! ॥ ६८ ॥
तामिव मायां गृह्णीष्व मम पुत्रेण निर्मिताम् ।
निरिन्धनामग्निमयीं दुर्धर्षां पावकैरपि ॥ ६९ ॥
[ए]षा ते स्वस्य वंशस्य वशगारिविनिग्रहे ।

संरक्षत्यात्मपक्षञ्च [redacted]
एवमस्त्विति तां शक्र [redacted]
जगाम त्रिदिवं हृष्टः कृता[redacted]
एषा दुर्विषहा माया देवैरपि [redacted]।
और्वेण निर्मिता पूर्वं पावकेनो[redacted]
तस्मिंस्तु व्युत्थिते दैत्ये निर्वीर्य्ये [redacted]
शापोह्यस्याः पुरा दत्तो स्रष्टा येनैव [redacted]
यद्येषा प्रतिहन्तव्या कर्त्तव्यो भगवान् [redacted]।
दीयतां मे सखा शक्र! तोययोनि निशाकर[redacted]
तेनाहं सह सङ्गम्य यादोभिश्च समावृतः।
मायामेतां हनिष्यामि त्वत्प्रसादान्न संशयः॥ ७५॥

---

अथ पञ्चसप्तत्यधिकशततमोऽध्यायः।

मत्स्य उवाच। एवमस्त्विति संहृष्टः शक्रस्त्रिदशवर्धनः।
सन्दिदेशाग्रतः सोमं युद्धाय शिशिरायुधम्॥ १॥
गच्छ सोम! सहायत्वं कुरु पाशधरस्य व।
असुराणां विनाशाय जयार्थञ्च दिवौकसाम्॥ २॥
त्वं मत्तः प्रतिवीर्य्यश्च ज्योतिषाञ्चेश्वरेश्वरः।
त्वन्मयं सर्वलोकेषु रसं रसविदो विदुः॥ ३॥
क्षयवृद्धी तव व्यक्ते सागरस्येव मण्डले।
परिवर्तस्यहोरात्रं कालं जगति योजयन्॥ ४॥
लोकच्छायामयः लक्ष्म तवाङ्कः शशसन्निभः।
न विदुः सोमदेवापि ये च नक्षत्रयोनयः॥ ५॥

त्वमादित्यपथादूर्ध्वं ज्योतिषां चोपरि स्थितः।
तमः प्रोत्सार्य्य सहसा भासयस्यखिलं जगत् ॥ ६ ॥
अभिकृत् कालयोगात्मा इष्टोयज्ञश्च सोऽव्ययः।
ओषधीशः क्रियायोनिरब्जयोनि रनुष्णभाः ॥ ७ ॥
शीतांशुरमृताधारश्चपलः श्वेतवाहनः।
त्वं कान्तिः कान्तिवपुषान्त्वं सोमः सोमपायिनाम्॥८
सौम्यस्त्वं सर्वभूतानां तिमिरघ्नस्त्व मृक्षराट्।
तद्गच्छ त्वं महासेन ! वरुणेन वरूथिना।
शमयत्वासुरीं मायां यया दह्याम संयुगे ॥ ६ ॥
सोम उवाच। यन्मां वदसि युद्धार्थे देवराज ! वरप्रद !।
एव वर्षामि शिशिरन्दैत्यमायापकर्षणम् ॥ १० ॥
एतान् मच्छीतनिर्दग्धान् पश्य स्वहिमवेष्टितान्।
विमायान् विमदांश्चैव दैत्यसिंहान्महाहवे ॥ ११ ॥
तेषां हिमकरोत् सृष्टाः सपाशा हिमवृष्टयः।
वेष्टयन्तिस्म तान् घोरान् दैत्यान्मेघगणा इव ॥१२॥
तौ पाशशीतांशुधरौ वरुणेन्दू महाबलौ।
जघ्नतुर्हिमपातैश्च पाशपातैश्च दानवान् ॥ १३ ॥
द्वावम्बुनाथौ समरे तौ पाश हिमयोधिनौ।
मृधेचेरतुरम्भोभिःक्षुब्धाविव महार्णवौ ॥ १४ ॥
ताभ्यामाप्लावितं सैन्यं तद्दानवमदृश्यत।
जगत संवर्तकाम्भोदैः प्रविष्टैरिव संवृतम् ॥ १५ ॥
तावुद्यताम्बुनाथौ तु शशाङ्क वरुणा वुभौ।
शमयामासतुर्मायां देवौ दैत्येन्द्र निर्मिताम् ॥ १६॥
शीतांशुजालनिर्दग्धाः पाशैश्च स्पन्दिता रणे।

न शेकुश्चलितुं दैत्या विशिरस्का इवाद्रयः ॥ १७ ॥
शीतांशुनिहतास्ते तु दैत्यास्तोयहिमार्द्दिताः।
हिमाप्लावितसर्वाङ्गा निरुष्माण इवाग्नयः ॥ १८ ॥
तेषान्तु दिवि दैत्यानां विपरीतप्रभाणि वै।
विमानानि विचित्राणि प्रपतन्त्युत्पतन्ति च ॥ १९ ॥
तान् पाशहस्तग्रथितांश्छादितांश्शीतरश्मिभिः।
मयो ददर्श मायावी दानवान् दिवि दानवः ॥ २० ॥
स शिलाजालविततां खड्गचर्माट्टहासिनीम्।
पादपोत्कटकूटाग्रां कन्दराकीर्णकाननाम् ॥ २१ ॥
सिंहव्याघ्रगणाकीर्णां नदद्भिर्गजयूथपैः।
ईहामृगगणाकीर्णां पवनाघूर्णितद्रुमाम् ॥ २२ ॥
निर्म्मितां स्वेन यत्नेन कूजितां दिवि कामगाम्।
प्रथितां पार्व्वतीं मायामसृजत् स समन्ततः ॥ २३ ॥
सासिशब्दैः शिलावर्षैः सम्पतद्भिश्च पादपैः।
जघान देवसङ्घांश्च दानवांश्चाप्यजीवयत् ॥ २४ ॥
नैशाकरी वारुणी च मायेऽन्तर्दधतुस्ततः।
असिभिश्चायसगणैः किरन् देवगणान् रणे ॥ २५ ॥
साश्मयन्त्रायुधघना द्रुमपर्व्वतसङ्कटा।
अभवत् घोरसञ्चार्या पृथिवी पर्व्वतैरिव ॥ २६ ॥
अश्मना प्रहताः केचित् शिलाभिः शकलीकृताः।
नानिरुद्धो द्रुमगणैर्देवोऽदृश्यत कश्चन ॥ २७ ॥
तदपध्वस्तधनुषं भग्नप्रहरणाविलम्।
निष्प्रयत्नं सुरानीकं वर्जयित्वा गदाधरम् ॥ २८ ॥
स हि युद्धगतः श्रीमानीशानोऽश्म व्यकम्पत।

सहिष्णुत्वात् जगत्स्वामी न चुक्रोध गदाधरः ॥२९॥
कालघ्नः कालमेघाभः समीक्षन् कालमाहवे ।
देवासुरविमर्दन्तु द्रष्टुकामस्तदा हरिः ॥ ३० ॥
ततो भगवता दृष्टौ रणे पावकमारुतौ ।
चोदितौ विष्णुवाक्येन तौ मायामपकर्षताम् ॥ ३१ ॥
ताभ्यामुद्भ्रान्तवेगाभ्यां प्रवृद्धाभ्यां महाहवे ।
दग्धा सा पार्वती माया भस्मीभूता ननाश ह ॥३२॥
सोऽनिलोऽनलसंयुक्तः सोऽनलश्चानिलाकुलः ।
दैत्यसेनाम्ददहतुर्युगान्तेष्विव मूर्च्छितौ ॥ ३३ ॥
वायुः प्रधावितस्तत्र पश्चादग्निस्तु मारुतम् ।
चेरतुर्दानवानीके क्रीडन्तावनिलानलौ ॥ ३४ ॥
भस्मावयवभूतेषु प्रपतत्सूत्पतत्सु च ।
दानवानां विमानेषु निपतत्सु समन्ततः ॥ ३५ ॥
वातस्कन्धापविद्धेषु कृतकर्म्मणि पावके ।
मया बधे निवृत्ते तु स्तूयमाने गदाधरे ॥ ३६ ॥
निष्प्रयत्नेषु दैत्येषु त्रैलोक्ये मुक्तबन्धने ।
संप्रहृष्टेषु देवेषु साधु साध्विति सर्वशः ॥ ३७ ॥
जये दशशताक्षस्य दैत्यानां च पराजये ।
दिक्षु सर्वासु शुद्धासु प्रवृत्ते धर्म्मविस्तरे ॥ ३८ ॥
अपावृते चन्द्रमसि स्वस्थानस्थे दिवाकरे ।
प्रकृतिस्थेषु लोकेषु त्रिषु चारित्रबन्धुषु ॥ ३९ ॥
यजमानेषु भूतेषु प्रशान्तेषु च पाप्मसु ।
अभिन्नबन्धने मृत्यौ हूयमाने हुताशने ॥ ४० ॥
यज्ञशोभिषु देवेषु स्वर्गार्थं दर्शयत्सु च ।

लोकपालेषु सर्वेषु दिक्षु संयानवर्त्तिषु ॥ ४१ ॥
भावे तपसि सिद्धानामभावे पापकर्म्मणाम्।
देवपक्षे प्रमुदिते दैत्यपक्षे विषीदति ॥ ४२ ॥
त्रिपादविग्रहे धर्म्मे अधर्म्मे पादविग्रहे।
अपावृत्ते महाद्वारे वर्त्तमाने च सत्पथे ॥ ४३ ॥
लोके प्रवृत्ते धर्म्मेषु सुधर्म्मेष्वाश्रमेषु च।
प्रजारक्षणयुक्तेषु भ्राजमानेषु राजसु ॥ ४४ ॥
प्रशान्तकल्मषे लोके शान्ते तमसि दानवे।
अग्निमारुतयोस्तत्र वृत्ते संग्रामकर्म्मणि ॥ ४५ ॥
तन्मया विपुला लोकास्ताभ्यां तज्जयकृत् क्रिया।
पूर्व्वदेवभयं श्रुत्वा मारुताग्निकृतं महत् ॥ ४६ ॥
कालनेमीति विख्यातो दानवः प्रत्यदृश्यत।
भास्कराकारमुकुटः शिञ्जिताभरणाङ्गदः ॥ ४७ ॥
बाहुभिस्तुलयन् व्योम क्षिपन् पद्भ्यां महीधरान्।
ईरयन्मुखनिश्वासैर्वृष्टियुक्तान् बलाहकान् ॥ ४८ ॥
तिर्य्यगायतरक्ताक्षं मन्दरोदग्रवर्चसम्।
दिधक्षन्तमिवायान्तं सर्व्वान् देवगणान् मृधे ॥४९ ॥
तर्ज्जयन्तं सुरगणांश्छादयन्तं दिशो दश।
संवर्त्तकाले तृषितं दृष्टं मृत्युमिवोत्थितम् ॥ ५० ॥
सुतलेनोच्छ्रयवता विपुलाङ्गुलिपर्व्वणा।
लम्बाभरणपूर्णेन किञ्चिच्चलितकर्म्मणा ॥ ५१ ॥
उच्छ्रितेनाग्रहस्तेन दक्षिणेन वपुष्मता।
दानवान् देवनिहतानुत्तिष्ठध्वमिति ब्रुवन् ॥ ५२ ॥
तं कालनेमिं समरे द्विषतां कालचेष्टितम्।

वीक्षन्ते स्म सुराः सर्वे भयवित्रस्तलोचनाः ॥ ५३ ॥
तं वीक्षन्ति स्म भूतानि क्रमन्तं कालनेमिनम् ।
त्रिविक्रमाधिक्रमतं नारायणमिवापरम् ॥ ५४ ॥
सोऽत्युच्छ्रयपुरः पादमारुता घूर्णिताम्बरः ।
प्रक्रामन्नसुरो युद्धे त्रासयामास देवताः ॥ ५५ ॥
समयेनासुरेन्द्रेण परिष्वक्तस्ततो रणे ।
कालनेमिर्बभौ दैत्यः सविष्णुरिव मन्दरः ॥ ५६ ॥
अथ विव्यथिरे देवाः सर्वे शक्रपुरोगमाः ।
कालनेमिं समायान्तं दृष्ट्वा कालमिवापरम् ॥ ५७ ॥

---

अथ षट्सप्तत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । दानवानामनीकेषु कालनेमिर्महासुरः ।
विवर्द्धितमहातेजा स्तपान्ते जलदो यथा ॥ १ ॥
तं त्रैलोक्यान्तरगतं दृष्ट्वा ते दानवेश्वराः ।
उत्तस्थुरपरिश्रान्ताः पीत्वामृतमनुत्तमम् ॥ २ ॥
ते वीतभयसन्त्रासा मयतारपुरोगमाः ।
तारकामयसंग्रामे सततं जितकाशिनः ॥ ३ ॥
रेजुरायोधनगता दानवा युद्धकाङ्क्षिणः ।
मन्त्रमभ्यसतां तेषां व्यूहञ्च परिधावताम् ॥ ४ ॥
प्रेक्षतां चाभवत् प्रीतिर्दानवं कालनेमिनम् ।
ये तु तत्र मयस्यासन् मुख्या युद्धपुरःसराः ॥ ५ ॥
ते तु सर्वे भयन्त्यक्त्वा हृष्टा योद्धुमुपस्थिताः ।

मयस्तारो वराहश्च हयग्रीवश्च वीर्यवान् ॥ ६ ॥
विप्रचित्तिसुतः श्वेतः खरलम्बावुभावपि ।
अरिष्टो बलिपुत्रश्च किशोराख्यस्तथैव च ॥ ७ ॥
स्वर्भानुश्चामरप्रख्यो वक्त्रयोधी महासुरः ।
एतेऽस्त्रवेदिनः सर्वे सर्वे तपसि सुस्थिताः ॥ ८ ॥
दानवाः कृतिनो जग्मुः कालनेमिं तमद्भुतम् ।
ते गदाभिर्भुशुण्डीभिश्चक्रैरथ परश्वधैः ॥ ९ ॥
कालकल्पैश्च मुसलैः क्षेपणीयैश्च मुद्गरैः ।
अश्मभिश्चाद्रिसदृशैर्गण्डशैलैश्च दारुणैः ॥ १० ॥
पट्टिशैर्भिन्दिपालैश्च परिघैश्चोत्तमायसैः ।
घातनीभिः सुगुर्वीभिः शतघ्नीभिस्तथैव च ॥ ११ ॥
युगैर्यन्त्रैश्च निर्मुक्तैर्मार्गणैरुग्रताडितैः ।
दोर्भिश्चायतदीप्तैश्च प्रासैः पाशैश्च मूर्च्छनैः ॥ १२ ॥
भुजङ्गवक्त्रैर्लेलिहानैर्विसर्पद्भिश्च सायकैः ।
वज्रैः प्रहरणीयैश्च दीप्यमानैश्च तोमरैः ॥ १३ ॥
विकोशैरसिभिस्तीक्ष्णैः शूलैश्च शितनिर्मलैः ।
दैत्याः सन्दीप्तमनसः प्रगृहीतशरासनाः ॥ १४ ॥
ततः पुरस्कृत्य तदा कालनेमिं महाहवे ।
सा दीप्तशस्त्रप्रवरा दैत्यानां रुरुचे चमूः ॥ १५ ॥
द्यौर्निमीलितसर्वाङ्गा घना नीलाम्बुदागमे ।
देवतानामपि चमूर्मुमुदे शक्रपालिता ॥ १६ ॥
उपेता सितकृष्णाभ्यां ताराभ्यां चन्द्रसूर्ययोः ।
वायुवेगवती सौम्या तारागणपताकिनी ॥ १७ ॥
तोयदाविद्धवसना ग्रहनक्षत्रहासिनी ।

यमेन्द्रवरुणैर्गुप्ता धनदेन च धीमता ॥ १८ ॥
सम्प्रदीप्ताग्निनयना नारायणपरायणा ।
सा समुद्रौघसदृशी दिव्या देवमहाचमूः ॥ १९ ॥
रराजास्त्रवती भीमा यक्षगन्धर्वशालिनी ।
तयोस्तदानीन्तु बभूव स समागमः ॥ २० ॥
द्यावापृथिव्योः संयोगो यथा स्याद्युगपर्यये ।
तद्युद्धमभवत् घोरं देवदानवसङ्कुलम् ॥ २१ ॥
क्षमापराक्रमपरं दर्पस्य विनयस्य च ।
निश्चक्रमुर्बलाभ्यान्तु भीमास्तत्र सुरासुराः ॥ २२ ॥
पूर्वापराभ्यां संरब्धाः सागराभ्यामिवाम्बुदाः ।
ताभ्यां बलाभ्यां संहृष्टाश्चेरुस्ते देवदानवाः ॥ २३ ॥
वनाभ्यां पार्वतीयाभ्यां पुष्पिताभ्यां यथा गजाः ।
समाजघ्नुस्ततो भेरीः शङ्खान्दध्मुरनेकशः ॥ २४ ॥
स शब्दो द्यां भुवं खञ्च दिशश्च समपूरयत् ।
ज्याघाततलनिर्घोषो धनुषां कूजितानि च ॥ २५ ॥
दुन्दुभीनाञ्च निनदो दैत्यमन्तर्दधुः स्वनम् ।
तेऽन्योन्य मभिसम्पेतुः पातयन्तः परस्परम् ॥ २६ ॥
बभञ्जुर्बाहुभिर्बाहून् द्वन्द्वमन्ये युयुत्सवः ।
देवास्तु चाशनिं घोरं परिघांश्चोत्तमायसान् ॥ २७ ॥
निस्त्रिंशान् ससृजुः सङ्ख्ये गदा गुर्वीश्च दानवाः ।
गदानिपातैर्भग्नाङ्गा बाणैश्च शकलीकृताः ॥ २८ ॥
परिपेतुर्भृशं केचित् पुनः केचित्तु जघ्निरे ।
ततो रथैः सतुरगैर्विमानैश्चाशुगामिभिः ॥ २९ ॥
समीयुस्तस्तु संरब्धा रोषादन्योन्यमाहवे ।

संवर्तमानाः समरे सन्दष्टौष्ठपुटाननाः ॥ २० ॥
रथा रथैर्निरुध्यन्ते पादाताश्च पदातिभिः ।
तेषां रथानान्तुमुलः स शब्दः शब्दवाहिनाम् ॥ २१ ॥
सशोनभश्च हि यथा नभस्यैर्जलदस्वनैः ।
बभञ्जुस्तु रथान् केचित् केचित् सम्पाटिता रथैः ॥२२
सम्बाधमन्ये सम्प्राप्य न शेकुश्चलितुं रथान् ।
अन्योन्यमन्ये समरे दोर्भ्यामुत्क्षिप्य दंशिताः ॥ २३
संह्रादमानाभरणा जघ्नुस्तत्रापि चर्मिणः ।
अस्त्रैरन्ये विनिर्भिन्ना वेमुरक्तं हता युधि ॥ २४ ॥
क्षरज्जलानां सदृशा जलदानां समागमे ।
तैरस्त्रशस्त्रग्रथितं क्षिप्तोत्क्षिप्तगदाविलम् ॥ २५ ॥
देवदानवसंक्षुब्धं सङ्कुलं युद्धमाबभौ ।
तद्दानवमहामेघं देवायुधविराजितम् ॥ २६ ॥
अन्योन्यबाणवर्षेण युद्धदुर्दिनमाबभौ ।
एतस्मिन्नन्तरे क्रुद्धः कालनेमी स दानवः ॥ २७ ॥
व्यवर्धत समुद्रौघैः पूर्यमाण इवाम्बुदः ।
तस्य विद्युच्चलापीडैः प्रदीप्ताशनिवर्षिणः ॥ २८ ॥
गात्रैर्नागगिरिप्रख्या विनिपेतुर्बलाहकाः ।
क्रोधान्निश्वसतस्तस्य भ्रूभेदस्वेदवर्षिणः ॥ २९ ॥
साग्निस्फुलिङ्गप्रतता मुखान्निष्पेतुरर्चिषः ।
तिर्यगूर्ध्वञ्च गगने ववृधुस्तस्य बाहवः ॥ ४० ॥
पर्वतादिव निष्क्रान्ताः पञ्चास्या इव पन्नगाः ।
सोऽस्त्रजालैर्बहुविधैर्धनुर्भिः परिघैरपि ॥ ४१ ॥
दिव्यमाकाशमावव्रे पर्वतैरुच्छ्रितैरिव ।

सोऽनिलोद्धूतवसनस्तस्थौ संग्रामलालसः ॥ ४२ ॥
सन्ध्यातपग्रस्तशिलः साक्षान्मेरु रिवाचलः ।
ऊरुवेगप्रमथितैः शैलशृङ्गाग्रपादपैः ॥ ४३ ॥
अपातयत् देवगणान् वज्रेणेव महागिरीन् ।
बहुभिः शस्त्रनिस्त्रिंशैश्छिन्नभिन्नशिरोरुहाः ॥ ४४ ॥
न शेकुश्चलितुं देवाः कालनेमिहता युधि ।
मुष्टिभिर्निहताः केचित् केचित्तु विदलीकृताः ॥ ४५ ॥
यक्षगन्धर्वपतयः पेतुः सह महोरगैः ।
तेन वित्रासिता देवाः समरे कालनेमिना ॥ ४६ ॥
न शेकुर्यत्नवन्तोऽपि यत्नं कर्तुं विचेतसः ।
तेन शक्रः सहस्राक्षः स्यन्दितः शरबन्धनैः ॥ ४७ ॥
ऐरावतगतः संख्ये चलितुं न शशाक ह ।
निर्जलाम्भोदसदृशो निर्जलार्णवसप्रभः ॥ ४८ ॥
निर्व्यापारः कृतस्तेन विपाशो वरुणो मृधे ।
रणे वैश्रवणस्तेन परिघैः कामरूपिणा ॥ ४९ ॥
वित्तदोऽपि कृतः संख्ये निर्जितः कालनेमिना ।
यमः सर्वहरस्तेन मृत्युप्रहरणो रणे ॥ ५० ॥
याम्यामवस्थां सन्त्यज्य भीतः स्वां दिशमाविशत् ।
स लोकपालानुत्सार्य कृत्वा तेषाञ्च कर्म तत् ॥ ५१ ॥
दिक्षु सर्वासु देहं स्वं चतुर्धा विदधे तदा ।
स नक्षत्रपथं गत्वा दिव्यं स्वर्भानुदर्शनम् ॥ ५२ ॥
जहार लक्ष्मीं सोमस्य तं चास्य विषयं महत् ।
चालयामास दीप्तांशुं स्वर्गद्वारात् स भास्करम् ॥ ५३ ॥
सायनञ्चास्य विषयं जहार दिनकर्म च ।

सोऽग्निं देवमुखं दृष्ट्वा चकारात्ममुखाश्रयम् ॥ ५४ ॥
वायुञ्च तरसा जित्वा चकारात्मवशानुगम् ।
स समुद्रान् समानीय सर्वांश्च सरितो बलात् ॥ ५५ ॥
चकारात्ममुखे वीर्याद्देहभूतांश्च सिन्धवः ।
अपः स्ववशगाः कृत्वा दिविजा याश्च भूमिजाः ॥ ५६ ॥
स स्वयम्भुवि वा भाति महाभूतपतिर्यथा
सर्वलोकमयो दैत्यः सर्वभूतभयावहः ॥ ५७ ॥
स लोकपालैकवपुश्चन्द्रादित्यग्रहात्मवान् ।
स्थापयामास जगतीं सुगुप्तां धरणीधरैः ॥ ५८ ॥
पावकानिलसम्पातो रराज युधि दानवः ।
पारमेष्ठ्ये स्थितः स्थाने लोकानां प्रभवाप्यये ।
तं तुष्टुवुर्दैत्यगणा देवा इव पितामहम् ॥ ५९ ॥

---

## अथ सप्तसप्तत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । पञ्च तत्राभ्यवर्तन्त विपरीतेन कर्म्मणा ।
वेदो धर्म्मः क्षमा सत्यं श्रीश्च नारायणाश्रया ॥ १ ॥
स तेषामनुपस्थानात् सक्रोधो दानवेश्वरः ।
वैष्णवं पदमन्विच्छन्ययौ नारायणान्तिकम् ॥ २ ॥
स ददर्श सुपर्णस्थं शङ्खचक्रगदाधरम् ।
दानवानां विनाशाय भ्रामयन्तं गदां शुभाम् ॥ ३ ॥
सजलाम्भोदसदृशं विद्युत्सदृशवाससम् ।
स्वारूढं स्वर्णपत्राढ्यं शिखिनं काश्यपं खगम् ॥४॥

दृष्ट्वा दैत्यविनाशाय रणे स्वस्थ मवस्थितम् ।
दानवो विष्णु मक्षोभ्यं बभाषे लुब्धमानसः ॥ ५ ॥
अयं स रिपुरस्माकं पूर्वेषां प्राणनाशनः ।
अर्णवावासिनश्चैव मधोर्वै कैटभस्य च ॥ ६ ॥
अयं स विग्रहोऽस्माक मशाम्यः किल कथ्यते ।
अनेन संयुगेष्वद्य दानवा बहवो हताः ॥ ७ ॥
अयं स निर्घृणो लोके स्त्रीबालनिरपत्रपः ।
येन दानवनारीणां सीमन्तोद्धरणं कृतम् ॥ ८ ॥
अयं स विष्णुर्देवानां वैकुण्ठश्च दिवौकसाम् ।
अनन्तो भोगिनामप्सु स्वपन्नाद्यः स्वयम्भुवः ॥ ९ ॥
अयं स नाथो देवानामस्माकं व्यथितात्मनाम् ।
अस्य क्रोधं समासाद्य हिरण्यकशिपुर्हतः ॥ १० ॥
अस्य छायामुपाश्रित्य देवा मखमुखे श्रिताः ।
आज्यं महर्षिभिर्दत्त मश्नुवन्ति त्रिधा हुतम् ॥ ११ ॥
अयं स निधने हेतुः सर्वेषा ममरद्विषाम् ।
यस्य चक्रे प्रविष्टानि कुलान्यस्माक माहवे ॥ १२ ॥
अयं स किल युद्धेषु सुरार्थे त्यक्तजीवितः ।
सवितु स्तेजसा तुल्यं चक्रं क्षिपति शत्रुषु ॥ १३ ॥
अयं स कालो दैत्यानां कालभूतः समाश्रितः ।
अतिक्रान्तस्य कालस्य फलं प्राप्स्यति केशवः ॥ १४ ॥
दिष्ट्येदानीं समक्षं मे विष्णुरेष समागतः ।
अद्य मद्बाहुनिष्पिष्टो मामेव प्रणमिष्यति ॥ १५ ॥
यास्याम्यपचितिं दिष्ट्या पूर्वेषामद्य संयुगे ।
इमं नारायणं हत्वा दानवानां भयावहम् ॥ १६ ॥

क्षिप्रमेव हनिष्यामि रणेऽमरगणांस्ततः।
जात्यन्तरगतो ह्येष बाधते दानवान् मृधे ॥ १७ ॥
एषोऽनन्तः पुरा भूत्वा पद्मनाभ इति श्रुतः।
जघानैकार्णवे घोरे तावुभौ मधुकैटभौ ॥ १८ ॥
द्विधाभूतं वपुः कृत्वा सिंहस्यार्द्धं नरस्य च।
पितरं मे जघानैको हिरण्यकशिपुं पुरा ॥ १९ ॥
शुभं गर्भमधत्तैनमदितिर्देवतारणिः।
त्रीन् लोकानुज्जहारैको क्रममाणस्त्रिभिः क्रमैः ॥२० ॥
भूयस्त्विदानीं संग्रामे संप्राप्ते तारकामये।
मया सह समागम्य स देवो विनशिष्यति ॥ २१ ॥
एवमुक्ता बहुविधं चिपन्नारायणं रणे।
वाग्भिरप्रतिरूपाभिर्युद्धमेवाभ्यरोचयत् ॥ २२ ॥
क्षिप्यमाणो सुरेन्द्रेण न चुकोप गदाधरः।
क्षमाबलेन महता सस्मितं चेदमब्रवीत् ॥ २३ ॥
अल्पं दर्पबलं दैत्य! स्थिरमक्रोधजं बलम्।
हतस्त्वं दर्पजैर्दोषैर्हित्वा यद्भाषसे क्षमम् ॥ २४ ॥
अधीरस्त्वं मम मतो धिगेतत्तव वाग्बलम्।
न यत्र पुरुषाः सन्ति तत्र गर्जन्ति योषितः ॥ २५ ॥
अहं त्वां दैत्य! पश्यामि पूर्वेषां मार्गगामिनम्।
प्रजापतिकृतं सेतुं भित्वा कः स्वस्तिमान् व्रजेत् ॥२६॥
अद्य त्वां नाशयिष्यामि देवव्यापारघातकम्।
स्वेषु स्वेषु च स्थानेषु स्थापयिष्यामि देवताः ॥ २७ ॥
एवं ब्रुवति वाक्यं तु मृधे श्रीवत्सधारिणि।

जहास दानवः क्रोधाद्धस्तांश्चक्रे सहायुधान् ॥ २८ ॥
स बाहुशतमुद्यम्य सर्वास्त्रग्रहणं रणे ।
क्रोधाद्द्विगुणरक्ताक्षो विष्णुं वक्षस्यताडयत् ॥ २९ ॥
दानवाश्चापि समरे मयतारपुरोगमाः ।
उद्यतायुधनिस्त्रिंशा विष्णुमभ्यद्रवन् रणे ॥ ३० ॥
स ताड्यमानोऽतिबलैर्दैत्यैः सर्वोद्यतायुधैः ।
न चचाल ततो युद्धे कम्पमान इवाचलः ॥ ३१ ॥
संसक्तश्च सुपर्णेन कालनेमी महासुरः ।
सर्वप्राणेन महतीं गदां मुद्यम्य बाहुभिः ॥ ३२ ॥
घोरां ज्वलन्तीं मुमुचे संरब्धो गरुडोपरि ।
कर्म्मणा तेन दैत्यस्य विष्णुर्विस्मयमाविशत् ॥ ३३ ॥
यदा तेन सुपर्णस्य पातिता मूर्द्धि सा गदा ।
सुपर्णं व्यथितं दृष्ट्वा क्षतञ्च वपुरात्मनः ॥ ३४ ॥
क्रोधसंरक्तनयनो वैकुण्ठश्चक्रमाददे ।
व्यवर्द्धत स वेगेन सुपर्णेन समं विभुः ॥ ३५ ॥
भुजाश्चास्य व्यवर्द्धन्त व्याप्नुवन्तो दिशो दश ।
प्रदिशश्चैव खं गां वै पूरयामास केशवः ॥ ३६ ॥
ववृधे च पुनर्लोकान् क्रान्तुकाम इवौजसा ।
तज्जेतायासुरेन्द्राणां वर्द्धमानं नभस्तले ॥ ३७ ॥
ऋषयश्चैव गन्धर्वास्तुष्टुवुर्मधुसूदनम् ।
सर्वान् किरीटेन लिखन् साभ्रमम्बरमम्बरैः ॥ ३८ ॥
पद्भ्यामाक्रम्य वसुधां दिशः प्रच्छाद्य बाहुभिः ।
स सूर्यकरतुल्याभं सहस्रारमरिक्षयम् ॥ ३९ ॥
दीप्ताग्निसदृशं घोरं दर्शनेन सुदर्शनम् ।

सुवर्णरेणुपर्यन्तं वज्रनाभं भयापहम् ॥ ४० ॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः ।
अद्वितीयप्रहरणं क्षुरपर्यन्तमण्डलम् ॥ ४१ ॥
स्रग्दाममालाविततं कामगं कामरूपिणम् ।
स्वयं स्वयम्भुवा सृष्टं भयदं सर्वविद्विषाम् ॥ ४२ ॥
महर्षिरोषैराविष्टं नित्यमाहवदर्पितम् ।
क्षेपणाद्यस्य मुह्यन्ति लोकाः सस्थाणुजङ्गमाः ॥ ४३ ॥
क्रव्यादानि च भूतानि तृप्तिं यान्ति महामृधे ।
तदप्रतिमकर्माग्रं समानं सूर्यवर्चसा ॥ ४४ ॥
चक्रमुद्यम्य समरे क्रोधदीप्तो गदाधरः ।
समुष्णन् दानवं तेजः समरे स्वेन तेजसा ॥ ४५ ॥
चिच्छेद बाहू चक्रेण श्रीधरः कालनेमिनः ।
तच्च वक्त्रशतं घोरं साग्निपूर्णाट्टहासि वै ॥ ४६ ॥
तस्य दैत्यस्य चक्रेण प्रममाथ बलाद्धरिः ।
स च्छिन्नबाहुर्विशिरा न प्राकम्पत दानवः ॥ ४७ ॥
कबन्धोऽवस्थितः संख्ये विशाख इव पादपः ।
संवितत्य महापक्षौ वायोः कृत्वा समञ्जवम् ॥ ४८ ॥
उरसा पातयामास गरुडः कालनेमिनम् ।
स तस्य देहो विमुखो विबाहुश्च परिभ्रमन् ॥ ४९ ॥
निपपात दिवं त्यक्त्वा क्षोभयन् धरणीतलम् ।
तस्मिन्निपतिते दैत्ये देवाः सर्षिगणास्तदा ॥ ५० ॥
साधु साध्विति वैकुण्ठं समेताः प्रत्यपूजयन् ।
अपसर्पन्तु दैत्याश्च युद्धे दृष्टपराक्रमाः ॥ ५१ ॥
ते सर्वे बाहुभिर्व्याप्ता न शेकुश्चलितुं रणे ।

काँश्चित् केशेषु जग्राह काँश्चित् कण्ठेष्व पीडयन् ॥५२
चकर्ष कस्यचिद्वक्त्रं मध्येऽगृह्णादथापरम् ।
ते गदाचक्रनिर्दग्धा गतसत्वा गतासवः ॥ ५३ ॥
गगनाद्भ्रष्टसर्वाङ्गा निपेतुर्धरणीतले ।
तेषु दैत्येषु सर्वेषु हतेषु पुरुषोत्तमः ॥ ५४ ॥
तस्थौ शक्रप्रियं कृत्वा कृतकर्मा गदाधरः ।
तस्मिन् विमर्दे निर्वृत्ते संग्रामे तारकामये ॥ ५५ ॥
तं देशमाजगामाशु ब्रह्मा लोकपितामहः ।
सर्वैर्ब्रह्मर्षिभिः सार्द्धं गन्धर्वाप्सरसाङ्गणैः ॥ ५६ ॥
देवदेवो हरिं देवं पूजयन् वाक्यमब्रवीत् ।
कृतं देव महत्कर्म सुराणां शल्यमुद्धृतम् । ५७ ॥
वधेनानेन दैत्यानां वयं च परितोषिताः ।
योऽयं त्वया हतो विष्णो ! कालनेमी महासुरः ॥५८॥
त्वमेकोऽस्य मृधे हन्ता नान्यः कश्चन विद्यते ।
एष देवान् परिभवन् लोकांश्च ससुरासुरान् ॥ ५९॥
ऋषीणां कदनं कृत्वा मामपि प्रतिगर्जति ।
तदनेन तवाग्र्येण परितुष्टोऽस्मि कर्मणा ॥ ६०॥
यदयं कालकल्पस्तु कालनेमी निपातितः ।
तदा गच्छस्व भद्रन्ते गच्छाम दिवमुत्तमम् ॥ ६१ ॥
ब्रह्मर्षयस्त्वां तत्रस्थाः प्रतीक्षन्ते सदोगताः ।
कञ्चाहं तव दास्यामि वरं वरवताम्बर ! ॥ ६२ ॥
सुरेष्वथ च दैत्येषु वराणां वरदो भवान् ।
निर्यातये तच्चैलोक्यं स्फीतं निहतकण्टकम् ॥ ६३
अस्मिन्नेव मृधे विष्णो ! शक्राय सुमहात्मने ।

एवमुक्तो भगवता ब्रह्मणा हरिरव्ययः ॥ ६४ ॥
देवांश्छक्रमुखान् सर्वानुवाच शुभया गिरा ।
…गवानुवाच । शृण्वन्तु त्रिदशाः सर्वे यावन्तोऽत्र समागताः ॥ ६५
श्रवणावहितैः श्रोत्रैः पुरस्कृत्य पुरन्दरम् ।
अस्माभिः समरे सर्वे कालनेमिमुखा हताः ॥ ६६ ॥
दानवा विक्रमोपेताः शक्रादपि महत्तराः ।
अस्मिन्महति संग्रामे दैतेयौ द्वौ विनिःसृतौ ॥ ६७ ॥
विरोचनश्च दैत्येन्द्रः स्वर्भानुश्च महाग्रहः ।
स्वां दिशं भजतां शक्रो दिशं वरुण एव च ॥ ६८ ॥
याम्यां यमः पालयिता मुत्तराञ्च धनाधिपः ।
ऋक्षैः सह यथायोगं गच्छतां चैव चन्द्रमाः ॥ ६९ ॥
अब्दं ऋतुमुखे सूर्यो भजतामयनैः सह ।
आज्यभागाः प्रवर्त्तन्तां सदस्यैरभिपूजिताः ॥ ७० ॥
हूयन्तामग्नयो विप्रैर्वेददृष्टेन कर्म्मणा ।
देवाश्चाप्यग्निहोत्रेण स्वाध्यायेन महर्षयः ॥ ७१ ॥
श्राद्धेन पितरश्चैव तृप्तिं यान्तु यथासुखम् ।
वायुश्चरतु मार्गस्थस्त्रिधा दीप्यतु पावकः ॥ ७२ ॥
त्रींस्तु वर्णांश्च लोकांस्त्रींस्तर्पयंश्चात्मजैर्गुणैः ।
क्रतवः सम्प्रवर्त्तन्तां दीक्षणीयैर्द्विजातिभिः ॥ ७३ ॥
दक्षिणाश्चोपपाद्यन्तां याज्ञिकेभ्यः पृथक् पृथक् ।
गान्तु सूर्यो रसान् सोमो वायुः प्राणांश्च प्राणिषु ॥ ७४
तर्पयन्तः प्रवर्त्तन्तां सर्व एव स्वकर्म्मभिः ।
यथावदानुपूर्व्येण महेन्द्रमलयोद्भवाः ॥ ७५ ॥
त्रैलोक्य मातरः सर्वाः समुद्रं यान्तु सिन्धवः ।

दैत्येभ्यस्त्यज्यतां भीश्च शान्तिं व्रजत देवताः ! ॥ ७६
स्वस्ति वोऽस्तु गमिष्यामि ब्रह्मलोकं सनातनम् ।
स्वगृहे स्वर्गलोके वा संग्रामे वा विशेषतः ॥ ७७ ॥
विश्रम्भो वो न मन्तव्यो नित्यं क्षुद्रा हि दानवाः ।
छिद्रेषु प्रहरन्त्येते न तेषां संस्थिति र्ध्रुवा ॥ ७८ ॥
सौम्यानां मृजुभावानां भवतामार्जवन्धनम् ।
एवमुक्त्वा सुरगणान् विष्णुः सत्यपराक्रमः ॥ ७९ ॥
जगाम ब्रह्मणा सार्द्धं स्वलोकन्तु महायशाः ।
एतदाश्चर्य्यमभवत् संग्रामे तारकामये ॥
दानवानाञ्च विष्णोश्च यन्मान्त्वं परिपृष्टवान् ॥ ८० ॥

---

अथाष्टसप्तत्यधिकशततमोऽध्यायः ।

ऋषय ऊचुः । श्रुतः पद्मोद्भवस्तात विस्तरेण त्वयेरितः ।
समासाद्भवमाहात्म्यं भैरवस्य विधीयताम् ॥ १ ॥
सूत उवाच । तस्यापि देवदेवस्य शृणुध्वं कर्म चोत्तमम् ।
आसीद्दैत्योऽन्धको नाम भिन्नाञ्जनचयोपमः ॥ २ ॥
तपसा महता युक्तोह्यवध्य स्त्रिदिवौकसाम् ।
स कदाचिन् महादेवं पार्वत्या सहितं प्रभुम् ॥ ३ ॥
क्रीडमानं तदा दृष्ट्वा हर्त्तुं देवीं प्रचक्रमे ।
तस्य युद्धं तदा घोरमभवत् सह शम्भुना ॥ ४ ॥
आवन्त्ये विषये घोरे महाकालवनं प्रति ।
तस्मिन्युद्धे तदा रुद्रस्त्वान्धकेनातिपीडितः ॥ ५ ॥
ससृजे बाणमत्युग्रंनाम्ना पाशुपतं हि तत् ।

रुद्रबाणविनिर्भेदाद्रुधिरादन्धकस्य तु ॥ ६ ॥
अन्धकाश्च समुत्पन्नाः शतशोऽथ सहस्रशः।
तेषां विदार्यमाणानां रुधिरादपरे पुनः ॥ ७ ॥
बभूवु रन्धका घोरा यै व्याप्तमखिलं जगत्।
एवं मायाविनं दृष्ट्वा तञ्च देवस्तदान्धकम् ॥ ८ ॥
पानार्थं मन्धकास्रस्य सोऽसृजन्मातरस्तदा।
माहेश्वरी तथा ब्राह्मी कौमारी मालिनी तथा ॥ ९ ॥
सौपर्णी ह्यथ वायव्या शाक्रीवै नैरृती तथा।
सौरी सौम्या शिवा दूती चामुण्डा चाथ वारुणी ॥ १० ॥
वाराही नारसिंही च वैष्णवी च चलच्छिखा।
शतानन्दा भगानन्दा पिच्छिलाभगमालिनी ॥ ११ ॥
बला चातिबला रक्ता सुरभीमुखमण्डिका।
मातृनन्दा सुनन्दा च विडाली शकुनी तथा ॥ १२ ॥
रेवती च महारक्ता तथैव पिलपिच्छिका।
जया च विजया चैव जयन्ती चापराजिता ॥ १३ ॥
काली चैव महाकाली दूती चैव तथैव च।
सुभगा दुर्भगा चैव कराली नन्दिनी तथा ॥ १४ ॥
अदितिश्च दितिश्चैव मारी वै मृत्युरेव च।
कर्णमोटी तथा ग्राम्या उलूकी च घटोदरी ॥ १५ ॥
कपाली वज्रहस्ता च पिशाची राक्षसी तथा।
भुशुण्डी शाङ्करी चण्डा लाङ्गली कुटभी तथा ॥ १६ ॥
खेटा सुलोचना धूम्रा एकवीरा करालिनी।
विशालदंष्ट्रिणी श्यामा त्रिजटी कुक्कुटी तथा ॥ १७ ॥
वनायकी च वैताली उन्मत्तोदुम्बरी तथा।

सिद्धिश्च लेलिहाना च कौकरी गर्दभी तथा ॥ १८ ॥
भ्रुकुटी बहुपुत्री च प्रेतयाना विडम्बिनी ।
क्रौञ्चा शैलमुखी चैव विनता सुरसा दनुः ॥ १९ ॥
उषा रम्भा मेनका च सलिला चित्ररूपिणी ।
स्वाहा स्वधा वषट्कारा धृतिर्ज्येष्ठा कपर्दिनी ॥ २० ॥
माया विचित्ररूपा च कामरूपा च सङ्गमा ।
मुखेविला मङ्गला च महानासा महामुखी ॥ २१ ॥
कुमारी रोचना भीमा सदाहासा मदोद्धता ।
अलम्बाक्षी कालपर्णी कुम्भकर्णी महासुरी ॥ २२ ॥
केशिनी शङ्खिनी लम्बा पिङ्गला लोहितामुखी ।
घण्टारवाथ दंष्ट्राला रोचना काकजङ्घिका ॥ २३ ॥
गोकर्णिका च मुखिका महाग्रीवा महामुखी ।
उल्कामुखी धूमशिखा कम्पिनी परिकम्पिनी ॥ २४ ॥
मोहना कम्पना क्ष्वेला निर्भया बाहुशालिनी ।
सर्पकर्णी तथैकाक्षी विशोका नन्दिनी तथा ॥ २५ ॥
ज्योत्स्नामुखी च रभसा निकुम्भा रक्तकम्पना ।
अविकारा महाचित्रा चन्द्रसेना मनोरमा ॥ २६ ॥
अदर्शना हरत्पापा मातङ्गी लम्बमेखला ।
अबाला वञ्चना काली प्रमोदा लाङ्गलावती ॥ २७ ॥
चित्ता चित्तजला कोणा शान्तिकाघविनाशिनी ।
लम्बस्तनी लम्बसटा विसटा वासचूर्णिनी ॥ २८ ॥
स्खलन्ती दीर्घकेशी च सुचिरा सुन्दरी शुभा ।
अयोमुखी कटुमुखी क्रोधनी च तथाशनिः ॥ २९ ॥
कुटुम्बिका मुक्तिका च चन्द्रिका बलमोहिनी ।

सामान्या हासिनी लम्बा कोविदारी समासवो ॥३०॥
कङ्कर्णी महानादा महादेवी महोदरी।
हुङ्कारी रुद्रसुसटा रुद्रेशी भूतडामरी ॥ ३१ ॥
पिण्डजिह्वा चलज्ज्वाला शिवा ज्वालामुखी तथा।
एताश्चान्याश्च देवेश: सोऽसृजन्मातरस्तदा ॥ ३२ ॥
अन्धकानां महाघोराः पपुस्तद्रुधिरं तदा।
ततोऽन्धकासृजः सर्वाः परां तृप्तिमुपागताः ॥ ३३॥
तासु तृप्तासु संभूता भूय एवान्धकप्रजाः।
अर्दितस्तैर्महादेवः शूलमुद्गरपाणिभिः ॥ ३४ ॥
ततः स शङ्करो देवस्त्वन्धकैर्व्याकुलीकृतः।
जगाम शरणं देवं वासुदेवमजं विभुम् ॥ ३५ ॥
ततस्तु भगवान् विष्णुः सृष्टवान् शुष्करेवतीम्।
यापपौ सकलन्तेषा मन्धकानामसृक् क्षणात्।
यथा यथा च रुधिरं पिबन्त्यन्धक सम्भवम् ॥ ३६ ॥
तथा तथा धिकं देवी संशुष्यति जनाधिप !।
पीयमाने तथा तेषा मन्धकानां तथासृजि।
अन्धकास्तु क्षयन्नीताः सर्वे ते त्रिपुरारिणा ॥ ३७ ॥
मूलान्धकन्तु विक्रम्य तदा शर्वस्त्रिलोकधृक्।
चकार वेगाच्छूलाग्रे स च तुष्टाव शङ्करम् ॥३८॥
अन्धकस्तु महावीर्य स्तस्य तुष्टोऽभवद्भवः।
सामीप्यं प्रददौ नित्यं गणेशत्वं तथैव च ॥ ३९ ॥
ततो मातृगणाः सर्वे शङ्करं वाक्यमब्रुवन्।
भगवन् ! भक्षयिष्यामः स देवासुरमानुषान् ॥४०॥
त्वत्प्रसादाज्जगत् सर्वं तदनुज्ञातुमर्हसि।

शङ्कर उवाच । भवतीभिः प्रजाः सर्वा रक्षणीया न संशयः ॥४१॥

तस्माद्घोरादभिप्रायान्मनः शीघ्रं निवर्त्त्यताम् ।
इत्येवं शङ्करेणोक्ता मनादृत्य वचस्तदा ॥ ४२ ॥
भक्षयामासुरत्युग्रा स्त्रैलोक्यं सचराचरम् ।
त्रैलोक्ये भक्ष्यमाणे तु तदा मातृगणे नवे ॥ ४३ ॥
नृसिंहमूर्त्तिं देवेशं प्रदध्यौ भगवाञ्छिवः ।
अनादिनिधनं देवं सर्वलोकभवोद्भवम् ॥ ४४ ॥
दैत्येन्द्रवक्षोरुधिरचर्चितापमहानखम् ।
विद्युज्जिह्वं महादंष्ट्रं स्फुरत्केसरकण्टकम् ।
कल्पान्तमारुतक्षुब्धं सप्तार्णं समस्वनम् ॥ ४५ ॥
वज्रतीक्ष्णनखं घोर माकर्णव्यादिताननम् ।
मेरुशैलप्रतीकाशमुदयार्कसमेक्षणम् ॥ ४६ ॥
हिमाद्रिशिखराकारं चारुदंष्ट्रोज्ज्वलाननम् ।
नखनिःसृतरोषाग्निज्वालाकेसरमालिनम् ॥ ४७ ॥
वस्त्राङ्गदं सुमुकुटं हारकेयूरभूषणम् ।
श्रोणीसूत्रेण महता काञ्चनेन विराजितम् ॥ ४८ ॥
नीलोत्पलदलश्यामं वासोयुगविभूषणम् ।
तेजसाक्रान्तसकलब्रह्माण्डागारसङ्कुलम् ॥ ४९ ॥
पवनं भ्राम्यमाणानां हुतहव्यवहार्चिषाम् ।
आवर्त्तसदृशाकारैः संयुक्तं देहलोमजैः ॥ ५० ॥
सर्वपुष्पविचित्राञ्च धारयन्तं महास्रजम् ।
स ध्यातमात्रो भगवान् प्रददौ तस्य दर्शनम् ॥ ५१ ॥
यादृशेनैव रूपेण ध्यातो रुद्रेण धीमता ।
तादृशेनैव रूपेण दुर्निरीक्ष्येण दैवतैः ॥ ५२ ॥

प्रणिपत्य तु देवेशं तदा तुष्टाव शङ्करः।
शङ्कर उवाच। नमस्तेऽस्तु जगन्नाथ! नरसिंहवपुर्धर! ॥५३॥
दैत्यनाथासृजापूर्ण! नखशक्तिविराजित!।
मतः सकलसंलग्नहेमपिङ्गलविग्रह! ॥ ५४ ॥
नतोऽस्मि पद्मनाभ! त्वां सुरशक्र! जगद्गुरो!।
कल्पान्ताम्भोदनिर्घोष! सूर्यकोटिसमप्रभ! ॥ ५५ ॥
सहस्रयमसंक्रोध! सहस्रेन्द्रपराक्रम!।
सहस्रधनदस्फीत! सहस्रवरुणात्मक! ॥ ५६ ॥
सहस्रकालरचित! सहस्रनियतेन्द्रिय!।
सहस्रभूमिसद्धैर्य! सहस्रानन्त! मूर्तिमन्! ॥ ५७ ॥
सहस्रचन्द्रप्रतिम सहस्र! ग्रहविक्रम!।
सहस्ररुद्रतेजस्क! सहस्रब्रह्मसंस्तुत!॥ ५८ ॥
सहस्रबाहुवेगोग्र! सहस्रास्य निरीक्षण!।
सहस्रयन्त्रमथन! सहस्रवधमोचन!॥ ५९ ॥
अन्धकस्य विनाशाय याः सृष्टा मातरो मया।
अनादृत्य तु मद्वाक्यम्भक्षयन्त्यद्य ताः प्रजाः॥ ६०॥
कृत्वा ताश्च न शक्तोऽहं संहर्तुमपराजित!।
स्वयङ्कृत्वा कथन्तासां विनाशमभिकारये ॥ ६१ ॥
एवमुक्तः स रुद्रेण नरसिंहवपुर्धरः।
ससर्ज देवीं जिह्वायास्तदा वागीश्वरीं हरिः ॥६२॥
हृदयाच्च तथा माया गुह्याच्च भवमालिनी।
अस्थिभ्यश्च तथाकाली सृष्टापूर्वं महात्मना॥ ६३ ॥
यया तद्रुधिरम्पीतमन्धकानां महात्मनाम्।
याश्चास्मिन् कथिता लोके नामतः शुष्करेवती ॥६४॥

हास्तिं शशमातरः सृष्टा गात्रेभ्य शक्तिणा ततः।
तासां नामानि वक्ष्यामि तानि मे गदतः शृणु ॥६५॥
सर्वास्तास्तु महाभागा घण्टाकर्णी तथैवच।
त्रैलोक्यमोहिनी पुण्या सर्वसत्ववशङ्करी ॥ ६६ ॥
तथाच चक्रहृदया पञ्चमी व्योमचारिणी।
शङ्खिनी लेखिनी चैव कालसङ्कर्षणी तथा ॥ ६७ ॥
इत्येताः पृष्ठगा राजन्! वागीशानुचराः स्मृताः।
सङ्कर्षणी तथाश्वत्था वीजभावापराजिता ॥ ६८ ॥
कल्याणी मधुदंष्ट्री च कमलोत्पलहस्तिका।
इति देव्यष्टकं राजन्! मायानुचर मुच्यते ॥ ६९ ॥
अजिता सूक्ष्महृदया वृद्धा वेशाश्मदर्शना।
नृसिंहभैरवा विल्वा गरुत्महृदया जया ॥ ७० ॥
भवमालिन्यनुचरा इत्यष्टौ नृपमातरः।
आकर्णनी सम्भटा च तथैवोत्तरमालिका ॥ ७१ ॥
ज्वालामुखी भीषणिका कामधेनुश्च वालिका।
तथा पद्मकरा राजन्! रेवत्यनुचराः स्मृताः ॥ ७२ ॥
अष्टौ महाबलाः सर्वा देवगात्रसमुद्भवाः।
त्रैलोक्यसृष्टिसंहारसमर्थाः सर्वदेवताः ॥ ७३ ॥
ताः सृष्टमात्रा देवेन क्रुद्धा मातृगणस्य तु।
प्रधाविता महाराज! क्रोधविस्फारितेक्षणाः ॥ ७४ ॥
अविषह्यतमन्तासां दृष्टितेजः सुदारुणम्।
तमेव शरणं प्राप्ता नृसिंहो वाक्यमब्रवीत् ॥ ७५ ॥
यथा मनुष्याः पशवः पालयन्ति चिरात् सुतान्।
जयन्ति ते तथैवाद्य यथा वै देवतागणाः ॥ ७६ ॥

भवत्वस्तु तथालोकान्पालयन्तु मयेरिताः।
मनुजैश्च तथा देवैर्यजध्वं त्रिपुरान्तकम्॥ ७७ ॥
नच बाधा प्रकर्त्तव्या ये भक्तास्त्रिपुरान्तके।
येच मां संस्मरन्तीह तेच रक्ष्याः सदा नराः॥७८॥
बलिकर्म करिष्यन्ति युष्माकं ये सदा नराः।
सर्वकामप्रदास्तेषां भविष्यध्वन्तथैवच॥ ७९ ॥
उच्चासनादिकं ये च कथयन्ति मयेरितम्।
तेच रक्ष्याः सदा लोका रक्षितव्यं मदासनम्॥ ८०॥
रौद्रीं चैव परां मूर्त्तिं महादेवः प्रदास्यति।
युष्मन्मुख्या महादेव्यस्तदुक्तं परिरक्षथ॥ ८१ ॥
मया मातृगणः सृष्टो योऽयं विगतसाध्वसः।
एष नित्यं विशालाक्ष्यो मयैव सह रंस्यते॥ ८२ ॥
मया सार्द्धं तथा पूजां नरेभ्यश्चैव लप्स्यथ।
पृथक् सुपूजिता लोकैः सर्वान् कामान् प्रदास्यथ॥८३॥
शुष्कां संपूजयिष्यन्ति ये च पुत्रार्थिनो जनाः।
तेषां पुत्रप्रदा देवी भविष्यति न संशयः॥ ८४ ॥
एवमुक्त्वा तु भगवान् सह मातृगणेन तु।
ज्वालामालाकुलवपुस्तत्रैवान्तरधीयत॥ ८५ ॥
तत्र तीर्थं समुत्पन्नं कृतशौचेति यज्जगुः।
तत्रापि पूर्वजो देवो जगदार्त्तिहरोहरः॥ ८६ ॥
रौद्रस्य मातृवर्गस्य दत्त्वा रुद्रस्तु पार्थिव!।
रौद्रां दिव्यां तनुं तत्र मातृमध्ये व्यवस्थितः॥ ८७ ॥
सप्त ता मातरो देव्यः अर्द्धनारीनरः शिवः।

निवेश्य रौद्रं तत् स्थानं तत्रैवान्तरधीयत ॥ ८८ ॥
स मातृवर्गस्य हरस्य मूर्त्तिर्यदा यदा याति च तत्समीपे ।
देवेश्वरस्यापि नृसिंहमूर्त्तेः पूजां विधत्ते त्रिपुरान्धकारिः॥८९॥

---

## अथाशीत्यधिकशततमोऽध्यायः ।

ऋषय ऊचुः । श्रुतोऽन्धकवधः सूत ! यथावत्त्वदुदीरितः ।
वाराणस्यास्तु माहात्म्यं श्रोतुमिच्छाम साम्प्रतम्॥१॥
भगवान् पिङ्गलः केन गणत्वं समुपागतः ।
अन्नदत्वञ्च सम्प्राप्तो वाराणस्यां महाद्युतिः ॥ २ ॥
क्षेत्रपालः कथं जातः प्रियत्वञ्च कथङ्गतः ।
एतदिच्छाम कथितं श्रोतुं ब्रह्मसुत ! त्वया ॥ ३ ॥
सूत उवाच । शृणुध्वं वै यथा लेभे गणत्वं स पिङ्गलः ।
अन्नदत्वं च लोकानां स्थानं वाराणसी त्विह ॥ ४ ॥
पूर्णभद्रसुतः श्रीमानासीद्यक्षः प्रतापवान् ।
हरिकेश इतिख्यातो ब्रह्मण्यो धार्मिकश्च ह ॥ ५ ॥
तस्य जन्मप्रभृत्येव शर्वे भक्तिरनुत्तमा ।
तदासीत्तन्नमस्कारस्तन्निष्ठस्तत्परायणः ॥ ६ ॥
आसीनश्च शयानश्च गच्छंस्तिष्ठन्ननुव्रजन् ।
भुञ्जानोऽथ पिबन्वापि रुद्रमेवान्वचिन्तयत् ॥ ७ ॥
तमेवं युक्तमनसम्पूर्णभद्रः पिताब्रवीत् ।
न त्वां पुत्रमहं मन्ये दुर्जातो यस्त्वमन्यथा ॥ ८ ॥
न हि यक्षकुलीनानामेतद्वृत्तं भवत्युत ।

गुह्यका वनयूयं वै स्वभावात् क्रूरचेतसः ॥ ९ ॥
क्रव्यादाश्चैव किं भक्ष्या हिंसाशीलाश्च पुत्रक ! ।
नैवं कार्षीर्नते वृत्तिरेवं दृष्टा महात्मना ॥ १० ॥
स्वयम्भुवा यथादिष्टा त्यक्तव्या यदि नो भवेत् ।
आश्रमान्तरजं कर्म न कुर्युर्गृहिणस्तु तत् ॥ ११ ॥
हित्वा मनुष्यभावं च कर्मभि र्विविधैश्चर ।
यत्त्वमेवं विमार्गस्थो मनुष्याज्जात एवच ॥ १२ ॥
यथावद्विहितन्तेषां कर्म तज्जातिसंश्रयम् ।
मयापि विहितं पश्य कर्मैतन्नात्र संशयः ॥ १३ ॥
सूत उवाच । एवमुक्त्वा स तं पुत्रं पूर्णभद्रः प्रतापवान् ।
उवाच निष्क्रमन् क्षिप्रं गच्छ पुत्र ! यथेच्छसि ॥ १४ ॥
ततः स निर्गतस्त्यक्त्वा गृहं सम्बन्धिनस्तथा ।
वाराणसीं समासाद्य तपस्तेपे सुदुश्चरम् ॥ १५ ॥
स्थाणुभूतो ह्यनिमिषः शुष्ककाष्ठोपलोपमः ।
सन्नियम्येन्द्रियग्राममवातिष्ठत निश्चलः ॥ १६ ॥
अथ तस्यैव मनिशन्तत्परस्य तदा ऋषेः ।
सहस्रमेकं वर्षाणां दिव्यमप्यभ्यवर्त्तत ॥ १७ ॥
वल्मीकेन समाक्रान्तो भक्ष्यमाणः पिपीलिकैः ।
वज्रसूचीमुखैस्तीक्ष्णै र्विध्यमानस्तथैव च ॥ १८ ॥
निर्मांसरुधिरत्वक् च कुन्दशङ्खेन्दुसप्रभः ।
अस्थिशेषोऽभवच्छर्वं हृदि वै चिन्तयन्नपि ॥ १९ ॥
एतस्मिन्नन्तरे देवी विज्ञापयत शङ्करम् ।
देव्युवाच । उद्यानं पुनरेवेह द्रष्टुमिच्छामि सर्वदा ॥ २० ॥
क्षेत्रस्य देवमाहात्म्यं श्रोतुं कौतूहलं हि मे ।

यतश्च प्रियमेतत्ते तथास्य फलमुत्तम ! ॥ २१ ॥
इति विज्ञापितो देवः शर्वाण्या परमेश्वरः ।
शर्वः पृष्टोयथातथ्यमाख्यातु मुपचक्रमे ॥ २२ ॥
निर्जगाम च देवेशः पार्वत्या सह शङ्करः ।
उद्यानं दर्शयामास देव्या देवः पिनाकधृक् ॥ २३ ॥

देवदेव उवाच ।

प्रोत्फुल्ल नानाविधगुल्मशोभितं लताप्रतानावनतं मनोहरम् ।
विरूढपुष्पैः परितः प्रियङ्गुभिः सुपुष्पितैः कण्टकितैश्च केतकैः ॥ २४
तमालगुल्मैर्निचितं सुगन्धिभिः सकर्णिकारैर्बकुलैश्च सर्वगः ।
अशोकपुन्नागवरैः सुपुष्पितैर्द्विरेफमालाकुलपुष्पसञ्चयैः ॥ २५ ॥
क्वचित् प्रफुल्लाम्बुजरेणुरूषितैर्विहङ्गमैश्चारुकलप्रणादिभिः ।
विनादितं सारसमण्डनादिभिः प्रमत्तदात्यूहरुतैश्च वल्गुभिः ॥ २६
क्वचिच्च चक्राह्वरवोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम् ।
क्वचिच्च कारण्डवनादनादितं क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥ २७
मदाकुलाभिस्त्वमराङ्गनाभि र्निषेवितञ्चारु सुगन्धिपुष्पम् ।
क्वचित् सुपुष्पैः सहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च ॥ २८ ॥
प्रगीतविद्याधरसिद्धचारणं प्रवृत्तनृत्याप्सरसाङ्गणाकुलम् ।
प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोपनादितम् ॥ २९ ॥
मृगेन्द्रनादाकुलसत्त्वमानसैः क्वचित् क्वचिद्द्वन्द्वकदम्बकैर्मृगैः ।
प्रफुल्लनानाविधचारुपङ्कजैः सरस्तटाकैरुपशोभितं क्वचित् ॥ ३० ॥

निबिडनिचुलनीलं नीलकण्ठाभिरामम्
मदमुदितविहङ्गव्रातनादाभिरामम् ।
कुसुमिततरुशाखालीनमत्तद्विरेफम्
नवकिसलयशोभाशोभितप्रान्तशाखम् ॥ ३१ ॥

ाचञ्च दन्तिक्षतचारुवीरुधं क्वचिल्लतालिङ्गितचारुपादपम्।
क्वचिद्विलासालसगामिवर्हिणं निषेवितं किंपुरुषव्रजैः क्वचित्॥२२॥

पारावतध्वनिविकूजितचारुशृङ्गै-
रभ्रङ्कषैः सितमनोहरचारुरूपैः।
आकीर्णपुष्पनिकुरम्बविमुक्तहासै-
र्विभ्राजितं त्रिदशदेवकुलैरनेकैः॥२३॥

फुल्लोत्पलागुरुसहस्रवितानयुक्तै-
स्तोयाशयैस्तमनुशोभितदेवमार्गम्।
मार्गान्तरागलितपुष्पविचित्रभक्ति-
सम्बद्धगुल्मविटपैर्विहगैरुपेतम्॥२४॥

तुङ्गाग्रैर्नीलपुष्पस्तवकभरनतप्रान्तशाखैरशोकै-
र्मत्तालिव्रातगीतश्रुतिसुखजननैर्भासितान्तर्मनोज्ञैः।
रात्रौ चन्द्रस्य भासा कुसुमितलतिकान्यैकतां सम्प्रयातं
च्छायासुप्तप्रबुद्धस्थितहरिणकुलालुप्तदर्भाङ्कुराग्रम्॥२५॥

हंसानां पक्षपातप्रचलितकमलस्वच्छविस्तीर्णतोयम्
तोयानां तीरजातप्रविकचकदलीवाटनृत्यन्मयूरम्।
मायूरैः पक्षचन्द्रैः क्वचिदपि पतितै रञ्जितक्ष्माप्रदेशम्
देशे देशे विकीर्णप्रमुदितविलसन्मत्तहारीतवृन्दम्॥२६॥

सारङ्गैः क्वचिदपि सेवितप्रदेशम्
सच्छन्नं कुसुमचयैः क्वचिद्विचित्रैः।
हृष्टाभिः क्वचिदपि किन्नराङ्गनाभिः
क्षीबाभिः समधुरगीतवृक्षखण्डम्॥२७॥

संसृष्टैः क्वचिदुपलिप्तकीर्णपुष्पै-
रावासैः परिवृतपादपं मुनीनाम्।

आमूलात् फलनिचितैः क्वचिद्विशालै
स्तुङ्गैः पनसमहीरुहैरुपेतम् ॥ ३८ ॥
फुल्लातिमुक्तकलतागृहसिद्धलीलम्
सिद्धाङ्गनाकनकनूपुरनादरम्यम् ।
रम्यप्रियङ्गुतरुमञ्जरिसक्तभृङ्गम्
भृङ्गावलीषु स्खलिताम्बुकदम्बपुष्पम् ॥ ३९ ॥
पुष्पोत्करानिलविघूर्णितपादपाग्र
मग्रेसरो भुवि निपातितवंशगुल्मम् ।
गुल्मान्तरप्रभृतिलीनमृगीसमूहम्
संमुच्यतान्तनुभृतामपवर्गदातृ ॥ ४० ॥
चन्द्रांशुजालधवलैस्तिलकैर्मनोज्ञै
सिन्दूरकुङ्कुमकुसुम्भनिभैरशोकैः ।
चामीकराभनिचयैरथ कर्णिकारैः
फुल्लारविन्दरचितं सुविशालशाखैः ॥ ४१ ॥
क्वचिद्रजतपर्णाभैः क्वचिद्विद्रुमसन्निभैः ।
क्वचित् काञ्चनसङ्काशैः पुष्पैराचितभूतलम् ॥ ४२ ॥
पुन्नागेषु द्विजगणविरुतं रक्ताशोकस्तबकभरनमितम् ।
रम्योपान्तं श्रमहरपवनं फुल्लाब्जेषु भ्रमरविलसितम् ॥ ४३॥
सकलभुवनभर्ता लोकनाथस्तदानीं
स्तुहिनशिखरिपुत्र्याः सार्द्धमिष्टैर्गणेशैः ।
विविधतरुविशालं मत्तहृष्टान्यपुष्ट-
मुपवनतरुरम्यं दर्शयामास देव्याः ॥ ४४ ॥
देव्युवाच । उद्यानं दर्शितं देव ! शोभया परया युतम् ।
क्षेत्रस्य तु गुणान् सर्वान् पुनर्वक्तुमिहार्हसि ॥ ४५ ॥

अस्य क्षेत्रस्य माहात्म्यमविमुक्तस्य तत्त्वथा।
श्रुत्वापि हि न मे तृप्ति रतोभूयो वदस्व मे ॥ ४६ ॥
देवदेव उवाच। इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम।
सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ॥ ४७ ॥
अस्मिन् सिद्धाः सदा देवि! मदीयं व्रतमास्थिताः।
नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः ॥ ४८ ॥
अभ्यसन्ति परं योगं मुक्तात्मानो जितेन्द्रियाः।
नानावृक्षसमाकीर्णे नानाविहगकूजिते ॥ ४९ ॥
कमलोत्पलपुष्पाढ्यैः सरोभिः समलङ्कृते।
अप्सरोगणगन्धर्वैः सदा संसेविते शुभे ॥ ५० ॥
रोचते मे सदा वासो येन कारणेन तच्छृणु।
मन्मना मम भक्तश्च मयि सर्वार्पितक्रियः ॥ ५१ ॥
यथा मोक्षमिहाप्नोति ह्यन्यत्र न तथा क्वचित्।
एतन्मम परं दिव्यं गुह्याद्गुह्यतरं महत् ॥ ५२ ॥
ब्रह्मादयस्तु जानन्ति येऽपि सिद्धा मुमुक्षवः।
अतः प्रियतमं क्षेत्रं तस्माच्चेह रतिर्मम ॥ ५३ ॥
विमुक्तं न मया यस्मान्मोक्ष्यते वा कदाचन।
महत् क्षेत्रमिदं तस्मादविमुक्तमिदं स्मृतम् ॥ ५४ ॥
नैमिषेथ कुरुक्षेत्रे गङ्गाद्वारे च पुष्करे।
स्नानात् संसेविताद्वापि न मोक्षः प्राप्यते यतः ॥५५॥
इह संप्राप्यते येन तत एतद्विशिष्यते।
प्रयागे च भवेन्मोक्ष इह वा मत्परिग्रहात् ॥ ५६ ॥
प्रयागादपि तीर्थाग्र्यादिदमेव महत् स्मृतम्।
जैगीषव्यः परां सिद्धिं योगतः स महातपाः ॥ ५७ ॥

अस्य क्षेत्रस्य माहात्म्याद्भक्त्या च मम भावनात्।
जैगीषव्यो महाश्रेष्ठो योगिनां स्थानमिष्यते ॥ ५८ ॥
ध्यायतस्तत्र मां नित्यं योगाग्निर्दीप्यते भृशम्।
कैवल्यं परमं याति देवानामपि दुर्लभम् ॥ ५९ ॥
अव्यक्तलिङ्गैर्मुनिभिः सर्व्वसिद्धान्तवेदिभिः।
इह संप्राप्यते मोक्षो दुर्लभो देवदानवैः ॥ ६० ॥
तेभ्यश्चाहं प्रयच्छामि भोगैश्वर्य्यमनुत्तमम्।
आत्मनश्चैव सायुज्यमीप्सितं स्थानमेव च ॥ ६१ ॥
कुवेरस्तु महायक्षस्तथा सर्व्वार्पितक्रियः।
क्षेत्रसंवसनादेव गणेशत्वमवाप ह ॥ ६२ ॥
संवर्त्तो भविता यश्च सोऽपि भक्त्या ममैव तु।
इहैवाराध्य मां देवि ! सिद्धिं यास्यत्यनुत्तमाम् ॥ ६३ ॥
पराशरसुतो योगी ऋषिर्व्यासो महातपाः।
धर्म्मकर्त्ता भविष्यश्च वेदसंस्थाप्रवर्त्तकः ॥ ६४ ॥
रंस्यते सोऽपि पद्माक्षि ! क्षेत्रेऽस्मिन् मुनिपुङ्गवः।
ब्रह्मा देवर्षिभिः सार्द्धं विष्णुर्वायुर्दिवाकरः ॥ ६५ ॥
देवराजस्तथा शक्रो येऽपि चान्ये दिवौकसः।
उपासन्ते महात्मानः सर्व्वे मामेव सुव्रते ! ॥ ६६ ॥
अन्येऽपि योगिनः सिद्धाश्छन्नरूपा महाव्रताः।
अनन्यमनसो भूत्वा मामिहोपासते सदा ॥ ६७ ॥
अलर्कश्च पुरीमेतां मत्प्रसादादवाप्स्यति।
स चैनां पूर्ववत्कृत्वा चातुर्वर्ण्याश्रमाकुलाम् ॥ ६८ ॥
स्फीतां जनसमाकीर्णां भक्त्या च सुचिरं नृपः।
मयि सर्व्वार्पितप्राणो मामेव प्रतिपत्स्यते ॥ ६९ ॥

ततः प्रभृति चार्वङ्गि ! येऽपि क्षेत्रनिवासिनः।
गृहिणो लिङ्गिनो वापि मद्भक्ता मत्परायणाः ॥७०॥
मत्प्रसादाद्भजिष्यन्ति मोक्षं परमदुर्लभम्।
विषयासक्तचित्तोऽपि त्यक्तधर्म्मरतिर्नरः॥ ७१ ॥
इह क्षेत्रे मृतः सोऽपि संसारं न पुनर्विशेत्।
ये पुनर्निर्ममा धीराः सत्त्वस्था विजितेन्द्रियाः ॥७२॥
व्रतिनश्च निरारम्भाः सर्वे ते मयि भाविताः।
देहभङ्गं समासाद्य धीमन्तः सङ्गवर्जिताः।
गता एव परं मोक्षं प्रसादान्मम सुव्रते ! ॥ ७३ ॥
जन्मान्तरसहस्रेषु युञ्जन् योगमवाप्नुयात्।
तमिहैव परं मोक्षं मरणादधिगच्छति ॥ ७४ ॥
एतत्संक्षेपतो देवि ! क्षेत्रस्यास्य महत्फलम्।
अविमुक्तस्य कथितं मया ते गुह्यमुत्तमम् ॥ ७५ ॥
अतःपरतरं नास्ति सिद्धिगुह्यं महेश्वरि !।
एतद्बुध्यन्ति योगज्ञा ये च योगेश्वरा भुवि ॥ ७६ ॥
एतदेव परं स्थानमेतदेव परं शिवम्।
एतदेव परम्ब्रह्म एतदेव परम्पदम् ॥ ७७ ॥

वाराणसी तु भुवनत्रयसारभूता
रम्या सदा मम पुरी गिरिराजपुत्रि !।
अत्रागता विविधदुष्कृतकारिणोऽपि
पापक्षयाद्विरजसः प्रतिभान्ति मर्त्याः ॥ ७८ ॥
एतत्स्मृतं प्रियतमं मम देवि ! नित्यम्
क्षेत्रं विचित्रतरुगुल्मलतासु पुष्पम्।
अस्मिन्मृतास्तनुभृतः पदमाप्नुवन्ति

मूर्च्छागमेन रहितापि न संशयोऽत्र ॥ ७९ ॥

सूत उवाच। एतस्मिन्नन्तरे देवो देवीं प्राह गिरीन्द्रजा।

दातुं प्रसादाद्यचाय वरं भक्ताय भामिनि ! ॥ ८० ॥

भक्तो मम वरारोहे। तपसा हतकिल्बिषः

अहो वरमसौ लब्धमस्मत्तो भुवनेश्वरि ! ॥ ८१ ॥

एवमुक्त्वा ततो देवः सह देव्या जगत्पतिः।

जगाम यत्रो यत्रास्ते कृशो धमनिसन्ततः ॥ ८२ ॥

ततस्तं गुह्यकं देवी दृष्टिपातैर्निरीक्षती।

शुक्लवर्णं विचर्माणं स्नायुबद्धास्थिपञ्जरम् ॥ ८३ ॥

देवी प्राह तदा देवं दर्शयन्ती च गुह्यकम्।

सत्यं नाम भवानुग्रो देवैरुक्तस्तु शङ्कर ! ॥ ८४ ॥

ईदृशे चास्य तपसि न प्रयच्छसि यद्वरम्।

अत क्षेत्रे महादेव ! पुण्ये सम्यगुपासिते ॥ ८५ ॥

कथमेवं परिक्लेशं प्राप्तो यक्षकुमारकः।

शीघ्रमस्य वरं यच्छ प्रसादात् परमेश्वर ! ॥ ८६ ॥

एवं मन्वादयो देव ! वदन्ति परमर्षयः।

रुष्टाद्वाप्यथ तुष्टाद्वा सिद्धिस्तु भवतोऽभवेत् ॥ ८७ ॥

भोगप्राप्तिस्तथा राज्यमन्ते मोक्षः सदाशिवात्।

एवमुक्तस्ततो देवः सह देव्या जगत्पतिः ॥ ८८ ॥

जगाम यत्रो यत्रास्ते कृशो धमनिसन्ततः।

तं दृष्ट्वा प्रणतं भक्त्या हरिकेशं वृषध्वजः ॥ ८९ ॥

दिव्यचक्षुरदात्तस्मै येनापश्यत् स शङ्करम्।

अथ यक्षस्तदा देवात्स्वनेकत्रमील्य चक्षुषी ॥ ९० ॥

अपश्यत् सगणं देवं वृषध्वजमुपस्थितम्।

देवदेव उवाच। वरं ददामि ते पूर्वं त्रैलोक्ये दर्शनं तथा॥८१॥
सावर्ण्यं च शरीरस्य पश्य मां विगतज्वरः।
सूत उवाच। ततः स लब्ध्वा तु वरं शरीरेणाक्षतेन च॥८२॥
पादयोः प्रणतस्तस्थौ कृत्वा शिरसि साञ्जलिम्।
उवाचाथ तदा तेन वरदोऽस्मीति चोदितः॥ ८३॥
भगवन्! भक्तिमव्यग्रां त्वय्यनन्यां विधत्स्व मे।
अन्न दत्वं च लोकानां गाणपत्यं तथाऽक्षयम्॥८४॥
अविमुक्तं च ते स्थानं पश्येयं सर्वदा यथा।
एतदिच्छामि देवेश त्वत्तो वरमनुत्तमम्॥ ८५॥
देवदेव उवाच। जरामरणसन्त्यक्तः सर्वरोगविवर्जितः।
भविष्यसि गणाध्यक्षो धनदः सर्वपूजितः॥ ८६॥
अजेयश्चापि सर्वेषां योगैश्वर्यं समाश्रितः।
अन्नदश्चापि लोकेभ्यः क्षेत्रपालो भविष्यसि॥ ८७॥
महाबलो महासत्त्वो ब्रह्मण्यो मम च प्रियः।
त्र्यक्षश्च दण्डपाणिश्च महायोगी तथैव च॥ ८८॥
उद्भ्रमः सम्भ्रमश्चैव गणौ ते परिचारकौ।
तवाज्ञाञ्च करिष्येते लोकस्योद्भ्रमसम्भ्रमौ॥ ८९॥
सूत उवाच। एवं स भगवांस्तत्र यक्षं कृत्वा गणेश्वरम्।
जगाम वामदेवेशः सह तेनामरेश्वरः॥ १००॥

---

## अथाशीत्यधिकशततमोऽध्यायः।

सूत उवाच। इमां पुण्योद्भवां स्निग्धां कथां पापप्रणाशिनीम्।

शृण्वन्तु ऋषयः सर्वे सुविशुद्धास्तपोधनाः ॥ १ ॥
गणेश्वरपतिं दिव्यं रुद्रतुल्य पराक्रमम् ।
सनत्कुमारो भगवान् पृष्टवान्नन्दिकेश्वरम् ॥ २ ॥
ब्रूहि गुह्यं यथा तत्वं यत्र नित्यं भव स्थितः ।
माहात्म्यं सर्वभूतानां परमात्मा महेश्वरः ॥ ३ ॥
घोररूपं समास्थाय दुष्करं देवदानवैः ।
आभूत संप्लवं यावत् स्थाणुभूतो महेश्वरः ॥ ४ ॥
नन्दिकेश्वर उवाच । पुरा देवेन यत्प्रोक्तं पुराणं पुण्यमुत्तमम् ।
तत्सर्वं संप्रवक्ष्यामि नमस्कृत्य महेश्वरम् ॥ ५ ॥
ततो देवेन तुष्टेन उमायाः प्रियकाम्यया ।
कथितं भुवि विख्यातं यत्र नित्यं स्वयं स्थितः ॥ ६ ॥
रुद्रस्यार्धासनगता मेरुशृङ्गे यशस्विनी ।
महादेवं ततो देवी प्रणता परिपृच्छति ॥ ७ ॥
भगवन् ! देवदेवेश ! चन्द्रार्द्धकृतशेखर ! ।
धर्मं प्रब्रूहि मर्त्यानां भुवि चैवोर्द्ध्वरेतसाम् ॥ ८ ॥
जप्तं दत्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत् ।
ध्यानाध्ययन सम्पन्नं कथं भवति चाव्ययम् ॥ ९ ॥
जन्मान्तर सहस्रेण यत्पापं पूर्वसञ्चितम् ।
कथं तत्क्षयमायाति तन्ममाचक्ष्व शङ्कर ! ॥ १० ॥
यस्मिन् व्यवस्थितो भक्त्या तुष्यसे परमेश्वर ! ।
व्रतानि नियमाश्चैव आचारो धर्म्म एव च ॥ ११ ॥
सर्वसिद्धिकरं यत्र तथाक्षय्यगति दायकम् ।
वक्तुमर्हसि तत्सर्वं परं कौतूहलं हि मे ॥ १२ ॥
ईश्वर उवाच । शृणु देवि ! प्रवक्ष्यामि गुह्यानां गुह्यमुत्तमम् ॥ १३

सर्वक्षेत्रेषु विख्यातमविमुक्तं प्रियं मम ॥ १३ ॥
अष्टषष्टिः पुरा प्रोक्ता स्थानानां स्थानमुत्तमम् ।
यत्र साक्षात् स्वयं रुद्रः कृत्तिवासाः स्वयं स्थितः ॥१४
यत्र सन्निहितो नित्यमविमुक्ते निरन्तरम् ।
तत्क्षेत्रं न मया मुक्तमविमुक्तं ततः स्मृतम् ॥ १५ ॥
अविमुक्ते परा सिद्धिरविमुक्ते परा गतिः ।
जप्तं दत्तं हुतं चेष्टं तपस्तप्तं कृतं च यत् ॥ १६ ॥
ध्यानमध्ययनं दानं सर्वं भवति चाक्षयम् ।
जन्मान्तरसहस्रेण यत्पापं पूर्वसञ्चितम् ॥ १७ ॥
अविमुक्तं प्रविष्टस्य तत् सर्वं व्रजति क्षयम् ।
अविमुक्ताग्निना दग्धमग्नौ तूलमिवाहितम् ॥ १८ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वै वर्णसङ्कराः ।
कृमिम्लेच्छाश्च ये चान्ये सङ्कीर्णाः पापयोनयः ॥ १९॥
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ता अविमुक्ते शृणु प्रिये ! ॥ २० ॥
चन्द्रार्द्धमौलिनः सर्वे ललाटाक्षा वृषध्वजाः ।
शिवे मम पुरे देवि ! जायन्ते तत्र मानवाः ॥ २१ ॥
अकामो वा सकामो वा ह्यपि तिर्य्यग्गतोऽपि वा ।
अविमुक्ते त्यजन् प्राणान् मम लोके महीयते ॥ २२॥
अविमुक्तं यदा गच्छेत् कदाचित् कालपर्य्ययात् ।
अश्मना चरणौ बद्ध्वा तत्रैव निधनं व्रजेत् ॥ २३ ॥
अविमुक्तं गतो देवि ! न निर्गच्छेत्ततः पुनः ।
सोऽपि मत्पदमाप्नोति नात्र कार्य्या विचारणा ॥ २४॥

वस्त्रप्रदं रुद्रकोटिं सिद्धेश्वरमहालयम् ।
गोकर्णं रुद्रकर्णञ्च सुवर्णाक्षं तथैव च ॥ २५ ॥
अमरञ्च महाकालं तथा कायावरोहणम् ।
एतानि हि पवित्राणि सान्निध्यात् सन्ध्ययोर्द्वयोः ॥ २६ ॥
कालिञ्जरवनञ्चैव शङ्कुकर्णं स्थलेश्वरम् ।
एतानि च पवित्राणि सान्निध्याद्धि मम प्रिये ।
अविमुक्ते वरारोहे ! त्रिसन्ध्यं नात्र संशयः ॥ २७ ॥
हरिश्चन्द्रं परं गुह्यं गुह्यमाम्रातकेश्वरम् ।
जलेश्वरं परं गुह्यं गुह्यं श्रीपर्वतं तथा ॥ २८ ॥
महालयं तथा गुह्यं कृमिचण्डेश्वरं शुभम् ।
गुह्यातिगुह्यं केदारं महाभैरवमेव च ॥ २९ ॥
अष्टावेतानि स्थानानि सान्निध्याद्धि मम प्रिये ! ।
अविमुक्ते वरारोहे ! त्रिसन्ध्यं नात्र संशयः ॥ ३० ॥
यानि स्थानानि श्रूयन्ते त्रिषु लोकेषु सुव्रते ! ।
अविमुक्तस्य पादेषु नित्यं सन्निहितानि वै ॥ ३१ ॥
अथोत्तरां कथां दिव्यामविमुक्तस्य शोभनं ।
स्कन्दो वक्ष्यति माहात्म्यमृषीणां भावितात्मनाम् ॥३२॥

---

अथैकाशीत्यधिकशततमोऽध्यायः ।

सूत उवाच । कैलासपृष्ठमासीनं स्कन्दं ब्रह्मविदाम्वरम् ।
पृच्छन्ति ऋषयः सर्वे सनकाद्या स्तपोधनाः ॥ १ ॥
तथा राजर्षयः सर्वे ये भक्तास्तु महेश्वरे ।
ब्रूहि त्वं स्कन्द ! भूलोके यत्र नित्यं भवस्थितः ॥ २ ॥

स्कन्द उवाच। महात्मा सर्वभूतात्मा देवदेवः सनातनः।
घोररूपं समास्थाय दुष्करं देवदानवैः ॥ ३ ॥
आभूतसंप्लवं यावत् स्थाणुभूतस्थितः प्रभुः।
गुह्यानां परमं गुह्यमविमुक्तमिति स्मृतम् ॥ ४ ॥
अविमुक्ते सदा सिद्धियंत्र नित्यं भवस्थितः।
अस्य क्षेत्रस्य माहात्म्यं यदुक्तं लोकेश्वरेण तु ॥ ५ ॥
स्थानान्तरं पवित्रञ्च तीर्थमायतनं तथा।
श्मशानसंस्थितं वेश्म दिव्य मन्तर्हितञ्च यत् ॥ ६ ॥
भूर्लोकेनैव संयुक्त मन्तरिक्षे शिवालयम्।
अयुक्तास्तु न पश्यन्ति युक्ताः पश्यन्ति चेतसा ॥ ७ ॥
ब्रह्मचर्यव्रतोपेताः सिद्धा वेदान्तकोविदाः।
आदेहपतनाद्यावत् तत् क्षेत्रं यो न मुञ्चति ॥ ८ ॥
ब्रह्मचर्यव्रतैः सम्यक् सम्यगिष्टं मखैर्भवेत्।
अपापात्मा गतिः सर्वा यामुक्ता च क्रियावताम् ॥
यस्तत्र निवसेद्विप्रो संयुक्तात्मा समाहितः।
त्रिकालमपि भुञ्जानो वायुभक्षसमोऽभवत् ॥ १० ॥
निमेषमात्रमपि यो ह्यविमुक्ते तु भक्तिमान्।
ब्रह्मचर्यसमायुक्तः परमं प्राप्नुयात्तपः ॥ ११ ॥
यत्र मासं वसेद्धीरो लघ्वाहारो जितेन्द्रियः।।
सम्यक् तेन व्रतं चीर्णं दिव्यं पाशुपतं महत् ॥१२॥
जन्ममृत्युभयन्तीर्त्वा स याति परमाङ्गतिम्।
नैश्रेयसीं गतिं पुण्यां तथा योगगतिं व्रजेत् ॥१३॥
न हि योगगतिर्दिव्या जन्मान्तरशतैरपि।
प्राप्यते क्षेत्रमाहात्म्यात् प्रभावाच्छङ्करस्य तु ॥ १४ ॥

अप्यन्यत्र गतो यो ऽभिगच्छेत्तु अविमुक्तं कदाचन ।
तस्य क्षेत्रस्य माहात्म्यादन्यब्रह्महत्या निवर्त्तते ॥ १५ ॥
आदेहपतनाद्यावत् क्षेत्रं यो न विमुञ्चति ।
न केवलं ब्रह्महत्या प्राकृता च निवर्त्तते ॥ १६ ॥
प्राप्य विश्वेश्वरं देवं न स भूयोऽभिजायते ।
अनन्यमानसो भूत्वा यो विमुक्तं न मुञ्चति ॥ १७ ॥
तस्य देवः सदा तुष्टः सर्व्वान् कामान् प्रयच्छति ।
द्वारं यत् साङ्ख्ययोगानां स तत्र वसति प्रभुः ॥१८॥
सगणो हि भवो देवो भक्तानामनुकम्पया ।
अविमुक्तं परं क्षेत्रमविमुक्ते परा गतिः ॥ १९ ॥
अविमुक्ते परा सिद्धि रविमुक्ते परं पदम् ।
अविमुक्तं निषेवेत देवर्षिगणसेवितम् ॥ २० ॥
यदीच्छेन्मानवो धीमान् न पुनर्जायते क्वचित् ।
मेरोः शक्तो गुणान् वक्तुं द्वीपानाञ्च तथैव च ॥ २१ ॥
समुद्राणाञ्च सर्व्वेषां नाविमुक्तस्य शक्यते ।
अन्तकाले मनुष्याणां छिद्यमानेषु मर्म्मसु ॥ २२ ॥
वायुना प्रेर्य्यमाणानां स्मृतिर्नैवोपजायते ।
अविमुक्ते ह्यन्तकाले भक्तानामीश्वरः स्वयम् ॥ २३ ॥
कर्म्मभिः प्रेर्य्यमाणानां कर्णजापं प्रयच्छति ।
मणिकर्ण्यां त्यजन्देहं गतिमिष्टां व्रजेन्नरः २४ ॥
ईश्वरप्रेरितो याति दुष्प्रापामकृतात्मभिः ।
अशाश्वतमिदं ज्ञात्वा मानुष्यं बहुकिल्बिषम् ॥ २५ ॥
अविमुक्तं निषेवेत संसारभयमोचनम् ।
योगक्षेमप्रदं दिव्यं बहुविघ्नविनाशनम् ॥ २६ ॥

विघ्नैश्चालोड्यमानोऽपि यो विमुक्तं न मुञ्चति।
स मुञ्चति जरां मृत्युं जन्म चैतदशाश्वतम् ॥ २७ ॥
अविमुक्ते प्रसादात्तु शिवसायुज्यमाप्नुयात्।

## अथ द्व्यशीत्यधिकशततमोऽध्यायः।

देव्युवाच। हिमवन्तं गिरिं त्यक्त्वा मन्दरं गन्धमादनम्।
कैलासं निषधञ्चैव मेरुपृष्ठं महाद्युति ॥ १ ॥
रम्यं त्रिशिखरञ्चैव मानसं सुमहागिरिम्।
देवोद्यानानि रम्याणि नन्दनं वनमेव च ॥ २ ॥
सुरस्थानानि मुख्यानि तीर्थान्यायतनानि च।
तानि सर्वाणि सन्त्यज्य अविमुक्ते रतिः कथम् ॥ ३ ॥
किमत्र सुमहत् पुण्यं परं गुह्यं वदस्व मे।
येन त्वं रमसे नित्यं भूतसङ्घगणैर्युतः ॥ ४ ॥
क्षेत्रस्य प्रवरत्वञ्च ये च तत्र निवासिनः।
तेषामनुग्रहः कश्चित्तत् सर्वं ब्रूहि शङ्कर! ॥ ५ ॥
ईश्वर उवाच। अत्यद्भुतमिमं प्रश्नं यत्त्वं पृच्छसि भामिनि!
तत् सर्वं संप्रवक्ष्यामि तन्मे निगदतः शृणु ॥ ६ ॥
वाराणस्यां नदी पुण्या सिद्धगन्धर्वसेविता।
प्रविष्टा त्रिपथा गङ्गा तस्मिन् क्षेत्रे मम प्रिये! ॥ ७ ॥
मा मेव प्रीतिसन्तुष्टा कृत्तिवासस्य सुन्दरि!।
सर्वेषां चैव स्थानानां स्थानन्तत्तु यथाधिकम् ॥ ८ ॥
तेन कार्य्येण सुश्रोणि! तस्मिन् स्थाने रतिर्मम।

तस्मिन् लिङ्गे च सान्निध्यं मम देवि ! सुरेश्वरि ! ॥९
क्षेत्रस्य च प्रवक्ष्यामि गुणान् गुणवतांवरे ! ।
यान् श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥ १० ॥
यदि पापो यदि शठो यदि वाधार्म्मिकोनरः ।
मुच्यते सर्व्वपापेभ्यो ह्यविमुक्तं व्रजेयदि ॥ ११ ॥
प्रलये सर्व्वभूतानां लोके स्थावरजङ्गमे ।
न हि त्यक्ष्यामि तत् स्थानं महागणगतैर्वृतः ॥ १२ ॥
यत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
वक्तं मम महाभागे ! प्रविशन्ति युगक्षये ॥ १३ ॥
तेषां साक्षादहं पूजां प्रतिगृह्णामि पार्व्वति ! ।
सर्व्वगुह्योत्तमं स्थानं मम प्रियतमं शुभम् ॥ १४ ॥
धन्याः प्रविष्टाः सुश्रोणि ! मम भक्ता द्विजातयः ।
मद्भक्तिपरमा नित्यं ये मद्भक्तास्तु ते नराः ॥ १५ ॥
तस्मिन् प्राणान् परित्यज्य गच्छन्ति परमाङ्गतिम् ।
सदा यजति रुद्रेण सदा दानं प्रयच्छति ॥ १६ ॥
सदा तपस्वी भवति अविमुक्तस्थितोनरः ।
यो मां पूजयते नित्यं तस्य तुष्याम्यहं प्रिये ! ॥ १७॥
सर्व्वदानानि यो दद्यात् सर्व्वयज्ञेषु दीक्षितः ।
सर्व्वतीर्थाभिषिक्तश्च स प्रपद्येत मामिह ॥ १८ ॥
अविमुक्तं सदा देवि ! ये व्रजन्ति सुनिश्चिताः ।
ते तिष्ठन्तीह सुश्रोणि ! मद्भक्तास्त्रिविष्टपे ॥ १९ ॥
मत्प्रसादात्तु ते देवि ! दीव्यन्ति शुभलोचने ! ।
दुर्द्धराश्चैव दुर्द्धर्षा भवन्ति विगतज्वराः ॥ २० ॥
अविमुक्तं शुभं प्राप्य मद्भक्ताः कृतनिश्चयाः ।

निर्धूतपापविमला भवन्ति विगतज्वराः ॥ २१ ॥
पार्वत्युवाच। दक्षयज्ञस्त्वया देव! मत्प्रियार्थं निषूदितः।
अविमुक्तगुणानान्तु न तृप्तिरिह जायते ॥ २२ ॥
ईश्वर उवाच। क्रोधेन दक्षयज्ञस्तु त्वत्प्रियार्थं विनाशितः।
महाप्रिये! महाभागे! नाशितोऽयं वरानने ॥ २३ ॥
अविमुक्ते यजन्ते तु मद्भक्ताः कृतनिश्चयाः।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ २४ ॥
देव्युवाच। दुर्लभास्तु गुणा देव! अविमुक्ते तु कीर्तिताः।
सर्वांस्तान्मम तत्त्वेन कथयस्व महेश्वर! ॥ २५ ॥
कौतूहलं महादेव! हृदिस्थं मम वर्त्तते।
तत् सर्वं मम तत्त्वेन आख्याहि परमेश्वर! ॥ २६ ॥
ईश्वर उवाच। अक्षया ह्यमराश्चैव ह्यदेहाश्च भवन्ति ते।
मत्प्रसादाद्वरारोहे! मामेव प्रविशन्ति वै ॥ २७ ॥
ब्रूहि ब्रूहि विशालाक्षि! किमन्यच्छ्रोतुमर्हसि।
देव्युवाच। अविमुक्ते महाक्षेत्रे अहो पुण्यमहो गुणाः॥२८॥
न तृप्तिमधिगच्छामि ब्रूहि देव। पुनर्गुणान्।
ईश्वर उवाच। महेश्वरि! वरारोहे! शृणु तांस्तु मम प्रिये!॥२९
अविमुक्ते गुणा ये तु तथान्यानपि तच्छृणु।
शाकपर्णाशिनो दान्ताः संप्रक्षाल्या मरीचिपाः ॥३०॥
दन्तोलूखलिनश्चान्ये अश्मकुट्टास्तथापरे।
मासि मासि कुशाग्रेण जलमास्वादयन्ति वै ॥ ३१ ॥
वृक्षमूलनिकेताश्च शिलाशय्यास्तथापरे।
आदित्यवपुषः सर्वे जितक्रोधा जितेन्द्रियाः ॥ ३२ ॥
एवं बहुविधैर्धर्मैरन्यत्र चरितव्रताः।

त्रिकालमपि भुञ्जाना येऽविमुक्तनिवासिनः ॥ ३३ ॥
तपश्चरन्ति चान्यत्र कलां नार्हन्ति षोडशीम् ।
येऽविमुक्ते वसन्तीह स्वर्गं प्रतिवसन्ति ते ॥ ३४ ॥
मत्समः पुरुषो नास्ति त्वत्समा नास्ति योषिताम् ।
अविमुक्तसमं क्षेत्रं न भूतं न भविष्यति ॥ ३५ ॥
अविमुक्ते परो योगो ह्यविमुक्ते परा गतिः ।
अविमुक्ते परो मोक्षः क्षेत्रं नैवास्ति तादृशम् ॥ ३६॥
परं गुह्यं प्रवक्ष्यामि तत्त्वेन वरवर्णिनि ! ।
अविमुक्ते महाक्षेत्रे यदुक्तं हि मया पुरा ॥ ३७ ॥
जन्मान्तरशतैर्देवि ! योगोऽयं यदि लभ्यते ।
मोक्षः शतसहस्रेण जन्मना लभ्यते न वा ॥ ३८ ॥
अविमुक्ते न सन्देहो मद्भक्तः कृतनिश्चयः ।
एकेन जन्मना सोऽपि योगं मोक्षं च विन्दति ॥ ३९ ॥
अविमुक्ते नरा देवि ! ये व्रजन्ति सुनिश्चिताः ।
ते विशन्ति परं स्थानं मोक्षं परमदुर्लभम् ॥ ४० ॥
पृथिव्यामीदृशं क्षेत्रं न भूतं न भविष्यति ।
चतुर्मूर्त्तिः सदा धर्मो तस्मिन् सन्निहितः प्रिये !॥४१॥
चतुर्णामपि वर्णानां गतिस्तु परमा स्मृता ।
देव्युवाच । श्रुता गुणास्ते क्षेत्रस्य इह चान्यत्र ये प्रभो ! ॥४२॥
वदस्व भुवि विप्रेन्द्राः कं वा यज्ञैर्यजन्ति ते ।
ईश्वर उवाच । इज्या चैव तु मन्त्रेण मामेव हि यजन्ति ये॥४३
न तेषां भयमस्तीति भवं रुद्रं यजन्ति यत् ।
अमन्त्रो मन्त्रको देवि ! द्विविधो विधिरुच्यते ॥ ४४ ॥
साङ्ख्यं चैवाथ योगश्च द्विविधो योगउच्यते

सर्वभूत स्थितं यो मां भजत्येकत्वमास्थितः ॥ ४५ ॥
सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते।
आत्मौपम्येन सर्वत्र सर्वं च मयि पश्यति ॥ ४६ ॥
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।
निर्गुणः सगुणो यापि योगस्य कथितो भुवि ॥ ४७ ॥
सगुणश्चैव विज्ञेयो निर्गुणो मनसः परः।
एतत्ते कथितं देवि! यन्मांत्वं परिपृच्छसि ॥ ४८॥
देव्युवाच। या भक्ति स्त्रिविधा प्रोक्ता भक्तानां बहुधा त्वया।
तामहं श्रोतुमिच्छामि तत्वतः कथयस्व मे ॥ ४९ ॥
ईश्वर उवाच। शृणु पार्वति! देवेशि! भक्तानां भक्तिवत्सले।
प्राप्य साङ्ख्यस्य योगस्य दुःखान्तञ्च नियच्छति ॥ ५० ॥
सदा यः सेवते भिक्षां ततो भवति रञ्जितः।
रञ्जनात् तन्मयो भूत्वा लीयते स तु भक्तिमान् ॥ ५१ ॥
शास्त्राणान्तु वरारोहे! बहुकारणदर्शिनः।
न मां पश्यन्ति ते देवि! ज्ञानवाक्यविवादिनः ॥ ५२ ॥
परमार्थज्ञानदक्षा युक्ता जानन्ति योगिनः।
विद्यया विदितात्मानो योगस्य च द्विजातयः ॥ ५३ ॥
प्रत्याहारेण शुद्धात्मा नान्यथा चिन्तयेच्च तत्।
तुष्टिश्च परमां प्राप्य योगं मोक्षं परं तथा ॥ ५४ ॥
त्रिभिर्गुणैः समायुक्तो ज्ञानवान् पश्यतीह माम्।
एतत्ते कथितं देवि! किमन्यच्छ्रोतुमर्हसि ॥ ५५ ॥
भूय एव वरारोहे! कथयिष्यामि सुव्रते!।
गुह्यं पवित्रमथवा यच्चापि हृदि वर्त्तते ॥ ५६ ॥
तत्सर्वं कथयिष्यामि शृण्वेकमनाः प्रिये।

देव्युवाच। त्वद्रूपं कीदृशं देव! युक्ताः पश्यन्ति योगिनः ॥५७
पश्यन् मे संशयं ब्रूहि नमस्ते सुरसत्तम!।

श्रीभगवानुवाच।

अमूर्तं चैव मूर्तञ्च ज्योतीरूपं हि तत् स्मृतम्। ॥५८॥
तस्योपलब्धिमन्विच्छन् यत्नः कार्यो विजानता।
गुणैर्वियुक्तो भूतात्मा एवं वक्तुं न शक्यते॥ ५९॥
शक्यते यदि वक्तुं वै दिव्यैर्वर्षशतैरपि वा।

देव्युवाच। किं प्रमाणन्तु तत् क्षेत्रं समन्तात् सर्वतो दिशम् ६०
यत्र नित्यं स्थितो देवो महादेवो गणैर्युतः।

ईश्वर उवाच। द्वियोजनन्तु तत् क्षेत्रं पूर्वपश्चिमतः स्मृतम्॥६१
अर्द्धयोजनविस्तीर्णं तत्क्षेत्रं दक्षिणोत्तरम्।
वाराणसी तदीया च यावच्छुक्लनदी तु वै॥ ६२॥
भीष्मचण्डिकमारभ्य पर्वतेश्वरमन्तिके।
गणा यत्रावतिष्ठन्ति मन्नियुक्ता विनायकाः॥ ६३॥
कुष्माण्डराजः शम्भोश्च जयन्तश्च मदोत्कटाः।
सिंहव्याघ्रमुखाः केचिद्विकटाः कुब्जवामनाः॥ ६४॥
तत्र नन्दी महाकालश्चण्डघण्टो महेश्वरः।
दण्डचण्डेश्वरश्चैव घण्टाकर्णो महाबलः॥ ६५॥
एते चान्ये च बहवो गणाश्चैव गणेश्वराः।
महोदरा महाकाया वज्रशक्तिधरास्तथा॥ ६६॥
रक्षन्ति सततं देवि! ह्यविमुक्तं तपोवनम्।
द्वारे द्वारे च तिष्ठन्ति शूलमुद्गरपाणयः॥ ६७॥
सुवर्णशृङ्गीं रौप्यखुरां चैलाजिनपयस्विनीम्।
वाराणस्यान्तु यो दद्यात्सवत्सां कमललोचने!॥ ६८॥

गां दत्त्वा तु वरारोहे ! ब्राह्मणे वेदपारगे ।
आसप्तमं कुलं तेन तारितं नात्र संशयः ॥ ६९ ॥
यो दद्याद् ब्राह्मणे किञ्चित् तस्मिन् क्षेत्रे वरानने ! ।
कनकं रजतं वस्त्रमन्नाद्यं बहुविस्तरम् ॥ ७० ॥
अक्षयं चाक्षयं चैव स्यातां तस्य सुलोचने ! ।
शृणु तत्त्वेन तीर्थस्य विभूतिं व्युष्टिमेव च ॥ ७१ ॥
तत्र स्नात्वा महाभागे ! भवन्ति निरुजा नराः ।
दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ ७२ ॥
तदवाप्नोति धर्मात्मा तत्र स्नात्वा वरानने ! ।
बहु स्वल्पं च यो दद्याद् ब्राह्मणे वेदपारगे ॥ ७३ ॥
शुभां गतिमवाप्नोति अग्निवच्चैव दीप्यते ।
वाराणसीजाह्नवीभ्यां सङ्गमे लोकविश्रुते ॥ ७४ ॥
दत्त्वान्नं च विधानेन न स भूयोऽभिजायते ।
एतत्ते कथितं देवि ! तीर्थस्य फलमुत्तमम् ॥ ७५ ॥
उपवासन्तु यः कृत्वा विप्रान् सन्तर्पयेन्नरः ।
सौत्रामणेश्च यज्ञस्य फलं प्राप्नोति मानवः ॥ ७६ ॥
एकाहारस्तु यस्तिष्ठेन्मासं तत्र वरानने ! ।
यावज्जीवकृतं पापं सहसा तस्य नश्यति ॥ ७७ ॥
अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः ।
प्रविशन्ति मुखन्ते मे निःसन्दिग्धं वरानने ! ॥ ७८ ॥
दशसौवर्णिकं पुण्यं योऽविमुक्ते प्रयच्छति ।
अग्निहोत्रफलं धूपे गन्धदाने तथा शृणु ॥ ७९ ॥
भूमिदानेन तत्तुल्यं गन्धदान फलं स्मृतम् ।
संमार्जने पञ्चशतं सहस्रमनुलेपने ॥ ८० ॥

मानसं ततश्चान्यत् भगनां गीतवादितः ।
देव्युवाच । अत्यद्भुतमिदं देव स्थानमेतत् प्रकीर्तितम् ॥८१॥
रहस्यं श्रोतुमिच्छामि यदर्थंत्वं न मुञ्चसि ।
ईश्वर उवाच । आसीत् पूर्वं वरारोहे ! ब्रह्मणस्तु शिरोवरम्८२
पञ्चमं च सुश्रोणि ! जातं काञ्चनसप्रभम् ।
ज्वलत्तत् पञ्चमं शीर्षं जातं तस्य महात्मनः ॥ ८३ ॥
तदैव मन्मोहे देवि ! जन्म जानामि ते ह्यहम् ।
ततः क्रोधपरीतेन संरक्तनयनेन च ॥ ८४ ॥
वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य शिरोमया ।
ब्रह्मोवाच । तदा निरपराधस्य शिरश्छिन्नं त्वया मम॥८५॥
तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि ।
ब्रह्महत्याकुलीभूत्वा चर तीर्थानि भूतले ॥ ८६ ॥
ततोऽहं गतवान् देवि ! हिमवन्तं शिलोच्चयम् ।
तत्र नारायणः श्रीमान्मया भिक्षां प्रयाचितः ॥८७॥
ततस्तेन स्वकं पार्श्वं नखाग्रेण विदारितम् ।
स्रवती महती धारा तस्य रक्तस्य निःसृता ॥ ८८ ॥
प्रयातासाति विस्तीर्णा योजनार्द्धशतन्तदा ।
न संपूर्णं कपालन्तु घोर मम तदद्भुतम् ॥ ८९ ॥
दिव्यं वर्षसहस्रन्तु साच धारा प्रवाहिनी ।
प्रोवाच भगवान्विष्णुः कपालं कुत ईदृशम् ॥ ९० ॥
आश्चर्यभूतं देवेश ! संशयो हृदि वर्तते ।
कुतश्च सम्भवो देव ! सर्वं मे ब्रूहि पृच्छतः ॥ ९१ ॥
देवदेव उवाच । श्रूयतामस्य हे देव ! कपालस्य तु सम्भवः ।
शतं वर्षसहस्राणां तपस्तप्त्वा सुदारुणम् ॥ ९२ ॥

ब्रह्मासृजदृषिर्दिव्यमद्भुतं लोमहर्षणम्।
तपसश्च प्रभावेण दिव्यं काञ्चनसन्निभम्॥ ९३॥
ज्वलत्तत् पञ्चमं शीर्षं जातं तस्य महात्मनः।
निकृत्तन्तं मया देव! तदिदं पश्य दुर्जयम्॥ ९४॥
यत्र यत्र च गच्छामि कपालं तत्र गच्छति।
एवमुक्तस्ततो देवः प्रोवाच पुरुषोत्तमः॥ ९५॥
श्रीभगवानुवाच। गच्छ गच्छ स्वकं स्थानं ब्रह्मणस्त्वं प्रियङ्कुरु।
तस्मिन् स्थास्यति भद्रन्ते कपालं तस्य तेजसा॥९६॥
ततः सर्वाणि तीर्थानि पुण्यान्यायतनानि च।
गतोऽस्मि पृथुलश्रोणि! न क्वचित् प्रत्यतिष्ठत॥ ९७॥
ततोऽहं समनुप्राप्तो ह्यविमुक्ते महाशये!।
अवस्थितः स्वके स्थाने शापश्च विगतो मम॥ ९८॥
विष्णुप्रसादात् सुश्रोणि! कपालं तत् सहस्रधा।
स्फुटितं बहुधा जातं स्वप्नलब्धं धनं यथा॥ ९९॥
ब्रह्महत्यापहं तीर्थं क्षेत्रमेतन्मया कृतम्।
श्मशानमेतद्गुह्यं मे देवानां वरवर्णिनि!॥ १००॥
कालो भूत्वा जगत् सर्वं संहरामि सृजामि च।
देवेशि! सर्वगुह्यानां स्थानं प्रियतरं मम॥ १०१॥
मद्भक्तास्तत्र गच्छन्ति विष्णुभक्तास्तथैव च।
ये भक्ता भास्करे देवि! लोकनाथे दिवाकरे॥१०२॥
तत्रस्थो यस्त्यजेद्देहं मामेव प्रविशेत्तु सः।
व्युवाच। अत्यद्भुतमिदं देव! यदुक्तं पद्मयोनिना॥ १०३॥
त्रिपुरान्तकरस्थानं गुह्यमेतन्महाद्युते!।

सन्निधानात्तु ते सर्वे कालं नार्हन्ति षोडशीम् ॥१०४॥
यत्र तिष्ठति देवेशो यत्र तिष्ठति शङ्करः।
गङ्गातीर्थसहस्राणां तुल्या भवति वानवा ॥१०५॥
त्वमेव भक्तिर्देवेश! त्वमेव गतिरुत्तमा।
ब्रह्मादीनान्तु ते देव! गतिरुक्ता सनातनी।
प्राप्नुते यद्द्विजातीनां भक्तानामनुकम्पया ॥१०६॥

---

अथ त्र्यशीत्यधिकशततमोऽध्यायः।

महेश्वर उवाच। सेवितं बहुभिः सिद्धैरपुनर्भवकाङ्क्षिभिः।
विदित्वा तु परं क्षेत्रमविमुक्तनिवासिनाम् ॥१॥
तद्गुह्यं देवदेवस्य तत्तीर्थं तत्तपोवनम्।
परं स्थानं तु ते यान्ति सम्भवन्ति न ते पुनः ॥२॥
ज्ञाने विहितनिष्ठानां परमानन्दमिच्छताम्।
या गतिर्विहिता सद्भिः सा विमुक्ते मृतस्य तु ॥३॥
भवस्य प्रीतिरतुला ह्यविमुक्ते ह्यनुत्तमा।
असङ्गोऽयं फलं तत्र ह्यचया च गतिर्भवेत् ॥४॥
परं गुह्यं समाख्यातं श्मशानमिति संज्ञितम्।
अविमुक्तं न सेवन्ते वञ्चितास्ते नरा भुवि ॥५॥
अविमुक्ते स्थितैः पुण्यैः पांसुभिर्वायुनेरितैः।
अपि दुष्कृतकर्माणो यास्यन्ति परमाङ्गतिम् ॥६॥
मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः।
अविमुक्तं समासाद्य तत् सर्वं व्रजति क्षयम् ॥७॥

श्मशानमिति विख्यातमविमुक्तं शिवालयम्।
तद्गुह्यं देवदेवस्य तत्तीर्थं तत्तपोवनम्॥ ८॥
तत्र ब्रह्मादयो देवा नारायणपुरोगमाः।
योगिनश्च तथा साध्या भगवन्तं सनातनम्॥ ९॥
उपासन्ते शिवं भक्त्या मद्भक्ता मत्परायणाः।
या गतिर्ज्ञानतपसां या गतिर्यज्ञयाजिनाम्॥ १०॥
अविमुक्ते मृतानान्तु सा गतिर्विहिता शुभा।
संहर्तारश्च कर्त्तारस्मिन् ब्रह्मादयः सुराः॥ ११॥
तस्माद्विराजसा लोका जायन्ते ह्यपुनर्भवाः।
महर्जनस्तपश्चैव सत्यलोकस्तथैव च॥ १२॥
मनसः परमो योगो भूतभव्यभवस्य च।
ब्रह्मादिस्थावरान्तस्य योनो साङ्ख्यादिमोक्षयोः॥ १३॥
ये ऽविमुक्तं न मुञ्चन्ति नरास्ते नैव चिन्तिताः।
उत्तमं सर्वतीर्थानां स्थानानामुत्तमञ्च यत्॥ १४॥
क्षेत्राणामुत्तमं चैव श्मशानानां तथैव च।
तटाकानाञ्च सर्वेषां कूपानां स्रोतसां तथा॥ १५॥
शैलानामुत्तमञ्चैतत्तडागानां तथोत्तमम्।
पुण्यकृद्भवभक्तैश्च ह्यविमुक्तन्तु सेव्यते॥ १६॥
ब्रह्मणः परमं स्थानं ब्रह्मणाध्यासितञ्च यत्।
ब्रह्मणा सेवितं नित्यं ब्रह्मणा चैव रक्षितम्॥ १७॥
अत्रैव सप्तभुवनं काञ्चनो मेरुपर्वतः।
मनसः परमो योगः प्रीत्यर्थं ब्रह्मणः स तु॥ १८॥
ब्रह्मा तु तत्र भगवांस्त्रिसन्ध्यं चेश्वरे स्थितः।
पुण्यात् पुण्यतमं क्षेत्रं पुण्यकृद्भिर्निषेवितम्॥ १९॥

आदित्योपासनं कृत्वा विप्रायाममरताङ्गताः ।
अन्येऽपि ये त्रयो वर्णा भवभक्त्या समाहिताः ॥२० ॥
अविमुक्ते तनुन्त्यक्त्वा गच्छन्ति परमाङ्गतिम् ।
अष्टौ मासान् विहारस्य यतीनां संयतात्मनाम् ॥२१ ॥
एकत्र चतुरो मासान् मासौ वा निवसेत् पुनः ।
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ॥ २२ ॥
न देहो भविता तत्र दृष्टं शास्त्रे पुरातने ।
मोक्षो ह्यसंशयस्तत्र पञ्चत्वन्तु गतस्य वै ॥ २३ ॥
स्त्रियः पतिव्रता याश्च भवभक्ताः समाहिताः ।
अविमुक्ते विमुक्तास्ता यास्यन्ति परमाङ्गतिम् ॥ २४ ॥
अन्या याः कामचारिण्यः स्त्रियो भोगपरायणाः ।
कालेन निधनं प्राप्ता गच्छन्ति परमाङ्गतिम् ॥ २५॥
यत्र योगश्च मोक्षश्च प्राप्यते दुर्लभो नरैः ।
अविमुक्तं समासाद्य नान्यद्गच्छेत्तपोवनम् ॥ २६ ॥
सर्वात्मना तपः सेव्यं ब्राह्मणैर्नात्र संशयः ।
अविमुक्ते वसेद्यस्तु मम तुल्यो भवेन्नरः ॥ २७ ॥
यतो मया न मुक्तं हि त्वविमुक्तं ततः स्मृतम् ।
अविमुक्तं न सेवन्ते मूढा ये तमसावृताः ॥ २८ ॥
विण्मूत्ररेतसां मध्ये ते वसन्ति पुनः पुनः ।
कामः क्रोधश्च लोभश्च दम्भस्तम्भोऽतिमत्सरः ॥ २९ ॥
निद्रा तन्द्रा तथालस्यं पैशुन्यमिति ते दश ।
अविमुक्ते स्थिता विघ्नाः शक्रेण विहिताः स्वयम् ॥३०॥
विनायकोपसर्गाश्च सततं मूर्ध्नि तिष्ठति ।
पुण्यमेतद्भवेत् सर्वं भक्तानामनुकम्पया ॥ ३१ ॥

परं गुह्यमिति ज्ञात्वा ततः शास्त्रानुदर्शनात्।
त्र्याहृतं देवदेवैस्तु मुनिभिस्तत्त्वदर्शिभिः॥ ३२॥
मेदसा विप्लुता भूमिरविमुक्ता तु वर्जिता।
पूता समभवत् सर्वा महादेवेन रक्षिता॥ ३३॥
संस्कारस्तेन क्रियते भूमेरन्यत्र सूरिभिः।
ये भक्ता वरदं देवमचरं परमं पदम्॥ ३४॥
देवदानवगन्धर्वैर्यक्षरक्षोमहोरगाः।
अविमुक्तमुपासन्ते तन्निष्ठास्तत्परायणाः॥ ३५॥
ते विशन्ति महादेवमाज्याहुतिरिवानलम्।
तं वै प्राप्य महादेवमीश्वराध्युषितं शुभम्॥ ३६॥
अविमुक्तं कृतार्थोऽस्मीत्यात्मानमुपलभ्यते।
ऋषिदेवासुरगणैर्जपहोमपरायणैः॥ ३७॥
यतिभिर्मोक्षकामैश्च ह्यविमुक्तं निषेव्यते।
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी॥ ३८॥
ईश्वरानुगृहीता हि सर्वे यान्ति परां गतिम्।
द्वियोजनमथार्धञ्च तत् क्षेत्रं पूर्वपश्चिमम्॥ ३९॥
अर्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्मृतम्।
वाराणसी तदीया च यावच्छुक्लनदी तु वै॥ ४०॥
एतत् क्षेत्रस्य विस्तारः प्रोक्तो देवेन धीमता।
लब्ध्वा योगञ्च मोक्षञ्च काङ्क्षन्तो ज्ञानमुत्तमम्॥ ४१॥
अविमुक्तं न मुञ्चन्ति तन्निष्ठास्तत्परायणाः।
तस्मिन् वसन्ति ये मर्त्या न ते शोच्याः कदाचन॥४२॥
योगक्षेत्रं तपःक्षेत्रं सिद्धगन्धर्वसेवितम्।
सरितः सागराः शैला नाविमुक्तसमा भुवि॥ ४३॥

भूर्लोके चान्तरिक्षे च दिवि तीर्थानि यानि च ।
अतीत्य वर्तते चान्यदविमुक्तं प्रभावतः ॥ ४४॥
ये तु ध्यानं समासाद्य युक्तात्मानः समाहिताः ।
सन्नियम्येन्द्रियग्रामं जपन्ति शतरुद्रियम् ॥ ४५ ॥
अविमुक्ते स्थिता नित्यं कृतार्थास्ते द्विजातयः ।
भवभक्तिं समासाद्य रमन्ते तु सुनिश्चिताः ॥ ४६ ॥
संहृत्य शक्तितः कामान् विषयेभ्यो बहिः स्थिताः ।
शक्तितः सर्वतो मुक्ताः शक्तितस्तपसि स्थिताः ॥ ४७॥
करणानीह चात्मानमपुनर्भवभाविताः ।
तं वै प्राप्य महात्मानमीश्वरन्निर्भयाः स्थिताः ॥४८॥
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ।
अविमुक्ते तु म्रियन्ते भवेन विभुना स्वयम् ॥४९ ॥
उत्पादितं महाक्षेत्रं सिध्यन्ति यत्र मानवाः ।
उद्देशमात्रं कथिता अविमुक्तगुणास्तथा ॥ ५० ॥
समुद्रस्येव रत्नानामविमुक्तस्य विस्तरम् ।
मोहनं तदभक्तानां भक्तानां भक्तिवर्धनम् ॥ ५१॥
मूढास्ते तु न पश्यन्ति श्मशानमिति मोहिताः ।
हन्यमानोऽपि यो विद्वान् वसेद्विघ्नशतैरपि ॥ ५२ ॥
स याति परमं स्थानं यत्र गत्वा न शोचति ।
जन्ममृत्युजरामुक्तः परं याति शिवालयम् ॥ ५३॥
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम् ।
यां प्राप्य कृतकृत्यः स्यादिति मन्येत पण्डितः ॥५४॥
न दानैर्न तपोभिर्वा न यज्ञैर्नापि विद्यया ।
प्राप्यते गतिरिष्टा या ह्यविमुक्ते तु लभ्यते ॥ ५५॥

नानावर्णा विवर्णाश्च चण्डाला ये जुगुप्सिताः।
किल्बिषैः पूर्णदेहाश्च प्रकृष्टैः पातकैस्तथा ॥ ५६ ॥
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः।
आत्यन्तरसहस्रेषु ह्यविमुक्ते म्रियेत यः ॥ ५७ ॥
भक्तो विश्वेश्वरे देवे न स भूयोऽभिजायते।
यच्चेष्टं हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ ५८ ॥
सर्वमक्षयमेतस्मिन्नविमुक्ते न संशयः।
कालेनोपरता यान्ति भवे सायुज्यमक्षयम् ॥ ५९ ॥
कृत्वा पापसहस्राणि पश्चात् सन्तापमेत्य वै।
यो विमुक्ते वियुज्येत स याति परमाङ्गतिम् ॥ ६० ॥
उत्तरं दक्षिणं चापि अयनं न विकल्पयेत्।
सर्वस्तेषां शुभः कालो ह्यविमुक्ते म्रियन्ति ये ॥ ६१ ॥
न तत्र कालो मीमांस्यो ह्यशुभो वा यदि वा शुभः।
तस्य देवस्य माहात्म्यस्थानमद्भुतकर्मणः ॥ ६२ ॥
सर्वेषामेव नाथस्य सर्वेषां विभुना स्वयम्।
श्रुत्वेदं ऋषयः सर्वे स्कन्देन कथितं पुरा।
अविमुक्ताश्रमं पुण्यं भावयेत् कारणैः शुभैः ॥ ६३ ॥

---

## अथ चतुरशीत्यधिकशततमोऽध्यायः।

सूत उवाच। अविमुक्ते महापुण्ये आस्तिकाः शुभदर्शनाः।
विस्मयं परमं जग्मुर्हर्षगद्गदनिस्वनाः ॥ १ ॥
ऊचुस्ते हृष्टमनसः स्कन्दं धर्मविदां वरम्।
ब्रह्मणो देव! पौत्रस्त्वं ब्रह्मण्यो ब्रह्मणः प्रियः ॥ २ ॥

ब्राह्मणो ब्रह्मविद्ब्रह्मा ब्रह्मेन्द्रो ब्रह्मलोककृत् ।
ब्रह्मकृद्ब्रह्मचारी त्वं ब्रह्मादिर्ब्रह्मवत्सलः ॥ ३ ॥
ब्रह्मतुल्योद्भवकरो ब्रह्मतुल्य नमोऽस्तु ते ।
ऋषयो भावितात्मानः श्रुत्वेदं पावनं महत् ॥ ४ ॥
तत्त्वन्तु परमं ज्ञातं यत् ज्ञात्वा मृतमश्नुते ।
स्वस्तितेऽस्तु गमिष्यामो भूर्लोकं शङ्करालयम् ॥ ५ ॥
यत्रासौ सर्वभूतात्मा स्थाणुभूतः स्थितः प्रभुः ।
सर्वलोकहितार्थाय तपस्युग्रे व्यवस्थितः ॥ ६ ॥
संयोज्य योगेनात्मानं रौद्रीं तनुमुपाश्रितः ।
गुह्यकैरालभूतस्त आत्मतुल्यगुणैर्वृतः ॥ ७ ॥
ततो ब्रह्मादिभिर्देवैः सिद्धैश्च परमर्षिभिः ।
विज्ञप्तः परया भक्त्या त्वत्प्रसादात्सुरेश्वर ! ॥ ८ ॥
वस्तुमिच्छाम नियतमविमुक्ते सुनिश्चिताः ।
एवं गुणे तथा मर्त्या ह्यविमुक्ते वसन्ति ये ॥ ९ ॥
धर्मशीला जितक्रोधा निर्ममा नियतेन्द्रियाः ।
ध्यानयोगपराः सिद्धिं गच्छन्ति परमाव्ययाम् ॥१०॥
योगिनो योगसिद्धाश्च योगमोक्षप्रदं विभुम् ।
उपासन्ते भक्तियुक्ताः शान्ता योगगतिङ्गताः ॥ ११ ॥
स्थानं गुह्यं श्मशानानां सर्वेषामेतदुच्यते ।
न हि योगादृते मोक्षः प्राप्यते भुवि मानवैः ॥ १२॥
अविमुक्ते तु वसतां योगो मोक्षश्च सिध्यति ।
अनेन जन्मनैवेह प्राप्यते गतिरुत्तमा ॥ १३ ॥
एक एव प्रभावोऽस्ति क्षेत्रस्य परमेश्वरि ! ।
एकेन जन्मना देवि ! मोक्षं परमवाप्नुयात्तमम् ॥ १४ ॥

अविमुक्ते निवसता व्यासेनामिततेजसा।
नैव लब्धा क्वचिद्भिक्षा भ्रममाणेन यत्नतः॥ १५॥
क्षुधाविष्टस्ततः क्रुद्धोऽचिन्तयच्छापमुत्तमम्।
दिने दिने प्रति व्यासः षण्मासं योऽवतिष्ठति॥१६॥
कथं ममेदं नगरं भिक्षादोषादवर्त्तिदम्।
विप्रो वा क्षत्रियो वापि विधवा ब्राह्मणोऽपि वा॥ १७॥
संस्कृतासंस्कृता वापि परिपक्वाः कथन्तु मे।
न प्रयच्छन्ति वै लोका ब्राह्मणाद्यर्थकारकम्॥ १८॥
एषां शापं प्रदास्यामि तीर्थस्य नगरस्य तु।
तीर्थत्वातीर्थतां यातु नगरं शापयाम्यहम्॥ १९॥
मा भूत्त्रिपुरुषी विद्या मा भूत्त्रिपुरुषं धनम्।
मा भूत्त्रिपुरुषं सख्यं व्यासो वाराणसीं शपन्॥२०॥
अविमुक्ते निवसतां जनानां पुण्यकर्म्मणाम्।
विघ्नं सृजामि सर्वेषां येन सिद्धिर्न विद्यते॥ २१॥
व्यासचित्तं तदा ज्ञात्वा देवदेव उमापतिः।
भीतभीतस्तदा गौरीं तां प्रियां पर्य्यभाषत॥ २२॥
शृणु देवि! वचो मह्यं यादृगं प्रत्युपस्थितम्।
कृष्णद्वैपायनः कोपाच्छापं दातुं समुद्यतः॥ २३॥
देव्युवाच। किमर्थं शपते क्रुद्धो व्यासः केन प्रकोपितः।
किं कृतं भगवंस्तस्य येन शापं प्रयच्छति॥ २४॥
देवदेव उवाच। अनेन सुतपस्तप्तं बहून् वर्षगणान् प्रिये।
मौनिना ध्यानयुक्तेन द्वादशाब्दान् वरानने!॥ २५॥
ततः क्षुधा सुसञ्जाता भिक्षामटितुमागतः।
नैवास्य केनचिद्भिक्षा ग्रासार्द्धमपि भामिनि!॥ २६॥

एवं भगवतः काल आसीत् षाण्मासिको मुनिः।
ततः क्रोधपरीतात्मा शापं दास्यति सोऽधुना ॥ २७ ॥
यावन्नेष प्रपित्तावदुपायस्तत्र चिन्त्यताम्।
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रिये ! ॥ २८ ॥
कोऽस्य शापान्न विभेति ह्यपि साक्षात् पितामहः।
अदैवं दैवतं कुर्य्यात् दैवं चाप्यपदैवतम् ॥ २९ ॥
आवान्तु मानुषौ भूत्वा गृहस्थाविहवासिनौ।
तस्य तृप्तिकरीं भिक्षां प्रयच्छावो वरानने ! ॥ ३० ॥
एवमुक्ता ततो देवी देवेन शम्भुना तदा।
व्यासस्य दर्शनं दत्त्वा कृत्वा वेषन्तु मानुषम् ॥ ३१ ॥
एह्येहि भगवन् ! मत्तो भिक्षां ग्राहय सत्तम !।
अस्मद्गृहे कदाचित् त्वं नागतोऽसि महामुने ! ॥ ३२ ॥
एतच्छ्रुत्वा प्रीतमना भिक्षां ग्रहीतुमागतः।
भिक्षां दत्त्वा तु व्यासाय षड्रसाममृतोपमाम् ॥ ३३ ॥
अनास्वादितपूर्वा सा भक्षिता मुनिना तदा।
भिक्षां व्यासस्ततो भुक्त्वा चिन्तयन् हृष्टमानसः ॥ ३४ ॥
ववन्दे वरदं देवं देवीञ्च गिरिजां तदा।
व्यासः कमलपत्राक्ष इदं वचनमब्रवीत् ॥ ३५ ॥
देवो देवी नदी गङ्गा मिष्टमन्नं शुभा गतिः।
वाराणस्यां विशालाक्षि! वासः कस्य न रोचते ॥ ३६ ॥
एवमुक्त्वा ततो व्यासो नगरीमवलोकयन्।
चिन्तयानस्ततो भिक्षां हृदयानन्दकारिणीम् ॥ ३७ ॥
अपश्यत् पुरतो देवं देवीञ्च गिरिजां तदा।
गृहाङ्गणस्थितं व्यासं देवदेवोऽब्रवीदिदम् ॥ ३८ ॥

इह चैते न वस्तव्यं क्रोधनस्त्वं महामुने!।
एवं विस्मयमापन्नो देवं व्यासोऽब्रवीदिदम्॥ ३९ ॥
व्यास उवाच। चतुर्दश्यामथाष्टम्यां प्रवेशं दातुमर्हसि।
एवमस्त्वित्यनुज्ञाय तत्रैवान्तरधीयत ॥ ४० ॥
न तद्‌गृहं न सा देवी न देवो ज्ञायते क्वचित्।
एवं त्रैलोक्यविख्यातः पुरा व्यासो महातपाः ॥४१ ॥
ज्ञात्वा चैत्रगुणान् सर्वान् स्थितस्तस्यैव पार्श्वतः।
एवं व्यासं स्थितं ज्ञात्वा चैवं शंसन्ति पण्डिताः ॥४२॥
अविमुक्तगुणानान्तु कः समर्थो वदिष्यति।
देवब्राह्मणविद्विष्टा देवभक्तिविडम्बकाः ॥ ४३ ॥
ब्रह्मघ्नाय कृतघ्नाय तथा नैष्कृतिकाय ये।
लोकद्विषो गुरुद्विषस्तीर्थायतनदूषकाः ॥ ४४ ॥
सदा पापरताश्चैव ये चान्ये कुत्सिता भुवि।
तेषां नास्तीति वासो वै स्थितो सौ दण्डनायकः ॥४५॥
रक्षणार्थं नियुक्तं वै दण्डनायकमुत्तमम्।
पूजयित्वा यथाशक्त्या गन्धपुष्पादिधूपकैः ॥ ४६ ॥
नमस्कारं ततः कृत्वा नायकस्य तु मन्त्रवित्।
सर्ववर्णावृते चैवे नानाविधसरीसृपे ॥ ४७ ॥
ईश्वरानुगृहीता हि गतिं गाणेश्वरीं गताः।
नानारूपधरा दिव्या नानावेषधरास्तथा ॥ ४८ ॥
सुरा वै ये तु सर्वे च तन्निष्ठास्तत्परायणाः।
यदिच्छन्ति परं स्थानं अचयन्तदवाप्नुयुः ॥ ४९ ॥
'धरं पुरं देवपुराद्विशिष्यते तदुत्तरं ब्रह्मपुरात् पुरस्थितम्।
तपोबलादीश्वरयोगनिर्मितं न तत् समं ब्रह्मादिकौकसालयम्

मनोरमं कामगमं ह्यनामयं अतीत्य तेजांसि तपांसि योगवत्॥५०॥

अधिष्ठितञ्च तत्स्थाने देवदेवो विराजते।
तपांसि यानि तप्यन्ते व्रतानि नियमाश्च ये॥ ५१॥
सर्वतीर्थाभिषेकं तु सर्वदानफलानि च।
सर्वयज्ञेषु यत् पुण्यमविमुक्ते तदाप्नुयात्॥ ५२॥
अतीतं वर्तमानञ्च अज्ञानात् ज्ञानतोऽपि वा।
सर्वं तस्य च यत् पापं चैवं दृष्ट्वा विनश्यति॥५३॥
शान्तैर्दान्तैस्तपस्तप्तं यत् किञ्चित् धर्मसंज्ञितम्।
सर्वं च तदवाप्नोति अविमुक्ते जितेन्द्रियः॥ ५४॥
अविमुक्तं समासाद्य लिङ्गमर्चयते नरः।
कल्पकोटिशतैश्चापि नास्ति तस्य पुनर्भवः॥ ५५॥
अमरा ह्यक्षयाश्चैव क्रीडन्ति भवसन्निधौ।
क्षेत्रतीर्थोपनिषदमविमुक्तं न संशयः॥ ५६॥
अविमुक्ते महादेवमर्चयन्ति स्तुवन्ति वै।
सर्वपापविनिर्मुक्तास्ते तिष्ठन्त्यजरामराः॥ ५७॥
सर्वकामाश्च ये यज्ञाः पुनरावृत्तिकाः स्मृताः।
अविमुक्ते मृता ये च सर्वे ते ह्यनिवर्तकाः॥ ५८॥
ग्रहनक्षत्रताराणां कालेन पतनाद्भयम्।
अविमुक्ते मृतानान्तु पतनं नैव विद्यते॥ ५९॥
कल्पकोटिसहस्रैश्च कल्पकोटिशतैरपि।
न तेषां पुनरावृत्तिर्मृता ये क्षेत्र उत्तमे॥ ६०॥
संसारसागरे घोरे भ्रमन्तः कालपर्ययात्।
अविमुक्तं समासाद्य गच्छन्ति मणिकर्णिकाम्॥ ६१॥
ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम्।

अविमुक्तं न मुञ्चन्ति कृतार्थास्ते नरा भुवि ॥ ६२ ॥
अविमुक्तं प्रविष्टस्तु यदि गच्छेत्ततः पुनः ।
तदा हसन्ति भूतानि अन्योन्यं करताडनम् ॥ ६३ ॥
कामक्रोधेन लोभेन ग्रस्ता ये भुवि मानवाः ।
निष्क्रमन्ति नरा देवि ! दण्डनायकमोहिताः ॥ ६४ ॥
जपध्यानविहीनानां ज्ञानवर्जितचेतसाम् ।
ततो दुःखहतानाञ्च गतिर्वाराणसी नृणाम् ॥ ६५ ॥
तीर्थानां पञ्चकं सारं विश्वेशानन्दकानने ।
दशाश्वमेधं लोलार्कः केशवो विन्दुमाधवः ॥ ६६ ॥
पञ्चमी तु महाश्रेष्ठा प्रोच्यते मणिकर्णिका ।
एभिस्तु तीर्थवर्य्यैश्च वर्ण्यते ह्यविमुक्तकम् ॥ ६७ ॥
एतद्दै कथितं सर्वं देव्यै देवेन भाषितम् ।
अविमुक्तस्य चेत्रस्य तत् सर्वं कथितं द्विजाः ॥ ६८ ॥

---

## अथ पञ्चाशीत्यधिकशततमोऽध्यायः

ऋषय ऊचुः । माहात्म्यमविमुक्तस्य यथावत् कथितन्त्वया ।
इदानीं नर्मदायास्तु माहात्म्यं वद सत्तम ! ॥ १ ॥
यत्रोङ्कारस्य माहात्म्यं कपिलासङ्गमस्य च ।
अमरेशस्य चैवाहुर्माहात्म्यं पापनाशनम् ॥ २ ॥
कथं प्रलयकाले तु न नष्टा नर्मदा पुरा ।
मार्कण्डेयश्च भगवान्न विनष्टस्तदा किल ।

त्वयोक्तं तदिदं सर्वं पुनर्विस्तरतो वद ॥ ३ ॥

सूत उवाच । एतदेव पुरा पृष्टः पाण्डवेन महात्मना ।

नर्मदायास्तु माहात्म्यं मार्कण्डेयो महामुनिः ॥ ४ ॥

उग्रेण तपसा युक्तो वनस्थो वनवासिना ।

पृष्टः पूर्वं महागाथां धर्मपुत्रेण धीमता ॥ ५ ॥

युधिष्ठिर उवाच ।

श्रुता मे विविधा धर्मास्त्वत्प्रसादाद्द्विजोत्तम ! ।

भूयश्च श्रोतुमिच्छामि ततो कथय सुव्रत ! ॥ ६ ॥

कथमेषा महापुण्या नदी सर्वत्र विश्रुता ।

नर्मदा नाम विख्याता तन्मे ब्रूहि महामुने ! ॥ ७ ॥

मार्कण्डेय उवाच । नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी ।

तारयेत् सर्वभूतानि स्थावराणि चराणि च ॥ ८ ॥

नर्मदायास्तु माहात्म्यं पुराणे यन्मया श्रुतम् ।

तदेतद्धि महाराज ! तत् सर्वं कथयामि ते ॥ ९ ॥

पुण्या कनखले गङ्गा कुरुक्षेत्रे सरस्वती ।

ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥ १० ॥

त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम् ।

सद्यः पुनाति गाङ्गेयं दर्शनादेव नार्मदम् ॥ ११ ॥

कलिङ्गदेशे पश्चार्द्धे पर्वतेऽमरकण्टके ।

पुण्ये च त्रिषु लोकेषु रमणीया मनोरमा ॥ १२ ॥

सदेवासुरगन्धर्वा ऋषयश्च तपोधनाः ।

तपस्तप्त्वा महाराज ! सिद्धिञ्च परमाङ्गताः ॥ १३ ॥

तत्र स्नात्वा नरो राजन्नियमस्थो जितेन्द्रियः ।

उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥ १४ ॥

जलेश्वरे नरः स्नात्वा पिण्डं दत्त्वा यथाविधि।
पितरस्तस्य तृप्यन्ति यावदा भूतसंप्लवम्॥ १५॥
पर्वतस्य समन्तात्तु रुद्रकोटिः प्रतिष्ठिता।
स्नात्वा यः कुरुते तत्र गन्धमाल्यानुलेपनैः॥ १६॥
प्रीतस्तस्य भवेच्छर्वो रुद्रकोटिर्न संशयः।
पश्चिमे पर्वतस्यान्ते स्वयं देवो महेश्वरः॥ १७॥
तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः।
पितृकार्य्यञ्च कुर्वीत विधिवन्नियतेन्द्रियः॥ १८॥
तिलोदकेन तत्रैव तर्पयेत् पितृदेवताः।
आसप्तमं कुलं तस्य स्वर्गे मोदेत पाण्डव!॥ १९॥
षष्टिवर्षसहस्राणि स्वर्गलोके महीयते।
अप्सरोगणसंकीर्णे सिद्धचारणसेविते॥ २०॥
दिव्यगन्धानुलिप्तश्च दिव्यालङ्कारभूषितः।
ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले॥ २१॥
धनवान् दानशीलश्च धार्मिकश्चैव जायते।
पुनः स्मरति तत्तीर्थं गमनं तत्र रोचते॥ २२॥
कुलानि तारयेत् सप्त रुद्रलोकं स गच्छति।
योजनानां शतं साग्रं श्रूयते सरिदुत्तमा॥ २३॥
विस्तारेण तु राजेन्द्र! योजनद्वयमायता।
षष्टिस्तीर्थसहस्राणि षष्टिकोट्यस्तथैव च॥ २४॥
सर्वं तस्य समन्तात्तु तिष्ठत्यमरकण्टके।
ब्रह्मचारी शुचिर्भूत्वा जितक्रोधो जितेन्द्रियः॥ २५॥
सर्वहिंसानिवृत्तस्तु सर्वभूतहिते रतः।
एवं सर्वसमाचारो यस्तु प्राणान् परित्यजेत्॥ २६॥

तस्य पुण्यफलं राजन्! शृणुष्वावहितो मम।
शतं वर्षसहस्राणां स्वर्गे मोदेत पाण्डव! ॥ २७॥
अप्सरोगणसंकीर्णे सिद्धचारणसेविते।
दिव्यगन्धानुलिप्तश्च दिव्यपुष्पोपशोभितः ॥ २८ ॥
क्रीडते देवलोकस्थो दैवतैः सह मोदते।
ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्यवान् ॥ २९ ॥
गृहन्तु लभते स वै नानारत्नविभूषितम्।
स्तम्भैर्मणिमयैर्दिव्यैर्वज्रवैदूर्यभूषितैः ॥ ३० ॥
आलेख्यसहितं दिव्यं दासीदाससमन्वितम्।
मत्तमातङ्गशब्दैश्च हयानां हेषितेन च ॥ ३१ ॥
क्षुभ्यते तस्य तद्द्वारं इन्द्रस्य भवनं यथा।
राजराजेश्वरः श्रीमान् सर्वस्त्रीजनवल्लभः ॥ ३२ ॥
तस्मिन् गृहे वसित्वा तु क्रीडाभोगसमन्विते।
जीवेद्वर्षशतं साग्रं सर्वरोगविवर्जितः ॥ ३३ ॥
एवं भोगी भवेत्तस्य यो मृतोऽमरकण्टके।
अग्नौ विषजले वापि तथा चैव ह्यनाशके ॥ ३४ ॥
अनिवर्तिकागतिस्तस्य पवनस्याम्बरे यथा।
पतनं कुरुते यस्तु अमरेशे नराधिप! ॥ ३५ ॥
कन्यानां त्रिसहस्राणि एकैकस्यापि चापरे।
तिष्ठन्ति भुवने तस्य प्रेषणं प्रार्थयन्ति च ॥ ३६ ॥
दिव्यभोगैः सुसम्पन्नः क्रीडते कालमक्षयम्।
पर्वतस्य समन्तात्तु रुद्रकोटिः प्रतिष्ठिता ॥ ३७ ॥
स्नानं यः कुरुते तत्र गन्धमाल्यानुलेपनैः।
प्रीतः सोऽस्य भवेत्सर्वो रुद्रकोटिन संशयः ॥ ३८ ॥

पश्चिमे पर्वतस्यान्ते त्वयं देवो महेश्वरः।
तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ॥३९॥
पितृकार्यञ्च कुर्वीत विधिवन्नियतेन्द्रियः।
तिलोदकेन विधिवत्तर्पयेत् पितृदेवताः॥ ४० ॥
आसप्तमं कुलन्तस्य स्वर्गे मोदेत पाण्डव!।
षष्टिवर्षसहस्राणि स्वर्गलोके महीयते ॥ ४१ ॥
दिव्यगन्धानुलिप्तश्च दिव्यालङ्कारभूषितः।
ततः स्वर्गात् परिभ्रष्टो जायते विपुले कुले ॥ ४२ ॥
धनवान् दानशीलश्च धार्मिकश्चैव जायते।
पुनः स्मरति तीर्थं गमनं तत्र रोचते ॥ ४३ ॥
तारयेत्तु कुलान् सप्त रुद्रलोकं स गच्छति।
योजनानां शतं साग्रं श्रूयते सरिदुत्तमा ॥ ४४ ॥
विस्तारेण तु राजेन्द्र! योजनद्वयमायता।
षष्टितीर्थसहस्राणि षष्टिकोटास्तथैव च ॥ ४५ ॥
पर्वतस्य समन्तात्तु तिष्ठन्त्यमरकण्टके।
ब्रह्मचारी शुचिर्भूत्वा जितक्रोधो जितेन्द्रियः ॥ ४६ ॥
सर्वहिंसानिवृत्तस्तु सर्वभूतहिते रतः।
एवं शर्वसमाचारी यस्तु प्राणान् परित्यजेत् ॥ ४७॥
तस्य पुण्यफलं राजन्! शृणुष्वावहितो मम।
शतं वर्षसहस्राणां स्वर्गे मोदेत पाण्डव!॥ ४८ ॥
पृथिव्यामासमुद्रायामीदृशो नैव जायते।
यादृशोऽयं नृपश्रेष्ठ! पर्वतेऽमरकण्टके ॥ ४९ ॥
तावत्तीर्थं तु विज्ञेयं पर्वतस्य तु पश्चिमे।
ह्रदो जलेश्वरो नाम त्रिषु लोकेषु विश्रुतः ॥ ५० ॥

तत्र पिण्डप्रदानेन सन्ध्योपासनकर्मणा।
पितरो दशवर्षाणि तर्पितास्तु भवन्ति वै ॥ ५१ ॥
दक्षिणे नर्मदाकूले कपिलेति महानदी।
सरलार्जुनसंछन्ना नातिदूरे व्यवस्थिता ॥ ५२ ॥
सापि पुण्या महाभागा त्रिषु लोकेषु विश्रुता।
तत्र कोटिशतं साग्रं तीर्थानां तु युधिष्ठिर ! ॥ ५३ ॥
पुराणे श्रूयते राजन् ! सर्वं कोटिगुणं भवेत्।
तस्यास्तीरे तु ये वृक्षाः पतिताः कालपर्ययात् ॥ ५४ ॥
नर्मदातोयसंस्पृष्टास्तेऽपि यान्ति परांगतिम्।
द्वितीया तु महाभागा विशल्यकरणी शुभा ॥ ५५ ॥
तत्र तीर्थे नरः स्नात्वा विशल्यो भवति क्षणात्।
तत्र देवगणाः सर्वे सकिन्नरमहोरगाः ॥ ५६ ॥
यक्षराक्षसगन्धर्वा ऋषयश्च तपोधनाः।
सर्वे समागतास्तत्र पर्वतेऽमरकण्टके ॥ ५७ ॥
तैश्च सर्वैः समागम्य मुनिभिश्च तपोधनैः।
नर्मदामाश्रिता पुण्या विशल्या नाम नामतः ॥ ५८ ॥
उत्पादिता महाभागा सर्वपापप्रणाशिनी।
तत्र स्नात्वा नरो राजन् ! ब्रह्मचारी जितेन्द्रियः ॥ ५९ ॥
उपोष्य रजनीमेकां कुलानां तारयेच्छतम्।
कपिला च विशल्या च श्रूयते राजसत्तम ! ॥ ६० ॥
ईश्वरेण पुरा प्रोक्ते लोकानां हितकाम्यया।
तत्र स्नात्वा नरो राजन्नश्वमेधफलं लभेत् ॥ ६१ ॥
अनाशकन्तु यः कुर्यात् तस्मिंस्तीर्थे नराधिप !।
सर्वपापविशुद्धात्मा रुद्रलोकं स गच्छति ॥ ६२ ॥

नर्मदायास्तु राजेन्द्र! पुराणे यन्मया श्रुतम्।
यत्र तत्र नरः स्नात्वा चाश्वमेधफलं लभेत्॥ ६३॥
ये वसन्त्युत्तरे कूले रुद्रलोके वसन्ति ते।
सरस्वत्याञ्च गङ्गायां नर्मदायां युधिष्ठिर!॥ ६४॥
समं स्नानं च दानञ्च यथा मे शङ्करोऽब्रवीत्।
परित्यजति यः प्राणान् पर्वतेऽमरकण्टके॥ ६५॥
वर्षकोटिशतं साग्रं रुद्रलोके महीयते।
नर्मदाया जलं पुण्यं फेनोर्मिभिरलङ्कृतम्॥ ६६॥
पवित्रं शिरसा वन्द्यं सर्वपापैः प्रमुच्यते।
नर्मदा पर्वतः पुण्या ब्रह्महत्यापहारिणी॥ ६७॥
अहोरात्रोपवासेन मुच्यते ब्रह्महत्यया।
एवं रम्या च पुण्या च नर्मदा पाण्डुनन्दन!॥ ६८॥
त्रयाणामपि लोकानां पुण्या ह्येषा महानदी।
वटेश्वरे महापुण्ये गङ्गाद्वारे तपोवने॥ ६९॥
एतेषु सर्वस्थानेषु द्विजाः स्युः संशितव्रताः।
श्रुतं दशगुणं पुण्यं नर्मदोदधिसङ्गमे॥ ७०॥

---

अथ षड़शीत्यधिकशततमोऽध्यायः।

मार्कण्डेय उवाच।

नर्मदा तु नदीश्रेष्ठा पुण्यात् पुण्यतमा स्थिता।
मुनिभिस्तु महाभागैर्विभक्ता मोक्षकांक्षिभिः॥ १॥
यज्ञोपवीतमात्राणि प्रविभक्तानि पाण्डव!।

तेषु स्नात्वा तु राजेन्द्र! सर्वपापैः प्रमुच्यते ॥ २ ॥
जलेश्वरं परन्तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तस्योत्पत्तिं कथयतः शृणु त्वं पाण्डुनन्दन! ॥ ३ ॥
पुरा मुनिगणाः सर्वे सेन्द्राश्चैव मरुद्गणाः ।
भयोद्विग्ना विरूपाक्षं परित्रायस्व नः प्रभो! ॥ ४ ॥
भगवान् उवाच । स्वागतं तु सुरश्रेष्ठाः! किमर्थमिह चागताः
किं दुःखं को नु सन्तापः कुतो वा भयमागतम् ॥५॥
कथयध्वं महाभागा एवमिच्छामि वेदितुम् ।
एवमुक्तास्तु रुद्रेण कथयन् संशितव्रताः ॥ ६ ॥
ऋषय ऊचुः । अतिवीर्य्यो महावीरो दानवो बलदर्पितः ।
वाणो नामेति विख्यातो यस्य वै त्रिपुरं पुरम् ॥ ७ ॥
गगने सततं दिव्यं भ्रमते तस्य तेजसा ।
ततो भीता विरूपाक्ष! त्वामिव शरणङ्गताः ॥ ८ ॥
त्रायस्व महतो दुःखात् त्वं हि नः परमा गतिः ।
एवं प्रसादं देवेश! सर्वेषां कर्त्तुमर्हसि ॥ ९ ॥
येन देवाः सगन्धर्वाः सुखमेधन्ति शङ्कर! ।
परां निर्वृतिमायान्ति तत्प्रभो! कर्त्तुमर्हसि ॥ १० ॥
भगवानुवाच । एतत् सर्वं करिष्यामि मा विषादं गमिष्यथ ।
अचिरेणैव कालेन कुर्य्यां युष्मत्सुखावहम् ॥ ११ ॥
आश्वास्य स तु तान् सर्व्वान् नर्मदातटमाश्रितः ।
चिन्तयामास देवेशस्तद्वधं प्रति मानद! ॥ १२ ॥
अथ केन प्रकारेण हन्तव्यं त्रिपुरं मया ।
परं संचिन्त्य भगवान् नारदं चास्मरत्तदा ।
स्मरणादेव! संप्राप्तो नारदः समुपस्थितः ॥ १३ ॥

नारद उवाच। आज्ञापय महादेव! किमर्थञ्च स्मृतो ह्यहम्।
किं कार्य्यन्तु मया देव! कर्तव्यं कथयस्व मे॥ १४॥
भगवानुवाच। गच्छ नारद! तत्रैव यत्र तत्त्रिपुरं महत्।
बाणस्य दानवेन्द्रस्य शीघ्रं गत्वा च तत्कुरु॥ १५॥
ता भर्तृदेवतास्तत्र स्त्रियश्चाप्सरसां समाः।
तासां वै तेजसा विप्र! भ्रमते त्रिपुरन्दिवि॥ १६॥
तत्र गत्वा तु विप्रेन्द्र! मतिमन्यां प्रबोधय।
देवस्य वचनं श्रुत्वा मुनिस्त्वरितविक्रमः॥ १७॥
स्त्रीणां हृदयनाशाय प्रविष्टस्तत् पुरं प्रति।
शोभते तत्पुरं दिव्यं नानारत्नोपशोभितम्॥ १८॥
शतयोजनविस्तीर्णं ततो द्विगुणमायतम्।
ततोऽपश्यद्दि तत्रैव बाणन्तु बलदर्पितम्॥ १९॥
मणिकुण्डलकेयूरमुकुटेन विराजितम्।
हारदोरसुवर्णैश्च चन्द्रकान्तविभूषितम्॥ २०॥
रशना तस्य रत्नाढ्या बाहू कनकमण्डितौ।
चन्द्रकान्तमहावज्रमणिविद्रुमभूषितै॥ २१॥
द्वादशार्कद्युतिनिभे निविष्टं परमासने।
उत्थितो नारदं दृष्ट्वा दानवेन्द्रो महाबलः॥ २२॥
बाण उवाच। देवर्षे! त्वं स्वयं प्राप्तो ह्यर्घ्यं पाद्यं निवेदये।
सोऽभिवाद्य यथान्यायं क्रियतां किं द्विजोत्तम!॥२३॥
चिरात्त्वमागतो विप्र! स्थीयतामिदमासनम्।
एवं सम्भाषयित्वा तु नारदं ऋषिसत्तमम्।
तस्य भार्य्या महादेवी ह्यनौपम्या तु नामतः॥ २४॥
अनौपम्योवाच। भगवन्! केन धर्म्मेण देवास्तुष्यन्ति नारद!

व्रतेन नियमेनाथ दानेन तपसापि वा ॥ ॥ २५ ॥
नारद उवाच । तिलधेनुञ्च यो दद्याद् ब्राह्मणे वेदपारगे ।
ससागरवनद्वीपा दत्ता भवति मेदिनी ॥ २६ ॥
सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ।
मोदते सुचिरं कालमक्षयं ब्रतशासनम् ॥ २७ ॥
आम्रामलकपित्थानि बदराणि तथैव च ।
कदम्बचम्पकाशोकाननेकविविधद्रुमान् ॥ २८ ॥
अश्वत्थपिप्पलांश्चैव कदलीवटदाडिमान् ।
पिचुमन्दं मधूकं च उप्तोष्य स्त्री ददाति या ॥ २९ ॥
स्तनौ कपित्थसदृशावूरू च कदलीसमौ ।
अश्वत्थे वन्दनीया च पिचुमन्दे सुगन्धिनी ॥ ३० ॥
चम्पके चम्पकाभा स्यादशोके शोकवर्जिता ।
मधूके मधुरं वक्ति वटे च मृदुगात्रिका ॥ ३१ ॥
बदरी सर्वदा स्त्रीणां महासौभाग्यदायिनी ।
कुक्कुटी कर्कटी चैव द्रव्यपक्षो न गृह्यते ॥ ३२ ॥
कदम्बमिश्रकनकमल्लयोपूजनं तथा ।
अनग्निपक्कमश्नन्च पक्वान्नानामभक्षणम् ॥ ३३ ॥
फलानाञ्च परित्यागः सन्ध्यामौनं तथैव च ।
प्रथमं क्षेत्रपालस्य पूजा कार्या प्रयत्नतः ॥ ३४ ॥
तस्या भवति वै भर्त्ता सुखप्रेप्सुः सदानघे ! ।
अष्टमी च चतुर्थी च पञ्चमी द्वादशी तथा ॥ ३५ ॥
संक्रान्तिर्विषुवञ्चैव दिनच्छिद्रमुखं तथा ।
एतास्तु दिवसान् दिव्यानुपवसन्ति याः स्त्रियः ।
मासान्तु धर्म्मयुक्तानां स्वर्गवासो न संशयः ॥ ३६ ॥

कलिकालुष्यनिर्मुक्ताः सर्वपापविवर्जिताः।
उपवासरतां नारीं नोपसर्पति तां यमः॥ ३७॥
अनोपम्योवाच। अन्यजन्मकृतेन पुण्येन पुराजन्मकृतेन वा।
भवदागमनं भूतं किञ्चित् पृच्छाम्यहं व्रतम्॥ ३८॥
अस्ति विन्ध्यावलिर्नाम वलिपत्नी यशस्विनी।
श्वश्रूर्ममापि विप्रेन्द्र! न तुष्यति कदाचन॥ ३९॥
श्वशुरोऽपि सर्वकालं दृष्ट्वा चापि न पश्यति।
अस्ति कुम्भीनसी नाम ननान्दा पापकारिणी॥ ४०॥
दृष्ट्वा चैवाङ्गुलीभङ्गं सदा कालं करोति च।
द्विष्येन तु पथा याति मम सौख्यं कथं वद॥ ४१॥
अपरेण प्ररोहन्ति वीजं कुर्यात् कथञ्चन।
येन व्रतेन चीर्णेन भवन्ति वशगा मम।
तद्व्रतं ब्रूहि विप्रेन्द्र! दासभावं व्रजामि ते॥ ४२॥
नारद उवाच। यदेतत्ते मया पूर्वं व्रतमुक्तं शुभानने।
अनेन पार्वती देवी चीर्णेन वरवर्णिनि!॥ ४३॥
शङ्करस्य शरीरस्था विष्णोर्लक्ष्मीस्तथैव च।
सावित्री ब्रह्मणश्चैव वशिष्ठस्याप्यरुन्धती॥ ४४॥
एतेनोपोषितेनेह भर्ता स्यास्यति ते वशे।
श्वश्रूश्वशुरयोश्चैव सुखबन्धो भविष्यति॥ ४५॥
एवं श्रुत्वा तु सुश्रोणि! यथेष्टं कर्तुमर्हसि।
नारदस्य वचः श्रुत्वा राज्ञी वचनमब्रवीत्॥ ४६॥
प्रसादं कुरु विप्रेन्द्र! दानं ग्राह्यं यथेप्सितम्।
सुवर्णमणिरत्नानि वस्त्राण्याभरणानि च॥ ४७॥
तव दास्याम्यहं विप्र! यच्चान्यदपि दुर्लभम्।

प्रगृह्णाण द्विजश्रेष्ठ ! प्रीयेतां हरिशङ्करौ ॥ ४८ ॥
नारद उवाच। अन्यस्मै दीयतां भद्रे ! चीणवृत्तिस्तु यो द्विजः
अहन्तु सर्वसम्पन्नो मङ्गक्तिः क्रियतामिति ॥ ४९ ॥
एवं तासां मनो हृत्वा सर्वासान्तु पतिव्रताः।
जगाम भरतश्रेष्ठ ! स्वकीयं स्थानकं पुनः ॥ ५० ॥
ततो ह्यहृष्टहृदया अन्यतो गतमानसा।
पुरे छिद्रं समुत्पन्नं वाणस्य तु महात्मनः ॥ ५१ ॥

---

अथ सप्ताशीत्यधिकशततमोऽध्यायः।

मार्कण्डेय उवाच। यन्मां पृच्छसि कौन्तेय ! तन्मे ऋग्रगतः शृणु
एतस्मिन्नन्तरे रुद्रो नर्मदातटमाश्रितः ॥ १ ॥
नाम्ना महेश्वरं स्थानं त्रिषु लोकेषु विश्रुतम्।
तस्मिन् स्थाने महादेवो चिन्तयन्त्रिपुरे वधम् ॥ २ ॥
गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम्।
स्थानं कृत्वा तु वैशाखं विष्णुं कृत्वा शरोत्तमम् ॥३॥
अग्रे चाग्निं प्रतिष्ठाप्य मुखे वायुं समर्पयन्।
हयांश्च चतुरो वेदान् सर्वदेवमयं रथम् ॥ ४ ॥
अश्विनौ पर्वोऽश्विनौ देवावचायञ्चधरः स्वयम्।
स तस्याग्रं समादाय तोरणे धनदः स्थितः ॥ ५ ॥
यमस्तु दक्षिणे हस्ते वामे कालस्तु दारुणः।
चक्रे त्वमरकोटास्तु गन्धर्वा लोकविश्रुताः ॥ ६ ॥
प्रजापतो रथश्रेष्ठे ब्रह्मा चैव तु सारथिः।

एवं कृत्वा तु देवेशः सर्वदेवमयं रथम् ॥ ७ ॥
सोऽतिष्ठत् स्थाणुभूतस्तु सहस्रपरिवत्सरान्।
यदा त्रीणि समेतानि अन्तरिक्षे स्थितानि वै ॥ ८ ॥
त्रिपर्वाणि त्रिशल्येन तदा तानि व्यभेदयत्।
शरः प्रचोदितस्तेन रुद्रेण त्रिपुरं प्रति ॥ ९ ॥
भ्रष्टतेजा स्त्रियो जाता बलन्तासां व्यशीर्यत।
उत्पाताश्च पुरे तस्मिन् प्रादुर्भूताः सहस्रशः ॥ १० ॥
त्रिपुरस्य विनाशाय कालरूपा भवंस्तदा।
अट्टहासं प्रमुञ्चन्ति हयाः काष्ठमयास्तदा ॥ ११ ॥
निमेषं नृमेषणञ्चैव कुर्वन्ते चित्ररूपिणः।
स्वप्ने पश्यन्ति चात्मानं रक्ताम्बरविभूषितम् ॥ १२ ॥
स्वप्ने तु सर्वे पश्यन्ति विपरीतानि यानि तु।
एतान् पश्यन्ति उत्पातांस्तत्र स्थाने तु ये जनाः ॥१३॥
तेषां बलञ्च बुद्धिश्च हरकोपेन नाशिते।
ततः सांवर्तको वायुर्युगान्तप्रतिमो महान् ॥ १४ ॥
समीरितोऽनलस्तेन उत्तमाङ्गेन धावति।
ज्वलन्ति पादपास्तत्र पतन्ति शिखराणि च ॥ १५ ॥
सर्वतो व्याकुलीभूतं हाहाकारमचेतनम्।
भग्नोद्यानानि सर्वाणि क्षिप्रं तत् प्रत्यभज्यत ॥ १६ ॥
तेनैव पीडितं सर्वं ज्वलितं त्रिशिखैः शरैः।
द्रुमाश्चारामखण्डानि गृहाणि विविधानि च ॥१७ ॥
दशदिक्षु प्रवृत्तोऽयं समृद्धो हव्यवाहनः।
मनःशिलानां पुञ्जानि दिशो दश विभागशः ॥ १८॥

शिखाशतैरनेकैस्तु प्रजज्वाल हुताशनः ।
सर्वं किं शुकवर्णाभं ज्वलितं दृश्यते पुरम् ॥ १८ ॥
गृहाद्‌गृहान्तरं नैव गन्तुं धूमेन शक्यते ।
हरकोपानलैर्दग्धं क्रन्दमानं सुदुःखितम् ॥ २० ॥
प्रदीप्तं सर्वतो दिक्षु दह्यते त्रिपुरं पुरम् ।
प्रासादशिखराग्राणि व्यशीर्यन्त सहस्रशः ॥ २१ ॥
नानामणिविचित्राणि विमानान्यप्यनेकधा ।
गृहाणि चैव रम्याणि दह्यन्ते दीप्तवह्निना ॥ २२ ॥
धावन्ति द्रुमखण्डेषु शलभीषु तथा जनाः ।
देवागारेषु सर्वेषु प्रज्वलन्तः प्रधाविताः ॥ २३ ॥
क्रन्दन्ति चानलस्पृष्टा वदन्ति विविधैः स्वरैः ।
दह्यन्ते दानवास्तत्र शतशोऽथ सहस्रशः ॥ २४ ॥
हंसकारण्डवाकीर्णा नलिन्यः सतपङ्कजाः ।
दृश्यन्ते ज्वलदम्भांसि परीतानाि दीर्घिकाः ॥ २५ ॥
अम्लानपङ्कजच्छन्ना विस्तीर्णा योजनायताः ।
गिरिकूटनिभास्तत्र प्रासादा रत्नभूषिताः ॥ २६ ॥
पतन्त्यनलनिर्दग्धा निस्तोया जलदा इव ।
वत्सीबालवृद्धेषु गोषु पक्षिषु वाजिषु ॥ २७ ॥
निर्दयो व्यदहद्वह्निर्हरकोपेन प्रेरितः ।
सहस्रशः प्रसुप्ताश्च सुप्तश्च बहवो जनाः ॥ २८ ॥
पुत्रमालिङ्ग्य तं गाढं दह्यन्ते त्रिपुराग्निना ।
अथ तस्मिन् पुरे दीप्ते स्त्रियश्चाप्सरसोपमाः ॥ २९ ॥
अग्निज्वालाहतास्तत्र ह्यपतन् धरणीतले ।
काचिच्छ्यामा विशालाक्षी मुक्तावलिविभूषिता ॥३०॥

धूमेनाकुलिता सा तु पतिता धरणीतले ।
काचित् कनकवर्णाभा इन्द्रनीलविभूषिता ॥ ३१ ॥
भर्त्तारं पतितं दृष्ट्वा पतिता तस्य चोपरि ।
काचिदादित्यसङ्काशा प्रसुप्ता च गृहे स्थिता ॥ ३२ ॥
अग्निज्वालाहता सा तु पतिता गतचेतना ।
उत्थितो दानवस्तत्र खड्गहस्तो महाबलः ॥ ३३ ॥
वैश्वानरहतः सोऽपि पतितो धरणीतले ।
मेघवर्णापरा नारी हारकेयूरभूषिता ॥ ३४ ॥
श्वेतरूपधरा नारी बालं स्तन्यं न्यधापयत् ।
दह्यन्तं बालकं दृष्ट्वा रुदती मेघशब्दवत् ॥ ३५ ॥
एवं स तु दहत्यग्निर्हरक्रोधेन प्रेरितः ।
काचिच्चन्द्रप्रभा सौम्या वज्रवैदूर्य्यभूषिता ॥ ३६ ॥
सुतमालिङ्ग्य वेपन्ती दग्धा पतति भूतले ।
काचित् कुन्देन्दुवर्णाभा या शयाना गृहे स्थिता॥३७
गृहे प्रज्वलिते सा तु प्रतिबुद्धा सुदुःखिता ।
पश्यन्ती ज्वलितं सर्वं स्वसुतो मे दिवङ्गतः ॥ ३८॥
सुतं सन्दग्धमालिङ्ग्य पतिता धरणीतले ।
काचित् सुवर्णवर्णाभा नीलरत्नैर्विभूषिता ॥ ३९ ॥
धूमेनाकुलिता सा तु प्रसुप्ता धरणीतले ।
अन्या गृहीतहस्ता तु सखि ! दह्यति बालिका॥४०
अनेकदिव्यरत्नाढ्या दृष्ट्वा दहनमोहिता ।
शिरसि ह्यञ्जलिं कृत्वा विज्ञापयति पावकम् ॥ ४१ ॥
भगवन् ! यदि वैरन्ते पुरुषेष्वपकारिषु ।
स्त्रियः किमपराध्यन्ते गृहपञ्जरकोकिलाः ॥ ४२ ॥

पापनिर्दयनिर्लज्ज ! कस्ते कोपस्त्रियः प्रति ।
न दाक्षिण्यं न ते लज्जा न सत्यं शौर्य्यवर्जित ! ॥४३॥
अनेन ह्युपसर्गेण तृपालम्भं शिखिन्प्रदात् ।
किं त्वया न श्रुतं लोके ह्यवध्याः सर्वयोषितः ॥ ४४॥
किन्तु तुभ्यं गुणा ह्येते दहनोत्सादनं प्रति ।
न कारुण्यं दया वापि दाक्षिण्यं न स्त्रियः प्रति ॥४५॥
दयां कुर्वन्ति म्लेच्छापि दहन्तीं वीक्ष्य योषितम् ।
म्लेच्छानामपि कष्टोऽसि दुर्निवारो ह्यचेतनः ॥ ४६ ॥
एते चैव गुणास्तुभ्यं दहनोत्सादनं प्रति ।
अमावपि दुराचारः स्त्रीणां किं ते निपातने ॥ ४७॥
दुष्टनिर्घृणनिर्लज्ज ! हुताशिन् ! मन्दभाग्यक ! ।
निराशत्वं दुरावास बलाद्दहसि निर्दय ! ॥ ४८ ॥
एवं विलप्यमानास्ता जल्पन्त्यश्च बहून्यपि ।
अन्याः क्रोशन्ति संक्रुद्धा बालशोकेन मोहिताः ॥ ४९॥
दहते निर्दयो वह्निः संक्रुद्धः पूर्वशत्रुवत् ।
पुष्करिण्यां जलं दग्धं कूपेष्वपि तथैव च ॥ ५० ॥
अस्मान् सन्दह्य म्लेच्छ ! त्वं काङ्गतिं प्रापयिष्यसि !
एवं प्रलपतां तासां वह्निर्वचनमब्रवीत् ॥ ५१ ॥
अग्निरुवाच । स्ववशेनैव युष्माकं विनाशन्तु करोम्यहम् !
अहमादेशकर्ता वै नाहं कर्त्तास्त्यनुग्रहम् ॥ ५२ ॥
रुद्रक्रोधसमाविष्टो विचरामि यथेच्छया ।
ततो बाणो महातेजास्त्रिपुरं वीक्ष्य दीपितम् ॥५३ ॥
सिंहासनस्थः प्रोवाच ह्यहं देवैर्विनाशितः।
अल्पसत्वैर्दुराचारैरीश्वरस्य निवेदितम् ॥ ५४ ॥

अपरीक्ष्य त्वहं दग्धः शङ्करेण महात्मना ।
नान्यः शक्तस्तु मां हन्तुं वर्जयित्वा त्रिलोचनम् ॥५५॥
उत्थितः शिरसा कृत्वा लिङ्गं त्रिभुवनेश्वरम् ।
निर्गतः स पुरद्वारात् परित्यज्य सुहृत्सुताम् ॥ ५६ ॥
रत्नानि यान्यनर्घाणि स्त्रियो नानाविधास्तथा ।
गृहीत्वा शिरसा लिङ्गं गच्छन् गगनमण्डलम् ॥ ५७ ॥
स्तुवंश्च देवदेवेशं त्रिलोकाधिपतिं शिवम् ।
त्यक्ता पुरी मया देव ! यदि वध्योऽस्मि शङ्कर ! ॥५८॥
त्वत्प्रसादान्महादेव ! मा मे लिङ्गं विनश्यतु ।
अर्चितं हि मया देव ! भक्त्या परमया सदा ॥ ५९ ॥
त्वत्कोपाद्यदि वध्योऽहं तदिदं मा विनश्यतु ।
श्लाघ्यमेतन्महादेव ! त्वत्कोपाद्दहनं मम ॥ ६०॥
प्रतिजन्म महादेव ! त्वत्पादनिरतो ह्यहम् ।
तोटकच्छन्दसा देवं स्तौमि त्वां परमेश्वर ! ॥ ६१ ॥

शिवशङ्करशर्वहराय नमो भवभीमममहेश्वर शर्व नमः ।
कुसुमायुधदेहविनाशकर त्रिपुरान्तक अन्धकशूलधर ॥ ६२ ॥
प्रमदाप्रिय कान्त विभक्त नमः ससुरासुरसिद्धगणैर्नमित ।
हयवानरसिद्धगजेन्द्रमुखादतिभास्वददीर्घविशालमुख ॥ ६३ ।
उपलब्ध्य मयाक्यतरैरमरैरसुरैः प्रथितोऽस्मि च बाहुशतैर्बहुभिः
प्रणतोऽस्मि भवं भवभक्तिरतो चलचन्द्रकलाकुलदेव नमः॥६४
न च पुत्रकलत्रगृहादि धनं मम तु त्वदनुस्मरणं शरणम् ।
व्यथितोऽस्मि तु बाहुशतैर्बहुभिर्गमिता च महानरकस्य गति ६५
न निवर्तति जन्म न पापमतिः यचिकर्मनिबद्धमपि त्यजति ।
अनुकम्पति विभ्रमति सति मम चैव कुकर्म निवारयति ॥६६

यः पठेत् स्तोटकन्दिव्यं प्रयतः शुचिमानसः ।
बाणस्येव यथा रुद्रस्तस्यापि वरदो भवेत् ॥ ६७ ॥
इमं स्तवं महादिव्यं श्रुत्वा देवो महेश्वरः ।
प्रसन्नस्तु तदा तस्य स्वयं देवो महेश्वरः ॥ ६८ ॥

महेश्वर उवाच ।

न भेतव्यं त्वया वत्स ! सौवर्णे तिष्ठ दानव ! ।
पुत्रपौत्रसुहृद्बन्धुभार्याबन्धुजनैः सह ॥ ६९ ॥
अद्यप्रभृति बाण ! त्वमवध्यस्त्रिदशैरपि ।
भूयस्तस्य वरो दत्तो देवदेवेन पाण्डव ! ॥ ७० ॥
अक्षयश्चाव्ययो लोके विचरस्वाकुतोभयः ।
ततो निवारयामास रुद्रः सर्वाग्निकं तदा ॥ ७१ ॥
तृतीयं रक्षितं तस्य पुरं तेन महात्मना ।
भ्रमत्तु गगने दिव्यं रुद्रतेजःप्रभावतः ॥ ७२ ॥
एवं तु त्रिपुरं दग्धं शङ्करेण महात्मना ।
ज्वालामालाप्रदीप्तं तत पतितं धरणीतले ॥ ७३ ॥
एकं निपतितं तत्र श्रीशैले त्रिपुरान्तके ।
द्वितीयं पतितं तस्मिन् पर्वतेऽमरकण्टके ॥ ७४ ॥
दग्धेषु तेषु राजेन्द्र ! रुद्रकोटिः प्रतिष्ठिता ।
ज्वलन्तद्पतत्तत्र तेन ज्वालेश्वरः स्मृतः ॥ ७५ ॥
ऊर्द्ध्वेन प्रस्थितास्तस्य दिव्यज्वाला दिवङ्गताः ।
हाहाकारस्तदा जातो देवासुरकृतो महान् ॥ ७६ ॥
नरमर्त्तं भयद्रुद्रो माहेश्वरपुरोत्तमे ।
एवं वृत्तं तदा तस्मिन् पर्वतेऽमरकण्टके ॥ ७७ ॥
चतुर्दशाख्यं भुवनं स भुक्त्वा पाण्डुनन्दन ! ।

वर्षकोटिसहस्रन्तु त्रिंशत्कोटयस्तथापराः ॥ ७८ ॥
ततो महीतलं प्राप्य राजा भवति धार्म्मिकः ।
पृथिवीमेकच्छत्रेण भुङ्क्ते स तु न संशयः ॥ ७९ ॥
एवं पुण्यो महाराज ! पर्वतोऽमरकण्टके ।
चन्द्रसूर्य्योपरागे तु गच्छेद् योऽमरकण्टकम् ॥ ८० ॥
अश्वमेधाद्दशगुणं प्रवदन्ति मनीषिणः ।
स्वर्गलोकमवाप्नोति दृष्ट्वा तत्र महेश्वरम् ॥ ८१ ॥
ब्रह्महत्या गमिष्यन्ति राहुग्रस्ते दिवाकरे ।
तथैवं निखिलं पुण्यं पर्वतेऽमरकण्टके ॥ ८२ ॥
मनसापि स्मरेद्यस्तं गिरिं त्वमरकण्टकम् ।
चान्द्रायणशतं साग्रं लभते नात्र संशयः ॥ ८३ ॥
त्रयाणामपि लोकानां विख्यातोऽमरकण्टकः ।
एष पुण्यो गिरिश्रेष्ठः सिद्धगन्धर्वसेवितः ॥ ८४ ॥
नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः ।
मृगव्याघ्रसहस्रैस्तु सेव्यमानो महागिरिः ॥ ८५ ॥
तत्र सन्निहितो देवो देव्या सह महेश्वरः ।
ब्रह्मा विष्णुस्तथा चेन्द्रो विद्याधरगणैः सह ॥ ८६ ॥
ऋषिभिः किन्नरैर्यक्षैर्नित्यमेव निषेवितः ।
वासुकिः सहितस्तत्र क्रीडते यन्नगोत्तमे ॥ ८७ ॥
प्रदक्षिणन्तु यः कुर्य्यात् पर्वतेऽमरकण्टके ।
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ८८ ॥
तत्र ज्वालेश्वरं नाम तीर्थं सिद्धनिषेवितम् ।
तत्र स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः ॥ ८९ ॥
ज्वालेश्वरे महाराज ! यस्तु प्राणान् परित्यजेत् ।

चन्द्रसूर्य्योपरागेषु तस्यापि शृणु यत् फलम् ॥ ९० ॥
सर्व्वकर्म्मविनिर्मुक्तो ज्ञानविज्ञानसंयुतः ।
रुद्रलोकमवाप्नोति यावदा भूतसंप्लवम् ॥ ९१ ॥
अमरेश्वरदेवस्य पर्वतस्य उभे तटे ।
तत्र ता ऋषिकोट्यस्तु तपस्तप्यन्ति सुव्रत ! ॥ ९२ ॥
समन्ताद्योजनक्षेत्रो गिरिश्चामरकण्टकः ।
अकामो वा सकामो वा नर्मदायां शुभे जले ॥ ९३ ॥
स्नात्वा मुच्यति तैः पापै रुद्रलोकं स गच्छति ।

---

अथ अष्टाशीत्यधिकशततमोऽध्यायः ।

सूत उवाच । पृच्छन्ति ते महात्मानो मार्कण्डेयं महामुनिम् ।
युधिष्ठिरपुरोगास्ते ऋषयश्च तपोधनाः ॥ १ ॥
आख्याहि भगवन् ! तथ्यं कावेरीसङ्गमो महान् ।
लोकानाञ्च हितार्थाय अस्माकञ्च विवृद्धये ॥ २ ॥
सदा पापरता ये च नरा दुष्कृतकारिणः ।
मुच्यन्ते सर्वपापेभ्यो गच्छन्ति परमं पदम् ।
एतदिच्छाम विज्ञातुं भगवन् ! वक्तुमर्हसि ॥ ३ ॥
मार्कण्डेय उवाच । शृणुध्वमवहिताः सर्वे युधिष्ठिरपुरोगमाः ।
अस्ति वीरो महायशाः कुवेरः सत्यविक्रमः ॥ ४ ॥
इदन्तीर्थमनुप्राप्य राजा यक्षाधिपोऽभवत् ।
सिद्धिं प्राप्तो महाराज ! तन्मे निगदतः शृणु ॥ ५ ॥
कावेरी नर्मदा यत्र सङ्गमो लोकविश्रुतः ।

तत्र स्नात्वा शुचिर्भूत्वा कुबेरः सत्यविक्रमः ॥ ६ ॥
तपोऽतप्यत यक्षेन्द्रो दिव्यं वर्षशतं महत्।
तस्य तुष्टो महादेवः प्रदातु वरमुत्तमम् ॥ ७ ॥
भो भो यक्ष! महासत्व! वरं ब्रूहि यथेप्सितम्।
ब्रूहि कार्यं यथेष्टन्तु यद्दा मनसि वर्त्तते ॥ ८॥
कुवेर उवाच। यदि तुष्टोऽसि मे देव! यदि देयो वरो मम।
अद्यप्रभृति सर्वेषां यक्षाणामधिपो भवेत् ॥ ९ ॥
कुवेरस्य वचः श्रुत्वा परितुष्टो महेश्वरः।
एवमस्तु ततो देवस्तत्रैवान्तरधीयत ॥ १० ॥
सोऽपि लब्धवरो यक्षः शीघ्रं लब्धफलोदयः।
पूजितः स तु यक्षैश्च ह्यभिषिक्तश्च पार्थिव! ॥ ११ ॥
कावेरीसङ्गमं तत्र सर्वपापप्रणाशनम्।
ये नरा नाभिजानन्ति वञ्चितास्ते न संशयः ॥ १२ ॥
तस्मात् सर्वप्रयत्नेन तत्र स्नायीत मानवः।
कावेरी च महापुण्या नर्मदा च महानदी ॥ १३ ॥
तत्र स्नात्वा तु राजेन्द्र! ह्यर्चयेद्वृषभध्वजम्।
अश्वमेधफलं प्राप्य रुद्रलोके महीयते ॥ १४ ॥
अग्निप्रवेशं यः कुर्याद्यश्च कुर्यादनाशकम्।
अनिवर्त्या गतिस्तस्य यथा मे शङ्करोऽब्रवीत् ॥ १५ ॥
सेव्यमानो वरस्त्रीभिः क्रीडते दिवि रुद्रवत्।
षष्टिवर्षसहस्राणि षष्टिकोट्यस्तथापराः ॥ १६ ॥
मोदते रुद्रलोकस्थो यत्र तत्रैव गच्छति।
पुण्यक्षयात् परिभ्रष्टो राजा भवति धार्मिकः ॥ १७॥
भोगवान् दानशीलश्च महाकुलसमुद्भवः।

तत्र पीत्वा जलं सम्यक् चान्द्रायणफलं लभेत् ॥१८॥
स्वर्गं गच्छन्ति ते मर्त्या ये पिबन्ति शुभं जलम् ।
गङ्गायमुनयोर्मध्ये यत् फलं प्राप्नुयान्नरः ।
कावेरीसङ्गमे स्नात्वा तत् फलं तस्य जायते ॥ १९ ॥
एवमादि तु राजेन्द्र ! कावेरीसङ्गमे महत् ।
पुण्यं महत्फलं तत्र सर्वपापप्रणाशनम् ॥ २० ॥

---

एकोननवत्यधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच । नर्मदोत्तरे कूले तीर्थं योजनविस्तृतम् ।
मन्त्रेश्वरेति विख्यातं सर्वपापहरं परम ॥ १ ॥
तत्र स्नात्वा नरो राजन् ! दैवतैः सह मोदते ।
पञ्चवर्षसहस्राणि क्रीडते कामरूपधृक् ॥ २ ॥
गर्जनञ्च ततो गच्छेद्यत्र मेघस्तथास्थितः ।
इन्द्रजिन्नाम संप्राप्तस्तस्य तीर्थप्रभावतः ॥ ३ ॥
मेघनादं ततो गच्छेद्यत्र मेघानुगर्जितम् ।
मेघनादो गणस्तत्र परमो गणताङ्गतः ॥ ४ ॥
ततो गच्छेत् राजेन्द्र ! तीर्थमाम्रातकेश्वरम् ।
तत्र स्नात्वा नरो राजन् ! गोसहस्रफलं लभेत् ॥५॥
नर्मदोत्तरतीरे तु तीर्थन्तु विश्रुतं भवेत् ।
तस्मिंस्तीर्थे नरः स्नात्वा तर्पयेत् पितृदेवताः ॥ ६ ॥
सर्वान् कामानवाप्नोति मनसा ये विचिन्तिताः ।
ततो गच्छेत् राजेन्द्र ! ब्रह्मावर्तमिति स्मृतम् ॥ ७ ।

तत्र सन्निहितो ब्रह्मा नित्यमेव युधिष्ठिर!।
तत्र स्नात्वा तु राजेन्द्र! ब्रह्मलोके महीयते ॥ ८ ॥
ततोऽङ्गारेश्वरं गच्छेन्नियतो नियताशनः।
सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ९ ॥
ततो गच्छेच्च राजेन्द्र! कपिलातीर्थमुत्तमम्।
तत्र स्नात्वा नरो राजन्! कपिलादानमाप्नुयात् ॥१०॥
गच्छेत् करञ्जतीर्थन्तु देवर्षिगणसेवितम्।
तत्र स्नात्वा नरो राजन्! गोलोकं समवाप्नुयात् ॥११॥
ततो गच्छेत्तु राजेन्द्र! कुण्डलेश्वरमुत्तमम्।
तत्र सन्निहितो रुद्रस्तिष्ठते ह्युमया सह ॥ १२ ॥
तत्र स्नात्वा तु राजेन्द्र! ह्यवध्यस्त्रिदशैरपि।
पिप्पलेशन्ततो गच्छेत् सर्वपापप्रनाशनम् ॥ १३ ॥
तत्र स्नात्वा तु राजेन्द्र! रुद्रलोके महीयते।
ततो गच्छेत्तु राजेन्द्र! विमलेश्वरमुत्तमम् ॥ १४ ॥
तत्र देवशिला रम्या चेश्वरेण विनिर्मिता।
तत्र प्राणपरित्यागाद्रुद्रलोकमवाप्नुयात् ॥ १५ ॥
ततः पुष्करिणीं गच्छेत् तत्र स्नानं समाचरेत्।
स्नातमात्रो नरस्तत्र ह्यैन्द्रस्यार्द्धासनं लभेत् ॥ १६ ॥
नर्म्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता।
तारयेत् सर्वभूतानि स्थावराणि चराणि च ॥ १७ ॥
सर्वदेवाधिदेवेन त्वीश्वरेण महात्मना।
कथिता ऋषिसङ्घेभ्यो ह्यस्माकञ्च विशेषतः ॥ १८ ॥
मुनिभिः संस्तुता ह्येषा नर्म्मदा प्रवरा नदी।
रुद्रदेहाद्विनिष्क्रान्ता लोकानां हितकाम्यया ॥१९॥

सर्व्वपापहरा नित्यं सर्व्वदेवनमस्कृता ।
संस्तुता देवगन्धर्व्वैरप्सरोभिस्तथैव च ॥ २० ॥
नमः पुण्यजले ! आद्ये नमः सागरगामिनि ! ।
नमस्ते पापशमनि ! नमो देवि ! वरानने ! ॥ २१ ॥
नमोऽस्तु ते ऋषिगणसिद्धसेविते ! नमोऽस्तु ते शङ्करदेहनिःसृते ! ।
नमोऽस्तु ते धर्म्मभृतां वरप्रदे ! नमोऽस्तु ते सर्व्वपवित्रपावने ! ॥२२॥
यस्त्विदं पठते स्तोत्रं नित्यं श्रद्धासमन्वितः ।
ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत् ॥ २३ ॥
वैश्यस्तु लभते लाभं शूद्रश्चैव शुभाङ्गतिम् ।
अर्थार्थी लभते ह्यर्थं स्मरणादेव नित्यशः ॥ २४ ॥
नर्म्मदां सेवते नित्यं स्वयं देवो महेश्वरः ।
तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ॥ २५ ॥

---

अथ नवत्यधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच । तदाप्रभृति ब्रह्माद्या ऋषयश्च तपोधनाः ।
सेवन्ते नर्म्मदां राजन् ! रागक्रोधविवर्जिताः ॥ १ ॥
युधिष्ठिर उवाच । कस्मिन्निपतितं शूलं देवस्य तु महीतले ।
तत्र पुण्यं समाख्याहि यथावन्मुनिसत्तम ! ॥ २ ॥
मार्कण्डेय उवाच । शूलभेदेति विख्यातं तीर्थं पुण्यतमं महत् ।
तत्र स्नात्वार्च्चयेद्देवं गोसहस्रफलं लभेत् ॥ ३ ॥
त्रिरात्रङ्कारयेद्यस्तु तस्मिंस्तीर्थे नराधिप ! ।
अर्च्चयित्वा महादेवं पुनर्ज्जन्म न विद्यते ॥ ४ ॥

भीमेश्वरं ततो गच्छेन्नारदेश्वरमुत्तमम्।
आदित्येशं महापुण्यं तथा घृतमधुस्रवम्॥ ५॥
नन्दिकेशं परिष्वज्य पश्यामि जन्मनः फलम्।
वरुणेशं ततः पश्येत् स्वतन्त्रेश्वरमेव च।
सर्वतीर्थफलं तस्य पञ्चायतनदर्शनात्॥ ६॥
ततो गच्छेत्तु राजेन्द्र! युद्धं यत्र सुसाधितम्।
कोटितीर्थन्तु विख्यातमसुरा यत्र मोहिताः॥ ७॥
यत्रैव निहता राजन्! दानवा बलदर्पिताः।
तेषां शिरांस्यगृह्णन्त सर्वे देवाः समागताः॥ ८॥
तेस्तु संस्थापितो देवः शूलपाणिर्वृषध्वजः।
कोटिर्विनिहता तत्र तेन कोटीश्वरः स्मृतः॥ ९॥
दर्शनात्तस्य तीर्थस्य सदेहः स्वर्गमारुहेत्।
यदा त्विन्द्रेण रुद्रत्वाद्वज्रकीलेन यन्त्रितम्॥ १०॥
तदाप्रभृति लोकानां स्वर्गमार्गो निवारितः।
सघृतं श्रीफलं जग्ध्वा कृत्वा चैव प्रदक्षिणम्॥ ११॥
पार्वतं सहदीपन्तु शिरसा चैव धारयेत्।
सर्वकामसुसम्पन्नो राजा भवति पाण्डव!॥ १२॥
मृतो रुद्रत्वमाप्नोति ततोऽसौ जायते पुनः।
स्वर्गादेत्य भवेद्राजा राज्यं कृत्वा दिवं व्रजेत्॥१३॥
बहुनेत्रं ततः पश्येत् त्रयोदश्यान्तु मानवः।
स्नातमात्रो नरस्तत्र सर्वयज्ञफलं लभेत्॥ १४॥
ततो गच्छेत्तु राजेन्द्र! तीर्थं परमशोभनम्।
नराणां पापनाशाय ह्यगस्त्येश्वरमुत्तमम्॥ १५॥

तत्र स्नात्वा नरो राजन्! ब्रह्मलोके महीयते।
कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशी ॥ १६ ॥
घृतेन स्नापयेद्देवं समाधिस्थो जितेन्द्रियः।
एकविंशकुलोपेतो न च्यवेदैश्वरात् पुरात् ॥ १७ ॥
धेनुमुपानहच्छत्रं दद्याच्च घृतकम्बलम्।
भोजनं चैव विप्राणां सर्वं कोटिगुणं भवेत् ॥ १८ ॥
ततो गच्छेच्च राजेन्द्र! वल्लाकेश्वरमुत्तमम्।
तत्र स्नात्वा नरो राजन्! सिंहासनपतिर्भवेत् ॥ १९ ॥
नर्मदादक्षिणे कूले तीर्थं शक्रस्य विश्रुतम्।
उपोष्य रजनीमेकां स्नानं तत्र समाचरेत् ॥ २० ॥
स्नानं कृत्वा यथान्यायमर्चयेच्च जनार्दनम्।
गोसहस्रफलं तस्य विष्णुलोकं स गच्छति ॥ २१ ॥
ऋषितीर्थं ततो गच्छेत् सर्वपापहरं नृणाम्।
स्नातमात्रो नरस्तत्र गोसहस्रफलं लभेत् ॥ २२ ॥
देवतीर्थं ततो गच्छेद् ब्रह्मणा निर्मितं पुरा।
तत्र स्नात्वा नरो राजन्! ब्रह्मलोके महीयते ॥ २३ ॥
अमरकण्टकं गच्छेदमरैः स्थापितं पुरा।
स्नातमात्रो नरस्तत्र रुद्रलोके महीयते ॥ २४ ॥
ततो गच्छेच्च राजेन्द्र! रावणेश्वरमुत्तमम्।
तत् पञ्चायतनं दृष्ट्वा मुच्यते ब्रह्महत्यया ॥ २५ ॥
ऋणतीर्थं ततो गच्छेदृणेभ्यो मुच्यते ध्रुवम्।
वटेश्वरं ततो दृष्ट्वा पर्याप्तं जन्मनः फलम् ॥ २६ ॥
भीमेश्वरं ततो गच्छेत् सर्वव्याधिविनाशनम्।
स्नातमात्रो नरो राजन्! सर्वदुःखैः प्रमुच्यते ॥ २७ ॥

ततो गच्छेत्तु राजेन्द्र ! तुरासङ्गममुत्तमम् ।
तत्र स्नात्वा महादेवमर्चयन् सिद्धिमाप्नुयात् ॥ २८ ॥
सोमतीर्थं ततो गच्छेत् पश्येच्चन्द्रमनुत्तमम् ।
तत्र स्नात्वा नरो राजन् ! भक्त्या परमया युतः ॥ २९ ॥
तत्क्षणाद्दिव्यदेहस्थः शिववन्मोदते चिरम् ।
षष्टिवर्षसहस्राणि रुद्रलोके महीयते ॥ ३० ॥
ततो गच्छेत्तु राजेन्द्र ! पिङ्गलेश्वरमुत्तमम् ।
अहोरात्रोपवासेन त्रिरात्रफलमाप्नुयात् ॥ ३१ ॥
तस्मिंस्तीर्थे तु राजेन्द्र ! कपिलां यः प्रयच्छति ।
यावन्ति तस्या रोमाणि तत्प्रसूतिकुलेषु च ॥ ३२ ॥
तावद्वर्षसहस्राणि रुद्रलोके महीयते ।
यस्तु प्राणपरित्यागं कुर्यात्तत्र नराधिप ! ॥ ३३ ॥
अक्षयं मोदते कालं यावच्चन्द्रदिवाकरौ ।
नर्म्मदातटमाश्रित्य तिष्ठेयुर्येऽत्र मानवाः ॥ ३४ ॥
ते मृताः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।
सुरेश्वरं ततो गच्छेन्नाम्ना कर्कोटकेश्वरम् ॥ ३५ ॥
गङ्गावतरते तत्र दिने पुण्ये न संशयः ।
नन्दितीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत् ॥ ३६ ॥
तुष्यते तस्य नन्दीशः सोमलोके महीयते ।
ततो दीपेश्वरं गच्छेद्व्यासतीर्थं तपोवनम् ॥ ३७ ॥
निवर्त्तिता पुरा तत्र व्यासभीता महानदी ।
हुङ्कारिता तु व्यासेन दक्षिणेन ततो गता ॥ ३८ ॥
प्रदक्षिणं तु यः कुर्यात् तस्मिंस्तीर्थे नराधिप ! ।
अक्षयं मोदते कालं यावच्चन्द्रदिवाकरौ ॥ ३९ ॥

व्यासस्तस्य भवेत् प्रीतः प्राप्नुयादीप्सितं फलम् ।
सूत्रेण वेष्टयित्वा तु दीपो देयः सवेदिकः ॥ ४० ॥
क्रीडन्ति ह्यक्षयं कालं यथा रुद्रस्तथैव च ।
ततो गच्छेच्च राजेन्द्र ! ऐरण्डी तीर्थमुत्तमम् । ४१ ॥
सङ्गमे तु नरः स्नात्वा मुच्यते सर्वपातकैः ।
ऐरण्डी त्रिषु लोकेषु विख्याता पापनाशिनी ॥ ४२ ॥
अथवाश्वयुजे मासि शुक्लपक्षे तु चाष्टमी ।
शुचिर्भूत्वा नरः स्नात्वा सोपवासपरायणः ॥ ४३ ॥
ब्राह्मणं भोजयेदेकं कोटिर्भवति भोजिता ।
मृत्तिकां शिरसि स्थाप्य ह्यवगाह्य च वै जलम् ॥४४॥
नर्मदोदकसंमिश्रं मुच्यते सर्वकिल्बिषैः ।
प्रदक्षिणं तु यः कुर्यात् तस्मिंस्तीर्थे नराधिप ! ॥ ४५ ॥
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ।
ततः सुवर्णसलिले स्नात्वा दत्त्वा तु काञ्चनम् ॥ ४६॥
काञ्चनेन विमानेन रुद्रलोके महीयते ।
ततः स्वर्गाच्च्युतः कालाद्राजा भवति वीर्यवान् ॥४७॥
ततो गच्छेच्च राजेन्द्र ! इक्षुनद्यास्तु सङ्गमम् ।
त्रैलोक्यविश्रुतं दिव्यं तत्र सन्निहितः शिवः ॥ ४८ ॥
तत्र स्नात्वा नरो राजन् ! गाणपत्यमवाप्नुयात् ।
स्कन्दतीर्थं ततो गच्छेत् सर्वपापप्रणाशनम् ॥ ४९ ॥
तत्तीर्थं त्रिविधं पापं स्नानमात्रादपोहति ।
लिङ्गसारं ततो गच्छेत् स्नानं तत्र समाचरेत् ॥ ५० ॥
गोसहस्रफलं तस्य रुद्रलोके महीयते ।
भृगुतीर्थं ततो गच्छेत् सर्वपापप्रणाशनम् ॥ ५१ ॥

तत्र गत्वा तु राजेन्द्र! स्नानं तत्र समाचरेत्।
सप्तजन्मकृतैः पापैर्मुच्यते नात्र संशयः ॥ ५२ ॥
वटेश्वरं ततो गच्छेत् सर्वतीर्थमनुत्तमम्।
तत्र स्नात्वा नरो राजन्! गोसहस्रफलं लभेत् ॥ ५३॥
सङ्गमेशन्ततो गच्छेत् सर्वदेवनमस्कृतम्।
स्नानमात्रान्नरस्तत्र चेन्द्रत्वं लभते ध्रुवम् ॥ ५४ ॥
कोटितीर्थं ततो गच्छेत् सर्वपापहरं परम्।
तत्र स्नात्वा नरो राज्यं लभते नात्र संशयः ॥ ५५ ॥
तत्र तीर्थं समासाद्य दत्त्वा दानं तु यो नरः।
तस्य तीर्थप्रभावेण सर्वं कोटिगुणं भवेत् ॥ ५६ ॥
अथ नारी भवेत् काचित् तत्र स्नानं समाचरेत्।
गौरीतुल्या भवेत् सापि शिवपत्नी न संशयः ॥ ५७ ॥
अङ्गारेशं ततो गच्छेत् स्नानं तत्र समाचरेत्।
स्नातमात्रो नरस्तत्र रुद्रलोके महीयते ॥ ५८ ॥
अङ्गारकचतुर्थ्यान्तु स्नानं तत्र समाचरेत्।
अक्षयं मोदते कालं शुचिः प्रयतमानसः ॥ ५९ ॥
अयोनिसम्भवे स्नात्वा न पश्येद्योनिसङ्कटम्।
पाण्डवेशन्तु तत्रैव स्नानं तत्र समाचरेत् ॥ ६० ॥
अक्षयं मोदते कालमवध्यस्त्रिदशैरपि।
विष्णुलोकं ततो गत्वा क्रीडते भोगसंयुतः ॥ ६१ ॥
तत्र भुक्त्वा महाभोगान् मर्त्यराजोऽभिजायते।
कठेश्वरं ततो गच्छेत् तत्र स्नानं समाचरेत् ॥ ६२ ॥
उत्तरायणसंप्राप्तौ यदिच्छेत् तस्य तद्भवेत्।
चन्द्रभागां ततो गच्छेत् तत्र स्नानं समाचरेत् ॥ ६३ ॥

स्नातमात्रो नरो राजन्! सोमलोके महीयते।
ततो गच्छेत्तु राजेन्द्र! तीर्थं शक्रस्य विश्रुतम् ॥६४
पूजितं देवराजेन देवैरपि नमस्कृतम्।
तत्र स्नात्वा नरो राजन्! दानं दत्त्वा तु काञ्चनम्॥६५
अथवा नीलवर्णाभं वृषभं यः समुत्सृजेत्।
वृषभस्य तु रोमाणि तत्प्रसूतिकुलेषु च ॥ ६६ ॥
तावद्वर्षसहस्राणि नरो हरपुरे वसेत्।
ततः स्वर्गात् परिभ्रष्टो राजा भवति वीर्यवान् ॥६७ ॥
अश्वानां श्वेतवर्णानां सहस्राणां नराधिप!।
स्वामी भवति मर्त्येषु तस्य तीर्थप्रभावतः ॥ ६८ ॥
ततो गच्छेत्तु राजेन्द्र! ब्रह्मावर्त्तमनुत्तमम्।
तत्र स्नात्वा नरो राजन्! तर्पयेत् पितृदेवताः ॥ ६९ ॥
उपोष्य रजनीमेकां पिण्डं दत्त्वा यथाविधि।
कन्यागते तथादित्ये अक्षयं स्यान्नराधिप! ॥ ७० ॥
ततो गच्छेच्च राजेन्द्र! कपिलातीर्थमुत्तमम्।
तत्र स्नात्वा नरो राजन्! कपिलां यः प्रयच्छति ॥७१॥
सम्पूर्णां पृथिवीं दत्त्वा यत् फलं तदवाप्नुयात्।
नर्मदेशं परं तीर्थं न भूतं न भविष्यति ॥ ७२ ॥
तत्र स्नात्वा नरो राजन्नश्वमेधफलं लभेत्।
नर्मदादक्षिणे कूले सङ्गमेश्वरमुत्तमम् ॥ ७३ ॥
तत्र स्नात्वा नरो राजन्! सर्वयज्ञफलं लभेत्।
तत्र सर्वोद्यतो राजा पृथिव्यामेव जायते ॥ ७४ ॥
सर्वलक्षणसम्पूर्णः सर्वव्याधिविवर्जितः।
नर्मदे चोत्तरे कूले तीर्थं परमशोभनम् ॥ ७५ ॥

आदित्यायतनं दिव्यमीश्वरेण तु भाषितम्।
तस्य तीर्थप्रभावेण दत्तं भवति चाक्षयम्॥ ७६॥
दरिद्रा व्याधिनो ये तु ये दुष्कृतकर्मिणः।
मुच्यन्ते सर्वपापेभ्यः सूर्यलोकं तु यान्ति ते॥ ७७॥
माघमासे तु संप्राप्ते शुक्लपक्षस्य सप्तमी।
वसेदायतने तत्र निराहारो जितेन्द्रियः॥ ७८॥
न जराव्याधितो मूको न चान्धो वधिरोऽथवा।
सुभगो रूपसंपन्नः स्त्रीणां भवति वल्लभः॥ ७९॥
एवं तीर्थं महापुण्यं मार्कण्डेयेन भाषितम्।
ये न जानन्ति राजेन्द्र! वञ्चितास्ते न संशयः॥ ८०
गर्गेश्वरं ततो गच्छेत् स्नानं तत्र समाचरेत्।
स्नातमात्रो नरस्तत्र स्वर्गलोकमवाप्नुयात्॥ ८१॥
मोदते स्वर्गलोकस्थो यावदिन्द्राश्चतुर्दश।
समीपतः स्थितं तस्य नागेश्वरतपोवनम्॥ ८२॥
तत्र स्नात्वा तु राजेन्द्र! नागलोकमवाप्नुयात्।
बह्वीभिर्नागकन्याभिः क्रीडते कालमक्षयम्॥ ८३॥
कुवेरभवनं गच्छेत् कुवेरो यत्र संस्थितः।
कालेश्वरं परं तीर्थं कुवेरो यत्र तोषितः॥ ८४॥
तत्र स्नात्वा तु राजेन्द्र! सर्वसम्पदमाप्नुतात्।
ततः पश्चिमतो गच्छेत् मारुतालयमुत्तमम्॥ ८५॥
तत्र स्नात्वा तु राजेन्द्र! शुचिर्भूत्वा समाहितः।
काञ्चनं तु ततो दद्याद्यथाशक्ति सुबुद्धिमान्॥ ८६॥
पुष्पकेण विमानेन वायुलोकं स गच्छति।
यमतीर्थं ततो गच्छेन्माघमासे युधिष्ठिर!॥ ८७॥

कृष्णपक्षे चतुर्दश्यां स्नानं तत्र समाचरेत्।
नक्तभोज्यं ततः कुर्यान्न पश्येद्योनिसङ्कटम्॥ ८८॥
अहल्यातीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत्।
स्नातमात्रो नरस्तत्र ह्यप्सरोभिः प्रमोदते॥ ८९॥
अहल्या च तपस्तप्त्वा तत्र मुक्तिमुपागता।
चैत्रमासे तु सम्प्राप्ते शुक्लपक्षे चतुर्दशी॥ ९०॥
कामदेवदिने तस्मिन्नहल्यां यस्तु पूजयेत्।
यत्र यत्र नरोत्पन्नो वरस्तत्र प्रियो भवेत्॥ ९१॥
स्त्रीवल्लभो भवेच्छ्रीमान् कामदेव इवापरः।
अयोध्यान्तु समासाद्य तीर्थं रामस्य विश्रुतम्॥ ९२॥
स्नातमात्रो नरस्तत्र सर्वपापैः प्रमुच्यते।
सोमतीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत्॥ ९३॥
स्नातमात्रो नरस्तत्र सर्वपापैः प्रमुच्यते।
सोमपर्व्वं तु राजेन्द्र! पापक्षयकरं नृणाम्॥ ९४॥
त्रैलोक्यविश्रुतं राजन्! सोमतीर्थं महाफलम्।
यस्तु चान्द्रायणं कुर्यात्तस्मिंस्तीर्थे नराधिप!॥ ९५॥
सर्वपापविशुद्धात्मा सोमलोकं स गच्छति।
अग्निप्रवेशोऽथ जले अथवापि ह्यनाशके॥ ९६॥
सोमतीर्थे मृतो यस्तु नाऽसौ मर्त्योऽभिजायते।
शुभतीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत्॥ ९७॥
स्नातमात्रो नरस्तत्र गोलोकेषु महीयते।
ततो गच्छेच्च राजेन्द्र! विष्णुतीर्थमनुत्तमम्॥ ९८॥
योधनीपुरमाख्यातं विष्णुस्थानमनुत्तमम्।
असुरा योधितास्तत्र वासुदेवेन कोटिशः॥ ९९॥

तत्र तीर्थं समुत्पन्नं विष्णुः प्रीतो भवेदिह।
अहोरात्रोपवासेन ब्रह्महत्यां व्यपोहति॥ १०० ॥
ततो गच्छेत् तु राजेन्द्र! तापसेश्वरमुत्तमम्।
हरिणी व्याधसन्त्रस्ता पतिता यत्र सा मृगी॥ १०१ ॥
जले प्रक्षिप्तगात्रा तु अन्तरिक्षं गता च सा।
व्याधो विस्मितचित्तस्तु परं विस्मयमागतः॥ १०२ ॥
तेन तापेश्वरं तीर्थं न भूतं न भविष्यति।
ततो गच्छेत्तु राजेन्द्र! ब्रह्मतीर्थमनुत्तमम्॥ १०३ ॥
अमोहकमिति ख्यातं पितॄंश्चैवात्र तर्पयेत्।
पौर्णमास्याममायान्तु श्राद्धं कुर्याद्यथाविधि॥ १०४ ॥
तत्र स्नात्वा नरो राजन्! पितृपिण्डन्तु दापयेत्।
गजरूपा शिला तत्र तोयमध्ये प्रतिष्ठिता॥ १०५ ॥
तस्यान्तु दापयेत् पिण्डं वैशाख्यान्तु विशेषतः।
तृप्यन्ति पितरस्तत्र यावत्तिष्ठति मेदिनी॥ १०६ ॥
ततो गच्छेच्च राजेन्द्र! सिद्धेश्वरमनुत्तमम्।
तत्र स्नात्वा नरो राजन्! गणगत्यन्तिकं व्रजेत्॥ १०७
ततो गच्छेत्तु राजेन्द्र! लिङ्गो यत्र जनार्दनः।
तत्र स्नात्वा तु राजेन्द्र! विष्णुलोके महीयते॥ १०८
नर्मदादक्षिणे कूले तीर्थं परमशोभनम्।
वामदेवः स्वयं तत्र तपोऽतप्यत वै महत्॥ १०९ ॥
दिव्यं वर्षसहस्रन्तु शङ्करं पर्युपासत।
समाधिभङ्गदग्धास्तु शङ्करेण महात्मना॥ ११० ॥
श्वेतपर्वा यमश्चैव हुताशः शक्रपर्वणि।
एते दग्धास्तु ते सर्वे कुसुमेश्वरसंस्थिताः॥ १११ ॥

दिव्यवर्षसहस्रेण तुष्टस्तेषां महेश्वरः ।
उमया सहितो रुद्रस्तुष्टस्तेषां वरप्रदः ॥ ११२ ॥
मोचयित्वा तु तान् सर्वान् नर्मदातटमास्थितः ।
ततस्तीर्थप्रभावेण पुनर्देवत्वमागताः ॥ ११३ ॥
त्वत्प्रसादान्महादेव ! तीर्थं भवतु चोत्तमम् ।
अर्द्धयोजनविस्तीर्णं क्षेत्रं दिक्षु समन्ततः ॥ ११४ ॥
तस्मिंस्तीर्थे नरः स्नात्वा चोपवासपरायणः ।
कुसुमायुधरूपेण रुद्रलोके महीयते ॥ ११५ ॥
वैश्वानरो यमश्चैव कामदेवस्तथा मरुत् ।
तपस्तप्त्वा तु राजेन्द्र ! परां सिद्धिमवाप्नुयुः ॥ ११६ ॥
अङ्कोलस्य समीपे तु नातिदूरे तु तस्य वै ।
स्नानं दानञ्च तत्रैव भोजनं पिण्डमेव च ॥ ११७ ॥
अग्निप्रवेशोऽथ जले अथवा तुहरनाशके ।
अनिवर्तिका गतिस्तस्य मृतस्यामुत्र जायते ॥ ११८ ॥
त्र्यम्बकेन तु तोयेन यश्चरुं श्रपयेन्नरः ।
अङ्कोलमूले दत्त्वा तु पिण्डं चैव यथाविधि ॥ ११९ ॥
तृप्यन्ति पितरस्तस्य यावच्चन्द्रदिवाकरौ ।
उत्तरे त्वयने प्राप्ते घृतस्नानङ्करोति यः ॥ १२० ॥
पुरुषो वाथ स्त्री वापि वसेदायतने शुचिः ।
सिद्धेश्वरस्य देवस्य प्रातः पूजां प्रकल्पयेत् ॥ १२१ ॥
स याङ्गतिमवाप्नोति न तां सर्वैर्महामखैः ।
यदावतीर्णः कालेन रूपवान् सुभगो भवेत् ॥ १२२ ॥
मर्त्ये भवति राजा च त्वासमुद्रान्तगोचरे ।
क्षेत्रपालं न पश्येत्तु दण्डपाणिं महाबलम् ॥ १२३ ॥

यथा तस्य भवेद्याला दृष्ट्वा कर्णकुण्डलम्।
एवं तीर्थफलं ज्ञात्वा सर्वे देवाः समागताः।
मुञ्चन्ति कुसुमैर्हृष्टं तेन तत् कुसुमेश्वरम्॥ १२४॥

---

## अथैकनवत्यधिकशततमोऽध्यायः।

मार्कण्डेय उवाच। भार्गवेशं ततो गच्छेद्भग्नो यत्र जनार्दनः।
असुरैस्तु महायुद्धे महाबलपराक्रमैः॥ १॥
हुङ्कारितास्तु देवेन दानवाः प्रलयङ्गताः।
तत्र स्नात्वा तु राजेन्द्र! सर्वपापैः प्रमुच्यते॥ २॥
शुक्लतीर्थस्य चोत्पत्तिं शृणु त्वं पाण्डुनन्दन!।
हिमवच्छिखरे रम्ये नानाधातुविचित्रिते॥ ३॥
तरुणादित्यसङ्काशे तप्तकाञ्चनसप्रभे।
वज्रस्फटिकसोपाने चित्रवेदीशिलातले॥ ४॥
जाम्बूनदमये दिव्ये नानापुष्पोपशोभिते।
तत्रासीनं महादेवं सर्वज्ञं प्रभुमव्ययम्॥ ५॥
लोकानुग्रहदं शान्तङ्गणवृन्दैः समावृतम्।
स्कन्दनन्दिमहाकालैर्वीरभद्रगणादिभिः॥ ६॥
उमया सहितं देवं मार्कण्डेयः पर्यपृच्छत।
देवदेवमहादेवब्रह्मविष्ण्विन्द्रसंस्तुत!॥ ७॥
संसारभयभीतोऽहं सुखोपायं ब्रवीहि मे।
भगवन्! भूतभव्येश! सर्वपापप्रणाशनम्।
तीर्थानां परमं तीर्थं तद्वदस्व महेश्वर!॥ ८॥

ईश्वर उवाच। शृणु विप्र! महाप्राज्ञ! सर्वशास्त्रविशारद!।
स्नानाय गच्छ सुभग! ऋषिसङ्घैः समावृतः ॥ ९ ॥
मन्वत्रिकश्यपाश्चैव याज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥ १० ॥
नारदो गौतमश्चैव सेवन्ते धर्मकाङ्क्षिणः।
गङ्गां कनखलं पुण्यं प्रयागं पुष्करं गयाम् ॥ ११ ॥
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे।
दिवा वा यदि वा रात्रौ शुक्लतीर्थं महाफलम् ॥१२॥
दर्शनात् स्पर्शनाच्चैव स्नानाद्दानात्तपोजपात्।
होमाच्चैवोपवासाच्च शुक्लतीर्थं महाफलम् ॥ १३ ॥
शुक्लतीर्थं महापुण्यं नर्म्मदायां व्यवस्थितम्।
चाणक्यो नाम राजर्षिः सिद्धिं तत्र समागतः ॥ १४ ॥
एतत् क्षेत्रं सुविपुलं योजनं वृत्तसंस्थितम्।
शुक्लतीर्थं महापुण्यं सर्वपापप्रणाशनम् ॥ १५ ॥
पादपाग्रेण दृष्टेन ब्रह्महत्यां व्यपोहति।
जगतीदर्शनाच्चैव भ्रूणहत्यां व्यपोहति ॥ १६ ॥
अहं तत्र ऋषिश्रेष्ठ! तिष्ठामि ह्युमया सह।
वैशाखे चैत्रमासे तु कृष्णपक्षे चतुर्दशी ॥ १७ ॥
कैलासाच्चापि निष्क्रम्य तत्र सन्निहितो ह्यहम्।
दैत्यदानवगन्धर्वाः सिद्धविद्याधरास्तथा ॥ १८ ॥
गणाश्चाप्सरसो नागाः सर्वे देवाः समागताः।
गगनस्थास्तु तिष्ठन्ति विमानैः सार्वकामिकैः ॥ १९ ॥
शुक्लतीर्थं तु राजेन्द्र! ह्यागता धर्मकाङ्क्षिणः।
रजकेन यथा वस्त्रं शुक्लं भवति वारिणा ॥ २० ॥

आजन्मजनितं पापं शुक्लतीर्थं व्यपोहति।
स्नानं दानं महापुण्यं मार्कण्डे ऋषिसत्तम!॥ २१॥
शुक्लतीर्थात् परं तीर्थं न भूतं न भविष्यति।
पूर्व्वे वयसि कर्माणि कृत्वा पापानि मानवः॥ २२॥
अहोरात्रोपवासेन शुक्लतीर्थं व्यपोहति।
तपसा ब्रह्मचर्येण यज्ञैर्दानेन वा पुनः॥ २३॥
देवार्च्चनेन या पुष्टिर्न सा क्रतुशतैरपि।
कार्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशी।
घृतेन स्नापयेद्देवमुपोष्य परमेश्वरम्।
एकविंशकुलोपेतो नच्यवेदैश्वरात् पदात्॥ २५॥
शुक्लतीर्थं महापुण्यमृषिसिद्धनिषेवितम्।
तत्र स्नात्वा नरो राजन्! न पुनर्जन्मभाक् भवेत्॥२६
स्नात्वा वै शुक्लतीर्थे तु ह्यर्चयेत् वृषभध्वजम्।
कपालपूरणं कृत्वा तुष्यत्यत्र महेश्वरः॥ २७॥
अर्द्धनारीश्वरं देवं पटे भक्त्यालिखापयेत्।
शङ्खतूर्य्यनिनादैश्च ब्रह्मघोषैश्च सद्द्विजैः॥ २८॥
जागरं कारयेत् तत्र नृत्यगीतादिमङ्गलैः।
प्रभाते शुक्लतीर्थे तु स्नानं वै देवतार्च्चनम्॥ २९॥
आचार्य्यान् भोजयेत् पश्चाच्छिवव्रतपरान् शुचीन्।
दक्षिणाञ्च यथाशक्ति वित्तशाठ्यं विवर्जयेत्॥ ३०॥
प्रदक्षिणं ततः कृत्वा शनैर्देवान्तिकं व्रजेत्।
एवं वै कुरुते यस्तु तस्य पुण्यफलं शृणु॥ ३१॥
दिव्ययानं समारूढो गीयमानोऽप्सरोगणैः।

शिवतुल्यबलोपेतस्तिष्ठत्याभूतसंप्लवम् ॥ १२ ॥
शक्रतीर्थे तु या नारी ददाति कनकं शुभम् ।
घृतेन स्नापयेद्देवं कुमारं चापि पूजयेत् ॥ २३ ॥
एवं या कुरुते भक्त्या तस्याः पुण्यफलं शृणु ।
मोदते सर्वलोकस्था यावदिन्द्राश्चतुर्दश ॥ २४ ॥
पौर्णमास्यां चतुर्दश्यां सङ्क्रान्तौ विषुवे तथा ।
स्नात्वा तु सोपवासः सन् विजितात्मा समाहितः॥२५॥
दानं दद्याद्यथाशक्त्या प्रीयेतां हरिशङ्करौ ।
एवं तीर्थप्रभावेण सर्वं भवति चाक्षयम् ॥ २६ ॥
अनाथं दुर्गतं विप्रं नाथवन्तमथापि वा ।
उद्वाहयति यस्तीर्थे तस्य पुण्यफलं शृणु ॥२७ ॥
यावत्तद्रोमसंख्या च तत्प्रसूतिकुलेषु च ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥ २८ ॥

---

## द्विनवत्यधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच । ततस्त्वनरकं गच्छेत् स्नानं तत्र समाचरेत् ।
स्नातमात्रो नरस्तत्र नरकञ्च न पश्यति ॥ १ ॥
तस्य तीर्थस्य माहात्म्यं शृणु त्वं पाण्डुनन्दन ! ।
तस्मिंस्तीर्थे तु राजेन्द्र ! यस्यास्थीनि विनिक्षिपेत्॥२॥
विलयं यान्ति सर्वाणि रूपवान् जायते नरः ।
गोतीर्थन्तु ततो गत्वा सर्वपापात् प्रमुच्यते ॥ ३ ॥
ततो गच्छेत्तु राजेन्द्र ! कपिलातीर्थमुत्तमम् ।

तत्र गत्वा नरो राजन्! गोसहस्रफलं लभेत् ॥ ४ ॥
ज्यैष्ठमासे तु संप्राप्ते चतुर्दश्यां विशेषतः।
तत्रोपोष्य नरो भक्त्या कपिलां यः प्रयच्छति ॥ ५ ॥
घृतेन दीपं प्रज्वाल्य घृतेन स्नापयेच्छिवम्।
सघृतं श्रीफलं जग्ध्वा दत्त्वा चान्ते प्रदक्षिणाम् ॥ ६ ॥
घण्टाभरणसंयुक्तां कपिलां यः प्रयच्छति।
शिवतुल्यबलो भूत्वा नैवासौ जायते पुनः ॥ ७ ॥
अङ्गारकदिने प्राप्ते चतुर्थ्यां तु विशेषतः।
पूजयेत्तु शिवं भक्त्या ब्राह्मणेभ्यश्च भोजनम् ॥ ८ ॥
अङ्गारकनवम्यां तु अमायाश्च विशेषतः।
स्नापयेत् तत्र यत्नेन रूपवान् सुभगो भवेत् ॥ ९ ॥
घृतेन स्नापयेल्लिङ्गं पूजयेद्भक्तितो द्विजान्।
पुष्पकेण विमानेन सहस्रैः परिवारितः ॥ १० ॥
शैवं पदमवाप्नोति यत्र चाभिमतं भवेत्।
अक्षयं मोदते कालं यथा रुद्रस्तथैव सः ॥ ११ ॥
यदा तु कर्मसंयोगान्मर्त्यलोकमुपागतः।
राजा भवति धर्मिष्ठो रूपवान् जायते कुले ॥ १२ ॥
ततो गच्छेच्च राजेन्द्र! ऋषितीर्थमनुत्तमम्।
तृणबिन्दुर्नाम ऋषिः पापदग्धो व्यवस्थितः ॥ १३ ॥
तत्तीर्थस्य प्रभावेण शापमुक्तोऽभवद्द्विजः।
ततो गच्छेत्तु राजेन्द्र! गङ्गेश्वरमनुत्तमम् ॥ १४ ॥
श्रावणे मासि संप्राप्ते कृष्णपक्षे चतुर्दशी।
स्नातमात्रो नरस्तत्र रुद्रलोके महीयते ॥ १५ ॥
पितॄणां तर्पणं कृत्वा मुच्यते च ऋणत्रयात्।

गङ्गेश्वरसमीपे तु गङ्गावदनमुत्तमम् ॥ १६ ॥
अकामो वा सकामो वा तत्र स्नात्वा तु मानवः ।
आजन्मजनितैः पापैर्मुच्यते नात्र संशयः ॥ १७ ॥
तत्र तीर्थे नरः स्नात्वा व्रजेद् यत्र महेश्वरः ।
सर्वदा पर्वदिवसे स्नानं तत्र समाचरेत् ॥ १८ ॥
पितॄणां तर्पणं कृत्वा ह्यश्वमेधफलं लभेत् ।
प्रयागे यत् फलं दृष्टं शङ्करेण महात्मना ॥ १९ ॥
तदेव निखिलं दृष्टं गङ्गावदनसङ्गमे ।
तस्यैव पश्चिमे स्थाने समीपे नातिदूरतः ॥ २० ॥
दशाश्वमेधजननं त्रिषु लोकेषु विश्रुतम् ।
उपोष्य रजनीमेकां मासि भाद्रपदे तथा ॥ २१ ॥
अमायाञ्च नरः स्नात्वा व्रजते यत्र शङ्करः ।
सर्वदा पर्वदिवसे स्नानं तत्र समाचरेत् ॥ २२ ॥
पितॄणां तर्पणं कृत्वा चाश्वमेधफलं लभेत् ।
दशाश्वमेधात् पश्चिमतो भृगुर्ब्राह्मणसत्तमः ॥ २३ ॥
दिव्यं वर्षसहस्रन्तु ईश्वरं पर्युपासत ।
वल्मीकवेष्टितश्चासौ पक्षिणाञ्च निकेतनः ॥ २४ ॥
आश्चर्यं सुमहज्जातमुमायाः शङ्करस्य च
गौरी पप्रच्छ देवेशं कोऽयमेवन्तु संस्थिता ॥ २५ ॥
देवो वा दानवो वाथ कथयस्व महेश्वर ! ।
महेश्वर उवाच । भृगुर्नाम द्विजश्रेष्ठ ऋषीणां प्रवरो मुनिः २६
मान्ध्यायते समाधिस्थो वरं प्रार्थयते प्रिये ! ।
ततः प्रहसिता देवी ईश्वरं प्रत्यभाषत ॥ २७ ॥
धूमवर्त्तिच्छिखा जाता तताऽद्यापि न तुष्यसे ।

दुराराध्योऽसि तेन त्वं नात्र कार्या विचारणा ॥ २८ ॥

ईश्वर उवाच। न जानासि महादेवि! श्रयं क्रोधेन वेष्टितः।

दर्शयामि यथा तथ्यं प्रत्ययं ते करोम्यहम् ॥ २९ ॥

ततः स्मृतोऽयं देवेन धर्मरूपो वृषस्तदा।

स्मरणात्तस्य देवस्य वृषः शीघ्रमुपस्थितः ॥ ३० ॥

वदंस्तु मानुषीं वाचमादेशो दीयतां प्रभो!।

भगवानुवाच। वल्मीकं त्वं खनन्नेनं विप्रं भूमौ निपातय॥३१

योगस्थस्तु ततो ध्यायन् भृगुस्तेन निपातितः।

तत्क्षणात् क्रोधसन्तप्तो वृषमुत्क्षिप्य सोऽशपत् ॥३२

एवं स भाषमाणस्तु कुत्र गच्छसि भो वृष!।

अद्याहं संप्रकोपेन प्रलयं त्वानये वृष! ॥ ३३ ॥

धर्षितस्तु तदा विप्रस्त्वान्तरिक्षङ्गतो वृषम्।

आकाशे प्रेक्षते विप्र एतदद्भुतमुत्तमम् ॥ ३४ ॥

तत्र प्रहसिते रुद्र स्थपिरस्थे व्यवस्थितः।

तृतीयलोचनं दृष्ट्वा वैलक्षयात् पतितो भुवि ॥ ३५ ॥

प्रणम्य दण्डवद्भूमौ तुष्टाव परमेश्वरम्।

प्रणिपत्य भूतनाथं भवोद्भवं त्वामहं दिव्यरूपम्।

भवातीतो भुवनपते प्रभो! तु विज्ञापये किञ्चित् ॥३६ ॥

त्वद्गुणनिकरान् वक्तुं कः शक्तो भवति मानुषो नाम।

वासुकिरपि च कदाचिद्वदनसहस्रं भवेद्यस्य ॥ ३७ ॥

भक्त्या तथापि शङ्कर भुवनपते! त्वत्स्तुतो मुखरः।

वदतः क्षमस्व भगवन्! प्रसीद मे तव चरणरतस्य ॥३८॥

सत्त्वं रजस्तमस्त्वं स्थित्युत्पत्त्योर्विनाशने देव!।

त्वां मुक्त्वा भुवनपते! भुवनेश्वर! नैव दैवतं किञ्चित् ॥३९॥

यमनियमयज्ञदानवेदाभ्यासाश्च धारणा योगः ।
त्वद्भक्तेः सर्वमिदं नार्हति हि कलासहस्रांशम् ॥ ४० ॥
उच्छिष्टरसरसायनखड्गांजनपादुका विवरसिद्धिर्वा ।
चिह्नं भवद्भक्तानां दृश्यति चेह जन्मनि प्रकटम् ॥ ४१ ॥
शाठ्येन नमति यद्यपि ददासि त्वं भूतिमिच्छतो देव ! ।
भक्तिर्भवभेदकरी मोक्षाय विनिर्मिता नाथ ॥ ४२ ॥
परदारपरस्वरतं परपरिभवदुःखशोकसन्तप्तम् ।
परवदनवीक्षणपरं परमेश्वर ! मां परित्राहि ॥ ४३ ॥
मिथ्याभिमानदग्धं क्षणभङ्गुरविभवविलसन्तम् ।
क्रूरं कुपथ्याभिमुखं पतितं मां पाहि देवेश ! ॥ ४४ ॥
दीने द्विजगणसार्थे बन्धुजनेनैव दूषिता ह्याशा ।
तृष्णा तथापि शङ्कर ! किं मूढं मां विडम्बयति ॥ ४५ ॥
तृष्णां हरस्व शीघ्रं लक्ष्मीं प्रदस्व यावदाशिनीं नित्यम् ।
छिन्धिमदमोहपाशानुत्तारय मां महादेव ! ॥ ४६ ॥
करुणाभ्युदयं नाम स्तोत्रमिदं सर्वसिद्धिदं दिव्यम् ।
यः पठति भक्तियुक्तस्तस्य तुष्येत् भृगोर्यथा च शिवः ॥ ४७ ॥
ईश्वर उवाच । अहं तुष्टोऽस्मि ते वत्स ! प्रार्थयस्वेप्सितं वरम् ।
उमया सहितो देवो वरं तस्य ह्यदापयत् ॥ ४८ ॥
भृगुरुवाच । यदि तुष्टोसि देवेश ! यदि देयो वरो मम ।
रुद्रवेदी भवेदेवमेतत्सम्पादयस्व मे ॥ ४९ ॥
ईश्वर उवाच । एवं भवतु विप्रेन्द्र ! क्रोधस्त्वा न भविष्यति ।
न पितापुत्रयोश्चैव लोकमत्यं भविष्यति ॥ ५० ॥
तदाप्रभृति ब्रह्माद्या सर्वदेवाः सकिन्नराः ।
उपासन्ते भृगोस्तीर्थं तुष्टो यत्र महेश्वरः ॥ ५१ ॥

दर्शनात्तस्य तीर्थस्य सद्यः पापात् प्रमुच्यते।
अदृश्याः श्वपचा वापि म्रियन्ते यत्र मानवाः॥ ५२॥
गुह्यातिगुह्यासु गतिस्तेषां निःसंशयं भवेत्।
एतत् क्षेत्रं सुविपुलं सर्वपापप्रणाशनम्॥ ५३॥
तत्र स्नात्वा दिवं यान्ति ये मृतास्ते पुनर्भवाः।
उपानद्यौ च छत्रञ्च देयमन्नञ्च काञ्चनम्॥ ५४॥
भोजनञ्च यथाशक्त्या ह्यचयञ्च तथा भवेत्।
सूर्योपरागे यो दद्याद्दानं चैव यथेच्छया॥ ५५॥
दीयमानन्तु तद्दानमक्षयं तस्य तद्भवेत्।
चन्द्रसूर्योपरागेषु यत् फलं त्वमरकण्टके॥ ५६॥
तदेव निखिलं पुण्यं भृगुतीर्थे न संशयः।
चरन्ति सर्वदानानि यज्ञदानतपःक्रियाः॥ ५७॥
न चरेत्तु तपस्तप्तं भृगुतीर्थे युधिष्ठिर!।
यस्य वै तपसोग्रेण तुष्टेनैव तु शम्भुना॥ ५८॥
सान्निध्यं तत्र कथितं भृगुतीर्थे नराधिप!।
प्रख्यातं त्रिषु लोकेषु यत्र तुष्टो महेश्वरः॥ ५९॥
एवं तु वदतो देवी भृगुतीर्थमनुत्तमम्।
न जानन्ति नरा मूढा विष्णुमायाविमोहिताः॥ ६०॥
नर्मदायां स्थितं दिव्यं भृगुतीर्थं नराधिप!।
भृगुतीर्थस्य माहात्म्यं यः शृणोति नरः क्वचित्॥ ६१॥
विमुक्तः सर्वपापेभ्यो रुद्रलोकं स गच्छति।
ततो गच्छेत्तु राजेन्द्र! गौतमेश्वरमुत्तमम्॥ ६२॥
तत्र स्नात्वा नरो राजन्नुपवासपरायणः।
काञ्चनेन विमानेन ब्रह्मलोके महीयते॥ ६३॥

धौतपापं ततो गच्छेत् क्षेत्रं यत्र वृषेण तु ।
भिन्नोदायां कृतं राजन् ! सर्वपातकनाशनम् ॥ ६४ ॥
तत्र तीर्थे नरः स्नात्वा ब्रह्महत्यां विमुञ्चति ।
तस्मिंस्तीर्थे तु राजेन्द्र ! प्राणत्यागं करोति यः ॥६५॥
चतुर्भुजस्त्रिनेत्रश्च शिवतुल्यबलो भवेत् ।
वसेत् कल्पायुतं साग्रं शिवतुल्यपराक्रमः ॥ ६६ ॥
कालेन महता प्राप्तः पृथिव्यामेकराट् भवेत् ।
ततो गच्छेच्च राजेन्द्र ! ऐरण्डीतीर्थमुत्तमम् ॥ ६७ ॥
प्रयागे यत् फलं दृष्टं मार्कण्डेयेन भाषितम् ।
तत् फलं लभते राजन् ! स्नातमात्रो हि मानवः ॥६८
मासि भाद्रपदे चैव शुक्लपक्षे चतुर्दशी ।
उपोष्य रजनीमेकां तस्मिन् स्नानं समाचरेत् ॥ ६९॥
यमदूतैर्न बाध्येत रुद्रलोकं स गच्छति ।
ततो गच्छेत्तु राजेन्द्र ! सिद्धो यत्र जनार्दनः ॥ ७० ॥
हिरण्यद्वीपेति विख्यातं सर्वपापप्रणाशनम् ।
तत्र स्नात्वा नरो राजन् ! धनवान् रूपवान् भवेत् ॥ ७१ ॥
ततो गच्छेत्तु राजेन्द्र ! तीर्थं कनखलं महत् ।
गरुडेन तपस्तप्तं तस्मिंस्तीर्थे नराधिप ! ॥ ७२ ॥
प्रख्यातं त्रिषु लोकेषु योगिनी तत्र तिष्ठति ।
क्रीडते योगिभिः सार्द्धं शिवेन सह नृत्यति ॥ ७३॥
तत्र स्नात्वा नरो राजन् ! रुद्रलोके महीयते ।
ततो गच्छेत्तु राजेन्द्र ! हंसतीर्थमनुत्तमम् ॥ ७४ ॥
हंसास्तत्र विनिर्मुक्ता गता ऊर्द्ध्वं न संशयः ।
ततो गच्छेत्तु राजेन्द्र ! सिद्धो यत्र जनार्दनः ॥७५॥

वाराहं रूपमास्थाय अर्चितः परमेश्वरः।
वराहतीर्थे नरः स्नात्वा द्वादश्यान्तु विशेषतः॥ ७६॥
विष्णुलोकमवाप्नोति नरकं न च पश्यति।
ततो गच्छेत्तु राजेन्द्र! चन्द्रतीर्थमनुत्तमम्॥ ७७॥
पौर्णमास्यां विशेषेण स्नानं तत्र समाचरेत्।
स्नातमात्रो नरस्तत्र चन्द्रलोके महीयते॥ ७८॥
दक्षिणेन तु तीरेण कन्यातीर्थन्तु विश्रुतम्।
शुक्लपक्षे तृतीयायां स्नानं तत्र समाचरेत्॥ ७९॥
प्रणिपत्य तु चेशानं बलिस्तेन प्रसीदति।
हरिश्चन्द्रपुरं दिव्यमन्तरिक्षे च दृश्यते॥ ८०॥
शक्रध्वजे समावृत्ते सुप्ते नागरिके जने।
नर्म्मदासलिलौघेन तरून् संप्लावयिष्यति॥ ८१॥
अस्मिन् स्थाने निवासः स्यात् विष्णुः शङ्करमब्रवीत्
दीपेश्वरे नरः स्नात्वा लभेद्बहु सुवर्णकम्॥ ८२॥
ततो गच्छेत्तु राजेन्द्र! कन्यातीर्थे सुसङ्गमे।
स्नातमात्रो नरस्तत्र देव्याः स्थानमवाप्नुयात्॥ ८३॥
देवतीर्थं ततो गच्छेत् सर्वतीर्थमनुत्तमम्।
तत्र स्नात्वा तु राजेन्द्र! दैवतैः सह मोदते॥ ८४॥
ततो गच्छेच्च राजेन्द्र! शिखितीर्थमनुत्तमम्।
यत्तत्र दीयते दानं सर्वं कोटिगुणं भवेत्॥ ८५॥
अपरपक्षे त्वमायान्तु स्नानं तत्र समाचरेत्।
ब्राह्मणं भोजयेदेकं कोटिर्भवति भोजिता॥ ८६॥
भृगुतीर्थन्तु राजेन्द्र! तीर्थकोटिर्व्यवस्थिता।
अकामो वा सकामो वा तत्र स्नानं समाचरेत्॥ ८७॥

अश्वमेधमवाप्नोति दैवतैः सह मोदते ।
तत्र सिद्धिं परां प्राप्तो भृगुश्च मुनिपुङ्गवः ।
अवतारः कृतस्तत्र शङ्करेण महात्मना ॥ ८८ ॥

---

## त्रिनवत्यधिकशततमोऽध्यायः ।

मार्कण्डेय उवाच ; ततो गच्छेत्तु राजेन्द्र ! हंसेश्वरमुत्तमम्
दर्शनात्तस्य देवस्य मुच्यते सर्वपातकैः ॥ १ ॥
ततो गच्छेच्च राजेन्द्र ! नर्मदेश्वरमुत्तमम् ।
तत्र स्नात्वा नरो राजन् ! स्वर्गलोके महीयते ॥ २ ॥
अश्वतीर्थं ततो गच्छेत् स्नानं तत्र समाचरेत् ।
सुभगो दर्शनीयश्च भोगवान् जायते नरः ॥ ३ ॥
पितामहं ततो गच्छेत् ब्रह्मणा निर्मितं पुरा ।
तत्र स्नात्वा नरो भक्त्या पितृपिण्डन्तु दापयेत् ॥ ४ ॥
तिलदर्भविमिश्रन्तु उदकं तत्र दापयेत् ।
तस्य तीर्थप्रभावेण सर्वं भवति चाक्षयम् ॥ ५ ॥
सावित्रीतीर्थमासाद्य यस्तु स्नानं समाचरेत् ।
विधूय सर्वपापानि ब्रह्मलोके महीयते ॥ ६ ॥
मनोहरं ततो गच्छेत् तीर्थं परमशोभनम् ।
तत्र स्नात्वा नरो राजन् ! पितृलोके महीयते ॥ ७ ॥
ततो गच्छेत्तु राजेन्द्र ! मानसं तीर्थमुत्तमम् ।
तत्र स्नात्वा नरो राजन् ! रुद्रलोके महीयते ॥ ८ ॥
ततो गच्छेच्च राजेन्द्र ! कुब्जतीर्थमनुत्तमम् ।

विख्यातं त्रिषु लोकेषु सर्वपापप्रणाशनम्॥ ९॥
यान्यान्कामयते कामान् पशुपुत्रधनानि च।
प्राप्नुयात्तानि सर्वाणि तत्र स्नात्वा नराधिप!॥१०॥
ततो गच्छेत् तु राजेन्द्र! त्रिदशज्योतिविश्रुतम्।
यत्र ता ऋषिकन्यास्तु तपोऽतप्यन्त सुव्रताः॥ ११॥
भर्ता भवतु सर्वासामीश्वरः प्रभुरव्ययः।
प्रीतस्तासां महादेवो दण्डरूपधरो हरः॥ १२॥
विकृताननबीभत्सुर्वै तीर्थमुपागतः।
तत्र कन्यां महाराज! वरयन् परमेश्वरः॥ १३॥
कन्यां ऋषेर्वरयतः कन्यादानं प्रदीयताम्।
तीर्थं तत्र महाराज! ऋषिकन्येति विश्रुतम्॥ १४॥
तत्र स्नात्वा नरो राजन्! सर्वपापैः प्रमुच्यते।
ततो गच्छेच्च राजेन्द्र! स्वर्णबिन्दुरिति स्मृतम्॥१५॥
तत्र स्नात्वा नरो राजन्! दुर्गतिं न च पश्यति।
अप्सरेशं ततो गच्छेत् स्नानं तत्र समाचरेत्॥ १६॥
क्रीडते नागलोकस्थो ह्यप्सरैः सह मोदते।
ततो गच्छेत्तु राजेन्द्र! नरकं तीर्थमुत्तमम्॥ १७॥
तत्र स्नात्वार्चयेद्देवं नरकं च न पश्यति।
भारभूतिं ततो गच्छेदुपवासपरो जनः॥ १८॥
एतत्तीर्थं समासाद्य चावतारं तु शाश्वतम्।
अर्चयित्वा विरूपाक्षं रुद्रलोके महीयते॥ १९॥
अस्मिंस्तीर्थे नरः स्नात्वा भारभूतौ महात्मनः।
यत्र तत्र मृतस्यापि ध्रुवं गाणेश्वरी गतिः॥ २०॥
कार्तिकस्य तु मासस्य ह्यर्चयित्वा महेश्वरम्।

अश्वमेधाद्दशगुणं प्रवदन्ति मनीषिणः ॥ २१ ॥
दीपकानां शतं तत्र घृतपूर्णन्तु दापयेत् ।
विमानैः सूर्य्यसङ्काशैः व्रजते यत्र शङ्करः ॥ २२ ॥
वृषभं यः प्रयच्छेत्तु शङ्खकुन्देन्दुसप्रभम् ।
वृषयुक्तेन यानेन रुद्रलोकं स गच्छति ॥ २३ ॥
धेनुमेकान्तु यो दद्यात्तस्मिंस्तीर्थे नराधिप ! ।
पायसं मधुसंयुक्तं भक्ष्याणि विविधानि च ॥ २४ ॥
यथाशक्त्या च राजेन्द्र ! ब्राह्मणान् भोजयेत्ततः ।
तस्य तीर्थप्रभावेण सर्वं कोटिगुणं भवेत् ॥ २५ ॥
नर्म्मदाया जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिं च न पश्यति तस्मिंस्तीर्थे नराधिप ! ॥ २६ ॥
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ।
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ॥ २७ ॥
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ।
अनाशकन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ! ॥ २८ ॥
गर्भवासे तु राजेन्द्र ! न पुनर्जायते पुमान् ।
ततो गच्छेत्तु राजेन्द्र ! आषाढीतीर्थमुत्तमम् ॥ २९ ॥
तत्र स्नात्वा नरो राजन्निन्द्रस्यार्द्धासनं लभेत् ।
स्त्रियास्तीर्थं ततो गच्छेत् सर्वपापप्रणाशनम् ॥ ३० ॥
तत्रापि स्नातमात्रस्य ध्रुवं गणेश्वरी मतिः ।
एरण्डीनर्म्मदयोश्च सङ्गमं लोकविश्रुतम् ॥ ३१ ॥
तच्च तीर्थं महापुण्यं सर्वपापप्रणाशनम् ।
उपवासपरो भूत्वा नित्यव्रतपरायणः ॥ ३२ ॥
तत्र स्नात्वा तु राजेन्द्र ! मुच्यते ब्रह्महत्यया ।

ततो गच्छेच्च राजेन्द्र ! नर्म्मदोदधिसङ्गमम् ॥ ३३ ॥
जामदग्न्यमिति ख्यातं सिद्धो यत्र जनार्द्दनः।
यत्रेष्ट्वा बहुभिर्यज्ञैरिन्द्रो देवाधिपोऽभवत् ॥ ३४ ॥
तत्र स्नात्वा तु राजेन्द्र ! नर्म्मदोदधिसङ्गमे।
त्रिगुणं चाश्वमेधस्य फलं प्राप्नोति मानवः ॥ ३५ ॥
पश्चिमस्योदधेः सन्धौ स्वर्गद्वारविघट्टनम्।
तत्र देवाः सगन्धर्व्वा ऋषयः सिद्धचारणाः ॥ ३६ ॥
आराधयन्ति देवेशं त्रिसन्ध्यं विमलेश्वरम्।
तत्र स्नात्वा नरो राजन् ! रुद्रलोके महीयते ॥३७ ॥
विमलेशं परं तीर्थं न भूतं न भविष्यति।
तत्रोपवासं कृत्वा ये पश्यन्ति विमलेश्वरम् ॥ ३८ ॥
सप्तजन्मकृतं पापं हित्वा यान्त्यमरालयम्।
ततो गच्छेत्तु राजेन्द्र ! कौशिकीतीर्थमुत्तमम् ॥३९॥
तत्र स्नात्वा नरो राजन्नुपवासपरायणः।
उपोष्य रजनीमेकां नियतो नियताशनः ॥ ४० ॥
एतत्तीर्थप्रभावेण मुच्यते ब्रह्महत्यया।
सर्व्वतीर्थाभिषेकन्तु यः पश्येत् सागरेश्वरम् ॥ ४१ ॥
योजनाभ्यन्तरे तिष्ठन्नावर्त्ते संस्थितः शिवः।
तं दृष्ट्वा सर्व्वतीर्थानि दृष्टान्येव न संशयः ॥ ४२ ॥
सर्व्वपापविनिर्म्मुक्तो यत्र रुद्रः स गच्छति।
नर्म्मदासङ्गमं यावद्यावच्चामरकण्टकम् ॥ ४३ ॥
अत्रान्तरे महाराज ! तीर्थकोट्योदश स्मृताः।
तीर्थात्तीर्थान्तरं यत्र ऋषिकोटिनिषेवितम् ॥ ४४॥

साग्निहोत्रैस्तु विद्भिः सर्वैर्धर्मपरायणैः ।
सेवितानेन राजेन्द्र ! त्वोप्सितार्थप्रदायिका ॥ ४५ ॥
यस्त्विदं वै पठेन्नित्यं शृणुयाद्वापि भावतः ।
तस्य तीर्थानि सर्वाणि ह्यभिषिञ्चन्ति पाण्डव ! ॥ ४६ ॥
नर्मदा च सदा प्रीता भवेद्धै नात्र संशयः ।
प्रीतस्तस्य भवेद्रुद्रो मार्कण्डेयो महामुनिः ॥ ४७ ॥
वन्ध्या चैव लभेत् पुत्रान् दुर्भगा सुभगा भवेत् ।
कन्या लभेत भर्तारं यच्च वाञ्छेत् तु यत्फलम् ॥४८॥
तदेव लभते सर्वं नात्र कार्या विचारणा ।
ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत् ॥ ४९ ॥
वैश्यस्तु लभते लाभं शूद्रः प्राप्नोति सद्गतिम् ।
मूर्खस्तु लभते विद्यां त्रिसन्ध्यं यः पठेन्नरः ।
नरकञ्च न पश्येत्तु वियोगञ्च न गच्छति ॥ ५० ॥

---

चतुर्नवत्यधिकशततमोऽध्यायः ।

सूत उवाच । इत्याकर्ण्य स राजेन्द्र गोत्राख्याभिदर्शनम् ।
ततः पप्रच्छ देवेशं मत्स्यरूपं जलार्णवे ॥ १ ॥
मनुरुवाच । ऋषीणां नाम गोत्राणि वंशावतरणं तथा
प्रवराणां तथा साम्यमसाम्यं विस्तराद्वद ॥ २ ॥
महादेवेन ऋषयः शप्ताः स्वायम्भुवान्तरे ।
तेषां वैवस्वते प्राप्ते सम्भवं मम कीर्त्तय ॥ ३ ॥
दाक्षायणीनाञ्च तथा प्रजाः कथयो मे प्रभो !

ऋषीणां च तथा वंशं भृगुवंशविवर्धनम् ॥ ४ ॥
मत्स्य उवाच। मन्वन्तरेऽस्मिन् संप्राप्ते पूर्वं वैवस्वते तथा।
चरितं कथ्यते राजन्! ब्रह्मणः परमेष्ठिनः ॥ ५ ॥
महादेवस्य शापेन त्यक्त्वा देहं स्वयं तथा।
ऋषयश्च समुद्भूता हुते शुक्रे महात्मनः ॥ ६ ॥
देवानां मातरो दृष्ट्वा देवपत्न्यस्तथैव च।
स्कन्नं शुक्रं महाराज! ब्रह्मणः परमेष्ठिनः ॥ ७ ॥
तज्जुहाव ततो ब्रह्मा ततो जाता हुताशनात्।
ततो जातो महातेजा भृगुश्च तपसां निधिः ॥ ८ ॥
अङ्गारेष्वङ्गिरा जातो ह्यर्चिभ्योऽत्रिस्तथैव च।
मरीचिभ्यो मरीचिस्तु ततो जातो महातपाः ॥ ९ ॥
केशैस्तु कपिशो जातः पुलस्त्यश्च महातपाः।
केशैः प्रलम्बैः पुलहस्ततो जातो महातपाः ॥ १० ॥
वसुमध्यात् समुत्पन्नो वसिष्ठस्तु तपोधनः।
भृगुः पुलोम्नस्तु सुतां दिव्यां भार्यामविन्दत ॥ ११ ॥
यस्यामस्य सुता जाता देवा द्वादशयाज्ञिकाः।
भुवनो भौवनश्चैव सुजन्यः सुजनस्तथा ॥ १२ ॥
शुचिक्रतुश्च मूर्धा च त्याज्यश्च वसुदश्च ह।
प्रभवश्चाव्ययश्चैव दक्षोऽथ द्वादशस्तथा ॥ १३ ॥
इत्येते भृगवो नाम देवा द्वादश कीर्तिताः।
पौलोम्यां जनयन् विप्रान् देवानां तु कनीयसः ॥ १४ ॥
च्यवनन्तु महाभागमाप्नुवानं तथैव च।
आप्नुवानात्मजश्चौर्वो जमदग्निस्तदात्मजः ॥ १५ ॥
और्वो गोत्रकरस्तेषां भार्गवाणां महात्मनाम्।

तत्र गोत्रकरास्त्वन्ये भृगोर्वै दीप्ततेजसः ॥ १६ ॥
भृगुश्च च्यवनश्चैव आप्नुवानस्तथैव च ।
और्वश्च जमदग्निश्च वात्स्यो दण्डिर्नडायनः ॥ १७ ॥
वैगायनो वीतिहव्यः पैलश्चैवाथ शौनकः ।
शौनकायन जीवन्ति रावेदः कार्पणिस्तथा ॥ १८ ॥
वैहीनरिर्विरूपाक्षो रौहित्यायनिरेव च ।
वैश्वानरिस्तथा नीलो लुब्धः सावर्णिकश्च सः ॥ १९ ॥
विष्णुः पौरोऽपि बालाकिरैलिकोऽनन्तभागिनः ।
मृतभार्गेयमार्कण्डजविनो वीतिनस्तथा ॥ २० ॥
मण्डमाण्डव्यमाण्डूकफेनपास्तनितस्तथा ।
स्थलपिण्डः शिखावर्णः शार्कराक्षिस्तथैव च ॥ २१ ॥
जालधिः सौधिकः क्षुभ्यः कुत्सन्यो मौद्गलायनः ।
कर्मायनो देवपतिः पाण्डुरोचिः सगालवः ॥ २२ ॥
साङ्कृत्यश्चातकिः सार्पिर्यज्ञपिण्डायनस्तथा ।
गार्ग्यायनो गायनश्च ऋषिर्गार्हायनस्तथा ॥ २३ ॥
गोष्ठायनो वात्स्यायनो वैशम्पायन एव च ।
वैकर्णिनिः शार्ङ्गरवो याज्ञेयिर्भ्राष्ट्रकायनिः ॥ २४ ॥
लालाटिर्नाकुलिश्चैव लौक्षिण्योपरिमण्डलौ ।
आलुकिः सौचकिः कौत्सस्तथान्यः पैङ्गलायनिः ॥ २५ ॥
सात्यायनिर्मालायनिः कौटिलिः कौचहस्तिकः ।
सौहोक्तिः सकौवाक्षिः कौसिश्चान्द्रमसिस्तथा ॥ २६ ॥
नैकजिह्वो जिह्वकश्च व्याधाज्यो लौहवैरिणः ।
शारद्वतिकनेतिष्यौ लोलाक्षिश्चलकुण्डलः ॥ २७ ॥
वागायनिश्चानुमतिः पूर्णिमागतिकोऽसकृत् ।

सामान्येन यथा तेषां पञ्चैते प्रवरा मताः ॥ २८ ॥
भृगुश्च च्यवनश्चैव आप्नुवानस्तथैव च ।
और्वश्च जमदग्निश्च पञ्चैते प्रवरा मताः ॥ २९ ॥
अतः परं प्रवक्ष्यामि शृणु त्वन्यान् भृगूद्वहान् ।
जमदग्निर्विदश्चैव पौलस्त्यो वैजभृत्तथा ॥ ३० ॥
ऋषिश्चोभयजातश्च कायनिः शाकटायनः ।
और्वेया मारुताश्चैव सर्वेषां प्रवराः शुभाः ॥ ३१ ॥
भृगुश्च च्यवनश्चैव आप्नुवानस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ३२ ॥
भृगुदासो मार्गपथो ग्राम्यायनिकटायनौ ।
आपस्तम्बिस्तथा बिल्विर्नैकशिः कपिरेव च ॥ ३३ ॥
आर्ष्टिषेणो गार्दभिश्च कार्दमायनिरेव च ।
आश्वायनिस्तथारूपिर्ये चार्षेयाः प्रकीर्तिताः ॥ ३४ ॥
भृगुश्च च्यवनश्चैव आप्नुवानस्तथैव च ।
आर्ष्टिषेणस्तथारूपिः प्रवराः पञ्च कीर्तिताः ॥ ३५ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
यस्को वा वीतिहव्यो वा मथितस्तु तथा दमः ॥ ३६ ॥
जैवन्त्यायनिमौञ्जश्च पिलिश्चैव चलिस्तथा ।
भागिलो भागवित्तिश्च कौशापिस्त्वथ काश्यपिः ॥ ३७ ॥
बालपिः श्रमदागेपिः सौरस्तिथिस्तथैव च ।
गार्गीयस्त्वथ जाबालिस्तथा पौष्णायनो ह्यृषिः ॥ ३८ ॥
रामदश्च तथैतेषामार्षेयाः प्रवरा मताः ।
भृगुश्च वीतहव्यश्च तथा रैवसवैवसौ ॥ ३९ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।

शालायनिः शाकटाक्षो मैत्रेयः खाण्डवस्तथा ॥ ४० ॥
द्रौणायनो रौक्मायनः पिङ्गली चापि कायनिः ।
हंसजिह्वस्तथैतेषामार्षेयाः प्रवरा मताः ॥ ४१ ॥
भृगुश्चैवाथ वध्र्यश्वो दिवोदासस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ४२ ॥
एकायनो यज्ञपतिर्मत्स्यगन्धस्तथैव च ।
प्रत्यूहश्च तथा सौरिश्चौक्षिश्च कार्दमायनिः ॥ ४३ ॥
तथा गृत्समदो राजन्! सनकश्च महान् ऋषिः ।
प्रवरास्तु तथोक्तानामार्षेयाः परिकीर्तिताः ॥ ४४ ॥
भृगुर्गृत्समदश्चैव आर्षावेतौ प्रकीर्त्तितौ ।
परस्परमवैवाह्या ऋषी वै परिकीर्तितौ ॥ ४५ ॥
एते तवोक्ता भृगुवंशजाता महानुभावा नृपगोत्रकाराः ।
एषां तु नाम्ना परिकीर्तितेन पापं समग्रं विजहाति जन्तुः ॥ ४६ ॥

---

## अथ पञ्चनवत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । मरीचितनया राजन्! सुरूपा नाम विश्रुता ।
भार्या चाङ्गिरसो देवास्तस्याः पुत्रा दश स्मृताः ॥ १ ॥
आत्मायुर्दमनो दक्षः सदः प्राणस्तथैव च ।
हविष्मांश्च गविष्ठश्च ऋतः सत्यश्च ते दश ॥ २ ॥
एते चाङ्गिरसो नाम देवा वै सोमपायिनः ।
सुरूपा जनयामास ऋषीन् सर्वेश्वरानिमान् ॥ ३ ॥
बृहस्पतिं गौतमञ्च संवर्त्तमृषिमुत्तमम् ।

उतथ्यं वामदेवं च अजस्य मृषिजन्तथा ॥ ४ ॥
इत्येते ऋषयः सर्वे गोत्रकाराः प्रकीर्तिताः ।
तेषां गोत्रसमुत्पन्नान् गोत्रकारान्निबोध मे ॥ ५ ॥
उतथ्यो गौतमश्चैव तौलेयोऽभिजितस्तथा ।
सार्धनेमिः सलौगाक्षिः चीरः कौष्टिकिरेव च ॥ ६ ॥
राहुकर्णिः सौपुरिश्च कैरातिः सामलोमकिः ।
पौषजितिर्भार्गवतो ह्यृषिश्चैरौडवस्तथा ॥ ७ ॥
कारोटकः सजीवी च उपबिन्दुसुरैषिणौ ।
वाहिनीपतिवैशाली क्रोष्टा चैवारुणायनिः ॥ ८ ॥
सोमोत्रार्यानिकासोरुकौशल्याः पार्थिवास्तथा ।
रौहिण्यायनिरेवाग्नी मूलपः पाण्डुरेव च ॥ ९ ॥
क्षपाविश्वकरोऽरिश्च पारिकारारिरेव च ।
त्र्यार्षेयाः प्रवराश्चैव तेषां च प्रवरान् शृणु ॥ १० ॥
अङ्गिराः सुवचोतथ्य उशिजश्च महानृषिः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ११ ॥
आत्रेयायनिसौविष्टी अग्निवेश्यः शिलास्थलिः ।
बालिशायनिश्चैकेपी वाराह्विर्बाष्कलिस्तथा ॥ १२ ॥
सौटिश्च तिणकर्णिश्च प्रावहिश्चाश्वलायनिः ।
वाराह्विर्बर्हिसादी च शिखाग्रीविस्तथैव च ॥ १३ ॥
कारकिश्च महाकापिस्तथा चोडुपतिः प्रभुः ।
कौचकिर्धूमितश्चैव पुष्पान्वेषिस्तथैव च ॥ १४ ॥
सोमतन्विर्ब्रह्मतन्विः सालडिर्बालडिस्तथा ।
देवरारिर्देवस्थानिर्हारिकर्णिः सरिड्भविः ॥ १५ ॥
प्रावेपिः साङ्ग्यसुग्रीविस्तथा गोमेदगन्धिकः ।

मत्स्याच्छायो मूलहरः फलाहारस्तथैव च ॥ १६ ॥
गाङ्गोदधिः कौरुपतिः कौरुक्षेत्रिस्तथैव च ।
नायकिर्जैत्यद्रौणिश्च जैह्वलायनिरेव च ॥ १७ ॥
आपस्तम्बिर्मौञ्जवृष्टिर्मार्ष्टिः पिङ्गलिरेव च ।
पैलश्चैव महातेजाः शालङ्कायनिरेव च ॥ १८ ॥
द्व्याख्येयो मारुतश्चैषां त्र्यार्षेयः प्रवरो नृप ॥ ।
अङ्गिराः प्रथमस्तेषां द्वितीयश्च बृहस्पतिः ॥ १९ ॥
तृतीयश्च भरद्वाजः प्रवराः परिकीर्तिताः ।
परस्परमवैवाह्या इत्येते परिकीर्तिताः ॥ २० ॥
काण्वायनाः कोपचयास्तथा वात्स्यतरायणाः ।
भ्राष्ट्रकृद्राष्ट्रपिण्डी च लैन्द्राणिः सायकायनिः ॥ २१ ॥
क्रोष्टाक्षी बहुवीती च तालकृन्मधुरावहः ।
लावकृद्गालविद्गाथी मार्कण्डिः पौलिकायनिः ॥२२॥
स्कन्दसश्च तथा चक्री गार्ग्यः श्यामायनिस्तथा ।
बालाकिः साहरिश्चैव पञ्चार्षेयाः प्रकीर्तिताः ॥ २३ ॥
अङ्गिराश्च महातेजा देवाचार्यो बृहस्पतिः ।
भरद्वाजस्तथा गर्गः सैन्यश्च भगवानृषिः ॥ २४ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
कपीतरः स्वस्तितरो दाक्षिः शक्तिः पतञ्जलिः ॥२५॥
भूयसिर्जलसन्धिश्च बिन्दुर्मादिः कुसीदकिः ।
ऊर्वश्च राजकेशी च वौषडिः शंसपिस्तथा ॥ २६ ॥
शालिश्च कलशीकण्ठ ऋषिः कारीरयस्तथा ।
काटघो धान्यायनिश्चैव भावास्यायनिरेव च ॥ २७ ॥
भारद्वाजिः सौबुधिश्च लघ्वी देवमतिस्तथा ।

त्र्यार्षेयोऽभिमतस्त्वेषां प्रवरो भूमिपोत्तम! ॥ २८ ॥
अङ्गिरा दमवाह्यश्च तथा चैवाप्युरुक्षयः।
परस्पराभवाह्याश्च ऋषयः परिकीर्त्तिताः। ... ॥ २९ ॥
गालविश्चैव त्र्यार्षेयः सर्वेषां प्रवरो मतः।
अङ्गिराः संकृतिश्चैव गौरवीतिस्तथैव च ॥ ३० ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः।
बृहदुक्थो वामदेवस्तथा त्रिः प्रवरा मताः ॥ ३१ ॥
अङ्गिरा बृहदुक्थश्च वामदेवस्तथैव च।
कुत्साकुत्सैरवैवाह्या एवमाहुः पुरातनाः ॥ ३२ ॥
रथीतराणां प्रवरा त्र्यार्षेयाः परिकीर्त्तिताः।
अङ्गिराश्च विरूपश्च तथैव च रथीतरः ॥ ३३ ॥
रथीतराश्चवैवाह्या नित्यमेव रथीतरैः।
विष्णुवृद्धिः शिवमतिर्जतृणः कतृणस्तथा ॥ ३४ ॥
पुत्रवश्च महातेजास्तथा वैरपरायणः।
त्र्यार्षेयोऽभिमतस्त्वेषां सर्वेषां प्रवरो नृप! ॥ ३५ ॥
अङ्गिरा मत्स्यदग्धश्च मुद्गलश्च महातपाः।
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ॥ ३६ ॥
हंसजिह्वो देवजिह्वो ह्यग्निजिह्वो विराडपः।
अपाग्नेयस्त्वश्वयुश्च परण्यस्ताविमौद्गलाः ॥ ३७ ॥
त्र्यार्षेयाभिमतास्त्वेषां सर्वेषां प्रवराः शुभाः।
अङ्गिराश्चैव ताण्डिश्च मौद्गल्यश्च महातपाः ॥ ३८ ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः।
अपाण्डुश्च गुरुश्चैव तृतीयः शाकटायनः ॥ ३९ ॥
ततः प्रागाथमा नारी मार्कण्डो मरणः शिवः।

कटुमर्कटपश्चैव तथा नाडायनो ऋषिः ॥ ४० ॥
श्यामायनस्तथैवैषां त्र्यार्षेयाः प्रवराः शुभाः ।
अङ्गिराश्चाजमीढश्च कटश्चैव महातपाः ॥ ४१ ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
तित्तिरिः कपिभूश्चैव गार्ग्यश्चैव महानृषिः ॥ ४२ ॥
त्र्यार्षेयो हि मतस्तेषां सर्वेषां प्रवरः शुभः ।
अङ्गिरास्तित्तिरिश्चैव कपिभूश्च महानृषिः ॥ ४३ ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
अथ ऋक्षभरद्वाजो ऋषिवान् मानवस्तथा ॥ ४४ ॥
ऋषिर्मैत्रवरश्चैव पञ्चार्षेयाः प्रकीर्तिताः ।
अङ्गिराः सभरद्वाजस्तथैव च बृहस्पतिः ॥ ४५ ॥
ऋषिर्मैत्रवरश्चैव ऋषिवान् मानवस्तथा ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ४६ ॥
भारद्वाजो हुतः शौङ्गः शैशिरेयस्तथैव च ।
इत्येते कथिताः सर्वे द्व्यामुष्यायणगोत्रजाः ॥ ४७ ॥
पञ्चार्षेयास्तथा ह्येषां प्रवराः परिकीर्त्तिताः ।
अङ्गिराश्च भरद्वाजस्तथैव च बृहस्पतिः ।
मौद्गल्यः शैशिरश्चैव प्रवराः परिकीर्त्तिताः ॥ ४८ ॥
एते तवाङ्गिरसस्तु वंशे महानुभावा ऋषिगोत्रकाराः ।
येषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ॥ ४९

---

## पञ्चनवत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । अत्रिवंशसमुत्पन्नान् गोत्रकारान्निबोध मे ।
कर्दमायनशाखेयास्तथा शारायणाश्च ये ॥ १ ॥
उद्दालकिः शौणकर्णिरथौ शौक्रतवश्च ये ।
गौरग्रीवा गौरजिनस्तथा चैत्रायणाश्च ये ॥ २ ॥
अर्द्धपण्या वामरथ्या गोपनास्तकिबिन्दवः ।
कणजिह्वो हरप्रीतिर्नैद्राणिः शाकलायनिः ॥ ३ ॥
तैलपश्च सवैलेय अत्रिर्गोणीपतिस्तथा ।
जलदो भगपादश्च सौपुष्पिश्च महातपाः ॥ ४ ॥
छन्दोगेयस्तथैतेषां त्र्यार्षेयाः प्रवरा मताः ।
श्यावाश्वश्च तथा त्रिश्च आर्चना नस एव च ॥ ५ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
दाक्षिर्बलिः पर्णविश्च ऊर्णनाभिः शिलार्दनिः ॥ ६ ॥
बीजवापी शिरीषश्च मौञ्जकेशो गविष्ठिरः ।
भलन्दनस्तथैतेषां त्र्यार्षेयाः प्रवरा मताः ॥ ७ ॥
अत्रिर्गविष्ठिरश्चैव तथा पूर्वातिथिः स्मृतः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ८ ॥
आत्रेयपुत्रिकापुत्रानत ऊर्ध्वं निबोध मे ।
कालेयाश्च सवालेया वामरथ्यास्तथैव च ॥ ९ ॥
धात्रेयाश्चैव मैत्रेयास्त्र्यार्षेयाः परिकीर्तिताः ।

अत्रिश्च वामरथ्यश्च पौत्रिश्चैव महानृषिः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ १० ॥
इत्यत्रिवंशप्रभवास्तवोक्ता महानुभावा नृपगोत्रकाराः ।
येषां तु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति॥११

---

सप्तनवत्यधिकशततमोऽध्यायः ।

मत्स्य उवाच । अत्रेरेवापरं वंशन्तव वक्ष्यामि पार्थिव ! ।
अत्रेः सोमः सुतः श्रीमांस्तस्य वंशोद्भवो नृप ! ॥ १ ॥
विश्वामित्रस्तु तपसा ब्राह्मण्यं समवाप्तवान् ।
तस्य वंशमहं वक्ष्ये तन्मे निगदतः शृणु ॥ २ ॥
विश्वामित्रो देवरातस्तथा वैकृतिगालवः ।
वतण्डश्च सलङ्कश्च इत्रभयश्चायतायनः ॥ ३ ॥
श्यामायना याज्ञवल्क्या जाबालाः सैन्धवायनाः ।
बाभ्रव्याश्च करीषाश्च संश्रुत्या अथ संश्रुताः ॥ ४ ॥
उलूपा औपगहया पयोदजनपादपाः ।
खरवाचो हलयमाः साधिता वास्तुकौशिकाः ॥ ५ ॥
त्रयार्षेयाः प्रवरास्तेषां सर्वेषां परिकीर्त्तिताः ।
विश्वामित्रो देवरात उद्दालश्च महायशाः ॥ ६ ॥
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
देवश्रवाः सुजातेयाः सौमुकाः कारुकायनाः ॥ ७ ॥
तथा वैदेहराता ये कुशिकाश्च नराधिप ! ।
त्रयार्षेयोऽभिमतस्तेषां सर्वेषां प्रवरः शुभः ॥ ८ ॥

देवश्रवा देवरातो विश्वामित्रस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ ९ ॥
धनञ्जयः कपर्देयः परिकूटश्च पार्थिव ! ।
पाणिनिश्चैव त्र्यार्षेयाः सर्वे एते प्रकीर्तिताः ॥ १० ॥
विश्वामित्रस्तथाद्यश्च माधुच्छन्दस एव च ।
त्र्यार्षेयाः प्रवरा ह्येते ऋषयः परिकीर्त्तिताः ॥ ११ ॥
विश्वामित्रो मधुच्छन्दास्तथा चैवाघमर्षणः ।
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ॥ १२ ॥
कमलायनिजश्चैव अश्मरथ्यस्तथैव च ।
वञ्जुलिश्चापि त्र्यार्षेयः सर्वेषां प्रवरो मतः ॥ १३ ॥
विश्वामित्रश्चाश्मरथ्यो वञ्जुलिश्च महातपाः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ १४ ॥
विश्वामित्रो लोहितश्च अष्टकः पूरणस्तथा ।
विश्वामित्रः पूरणश्च तयोर्द्वौ प्रवरौ स्मृतौ ॥ १५ ॥ ।
परस्परमवैवाह्याः पूरणाश्च परस्परम् ।
लोहिता अष्टकाश्चैषां त्र्यार्षेयाः परिकीर्तिताः ॥१६॥
विश्वामित्रो लोहितश्च अष्टकश्च महातपाः ।
अष्टका लोहितैर्नित्यमवैवाह्याः परस्परम् ॥ १७ ॥
उदरेणुः क्रथकश्च ऋषिर्योदावहिस्तथा ।
शाटरायणिः करीराशी शालङ्कायनिलावकी ॥ १८ ॥
मौञ्जायनिश्च भगवान् त्र्यार्षेयाः परिकीर्तिताः ।
खिलिखिलिस्तथा विद्यो [illegible]स्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ १९ ॥

एते तवोक्ताः कुशिका नरेन्द्र ! महानुभावाः सततं द्विजेन्द्राः ।
येषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति॥२०॥

---

अथ अष्टनवत्यधिकशततमोऽध्यायः।

मत्स्य उवाच । मरीचेः कश्यपः पुत्रः कश्यपस्य तथा कुले ।
गोत्रकारान् ऋषीन् वक्ष्ये तेषां नामानि मे शृणु ॥१॥
आश्वायणि ऋषिगणो मेषकीरिटकायनाः ।
उदग्रजामाठराश्च भोजा विनयलक्षणाः ॥ २ ॥
शालाहलेयाः कौरिष्टाः कन्यकाश्च सुरायणाः ।
मन्दाकिन्यां वै मृगयाः श्रुतया भोजयापनाः ॥ ३ ॥
देवयाना गोमयानाश्च अधच्छाया अभयाश्च ये।
कात्यायनाः शाक्रायणाः बर्हियोगगदायनाः ॥ ४ ॥
भवनन्दि महाचक्रि दाचपायन एव च ।
योधयानाः कार्तिवयो हस्तिदानास्तथैव च ॥ ५ ॥
वात्स्यायनाश्च निकृता आश्वलायनि न स्तथा।
प्रागायणाः पौलमौलिराश्च वाता यनलग्ना ॥ ६ ॥
कौविरकाश्च शयाकाश्च अग्निशर्मायणा.श्च ये।
मेषपाः कैकरसपास्तथा बभ्रव एव तु ॥ ७ ॥
प्राचेयो ज्ञानसंज्ञेया आम्ना प्रावेय्य एव च ।
श्यामोदरा वैवशपास्तथा चैवोद्वलायनाः ॥ ८ ॥
काष्ठाहारिणमारीचा आजिहायनहास्तिकाः।
वैकर्णेयाः काश्यपेयाः सासिसाहारितायनाः ॥ ९ ॥
मातङ्गिनश्च भगवन्नार्षेयाः परिकीर्तिताः ।

वत्सरः कश्यपश्चैव निध्रुवश्च महातपाः ॥ १० ॥
परस्पर मवैवाह्या ऋषयः परिकीर्तिताः।
अतःपरं प्रवक्ष्यामि द्वामुष्यायण गोत्रजान् ॥ ११ ॥
अनसूयो नाकुरयः स्नातपो राजवर्त्तपः।
शैशिरो दवहिश्चैवं सैरन्ध्रीरोपसेवकिः ॥ १२ ॥
या मुनिः काद्रुपिङ्गाक्षिः सजात स्विन्तथैव च।
दिवावष्टाश्च इत्येते भक्त्या ज्ञेयाश्च काश्यपाः ॥१३॥
त्र्यार्षेयाश्च तथैवेषां सर्वेषां प्रवराः शुभाः।
वत्सरः काश्यपश्चैव वसिष्ठश्च महातपाः ॥१४॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः।
संयातिश्च नभश्चोभौ पिप्पल्योऽथ जलन्धरः ॥ १५ ॥
भुजातपूरः पूर्यश्च कर्दमो गर्द्दभीमुखः।
हिरण्यबाहु कैराता बुभौ काश्यपगोभिलौ ॥ १६ ॥
कुलहो वृषकण्डश्च मृगकेतुस्तथोत्तरः।
निदाघमसृणौ भत्स्या महान्तः केवलाश्च ये ॥ १७ ॥
शाण्डिल्यो दानवश्चैव तथा वै देवजातयः।
पैप्पलादिरत् स प्रवरा ऋषयः परिकीर्तिताः ॥ १८ ॥
त्र्यार्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः।
असितो देवलश्चैव कश्यपश्च महातपाः।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ १९ ॥
ऋषिप्रधानस्य च कश्यपस्य दाक्षायणीभ्यः सकलं प्रसूतम्।
जगत्समग्रं मनु सिंह पुण्यं किं ते प्रवक्ष्याम्यहमन्यदेव ॥२०॥
मत्स्य उवाच। वसिष्ठवंशजान् विप्रान्निबोध वदतोमम।
एकार्षेयस्तु प्रवरो वासिष्ठानां प्रकीर्तितः ॥ १ ॥

वसिष्ठा एव वासिष्ठा अविवाह्या वसिष्ठजैः ।
व्याघ्रपादा औपगवा वैक्लवाः शाड्वलायनाः ॥ २ ॥
कपिष्ठला औपलोमा अलब्धाश्च शठाः कठाः ।
गौपायना बोधपाश्च दाकव्याह्यथ वाह्यकाः ॥ ३ ॥
बालिशयाः पालिशयास्ततो वाग्ग्रन्थयश्च ये ।
आपस्थूणाः शीतवृत्तास्तथा ब्राह्मपुरेयकाः ॥ ४ ॥
लोमायनाः स्वस्तिकराः शाण्डिलिर्गौडिनिस्तथा ।
वाडोहलिश्च सुमनाश्चोपा वृद्धिकश्चैव च ॥ ५ ॥
चौलिर्बौलिर्ब्रह्मबलः पौलिः श्रवस एव च ।
पौड्वो याज्ञवल्क्यश्च एकार्षेया महर्षयः ॥ ६ ॥
वसिष्ठ एषां प्रवर अवैवाह्याः परस्परम् ।
शैलालयो महाकर्णः कौरव्यः क्रोधिनस्तथा ॥ ७ ॥
कपिञ्जला बालखिल्या भागवित्तायनाश्च ये ।
कौलायनः कालशिखः कोरकृष्णाः सुरायणाः ॥ ८ ॥
शाकाहार्याः शाकधियः काण्वा उपलपाश्च ये ।
शाकायना उहाकाश्च अथ माषशरावयः ॥ ९ ॥
दाकायना बालबयो वाकयो गोरथास्तथा ।
लम्बायनाः श्यामवयो ये च क्रोडोदरायणाः ॥ १० ॥
प्रलम्बायनाश्च ऋषय औपमन्यव एव च ।
सांख्यायनाश्च ऋषयस्तथा वै वेदशेरकाः ॥ ११ ॥
पालङ्कायन उद्गाहा ऋषयश्च बलेक्षवः ।
मातेया ब्रह्मबलिनः पल्लिगारिस्तथैव च ॥ १२ ॥
त्र्यार्षेयोऽभिमतश्चैषां सर्वेषां प्रवरस्तथा ।
भरद्वसुर्वसिष्ठश्च इन्द्रप्रमदिरेव च ॥ १३ ॥

परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
औपस्थलास्वस्थलयो पालीहाली हलाश्च ये ॥ १४ ॥
माध्यन्दिनो मात्रतयः पैप्पलादिर्विचक्षुषः ।
लै शृङ्गायन सैयल्काः कुण्डिनश्च नरोत्तम ! ॥ १५ ॥
त्र्यार्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः ।
वसिष्ठमित्रावरुणौ कुण्डिनश्च महातपाः ॥ १६ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
शिवकर्णो वयश्चैव पादपश्च तथैव च ॥ १७ ॥
त्र्यार्षेयोऽभिमतश्चैषां सर्वेषां प्रवरस्तथा ।
जातूकर्ण्यो वसिष्ठश्च तथैवात्रिश्च पार्थिव ! ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥ १८ ॥
वसिष्ठवंशेऽभिहिता मया ते ऋषिप्रधानाः सततं द्विजेन्द्राः ।
येषां तु नाम्नां परिकीर्तितेन पापं समग्रं पुरुषो जहाति ॥ १९ ॥

---

## अथ द्विशततमोऽध्यायः ।

मत्स्य उवाच । वसिष्ठस्तु महातेजा निमेः पूर्वपुरोहितः ।
बभूव पार्थिवश्रेष्ठ यज्ञास्तस्य समन्ततः ॥ १ ॥
श्रान्तात्मा पार्थिवश्रेष्ठ ! विशश्राम तदा गुरुः ।
तं गत्वा पार्थिवश्रेष्ठो निमिर्वचनमब्रवीत् ॥ २ ॥
भगवन्यष्टुमिच्छामि तन्मां याजय माचिरम् ।
तमुवाच महातेजा वसिष्ठः पार्थिवोत्तमम् ॥ ३ ॥
कञ्चित्कालं प्रतीक्षस्व तव यज्ञैः सुसत्तमैः ।
श्रान्तोऽस्मि राजन् ! विश्रम्य याजयिष्यामि ते नृप ! ॥ ४ ॥

एवमुक्तः प्रत्युवाच वसिष्ठं नृपसत्तम! ।
पारलौकिककार्यं तु कः प्रतीक्षितुमर्हति ॥ ५ ॥
न च मे सौहृदं ब्रह्मन्! कृतान्तेन बलीयसा ।
धर्मकार्ये त्वरा कार्या चलं यस्माद्धि जीवितम् ॥ ६ ॥
धर्मपथ्योदनो जन्तुर्मृतोऽपि सुखमश्नुते ।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥ ७ ॥
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ।
क्षेत्रापणगृहासक्तमन्यत्र गतमानसम् ॥ ८ ॥
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ।
नैकान्तेन प्रियः कश्चिद्द्वेष्यश्चास्य न विद्यते ॥ ९ ॥
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ।
प्राणवाय्वनलत्वञ्च त्वया विदितमेव च ॥ १० ॥
यदद्य जीवति ब्रह्मन्! क्षणमात्रन्तदद्भुतम् ।
शरीरं शाश्वतं मन्ये विद्याभ्यासे धनार्जने ॥ ११ ॥
अशाश्वतं धर्मकार्ये ऋणवानस्मि सङ्कटे ।
सोऽहं संभृतसम्भारो भवन्तमुपागतः ॥ १२ ॥
न चेद्याजयसे मां त्वं अन्यं यास्यामि याजकम् ।
एवमुक्तस्तदा तेन निमिना ब्राह्मणोत्तमः ॥ १३ ॥
शशाप तं निमिं क्रोधाद्विदेहस्त्वं भविष्यसि ।
श्रान्तं मां त्वं समुत्सृज्य यस्मादन्यं द्विजोत्तमम् ॥ १४ ॥
धर्मज्ञस्त्व नरेन्द्र! त्वं याजकं कर्तुमिच्छसि ।
निमिस्तं प्रत्युवाचाथ धर्मकार्यरतस्य मे ॥ १५ ॥
विघ्नं करोषि नान्येन याजनं च तथेच्छसि ।
शापं ददासि यस्मात्त्वं विदेहोऽथ भविष्यसि ॥ १६ ॥

एवमुक्ते तु तौ जातौ विदेहौ द्विजपार्थिवौ।
देहहीनौ तयोर्जीवौ ब्रह्माणमुपजग्मतुः॥ १७॥
तावागतौ समीक्ष्याथ ब्रह्मा वचनमब्रवीत्।
अद्यप्रभृति ते स्थानं निमि जीव ददाम्यहम्॥ १८॥
नेत्रपक्ष्मसु सर्वेषां त्वं वसिष्यसि पार्थिव।
त्वत्सम्बन्धात्तथा तेषां निमिषः सम्भविष्यति॥ १९॥
चालयिष्यन्ति तु तदा नेत्रपक्ष्माणि मानवाः।
एवमुक्ते मनुष्याणां नेत्रपक्ष्मसु सर्वशः॥ २०॥
जगाम निमि जीवस्तु वरदानात् स्वयम्भुवः।
वसिष्ठ जीवं भगवान् ब्रह्मा वचनमब्रवीत्॥ २१॥
मित्रावरुणयोः पुत्रो वसिष्ठ! त्वं भविष्यसि।
वसिष्ठेति च ते नाम तत्रापि च भविष्यति॥ २२॥
जन्मद्वयमतीतञ्च तत्रापि त्वं स्मरिष्यसि।
एतस्मिन्नेव काले तु मित्रश्च वरुणस्तथा॥ २३॥
बदर्य्याश्रममासाद्य तपस्तेपतुरव्ययम्।
तपस्यतोस्तयोरेवं कदाचिन्माधवे ऋतौ॥ २४॥
पुष्पितद्रुमसंस्थाने शुभे दयित मारुते।
उर्वशी तु वरारोहा कुर्वती कुसुमोच्चयम्॥ २५॥
सुसूक्ष्मरक्तवसना तयोर्दृष्टिपथङ्गता।
तां दृष्ट्वा सुमुखीं सुभ्रूं नीलनीरजलोचनाम्॥ २६॥
उभौ चक्षुभतुर्धैर्य्यात्तद्रूपपरिमोहितौ।
तपस्यतोस्तयोर्वीर्य्यमस्खलच्च मृगासने॥ २७॥
स्कन्नं रेतस्ततो दृष्ट्वा शापभीतौ परस्परम्।
चक्रतुः कलशे शुभ्रे तोयपूर्णे मनोरमे॥ २८॥

तस्मादृषिवरौ जातौ तेजसा प्रतिमौ भुवि ।
वसिष्ठश्चाप्यगस्त्यश्च मित्रावरुणयोः सुतौ ॥ २९ ॥
वसिष्ठस्तूपयेमेऽथ भगिनीं नारदस्य तु ।
अरुन्धतीं वरारोहां तस्यां शक्तिमजीजनत् ॥ ३० ॥
शक्तेः पराशरः पुत्रस्तस्य वंशं निबोध मे ।
यस्य द्वैपायनः पुत्रः स्वयं विष्णुरजायत ॥ ३१ ॥
प्रकाशो जनितो येन लोके भारत चन्द्रमाः ।
पराशरस्य तस्य त्वं शृणु वंशमनुत्तमम् ॥ ३२ ॥
काण्डशयो वाहनपो जैह्मपो भौमतापनः ।
गोपालिश्चैषां पञ्चम एते गौराः पराशराः ॥ ३३ ॥
प्रपोहया वाह्यमयाः ख्यातेयाः कौतुजातयः ।
हर्यश्वः पञ्चमो ह्येषां नीला ज्ञेयाः पराशराः ॥ ३४ ॥
कार्ष्णायनाः कपिमुखाः काकेयस्था जपातयः ।
पुष्करः पञ्चमश्चैषां कृष्णा ज्ञेयाः पराशराः ॥ ३५ ॥
श्राविष्ठायन वालेयाः स्वायष्टाश्चोपयाश्च ये ।
इषीकहस्तश्चैवैते पञ्च श्वेताः पराशराः ॥ ३६ ॥
पाटिको बादरिश्चैव स्तम्बा वै क्रोधनायनाः ।
क्षैमिश्चैषां पञ्चमस्तु एते श्यामाः पराशराः ॥ ३७ ॥
खल्यायना वार्ष्णायनास्तैलेयः खलु यूथपाः ।
तन्तिश्चैषां पञ्चमस्तु एते धूम्राः पराशराः ॥ ३८ ॥
इत्येते तु नृप ! वंशमुख्याः पराशराः सूर्यसमप्रभावाः ।
येषां तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ३९

# अथैकाधिकद्विशततमोऽध्यायः ।

---

मत्स्य उवाच । अतः परमगस्त्यस्य वक्ष्ये वंशोद्भवान् द्विजान् ।
अगस्त्यश्च करम्भश्च कौशल्यः करटस्तथा ॥ १ ॥
सुमेधसोमयोभुवस्तथा गान्धारकायणाः ।
पौलस्त्याः पौलहाश्चैव क्रतुवंशभवास्तथा ॥ २ ॥
आर्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः ।
अगस्त्यश्च महेन्द्रश्च ऋषिश्चैव मयोभुवः ॥ ३ ॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
पौर्णमासाः पारणाश्च आर्षेयाः परिकीर्तिताः ॥ ४ ॥
अगस्त्यः पौर्णमासश्च पारणश्च महातपाः ।
परस्परमवैवाह्याः पौर्णमासास्तु पारणैः ॥ ५ ॥
एवमुक्तो ऋषीणान्तु वंश उत्तमपौरुषः ।
अतः परं प्रवक्ष्यामि किम्भवानद्य काथ्यताम् ॥ ६ ॥
मनुरुवाच । पुलहस्य पुलस्त्यस्य क्रतोश्चैव महात्मनः ।
अगस्त्यस्य तथा चैव कथं वंशस्तदुच्यताम् ॥ ७ ॥
मत्स्य उवाच । क्रतुः खल्वनपत्योऽभूद्राजन्वैवस्वतेऽन्तरे ।
इध्मवाहं स पुत्रत्वे जग्राह ऋषिसत्तमः ॥ ८ ॥
अगस्त्यपुत्रं धर्मज्ञं आगस्त्याः क्रतवस्ततः ।
पुलहस्य तथा पुत्रास्त्रयश्च पृथिवीपते ! ॥ ९ ॥
तेषान्तु जन्म वक्ष्यामि उत्तरत्र यथाविधि ।

पुलहस्तु प्रजां दृष्ट्वा नातिप्रीतमनाः स्वकाम् ॥ १० ॥
अगस्त्यजं दृढास्यन्तु पुत्रत्वे वृतवांस्ततः ।
पौलहाश्च तथा राजन् ! आगस्त्याः परिकीर्तिताः ॥ ११ ॥
पुलस्त्यान्वयसम्भूतान् दृष्ट्वा रक्षःसमुद्भवान् ।
अगस्त्यस्य सुतन्धीमान् पुत्रत्वे वृतवांस्ततः ॥ १२ ॥
पौलस्त्याश्च तथा राजन्नागस्त्याः परिकीर्तिताः ।
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ॥ १३ ॥
एते तवोक्ताः प्रवरा द्विजानां महानुभावा नृपवंशकाराः ।
एषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ॥ १४ ॥

---

## द्व्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । अस्मिन्वैवस्वते प्राप्ते शृणु धर्मस्य पार्थिव !
दाक्षायणीभ्यः सकलं वंशं दैवतमुत्तमम् ॥ १ ॥
पर्वतादिमहादुर्गशरीराणि नराधिप ! ।
अरुन्धत्याः प्रसूतानि धर्माद्वैवस्वतेऽन्तरे ॥ २ ॥
अष्टौ च वसवः पुत्राः सोमपाश्च विभोस्तथा ।
धरो ध्रुवश्च सोमश्च आपश्चैवानिलानलौ ॥ ३ ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।
धरस्य पुत्रो द्रविणः कालः पुत्रो ध्रुवस्य तु ॥ ४ ॥
कालस्यावयवानान्तु शरीराणि नराधिप ! ।
मूर्तिमन्ति च कालाद्धि संप्रसूतान्यशेषतः ॥ ५ ॥
सोमस्य भगवान् वर्चाः श्रीमांश्चापस्य कीर्त्यते ।
अनेकजन्मजननः कुमारस्त्वनलस्य तु ॥ ६ ॥

पुरोजवाश्चानिलस्य प्रत्यूषस्य तु देवलः ।
विश्वकर्मा प्रभासस्य त्रिदशानां स वर्धकिः ॥ ७ ॥
समीहितकराः प्रोक्ता नागवीथ्यादयो नव ।
लम्बापुत्रः स्मृता घोषा भानोः पुत्राश्च भानवः ॥ ८ ॥
ग्रहर्क्षागणाश्च सर्वेषामन्येषां चामितौजसाम् ।
मरुत्वत्यां मरुत्वन्तः सर्वे पुत्राः प्रकीर्तिताः ॥ ९ ॥
सङ्कल्पायाश्च सङ्कल्पस्तथा पुत्रः प्रकीर्तितः ।
मुहूर्ताश्च मुहूर्तायाः साध्याः साध्यासुताः स्मृताः ॥ १० ॥
मनोर्मनुश्च प्राणश्च नरोपानौच वीर्यवान् ।
चित्तहार्योऽयनश्चैव हंसो नारायणस्तथा ॥ ११ ॥
विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्तिताः ।
विश्वायाश्च तथा पुत्रा विश्वे देवाः प्रकीर्तिताः ॥ १२ ॥
क्रतुर्दक्षोवसुः सत्यः कालकामो मुनिस्तथा ।
कुरजो मनुजो बीजो रोचमानश्च ते दश ॥ १३ ॥
एतावदुक्तस्तव धर्मवंशः संक्षेपतः पार्थिववंशमुख्य ! ।
व्यासेन वक्तुं न हि शक्यमस्ति राजन् विना वर्षशतैरनेकैः ॥ १४ ॥

---

## त्र्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । एतद्वंशभवा विप्राः श्राद्धे भोज्याः प्रयत्नतः ।
पितॄणां वल्लभं यस्मादेषु श्राद्धं नरेश्वर ! ॥ १ ॥
अतः परं प्रवक्ष्यामि पितृभिर्याः प्रकीर्तिताः ।
गाथाः पार्थिवशार्दूल ! कामयद्भिः पुरे स्वके ॥ २ ॥
अपि स्यात्स कुलेऽस्माकं यो नो दद्याज्जलाञ्जलिम् ।

नदीषु बहुतोयासु शीतलासु विशेषतः॥ ३॥
अपि स्यात्स कुलेऽस्माकं यः श्राद्धं नित्यमाचरेत्।
पयोमूलफलैर्भक्ष्यैस्तिलतोयेन वा पुनः॥ ४॥
अपि स्यात्स कुलेऽस्माकं यो नोदद्यात्त्रयोदशीम्।
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च॥ ५॥
अपि स्यात्स कुलेऽस्माकं खड्गमांसेन यः सकृत्।
श्राद्धं कुर्यात्प्रयत्नेन कालशाकेन वा पुनः॥ ६॥
कालशाकं महाशाकं मधु मुन्यन्नमेव च।
विषाणवर्जा ये खड्गा आसूर्यन्तद्दशीमहि॥ ७॥
गयायां दर्शने राहोः खड्गमांसेन योगिनाम्।
भोजयेत्कः कुलेऽस्माकं छायायां कुञ्जरस्य च॥ ८॥
आकल्पकालिकी तृप्तिस्तेनास्माकं भविष्यति।
दाता सर्वेषु लोकेषु कामचारी भविष्यति॥ ९॥
आभूतसंप्लवं कालं नात्र कार्या विचारणा।
यद्दत्त्यक्षकं तस्मादेकेनापि चयः सदा॥ १०॥
तृप्तिं प्राप्स्याम चानन्तां किं पुनः सर्वसम्पदा।
अपि स्यात्स कुलेऽस्माकं दद्यात् कृष्णाजिनञ्च यः॥ ११
अपि स्यात्स कुलेऽस्माकं कश्चित् पुरुषसत्तमः।
प्रसूयमानां यो धेनुं दद्याद्ब्राह्मणपुङ्गवे॥ १२॥
अपि स्यात्स कुलेऽस्माकं वृषभं यः समुत्सृजेत्।
सर्ववर्णविशेषेण शुक्लनीलं वृषन्तथा॥ १३॥
अपि स्यात्स कुलेऽस्माकं यः कुर्यात् श्रद्धयान्वितः।
सुवर्णदानं गोदानं पृथिवीदानमेव च॥ १४॥
अपि स्यात्स कुलेऽस्माकं कश्चित्पुरुषसत्तमः।

कूपारामतडागानां वापीनां यश्च कारकः ॥ १५ ॥
अपि स्यात्स कुलेऽस्माकं सर्वभावेन यो हरिम् ।
प्रयायाच्छरणं विष्णुं देवेशं मधुसूदनम् ॥ १६ ॥
अपि नः स कुले भूयात् कश्चिद्विद्वान् विचक्षणः ।
धर्मशास्त्राणि योदद्याद्विधिना विदुषामपि ॥ १७ ॥
एतावदुक्तं तव भूमिपाल! श्राद्धस्य कल्पं मुनिसम्प्रदिष्टम् ।
पापापहं पुण्यविवर्द्धनञ्च लोकेषु मुख्यत्वकरन्तथैव ॥ १८ ॥

---

## चतुरधिकद्विशततमोऽध्यायः ।

मनुरुवाच । प्रसूयमाना दातव्या धेनुर्ब्राह्मणपुङ्गवे ।
विधिना केन धर्मज्ञ! दानं दद्याच्च किं फलम् ॥ १ ॥
मत्स्य उवाच । स्वर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योपदोहनां राजन्! सवत्सां द्विजपुङ्गवे ॥ २ ॥
प्रसूयमानां गां दत्वा महत्पुण्यफलं लभेत् ।
यावद्वत्सो योनिगतो यावद्गर्भं न मुञ्चति ॥ ३ ॥
तावद्वै पृथिवी ज्ञेया सशैलवनकानना ।
प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ॥ ४ ॥
ससमुद्रगुहा तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥ ५ ॥
यावन्ति धेनुरोमाणि वत्सस्य च नराधिप! ।
तावत्संख्यं युगगणं देवलोके महीयते ॥ ६ ॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
उद्धरिष्यत्यसंदेहान्नरकाद्भूरिदक्षिणः ॥ ७ ॥

घृतक्षीरवहाः कुल्या दधिपायसकर्दमाः।
यत्र तत्र गतिस्तस्य द्रुमाश्चेप्सितकामदाः।
गोलकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव ! ॥८॥
स्त्रियश्च तं चन्द्रसमानवक्त्राः प्रतप्तजाम्बूनदतुल्यरूपाः।
महानितम्बास्तनुवृत्तमध्या भजन्त्यजस्रं नलिनाभनेत्राः ॥९॥
मनुरुवाच। कृष्णाजिनप्रदानस्य विधिकालौ ममानघ ! ।
ब्राह्मणांश्च तथाचक्ष्व तत्र मे संशयो महान् ॥१॥
मत्स्य उवाच। वैशाखी पौर्णमासी च ग्रहणे शशिसूर्ययोः।
पौर्णमासी तु या माघे ह्याषाढी कार्तिकी तथा ॥२॥
उत्तरायणं द्वादशी वा तस्यां दत्तं महाफलम्।
आहिताग्निर्द्विजो यस्तु तद्देयं तस्य पार्थिव ! ॥३॥
यथा येन विधानेन तन्मे निगदतः शृणु।
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप ! ॥४॥
आदावेव समास्तीर्य शोभनं शस्त्रमाविकम्।
ततः सशृङ्गं सखुरमास्तरेत् कृष्णमार्गकम् ॥५॥
कर्त्तव्यं रुक्मशृङ्गं तद्रौप्यदन्तं तथैव च।
लाङ्गूलं मौक्तिकैर्युक्तं तिलच्छन्नं तथैव च ॥६॥
तिलैश्च शिखितं कृत्वा वाससाच्छादयेच्छुचि।
सुवर्णनाभं तत्कुर्यादलङ्कुर्याद्विशेषतः ॥७॥
रत्नैर्गन्धैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत्।
कांस्यपात्राणि चत्वारि तेषु दद्याद्यथाक्रमम् ॥८॥
मृण्मयेषु च पात्रेषु पूर्वादिषु यथाक्रमम्।
घृतं क्षीरं दधि क्षौद्रमेवं दद्याद्यथाविधि ॥९॥
चम्पकस्य तथा शाखा सव्रणं कुम्भमेव च।

वार्ह्मीपस्थापनं कृत्वा शुभचित्तो निवेशयेत् ॥ १० ॥
सूक्ष्मवस्त्रं शुभम्पीतं मार्जनार्थं प्रयोजयेत् ॥
तथा धातुमयीः पात्रीः पादयोस्तस्य दापयेत् ॥ ११ ॥
यानि कानि च पापानि मया लोभात् कृतानि वै ।
लोहपात्रादिदानेन प्रणश्यन्तु ममाशु वै ॥ १२ ॥
तिलपूर्णां ततः कृत्वा वामपादे निवेशयेत् ।
यानि कानि च पापानि कर्णोत्थानि कृतानि च ॥ १३ ॥
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ।
मधुपूर्णन्तु तत्कृत्वा पादे वै दक्षिणे न्यसेत् ॥ १४ ॥
परापवादपैशुन्याद्वृथा मांसस्य भक्षणात् ।
तथोत्थितञ्च मे पापं ताम्रपात्रात्प्रणश्यतु ॥ १५ ॥
कन्यानृतात् गवाञ्चैव परदाराभिमर्शनात् ।
रौप्यपात्रप्रदानाद्धि क्षिप्रं नाशं प्रया तु मे ॥ १६ ॥
ऊर्ध्वपादे त्विमे कार्य्ये ताम्रस्य रजतस्य च ।
जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना ॥ १७ ॥
सुवर्णपात्रदानात्तु नाशयाशु जनार्द्दन ! ।
हेममुक्ताविद्रुमञ्च दाड़िमं बीजपूरकम् ॥ १८ ॥
प्रशस्तपत्रे श्रवणे खुरे शृङ्गाटकानि च ।
एवं कृत्वा यथोक्तेन सर्वशाकफलानि च ॥ १९ ॥
तत्प्रतिग्रहविद्विद्वानाहिताग्निर्द्दिजोत्तमः ।
स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या चाप्यलङ्कृतः ॥ २० ॥
प्रतिग्रहस्य तस्योक्तः पुच्छदेशे महीपते ! ।
तत एवं समीपे तु मन्त्रमेन मुदीरयेत् ॥ २१ ॥
कृष्णः कृष्णगलो देवः कृष्णाजिनधरस्तथा ।

तद्दानाद्धूतपापस्य प्रीयतां वृषभध्वजः ॥ २२ ॥
अनेन विधिना दत्त्वा यथावत् कृष्णमार्गकम् ।
न स्पृश्योऽसौ द्विजो राजन् ! चितियूपसमो हि सः ॥ २३ ॥
स दाने श्राद्धकाले च दूरतः परिवर्जयेत् ।
स्वगृहात् प्रेष्य तं विप्रं मङ्गलस्नानमाचरेत् ॥ २४ ॥
पूर्णकुम्भेन राजेन्द्र ! शाखया चम्पकस्य तु ।
कृत्वाचार्यश्च कलशं मन्त्रेणानेन मूर्द्धनि ॥ २५ ॥
आप्यायस्व समुद्रज्येष्ठा ऋचा संस्नाप्य षोड़श ।
अहते वाससी वीत आचान्तः शुचितामियात् ॥ २६ ॥
तद्दासः कुम्भसहितं नीत्वा क्षेप्यं चतुष्पथे ।
कृतेनानेन या तुष्टिर्न सा शक्या सुरैरपि ॥ २७ ॥
वक्तुं हि नृपतिश्रेष्ठ ! तथाप्युद्देशतः शृणु ।
समग्रभूमिदानस्य फलं प्राप्नोत्यसंशयम् ॥ २८ ॥
सर्वान् लोकांश्च जयति कामचारी विहङ्गवत् ।
आभूतसंप्लवं यावत्स्वर्गमाप्नोत्यसंशयम् ॥ २९ ॥
न पिता पुत्रमरणं वियोगं भार्यया सह ।
धनदेशपरित्यागं न चैवेहाप्नुयात् क्वचित् ॥ ३० ॥
कृष्णाजिनं कृष्णखगस्य चर्म दत्त्वा द्विजेन्द्राय समाहितात्मा ।
यथोक्तमेतन्मरणं न शोचेत् प्राप्नोत्यभीष्टं मनसः फलं तत् ३१

# पञ्चाधिकद्विशततमोऽध्यायः ।

मनुरुवाच ॥ भगवंश्छ्रोतुमिच्छामि वृषभस्य च लक्षणम् ।
वृषोत्सर्गविधिञ्चैव तथा पुण्यफलं महत् ॥ १ ॥
मत्स्य उवाच । धेनुमादौ परीक्षेत सुशीलाञ्च गुणान्विताम् ।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीम् ॥ २ ॥
स्निग्धवर्णां स्निग्धखुरां स्निग्धशृङ्गीं तथैव च ।
मनोहराकृतिं सौम्यां सुप्रमाणामनुद्धताम् ॥ ३ ॥
आवर्तैर्दक्षिणावर्तैर्युक्तां दक्षिणतस्तथा ।
वामावर्तैर्वामतश्च विस्तीर्णजघनां तथा ॥ ४ ॥
मृदुसंहततास्त्रोष्ठीं रक्तग्रीवासुशोभिताम् ।
श्यामदीर्घा स्फुटिता रक्तजिह्वा तथा च या ॥ ५ ॥
विस्तारामलनेत्रा च शफैरविरलैर्दृढैः ।
वैदूर्यमधुवर्णैश्च जलबुद्बुदसन्निभैः ॥ ६ ॥
रक्तस्निग्धैश्च नयनैस्तथा रक्तकनीनिकैः ।
सप्त चतुर्दशदन्ता च तथा वा श्यामतालुका ॥ ७ ॥
षडुन्नता सुपार्श्वोरुः पृथुपञ्चसमायता ।
अष्टायतशिरोग्रीवा या राजन्! सा सुलक्षणा ॥ ८ ॥
मनुरुवाच । षडुन्नताः के भगवन्! के च पञ्चसमायताः ।
आयताश्च तथैवाष्टौ धेनूनाञ्च शुभावहाः ॥ ९ ॥
मत्स्य उवाच । उरः पृष्ठं शिरः कुक्षी श्रोणी च वसुधाधिप! ।
षडुन्नतानि धेनूनां पूजयन्ति विचक्षणाः ॥ १० ॥
कर्णौ नेत्रे ललाटञ्च पञ्च भास्करनन्दन! ।
समायतानि शस्यन्ते पुच्छं सास्ना च सक्थिनी ॥११॥

चत्वारस्य स्तना राजन्! ज्ञेया ह्यष्टौ मनीषिभिः।
शिरोग्रीवायताश्चैते भूमिपाल! दश स्मृताः॥ १२॥
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितम्।
उन्नतस्कन्धककुदं ऋजुलाङ्गूलकम्बलम्॥ १३॥
महाकटितटस्कन्धं वैदूर्यमणिलोचनम्।
प्रवालगर्भशृङ्गाग्रं सुदीर्घपृथुबालधिम्॥ १४॥
नवाष्टादशसङ्ख्यैर्वा तीक्ष्णाग्रैर्दशनैः शुभैः।
मल्लिकाक्षश्च मोक्तव्यो गृहेऽपि धनधान्यदः॥ १५
वर्णेनताम्रकपिलो ब्राह्मणस्य प्रशस्यते।
श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च॥ १६॥
शृङ्गिणा स्ताम्रपृष्ठश्च शबलः पञ्चवालकैः।
पृथुकर्णो महास्कन्धः श्लक्ष्णरोमा च यो भवेत्॥
रक्ताक्षः कपिलो यश्च रक्तशृङ्गतलो भवेत्॥ १७॥
श्वेतोदरः कृष्णपार्श्वो ब्राह्मणस्य तु शस्यते।
स्निग्धो रक्तेन वर्णेन क्षत्रियस्य प्रशस्यते॥ १८॥
काञ्चनाभेन वैश्यस्य कृष्णेनाप्यन्त्यजन्मनः।
यस्य प्रागायते शृङ्गे भ्रूमुखाभिमुखे सदा॥ १९॥
सर्वेषामेव वर्णानां सर्वः सर्वार्थसाधकः।
मार्जारपादः कपिलो धन्यः कपिलपिङ्गलः॥ २०॥
श्वेतो मार्जारपादस्तु धन्यो मणिनिभेक्षणः।
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च॥ २१॥
सर्वपादसितो यश्च द्विपादः श्वेतएव च।
कपिञ्जलनिभो धन्यस्तथा तित्तिरिसन्निभः॥ २२॥
आकर्णमूलश्वेतन्तु मुखं यस्य प्रकाशते।

नन्दीमुखः स विज्ञेयो रक्तवर्णो विशेषतः ॥ २३ ॥
श्वेतन्तु जठरं यस्य भवेत्पृष्ठं च गोपतेः ।
वृषभः स समुद्राख्यः सततं कुलवर्धनः ॥ २४ ॥
मल्लिकापुष्पचित्रश्च धन्यो भवति पुङ्गवः ।
कमलैर्मण्डलैश्चापि चित्रो भवति भाग्यदः ॥ २५ ॥
अतसीपुष्पवर्णश्च तथा धन्यतरः स्मृतः ।
एते धन्यास्तथा धन्यान् कीर्तयिष्यामि ते नृप ! ॥ २६ ॥
कृष्णताल्वोष्ठवदना रूक्षशृङ्गशफाश्च ये ।
अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रसिंहनिभाश्च ये ॥ २७ ॥
ध्वाङ्क्षगृध्रसवर्णाश्च तथा मूषकसन्निभाः ।
कुण्ठाः काणास्तथा खञ्जाः केकराक्षास्तथैव च ॥ २८ ॥
विषमश्वेतपादाश्च उद्भ्रान्तनयनास्तथा ।
नैते वृषाः प्रमोक्तव्या न च धार्यास्तथा गृहे ॥ २९ ॥
मोक्तव्यानाञ्च धार्याणां तेषां वक्ष्यामि लक्षणम् ।
स्वस्तिकाकारशृङ्गाश्च तथा मेघौघनिस्वनाः ॥ ३० ॥
महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
महोरस्का महोच्छ्राया महाबलपराक्रमाः ॥ ३१ ॥
शिरः कर्णौ ललाटञ्च वालधिश्चरणास्तथा ।
नेत्रे पार्श्वे च कृष्णानि शस्यन्ते चन्द्रभासिनाम् ॥ ३२ ॥
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः ।
भूमौ कर्षति लाङ्गूलं प्रलम्बस्थूलवालधिः ॥ ३३ ॥
पुरस्तादुन्नतो नीलो वृषभश्च प्रशस्यते ।
शक्तिध्वजपताकाढ्या येषां राजी विराजते ॥ ३४ ॥
अनड्वाहस्तु ते धन्याश्चित्रसिद्धिजयावहाः ।

मर्दयेत् निवर्तन्ते स्वयं ये विनिवर्तिताः ॥ ३५ ॥
समुन्नतशिरोग्रीवा धन्यास्ते यूथवर्द्धनाः ।
रक्तशृङ्गाग्रनयनः श्वेतवर्णो भवेद्यदि ॥ ३६ ॥
शफैः प्रवालसदृशै र्नास्तिधन्यतरस्ततः ।
एते धार्य्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः ॥ ३७ ॥
धारिताश्च तथा मुक्ता धनधान्यप्रवर्द्धनाः ।
चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः ॥३८॥
लाक्षारससवर्णश्च तं नील मिति निर्दिशेत् ।
वृष एष स मोक्तव्यो न सन्धार्यो गृहे भवेत् ॥ ३९ ॥
तदर्थमेषा चरति लोके गाथा पुरातनी ।
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥ ४० ॥
गौरीञ्चाप्युद्वहेत्कन्यां नीलं वा वृषमुत्सृजेत् ॥ ४१ ॥
एवं वृषं लक्षणसंप्रयुक्तं गृहोद्भवं क्रीतमथापि राजन् ।
मुक्त्वा न शोचेन्मरणं महात्मा मोक्षं गतश्चाहमतोऽभिधास्ये ॥ ४२ ॥

---

## षड्धिकद्विशततमोऽध्यायः ।

सूत उवाच । ततः स राजा देवेशं पप्रच्छामितविक्रमः ।
पतिव्रतानां माहात्म्यं तत्सम्बन्धां कथामपि ॥ १ ॥
मनुरुवाच । पतिव्रतानां का श्रेष्ठा कया मृत्युः पराजितः ।
नामसङ्कीर्तनं कस्याः कीर्तनीयं सदा नरैः ॥
सर्वपापक्षयकर मिदानीं कथयस्व मे ॥ २ ॥
मत्स्य उवाच । त्रैलोक्यं धर्मराजोऽपि नाचरत्यथयोषिताम् ।
पतिव्रतानां धर्मज्ञ! पूज्या स्तस्यापि ताः सदा ॥ ३ ॥

अत्र ते वर्णयिष्यामि कथां पापप्रणाशिनीम्।
यथा विमोचितो भर्त्ता मृत्युपाशाद्धृतः स्त्रिया ॥ ४ ॥
मद्रेषु शाकलो राजा बभूवाश्वपतिः पुरा।
अपुत्रस्तप्यमानोऽसौ पुत्रार्थी सर्वकामदाम् ॥ ५ ॥
आराधयति सावित्रीं लक्षितोऽसौ द्विजोत्तमैः।
सिद्धार्थकैर्हूयमानां सावित्रीं प्रत्यहं द्विजैः ॥ ६ ॥
शतसंख्यैश्चतुर्थ्यान्तु दशमासागते दिने।
काले तु दर्शयामास स्वात्तनुं मनुजेश्वरम् ॥ ७ ॥
सावित्र्युवाच।
राजन्! भक्तोऽसि मे नित्यं दास्यामि त्वां सुतां सदा।
तां दत्तां मत्प्रसादेन पुत्रीं प्राप्स्यसि शोभनाम् ॥ ८ ॥
एतावदुक्त्वा सा राज्ञः प्रणतस्यैव पार्थिव!।
जगामादर्शनं देवी यथा वै नृप! चञ्चला ॥ ९ ॥
मालती नाम तस्यासीद्राज्ञः पत्नी पतिव्रता।
सुषुवे तनयां काले सावित्रीमिव रूपतः ॥ १० ॥
सावित्र्याश्च तया दत्ता तद्रूपसदृशी तथा।
सावित्री च भवत्येषा जगाद नृपतिर्द्विजान् ॥११॥
कालेन यौवनं प्राप्ता ददौ सत्यवते पिता।
नारदस्तु ततः प्राह राजानं दीप्ततेजसम् ॥ १२ ॥
संवत्सरेण क्षीणायुर्भविष्यति नृपात्मजः।
सकृत्कन्याः प्रदीयन्ते चिन्तयित्वा नराधिपः ॥ १३ ॥
तथापि प्रददौ कन्यां द्युमत्सेनात्मजे शुभे।
सावित्र्यपि च भर्तारमासाद्य नृपमन्दिरे ॥ १४ ॥

नारदस्य तु वाक्येन दूयमानेन चेतसा ।
शुश्रूषां परमां चक्रे भर्त्तृश्वशुरयोर्वने ॥ १५ ॥
राज्याद्भ्रष्टः सभार्यस्तु नष्टचक्षुर्नराधिपः ।
न तुतोष समासाद्य राजपुत्रीं तथा स्नुषाम् ॥ १६ ॥
चतुर्थेऽहनि मर्त्तव्यं तथा सत्यवता द्विजाः ! ।
श्वशुरेणाभ्यनुज्ञाता तदा राजसुतापि सा ॥ १७ ॥
चक्रे त्रिरात्रं धर्मज्ञा प्राप्ते तस्मिंस्तदा दिने ।
चारुपुष्पफलाहारः सत्यवांस्तु ययौ वनम् ॥ १८ ॥
श्वशुरेणाभ्यनुज्ञाता याचनाभङ्गभीरुणा ।
सावित्र्यपि जगामार्त्ता सह भर्त्रा महद्वनम् ॥ १९ ॥
चेतसा दूयमानेन गूहमाना महद्भयम् ।
वने पप्रच्छ भर्त्तारं द्रुमांश्चासदृशांस्तथा ॥ २० ॥
आश्वासयामास स राजपुत्रीं क्लान्तां वने पद्मविशालनेत्राम् ।
सन्दर्शनेनाथ द्रुमद्विजानान्तथा मृगाणां विपिने नृवीरः ॥२१॥

---

## अष्टाधिकद्विशततमोऽध्यायः ।

सत्यवानुवाच । वनेऽस्मिन् शाद्वलाकीर्णे सहकारं मनोहरम् ।
नेत्रघ्राणसुखं पश्य वसन्ते रतिवर्धनम् ॥ १ ॥
वनेऽप्यशोकं दृष्ट्वैनं रागवन्तं सुपुष्पितम् ।
वसन्तो हसतीवायं मामेवायतलोचने ! ॥ २ ॥
दक्षिणे दक्षिणेनैतां पश्य रम्यां वनस्थलीम् ।
पुष्पितैः किंशुकैर्युक्तां ज्वलितानलसप्रभैः ॥ ३ ॥
सुगन्धिकुसुमामोदो वनराजिविनिर्गतः ।

करोति वायुर्दीर्घिक्ष्वमावयोः श्रमनाशनम् ॥ ४ ॥
पश्चिमेन विशालाक्षि ! कर्णिकारैः सुपुष्पितैः।
काञ्चनेन विभात्येषा वनराजीमनोरमा ॥ ५ ॥
अतिमुक्तलताजालरुद्धमार्गा वनस्थली।
रम्या सा चारुसर्वाङ्गी कुसुमोत्करभूषणा ॥ ६ ॥
मधुमत्तालिझङ्कारव्याजेन वरवर्णिनी।
चापाकृष्टिं करोतीव कामः पार्श्वे जिघांसया ॥ ७ ॥
फलास्वादलसद्धृष्टपुंस्कोकिलविनादिता।
विभाति चारुतिलका त्वमिवैषा वनस्थली ॥ ८ ॥
कोकिलश्चूतशिखरे मञ्जरीरेणुपिञ्जरः।
गदितैर्व्यक्ततां याति कुलीनश्चेष्टितैरिव ॥ ९ ॥
पुष्परेणुविलिप्ताङ्गीं प्रियामनु सरिद्वने।
कुसुमं कुसुमं याति कूजन् कामी शिलीमुखः ॥ १० ॥
मञ्जरी सहकारस्य कान्तावञ्चाग्रपीडिताम्।
स्वदते बहुपुष्पेऽपि पुंस्कोकिलयुवा वने ॥ ११ ॥
काकः प्रसूनां वृक्षाग्रे स्वामिकाग्रेण चञ्चुना।
काकीं सम्भावयत्येष पक्षाच्छादितपुत्रिकाम् ॥ १२ ॥
शुभाङ्गनिम्नमासाद्य दयितासहितो युवा।
नाहारमपि चादत्ते कामाक्रान्तः कपिञ्जलः ॥ १३ ॥
कलविङ्कस्तु रमयन् प्रियोत्सङ्गं समास्थितः।
मुहुर्मुहुर्विशालाक्षि ! उत्कण्ठयति कामिनः ॥ १४ ॥
वृक्षशाखां समारूढः शुकोऽयं सह भार्यया।
करेण लम्बयन् शाखां करोति सफलं शिरः ॥ १५ ॥
वनेऽत्र पिशितास्वादतृप्तो निद्रामुपागतः।

शेते सिंहयुवा कान्ता चरणान्तरगामिनी ॥ १६ ॥
व्याघ्रयोर्मिथुनं पश्य शैलकन्दरसंस्थितम् ।
ययोर्नेत्रप्रभालोके गुहाभिन्नेव लक्ष्यते ॥ १७ ॥
अयं द्वीपी प्रियां लेढि जिह्वाग्रेण पुनः पुनः ।
प्रीतिमायाति च तया लिह्यमानः स्वकान्तया ॥ १८ ॥
उत्सङ्गकृतमूर्धानं निद्रापहृतचेतसम् ।
जातूद्धरणतः कान्तं सुखयत्येव वानरी ॥ १९ ॥
भूमौ निपतितां रामां मार्जारोदर्शितोदरीम् ।
नखैर्दन्तैर्दशत्येष न च पीडयते तथा ॥ २० ॥
शशकः शशकी चोभे संसुप्ते पीडिते द्रुमे ।
संलीनगात्रचरणौ कर्णैर्व्यक्तिमुपागते ॥ २१ ॥
स्नात्वा सरसि पद्माढ्ये नागस्तु मदनप्रियः ।
सम्भावयति तन्वङ्गीं मृणालकवलैः प्रियाम् ॥ २२ ॥
कान्तप्रोथसमुत्थानैः कान्तमार्गानुगामिनी ।
करोति कवलं मुस्तैर्वराही पोतकानुगा ॥ २३ ॥
दृढाङ्गसन्धिर्महिषः कर्दमाक्ततनुर्वने ।
अनुव्रजति धावन्तीं प्रियवक्त्रचतुष्करः ॥ २४ ॥
पश्य चार्वङ्गि ! सारङ्गं त्वं कटाक्षविभावनैः ।
सभार्यं मां हि पश्यन्तं कौतूहलसमन्वितम् ॥ २५ ॥
पश्य पश्चिमपादेन रोही कण्डूयते मुखम् ।
स्नेहार्द्रभावात्कर्षन्ती भर्तारं शृङ्गकोटिना ॥ २६ ॥
द्रागिमाञ्चमरीं पश्य सितवालामगच्छतीम् ।
अन्वास्ते चमरः कामी मांश्च पश्यति गर्वितः ॥ २७ ॥
आतपे गवयं पश्य प्रसुप्तं भार्यया सह ।

रोमन्थनं प्रकुर्वाणं काकङ्कुदि वारयन् ॥ २८ ॥
पश्येमं भार्यया सार्द्धं न्यस्ताग्रचरणद्वयम्।
विपुले वदरीस्कन्धे बदराशनकाम्यया ॥ २९ ॥
हंसं सभार्यं सरसि विचरन्तं सुनिर्मलम्।
सुमुक्तस्येन्दुबिम्बस्य पश्य वै श्रियमुद्वहन् ॥ ३० ॥
सभार्यश्चक्रवाकोऽयं कमलाकरमध्यगः।
करोति पद्मिनीं कान्तां सुपुष्पामिव सुन्दरी ॥ ३१ ॥
मया फलोच्चयः सुभ्रु! त्वया पुष्पोच्चयः कृतः।
इन्धनं न कृतं सुभ्रु! तत्करिष्यामि सांप्रतम् ॥३२॥
त्वमस्य सरसस्तीरे द्रुमच्छायां समाश्रिता॥
क्षणमात्रं प्रतीक्षस्व विश्रमस्व च भामिनि! ॥ ३३ ॥
मालिन्युवाच। एवमेतत्करिष्यामि मम दृष्टिपथस्त्वया।
दूरं कान्त! न कर्तव्यो बिभेमि गहने वने ॥ ३४ ॥

मत्स्य उवाच।

ततः स काष्ठानि चकार तस्मिन्वने तदा राजसुतासमक्षम्।
तस्या ह्यदूरे सरसस्तदानीं मेने च सा तं मृतमेव राजन् ॥३५॥

---

## नवाधिकद्विशततमोऽध्यायः।

मत्स्य उवाच। तस्य पाटयतः काष्ठं जज्ञे शिरसि वेदना
स वेदनार्तः सङ्गम्य भार्यां वचनमब्रवीत् ॥ १ ॥
आयासेन ममानेन जाता शिरसि वेदना।
तमश्च प्रविशामीव न च जानामि किञ्चन ॥ २ ॥

त्वदुत्सङ्गे शिर: कृत्वा स्वप्तुमिच्छामि सांप्रतम् ।
राजपुत्रीमेवमुक्त्वा तदा सुष्वाप पार्थिव: ॥ ३ ॥
तदुत्सङ्गे शिर: कृत्वा निद्रयाविललोचन: ।
पतिव्रता महाभागा तत: सा राजकन्यका ॥४॥
ददर्श धर्मराजं तु स्वयं तं देशमागतम् ।
नीलोत्पलदलश्यामं पीताम्बरधरं प्रभुम् ॥ ५ ॥
विद्युल्लतानिबद्धाङ्गं सतोयमिव तोयदम् ।
किरीटेनार्कवर्णेन कुण्डलैश्च विराजितम् ॥ ६ ॥
हारभारार्पितोरस्कं तथाङ्गदविभूषितम् ।
तथानुगम्यमानं च कालेन सह मृत्युना ॥७॥
स तु संप्राप्य तं देशं देहात्सत्यवतस्तदा ।
अङ्गुष्ठमात्रं पुरुषं पाशबद्धं वशंगतम् ॥ ८ ॥
आकृष्य दक्षिणामाशां प्रययौ सत्वरं तदा ।
सावित्र्यपि वरारोहा दृष्ट्वा तं गतजीवितम् ॥ ९ ॥
अनुवव्राज गच्छन्तं धर्मराजमतन्द्रिता ।
कृताञ्जलिरुवाचाथ हृदयेन प्रवेपता ॥ १० ॥
इमं लोकं मातृभक्त्या पितृभक्त्यातु मध्यमम् ।
गुरुं शुश्रूषया चैव ब्रह्मलोकं समश्नुते ॥ ११ ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृता: ।
अनादृतास्तु यस्यैते सर्वास्तस्याफला: क्रिया: ॥ १२ ॥
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ।
तेषां च नित्यं शुश्रूषां कुर्यात्प्रियहिते रत: ॥ १३ ॥
तेषामनुपरोधेन पारतन्त्र्यं यदाचरेत् ।

तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥
विश्वप्येतेषु क्लत्यं हि पुरुषस्य समस्यति ॥ १४ ॥

यम उवाच ।

अनेन कामेन निवर्त्तयाशु धर्मो न तेभ्योऽपि हि उच्यते च ।
ममोपरोधस्तव च श्रमः स्यात्तथाधुना तेन तव ब्रवीमि ॥१५॥
गुरुपूजारतिर्भक्ता त्वञ्च साध्वी पतिव्रता ।
विनिवर्तस्व धर्मज्ञे ! ग्लानिर्भवति तेऽधुना ॥ १६ ॥
सावित्र्युवाच । पतिर्हि दैवतं स्त्रीणां पतिरेव परायणम् ।
अनुगम्यः स्त्रिया साध्व्या पतिः प्राणधनेश्वरः ॥ १७ ॥
मितन्ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य च दातारं भर्त्तारं का न पूजयेत् ॥ १८ ॥
नीयते यत्र भर्त्ता मे स्वयं वा यत्र गच्छति ।
मयापि तत्र गन्तव्यं यथाशक्ति सुरोत्तम ! ॥ १९ ॥
पतिमादाय गच्छन्त मनुगन्तुमहं यदा ।
त्वां देव ! न हि शक्यामि तदा त्यक्ष्यामि जीवितम् ॥२०॥
मनस्विनी तु या काचित् वैधव्याक्षरदूषिता ।
मुहूर्त्तमपि जीवेत मण्डनार्हा ह्यमण्डिता ॥ २१ ॥
यमउवाच । पतिव्रते ! महाभागे ! परितुष्टोऽस्मि ते शुभे ! ।
विना सत्यवतः प्राणैर्वरं वरय माचिरम् ॥२२॥
सावित्र्युवाच । विनष्टचक्षुषोराज्यञ्चक्षुषा सह कारय ।
च्युतराष्ट्रस्य धर्मज्ञ ! श्वश्रुरस्य महात्मनः ॥ २३ ॥

यमउवाच ।

दूरे पथे गच्छ निवर्त भद्रे ! भविष्यतीदं सकलं त्वयोक्तम् ।
ममोपरोधस्तव च श्रमः स्यात्तथाधुना तेन तव ब्रवीमि ॥२४॥

## दशाधिकद्विशततमोऽध्यायः ।

सावित्र्युवाच । कुतः क्लमः कुतो दुःखं सद्भिः सह समागमे ।
सतां तस्मान्न मे ग्लानिस्त्वत्समीपे सुरोत्तम ! ॥ १ ॥
साधूनां वाप्यसाधूनां सन्त एव सदा गतिः ।
नैवासतां नैव सतामसन्तो नैवमात्मनः ॥ २ ॥
विषाग्निसर्पशस्त्रेभ्यो न तथा जायते भयम् ।
अकारणं जगद्वैरि खलेभ्यो जायते यथा ॥ ३ ॥
सन्तः प्राणानपि त्यक्त्वा परार्थं कुर्वते यथा ।
तथा सन्तोऽपि सन्त्यज्य परपीडासु तत्पराः ॥ ४ ॥
त्यजत्यसूनयं लोकस्तृणवद्यस्य कारणात् ।
परोपघातशक्तास्ते परलोकस्तथा सतः ॥ ५ ॥
निकायेषु निकायेषु तथा ब्रह्मा जगद्गुरुः ।
असतामुपघाताय राजानं कृतवान् स्वयम् ॥ ६ ॥
नरान् परीक्षयेद्राजा साधून् सम्मानयेत्सदा ।
निग्रहञ्चासतां कुर्यात्स लोके लोकजित्तमः ॥ ७ ॥
निग्रहेणासतां राजा सताञ्च परिपालनात् ।
एतावदेव कर्तव्यं राज्ञा स्वर्गमभीप्सुना ॥ ८ ॥
राजकृत्यं हि लोकेषु नास्त्यन्यज्जगतीपते ! ।
असतां निग्रहादेव सताञ्च परिपालनात् ॥ ९ ॥
राजभिश्चाप्यशास्तानामसतां शासिता भवान् ।
तेन त्वमधिको देवो देवेभ्यः प्रतिभासि मे ॥ १० ॥
जगच्च धार्यते सद्भिः सतां मध्यस्तथा भवान् ।
तेन त्वामनुयान्त्या मे क्लमो देव ! न विद्यते ॥ ११ ॥
यम उवाच । तुष्टोऽस्मि ते विशालाक्षि ! वचनैर्धर्मसङ्गतैः ।

विना सत्यवतः प्राणाद्व वरं वरय माचिरम् ॥ १२ ॥
सावित्र्युवाच। सहोदराणां भ्रातॄणां कामयामि शतं विभो!।
अनपत्यः पिता प्रीतिं पुत्रलाभात् प्रयातु मे ॥ १३ ॥
तामुवाच यमोगच्छ यथागतमनिन्दिते!।
और्ध्वदेहिककार्य्येषु यत्नं भर्त्तुः समाचर। १४ ॥
नानुगन्तुमयं शक्यस्त्वया लोकान्तरं गतः।
पतिव्रतासि तेन त्वं मुहूर्तं मम यास्यसि ॥ १५ ॥
गुरुशुश्रूषणाद्भद्रे! तथा सत्यवता महत्।
पुण्यं समर्जितं येन न याम्येनमहं स्वयम्। १६ ॥
एतावदेव कर्त्तव्यं पुरुषेण विजानता।
मातुः पितुश्च शुश्रूषा गुरोश्च वरवर्णिनि! ॥ १७ ॥
तोषितं त्रयमेतच्च सदा सत्यवता वने।
पूजितं विजितः स्वर्गस्त्वयानेन चिरं शुभे! ॥ १८ ॥
तपसा ब्रह्मचर्य्येण अग्निशुश्रूषया शुभे!।
पुरुषाः स्वर्गमायान्ति गुरुशुश्रूषया तथा ॥ १९ ॥
आचार्य्यश्च पिता चैव माता भ्राता च पूर्वजः।
नार्त्तेनाप्यवमन्तव्या ब्राह्मणा न विशेषतः ॥ २० ॥
आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः।
माता पृथिव्या मूर्त्तिस्तु भ्राता वै मूर्त्तिरात्मनः ॥ २१ ॥
जन्मना पितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि ॥ २२ ॥
तयोर्नित्यं प्रियं कुर्य्यादाचार्य्यस्य तु सर्व्वदा।
तेष्वेव त्रिषु तुष्टेषु तपः सर्व्वं समाप्यते ॥ २३ ॥
तेषां त्रयाणां शुश्रूषा परमन्तप उच्यते।

न च तैरननुज्ञातो धर्ममन्यं समाचरेत् ॥ २४ ॥
तएव हि त्रयो लोकास्तएव त्रय आश्रमाः ।
तएव च त्रयोवेदास्तथैवोक्तास्त्रयोऽग्नयः ॥ २५ ॥
पिता वै गार्हपत्योऽग्निर्माता दक्षिणतः स्मृतः ।
गुरुराहवनीयस्य साग्नित्रेता गरीयसी ॥ २६ ॥
त्रिषु प्रमाद्यते नैषु त्रीन् लोकान् जयते गृही ।
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ॥ २७ ॥

यमउवाच ।

कृतेन कामेन निवर्त्त भद्रे ! भविष्यतीदं सकलं त्वयोक्तम् ।
ममोपरोधस्तव च क्लमः स्यात् तथाधुना तेन तव ब्रवीमि ॥२८॥

---

एकादशाधिकद्विशततमोऽध्यायः ।

सावित्र्युवाच । धर्मार्जने सुरश्रेष्ठ ! कुतोग्लानिः क्लमस्तथा
त्वत्पादमूलसेवा च परमं धर्मकारणम् ॥ १ ॥
धर्मार्जनन्तथा कार्यं पुरुषेण विजानता ।
तल्लाभः सर्वलाभेभ्यो यदा देव ! विशिष्यते ॥ २ ॥
धर्मश्चार्थश्च कामश्च त्रिवर्गो जन्मनः फलम् ।
धर्महीनस्य कामार्थौ वन्ध्यासुतसमौ प्रभो ! ॥ ३ ॥
धर्मादर्थस्तथा कामो धर्माल्लोकद्वयं तथा ।
धर्मएकोऽनुयात्येनं यत्र क्वचन गामिनम् ॥ ४ ॥
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ।
एकोहि जायते जन्तुरेकएव विपद्यते ॥ ५ ॥
धर्मस्तमनुयात्येको न सुहृन्न च बान्धवाः ।

क्रियासौभाग्यलावण्यं सर्वं धर्मेण लभ्यते ॥ ६ ॥
ब्रह्मेन्द्रोपेन्द्रशर्वेन्दुयमार्काग्न्यनिलाम्भसाम् ।
वस्वश्विधनदाद्यानां ये लोकाः सर्वकामदाः ॥ ७ ॥
धर्मेण तानवाप्नोति पुरुषः पुरुषान्तक ! ।
मनोहराणि द्वीपानि वर्षाणि सुसुखानि च ॥ ८ ॥
प्रयान्ति धर्मेण नरस्तथैव नरगण्डिकाः ।
नन्दनादीनि मुख्यानि देवोद्यानानि यानि च ॥ ९ ॥
तानि पुण्येन लभ्यन्ते नाकपृष्ठन्तथा नरैः ।
विमानानि विचित्राणि तथैवाप्सरसः शुभाः ॥ १० ॥
तैजसानि शरीराणि सदा पुण्यवतां फलम् ।
राज्यं नृपतिपूजा च कामसिद्धिस्तथेप्सिता ॥ ११ ॥
संस्काराणि च मुख्यानि फलं पुण्यस्य दृश्यते ।
रुक्मवैदूर्यदण्डानि चण्डांशुमदृशानि च ॥ १२ ॥
चामराणि सुराश्वञ्च ! भवन्ति शुभकर्मणाम् ।
पूर्णेन्दुमण्डलाभेन रत्नांशुकविकाशिना ॥ १३ ॥
धार्यतां याति छत्रेण नरः पुण्येन कर्मणा ।
जयशङ्खस्वरौघेण सूतमागधनिस्वनैः ॥ १४ ॥
वरासनं सभृङ्गारं फलं पु॰ ॰स्य कर्मणः ।
वरान्नपानं गीतञ्च भृत्यमाल्यानुलेपनम् ॥ १५ ॥
रत्नवस्त्राणि मुख्यानि फलं पुण्यस्य कर्मणः ।
रूपौदार्यगुणोपेतास्त्रियश्चातिमनोहराः ॥ १६ ॥
वासः प्रासादपृष्ठेषु भवन्ति शुभकर्मिणः ।
सुवर्णकिङ्किणीमिश्रचामरापीड़धारिणः ॥ १७ ॥
वहन्ति तुरगादेव नरं पुण्येन कर्मणा ।

तस्य द्वाराणि यजनन्तपोदानन्दमः क्षमा ॥ १८ ॥
ब्रह्मचर्यं तथा सत्यन्तीर्थानुसरणंशुभम्।
स्वाध्यायसेवासाधूनां सहवासः सुरार्चनम् ॥ १९ ॥
गुरूणां चैव शुश्रूषा ब्राह्मणानां च पूजनम्।
इन्द्रियाणां जयश्चैव ब्रह्मचर्यममत्सरम् ॥ २० ॥
तस्माद्धर्मः सदा कार्यो नित्यमेव विजानता।
नहि प्रतीक्षते मृत्युः कृतमस्य न वाकृतम् ॥ २१ ॥
बालएवचरेद्धर्ममनित्यं देव ! जीवितम्।
कोहि जानाति कस्याद्य मृत्युरेवापतिष्यति ॥ २२ ॥
पश्यतोऽप्यस्य लोकस्य मरणं पुरतः स्थितम्।
अमरस्येव चरितमत्याश्चर्यं सुरोत्तम ! ॥ २३ ॥
युवत्वापेक्षया बालोवृद्धत्वापेक्षया युवा।
मृत्योरुत्सङ्गमारूढः स्थविरः किमपेक्षते ॥ २४ ॥
तत्रापि विगडतस्त्राणं मृत्युना तस्य का गतिः।
न भयं मरणाच्चैव प्राणिनामभयं क्वचित्।
तत्रापि निर्भयाः सन्तः सदा सुतत्त्वकारिणः ॥ २५ ॥
यमउवाच। तुष्टोऽस्मि ते विशालाक्षि ! वचनैर्धर्मसङ्गतैः।
विना सत्यवतः प्राणान् वरं वरय माचिरम् ॥ २६ ॥
मभवित्युवाच। वरयामि त्वया दत्तं पुत्राणां शतमौरसम्।
अनपत्यस्य लोकेषु गतिः किल न विद्यते ॥ २७ ॥

यम उवाच।

कृतेन कामेन निवर्त भद्रे ! भविष्यतीदं सकलं यथोक्तम्।
ममोपरोधस्तवच क्लमः स्यात्तथाधुना ते तव ब्रवीमि ॥२८॥

---

## द्वादशाधिकद्विशततमोऽध्यायः।

सावित्र्युवाच। धर्माधर्मविधानज्ञ! सर्वधर्मप्रवर्त्तक!।
त्वमेव जगतोनाथः प्रजासंयमनोयमः॥ १॥
कर्मणामनुरूपेण यस्माद्यमयसे प्रजाः।
तस्माद्वै प्रोच्यसे देव! यमइत्येव नामतः॥ २॥
धर्मेणेमाः प्रजाः सर्वा यस्माद्रञ्जयसे प्रभो!।
तस्मात्ते धर्मराजेति नाम सद्भिर्निगद्यते॥ ३॥
सुकृतं दुष्कृतं चोभे पुरोधाय यदाजनाः।
त्वत्सकाशं मृता यान्ति तस्मात्त्वं मृत्युरुच्यसे॥ ४॥
कालं कलार्द्धं कलयन् सर्वेषां त्वं हि तिष्ठसि।
तस्मात् कालेति ते नाम प्रोच्यते तत्त्वदर्शिभिः॥५॥
सर्वेषा मेव भूतानां यस्मादन्तकरो महान्।
तस्मात्त्वमन्तकः प्रोक्तः सर्वदेवै र्महाद्युते!॥ ६॥
विवस्वतस्त्वं तनयः प्रथमं परिकीर्तितः।
तस्माद्वैवस्वतोनाम्ना सर्वलोकेषु कथ्यते॥ ७॥
आयुष्ये कर्मणि क्षीणे गृह्णासि प्रसभञ्जनम्।
तदा त्वं कथ्यसे लोके सर्वप्राणहरेति वै॥८॥
तव प्रसादाद्देवेश! सङ्करो न प्रजायते।
सतां सदा गतिर्देव! त्वमेव परिकीर्तितः॥ ९
जगतोऽस्य जगन्नाथ! मर्यादापरिपालकः।
पाहि मां त्रिदशश्रेष्ठ! दुःखितां शरणागताम्।
पितरौच तथैवास्य राजपुत्रस्य दुःखितौ॥ १०॥
यमउवाच। स्तवेन भक्त्या धर्मज्ञे! मया तुष्टेन सत्यवान्।

तव भर्ता विमुक्तोऽयं लब्धकामा व्रजाबले ! ॥ ११ ॥
राज्यं कृत्वा त्वया सार्द्धं वत्सराशीतिपञ्चकम् ।
नाकपृष्ठमथारुह्य त्रिदशैः सह रंस्यते ॥ १२ ॥
त्वयि पुत्रशतञ्चापि सत्यवान् जनयिष्यति ।
ते चापि सर्वे राजानः क्षत्रिया स्त्रिदशोपमाः ॥ १३ ॥
मुख्यास्त्वन्नाम पुत्राख्या भविष्यन्ति हि शाश्वताः ।
पितुश्च ते पुत्रशतं भविता तव मातरि ॥ १४ ॥
मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः ।
भ्रातरस्ते भविष्यन्ति क्षत्रिया स्त्रिदशोपमाः ॥ १५ ॥
स्तोत्रेणानेन धर्मज्ञे ! कल्य मुत्थाय यस्तु माम् ।
कीर्त्तयिष्यति तस्यापि दीर्घमायु र्भविष्यति ॥ १६ ॥

मत्स्यउवाच ।

एतावदुक्त्वा भगवान् यमस्तु प्रमुच्य तं राजसुतं महात्मा ।
अदर्शनं तत्र यमो जगाम कालेन सार्द्धं सह मृत्युना च ॥ १७ ॥

---

त्रयोदशाधिकद्विशततमोऽध्यायः ।

मत्स्यउवाच । सावित्रीतु ततः साध्वी जगाम वरवर्णिनी ।
यथा यथा गतेनैव यत्रासीत्सत्यवान् मृतः ॥ १ ॥
सा समासाद्य भर्त्तारं तस्योत्सङ्गगतं शिरः ।
कृत्वा विवेश तन्वङ्गी लम्बमाने दिवाकरे ॥ २ ॥
सत्यवानपि निर्मुक्तो धर्मराजाच्छनैः शनैः ।
उन्मीलयत नेत्राभ्यां प्रासुरच्च नराधिप ! ॥ ३ ॥
ततः प्रत्यागतप्राणः प्रियां वचनमब्रवीत् ।

क्वासौ प्रयातः पुरुषो यो मामप्यपकर्षति ॥ ४ ॥
न जानामि वरारोहे ! क्वासौ पुरुषः शुभे ! ।
वनेऽस्मिन् चारुसर्वाङ्गि ! सुप्तस्य च दिनं गतम् ॥ ५ ॥
उपवासपरिश्रान्ता दुःखिता भवती मया ।
अस्मद्दुर्हृदयेनाद्य पितरौ दुःखितौ तथा ।
द्रष्टुमिच्छाम्यहं सुभ्रु ! गमने त्वरिता भव ।६॥
सावित्र्युवाच । आदित्योऽस्त मनुप्राप्तो यदि ते रुचितं प्रभो ! ।
आश्रमन्तु प्रयास्यावः श्वशुरौ हीनचक्षुषौ ॥ ७ ॥
यथावृत्तञ्च तत्रैव श्रृणु वक्ष्ये यथाश्रमे ।
एतावदुक्त्वा भर्त्तारं सह भर्त्रा तदा ययौ ॥ ८ ॥
आससादाश्रमं चैव सह भर्त्रा नृपात्मजा ।
एतस्मिन्नेव कालेतु लब्धचक्षुर्महीपतिः ॥ ९ ॥
द्युमत्सेनः सभार्य्यस्तु पर्य्यतप्यत भार्गव ! ।
प्रियपुत्रमपश्यन्वै स्नुषाञ्चैवाथ कर्शिताम् ॥ १० ॥
आश्वास्यमानस्तु तथा स तु राजा तपोधनैः ।
ददर्श पुत्रमायान्तं स्नुषया सह कानने ॥ ११ ॥
सावित्री तु वरारोहा सह सत्यवता तदा ।
ववन्दे तत्र राजानं सभार्य्यं क्षत्रपुङ्गवम् ॥ १२ ॥
परिष्वक्तस्तदा पित्रा सत्यवान् राजनन्दनः ।
अभिवाद्य ततः सर्वान् वने तस्मिंस्तपोधनान् ॥ १३ ॥
उवास तत्र तां रात्रिमृषिभिः सर्वधर्मवित् ।
सावित्र्यपि जगादाथ यथावृत्त मनिन्दिता ॥ १४ ॥
व्रतं समापयामास तस्यामेव यथानिशि ।
ततस्तुर्य्ये त्रियामान्ते ससैन्यस्तस्य भूपतेः ॥ १५ ॥

आजगाम जनः सर्वो राज्यार्थाय निमन्त्रणे ।
विज्ञापयामास तदा तत्र प्रकृतिशासनम् ॥ १६ ॥
विचक्षुषस्ते नृपते येन राज्यं पुरा हृतम् ।
अमात्यैः स हतोराजा भवांस्तस्मिन् पुरे नृपः ॥ १७ ॥
एतच्छ्रुत्वा ययौ राजा बलेन चतुरङ्गिणा ।
लेभेच सकलं राज्यं धर्मराजान्महात्मनः ॥ १८ ॥
भ्रातॄणां तु शतं लेभे सावित्र्यपि वराङ्गना ।
एवम्पतिव्रता साध्वी पितृपक्षं नृपात्मजा ॥ १९ ॥
उज्जहार वरारोहा भर्तृपक्षं तथैवच ।
मोचयामास भर्तारं मृत्युपाशगतंतदा ॥ २० ॥
तस्मात्साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः ।
तासां राजन् ! प्रसादेन धार्यते वै जगत्त्रयम् ॥ २१ ॥
तासान्तु वाक्यं भवतीह मिथ्या न जातु लोकेषु चराचरेषु ।
तस्मात्सदा ताः परिपूजनीयाः कामान् समग्रानभिकामयानैः॥२२

---

चतुर्दशाधिकद्विशततमोऽध्यायः ।

मनुरुवाच । राज्ञोऽभिषिक्तमात्रस्य किं नु कृत्यतमं भवेत् ।
एतन्मे सर्वमाचक्ष्व सम्यग्वेत्सि यतो भवान् ॥ १ ॥
मत्स्यउवाच । अभिषेकार्द्रशिरसा राज्ञा राज्यावलोकिना ।
सहायवरणं कार्यं तत्र राज्यं प्रतिष्ठितम् ॥ २ ॥
यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किमु राज्यं महोदयम् ॥ ३ ॥
तस्मात्सहायान् वरयेत् कुलीनान्नृपतिः स्वयम् ।

शूरान् कुलीनजातीयान् बलयुक्तान् श्रियान्वितान् ॥४॥
रूपसत्वगुणोपेतान् सज्जनान् क्षमयान्वितान् ।
क्लेशक्षमान् महोत्साहान् धर्मज्ञांश्च प्रियंवदान् ॥ ५ ॥
हितोपदेशकान् राज्ञः स्वामिभक्तान् यशोऽर्थिनः ।
एवंविधान् सहायांश्च शुभकर्मसु योजयेत् ॥ ६ ॥
गुणहीनानपि तथा विज्ञाय नृपतिः स्वयम् ।
कर्मस्वेव नियुञ्जीत यथायोग्येषु भागशः ॥ ७॥
कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः ।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषिता ॥८॥
निमित्ते शकुने ज्ञाने वेत्ताचैव चिकित्सिते ।
कृतज्ञः कर्मणां शूरस्तथा क्लेशसहोऽऋजुः ॥ ९ ॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथवा ॥ १० ॥
प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्वेषां प्रतीहारो विधीयते ॥ ११ ॥
यथोक्तवादी दूतः स्याद्देशभाषाविशारदः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥ १२ ॥
विज्ञाता देशकालस्य दूतः स स्यान्महीक्षितः ।
वक्ता न यस्य यः काले स दूतो नृपते र्भवेत् ॥ १३ ॥
प्रांशवोऽव्यायताः शूराः दृढभक्ता निराकुलाः ।
राज्ञा तु रक्षिणः कार्याः सदा क्लेशसहा हिताः ॥ १४ ॥
अनाहार्यो नृशंसश्च दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥ १५ ॥

षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सन्धिविग्रहकः कार्यो राज्ञा नयविशारदः ॥ १६ ॥
कृताकृतज्ञो भृत्यानां ज्ञेयः स्याद्देशरक्षिता ।
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ॥ १७ ॥
सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्तितः ॥ १८ ॥
शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्वक्लेशसहः शुचिः ॥ १९ ॥
निमित्तशकुनज्ञानी हयशिक्षाविशारदः ।
हयायुर्वेदतत्त्वज्ञो भुवोभागविचक्षणः ॥ २० ॥
बलाबलज्ञो रथिनः स्थिरदृष्टिः प्रियम्वदः ॥
शूरश्च कृतविद्यश्च सारथिः परिकीर्तितः ॥ २१ ॥
अनाहार्यः शुचिर्दक्षश्चिकित्सितविदाम्वरः ।
सूपशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते ॥ २२ ॥
सूदशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सर्वे महानसे धार्याः कृत्तकेशनखा नराः ॥ २३ ॥
समः शत्रौ च मित्रे च धर्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्माधिकरणी भवेत् ॥ २४ ॥
कार्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ।
सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः ॥ २५ ॥
लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै ।
शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् समान् ॥ २६ ॥
अक्षरान्वै लिखेद्यस्तु लेखकः स वरः स्मृतः ।
उपायवाक्यकुशलः सर्वशास्त्रविशारदः ॥ २७ ॥

बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम ! ॥
पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ॥ २८ ॥
धर्माधिकारिणः कार्याः जना दानकरा नराः ।
एवंविधास्तथा कार्या राज्ञा दौवारिका जनाः ॥२९॥
लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फल्गुसाराणा मनाहार्यः शुचिः सदा ॥ ३० ॥
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्तितः ।
आयद्वारेषु सर्वेषु धनाध्यक्षसमा नराः ॥ ३१ ॥
व्ययद्वारेषु च तथा कर्तव्याः पृथिवीक्षिता ॥ ३२ ॥
परम्परागतोयः स्यादष्टाङ्गे सुचिकित्सिते ॥ ३३ ॥
अनाहार्यः स वैद्यः स्यात् धर्मात्मा च कुलोद्गतः ।
प्राणाचार्यः स विज्ञेयो वचनात्तस्य भूभुजा ॥ ३३
राजन् ! राज्ञा सदा कार्यं यथाकार्यं पृथक् जनैः ।
हस्तिशिक्षाविधानज्ञो वनजातिविशारदः ॥ ३४ ॥
क्लेशक्षम स्तथाराज्ञो गजाध्यक्षः प्रशस्यते ।
एतैरेव गुणैर्युक्तः स्वासनश्च विशेषतः । ३५ ॥
गजारोही नरेन्द्रस्य सर्वकर्मसु शस्यते ।
हयशिक्षाविधानज्ञ श्चिकित्सितविशारदः ॥ ३६ ॥
अश्वाध्यक्षो महीभर्त्तुः स्वासनश्च प्रशस्यते ।
अनाहार्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ॥ ३७ ॥
दुर्गाध्यक्षः स्मृतोराज्ञ उद्युक्तः सर्वकर्मसु ।
वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ॥ ३८ ॥
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्तितः ॥
यन्त्रमुक्ते पाणिमुक्ते विमुक्ते मुक्तधारिते ॥ ३९ ॥

अस्त्राचार्यो निरुद्वेगः कुशलश्च विशिष्यते ।
वृद्धः कुलोद्गतः सूक्तः पितृपैतामहः शुचिः ॥ ४० ॥
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त ते पुरे ॥ ४१ ॥
परीक्ष्य चाधिकार्याः स्युराज्ञा सर्वेषु कर्मसु ।
स्थापनाजातितत्त्वज्ञः सततं प्रतिजाग्रता ॥ ४२ ॥
राज्ञः स्यादायुधागारे दक्षः कर्मसु चोद्यतः॥
कर्माण्यपरिमेयानि राज्ञो नृपकुलोद्वह ! ॥ ४३ ॥
उत्तमाधममध्यानि बुद्ध्वा कर्माणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥ ४४ ॥
नरकर्मविपर्यासाद्राजा नाशमवाप्नुयात् ॥
नियोगं पौरुषं भक्तिं श्रुतं शौर्यं कुलं नयम् ॥ ४५ ॥
ज्ञात्वा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ।
पुरुषान्तरविज्ञानतत्त्वसारनिबन्धनात् ॥ ४६ ॥
बहुभिर्मन्त्रयेत्कामं राजामन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नोकुर्यान्मन्त्रीमन्त्रप्रकाशनम् ॥ ४७ ॥
क्वचिन्न कस्य विश्वासो भवतीह सदा नृणाम् ।
निश्चयस्तु सदा मन्त्रे कार्यएकेन सूरिणा ॥ ४८ ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्युपजीवनात् ।
एकस्यैव महीभर्तुर्भूयः कार्योविनिश्चयः ॥ ४९ ॥
ब्राह्मणान् पर्युपासीत त्रयीशास्त्रसुनिश्चितान् ।
नासच्छास्त्रवतोमूढास्ते हि लोकस्य कण्टकाः ॥ ५० ॥
वृद्धान् हि नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यः शिक्षेत विनयं विनीतात्मा च नित्यशः ॥ ५१ ॥

समग्रां वशगां कुर्य्यात् पृथिवीं नात्र संशयः ।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ॥ ५२ ॥
वनस्थाश्चैव राज्यानि विनयात्प्रतिपेदिरे ।
त्रैविद्येभ्य स्त्रयीविद्यां दण्डनीतिं च शाश्वतीम् ॥ ५३॥
आन्वीक्षिकीं त्वात्मविद्यां वार्तारम्भांश्च लोकतः ।
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ॥ ५४ ॥
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ।
यजेत राजा बहुभिः क्रतुभिश्च सदक्षिणैः ॥५५॥
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ।
साम्वत्सरिक माप्तैश्च राष्ट्रादाहारयेद्बलिम् ॥ ६६ ॥
स्यात् स्वाध्यायपरोलोके वर्त्तेत पितृबन्धुवत् ।
आवृत्तानां गुरुकुलात् द्विजानां पूजको भवेत् ॥ ५७॥
नृपाणामक्षयो ह्येष विधिर्ब्राह्मोऽभिधीयते ।
ततस्तेमानवा मित्रा हरन्ति न विनश्यति ॥ ५८ ॥
तस्माद्राज्ञा विधातव्यो ब्राह्मो वै ह्यक्षयोविधिः ।
समोत्तमाधमै राजा त्वाहूय पालयेत्प्रजाः ॥ ५९ ॥
न निवर्त्तेत संग्रामात् क्षात्रं व्रत मनुस्मरन् ।
संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ॥ ६० ॥
शुश्रूषा ब्राह्मणानाञ्च राज्ञां निःश्रेयसम्परम् ।
कृपणानाथवृद्धानां विधवानाञ्च पालनम् ॥ ६१ ॥
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ।
वर्णाश्रमव्यवस्थानं तथाकार्य्यं विशेषतः ॥ ६२ ॥
स्वधर्मप्रच्युतान् राजा स्वधर्मे स्थापयेत्तथा ।
आश्रमेषु तथा कार्य्यमन्नं तैलञ्च भाजनम् ॥ ६३ ॥

स्वयमेवानयेद्राजा सत्कृतान्नावमानयेत् ।
तापसे सर्वकार्याणि राज्यमात्मानमेव च ॥ ६४ ॥
निवेदयेत्प्रयत्नेन देववच्चिरमर्चयेत् ।
द्वे प्रज्ञे वेदितव्ये च ऋज्वी वक्रा च मानवैः ॥ ६५ ॥
वक्रां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ।
नास्य च्छिद्रं परोविन्द्याद्विन्द्याच्छिद्रं परस्य तु ॥ ६६ ॥
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ।
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ॥
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ।
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ॥ ६८ ॥
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमे ।
वृकवच्चापि लुम्पेत शशवच्च विनिक्षिपेत् ॥ ६९ ॥
दृढप्रहारी च भवेत् तथा शूकरवन्नृपः ।
चित्राकारश्च शिखिवद्दृढभक्तस्तथाश्ववत् ॥ ७० ॥
तथा च मधुराभाषी भवेत्कोकिलवन्नृपः ।
काकशङ्की भवेन्नित्यमज्ञातवसतिं वसेत् ॥ ७१ ॥
नापरीक्षितपूर्वञ्च भोजनं शयनं स्पृशेत् ।
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम ! ॥
न गाहेज्जनसम्बाधं नचाज्ञातजलाशयम् ।
अपरीक्षितपूर्वञ्च पुरुषैराप्तकारिभिः ॥ ७३ ॥
नारोहेत्कुञ्जरं व्यालं नादान्तं तुरगंतथा ।
नाविज्ञातां स्त्रियं गच्छेन्नैव देवोत्सवे वसेत् ॥ ७४ ॥
नरेन्द्रलक्ष्म्या धर्मज्ञ ! त्रातायत्तोभवेन्नृपः ।
सद्भृत्याश्च तथा पुष्टाः सततं प्रतिमानिताः ॥ ७५ ॥

राज्ञा सहायाः कर्तव्याः पृथिवीं जेतु मिच्छता।
यथार्हञ्चाप्यसुभृतो राजा कर्मसु योजयेत् ॥७६॥
धर्मिष्ठान् धर्मकार्येषु शूरान् संग्रामकर्मसु।
निपुणानर्थकृत्येषु सर्वत्रैव तथा शुचीन् ॥ ७७ ॥
स्त्रीषु षण्डं नियुञ्जीत तीक्ष्णं दारुणकर्मसु।
धर्मेचार्थेच कामेच नये च रविनन्दन ! ॥ ७८ ॥
राजा यथार्हङ्कुर्याच्च उपधाभिः परीक्षणम्।
समतीतोपदान् भृत्यान् कुर्याच्छस्तवनेचरान् ॥ ७९ ॥
तत्पादान्वेषणो यत्तांस्तदध्यक्षांस्तु कारयेत्।
एवमादीनि कर्माणि नृपैः कार्याणि पार्थिव ! ॥ ८० ॥
सर्वथा नेष्यते राज्ञ स्तीक्ष्णोपकरणक्रमः।
कर्माणि पापसाध्यानि यानि राज्ञो नराधिप ! ॥ ८१ ॥
सन्तस्तानि न कुर्वन्ति तस्मात्तानि त्यजेन्नृपः।
नेष्यते पृथिवीशानान्तीक्ष्णोपकरणक्रिया ॥ ८२ ॥
यस्मिन् कर्मणि यस्य स्याद्विशेषेण च कौशलम्।
तस्मिन् कर्मणि तं राजा परीक्ष्य विनिवेशयेत् ॥ ८३ ॥
पितृपैतामहान् भृत्यान् सर्वकर्मसु योजयेत्।
विना दायादकृत्येषु परीक्षां स्खलतान्तरान् ॥ ८४ ॥
नियुञ्जीत महाभाग ! तस्य ते हितकारिणः।
परराजगृहात्प्राप्तान् जनसंग्रहकाम्यया ॥ ८५ ॥
दुष्टान् वाप्यथवादुष्टान् आश्रयीत प्रयत्नतः।
दुष्टं विज्ञाय विश्वासं न कुर्यात्तत्र भूमिपः ॥ ८६ ॥
वृत्तिं तस्यापि वर्तेत जनसंग्रहकाम्यया।
राजा देशान्तरप्राप्तं पुरुषं पूजयेद्भृशम् ॥ ८७ ॥

मामयं देशसम्प्राप्तो वञ्चमानेन चिन्तयेत् ।
कामं भृत्यार्जनं राजा नैव कुर्यान्नराधिप ! ॥ ८८ ॥
न च वा संविभक्तांस्तान् भृत्यान् कुर्यात्कथञ्चन ।
शत्रवोऽग्निर्विषं सर्पो निस्त्रिंश इति चिन्तयेत् ॥८९॥
भृत्या मनुजशार्दूल ! कथितास्तु तथैकतः ।
तेषां चारेण चारित्रं राजा विज्ञाय नित्यशः ॥ ९० ॥
गुणिनां पूजनं कुर्यात् निर्गुणानाञ्च शासनम् ।
कथिताः सततं राजन् ! राजानश्चारचक्षुषः ॥९१॥
स्वके देशे परे देशे ज्ञानशीलान् विचक्षणान् ।
अनाहार्यान् क्लेशसहान्नियुञ्जीत तथाचरान् ॥ ९२ ॥
जनस्याविदितान् सौम्यान् तथा ज्ञातान् परस्परम् ।
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ॥ ९३ ॥
तथा प्रव्राजिताकारां श्चारान् राजा नियोजयेत् ।
नैकस्य राजा श्रद्दध्यात् चारस्यापि सुभाषितम् ॥९४॥
द्वयोः सम्बन्धमाज्ञाय श्रद्दध्यान्नृपतिः सदा ।
परस्परस्याविदितौ यदि स्यातान्तु तावुभौ ॥९५॥
तस्माद्राजा प्रयत्नेन गूढांश्चारान्नियोजयेत् ।
रागापरागौ भृत्यानां जनस्य च गुणागुणान् ॥ ९६ ॥
सर्वं राज्ञां चरायत्तं तेषु यत्नपरो भवेत् ।
कर्मणा केन मे लोके जनः सर्वोऽनुरज्यते ॥ ९७ ॥
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ॥
विरागजनकं लोके वर्जनीयं विशेषतः ॥ ९८ ॥
तथा च रागप्रभवा हि लक्ष्मी राज्ञां मता भास्करवंशचन्द्र ! ।
तस्मात्प्रयत्नेन नरेन्द्रमुख्यैः कार्योऽनुरागो भुवि मानवेषु ॥९९

## पञ्चदशाधिकद्विशततमोऽध्यायः।

मत्स्य उवाच। यथान वर्तितव्यं स्यादात्मनो राज्ञोऽनुजीविना।
तथा ते कथयिष्यामि निबोध गदतो मम ॥ १ ॥
राजा यत्तु वदेद्वाक्यं श्रोतव्यं तत्प्रयत्नतः।
आक्षिप्य वचनं तस्य न वक्तव्यं तथा वचः ॥ २ ॥
अनुकूलं प्रियं तस्य वक्तव्यं जनसंसदि।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥३॥
परार्थमस्य वक्तव्यं स्वमे चेतसि पार्थिव!।
स्वार्थः सुहृद्भिर्वक्तव्यो न स्वयं तु कथञ्चन ॥४॥
कार्य्यातिपातः सर्वेषु रक्षितव्यः प्रयत्नतः।
नच हिंस्यं धनं किञ्चित् नियुक्तेन च कर्मणि ॥५॥
नोपेक्ष्यस्तस्यमानश्च तथा राज्ञः प्रियो भवेत्।
राज्ञश्च न तथा कार्य्यं वेषभाषित चेष्टितम् ॥६॥
राजलीला न कर्तव्या तद्विद्विष्टञ्च वर्जयेत्।
राज्ञः समोऽधिकोवान कार्य्यो वेषोविजानता ॥७॥
द्यूतादिषु तथैवान्यत् कौशलं तु प्रदर्शयेत्।
प्रदर्श्यकौशलं चास्य राजानन्तु विशेषयेत् ॥ ८ ॥
अन्तःपुरजनाध्यक्षैर्वैरिदूतैर्निराकृतैः।
संसर्गं न व्रजेद्राजन्! विना पार्थिवशासनात् ॥ ९ ॥
निस्नेहताञ्चावमानं प्रयत्नेन तु गोपयेत्।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥ १० ॥
नृपेण श्रावितं यत्स्याद्वाच्यावाच्यं नृपोत्तम!।
न तत्संश्रावयेल्लोके तथा राज्ञोऽप्रियोभवेत् ॥ ११ ॥

आज्ञाप्यमाने वान्यस्मिन् समुत्थाय त्वरान्वितः ।
किं करवाणीति वाच्यो राजा विजानता ॥ १२ ॥
कार्यावस्थां च विज्ञाय कार्यमेव यथा भवेत् ।
सततं क्रियमाणेऽस्मिन् लाघवन्तु व्रजेद्ध्रुवम् ॥ १३ ॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनः पुनः ।
नहासशीलस्तु भवेत् न चापि भ्रुकुटीमुखः ॥ १४ ॥
नातिवक्ता न निर्वक्ता न च मात्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत्तु कथञ्चन ॥१५॥
दुष्कृतानि नरेन्द्रस्य न तु सङ्कीर्तयेत् क्वचित् ।
वस्त्रमस्त्रमलङ्कारं राज्ञा दत्तं तु धारयेत् ॥ १६ ॥
औदार्येण न तद्देयं मन्यस्मै भूतिमिच्छता ।
तत्रैवात्मासनं कार्यं दिवा स्वप्नं न कारयेत् ॥ १७ ॥
नानिर्दिष्टे तथाद्वारे प्रविशेत्तु कथञ्चन ।
न च पश्येत्तु राजानमयोग्यासु च भूमिषु ॥ १८ ॥
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तदा ।
पुरस्ताच्च तथा पश्चादासनन्तु विगर्हितम् ॥ १९ ॥
जृम्भां निष्ठीवनङ्कासं कोपं पर्यस्तिकाश्रयम् ।
भ्रुकुटिं वान्तमुद्गारन्तत्समीपे विवर्जयेत् ॥ २० ॥
स्वयं तत्र न कुर्वीत स्वगुणाख्यापनं बुधः ।
स्वगुणाख्यापने युक्त्या परमेव प्रयोजयेत् ॥ २१ ॥
हृदयं निर्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञा मतन्द्रितैः ॥ २२ ॥
शाठ्यं लौल्यं च पैशून्यं नास्तिक्यं क्षुद्रता तथा ।
चापल्यञ्च परित्याज्यं नित्यं राज्ञोऽनुजीविभिः ॥२३॥

श्रुतिविद्यासुशीलैश्च संयोज्यात्मानमात्मना ।
राजसेवान्ततः कुर्याद्भूतये भूतिवर्द्धनीम् ॥ २४ ॥
नमस्कार्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ।
सचिवैश्चास्य विश्वासो न तु कार्यः कथञ्चन ॥ २५ ॥
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथा यदि ।
हितं तथ्यञ्च वचनं हितैः सह सुनिश्चितम् ॥२६॥
चित्तञ्चैवास्य विज्ञेयं नित्यमेवानुजीविना ।
भर्त्तुराराधनं कुर्याच्चित्तज्ञो मानवः सुखम् ॥ २७ ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्विरक्तो नृपतीरक्तवृत्तिन्तु कारयेत् ॥ २८ ॥
विरक्तः कारयेन्नाशं विपक्षाभ्युदयं तथा ।
आशावर्द्धनकं कृत्वा फलनाशं करोति च ॥ २९ ॥
अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः ।
वाक्यं च समदं वक्ति वृत्तिच्छेदं करोति वै ॥ ३० ॥
प्रदेशवाक्यमुदितो न सम्भावयतेऽन्यथा ।
आराधनासु सर्वासु सुप्तवच्च विचेष्टते ॥ ३१ ॥
कथासु दोषं क्षिपति वाक्यभङ्गं करोति चं ।
लक्ष्यते विमुखश्चैव गुणसङ्कीर्तनेऽपि च ॥ ३२ ॥
दृष्टिं क्षिपति चान्यत्र क्रियमाणे च कर्मणि ।
विरक्तलक्षणं चैतत् शृणु रक्तस्य लक्षणम् ॥ ३३ ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नं संप्रयच्छति चासनम् ॥ ३४ ॥
विविक्तदर्शने चास्य रहस्येनं न शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु तत्कथाम् ॥ ३५ ॥

अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दते ।
उपायनञ्च गृह्णाति स्तोकमप्यादरात्तथा ॥ ३६ ॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा रविकुलोद्वह ! ॥ ३७ ॥
मित्रं न चापत्सु तथाच भृत्या भजन्ति ये निर्गुणमप्रमेयम् ।
विभुं विशेषेण च ते व्रजन्ति सुरेन्द्रधामामरवृन्दजुष्टम् ॥३८॥

---

षोड़शाधिकद्विशततमोऽध्यायः ।

मत्स्यउवाच । राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानतसामन्तं मध्यमन्देश मावसेत् ॥ १ ॥
वैश्यशूद्रजनप्राय मनाहार्यं तथापरैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्मकरन्तथा ॥ २ ॥
अदैवमातृकं रम्य मनुरक्तजनान्वितम् ।
करैरापीड़ितञ्चापि बहुपुष्पफलं तथा ॥ ३ ॥
अगम्यं परचक्राणां तद्वासगृहमापदि ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥ ४ ॥
सरीसृपविहीनञ्च व्याघ्रतस्करवर्जितम् ।
एवंविधं यथालाभं राजा विषय मावसेत् ॥ ५ ॥
तत्र दुर्गं नृपः कुर्यात् षण्णामेकतमं बुधः ।
धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैवच ॥ ६ ॥
वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव ! ।
सर्वेषां मेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥ ७ ॥

दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम्।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम्॥ ८॥
गोपुरं सकपाटञ्च तत्र स्यात्सुमनोहरम्।
सपताकगजारूढो येन राजा विशेत्पुरम्॥ ९॥
चतस्रश्च तथातत्र कार्यास्त्वायत वीथयः।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेत्दृढम्॥ १०॥
वीथ्यग्रे च द्वितीये च राजवेश्म विधीयते।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके॥ ११॥
चतुर्थेत्वथ वीथ्यग्रे गोपुरञ्च विधीयते।
आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्॥ १२॥
मुक्तिहीनं त्रिकोणञ्च यवमध्यं तथैवच।
आयतञ्चतुरस्रं वा वृत्तं वा कारयेत्पुरम्॥ १३॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसन्।
अन्यत्तत्र न कर्तव्यं प्रयत्नेन विजानता॥ १४॥
राज्ञा कोशगृहं कार्यं दक्षिणे राजवेश्मनः।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते॥ १४॥
गजानां प्राङ्मुखी शाला कर्तव्यावाप्युदङ्मुखी।
आग्नेये च तथा भागे आयुधागार मिष्यते॥ १६॥
महानसञ्च धर्मज्ञ! कर्मशाला स्तथापराः।
गृहं पुरोधसः कार्यं वामतो राजवेश्मनः॥ १७॥
मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्तुरेवच।
तत्रैव च तथा भागे कोष्ठागारं विधीयते॥ १८॥
गवां स्थानं तथैवात्र तुरगाणां तथैवच।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते॥ १९॥

दक्षिणाभिमुखा याश्च परिशिष्टास्तु गर्हिताः ।
तुरगास्ते तथा धार्याः प्रदीपैः सार्वरात्रिकैः ॥ २० ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च विशेषतः ।
धारयेदश्वशालासु सवत्सां धेनुमेव च ॥ २१ ॥
अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः ॥ २२ ॥
अस्तंगते न कर्तव्यो देवदेवे दिवाकरे ।
तत्र तत्र यथास्थानं राजाविज्ञाय सारथीन् ॥ २३ ॥
दद्यादावसथस्थानं सर्वेषां मनुपूर्वशः ।
योधानां शिल्पिनाञ्चैव सर्वेषामविशेषतः ॥ २४ ॥
दद्यादावसथान् दुर्गे कालमन्त्रविदां शुभान् ।
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ॥ २५ ॥
आहरेत भृशं राजा दुर्गे हि प्रबला रुजः ।
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ॥ २६ ॥
न बहूनामतो दुर्गे विनाकार्यं तथा भवेत् ।
दुर्गे च तत्र कर्तव्या नानाप्रहरणान्विताः ॥ २७ ॥
सहस्रघातिनो राजंस्तै स्तु रक्षा विधीयते ।
दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभृता ॥ २८ ॥
सञ्चयश्चात्र सर्वेषा मायुधानां प्रशस्यते ।
धनुषां क्षेपणीयानान्तोमराणां च पार्थिवः ॥ २९ ॥
शराणामथ खड्गानां कवचानां तथैव च ।
लगुडानां गुडानाञ्च हुडानां परिघैः सह ॥ ३० ॥
अश्मनाञ्च प्रभूतानां मुद्गराणां तथैव च ।
त्रिशूलानां पट्टिशानां कुठाराणाञ्च पार्थिव ! ॥ ३१ ॥

प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तमः।
परश्वधानां चक्राणां वर्मणाञ्चर्मभिः सह ॥ ३२ ॥
कुद्दालक्षुरवेत्राणां पीठकानान्तथैव च।
तुषाणाञ्चैव दात्राणामङ्गाराणाञ्च सञ्चयः ॥ ३३ ॥
सर्वेषां शिल्पिभाण्डानां सञ्चयस्तत्र चेष्यते।
वादित्राणाञ्च सर्वेषामौषधीनान्तथैव च ॥ ३४ ॥
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः।
गुड़स्य सर्वतैलानां गोरसानान्तथैव च ॥ ३५ ॥
वसानामथ मज्जानां स्नायूनामस्थिभिः सह।
गोचर्मपटहानाञ्च धान्यानां सर्वतस्तथा ॥ ३६ ॥
तथैवाभ्रपटानाञ्च यवगोधूमयोरपि।
रत्नानां सर्ववस्त्राणां लोहानामप्यशेषतः ॥ ३७ ॥
कलापमुद्गमाषाणाञ्चणकानान्तिलैः सह।
तथा च सर्वशस्यानां पांशुगोमययोरपि ॥ ३८ ॥
शणसर्जरसं भूर्जं जतुलाक्षा च टङ्कणम्।
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥ ३९ ॥
कुम्भाश्चाशीविषैः कार्या व्यालसिंहादयस्तथा।
मृगाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम् ॥ ४० ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक्।
कर्तव्यानि महाभाग! यत्नेन पृथिवीक्षिता ॥४१॥
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः।
सुगुप्तानि पुरे कुर्याज्जनानां हितकाम्यया ॥ ४२ ॥
जीवकर्षभकाकोल मामलक्याटरूषकान्।
शालपर्णीं पृष्ठिपर्णीं मुद्गपर्णीं तथैव च ॥ ४३ ॥

माषपर्णी च मद्गैसारिवेद्वे बलात्रयम् ।
वारा श्वसन्ती वृष्या च वृहती कण्टकारिका ॥४४॥
शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका ।
मधुपर्णी विदार्यौ द्वे महाक्षीरा महातपा: ॥ ४५ ॥
धन्वन: सहदेवाह्वा कटुकैरण्डकं विष: ।
पर्णी शताह्वा मृद्वीका फल्गु खर्जूरयष्टिका: ॥ ४६ ॥
शुक्रातिशुक्रकाश्मर्यच्छत्रातिच्छत्रवीरणा: ।
इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम ! ॥४७॥
सिंही च सहदेवी च विश्वेदेवाश्वरोधकम् ।
मधुकं पुष्पहंसाख्या शतपुष्पा मधूलिका ॥ ४८ ॥
शतावरीमधूकेच पिप्पलन्तालमेव च ।
आत्मगुप्ता कट्फलाख्यादार्विका राजशीर्षकी ॥४९॥
राजसर्षप धान्याकस्थ्यमोक्ता तथोत्कटा ।
कालशाकं पद्मवीजं गोवल्ली मधुवल्लिका ॥ ५० ॥
शीतपाकी कुवेराक्षी काकजिह्वोरुपुष्पिका ।
पर्वतत्रपुसौ चोभौ गुञ्जातकपुनर्नवे ॥ ५१ ॥
कसेरुं काककाश्मीरी बल्याशालूक केसरम् ।
तुषधान्यानि सर्वाणि शमीधान्यानि चैव हि ॥ ५२ ॥
क्षीरं क्षौद्रन्तथा तक्रं तैलं मज्जा वसा घृतम् ।
नीपश्चारिष्टकार्चोड़वातामसोमवाणकम् ॥ ५३ ॥
एवमादीनि चान्यानि विज्ञेयो मधुरोगण: ।
राजा सञ्चिनुयात्सर्वं पुरे निरवशेषत: ॥ ५४ ॥
दाड़िमाम्रातकौ चैव तिन्तिड़ीकाम्लवेतसम् ।
भव्यकर्कन्धुलकुचकरमर्द्द करूपकम् ॥ ५५ ॥

बीजपूरककर्कन्धूरे मालतीराजबन्धुकम् ।
कोलकद्वयपर्णानि द्वयोराम्रातयोरपि ॥ ५६ ॥
पारावतं नागरकं प्राचीनोलकमेव च ।
कपित्थामलकं चुक्रफलन्दन्तशठस्य च ॥ ५७ ॥
जाम्ब्वं नवनीतञ्च सौवीरकतुषोदके ।
सुरासवञ्च मद्यानि मण्डतक्रदधीनि च ॥ ५८ ॥
शुक्लानि चैव सर्वाणि ज्ञेयमाम्लगणं द्विज ! ।
एवमादीनि चान्यानि राजा सञ्चिनुयात्पुरे ॥ ५९ ॥
सैन्धवोद्भिदपाठेयपाक्यसामुद्रलोमकम् ।
कुप्यसौवर्चलबिड़ं वालकेयं यवाह्वकम् ॥ ६० ॥
औवं चारं कालभस्म विज्ञेयो लवणोगणः ।
एवमादीनि चान्यानि राजा सञ्चिनुयात्पुरे ॥ ६१ ॥
पिप्पली पिप्पलीमूलचव्यचित्रकनागरम् ।
कुवेरकं मरिचकं शिग्रुभल्लातसर्षपाः ॥ ६२ ॥
कुष्ठाजमोदाकिणिही हिङ्गुमूलकधान्यकम् ।
कारवीकुञ्चिका याज्या सुमुखा कालमालिका ॥ ६३ ॥
फणिज्जकोथ लशुनं भूस्तृणां सुरसन्तथा ।
कायस्था च वयस्था च हरितालं मनःशिला ॥ ६४ ॥
अमृता च रुदन्ती च रोहिषं कुङ्कमन्तथा ।
जया एरण्डकाण्डीरं शल्लकी हञ्जिका तथा ॥ ६५ ॥
सर्वपित्तानि मूत्राणि प्रायो हरितकानि च ।
फलानि चैव हि तथा सूक्ष्मैला हिङ्गुपत्रिका ॥ ६६ ॥
एवमादीनि चान्यानि गणः कटुकसंज्ञितः ।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥ ६७ ॥

मुस्तञ्चन्दनह्रीवेरक्ततमालकदारव:।
हरिद्रानलदोशीरनक्तमालकदम्बकम् ॥ ६८ ॥
दूर्वा पटोलकटुका दीर्घत्वक् पत्रकं वचा।
किराततिक्तभूतुम्बी विषा चातिविषा तथा ॥ ६९ ॥
तालीसपत्रतगरं सप्तपर्णविकङ्कता:।
काकोदुम्बरिका दिव्या तथा चैवसुरोद्भवा ॥ ७० ॥
षड्ग्रन्था रोहिणी मांसी पर्पटश्चाथ दन्तिका।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥ ७१ ॥
दु:स्पर्शा गुरणी कामा श्यामाकं गन्धनाकुली।
रूपपर्णी व्याघ्रनखं मञ्जिष्ठा चतुरङ्गुला ॥ ७२ ॥
रम्भा चैवाङ्कुरास्फोता तालास्फोता हरेणुका।
वेत्राग्र वेतसस्तुम्बी विषाणी लोध्रपुष्पिणी ॥ ७३ ॥
मालतीकरकृष्णाख्या वृश्चिका जीविता तथा ॥
पर्णिका च गुडूची च सगणस्तिक्तसंज्ञक: ॥ ७४ ॥
एवमादीनि चान्यानि राजा सञ्चनुयात्पुरे।
अभयामलके चोभे तथैव च बिभीनकम् ॥ ७५ ॥
प्रियङ्गुधातकी पुष्पं मोचाख्या चार्जुनासना:।
अनन्ता स्त्री तुवरिका स्योनाकृट्फलन्तथा ॥ ७६ ॥
भूर्जपत्रं शिलापत्रं पाटलापत्रलोमकम्।
समङ्गात्रिवृतामूलकार्पासगैरिकाञ्जनम् ॥ ७७ ॥
विद्रुमं स मधूच्छिष्टं कुम्भिका कुमुदोत्पलम्।
न्यग्रोधोदुम्बराश्वत्थकिंशुका: शिंशुपा शमी ॥ ७८ ॥
प्रियालपीलुकासारिशिरीषा: पद्मकन्तथा।
बिल्वोऽग्निमन्थ: प्लक्षश्च श्यामाकश्च वको घनम् ॥७९॥

राजादनं करीरञ्च धान्यकं प्रियकस्तथा।
कङ्कोलाशोकबदराः कदम्बखदिरद्वयम् ॥ ८० ॥
एषां पत्राणि साराणि मूलानि कुसुमानि च।
एवमादीनि चान्यानि कषायाख्यो मतोरसः ॥ ८१ ॥
प्रयत्नेन नृपश्रेष्ठ! राजा सञ्चिनुयात्पुरे।
कीटाश्च मारणे योग्या व्यङ्गतायां तथैव च ॥ ८२ ॥
वातधूमाश्च मार्गाणां दूषणानि तथैव च।
धार्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि पार्थिव! ॥८३॥
विषाणां धारणं कार्यं प्रयत्नेन महीभुजा।
विचित्राश्चागदा धार्या विषस्य शमनास्तथा ॥ ८४ ॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्धनाः।
कलाविदश्च पुरुषाः पुरे धार्याः प्रयत्नतः ॥ ८५ ॥
भीतान् प्रमत्तान् कुपितांस्तथैव च विमानितान्।
कुभृत्यान् पापशीलांश्च न राजा वासयेत्पुरे ॥ ८६ ॥
यन्त्रायुधाट्टालचयोपपन्नं समग्रधान्यौषधिसम्प्रयुक्तम्।
वणिग्जनैश्च हतमावसेत दुर्गं सुगुप्तं नृपतिः सदैव ॥ ८७॥

---

## सप्तदशाधिकद्विशततमोऽध्यायः।

मनुरुवाच। रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा।
अगदानि समाचक्ष्व तानि धर्मभृताम्बर! ॥ १ ॥
मत्स्य उवाच। बिल्वाटकी यवक्षारं पाटला बाह्लिकोषणाः।
श्रीपर्णी शल्लकीयुक्तो निक्वाथः प्रोक्षणं परम् ॥ २ ॥

सविषं प्रोक्षितं तेन सद्यो भवति निर्विषम्।
यवसैन्धवपानीयवस्त्रशय्यासनोदकम् ॥ ३ ॥
कवचाभरणं छत्रं बालव्यजनवेश्मनाम्।
शेलुः पाटलातिविषा शिग्रुमूर्वा पुनर्नवा ॥ ४ ॥
समङ्गावृषमूलञ्च कपित्थवृषशोणितम्।
महादन्तशठन्तद्वत् प्रोक्षणं विषनाशनम् ॥ ५ ॥
लाक्षाप्रियङ्गुमञ्जिष्ठा सममेला हरेणुका।
यष्ट्याह्वा मधुरा चैव बभ्रुपित्तेन कल्पिताः ॥ ६ ॥
निखनेद्गोविषाणस्थं सप्तरात्रं महीतले।
ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत् ॥ ७ ॥
संस्पृष्टं सविषन्तेन सद्यो भवति निर्विषम्।
मनोह्वया शमीपत्रं तुम्बिका श्वेतसर्षपाः ॥ ८ ॥
कपित्थकुष्ठमञ्जिष्ठाः पित्तेन श्वशुकल्पिताः।
शुनो गोः कपिलायाश्च सौम्याक्षिप्तोऽपरोगदः ॥ ९ ॥
विषजित् परमं कार्यं मणिं तञ्च पूर्ववत्।
मूषिका जतुका चापि हस्ते बद्धा विषापहा ॥ १० ॥
हरेणुमांसी मञ्जिष्ठा रजनी मधुकामधु।
अक्षत्वक् सुरसं लाक्षा श्वपित्तं पूर्ववद्भुवि ॥ ११ ॥
वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः।
श्रुत्वा दृष्ट्वा समाघ्राय सद्योभवति निर्विषः ॥ १२ ॥
त्र्यूषणं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम्।
सूक्ष्मैलात्रिवृतापत्रं विडङ्गानीन्द्रवारुणी ॥ १३ ॥
मधुकं वेतसं चौद्रं विषाणे च निधापयेत् ॥
तस्मादुष्णाम्बुना मात्रं प्रागुक्तं योजयेत्ततः ॥ १४ ॥

शुक्लं सर्जरसोपेतसर्षपा एलवालुकैः॥ १५॥
सुवेगा तस्करसुरौ कुसुमैरर्जुनस्य तु।
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम्॥ १६॥
न तत्र कीटा न विषन्दर्दुरा न सरीसृपाः।
न कृत्या कर्मणाञ्चापि धूपोऽयं यत्र दह्यते॥ १७॥
कल्पितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः।
मूर्वैलावालुसरसानाकुलीतण्डुलीयकैः॥ १८॥
क्वाथः सर्वोदकार्येषु काकमाचीयुतो हितः।
रोचनापत्रनेपालीकुङ्कुमैस्तिलकान् वहन्॥ १९॥
विषैर्न बाध्यते स्याच्च नरनारीनृपप्रियः।
चूर्णै र्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः॥ २०॥
दिग्धं निर्विषतामेति गात्रं सर्वविषार्दितम्।
शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च॥ २१॥
गोमूत्रघृष्टो ह्यगदः सर्वकर्मकरः स्मृतः।
एकवीर! महौषध्यः शृणु चातः परं नृप!॥ २२॥
वन्ध्या कर्कोटकी राजन्! विष्णुक्रान्ता तथोत्कटा।
शतमूली सितानन्दा बला मोचा पटोलिका॥ २३॥
सोमापिण्डा निशा चैव तथा दग्धरुहा च या।
स्थले कमलिनी या च विशाली शङ्खमूलिका॥ २४॥
चण्डाली हस्तिमगधा गोऽजापर्णी करम्भिका।
रक्ता चैव महारक्ता तथा बर्हिशिखा च या॥ २५॥
कोशातकी नक्तमालं प्रियालश्च सुलोचनी।
वारुणी वसुगन्धा च तथा वै गन्धनाकुली॥ २६॥

ईश्वरी शिवगन्धाच श्यामला वंशनालिका ।
जतुकाली महाश्वेता श्वेता च मधुयष्टिका ॥ २७ ॥
वज्रकः पारिभद्रश्च तथा वै सिन्धुवारकाः ।
जीवानन्दा वसुच्छिद्रा नतनागरकण्टका ॥ २८ ॥
नालञ्च जाली जातीच तथाच वटपत्रिका ।
कातँस्वरं महानीला कुन्दुरुः सपार्दिका ॥ २९ ॥
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके ।
सर्पाक्षी लवली ब्राह्मी विश्वरूपा सुखाकरा ॥ ३० ॥
रुजापहा वृद्धिकरी तथाचैव तु शल्यदा ।
पत्रिका रोहिणी चैव रक्तमाला महौषधी ॥ ३१ ॥
तथामलकवन्दाकं श्यामचित्रफला च या ।
काकोली क्षीर काकोली पीलुपर्णी तथैवच ॥ ३२ ॥
केशिनी वृश्चिकालीच महानागा शतावरी ।
गरुडी च तथा वेगा जले कुमुदिनी तथा ॥ ३३ ॥
स्थले चोत्पलिनी या च महाभूमिलता च या ।
उन्मादिनी सोमराजी सर्वरत्नानि पार्थिव ! ॥ ३४ ॥
विशेषान्मरकतादीनि कीटपक्षं विशेषतः ।
जीवजाताश्च मणयः सर्वे धार्याः प्रयत्नतः ॥ ३५ ॥
रक्षोघ्नाश्च विषघ्नाश्च कृत्या वैतालनाशनाः ।
विशेषान्नरनागाश्च गोखरोष्ट्र समुद्भवाः ॥ ३६ ॥
सर्पतित्तिरगोमायुबभ्रुमण्डकजाश्च ये ।
सिंहव्याघ्रर्क्षमार्जारद्वीपिवानरसंभवाः ।
कपिञ्जला गजा वाजिमहिषैणभवाश्च ये ॥ ३७ ॥

इत्येवमेतैः सकलै रुपेतन्दृश्यैश्च सर्वैः स्वपुरं सुरक्षितम्।
राजा वसेत्तत्र गृहं सुशुभ्रं गुणान्वितं लक्षणसंप्रयुक्तम् ॥३८

---

## अथोनविंशाधिक द्विशततमोऽध्यायः।

मनुरुवाच। राजरक्षारहस्यानि यानि दुर्गे निधापयेत्।
कारयेद्वा महीभर्ता ब्रूहि तत्त्वानि तानि च ॥ १ ॥

मत्स्यउवाच। शिरीषोडुम्बरशमीवीजपूरं घृतप्लुतम्।
क्षुद्योगः कथितो राजन्! मासार्द्धं तु पुरातनैः ॥ २ ॥
कशेरु फलमूलानि इक्षुमूलं तथा बिसम्।
दूर्वाक्षीरघृतैर्मण्डः सिद्धोऽयं मासिकः परः ॥ ३ ॥
नरं शस्त्रहतं प्राप्तो न तस्य मरणं भवेत्।
कल्माष वेणुना तत्र जनयेत्तु विभावसुम् ॥ ४ ॥
गृहे तिरपसव्यन्तु क्रियते यत्र पार्थिव!।
नान्योऽग्निर्ज्वलते तत्र नात्र कार्या विचारणा ॥ ५ ॥
कार्पासास्थ्ना भुजङ्गस्य तेन निर्मोचनं भवेत्।
सर्पनिर्वासने धूपः प्रशस्तः सततं गृहे ॥ ६ ॥
सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप! ॥ ७ ॥
दिवा च दुर्गे रक्ष्योऽग्नि र्वाति वातेविशेषतः।
विषाच्च रक्ष्योनृपतिस्तत्र युक्तिं निबोध मे ॥ ८ ॥
क्रीड़ानिमित्तं नृपति र्धारयेन्मृगपक्षिणः।
अन्नं वै प्राक् परीक्षेत वह्नौ चान्यतरेषु च ॥ ९ ॥
वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा।
नापरीक्षितपूर्वन्तु स्पृशेदपि महामतिः ॥ १० ॥

श्यावास्यो वक्त्रसन्तप्तः सोद्वेगश्च निरीक्षते ।
विषदोऽथ विषं दत्तं यश्च तत्र परीक्षते ॥ ११ ॥
स्रस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा ।
प्रच्छादयति चात्मानं लज्जते त्वरते तथा ॥ १२ ॥
भुवं विलिखति ग्रीवां तथा चालयते नृप ! ।
कण्डूयति च मूर्द्धानं परिलोह्याननन्तथा ॥ १३ ॥
क्रियासु त्वरितो राजन् ! विपरीतास्वपि ध्रुवम् ।
एव मादीनि चिह्नानि विषदस्य परीक्षयेत् ॥ १४ ॥
समीपे विक्षिपेद्वह्नौ तदन्नं त्वरयान्वितैः ।
इन्द्रायुधसवर्णं तु रूक्षं स्फोटसमन्वितम् ॥ १५ ॥
एकावर्तन्तु दुर्गन्धि भृशं चटचटायते ।
तद्धूमसेवनाज्जन्तोः शिरोरोगश्च जायते ॥ १६ ॥
सविषेऽन्ने विलीयन्ते न च पार्थिव ! मक्षिकाः ।
निलीनाश्च विपद्यन्ते संस्पृष्टे सविषे तथा ॥ १७ ॥
विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम ! ।
विकृतिश्च स्वरो याति कोकिलस्य तथा नृप ! ॥ १८ ॥
गतिस्स्खलति हंसस्य भृङ्गराजश्च कूजति ।
क्रौञ्चो मदमथाभ्येति कृकवाकुर्विरौति च ॥ १९ ॥
विक्रोशति शुको राजन् ! सारिका वमते ततः ।
चामीकरोऽन्यतो याति मृत्युं कारण्डवस्तथा ॥ २० ॥
मेहते वानरो राजन् ! ग्लायते जीवजीवकः ।
हृष्टरोमा भवेद्बभ्रुः पृषतश्चैव रोदिति ॥ २१ ॥
हर्षमायाति च शिखी विषसन्दर्शनान्नृप ! ।
अन्नञ्च सविषं राजंश्चिरेण च विपद्यते ॥ २२ ॥

तदा भवति निःश्राव्यं पञ्चपर्युषितोपमम्।
व्यापन्नरसगन्धञ्च चन्द्रिकाभि स्तथायुतम्॥ २३॥
व्यञ्जनानान्तु शुष्कत्वं द्रवाणां बुद्बुदोद्भवः।
ससैन्धवानां द्रव्याणां जायते फेनमालिता॥ २४॥
सस्यराजिश्च ताम्रा स्यात् नीला च पयस स्तथा।
कोकिलाभा च मद्यस्य तोयस्य च नृपोत्तम!॥ २५॥
धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च।
मधुश्यामाच तक्रस्य नीला पीता तथैव च॥ २६॥
घृतस्योदकसङ्काशा कपोताभा च सक्तुः।
हरिता माक्षिकस्यापि तैलस्यच तथारुणा॥ २७।
फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते।
प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा॥ २८॥
मृदुता कठिनानां स्यात् मृदूनाञ्च विपर्य्ययः।
सूक्ष्माणां रूपदलनं तथा चैवातिरङ्गता॥ २९॥
श्याममण्डलता चैव वस्त्राणां वै तथैवच।
लोहानाञ्च मणीनाञ्च मलपङ्कोपदिग्धता॥ ३०॥
अनुलेपनगन्धानां माल्यानाञ्च नृपोत्तम!।
विगन्धता च विज्ञेया तथा राजन्! जलस्य तु॥ ३१॥
दन्तकाष्ठत्वचः श्यामास्तनुसत्वास्तथैवच।
एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम!॥ ३२॥
तस्माद्राजा सदा तिष्ठेत् मणिमन्त्रौषधागणैः।
उक्तैः संरक्षितो राजा प्रमादपरिवर्जकः॥ ३३॥
प्रजातरोर्मूल मिहावनीशस्तद्रक्षणाद्राष्ट्रमुपैति वृद्धिम्।
तस्मात्प्रयत्नेन नृपस्य रक्षा सर्वेण कार्या रविवंशचन्द्र!॥३४॥

अथ चत्वारिंशत्यधिक द्विशततमोऽध्यायः।

मत्स्यउवाच। राजन्! पुत्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता।
आचार्य्यश्चात्र कर्त्तव्यो नित्ययुक्तश्च रक्षिभिः॥ १॥
धर्मकामार्थशास्त्राणि धनुर्वेदञ्च शिक्षयेत्।
रथे च कुञ्जरे चैनं व्यायामङ्कारयेत्सदा॥ २॥
शिल्पानि शिक्षयेच्चैनं नाप्तैर्मिथ्या प्रियं वदेत्।
शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत्॥ ३॥
नचास्य सङ्गो दातव्यः क्रुद्धलुब्धावमानितैः।
तथाच विनयेदेनं यथा यौवनगोचरे॥ ४॥
इन्द्रियैर्नापकृष्येत सतां मार्गात्सुदुर्गमात्।
गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः॥ ५॥
बन्धनं तस्य कर्त्तव्यं गुप्तदेशे सुखान्वितम्।
अविनीतकुमारं हि कुलमाशु विशीर्य्यते॥ ६॥
अधिकारेषु सर्व्वेषु विनीतं विनियोजयेत्।
आदौ स्वल्पे ततः पश्चात् क्रमेणाथ महत्स्वपि॥ ७॥
मृगया पानमक्षांश्च वर्जयेत् पृथिवीपतिः।
एतान्ये सेवमानास्तु विनष्टाः पृथिवीक्षितः॥ ८॥
बहवो नरशार्दूल! तेषां सङ्ख्या न विद्यते।
दिवा स्वापं क्षितीशस्तु विशेषेण विवर्जयेत्॥ ९॥
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च।
परोक्षनिन्दा च तथा वर्जनीया महीक्षिता॥ १०॥
अर्थस्य दूषणं राजा द्विप्रकारं विवर्जयेत्।
अर्थानां दूषणञ्चैकं तथार्थेषु च दूषणम्॥ ११॥

प्राकाराणां समुच्छेदो दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥१२॥
अदेशकाले यद्दानमपात्रे दानमेव च ।
अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्तनम् ॥ १३ ॥
कामः क्रोधोमदोमानो लोभो हर्षस्तथैव च ।
एते वर्ज्याः प्रयत्नेन सादरं पृथिवीक्षिता ॥१४॥
एतेषां विजयं कृत्वा कार्यो भृत्यजयस्ततः ।
कृत्वा भृत्यजयं राजा पौरान् जानपदान् जयेत् ॥ १५ ॥
कृत्वा च विजयन्तेषां शत्रून् बाह्यांस्ततो जयेत् ।
बाह्यांश्च विविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥ १६ ॥
गुरवस्ते यथापूर्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः ॥ १७ ॥
कृत्रिमञ्च महाभाग ! मित्रं त्रिविधमुच्यते ।
तथापि च गुरुः पूर्वं भवेत्तत्रापि चादृतः ॥ १८ ॥
स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ।
कोशोमित्रञ्च धर्मज्ञ ! सप्ताङ्गं राज्यमुच्यते ॥ १९ ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्तितः ।
तन्मूलत्वात्तथाङ्गानां स तु रक्ष्यः प्रयत्नतः ॥ २० ॥
षडङ्गरक्षा कर्तव्या तथातेन प्रयत्नतः ।
अङ्गेभ्यो यस्तथैकस्तु द्रोहमाचरतेऽल्पधीः ॥२१॥
बन्धस्तस्य तु कर्तव्यः शीघ्रमेव महीक्षिता ।
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ॥ २२ ॥
न भाव्यं दारुणेनातितीक्ष्णादुद्विजते जनः ।
काले मृदुर्यो भवति काले भवति दारुणः ॥ २३ ॥

राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ।
भृत्यैः सह महीपालः परिहासं विवर्जयेत् ॥ २४ ॥
भृत्याः परिभवन्तीह नृपं हर्षवशङ्गतम् ।
व्यसनानि च सर्वाणि भूपतिः परिवर्जयेत् ॥ २५ ॥
लोकसंग्रहणार्थाय कृतकव्यसनी भवेत् ।
शौण्डीरस्य नरेन्द्रस्य नित्यमुद्रिक्तचेतसः ॥ २६ ॥
जना विरागमायान्ति सदा दुःखेव्यभावतः ।
स्मितपूर्वाभिभाषी स्यात् सर्वस्यैव महीपतिः ॥ २७ ॥
बध्येष्वपि महाभाग ! भ्रूकुटिं न समाचरेत् ।
भाव्यं धर्मभृतां श्रेष्ठ ! स्थूललक्ष्येण भूभुजा ॥ २८ ॥
स्थूललक्ष्यस्य वशगा सर्वा भवति मेदिनी ।
अदीर्घसूत्रश्च भवेत् सर्वकर्मसु पार्थिवः ॥ २९ ॥
दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवम्भवेत् ।
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥ ३० ॥
अप्रिये चैव कर्तव्ये दीर्घसूत्रः प्रशस्यते ।
राज्ञा संवृतमन्त्रेण सदा भाव्यं नृपोत्तम ! ॥ ३१ ॥
तस्यासंवृतमन्त्रस्य राज्ञः सर्वापदो ध्रुवम् ।
कृतान्येव तु कार्याणि ज्ञायन्ते यस्य भूपतेः ॥ ३२ ॥
नारब्धानि महाभाग ! तस्य स्याद्वसुधा वशे ।
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रः सुरक्षितः ॥ ३३ ॥
कर्तव्यः पृथिवीपालैर्मन्त्रभेदभयात्सदा ।
मन्त्रवित्साधितो मन्त्रः सम्पत्तीनां सुखावहः ॥ ३४ ॥
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ।
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥ ३५ ॥

नैववक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः।
नयस्य कुशलैस्तस्य वशे सर्वा वसुन्धरा ॥३६॥
भवतीह महीपाले सदा पार्थिवनन्दन!।
नैकस्तु मन्त्रयेन्मन्त्रं राजा न बहुभिः सह ॥ ३७ ॥
नारोहेद्विषमां नाव मपरीक्षितनाविकाम्।
ये चास्य भूमिजयिनो भवेयुः परिपन्थिनः ॥ ३८ ॥
तानानयेद्वशे सर्वान् सामादिभिरुपक्रमैः।
यथा न स्यात् कृशीभावः प्रजानामनवेक्षया ॥ ३९ ॥
तथा राज्ञा प्रकर्तव्यं स्वराष्ट्रं परिरक्षता।
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ॥ ४० ॥
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः।
भृतोवत्सो जातबलः कर्मयोग्यो यथा भवेत् ॥ ४१ ॥
तथा राष्ट्रं महाभाग! भृतं कर्मसहम्भवेत्।
यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति ॥ ४२ ॥
सञ्जातमुपजीवेत्स विन्दते स महत् फलम्।
गृह्यादिरण्यं धान्यञ्च महीं राजा सुरक्षितां ॥४३॥
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता।
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ॥४३॥
गोपितानि सदा कुर्यात् संयतानीन्द्रियाणि च।
अजस्रमुपयोक्तव्यं फलन्तेभ्यस्तथैव च ॥ ३५ ॥
सर्वं कर्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिन्त्यञ्च पौरुषे विद्यते क्रिया ॥ ४६ ॥
एवं महीं पालयतोऽस्य भर्तुर्लोकानुरागः परमो भवेत्त।
लोकानुरागप्रभवा च लक्ष्मीर्लक्ष्मीवतश्चापि परा च लक्ष्मी ॥ ४७॥

## अथ विंशत्यधिक द्विशततमोऽध्यायः ।

मनुरुवाच । दैवे पुरुषकारे च किं ज्यायस्तद्ब्रवीहि मे !
अत्र मे संशयो देव ! छेत्तुमर्हस्यशेषतः ॥ १ ॥
मत्स्य उवाच । स्वमेव कर्मदैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥ २ ॥
प्रतिकूलन्तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥ ३ ॥
येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥ ४ ॥
कर्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम् ॥ ५ ॥
पौरुषेणाप्यते राजन् ! प्रार्थितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्जिताः ॥ ६ ॥
तस्मात्त्रिकालं संयुक्तं दैवन्तु सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! ॥ ७ ॥
दैवं पुरुषकारश्च कालश्च पुरुषोत्तम ! ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहम् ॥ ८ ॥
कृष्टिवृष्टिसमा योगा दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥ ९ ॥
तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं नरैः ।
विपत्तावपि यस्येह परलोके ध्रुवं फलम् ॥ १० ॥
नालसाः प्राप्नुवन्त्यर्थान् न च दैवपरायणाः ।
तस्मात्सर्वप्रयत्नेन आचरेद्धर्ममुत्तमम् ॥ ११ ॥

त्यक्तालसान् दैवपरान् मनुष्या
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः।
अन्विष्य यत्नाद्वृणुयान्नृपेन्द्र !
तस्मात्सदोत्थानवता हि भाव्यम् ॥ १२ ॥

---

## अथ एकविंशत्यधिक द्विशततमोऽध्यायः।

मनुरुवाच। उपायांस्त्वं समाचक्ष्व सामपूर्वान् महाद्युते !।
लक्षणञ्च तथा तेषां प्रयोगञ्च सुरोत्तम ! ॥ १ ॥
मत्स्य उवाच। सामभेदस्तथा दानदण्डश्च मनुजेश्वर !।
उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव ! ॥ २ ॥
प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु।
द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च ॥ ३ ॥
तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते।
तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम ! ॥ ४ ॥
महाकुलीना ऋजवो धर्मनित्या जितेन्द्रियाः।
सामसाध्या न चातथ्यन्तेषु साम प्रयोजयेत् ॥ ५ ॥
तथ्यं साम च कर्तव्यं कुलशीलादिवर्णनम्।
तथा तदुपचाराणां कृतानाञ्चैव वर्णनम् ॥ ६ ॥
अनयैव तथा युक्त्या कृतज्ञाख्यापनं स्वकम्।
एवं साम्ना च कर्तव्या वशगा धर्मतत्पराः ॥७॥
साम्ना यद्यपि रक्षांसि गृह्णन्तीति परा श्रुतिः।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम् ॥ ८ ॥
अतिशङ्कित मित्येवं पुरुषं सामवादिनम्।
असाधवो विजानन्ति तस्मात्तत्तेषु वर्जयेत् ॥ ९ ॥

ये शुद्धवंशा ऋजवः प्रणीता धर्मे स्थिताः सत्यपरा विनीताः ।
तेषामसाध्याः पुरुषाः प्रदिष्टा मानोन्नता ये सततञ्च राजन् ।१०।

अथ द्वाविंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्यउवाच । परस्परन्तु ये दुष्टाः क्रुद्धा भीतावमानिताः ।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः ॥ १ ॥
ये तु येनैव दोषेण परस्माच्चापि बिभ्यति ।
ते तु तद्दोषपातेन भेदनीया भृशन्ततः ॥ २ ॥
आत्मीयां दर्शयेदाशां परस्माद्दर्शयेद्भयम् ।
एवं हि भेदयेद्भिन्नान् यथा वशमथानयेत् ॥ ३ ॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः ।
भेद मेव प्रशंसन्ति तस्मान्नयविशारदाः ॥ ४ ॥
स्वमुखेनाश्रयेद्भेदम्भेदम्परमुखेन च ।
परीक्ष्य साधुमन्येत भेदं परमुखाच्छ्रुतम् ॥ ५ ॥
सद्यः स्वकार्य मुद्दिश्य कुशलै र्ये हि भेदिताः ।
भेदितास्ते विनिर्दिष्टा नैव राजार्थवादिभिः ॥ ६ ॥
अन्तः कोपो बहिः कोपो यत्र स्यातां महीक्षिताम् ।
अन्तः कोपो महांस्तत्र नाशकः पृथिवीक्षिताम् ॥ ७ ॥
सामन्त कोपो बाह्यस्तु कोपः प्रोक्तो महीभृतः ।
महिषीयुवराजभ्यां तथा सेनापते र्नृप! ॥ ८ ॥
अमात्यमन्त्रिणाञ्चैव राजपुत्रे तथैवच ।
अन्तः कोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम् ॥ ९ ॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः ।
शुद्धान्तस्तु महाभाग! शीघ्र मेव जयी भवेत् ॥ १० ॥

अपि शक्रसमो राजा अन्तःकोपेन नश्यति।
सोऽन्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो महीभृता॥ ११॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्यं परेषां विजिगीषुणा॥ १२॥
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः।
ज्ञातयः परितप्यन्ते सततं परितापिताः॥ १३॥
तथापि तेषां कर्तव्यं सुगम्भीरेण चेतसा।
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः॥ १४॥
न ज्ञातिमनुगृह्णन्ति न ज्ञातिं वै ग्रसन्ति च।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥ १५॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाजौ।
सुसंहतानां हि तदस्तु भेदः
कार्यो रिपूणां नयशास्त्रविद्भिः॥ १६॥

---

अथ त्रयोविंशत्यधिकद्विशततमोऽध्यायः।

मत्स्य उवाच। सर्वेषामप्युपायानां दानं श्रेष्ठतमं मतम्।
सुदत्तेनेह भवति दानेनोभय लोकजित्॥ १॥
न सोऽस्ति राजन्! दानेन वशगो यो न जायते।
दानेन वशगा देवा भवन्तीह सदा नृणाम्॥ २॥
दानमेवोपजीवन्ति प्रजाः सर्वा नृपोत्तम!।
प्रियो हि दानवान् लोके सर्वस्यैवोपजायते॥ ३॥
दानवानचिरेणैव तथा राजा परान् जयेत्।

दानवानेव शक्नोति संहतान् भेदितुं परान् ॥ ४ ॥
यद्यप्यलुब्धगम्भीराः पुरुषाः सागरोपमाः ।
न गृह्णन्ति तथाप्येते जायन्ते पक्षपातिनः ॥ ५ ॥
अन्यत्रापि कृतं दानं करोत्यन्यान्यथा वशे ।
उपायेभ्यः प्रशंसन्ति दानं श्रेष्ठतमं जनाः ॥ ६ ॥
दानं श्रेयस्करं पुंसां दानं श्रेष्ठतमं परम् ।
दानवानेव लोकेषु पुत्रत्वेऽभ्रियते सदा ॥ ७ ॥
न केवलं दानपरा जयन्ति भूलोकमेकं पुरुषप्रवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं सुदुर्जयं यो विबुधाधिवासः ॥ ८ ॥

---

अथ चतुर्विंशत्यधिक द्विशततमोऽध्यायः ।

मत्स्य उवाच । न शक्या ये वशेकर्तुमुपायत्रितयेन तु;
दण्डेन तान् वशीकुर्यात् दण्डो हि वशकृन्नृणाम् ॥ १ ॥
सम्यक् प्रणयनं तस्य तथा कार्यं महीक्षिता ।
धर्मशास्त्रानुसारेण ससहायेन धीमता ॥ २ ॥
तस्य सम्यक् प्रणयनं यथा कार्यं महीक्षिता ।
वानप्रस्थांश्च धर्मज्ञान्निर्ममान्निष्परिग्रहान् ॥ ३ ॥
स्वदेशे परदेशे वा धर्मशास्त्रविशारदान् ।
समीक्ष्य प्रणयेद्दण्डं सर्वं दण्डे प्रतिष्ठितम् ॥ ४ ॥
आश्रमी यदि वा वर्णी पूज्योवाथ गुरुर्महान् ।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मेण तिष्ठति ॥ ५ ॥
अदण्ड्यान् दण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
इह राज्यात्परिभ्रष्टो नरकञ्च प्रपद्यते ॥ ६ ॥
तस्माद्राज्ञा विनीतेन धर्मशास्त्रानुसारतः ।
दण्डप्रणयनं कार्यं लोकानुग्रहकाम्यया ॥ ७ ॥

यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ ८ ॥
बालवृद्धातुरयति द्विजस्त्रीविधवायतः।
मात्स्यन्यायेन भक्ष्येरन् यदि दण्डं न पातयेत् ॥ ९ ॥
देवदैत्योरगगणाः सर्वे भूतपतत्रिणः।
उत्क्रामयेयुर्मर्यादां यदि दण्डं न पातयेत् ॥ १० ॥
एष ब्रह्माभिशापेषु सर्वप्रहरणेषु च।
सर्वविक्रमकोपेषु व्यवसायेच तिष्ठति ॥ ११ ॥
पूज्यन्ते दण्डिनो देवैर्न पूज्यन्ते त्वदण्डिनः।
न ब्रह्माणं विधातारं न पूषार्यमणावपि ॥ १२ ॥
यजन्ते मानवाः केचित् प्रशान्ताः सर्वकर्मसु।
रुद्रमग्निञ्च शक्रञ्च सूर्याचन्द्रमसौ तथा ॥ १३ ॥
विष्णुं देवगणांश्चान्यान् दण्डिनः पूजयन्ति च।
दण्डः शास्ति प्रजाः सर्वा दण्डएवाभिरक्षति ॥ १४ ॥
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।
राजदण्डभयादेव पापाः पापं न कुर्वते ॥ १५ ॥
यमदण्डभयादेके परस्परभयादपि।
एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम् ॥ १६ ॥
अन्धे तमसि मज्जेयुर्यदि दण्डं न पाययेत्।
यस्माद्दण्डो दमयति अदण्ड्यान् दमयत्यपि ॥
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥ १७ ॥
दण्डस्य भीतैस्त्रिदशैः समेतैर्भागोधृतः शूलधरस्य यज्ञे।
दत्तं कुमारेध्वजिनीपतित्वं वरं शिशूनाञ्च भयाद्बलस्य ॥१८॥

## अथ पञ्चविंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । दण्डप्रणयनार्थाय राजा सृष्टः स्वयम्भुवा ।
देवभागानुपादाय सर्वभूतादिगुप्तये ॥ १ ॥
तेजसा यदमुं कश्चिन्नैव शक्नोति वीक्षितुम् ।
ततो भवति लोकेषु राजा भास्करवत्प्रभुः ॥ २ ॥
यदास्य दर्शने लोकः प्रसादमुपगच्छति ।
नयनानन्दकारित्वात्तदा भवति चन्द्रमाः ॥ ३ ॥
यथा यमः प्रियद्वेष्ये प्राप्ते काले प्रयच्छति ।
तथा राज्ञा विधातव्याः प्रजास्तद्धि यमव्रतम् ॥ ४ ॥
वरुणेन यथा पाशैर्बद्ध एव प्रदृश्यते ।
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥ ५ ॥
परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यति मानवः ।
तथा प्रकृतयो यस्मिन् स चन्द्रप्रतिमो नृपः ॥ ६ ॥
प्रतापयुक्तस्तेजस्वी नित्यं स्यात्सर्वकर्मसु ।
दुष्टसामन्तहिंस्रेषु राजाग्नेयव्रते स्थितः ॥ ७ ॥
यथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ।
इन्द्रस्यार्कस्य वातस्य यमस्य वरुणस्य च ॥ ८ ॥
चन्द्रस्याग्नेः पृथिव्याश्च तेजोव्रतं नृपश्चरेत् ।
वार्षिकांश्चतुरो मासान् यथेन्द्रोऽप्यथ वर्षति ॥ ९ ॥
तथाभिवर्षेत् स्वं राज्यं काममिन्द्रव्रतं स्मृतम् ।
अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः ॥
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥ १० ॥

प्रविश्य सर्वभूतानि यथा चरति मारुतः।
तथाचारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम्॥ ११॥

---

## अथ षड्विंशत्यधिक द्विशततमोऽध्यायः।

मत्स्य उवाच। निक्षेप्यस्य समं मूल्यं दण्ड्यो निक्षेपभुक्तथा।
वस्त्रादिकन्तमस्तस्य तदा धर्मो न हीयते॥ १॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चोरवच्छास्यौ दाप्यौ वा द्विगुणान्धनम्॥ २॥
उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः॥
स सहायः स हन्तव्यः प्रकामं विविधैर्वधैः॥ ३॥
यो याचितं समादाय न तद्द्याद्यथाक्रमम्।
स निगृह्य बलाद्दाप्यो दण्ड्यो वा पूर्वसाहसम्॥ ४॥
अज्ञानाद्यदि वा कुर्यात्परद्रव्यस्य विक्रयम्।
निर्दोषो ज्ञानपूर्वन्तु चोरवद्वधमर्हति॥ ५॥
मूल्यमादाय यो विद्यां शिल्पं वा न प्रयच्छति।
दण्ड्यः समूल्यं सकलं धर्मज्ञेन महीक्षिता॥ ६॥
द्विज भोज्येतु सम्प्राप्ते प्रतिवेश्यमभोजयन्।
हिरण्यमाषकं दण्ड्यः पापेनास्ति व्यतिक्रमः॥ ७॥
आमन्त्रितो द्विजो यस्तु वर्तमानस्स्वे गृहे।
निष्कारणं न गच्छेद्यः सदाप्योष्टऽशतं दमम्॥ ८॥
प्रतिश्रुत्या प्रदातारं सुवर्णं दण्डयेन्नृपः।
भृत्यश्चाज्ञां न कुर्याद्यो दर्पात्कर्म यथोदितम्॥ ९॥
सदण्ड्यः कृष्णलान्यष्टौ न देयञ्चास्य वेतनम्।

संगृहीतं न दद्याद्यः काले वेतनमेव च॥
अकाले तु त्यजेद्भृत्यं दण्ड्यःस्याच्छतमेव च।
यो ग्रामदेश सङ्घानां कृत्वा सत्येन संविदम्॥ ११॥
विसं वदेन्नरो लोभात् तं राष्ट्राद्विप्रवासयेत्।
क्रीत्वा विक्रयवान् किञ्चित् यस्येहानुशयो भवेत्॥१२॥
सोऽन्तर्दशाहात्तत्स्वाम्यन्दद्याच्चैवाददीत वा।
परेण तु दशाहस्य न दद्यान्नैव दापयेत्॥ १३॥
आददन्विददंश्चैव राज्ञा दण्ड्यः शतानि षट्।
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति॥ १४॥
तस्य कुर्यान्नृपो दण्डं स्वयं षस्णवतिं पणान्।
अकन्यैवेति यः कन्यां ब्रूयाद्दोषेण मानवः॥ १५॥
सशतं प्राप्नुयाद्दण्डं तस्यादोषमदर्शयन्।
यस्त्वन्यां दर्शयित्वान्यां वोढुः कन्यां प्रयच्छति॥ १६॥
उत्तमन्तस्य कुर्वीत राजा दण्डं तु साहसम्।
वरोदोषाननाख्याय यः कन्यां वरयेदिह॥ १७॥
दत्ताप्यदत्ता सा तस्य राज्ञादण्ड्यः शतद्वयम्।
प्रदाय कन्यां योऽन्यस्मै पुनस्तां संप्रयच्छति॥१८॥
दण्डः कार्यो नरेन्द्रेण तस्याप्युत्तमसाहसः।
तत्प्रकारेण वा वाचा युक्तं पण्यमसंशयम्॥ १९॥
लुब्धोऽन्यत्र विक्रेता षट्शतं दण्डमर्हति।
दुहितुः शुल्कविक्रेता सत्यङ्कारात्तु सन्त्यजेत्॥ २०॥
द्विगुणं दण्डयेदेनमिति धर्मो व्यवस्थितः।
मूल्यैकदेशं दत्वा तु यदि क्रेता धनन्त्यजेत्॥ २१॥
सदण्डो मध्यमं दण्डं तस्य पण्यस्य मोक्षणम्।

दुह्याद्धेनुश्च यः पालो गृहीत्वा भक्तवेतनम् ॥ २२ ॥
स तु दण्ड्यः शतं राज्ञा सुवर्णं चाप्यरक्षिता ।
दण्डं दत्वा तु विरमेत्स्वामितः कृतलक्षणः ॥ २३ ॥
बद्धः कार्ष्णायसैः पाशैस्तस्य कर्म करो भवेत् ।
धनुः शतपरीणाहो ग्रामस्य तु समन्ततः ॥ २४ ॥
द्विगुणं त्रिगुणं वापि नगरस्य तु कल्पयेत् ।
वृतिं तत्र प्रकुर्वीत यामुष्ट्रो नावलोकयेत् ॥ २५ ॥
छिद्रं वा वारयेत्सर्वं श्वसूकरमुखानुगम् ।
यत्रा परिहृतं धान्यं विहिंस्युः पशवो यदि ॥ २६ ॥
न तत्र कारयेद्दण्डं नृपतिः पशुरक्षिणे ।
अनिर्दशाहागां सूतां वृषं देवपशुं तथा ।
छिद्रंवा वारयेत्सर्वं न दण्ड्यामनुर ब्रवीत् ।
अतोऽन्यथा विनष्टस्य दशांशं दण्ड मर्हति ॥ २८ ॥
पाल्यस्य पालकस्वामी विनाशे क्षत्रियस्यतु ।
भक्षयित्वो पविष्टस्तु द्विगुणं दण्डमर्हति ॥ २९ ॥
विशंदण्ड्याद्दशगुणं विनाशे क्षत्रियस्यतु ।
गृहं तडागमारामं क्षेत्रं वापि समाहरन् ॥ ३० ॥
शतानि पञ्चदण्डःस्यादद ज्ञानाद्द्विशतोदमः ।
सीमाबन्धन कालेतु सीमान्तं योहि कारयेत् ॥ ३१ ॥
तेषां संज्ञांददानस्तु जिह्वाच्छेदन माप्नुयात् ।
मर्थेनामपि यो दद्यात्संविदंवाधिगच्छति ॥ ३२ ॥
उत्तमं साहसं दण्ड्य इति स्वायम्भुवोऽब्रवीत् ।
वर्णानामानु पूर्व्येण त्रयाणाम विशेषतः ॥ ३३ ॥
अकार्यकारिणः सर्वान् प्रायश्चित्तानि कारयेत् ।

असत्येन प्रमाप्यस्त्रीशूद्रहत्या व्रतं चरेत् ॥ ३४ ॥
दानेन च धनेनैकं सर्पादीनाम शक्नुवन् ।
एकैकं स चरेत्कृच्छ्रं द्विजः पापापनुत्तये ॥ ३५ ॥
फलदानाञ्च वृक्षाणां छेदने जप्यमृक्शतम् ।
गुल्मवल्ली लतानाञ्च पुष्पितानाञ्च वीरुधाम् ॥ ३६ ।
अस्थिमताञ्च सत्वानां सहस्रस्य प्रमापणे ।
पूर्णेवानस्य नस्यातु शूद्रहत्या व्रतञ्चरेत् ॥ ३७ ॥
किञ्चिद्देयञ्च विप्राय दद्यादस्थिमतां वधे ।
अनस्थ्नाञ्चैवहिंसायां प्राणायामै विशुध्यति ॥ ३८ ॥
अन्नादि जानांसत्वानां रसजानाञ्च सर्वशः ।
फलपुष्पोद्भतानाञ्च घृतप्राशो विशोधनम् ॥ ३९ ॥
कृष्टानामोषधीनाञ्च जातानाञ्च स्वयं वने ।
वृथाच्छेदेन गच्छेत दिनमेकं पयोव्रती ॥ ४० ॥
एतैर्व्रतैरपोह्यं स्यादेनोहिंसा समुद्भवम् ।
स्तेयकर्त्तपहर्तॄणां श्रूयतां व्रतमुत्तमम् ॥ ४१ ॥
धान्यान्न धनचौर्याणि कृत्वा कामं द्विजोत्तमः ।
सजातीय गृहादेव कृच्छ्रार्द्धेन विशुध्यति ॥ ४२ ॥
मनुष्याणान्तु हरणे स्त्रीणांचैव गृहस्यतु ।
कूपवापीजलानान्तु शुद्धिश्चान्द्रायणं स्मृतम् ॥ ४३ ॥
द्रव्याणा मल्पसाराणां स्तेयं कृत्वान्य वेश्मतः ।
चरेत्सान्तपनंकृच्छ्रन्तन्निर्यात्य विशुद्धये ॥ ४४ ॥
भक्ष्यभोज्यापहरणे यानशय्यासनस्यतु ।
पुष्पमूल फलानान्तु पञ्चगव्यं विशोधनम् ॥ ४५ ॥
तृणकाष्ठ द्रुमाणान्तु शुष्कान्नस्य गुडस्य च ।

चैलचर्म्मामिषाणान्तु त्रिरात्रं स्यादभोजनम्॥ ४६॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयकांस्योपलानाञ्च द्वादशाहं कणान्नभुक्॥ ४७॥
कार्पासकीटजर्णानां द्विशफैकशफस्य च।
पक्षिगन्धौषधीनाञ्च रज्वाश्चैव त्र्यहंपयः॥ ४८॥
एतैर्व्रतैरपोहन्ति पापं स्तेयकृतं द्विजः।
अगम्यागमनीयन्तु व्रतैरेभिरपानुदेत्॥ ४९॥
गुरुतल्पव्रतं कुर्य्याद्रेतः सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥ ५०॥
पितृष्वस्रीय भगिनीं स्वस्रीयां मातुरेव च।
मातुश्च भ्रातुरार्य्यायाङ्गत्वा चान्द्रायणं चरेत्॥ ५१॥
एतास्तिस्रस्तु भार्य्यार्थे नोपगच्छेत्तु बुद्धिमान्।
ज्ञातीश्च मातुलेयास्ते पतिता उपयन्ति ये॥ ५२॥
अमानुषीषु पुरुषो उदक्यायामयोनिषु।
रेतःसिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्॥ ५३॥
मैथुनञ्च समासेव्य पुंसि योषिति वा द्विजः।
गोयानेऽप्सु दिवा चैव सवासास्नानमाचरेत्॥ ५४॥
चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यन्तु गच्छति॥ ५५॥
विप्रदुष्टां स्त्रियं भर्त्ता निरुन्ध्यादेकवेश्मनि।
यत्पुंसः परदारेषु तच्चैनाञ्चारयेद्व्रतम्॥ ५६॥
साचेत्पुनः प्रदुष्येत्तु सदृशेनोपमन्त्रिता।
कृच्छ्रंचान्द्रायणञ्चैव तत्तस्याः पावनं स्मृतम्॥ ५७॥
यःकरोत्येकरात्रेण वृषलीसेवनं द्विजः।

तदेकभुक् जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ५८ ॥
एषापाप कृता मुक्ता चतुर्णामपि निष्कृतिः ।
पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ॥ ५९ ॥
संवत्सरेण पतति पतितेन समाचरन् ।
याजनाध्यापनाद्यौनात्त्वनुया नायनासनात् ॥ ६० ॥
यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात् तत्संसर्ग विशुद्धये ॥ ६१ ॥
पतितस्योदकं कार्यं संपिण्डै र्बान्धवैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभि गुरु सन्निधौ ॥ ६२ ॥
दासीघटमपां पूर्णां पर्यस्येत्प्रेतवत्सदा ।
अहोरात्र मुपासीरन् नाशौचं बान्धवैः सह ॥ ६३ ॥
निवर्त्तयेरंस्तस्मात्तु सम्भाषणा सहासनम् ।
दायादस्य प्रमाणाञ्च यात्रामेवं च लौकिकीम् ॥ ६४ ॥
ज्येष्ठभावान्निवर्तेत ज्यैष्ठावाप्तं च यत्पुनः ।
ज्येष्ठांशं प्राप्नुयाच्चास्य यो वा स्याद्गुणतोऽधिकः ॥ ६५ ॥
स्थापिताश्चापि मर्यादां ये भिन्द्युः पापकर्मिणः ।
सर्वे पृथक् दण्डनीया राज्ञा प्रथम साहसम् ॥ ६६ ॥
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्यस्तु द्विशतं राजन् ! शूद्रस्तु वधमर्हति ॥ ६७ ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभि शंसने ।
वैश्यस्याप्यर्द्ध पञ्चाशच्छूद्रे द्वादशको दमः ॥ ६८ ॥
क्षत्रियस्याप्नुयाद्वैश्यः साहसं पुनरेव च ।
शूद्रः क्षत्रिय माक्रुश्य जिह्वाच्छेदन माप्नुयात् ॥ ६९ ॥
पञ्चाशत् क्षत्रियोदण्ड्य स्तथा वैश्याभि शंसने ।

शूद्रे चैवार्द्ध पञ्चाशत्तथा धर्मो न हीयते ॥ ७० ॥
वैश्यस्याक्रोशने दण्डः शूद्रस्योत्तम साहसम्।
शूद्राक्रोशे तथावैश्यः शतार्द्धं दण्डमर्हति ॥ ७१ ॥
सवर्णाक्रोशने दण्डः तथा द्वादशकं स्मृतम्।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥ ७२ ॥
एकजाति र्द्विजातिन्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयात्च्छेदं जघन्यः प्रथमो हि सः ॥७३॥
नामजाति ग्रहं तेषामभिद्रोहेण कुर्वतः।
निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥ ७४ ॥
धर्मोपदेशं शूद्रस्तु द्विजानामपि कुर्वतः।
तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ ७५ ॥
श्रुतिं देशञ्च जातिञ्च कर्म शारीर मेवच।
वितथञ्च ब्रुवन्दण्ड्यो राजा द्विगुण साहसम् ॥ ७६ ॥
यस्तु पातक संयुक्तः क्षिपेद्वर्णान्तरंनरः।
उत्तमं साहसं दण्डः पात्यस्तस्मिन्यथाक्रमम् ॥ ७७ ॥
राज्ञो निवेशनिय मं वितथं यान्ति वै मिथः।
सर्वे द्विगुण दण्डास्ते विप्रलम्भान्नृपस्य तु ॥ ७८ ॥
प्रीत्या मयास्याभिहितं प्रमादेनाथ वा वदेत्।
भूयो नचैवं वक्ष्यामि सतु दण्डार्द्ध भाक्भवेत् ॥ ७९ ॥
काणं वाप्यथ वा खञ्जमन्धंचापि तथाविधम्।
तथ्येवापि ब्रुवन्दाप्यो दण्डं कार्षापणं धनम् ॥ ८० ॥
मातरं पितरं ज्येष्ठं भ्रातरं श्वशुरं गुरुम्।
आक्रोशयन् शतंदण्डः पन्थानञ्चार्थयन् गुरोः ॥ ८१ ॥
गुरुवर्ज्यन्तु मार्गार्हं योहि मार्गं न यच्छति।

स दाप्यः कृष्णलं राज्ञः तस्य पापस्य शान्तये ॥ ८२ ॥
एकजाति र्द्विजातिन्तु येनाङ्गेना पराभ्नुयात् ।
तदेव च्छेदयेत्तस्य चिप्रमेवा विचारयन् ॥ ८३ ॥
अवनिष्ठीवतोदर्पात् द्वावोष्ठौच्छेदयेन्नृप ! ।
अवमूत्रयतोमेढ्रमपशब्दयतो गुदम् ॥ ८४ ॥
उद्भासन मभिप्रेप्सु रुत्कृष्टस्यापि कृष्टजः ।
कव्यांकृताङ्कोनिर्वास्यः स्फिचंवाप्यस्य कर्तयेत् ॥ ८५ ॥
केशेषु गृह्णतोहस्तं छेदयेद विचारयन् ।
पादयो र्नासिकायाञ्च ग्रीवायां वृषणेषु च ॥ ८६ ॥
त्वग्भेदकः शतंदण्ड्यो लोहितस्य च दर्शकः ।
मांसभेत्ता च षणिष्कान् निर्वास्यस्त्वस्थिभेदकः ॥ ८७ ॥
अङ्ग भङ्ग करस्याङ्गं तदेवापहरेन्नृपः ।
दण्डपारुष्य कृद्दण्ड्यो समुत्थान व्ययन्तथा ॥ ८८ ॥
अर्द्धपादकरः कार्यो गोगजाश्वोष्ट्रघातकः ।
पशु क्षुद्र मृगाणाञ्च हिंसायां द्विगुणोदमः ॥ ८९ ॥
पञ्चाशञ्च भवेद्दण्डस्तथैव मृग पक्षिषु ।
कृमि कीटेषु दण्डःस्याद्रजतस्य च माषकम् ॥ ९० ॥
तस्यानु रूपं मौल्यञ्च प्रदद्यात्स्वामिने तथा ।
स स्वामिकानां सकलं शेषाणां सकलं तथा ॥ ९१ ॥
वृक्षन्तु सफलंच्छित्वा सुवर्णं दण्डमर्हति ।
द्विगुणं दण्डयेच्चैनं पथिसीम्नि जलाशये ॥ ९२ ॥
छेदनाद फलस्यापि मध्यमं साहसं स्मृतम् ।
गुल्मवल्लीलतानाञ्च सुवर्णस्य च माषकम् ॥ ९३ ॥
वृथाच्छेदी तृणस्यापि दण्डः कार्षापणं भवेत् ।

त्रिभागं कल्पना दण्ड्याः प्राणिमस्ताडने तथा ॥ ९४ ॥
देशकालानुरूपेण मूल्यं राजा द्रुमादिषु।
तत्स्वामिनस्तथा दण्ड्या दण्ड मुक्तन्तु पार्थिव ! ॥९५॥
यत्रातिवर्त्तते युग्यं वैगुण्यात्प्राजकस्य तु।
तत्र स्वामी भवेद्दण्डो नाशश्चेत्प्राजको भवेत् ॥ ९६ ॥
प्राजकश्च भवेद्दासः प्राजको दण्डमर्हति।
नास्ति दण्डश्च तस्यापि तथा वै हेतुकल्पकः ॥ ९७ ॥
द्रव्याणि यो हरेद्दूयस्य जानतोऽजानतोऽपि वा।
स तस्योत्पादयेत्तुष्टिं राज्ञो दद्यात्ततो दमम् ॥९८॥
यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च तां प्रपाम्।
स दण्डं प्राप्नुयान्माषं तच्च सम्प्रति पादयेत् ॥ ९९ ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं बधः।
शेषेऽप्येकादशगुणं तस्य दण्डं प्रकल्पयेत् ॥ १०० ॥
तथा भक्ष्यान्नपानानां न तथाप्यधिके बधः।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम् ॥ १०१ ॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः।
महापशूनां हरणे शस्त्राणामौषधस्य च ॥ १०२ ॥
मुख्यानाञ्चैव रत्नानां हरणे बधमर्हति।
दध्नः चीरस्य तक्रस्य पानीयस्य रसस्य च ॥ १०३ ॥
वेणु वैदलभाण्डानां लवणानां तथैव च।
मृण्मयानाञ्च सर्वेषां मृदो भस्मन एव च ॥ १०४ ॥
कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत्।
गोषु ब्राह्मणसंस्थासु महिषीषु तथैव च ॥ १०५ ॥

अश्वापहारकश्चैव सद्यः कार्योऽर्द्धपादकः ।
सूत्रकार्पासकिण्वानां गोमयस्य गुड़स्य च ॥ १०६ ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यद्वस्तुसम्भवम् ॥ १०७ ॥
अन्येषां लवणादीनां मद्यानामोदनस्य च ।
पक्वान्नानाञ्च सर्वेषान्तन्मूल्याद् द्विगुणोदमः ॥ १०८ ॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीलतासु च ।
अन्येषु परिपूर्णेषु दण्डः स्यात्पञ्चमाषकम् ।
परिपूर्णेषु धान्येषु शाकमूलफलेषु च ॥ १०९ ॥
निरन्वये शतं दण्ड्यः सान्वये द्विशतन्दमः ।
येन येन यथाङ्गेन स्तेनोऽन्येषु विचेष्टते ॥ ११० ॥
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ।
द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ॥ १११ ॥
त्रपुसोर्वारुकौ द्वौ च तावन्मात्रं फलेषु च ।
तथाच सर्वधान्यानां मुष्टिग्राह्येण पार्थिव ! ॥ ११२ ॥
शाके शाकप्रमाणेन गृह्यमाणे न दुष्यति ।
वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तथैव च ॥ ११३ ॥
तृणञ्चोऽप्यवहारार्थं मस्तेयं मनुरब्रवीत् ।
अदेववाटिजं पुष्पं देवतार्थं तथैव च ॥ ११४ ॥
आददानः परक्षेत्रात् न दण्डं दातुमर्हति ।
शृङ्गिणां नखिनं राजन् ! दंष्ट्रिणाञ्च वधोद्यतम् ॥ ११५ ॥
यो हन्यान्न स पापेन लिप्यते मनुजेश्वर ! ।
गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ॥ ११६ ॥

आततायिन मायान्तं हन्यादेवाविचारयन्।
आततायिवधे दोषो हन्तु र्भवति कश्चन ॥ ११७ ॥
प्रकाशं वाऽप्रकाशं वा मन्यु स्तं मन्यु मृच्छति।
गृहक्षेत्राभिहर्तार स्तथागम्याभिगामिनः ॥ ११८ ॥
अग्निदोगरदश्चैव तथा चाभ्युद्यतायुधः।
अभिचारन्तु कुर्वाणो राजगामि च पैशुनम् ॥ ११९ ॥
एते हि कथिता लोके धर्मज्ञै राततायिनः।
परस्त्रीणान्तु सम्भाषे तीर्थे ऽरण्ये गृहेऽपि वा ॥ १२० ॥
नदीनाञ्चैव सम्भेदैः स संग्रहण माप्नुयात्।
न सम्भाषेत्सह स्त्रीभिः प्रतिषिद्धः समाचरेत् ॥ १२१ ॥
प्रतिषिद्धे समाभाष्य सुवर्णं दण्डमर्हति।
नैषचारणदारेषु विधिरात्मोपजीविषु ॥ १२२ ॥
सज्जयन्ति मनुष्यैस्ता निगूढं वा चरन्त्युत।
किञ्चिदेवतु दाप्यः स्यात्सम्भाषेणापचारयन् ॥ १२३ ॥
प्रेष्यासु चैव सर्वासु गृहप्रव्रजितासु च।
योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति ॥ १२४ ॥
सकामां दूषमाणस्तु प्राप्नुयाद्द्विशतं दमम्।
यश्च संरक्षक स्तत्र पुरुषः स तथा भवेत् ॥ १२५ ॥
पारदारिकवद्दण्ड्यो योऽपि स्याद्वकाशदः।
बलात्संदूषयेद्यस्तु परभार्यां नरः क्वचित् ॥ १२६ ॥
वधो दण्डो भवेत्तस्य नापराधो भवेत्स्त्रियः।
रजस्तृतीयं या कन्या स्वगृहे प्रतिपद्यते ॥ १२७ ॥
अदण्ड्या सा भवेद्राज्ञा वरयन्ती पतिं स्वयम्।
स्वदेशे कन्यकान्दत्त्वा तामादाय तथा व्रजेत् ॥ १२८ ॥

परदेशे भवेद्वध्यः स्त्रीचोरः स यतो भवेत् ।
अद्रव्यां स्वतपत्नीन्तु संगृह्णन्नापराध्यति ॥ १२९ ॥
सद्रव्या तां संग्रहीता दण्डन्तु क्षिप्र मर्हति ।
उत्कृष्टं या भजेत्कन्या देया तस्यैव सा भवेत् ॥ १३० ॥
यश्चान्यं सेवमानाश्च संयतां वासयेद्गृहे ।
जघन्य मुत्तमा नारी सेवमाना तथैव च ॥ १३१ ॥
भर्त्तारं लङ्घयेद्या स्त्री ज्ञातिभि र्बलदर्पिता ।
ताञ्च निष्कासयेद्राजा संस्थाने बहुसंस्थिते ॥ १३२ ॥
हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
वासयेत् स्वैरिणीं नित्यं सवर्णेनाभिदूषिताम् ॥ १३३ ॥
ज्यायसा दूषिता नारी मुण्डनं समवाप्नुयात् ।
वासश्च मलिनं नित्यं भिक्षां संप्राप्नुयाद्यश ॥ १३४ ॥
ब्राह्मणः क्षत्रियो वैश्यः क्षत्रविट्शूद्रयोषितः ।
ब्रह्मदाप्यो भवेद्राजा दण्डमुत्तमसाहसम् ॥ १३५ ॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे ।
मध्यमं प्रथमं वैश्यो दण्डः शूद्रागमाद्भवेत् ॥ १३६ ॥
शूद्रः सवर्णागमने शतं दण्ड्यो महीक्षिता ।
वैश्यस्तु द्विगुणं राजन् ! क्षत्रस्तु त्रिगुणन्तथा ॥ १३७ ॥
ब्राह्मणश्च भवेद्दण्ड्य स्तथा राजंश्चतुर्गुणम् ।
अगुप्तासु भवेद्दण्डः स्वगुप्तास्वधिको भवेत् ॥ १३८ ॥
मातापितृष्वसाश्वश्रूर्मातुलानी पितृव्यजा ।
पितृव्यसखिशिष्यस्त्री गर्भिणी तत्सुषी तथा ॥ १३९ ॥
भ्रातृभार्यागमे पूर्वोद्दण्डस्तु द्विगुणो भवेत् ।
चण्डालीञ्च श्वपाकीञ्च गच्छन् बधमवाप्नुयात् ॥ १४० ॥

तिर्य्यग्योनिश्च गोवर्ज्यं मैथुनं यो निषेवते।
क्षपनं प्राप्नुयाद्दण्डं तस्याश्च यवसादिकम् ॥ १४१ ॥
सुवर्णञ्च भवेद्दण्डो गां व्रजन्मनुजोत्तम !।
वेश्यागामी द्विजोदण्ड्यो वेश्या शुल्क सममणम् ॥१४२॥
गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।
वेतनं द्विगुणं दद्याद्दण्डञ्च द्विगुणं तथा ॥ १४३ ॥
अन्य मुद्दिश्य यो वेश्यां नयेदन्यस्य कारयेत्।
तस्य दण्डो भवेद्राजन् ! सुवर्णस्य च माषकम् ॥ १४४ ॥
नीत्वा भोगान्न यो दद्याद्दाप्यो द्विगुण वेतनम्।
राज्ञश्च द्विगुणं दण्ड तथा धर्म्मो न हीयते ॥ १४५ ॥
बहूनां व्रजतामेकां सर्वे ते द्विगुणान्दमम्।
दद्युः पृथक् पृथक् सर्वे दण्डञ्च द्विगुणं परम् ॥ १४६ ॥
न माता न पिता न स्त्री नचर्त्विक् याज्यमानवाः।
अन्योन्यं पतितास्त्याज्या योगे दण्ड्याः शतानि षट् ॥१४७॥
पतिता गुरवस्त्याज्या न तु माता कथञ्चन।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥ १४८ ॥
अधीयानोऽप्यनध्याये दण्ड्यः कार्षापणत्रयम्।
अध्यापकश्च द्विगुणं तथाचारस्य लङ्घने ॥ १४९ ॥
अनुक्तस्य भवेद्दण्डः सुवर्णस्य च कृष्णलम्।
भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ॥ १५० ॥
कृतापराधा स्ताड्याः स्यूरज्वा वेणुदलेन वा।
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गं कथञ्चन ॥ १५१ ॥
अतोऽन्यथा प्रहरतः प्राप्तः स्याच्चोरकिल्बिषम्।
दूतीं समाश्रयंश्चैव यो निषिद्धं समाचरेत् ॥ १५२ ॥

आच्छन्नं वा प्रकाशं वा स दण्ड्यः पार्थिवेच्छया ।
वासांसि फलकैः श्लक्ष्णैर्निर्णेज्याद्रजकः शनैः ॥ १५३ ॥
अतोऽन्यथाहि कुर्वंस्तु दण्ड्यः स्याद्रुक्म माषकम् ।
रक्षास्वधिकृतैश्चैव प्रदेयं यैर्विलुप्यते ॥ १५४ ॥
कर्षकेभ्योऽर्थ मादाय यः कुर्यात्कार मन्यथा ।
तस्य सर्वस्व मादाय तं राजा विप्रवासयेत् ॥ १५५ ॥
ये नियुक्ताः स्वकार्येषु हन्युः कार्याणि कार्यिणाम् ।
निर्घृणाः क्रूरमनसः सर्वे कर्मापराधिनः ॥ १५६ ॥
धनोष्मणा पच्यमानास्तान्निःस्वान् कारयेन्नृपः ।
कूटशासनकर्तॄंश्च प्रकृतीनाञ्च दूषकान् ॥ १५७ ॥
स्त्रीबालब्राह्मणघ्नांश्च वध्याद्विट्सेविन स्तथा ।
अमात्यः प्राड्विवाको वा यः कुर्यात्कार्य मन्यथा ॥१५८॥
तस्य सर्वस्व मादाय तं राजा विप्रवासयेत् ।
ब्रह्मघ्नश्च सुरापश्च तस्करो गुरुतल्पगः ॥ १५९ ॥
एतान् सर्वान् पृथक् चिंस्यात् महापातकिनो नरान् ।
महापातकिनो वध्या ब्राह्मणान् विवासयेत् ॥ १६० ॥
कृतचिह्नं स्वदेशात्तु नृपाश्चिह्नाकृतिस्ततः ।
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ॥ १६१ ॥
स्तेने तु श्वपदन्तद्वद्ब्रह्महण्य शिराः पुमान् ।
असम्भाष्या ह्यसम्भोज्या असंवाह्या विशेषतः ॥ १६२ ॥
त्यक्तव्याश्च तथा राजन् ! ज्ञातिसम्बन्धिबान्धवैः ।
महापातकिनो वित्त मादाय नृपतिः स्वयम् ॥ १६३ ॥
अप्सु प्रवेशयेद्दण्डं वरुणायोपपादयेत् ।
सहोढं न विना चोरं घातयेद्धार्मिको नृपः ॥ १६४ ॥

सहोढं सोपकरणं घातयेद विचारयन्।
ग्रामेष्वपिच ये केचिच्चौराणां भक्तदायकाः॥ १६५॥
भाण्डावकाशदाश्चैव सर्वां स्तानपि घातयेत्।
राष्ट्रेषु राज्ञाधिकृताः सामन्ताश्चैव दूषकाः॥ १६६॥
अभ्यघातेषु मध्यस्थाः चिप्रं शास्याम्तु चोरवत्।
ग्रामघाते मठाभङ्गे पथि मोषाभिमर्दने॥ १६७॥
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः।
राज्ञः कोशापहर्त्तृंश्च प्रतिकूलेषु संस्थितान्॥ १६८॥
अरीणा मुपजप्तृंश्च घातयेद्विविधै र्वधैः।
सन्धिं कृत्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः॥१६९॥
तेषां छित्वा नृपोहस्तौ तीच्णशूले निवेशयेत्।
तड़ागभेदकं हन्यात् अप्सु शुद्धबधेन तु॥ १७०॥
यस्तु पूर्वं निविष्टस्यात्तड़ागस्योदकं हरेत्।
आगमञ्चाप्यपां भिन्यात्सदाप्यः पूर्वशासनम्॥ १७१॥
कोष्ठागारायुधागारदेवागारविभेदकान्।
पापान् पापसमाचारान् घातयेच्छीघ्र मेवच॥ १७२॥
समुत्सृजे द्राजमार्गे यस्त्व मेध्य मनापदि।
स हिकार्षापणं दण्ड्य स्तन्त्वमेध्यञ्च शोधयेत्॥ १७३॥
अजङ्गमोऽथवा वृद्धो गर्भिणी बाल एव वा।
परिभाषणमर्हन्ति नच शोध्य मिति स्थिति॥ १७४॥
प्रथमं साहसं दण्डीयश्च मिथ्या चिकित्सते।
पशवे मध्यमं दण्ड मुत्तमञ्च तथोत्तमे॥ १७५॥
छत्रस्य ध्वजयष्टीनां प्रतिमानाञ्च भेदकाः।
प्रतिकुर्युस्ततः सर्वे पञ्चदण्ड्याः शतानि च॥ १७६॥

अदूषितानां द्रव्याणां दूषणे भेदने तथा ।
मणीनामपि भेदेन दण्डः प्रथमसाहसम् ॥ १७७ ॥
समञ्च विषमञ्चैव कुरुते मूल्यतोऽपिवा ।
समाप्नुयान्नरो वै पूर्वं दममध्यममेव च ॥ १७८ ॥
बन्धनानि च सर्वाणि राजमार्गे निवेशयेत् ।
क्लिश्यन्तो यत्र दृश्यन्ते विकृताः पापकारिणः ॥ १७९ ॥
प्राकारस्य च भेत्तारं परिखानाञ्च भेदकम् ।
द्वाराणां चैव भेत्तारं क्षिप्रंनिर्वासयेत् पुरात् ॥ १८० ॥
मूलकर्माभिचारेषु कर्तव्यो द्विशतीदमः ।
अवीजविक्रयी यश्च बीजोत्कर्षक एव च ॥ १८१ ॥
मर्यादाभेदकश्चापि विकृतं बन्धमाप्नुयात् ।
सर्वसङ्करपापिष्ठं हेमकारं नराधिप ! ॥ १८२ ॥
अन्याये वर्तमानञ्च च्छेदयेल्लवशः क्षुरैः ।
द्रव्यमादाय वणिजामनर्घेणावरुन्धताम् ॥ १८३ ॥
द्रव्याणां दूषकोयस्तु प्रतिच्छन्नस्य विक्रयी ।
मध्यमं प्राप्नुयाद्दण्डं कूटकर्ता तथोत्तमम् ॥ १८४ ॥
राजा पृथक् पृथक् कुर्याद्दण्डं चोत्तमसाहसम् ।
शास्त्राणां यज्ञतपसां देशानां क्षेपको नरः ॥ १८५ ॥
देवतानां सतीनाञ्च उत्तमं दण्डमर्हति ।
एकस्य दण्डपारुष्ये बहूनां द्विगुणोदमः ॥ १८६ ॥
कलहे यद्धृतोदाप्यो दण्डश्च द्विगुणस्ततः ॥
मध्यमं ब्राह्मणंराजा विषयाद्विप्रवासयेत् ॥ १८७ ॥
लशुनञ्च पलाण्डुञ्च शूकरं ग्रामकुक्कुटम् ।
तथा पञ्चनखं सर्वं भक्ष्यादन्यत्तु भक्षयेत् ॥ १८८ ॥

विवासयेत् क्षिप्रमेव ब्राह्मणं विषयात् स्वकात्।
अभक्ष्यभक्षणे दण्ड्यः शूद्रो भवति कृष्णलम्॥ १८९ ॥
ब्राह्मणक्षत्रियविशां चतुस्त्रिद्विगुणं स्मृतम्।
यः साहसं कारयति स दण्ड्यो द्विगुणन्दमम्॥१९०॥
यस्त्वेव मुक्ताहन्दाता कारयेत्स चतुर्गुणम्।
सन्दिष्टस्याप्रदाता च समुद्रग्टहभेदकः॥ १९१ ॥
पञ्चाशत्पणिको दण्ड स्तत्र कार्य्यो महीक्षिता।
अस्पृश्यश्च स्पृशन्नार्य्यैस्त्वयोग्योऽयोग्यकर्मकृत्॥ १९२ ॥
पुंस्त्वहर्त्तापशूनाञ्च दासीगर्भविनाशकृत्।
शूद्रप्रव्रजितानाञ्च दैवे पैत्रे च भोजकः॥ १९३ ॥
अव्रजन् वाढमुक्ता तु तथैव च निमन्त्रणे।
एते कार्षापणशत सर्वे दण्ड्या महीक्षिता॥ १९४ ॥
दुःखोत्पादिग्टहे द्रव्यं क्षिपेद्दन्यस्य कृष्णलम्।
पिता पुत्त्र विरोधे च साक्षिणां द्विशतोदमः।
स्यान्तरस्य तथार्थ्यः स्यात्तस्याप्यष्टशतोदमः॥१९५॥
तुलाशासनमानानां कूटकृन्नाणकस्य च।
एभिश्च व्यवहर्त्ता च स दण्ड्यो दममुत्तमम्॥ १९६ ॥
विषाग्निदाम्पतिगुरुनिजापत्यप्रमापणीम्।
विकर्णनासिकां व्योष्ठीं कृत्वा गोभिः प्रमापयेत्॥१९७॥
खलस्य दाहका ये च ये च क्षेत्रस्य वेश्मनः।
राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना॥१९८॥
ऊन वा प्यधिकञ्चापि लिखेद्यो राजशासनम्।
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः॥१९९॥
अभक्ष्येण द्विजं दूष्य दण्ड उत्तमसाहसः।

क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्रमर्द्धकम् ॥ २०० ॥
मृताङ्गलग्नविक्रेतु र्गोतु ताडयतस्तथा ।
राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ २०१ ॥
यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।
तमायान्तं पुनर्जित्वा दण्डयेत् द्विगुणन्दमम् ॥ १०२ ॥
आह्वानकारी मध्यः स्यादनाह्वाने तथाह्वयन् ।
दण्डिकस्य च योहस्तादभियुक्तः पलायते ॥ २०३ ॥
हीनपुरुषकारेण तं दण्डाद्दाण्डिकोधनम्।
प्रेष्यापराधात् प्रेष्यस्तु स दण्डाय्याद्ध्मेव च ॥ २०४ ॥
दण्डार्थं नियमार्थञ्च नीयमानेषु बन्धनम् ।
यदि कश्चित्पलायेत दण्डश्चाष्टगुणो भवेत् ॥ २०५ ॥
अनिन्दिते विवादे तु नखरोमावतारणम् ।
कारयेद्यः स पुरुषो मध्यमं दण्डमर्हति ॥ २०६ ॥
बन्धनञ्चाप्यबध्यस्य बलान्मोचयते तु यः ।
बध्यं विमोचयेद्यस्तु दण्डाद्द्विगुणभाग्भवेत् ॥ २०७ ॥
दुष्टव्यवहाराणां सभ्यानां द्विगुणोदमः ।
राज्ञा त्रिंशद्गुणो दण्डः प्रक्षेप्य उदके भवेत् ॥ २०८ ॥
अल्पदण्डेऽधिकं कुर्य्याद्विपुले चाल्पमेव च ।
ऊनाधिकन्तु तं दण्डं सभ्योदद्यात् स्वकाद्गृहात् ॥ २०९ ॥
यावानबध्यस्य बधे तावान् वध्यस्य रक्षणे ।
अधर्मोनृपतेर्दृष्टस्तथा वध्यस्य मोचने ॥ २१० ॥
ब्राह्मणं नैव हन्यात्तु सर्वपापेष्ववस्थितम् ।
प्रवासयेत् स्वकाद्राष्ट्रात् समग्रधनसंयुतम् ॥ २११ ॥

न जातु ब्राह्मणं बध्यात् पातकं त्वधिकं भवेत्।
यस्मात्तस्मात्प्रयत्नेन ब्रह्महत्यां विवर्जयेत् ॥२११॥
अदण्ड्यान् दण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकञ्चाधिगच्छति ॥ २१२ ॥
ज्ञात्वापराधं पुरुषस्य राजा-
कालं तथाचानुमतं द्विजानाम्।
दण्डेषु दण्डं परिकल्पयेत्तु
मोयस्य युक्तः स समीक्ष्यकुर्य्यात् ॥ २१४ ॥

---

## अथ सप्तविंशत्यधिक द्विशतीततमोऽध्यायः।

मनुरुवाच। दिव्यान्तरिक्षभौमेषु या शान्तिरभिधीयते।
तामहं श्रोतुमिच्छामि महोत्पातेषु केशव ! ॥ १ ॥
मत्स्य उवाच। अथातः संप्रवक्ष्यामि त्रिविधामद्भुतादिषु।
विशेषेण तु भौमेषु शान्तिः कार्य्या तथा भवेत् ॥२॥
अभया चान्तरिक्षेषु सौम्या दिव्येषु पार्थिव !।
विजिगीषुः परं राजन् ! भूतिकामस्तु यो भवेत् ॥ ३ ॥
विजिगीषुः परानेव मभियुक्तस्तथा परैः।
तथाभिचारशङ्कायां शत्रूणामभिनाशने ॥ ४ ॥
भये महति संप्राप्ते अभया शान्तिरिष्यते।
राजयक्ष्माभिभूतस्य क्षतक्षीणस्य चाप्यथ ॥ ५ ॥
सौम्या प्रशस्यते शान्ति र्यज्ञकामस्य चाप्यथ।
भूकम्पे च समुत्पन्ने प्राप्ते चान्नक्षये तथा ॥ ६ ॥
अतिवृष्ट्यामनावृष्ट्यां शलभानां भयेषु च।
प्रमत्तेषु च चौरेषु वैष्णवी शान्तिरिष्यते ॥ ७ ॥

पशूनां मारणे प्राप्ते नराणामपि दारुणे।
भूतेषु हन्यमानेषु रौद्री शान्ति स्तथेष्यते॥ ८॥
वेदनाशे समुत्पन्ने जने जाते च नास्तिके।
अपूज्यपूजने जाते ब्राह्मीशान्ति स्तथेष्यते॥ ९॥
भविष्यत्यभिषेके च परचक्रभयेऽपि च।
स्वराष्ट्रभेदेऽरिवधे रौद्री शान्तिः प्रशस्यते॥ १०॥
त्र्यहातिरिक्ते पवने भृशं सर्वविगर्हिते।
वैकृते वातजे व्याधौ वायवी शान्तिरिष्यते॥ ११॥
अनावृष्टिभये जाते प्राप्ते विकृतिवर्षणे।
जलाशयविकारेषु वारुणी शान्तिरिष्यते॥ १२॥
अभिशापभये प्राप्ते भार्गवी च तथैव च।
जाते प्रसववैकृत्ये प्राजापत्या महाभुज!॥ १३॥
उपस्कराणां वै कृत्ये त्वाष्ट्रीपार्थिवनन्दन!।
बालानां शान्तिकामस्य कौमारी च तथा नृप!॥१४॥
कुर्य्याच्छान्तिमथाग्नेयीं सम्प्राप्ते वह्नि वैकृते।
आज्ञाभङ्गे तु सञ्जाते तथा भृत्यादिसङ्क्षये॥१५॥
अश्वानां शान्तिकामस्य तद्विकारे समुत्थिते।
अश्वानां कामयानस्य गान्धर्व्वी शान्तिरिष्यते॥१६॥
गजानां शान्तिकामस्य तद्विकारे समुत्थिते।
गजानां कामयानस्य शान्तिराङ्गिरसी भवेत्॥१७॥
पिशाचादिभये जाते शान्तिर्वै नैर्ऋती स्मृता।
अपमृत्युभये जाते दुःस्वप्ने च तथा स्थिते॥ १८॥
याम्यान्तु कारयेच्छान्तिं प्राप्ते तु नरके तथा।
धननाशे समुत्पन्ने कौवेरी शान्तिरिष्यते॥ १९॥

द्वाराणाञ्च तथार्थानां वैकृते समुपस्थिते।
भूतिकामस्तथा शान्तिं पार्थिवीं प्रतियोजयेत् ॥ २० ॥
प्रथमे दिनयामे च रात्रौ वा मनुजोत्तम!।
हस्ते स्वातौ च चित्रायामादित्ये चाश्विने तथा ॥२१॥
अर्यम्णि सौम्य! जातेषु वायव्यां त्वद्भुतेषु च।
द्वितीये दिनयामे तु रात्रौ च रविनन्दन! ॥ २२ ॥
पुष्याग्ने ये विशाखासु पित्र्यासु भरणीषु च।
उत्पातेषु तथा भाग्ये आग्नेयीं तेषु कारयेत् ॥ २३ ॥
तृतीये दिनयामे च रात्रौ च रविनन्दन!।
रोहिण्यां वैष्णवे ब्राह्मे वासवे वैश्वदेवते ॥ २४ ॥
ज्येष्ठायाञ्च तथा मैत्रे ये भवन्त्यद्भुताः क्वचित्।
ऐन्द्री तेषु प्रयोक्तव्या शान्तिरविकुलोद्वह! ॥ २५ ॥
चतुर्थे दिनयामे च रात्रौ वा रविनन्दन!।
सार्पे पौष्णे तथार्द्रायां मह्विर्बुध्ने च दारुणे ॥२६॥
मूले वरुणदैवत्ये ये भवन्त्यद्भुतास्तथा।
वारुणी तेषु कर्त्तव्या महाशान्तिर्महीक्षिता ॥२७॥
मित्रमण्डलवेलासु ये भवन्त्यद्भुताः क्वचित्।
तत्र शान्तिद्वयं कार्य्यं निमित्तेषु च नान्यथा।
निर्निमित्तकृता शान्ति निमित्तेनोपयुज्यते ॥ २८ ॥
बाणप्रहारा न भवन्ति यद्वद्राजन्नृणां सन्नहनैर्युतानाम्।
दैवोपघाता न भवन्ति तद्वद्धर्मात्मनां शान्तिपरायणानाम्॥२९॥

---

## अष्टात्रिंशदधिकद्विशततमोऽध्यायः ।

मनुरुवाच । अद्‌भुतानां फलं देव ! शमनञ्च तथा वद ।
त्वं हि वेत्सि विशालाक्ष ! ज्ञेयं सर्वमशेषतः ॥ १ ॥
मत्स्य उवाच । अत्र ते वर्णयिष्यामि यदुवाच महातपाः ।
अत्रये ह्यत्र गर्गस्तु सर्वधर्मभृतां वरः ॥ २ ॥
सरस्वत्याः सुखासीनं गर्गं स्रोतसि पार्थिव ! ।
पप्रच्छासौ महातेजा अत्रिर्मुनिजनप्रियम् ॥ ३ ॥
अत्रिरुवाच । नश्यतां पूर्वरूपाणि जनानां कथयस्व मे ।
नगराणां तथा राज्ञां त्वं हि सर्वं वदस्व माम् ॥४॥
गर्ग उवाच । पुरुषापचाराञ्नियतमपरज्यन्ति देवताः ।
ततोऽपरागाद्देवाना मुपसर्गः प्रवर्तते ।
दिव्यान्तरिक्षभौमञ्च त्रिविधं संप्रकीर्तितम् ।
ग्रहर्क्षवैकृतं दिव्य मान्तरिक्षं निबोध मे ॥ ६ ॥
उल्कापातो दिशान्दाहः परिवेष स्तथैव च ।
गन्धर्वनगरञ्चैव वृष्टिश्च विकृता तु या ॥ ७ ॥
एवमादीनि लोकेऽस्मिन्नान्तरिक्षं विनिर्दिशेत् ।
चरस्थिरभवं भौमो भूकम्पश्चापि भूमिजः ॥ ८ ॥
जलाशयानां वैकृत्यं भौमं तदपि कीर्तितम् ।
भौमे स्वल्पफलं ज्ञेयं चिरेण च विपच्यते ॥ ९ ॥
अभ्रजं मध्यफलदं मध्यकालफलप्रदम् ।
अद्‌भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् ॥ १० ॥
सप्ताहाभ्यन्तरे ज्ञेय मद्‌भुतं निष्फलं भवेत् ।
अद्‌भुतस्य विपाकश्च विना शान्त्या न दृश्यते ॥ ११ ॥

त्रिभिर्वर्षैस्तथा ज्ञेयं सुमङ्गलयकारकम् ।
राज्ञः शरीरे लोके च पुरद्वारे पुरोहिते ॥ १२ ॥
पाकमायाति पुत्रेषु तथा वै कोशवाहने ।
ऋतुस्वभावाद्राजेन्द्र ! भवन्त्यद्भुतसंज्ञिताः ॥ १३ ॥
शुभावहास्ते विज्ञेयास्तांश्च मे गदतः शृणु ।
वज्राशनिमहीकम्प सन्ध्यानिर्घातनिःस्वना ॥ १४ ॥
परिवेषरजोधूमरक्तार्कास्तमयोदयाः ।
द्रुमोद्भेदकरस्नेहो बहुशः सफलद्रुमः ॥ १५ ॥
गोपक्षिमधुवृद्धिश्च शुभानि मधुमाधवे ।
ऋक्षोल्कापातकलुषं कपिलार्केन्दुमण्डलम् ॥ १६ ॥
कृष्णश्वेतं तथापीतं धूसरध्वान्तलोहितम् ।
रक्तं पुष्पारुणं साध्यं नभः क्षुब्धार्णवोपमम् ॥ १७ ॥
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ।
शक्रायुधपरीवेषं विद्युदुल्काधिरोहणम् ॥ १८ ॥
कम्पोद्वर्तनवैकृत्यं हसनं दारणं क्षितेः ।
नद्योदपानं सरसां विधूनतरणप्लवाः ॥ १९ ॥
शृङ्गिणाञ्च वराहाणां वर्षासु शुभमिष्यते ।
शीतानिलतुषारत्वं नर्दनं खगपक्षिणाम् ॥ २० ॥
रक्षोभूतपिशाचानां दर्शनं वागमानुषी ।
दिशो धूमान्धकाराश्च स नभोवनपर्वताः ॥ २१ ॥
उच्चैः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ।
दिव्यस्त्रीरूपगन्धर्वविमानाद्भुतदर्शनम् ॥ २२ ॥
ग्रहनक्षत्रताराणां दर्शनं वागमानुषी ।
गीतवादित्रनिर्घोषो वनपर्वतसानुषु ॥ २३ ॥

सस्यवृद्धौ रसोत्पत्तिः शरत्काले शुभाः स्मृताः ।
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम् ॥ २४ ॥
कृष्णाञ्जनाभ माकाशं तारोल्कापातपिञ्जरम् ।
चित्रगर्भोद्भवः स्त्रीषु गोऽजाश्वमृगपक्षिषु ।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥ २५ ॥
ऋतुस्वभावेन विनाद्भुतस्य जातस्य दृष्टस्य तु शीघ्रमेव ।
यथागमं शान्तिरनन्तरन्तु कार्या यथोक्ता वसुधाधिपेन ॥२६॥

---

अथोनत्रिंशधिकद्विशततमोऽध्यायः ।

गर्गउवाच । देवतार्चाः प्रनृत्यन्ति वेपन्ते प्रज्वलन्तिच ।
वमन्त्यग्निं तथा धूमं स्नेहं रक्तं तथा वसाम् ॥ १॥
आरयन्ति रुदन्त्येताः प्रस्विद्यन्ति हसन्ति च ।
उत्तिष्ठन्ति निषीदन्ति प्रधावन्ति धमन्ति च ॥ २ ॥
भुञ्जते विक्षिपन्ते वा कोशप्रहरणध्वजान् ।
अवाङ्मुखा वै भवन्ति स्थानात् स्थानं भ्रमन्ति च ॥३॥
एव माद्या हि दृश्यन्ते विकाराः सहसोत्थिताः ।
लिङ्गायतनविप्रेष तत्र वासं न रोचयेत् ॥ ४ ॥
राज्ञो वा व्यसनन्तत्र स च देशो विनश्यति ।
देवयात्रासु चोत्पातान् दृष्ट्वा देशभयं वदेत् ॥ ५ ॥
पितामहस्य हर्म्येषु तत्र वासं न रोचयेत् ।
पशूनां रुद्रजं ज्ञेयं नृपाणां लोकपालजम् ॥ ६ ॥
ज्ञेयं सेनापतीनान्तु यत्स्यात् स्कन्दविशाखजम् ।
लोकानां विष्णुवस्वीन्द्रविश्वकर्मसमुद्भवम् ॥ ७ ॥

विनायकोद्भवं ज्ञेयं गणानां ये तु नायकाः।
देवप्रेष्यान्नृपप्रेष्यादेव स्त्रीभि र्नृपस्त्रियः॥ ८॥
वासुदेवोद्भवं ज्ञेयं ग्रहाणा मेव नान्यथा।
देवतानां विकारेषु श्रुतिवेत्ता पुरोहितः॥ ९॥
देवतार्चान्तु गत्वा वै स्नान माच्छाद्य भूषयेत्।
पूजयेच्च महाभाग! गन्धमाल्यान्नसम्पदा॥ १०॥
मधुपर्केण विधिवत् उपतिष्ठेदनन्तरम्।
पुरोधा जुहुयादग्नौ सप्तरात्र मतन्द्रितः। ११॥
विप्राश्च पूज्या मधुरान्नपानैः
सदक्षिणं सप्तदिनं नरेन्द्र!।
प्राप्तेऽष्टमेऽह्नि क्षितिगोप्रदानैः
संकाञ्चनैः शान्ति मुपैति पापम्॥ १२॥

---

## अथ त्रिंशदधिक द्विशततमोऽध्यायः।

गर्गउवाच। अनग्नि र्दीप्यते यत्र राष्ट्रे यस्य निरन्धनः।
न दीप्यते चेन्धनवान् तद्राष्ट्रं पीड्यते नृपैः॥ १॥
प्रज्वलेदप्सु मांसं वा तथार्द्रं वापिकिञ्चन।
प्राकारन्तोरणं द्वारं नृपवेश्म सुरालयम्॥ २॥
एतानि यत्र दीप्यन्ते तत्र राज्ञो भयं भवेत्।
विद्युता वा प्रदह्यन्ते तदापि नृपते र्भयम्॥ ३॥
अनैशानि तमांसि स्यु र्विना पांसुरजांसि च।
धूमश्चानग्निजो यत्र तत्र विन्द्यान्महाभयम्॥ ४॥
तडिच्च नभ्रे गगने भयं स्याद्दसवर्जिते।

दिवा सतारे गगने तथैव भयमादिशेत् ॥ ५ ॥
ग्रहनक्षत्रवैकृत्ये ताराशिषमदर्शने ।
पुरवाहनयानेषु चतुष्पान्मृगपक्षिषु ॥ ६ ॥
चायुधेषु च दीप्तेषु धूमायत्सु तथैव च ।
निर्गमत्सु च कोशाच्च संग्रामस्तमुलोभवेत् ॥ ७ ॥
विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित् ।
स्वभावाच्चापि पूर्यन्ते धनूंषि विकृतानि च ॥ ८ ॥
विकारश्चायुधानां स्यात् तत्र संग्राम मादिशेत् ।
त्रिरात्रोपोषितश्चात्र पुरोधाः सुसमाहितः ।
समिद्भि ! क्षीरवृक्षाणां सर्षपैश्च घृतेन च ।
होमं कुर्यादग्निमन्त्रैर्ब्राह्मणांश्चैव भोजयेत् ॥ ९ ॥
दद्यात्सुवर्णञ्च तथा द्विजेभ्योगाश्चैव वस्त्राणि तथा भुवञ्च ।
एवं कृते पापमुपैति नाशं यदग्निवैकृत्यभवं द्विजेन्द्र ! ॥ १० ॥

---

अथैकत्रिंशदधिक द्विशततमोऽध्यायः ।

गर्गउवाच । सुरेषु येषु दृश्यन्ते पाद पादे व चोदिताः ।
वदन्तो वा हसन्तो वा स्रवन्तो वा रसान् बहून् ॥ १ ॥
अरोगा वा विना वातं शाखां मुञ्चन्त्यथ द्रुमाः ।
फलं मूलं तथा कालं दर्शयन्ति विहायनाः ॥ २ ॥
पूर्ववत्स्वं दर्शयन्ति फलं पुष्पं तथान्तरे ।
क्षीरं स्नेहं तथा रक्तं मधु तोयं स्रवन्ति च ॥ ३ ॥
शुष्यन्त्यरोगाः सहसा शुष्का रोहन्ति वा पुनः ।
उत्तिष्ठन्तीह पतिताः पतन्ति च तथोत्थिताः ॥ ४ ॥

तत्र वक्ष्यामि ते ब्रह्मन्! विपाकं फल मेव च।
रोदने व्याधिमभ्येति हसने देशविभ्रमम्॥ ५॥
शाखाग्रपतनं कुर्यात्संग्रामे योधपातनम्।
बालानां मरणं कुर्यात् बालानां बालपुष्पिता॥ ६॥
स्वराष्ट्रभेदं कुरुते फलपुष्प मथान्तरे।
पयः सर्वत्र गोक्षीरे स्नेहे दुर्भिक्षलक्षणम्॥ ७॥
वाहनापचयं मद्ये रक्ते संग्राम मादिशेत्।
मधुस्रावे भवेद्व्याधि र्जलस्रावे न वर्षति॥ ८॥
अरोगशोषणं ज्ञेयं ब्रह्मन्! दुर्भिक्षलक्षणम्।
शुष्केषु संप्ररोहस्तु वीर्यमन्नञ्च क्षीयते॥ ९॥
उत्थाने पतितानाञ्च भयं भेदकरम्भवेत्।
स्थानात् स्थानन्तु गमने देशभङ्ग स्तथा भवेत्॥ १०॥
ज्वलत्स्वपि च वृक्षेषु रुदत्स्वपि धनक्षयम्।
एतत्पूजितवृक्षेषु सर्वं राज्ञो विपद्यते॥ ११॥
पुष्पे फले वा विकृते राज्ञो मृत्युं तथा दिशेत्।
अन्येषु चैव वृक्षेषु वृक्षोत्पातेष्वतन्द्रितः॥ १२॥
आच्छादयित्वा तं वृक्षं गन्धमाल्यै र्विभूषयेत्।
वृक्षोपरि तथा छत्रं कुर्यात् पापप्रशान्तये। १३॥
शिवमभ्यर्चयेद्देवं पशुञ्चास्मै निवेदयेत्।
रुद्रेभ्य इति वृक्षेषु हुत्वा रुद्रं जपेत्ततः॥ १४॥
मध्वाज्ययुक्तेन तु पायसेन संपूज्य विप्रांश्च भुवञ्च दद्यात्।
गीतेन नृत्येन तथार्चयेत्तु देवं हरं पापविनाशहेतोः। १५।

---

## अथ द्वात्रिंशदधिक द्विशततमोऽध्यायः ।

गर्ग उवाच । अतिवृष्टिरनावृष्टि दुर्भिक्षादि भयं मतम् ।
अनृतौ तु दिवानन्ता वृष्टिर्ज्ञेया भयानका ॥ १ ॥
अनभ्रे वैकृताश्चैव विज्ञेया राजमृत्यवे ।
शीतोष्णानां विपर्यासे नृपाणां रिपुजं भयम् ॥ २ ॥
शोणितं वर्षते यत्र तत्र शस्त्रभयम्भवेत् ।
अङ्गारपांसुवर्षेषु नगरन्तद्विनश्यति ॥ ३ ॥
मज्जास्थिस्नेहमांसानां जनमारभयम्भवेत् ।
फलं पुष्पन्तथा धान्यं परेणातिभयाय तु ॥ ४ ॥
पांसुजन्तु फलानाञ्च वर्षतो रोगजं भयम् ।
छिद्रेवान्नप्रवर्षेण सस्यानां भीतिवर्द्धनम् ॥ ५ ॥
विरजस्के रवौ व्यभ्रे यदा छाया न दृश्यते ।
दृश्यते तु प्रतीपा वा तत्र देशभयम्भवेत् ॥ ६ ॥
निरभ्रे वाथ रात्रौ वा श्वेतं याम्योत्तरेण तु ।
इन्द्रायुधं तथा दृष्ट्वा उल्कापातं तथैव च ॥ ७ ॥
दिग्दाहपरिवेषौ च गन्धर्वनगरन्तथा ।
परचक्रभयं ब्रूयाद्देशोपद्रव मेव च ॥ ८ ॥
सूर्येन्दुपर्जन्यसमीरणानाम्
यागस्तु कार्यो विधिवद्द्विजेन्द्र ! ।
धनानि गौः काञ्चनदक्षिणाच
देया द्विजानां भयनाशहेतोः ॥ ९ ॥

---

## अथ त्रयस्त्रिंशदधिक द्विशततमोऽध्याय।

गर्गउवाच। नगरादपसर्पन्ते समीप मुपयान्ति च।
नद्योह्रदप्रस्रवाणि विरसाश्च भवन्ति च॥ १॥
विवर्णं कलुषन्तप्तं फेनवज्जन्तुसङ्कुलम्।
स्नेहं क्षीरं सुरां रक्तं वहन्ते वा कुलोदकाः॥ २॥
षण्मासाभ्यन्तरे तत्र परचक्रभयम्भवेत्।
जलाशया नदन्ते वा प्रज्वलन्ति कथञ्चन॥ ३॥
विमुञ्चन्ति तथा भस्मान्! ज्वालाधूमरजांसि च।
अथाते वा जलोत्पत्तिः सुसत्वा वा जलाशयाः॥ ४॥
सङ्गीतशब्दाः श्रूयन्ते जनमारभयम्भवेत्।
दिव्यमम्भोमयं सर्पिर्मधुतैलावसेचनम्॥ ५॥
अतथ्या वारुणा मन्त्रास्तैश्च होमो जले भवेत्॥ ६॥
मध्वाज्ययुक्तं परमान्न मत्र
देयं द्विजानां द्विजभोजनार्थम्।
गावश्च देयाः सितवस्त्रयुक्ता
स्तथोदकुम्भाः सलिलाघशान्त्यै॥ ७॥

---

## अथ चतुस्त्रिंशदधिक द्विशततमोऽध्यायः।

गर्गउवाच। अकालप्रसवा नार्यः कालातीतप्रजा स्तथा।
विकृतप्रसवाश्चैव युग्मसंप्रसवा स्तथा॥ १॥
अमानुषा ह्यतुण्डाश्च सञ्जातव्यसना स्तथा।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः॥ २॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः।

विनाशमन्तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥ ३ ॥
विवासयेत्तान्नृपतिः स्वराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
कुर्य्याच्छकैं ब्राह्मणतर्पणाश्च
लोके ततः शान्ति मुपैति पापम् ॥ ४ ॥

---

अथ षट्त्रिंशदधिक द्विशततमोऽध्यायः ।

गर्ग उवाच । यान्ति यानान्ययुक्तानि युक्तान्यपि न यान्ति च ।
चोद्यमानानि तत्र स्यात् मरुद्भय मुपस्थितम् ॥ १ ॥
वाद्यमाना न वाद्यन्ते वाद्यन्ते नात्यनाहताः ।
अचलाश्च चलन्त्येव न चलन्ति चलानि च ॥ २ ॥
आकाशे तूर्यनादश्च गीतगन्धर्वनिस्वनाः ।
काष्ठदर्वीकुठारादि विकारं कुरुते यदि ॥ ३ ॥
गावो लाङ्गूलसङ्कैश्च स्त्रियः स्त्री च विघातयेत् ।
उपस्करादिविकृतौ घोरं शस्त्रभयम्भवेत् ॥ ४ ॥
वायोस्तु पूजां द्विजसक्तुभिश्च
कृत्वा नियुक्तांश्च जपेच्च मन्त्रान् ।
दद्यात् प्रभूतं परमान्न मत्र
सदक्षिणन्तेन शमोऽस्य भूयात् ॥ ५ ॥

---

## अथ षट्त्रिंशदधिकद्विशततमोऽध्यायः ।

गर्ग उवाच । प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलोद्भवाः ॥१॥
स्थलजाश्च जलं यान्ति घोरं वाशन्ति निर्भयाः ।
राजद्वारे पुरद्वारे शिवा चाप्यशिवप्रदा ॥ २ ॥
दिवाराचिश्चराविपि रात्रावपि दिवाचराः ।
ग्राम्यास्त्यजन्ति ग्रामञ्च शून्यतां तस्य निर्दिशेत् ॥ ३ ॥
दीप्ता वाशन्ति सन्ध्यासु मण्डलानि च कुर्वते ।
वाशन्ति विस्वरं यत्र तदाप्येतत् फलं लभेत् ॥ ४ ॥
प्रदोषे कुक्कुटो वाशेद्धेमन्ते वापि कोकिलः ।
अर्कोदये त्वभिमुखी शिवारौति भयं वदेत् ॥ ५ ॥
गृहं कपोतः प्रविशेत्क्रव्यादो मूर्ध्नि लीयते ।
मधु वा मक्षिकाः कुर्युर्मृत्युर्गृहपतेर्भवेत् ॥ ६ ॥
प्राकारद्वारगेहेषु तोरणापणवीथिषु ।
केतुच्छत्रायुधाद्येषु क्रव्यादं प्रपतेद्यदि ॥ ७ ॥
जायन्ते वाथ वल्मीका मधु वा स्यन्दते यदि ।
स देशो नाशमायाति राजा च म्रियते तथा ॥ ८ ॥
मूषकान् शलभान् दृष्ट्वा प्रभूतं क्षुद्भयम्भवेत् ।
काष्ठोल्मुकास्थिश्रृङ्गाढ्याः श्वानो मर्कटवेदनाः ॥९॥
दुर्भिक्षवेदना ज्ञेया काकाधान्यमुखा यदि ।
जनानभिभवन्तीह निर्भया रणवेदिनः ॥ १० ॥
काको मैथुनसक्तश्च श्वेतस्तु यदि दृश्यते ।
राजा वा म्रियते तत्र स च देशो विनश्यति ॥ ११ ॥

उलूको दृश्यते यत्र नृपद्वारे तथा गृहे ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥ १२ ॥
खगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणम् ।
देवाः कपोता इति वा जप्तव्याः पञ्चभिर्द्विजैः ॥ १३ ॥
गावश्च देया विधिवद्द्विजानां सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं खगैर्द्विजैर्वा विनिवेदितं यत् ।।१४।।

---

अथ सप्तत्रिंशदधिक द्विशततमोऽध्यायः ।

गर्ग उवाच । प्रासादतोरणाट्टालद्वारप्राकारवेश्मनाम् ।
निर्निमित्तन्तु पतनं दृढानां राजमृत्यवे ॥ १ ॥
रजसा वाथ धूमेन दिशो यत्र समाकुलाः ।
आदित्यचन्द्रताराश्च विवर्णा भयवृद्धये ॥ २ ॥
राक्षसा यत्र दृश्यन्ते ब्राह्मणाश्च विधर्मिणः ।
ऋतवश्च विपर्यस्ता अपूज्यः पूज्यते जनैः ॥ ३ ॥
नक्षत्राणि वियोगीनि तन्महद्भयलक्षणम् ।
केत्वदयोपरागौ च छिद्रं वा शशिसूर्ययोः ॥ ४ ॥
ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत् ।
स्त्रियश्च कलहायन्ते बाला निघ्नन्ति बालकान् ॥ ५ ॥
क्रियाणामुचितानाञ्च विच्छित्तिर्यत्र जायते ।
हूयमानस्तु यत्राग्निर्दीप्यते न च शान्तिषु ॥ ६ ॥
पिपीलिकाश्च क्रव्यादा यान्ति चोत्तरतस्तथा ।
पूर्णकुम्भाः स्रवन्ते च हविर्वा विप्रलुप्यते ॥ ७ ॥
मङ्गल्याश्च गिरो यत्र न श्रूयन्ते समन्ततः ।

च्चवथुर्बोधन्ते वाथ प्रहसन्ति रुदन्ति च ॥ ८ ॥
न च देवेषु वर्तन्ते यथावद्ब्राह्मणेषु च ।
मन्दघोषाणि वाद्यानि वाद्यन्ते विस्वराणि च ॥ ९ ॥
गुरुमित्रद्विषो यत्र शत्रुपूजारता नराः ।
ब्राह्मणान् सुहृदो मान्यान् जनो यत्रावमन्यते ॥ १० ॥
शान्तिमङ्गलहोमेषु नास्तिक्यं यत्र जायते ।
राजा वा म्रियते तत्र स देशो वा विनश्यति ।
राज्ञो विनाशे सम्प्राप्ते निमित्तानि निबोध मे ।
ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ १२ ॥
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
न च स्मरति कृत्येषु याचितश्च प्रकुप्यति ॥ १३ ॥
रमते निन्दया तेषां प्रशंसां नाभिनन्दति ।
अपूर्वन्तु करं लोभात्तथा पातयते जने ॥ १४ ॥
एतेष्वभ्यर्चयेच्छक्रं सपत्नीकं द्विजोत्तम ! ।
भोज्यानि चैव कार्याणि सुराणां बलयस्तथा ।
सन्तो विप्राश्च पूज्याः स्युस्तेभ्यो दानञ्च दीयताम् ॥१५॥
गावश्च देया द्विजपुङ्गवेभ्यो भूस्तथा काञ्चनमम्बराणि ।
होमश्च कार्योऽमरपूजनञ्च एवं कृते पापमुपैति शान्तिम् ॥१६॥

---

## अथाष्टत्रिंशदधिक द्विशततमोऽध्यायः ।

[म]नुरुवाच । ग्रहयज्ञः कथं कार्यो लक्षहोमः कथं नृपैः ।
कोटिहोमोऽपिवा देव ! सर्वपापप्रणाशनः ॥ १ ॥
क्रियते विधिना येन यद्दृष्टं शान्तिचिन्तकैः ।

तत्सर्वं विस्तराद्देव ! कथयस्व जनार्दन ! ॥ २ ॥

मत्स्य उवाच । इदानीं कथयिष्यामि प्रसङ्गादेव ते नृप ।

राज्ञा धर्मप्रसक्तेन प्रजानाञ्च हितैषिणा ॥ ३ ॥

ग्रहयज्ञः सदा कार्यो लक्षहोमसमन्वितः ।

नदीनां सङ्गमे चैव सुराणामग्रतस्तथा ॥ ४ ॥

सुसमे भूमिभागे च देवज्ञाधिष्ठितो नृपः ।

गुरुणा चैव ऋत्विग्भिः सार्द्धं भूमिं परीक्षयेत् ॥ ५ ॥

खनेत् कुण्डञ्च तत्रैव सुसमं हस्तमात्रकम् ।

द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणम् ॥ ६ ॥

युग्मास्तु ऋत्विजः प्रोक्ता अष्टौ वै वेदपारगाः ।

कन्दमूलफलाहारा दधिक्षीराशिनोऽपि वा ॥ ७ ॥

वेद्यां निधापयेच्चैव रत्नानि विविधानि च ।

सिकतापरिवेषाश्च ततोऽग्निञ्च समिन्धयेत् ॥ ८ ॥

गायत्र्या दशसाहस्रं मानस्तोकेन षड्गुणः ।

विंशद्ग्रहादिमन्त्रैश्च चत्वारि विष्णुदैवतैः ॥ ९ ॥

कुष्माण्डैर्जुहुयात्पश्च कुसुमाद्यैस्तु षोडश ।

होतव्या दशसाहस्रं वारुणैर्जातवेदसि ॥ १० ॥

श्रियो मन्त्रेण होतव्याः सहस्राणि चतुर्दश ।

शेषाः पञ्चसहस्रास्तु होतव्यास्त्विन्द्रदैवतैः ॥ ११ ॥

कृत्वा शतसहस्रन्तु पुण्यस्नानं समाचरेत् ।

कुम्भैः षोडशसङ्ख्यैश्च सहिरण्यैः सुमङ्गलैः ॥ १२ ॥

स्नापयेद्यजमानन्तु ततः शान्तिर्भविष्यति ।

एवं कृते तु यत्किञ्चिद्ग्रहपीडासमुद्भवम् ॥ १३ ॥

तत्सर्वं नाशमायाति दत्त्वा वै दक्षिणां नृप ! ।

तस्मात् सर्वप्रयत्नेन प्रधाना दक्षिणा स्मृता ॥ १४ ॥
हस्त्यश्वरथयानानि भूमिवस्त्रयुगानि च।
अनडुहां शतं दद्यादृत्विजां चैव दक्षिणाम् ॥ १५ ॥
यथाविभवसारन्तु वित्तशाठ्यं न कारयेत्।
मासे पूर्णे समाप्तस्तु लक्षहोमो नराधिप! ॥ १६ ॥
लक्षहोमस्य राजेन्द्र! विधानं परिकीर्तितम्।
इदानीं कोटिहोमस्य शृणु त्वं कथयाम्यहम्। १७॥
गङ्गातटेऽथ यमुनासरस्वत्योर्नरेश्वर!।
नर्मदा देविकायास्तु तटे होमो विधीयते ॥ १८ ॥
तत्रापि ऋत्विजः कार्या रविनन्दन! षोडश।
सर्वहोमे तु राजर्षे! दद्याद्विप्रेऽथ वाधनम्। १९ ॥
ऋत्विगाचार्यसहितो दीक्षां साम्वत्सरीं स्थितः।
चैत्रे मासे तु सम्प्राप्ते कार्तिके वा विशेषतः ॥ २० ॥
प्रारम्भः करणीयो वा वत्सरं वत्सरं नृप!।
यजमानः पयोभक्षी फलाशी च तथानघ! ॥ २१ ॥
यवाद्व्रीहयो माषास्तिलाश्च सह सर्षपैः।
पालाशाः समिधः शस्ता वसोर्धारा तथोपरि ॥ २२ ॥
मासेऽथ प्रथमे दद्यात् ऋत्विग्भ्यः क्षीरभोजनम्।
द्वितीये कृसरां दद्याद्धर्मकामार्थसाधनीम् ॥ २३ ॥
तृतीये मासि संयावो देयो वै रविनन्दन!।
चतुर्थे मोदका देया विप्राणां प्रीतिमावहन् ॥ २४ ॥
पञ्चमे दधिभक्तन्तु षष्ठे वै सक्तुभोजनम्।
पूपाश्च सप्तमे देया ह्यष्टमे घृतपूपकाः ॥ २५ ॥
षष्ट्योदनञ्च नवमे दशमे यवषष्टिका।

एकादशे समाप्तन्तु भोजनं रविनन्दन ! ॥ २६ ॥
द्वादशे त्वथ सम्प्राप्ते मासे रविकुलोद्वह ! ।
षड्रसैः सह भक्ष्यैश्च भोजनं सार्वकामिकम् ॥ २७ ॥
देया द्विजानां राजेन्द्र ! मासि मासि च दक्षिणाः ।
अहतवासाः सम्प्रीतो दिनार्द्धं होमयेच्छुचिः ॥ २८ ॥
तस्मात् सदोत्थितैर्भाव्यं यजमानैः सह द्विजैः ।
इन्द्राद्यादिसुराणाञ्च प्रीणनं सर्वकामिकम् ॥ २९ ॥
कृत्वा सुराणां राजेन्द्र ! पशुघातसमन्वितम् ।
सर्वदानानि देवानामग्निष्टोमञ्च कारयेत् ॥ ३० ॥
एवं कृत्वा विधानेन पूर्णाहुतिः शते शते ।
सहस्रे द्विगुणा देया यावच्छतसहस्रकम् ॥ ३१ ॥
पुरोडाशस्ततः साध्यो देवतार्थे च ऋत्विजैः ।
यज्ञो वसन् मानवैश्च पुनः प्राप्तार्चनान् द्विजान् ॥३२॥
प्रीणयित्वा सुरान् सर्वान् पितॄनेव ततः क्रमात् ।
कृत्वा शास्त्रविधानेन पिण्डानाञ्च समर्पणम् ॥ ३३ ॥
समाप्तौ तस्य होमस्य विप्राणामथ दक्षिणाम् ।
समाश्चैव तुलां कृत्वा बद्धा शिक्यद्वयं पुनः ॥ ३४ ॥
आत्मानं तोलयेत्तत्र पत्नीञ्चैव द्वितीयकाम् ।
सुवर्णेन तथात्मानं रजतेन तथा प्रियाम् ॥ ३५ ॥
तोलयित्वा ददेद्राजा वित्तशाठ्यविवर्जितः ।
ददेच्छतसहस्रन्तु रूप्यस्य कनकस्य च ॥ ३६ ॥
सर्वस्वं वा ददेत्तत्र राजसूयफलं लभेत् ।
एवङ्कृत्वा विधानेन विप्रांस्तांश्च विसर्जयेत् ॥ ३७ ॥
प्रीयतां पुण्डरीकाक्षः सर्वयज्ञेश्वरो हरिः ।

तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं भवेत् ॥ ३८ ॥
एवं सर्वोपघाते तु दैवमानुषकारिते।
एवं शान्तिस्तवाख्याता यां कृत्वा सुकृती भवेत् ॥ ३९ ॥
न शोचेज्जन्ममरणे कृताकृतविचारणे।
सर्वतीर्थेषु यत्स्नानं सर्वयज्ञेषु यत्फलम् ।
तत्फलं समवाप्नोति कृत्वा यज्ञत्रयं नृप ! ॥ ४१ ॥

---

## अथोनचत्वारिंशदधिकद्विशततमोऽध्यायः।

मनुरुवाच। इदानीं सर्वधर्मज्ञ! सर्वशास्त्रविशारद ! ।
यात्राकालविधानं मे कथयस्व महीक्षिताम् ॥ १ ॥
मत्स्य उवाच। यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णिग्राहाभिभूतोऽयं तदा यात्रां प्रयोजयेत् ॥ २ ॥
तुष्टा योधा भृता भृत्याः साम्प्रतञ्च बलं मम।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत् ॥ ३ ॥
अशुद्धपार्ष्णिर्नृपतिर्न तु यात्रां प्रयोजयेत्।
पार्ष्णिग्राहाधिकं सैन्यं मूले निक्षिप्य च व्रजेत् ॥ ४ ॥
चैत्र्यां वा मार्गशीर्ष्यं वा यात्रां यायान्नराधिपः।
चैत्र्यां पश्येच्च मैदाघं हन्ति पुष्टिञ्च शारदीम् ॥ ५ ॥
एतदेव विपर्यस्तं मार्गशीर्ष्यां नराधिपः।
शत्रोर्वा व्यसने यायात् काल एव सुदुर्लभः ॥ ६ ॥

दिव्यान्तरिक्षक्षितिजैरुत्पातैः पीड़ितं परम् ।
षडङ्गपीड़ासन्तप्तं पीड़ितञ्च तथा ग्रहैः ॥ ७ ॥
ज्वलन्ती च तथैवोल्का दिशं याञ्च प्रपद्यते ।
भूकम्पोल्का दिशं याति याञ्च केतुः प्रधूयते ॥ ८ ॥
निर्घातश्च पतेद्यत्र तां यायाद्वसुधाधिपः ।
स बलव्यसनोपेतं तथा दुर्भिक्षपीड़ितम् ॥ ९ ॥
सम्भूतान्तरकोपञ्च क्षिप्रं प्रायादरिं नृपः ।
यूकामाक्षीकबहुलं बहुपङ्कन्तथा विलम् ॥ १० ॥
नास्तिकं भिन्नमर्यादं तथा मङ्गलवादिनम् ।
अपेतप्रकृतिञ्चैव निःसारञ्च तथा जयेत् ॥ ११ ॥
विद्विष्टनायकं सैन्यं तथा भिन्नं परस्परम् ।
व्यसनासक्तनृपतिं बलं राजाभियोजयेत् ॥ १२ ॥
सैनिकानां च शस्त्राणि स्फुरन्त्यङ्गानि यत्र च ।
दुःस्वप्नानि च पश्यन्ति बलन्तदभियोजयेत् ॥ १३ ॥
उत्साहबलसम्पन्नः स्वानुरक्तबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥ १४ ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥ १५ ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥ १६ ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नान्तु यात्रां कुर्यान्नराधिपः ॥ १७ ॥

स्थले नक्रस्तु नागस्य तस्यापि सजले वशे।
उलूकस्य निशि ध्वाङ्क्षः सच तस्य दिवा वशे।
एवं देशञ्च कालञ्च ज्ञात्वा यात्रां प्रयोजयेत्॥ १९॥
पदातिनागबहुलां सेनां प्रावृषि योजयेत्।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम्।
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः॥ २०॥
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ।
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः॥ २१॥
अभियोज्यो भवेत्तेन शत्रुर्विषमसाश्रितः।
गम्ये वृक्षावृते देशे स्थितं शत्रुन्तथैव च॥ २२॥
किञ्चित् पङ्के तथा यायाद्बहुनागो नराधिपः।
तथाश्वबहुलो यायाच्छत्रुं समं पथि स्थितम्॥२३॥
तमाश्रयन्तो बहुलास्तांस्तु राजा प्रपूजयेत्।
खरोष्ट्रबहुलो राजा शत्रुर्बन्धेन संस्थितः॥ २४॥
बन्धनस्थोऽभियोज्योऽरिस्तथा प्रावृषि भूभुजा।
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत्॥ २५॥
यवसेन्धनसंयुक्तः कालः पार्थिव! हैमनः।
शरद्वसन्तौ धर्मज्ञ! कालौ साधारणौ स्मृतौ॥ २६॥
विज्ञाय राजा हितदेशकालौ दैवं त्रिकालञ्च तथैव बुद्ध्वा।
यायात् परं कालविदां मतेन सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः॥२७

## अथ चत्वारिंशदधिकद्विशततमोऽध्यायः।

मनुरुवाच। ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च।
सर्वधर्मभृतां श्रेष्ठ! त्वं हि सर्वविदुच्यसे ॥ १ ॥
मत्स्य उवाच। अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणम्भवेत्।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥ २ ॥
मनुरुवाच। अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्।
तन्मे विस्तरतो ब्रूहि येन स्यान्तद्विदो भुवि ॥ ३ ॥
मत्स्य उवाच। पृथ्वीलाभो भवेन्मूर्ध्नि ललाटे रविनन्दन!।
स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः ॥ ४ ॥
भृत्यलब्धिश्चाक्षिदेशे दृगुपान्ते धनागमः।
उत्कण्ठोपगमो मध्ये दृष्टं राजन्! विचक्षणैः ॥ ५ ॥
दृग्बन्धने सङ्गरे च जयं शीघ्रमवाप्नुयात्।
योषिद्भोगोऽपाङ्गदेशे श्रवणान्ते प्रियाश्रुतिः ॥ ६ ॥
नासिकायां प्रीतिसौख्यं प्रजाप्तिरधरोष्ठजे।
कण्ठे तु भोगलाभः स्याद्भोगवृद्धिरथांसयोः ॥ ७ ॥
सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः।
पृष्ठे पराजयः सद्यः जयो वक्षःस्थले भवेत् ॥ ८ ॥
कुक्षिभ्यां प्रीतिरुद्दिष्टा स्त्रियाः प्रजननं स्तने।
स्थानभ्रंशो नाभिदेशे अन्त्रेचैव धनागमः ॥ ९ ॥
जानुसन्धौ परैः सन्धिर्बलवद्भिर्भवेन्नृप!।
दिशैकदेशनाशोऽथ जङ्घायां रविनन्दन! ॥ १० ॥
उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप!।
सलाभञ्चाध्वगमनं भवेत् पादतले नृप! ॥ ११ ॥

लाञ्छनं पिटकञ्चैव ज्ञेयं स्फुरणवत्तथा।
विपर्ययेण विहिता सर्वस्त्रीणां फलागमः।
दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तंस्याद्विशेषतः॥ १२॥
अतोऽन्यथा सिद्धिप्रजल्पनात्तु फलस्य शस्तस्य च निन्दितस्य।
अनिष्टचिह्नोपगमे द्विजानां कार्यं सुवर्णेन तु तर्पणं स्यात्॥१३॥

---

## अथैकचत्वारिंशदधिकद्विशततमोऽध्यायः।

मनुरुवाच। स्वप्नाख्यानं कथं देव! गमने प्रत्युपस्थिते।
दृश्यन्ते विविधाकाराः कथन्तेषां फलं भवेत्॥ १॥
मत्स्य उवाच। इदानीं कथयिष्यामि निमित्तं स्वप्नदर्शने।
नाभिं विनान्यगात्रेषु तृणवृक्षसमुद्भवः॥ २॥
चूर्णनं मूर्ध्नि कांस्यानां मुण्डनं नग्नता तथा।
मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता॥ ३॥
उच्चात् प्रपतनञ्चैव दोलारोहणमेव च।
अर्जनं पक्वलोहानां हयानामपि मारणम्॥ ४॥
रक्तपुष्पद्रुमाणाञ्च मण्डलस्य तथैव च।
वराहर्क्षखरोष्ट्राणां तथा चारोहणक्रिया॥ ५॥
भक्षणं पक्वमांसानां तैलस्य कृसरस्य च।
नर्तनं हसनञ्चैव विवाहो गीतमेव च॥ ६॥
तन्त्रीवाद्यविहीनानां वाद्यानामभिवादनम्।
स्रोतोऽवगाहगमनं स्नानं गोमयवारिणा॥ ७॥
पङ्कोदकेन च तथा महीतोयेन चाप्यथ।
मातुः प्रवेशो जठरे चितारोहणमेव च॥ ८॥

शक्रध्वजाभिपतनं पतनं शशिसूर्ययोः ।
दिव्यान्तरिक्षभौमानामुत्पातानाञ्च दर्शनम् ॥ ९ ॥
देवद्विजातिभूपालगुरूणां क्रोधएव च ।
आलिङ्गनं कुमारीणां पुरुषाणाञ्च मैथुनम् ॥ १० ॥
हानिश्चैव स्वगात्राणां विरेकवमनक्रिया ।
दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा ॥ ११ ॥
फलापहानिश्च तथा पुष्पहानिस्तथैव च ।
गृहाणाञ्चैव पातश्च गृहसम्मार्जनन्तथा ॥ १२ ॥
क्रीड़ा पिशाचक्रव्यादवानरर्क्षनरैरपि ।
परादभिभवश्चैव तस्माच्च व्यसनोद्भवः ॥ १३ ॥
काषायवस्त्रधारित्वं तद्वत् स्त्रीक्रीड़नन्तथा ।
स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम् ॥ १४ ॥
एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् ।
एषां सङ्कथनं धन्यं भूयः प्रस्वापनन्तथा ॥ १५ ॥
कल्कस्नानन्तिलै र्होमो ब्राह्मणानाञ्च पूजनम् ।
स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम् ॥ १६ ॥
नागेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम् ।
स्वप्नास्तु प्रथमे यामे सम्वत्सरविपाकिनः ॥ १७ ॥
षड्भिर्मासै द्वितीये तु त्रिभिर्मासै स्त्रितीयके ।
चतुर्थे मासमात्रेण पश्यतो नात्र संशयः ॥ १८ ॥
अरुणोदयवेलायां दशाहेन फलम्भवेत् ।
एकस्यां यदि वा रात्रौ शुभं वा यदि वाशुभम् ॥ १९ ॥
पश्चाद्दृष्टस्तु य स्तत्र तस्य पाकं विनिर्दिशेत् ।
तस्माच्छोभनके स्वप्ने पश्चात् स्वप्नो न पश्यति ॥ २० ॥

शैलप्रासादनागाश्ववृषभारोहणं हितम्।
द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज!॥ २१॥
द्रुमतृणोद्भवो नाभौ तथैव बहुबाहुता।
तथैव बहुशीर्षत्वं फलितोद्भव एव च॥ २२॥
सुशुक्लमाल्यधारित्वं सुशुक्लाम्बरधारिता।
चन्द्रार्कताराग्रहणं परिमार्जन मेव च॥ २३॥
शक्रध्वजालिङ्गनञ्च तदुच्छ्रायक्रिया तथा।
भूम्यम्बुधीनां ग्रसनं शत्रूणाञ्च बधक्रिया॥ २४॥
जयो विवादे द्यूते च संग्रामे च तथा द्विज!।
भक्षणञ्चार्द्रमांसानां मत्स्यानां पायसस्य च॥ २५॥
दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च।
सुरारुधिरमद्यानां पानं क्षीरस्य चाथ वा॥ २६॥
अन्त्रैर्वा वेष्टनं भूमौ निर्मलं गगनं तथा।
मुखेन दोहनं शस्तं महिषीणां तथा गवाम्॥ २७॥
सिंहीनां हस्तिनीनाञ्च वडवानां तथैव च।
प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः॥ २८॥
अम्भसा त्वभिषेकस्तु गवां शृङ्गाश्रितेन वा।
चन्द्राद्भ्रष्टेन वा राजन्! ज्ञेयो राज्यप्रदो हि सः॥२९
राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा।
मरणं वह्निदाहश्च वह्निदाहो गृहादिषु॥ ३०॥
लब्धिश्च राज्यलिङ्गानां तन्त्रीवाद्याभिवादनम्।
तथोदकानां तरणं तथा विषमलङ्घनम्॥ ३१॥
हस्तिनीवडवानाञ्च गवाञ्च प्रसवो गृहे।
आरोहणं मथाश्वानां रोदनञ्च तथाशुभम्॥ ३२॥

वरस्त्रीणां तथालाभ स्तथालिङ्गन मेव च।
निगडै र्बन्धनं धन्यं तथा विष्ठानुलेपनम्॥ २३॥
जीवितां भूमिपालानां सुहृदामपि दर्शनम्।
दर्शनं देवतानाञ्च विमलानां तथाम्भसाम्॥ २४॥
शुभान्यथैतानि नरस्तु दृष्ट्वा प्राप्नोत्ययत्नाद्ध्रुवमर्थलाभम्।
स्वप्नानि वै धर्मभृतां वरिष्ठ! व्याधे र्विमोक्षञ्च तथातुरोऽपि।२५

---

अथ द्विचत्वारिंशधिकद्विशततमोऽध्यायः।

मनुरुवाच। गमनं प्रति राज्ञान्तु संमुखादर्शने च किम्।
प्रशस्तांश्चैव सम्भाष्य सर्वानेतांश्च कीर्तय॥ १॥
मत्स्यउवाच। औषधानि त्वयुक्तानि धान्यं कृष्णञ्च यद्भवेत्।
कार्पासञ्च तृणं राजन्! शुष्कं गोमय मेव च॥ २॥
इन्धनञ्च तथाङ्गारं गुडं तैलं तथा शुभम्।
अभ्यक्तं मलिनं मुण्डन्तथा नग्नञ्च मानवम्॥ ३॥
मुक्तकेशं रुजार्तञ्च काषायाम्बरधारिणम्।
उन्मत्तकन्तथा सत्वं दीनञ्चाथ नपुंसकम्॥ ४॥
अयःपङ्क स्तथा चर्म केशबन्धनमेव च।
तथैवोद्धृत साराणि पिण्याका दीनियानि च॥ ५॥
चण्डाल श्वपचाश्चैव राजबन्धनपालकाः।
वधकाः पापकर्माणो गर्भिणी स्त्री तथैव च॥ ६॥
तुषभस्मकपालास्थिभिन्नभाण्डानि यानि च।
रिक्तानि चैव भाण्डानि मृतं शार्ङ्गिक मेव च॥ ७॥
एवमादीनि चान्यानि अप्रशस्तान्यभि दर्शने।

अशस्तो वाह्यशब्दश्च भिन्नभैरवजर्जरः॥ ८ ॥
पुरतः शब्द एहीति शस्यते नतु पृष्ठतः।
गच्छेति पश्चात् धर्मज्ञ! पुरस्तात्तु विगर्हितः॥ ९ ॥
क्व यासि तिष्ठ मा गच्छ किन्ते तत्र गतस्य तु।
अन्ये शब्दाश्च ये निष्टास्ते विपत्तिकरा अपि॥ १० ॥
ध्वजादिषु तथा स्थानं क्रव्यादानां विगर्हितम्।
स्खलनं वाहनानाञ्च वस्त्रसङ्गस्तथैव च॥ ११ ॥
निर्गतस्य तु द्वारादौ शिरसश्चाभिघातिता।
छत्रध्वजानां वस्त्राणां पतनञ्च तथा शुभम्॥ १२ ॥
दृष्टे निमित्ते प्रथम ममङ्गल्यविनाशनम्।
केशवं पूजयेद्विद्वान् स्तवेन मधुसूदनम्॥ १३ ॥
द्वितीये तु ततो दृष्टे प्रतीपे प्रविशेद्गृहम्।
अथेष्टानि प्रवक्ष्यामि मङ्गल्यानि तथानघ!॥ १४ ॥
श्वेताः सुमनसः श्रेष्ठाः पूर्णकुम्भास्तथैव च।
जलजाः पक्षिणश्चैव मांसं मत्स्याश्च पार्थिव!॥ १५ ॥
गावस्तुरङ्गमा नागा बद्ध एकः पशुस्त्वजः।
त्रिदशाः सुहृदो विप्रा ज्वलितश्च हुताशनः॥ १६ ॥
गणिका च महाभाग! दूर्वा चार्द्रञ्च गोमयम्।
रुक्मं रूप्यन्तथा ताम्रं सर्वरत्नानि चाप्यथ॥ १७ ॥
औषधानिव धर्मज्ञ! यवाः सिद्धार्थकास्तथा।
नृवाह्यमानं यानञ्च भद्रपीठन्तथैव च॥ १८ ॥
खड्गं छत्रं पताका च मृदश्चायुधमेव च।
राजलिङ्गानि सर्वाणि सर्वे रुदितवर्जिताः॥ १९ ॥
घृतं दधि पयश्चैव फलानि विविधानि च।

स्वस्तिकं वर्द्धमानञ्च नन्द्यावर्तं सकौस्तुभम् ॥ २० ॥
वादित्राणां सुखः शब्दः गम्भीरः सुमनोहरः ।
गान्धारषड्जऋषभा ये च शस्तास्तथा स्वराः ॥ २१ ॥
वायुः सशर्करोरूक्षः सर्वत्र समुपस्थितः ।
प्रतिलोम स्तथा नीचो विज्ञेयोभयकृद्द्विज ! ॥ २२ ॥
अनुकूलो मृदुः स्निग्धः सुखस्पर्शः सुखावहः ।
रूक्षारूक्षस्वरा भद्राः क्रव्यादाः परिगच्छताम् ॥ २३ ॥
मेघाः शस्ता घनाः स्निग्धा गजबृंहितसन्निभाः ।
अनुलोमा स्तडिच्छन्नाः शक्रचापस्तथैव च ॥ २४ ॥
अप्रशस्ते तथा ज्ञेये परिवेषप्रवर्षणे ।
अनुलोमा ग्रहाः शस्ता वाक्पतिस्तु विशेषतः ॥ २५ ॥
आस्तिक्यं श्रद्धधानत्वं तथा पूज्याभिपूजनम् ।
शस्तान्येतानि धर्मज्ञ ! यच्च स्यात्मनसः प्रियम् ॥ २६ ॥
मनस स्तुष्टिरेवात्र परमं जयलक्षणम् ।
एकतः सर्वलिङ्गानि मनस स्तुष्टिरेकतः ॥ २७ ॥
मनोत्सुकत्वं मनसः प्रहर्षः शुभस्य लाभो विजयप्रवादः ।
मङ्गल्यलब्धिः श्रवणञ्च राजन् ! ज्ञेयानि नित्यं विजयावहानि ॥ २८

---

अथ त्रिचत्वारिंशदधिक द्विशततमोऽध्यायः ।

ऋषयऊचुः । राजधर्मस्त्वया सूत ! कथितो विस्तरेण तु ।
तथैवाद्भुतमङ्गल्यं स्वप्नदर्शन मेव च ॥ १ ॥
विष्णोरिदानीं माहात्म्यं पुनर्वक्तुमिहार्हसि ।
कथं स वामनो भूत्वा बबन्ध बलिदानवम् ॥ २ ॥

क्रमत: कीदृशं रूप मासील्लोकलये हरे:।
सूतउवाच। एतदेव पुरा पृष्ट: कुरुक्षेत्रे तपोधन:॥ ३॥
शौनकस्तीर्थयात्रायां वामनायतने पुरा।
यदा समयभेदित्वं द्रौपद्या: पार्थिवं प्रति॥ ४॥
अर्जुनेन कृतन्तच्च तीर्थयात्रां तदा ययौ।
धर्मक्षेत्रे कुरुक्षेत्रे वामनायतने स्थित:॥ ५॥
दृष्ट्वा स वामनस्तत्र अर्जुनो वाक्यमब्रवीत्।
अर्जुनउवाच। किन्निमित्त मयं देवो वामनाकृतिरिज्यते॥ ६॥
वराहरूपी भगवान् कस्मात्पूज्यो ऽभवत्पुरा।
कस्माच्च वामनस्येद मिष्टं क्षेत्रमजायत॥ ७॥
शौनकउवाच। वामनस्य च वक्ष्यामि वराहस्य च धीमत:।
पुरा निवारिते शक्रे सुरेषु विजितेषु च॥ ८॥
चिन्तयामास देवानां जननी पुनरुद्भवम्।
अदिति र्देवमाता च परमं दुश्चरं तप:॥ ९॥
तीव्रञ्चारवर्षाणां सहस्रं पृथिवीपते!।
आराधनाय कृष्णस्य वाताहारा ह्यभोजना॥ १०॥
दैत्यै र्निराकृतान् दृष्ट्वा तनयान् कुरुनन्दन!।
वृथा पुत्राहमस्मीति निर्वेदात् प्रणता हरिम्॥ ११॥
तुष्टाव वाग्भिरिष्टाभि: परमार्थनिबोधनै।
देवदेवं हृषीकेशं नत्वा सर्वगतं हरिम्॥ १२॥
अदितिरुवाच। नम: कृतार्त्तिनाशाय नम: पुष्करमालिने।
नम: परमकल्याणकल्याणायादिवेधसे॥ १३॥
नम: पङ्कजनेत्राय नम: पङ्कजनाभये।
श्रिय: कान्ताय दान्ताय दान्तदृश्याय चक्रिणे॥ १४॥

नमः पङ्कजसम्भूतिसम्भवायात्मयोनये ।
नमः शङ्खासिहस्ताय नमः कनकरेतसे ॥ १५ ॥
तथात्मज्ञातविज्ञातयोगिचिन्त्यात्मयोगिने ।
निर्गुणाया विशेषाय हरये ब्रह्मरूपिणे ॥ १६ ॥
जगत्प्रतिष्ठितं यत्र जगता यो न दृश्यते ।
नमः स्थूलातिसूक्ष्माय तस्मै देवाय शङ्खिने ॥ १७ ॥
यन्न पश्यन्ति पश्यन्तो जगदप्यखिलन्नराः ।
अपश्यद्भिर्जगत्यत्र न देवोहृदि संस्थितः ॥ १८ ॥
यस्मिन्नेतत् पयश्चैव यस्यैवाखिलं जगत् ।
तस्मै समस्तजगता माधाराय नमोनमः ॥ १९ ॥
आद्यः प्रजापतिपतिः यः प्रभूणां पतिः परः ।
पतिः सुराणां य स्तस्मै नमः कृष्णाय वेधसे ॥ २० ॥
यः प्रवृत्तौ निवृत्तौ च दृश्यते कर्मभिः स्वकैः ।
स्वर्गापवर्गफलदो नमस्तस्मै गदाभृते ॥ २१ ॥
य श्चिन्त्यमानो मनसा सद्यः पापं व्यपोहति ।
नमस्तस्मै विशुद्धाय पराय हरिवेधसे ॥ २२ ॥
यं बुद्धा सर्वभूतानि देवदेवेशमव्ययम् ।
न पुनर्जन्ममरणे प्राप्नुवन्ति न मामितम् ॥ २३ ॥
यो यज्ञे यज्ञपरमै रिज्यते यज्ञसंस्थितः ।
तं यज्ञपुरुषं विष्णुं नमामि प्रभुमीश्वरम् ॥ २४ ॥
गीयते सर्वदेवेषु वेदविद्भिर्विदांपतिः ।
य स्तस्मै वेदवेद्याय विष्णवे जिष्णवे नमः ॥ २५ ॥
यतोविश्वं समुत्पन्नं यस्मिंश्च लय मेष्यति ।
विश्वागमप्रतिष्ठाय नमस्तस्मै महात्मने ॥ २६ ॥

ब्रह्मादिस्तम्बपर्यन्तं येन विश्व मिदं ततम्।
मायाजालं समुत्तत्तुं न्त मुपेन्द्रं नमाम्यहम्॥ २७॥
यस्तु तोयस्वरूपस्थो बिभर्त्यखिलमीश्वरः।
विश्वं विश्वपतिं विष्णुन्तं नमामि प्रजापतिम्॥ २८॥
यमाराध्य विशुद्धेन मनसा कर्मणा गिरा।
तरन्त्यविद्यामखिलान्त मुपेन्द्रं नमाम्यहम्॥ २९॥
विषादतोषरोषाद्यैर्योऽजस्रं सुखदुःखजैः।
नृत्यत्यखिलभूतस्थ स्तमुपेन्द्रं नमाम्यहम्॥ ३०॥
मूर्तं तमो सुरमयन्तद्वधात् विनिहन्ति यः।
रात्रिरूपी सूर्यरूपी तमुपेन्द्रं नमाम्यहम्॥ ३१॥
यस्याक्षिणी चन्द्रसूर्यौ सर्वलोकशुभाशुभम्।
पश्यतः कर्म सततं मुपेन्द्रं तं नमाम्यहम्॥ ३२॥
यस्मिन् सर्वेश्वरे सर्वं सत्यमेतन्मयोदितम्।
नानृतं तमजं विष्णुं नमामि प्रभवाव्ययम्॥ ३३॥
यद्यैतत्सत्य मुक्तं मे भूयांश्चातो जनार्दनः।
सत्येन तेन सकलाः पूर्यन्तां मे मनोरथाः॥ ३४॥
शौनकउवाच। एवंस्तुतः स भगवान् वासुदेव उवाच ताम्।
अदृश्यः सर्वभूतानां तस्याः सन्दर्शने स्थितः॥ ३५॥
भगवानुवाच। मनोरथांस्त्वमदिते! यानिच्छस्यभिवाञ्छितान्।
तांस्त्वं प्राप्स्यसि धर्मज्ञे! मत्प्रसादान्न संशयः॥ ३६॥
शृणुष्व सुमहाभागे वरो यस्ते हृदि स्थितः।
तमाशु व्रियतां कामं श्रेयस्ते सम्भविष्यति।
मद्दर्शनंहि विफलं न कदाचिद्भविष्यति॥ ३७॥
अदितिरुवाच। यदि देव! प्रसन्नस्त्वं मद्भक्त्या भक्तवत्सल!।

त्रैलोक्याधिपतिः पुत्रस्तदस्तु मम वासवः ॥ ३८ ॥
हृतं राज्यं हृताश्चास्य यज्ञभागा महासुरैः ।
त्वयि प्रसन्ने वरदे तान् प्राप्नोतु सुतो मम ॥ ३९ ॥
हृतं राज्यं न दुःखाय मम पुत्रस्य केशव ! ।
सापत्न्याद्दायनिर्भ्रंशो बाधां नः कुरुते हृदि ॥ ४० ॥
श्रीभगवानुवाच । कृतः प्रसादो हि मया तव देवि ! यथेप्सितः ।
स्वांशेन चैव ते गर्भे सम्भविष्यामि कश्यपात् ॥ ४१ ॥
तव गर्भसमुद्भूतस्ततस्ते ये सुरारयः ।
तानहं निहनिष्यामि निर्वृत्ता भव नन्दिनि ! ॥ ४२ ॥
अदितिरुवाच । प्रसीद देव ! देवेश ! नमस्ते विश्वभावन ! ।
नाहं त्वां मुदरे देव ! वोढुं शक्ष्यामि केशव ! ॥ ४३ ॥
यस्मिन् प्रतिष्ठितं विश्वं यो विश्वं स्वयमीश्वरः ।
तमहं नोदरेण त्वां वोढुं शक्ष्यामि दुर्धरम् ॥ ४४ ॥
श्रीभगवानुवाच । सत्यमात्थ महाभागे! मयि सर्वमिदं जगत् ।
प्रतिष्ठितं न मां शक्ता वोढुं सेन्द्रा दिवौकसः ॥ ४५ ॥
किं त्वहं सकलान् लोकान् सदेवासुरमानुषान् ।
जङ्गमान् स्थावरान् सर्वान् त्वाञ्च देवि ! सकश्यपाम् ॥ ४६
धारयिष्यामि भद्रन्ते तदलं सम्भ्रमेण ते ।
न ते ग्लानिर्न ते खेदो गर्भस्थे भविता मयि ॥ ४७ ॥
दाक्षायणि ! प्रसादन्ते करोम्यन्यैः सुदुर्लभम् ।
गर्भस्थे मयि पुत्राणां तव योऽरिर्भविष्यति ।
तेजसस्तस्य हानिञ्च करिष्ये मा व्यथां कृथाः ॥ ४८ ॥
शौनकउवाच । एवमुक्त्वा ततः सद्यो यातोऽन्तर्धानमीश्वरः ।

सापि कालेन तं गर्भमवाप कुरुसत्तम! ॥ ४९ ॥
गर्भस्थिते ततः कृष्णो चचाल सकला क्षितिः।
चकम्पिरे महाशैलाः क्षोभञ्जग्मुस्तथाब्धयः॥ ५० ॥
यतो यतो दितिर्याति ददाति ललितं पदम्।
ततस्ततः क्षितिः खेदात् ननाम वसुधाधिप! ॥ ५१ ॥
दैत्यानामथ सर्वेषां गर्भस्थे मधुसूदने।
बभूव तेजसां हानि यथोक्तं परमेष्ठिना ॥ ५२ ॥

---

अथ चतुश्चत्वारिंशदधिक द्विशततमोऽध्यायः।

शौनकउवाच। निस्तेजसोऽसुरान् दृष्ट्वा समस्तानसुरेश्वरः।
प्रह्लाद मथ पप्रच्छ बलिरात्मपितामहम् ॥ १ ॥
बलिरुवाच। तात! निस्तेजसो दैत्या निर्दग्धादूव वह्निना।
किमिति सहसैवाद्य ब्रह्मदण्डहताइव ॥ २ ॥
दुरिष्टं किन्नु दैत्यानां किं कृत्या वैरिनिर्मिता।
नाशायैषा समुद्भूता यया निस्तेजसोऽसुराः ॥ ३ ॥
शौनकउवाच। इति दैत्यपति र्धीरः पृष्टः पौत्रेण पार्थिव!
चिरन्ध्यात्वा जगादेनमसुरेन्द्रं बलिन्तदा ॥ ४ ॥
चलन्ति गिरयो भूमिं जहाति सहसा धृतिम्।
सर्वे समुद्राः क्षुभिता दैत्या निस्तेजसः कृताः॥ ५ ॥
सूर्योदयो यथा पूर्वं तथा गच्छन्ति न ग्रहाः।
देवानाञ्च परा लक्ष्मीः कारणेनानुमीयते ॥ ६ ॥
महदेतन्महाबाहो! कारणं दानवेश्वर!।
न ह्यल्पमिति मन्तव्यं त्वया कार्यं सुरार्दन! ॥ ७ ॥

शौनक उवाच । इत्युक्त्वा दानवपतिं प्रह्लादः सोऽसुरोत्तमः ।
अत्यन्तभक्तो देवेशं जगाम मनसा हरिम् ॥ ८ ॥
स ध्यानयोगं कृत्वाथ प्रह्लादः सुमनोहरम् ।
विचारयामास ततो यतो देवो जनार्दनः ॥ ९ ॥
स ददर्शोदरे दित्या प्रह्लादो वामनाकृतिम् ।
अन्तःस्थान् बिभ्रतं सप्तलोकानादिप्रजापतिम् ॥ १० ॥
तदन्तःस्थान् वसून् रुद्रानश्विनौ मरुत स्तथा ।
साध्यान् विश्वांस्तथादित्यान् गन्धर्वोरगराक्षसान् ॥ ११ ॥
विरोचनं सतनयं बलिञ्चासुरनायकम् ।
जम्भं कुजम्भं नरकं तथैवान्यान् महासुरान् ॥ १२ ॥
आत्मान मुर्वीं गगनं वायुमम्भो हुताशनम् ।
समुद्रांश्चै द्रुमसरित्सरांसि च पशून् मृगान् ।
वयोमनुष्या नखिलां स्तथैव च सरीसृपान् ॥ १३ ॥
प्रह्लाद उवाच । वत्सञ्च तं मया सर्वं यदर्थं भवता प्रियम् ।
तेजसो हानि रुत्पन्ना तच्छृणु त्वमशेषतः ॥ १४ ॥
देवदेवो जगद्योनिरयोनि र्जगदादिकृत् ।
अनादिरादि विश्वस्य वरेण्यो वरदो हरिः ॥ १५ ॥
परम्पराणां परमः परः परवतामपि ।
प्रमाणञ्च प्रमाणानां सप्तलोकगुरोर्गुरुः ॥ १६ ॥
प्रभुः प्रभूणां परमः पराणामनादिमध्यो भगवाननन्तः ।
त्रैलोक्य मंशेन सनाथमेष कर्तुं महात्मा दितिजोऽवतीर्णः ॥ १७
न तस्य रुद्रो न च पद्मयोनिर्नेन्द्रो न सूर्येन्दुमरीचिमुख्याः ।
जानन्ति दैत्याधिप ! यत्स्वरूपं स वासुदेवः कलयावतीर्णः ॥ १८
योऽसौ कलांशेन नृसिंहरूपी जघान पूर्वं पितरंममेशः ।

यः सर्वयोगी शमनो निवासः स वासुदेव कलयावतीर्णः ॥१९॥
य मक्षरं वेदविदोविदित्वा विशन्तियं ज्ञानविधूतपापाः।
यस्मिन् प्रविष्टा न पुनर्भवन्ति तं वासुदेवं प्रणमामि नित्यम्॥२०
भूतान्यशेषाणि यतो भवन्ति यथोर्मय स्तोयनिधेरजस्रम्।
लयश्च यस्मिन् प्रलये प्रयान्तितं वासुदेवं प्रणमाम्यचिन्त्यम्।२१
न यस्य रूपं न बलप्रभावौ न यस्य भावः परमस्य पुंसः।
विज्ञायते शर्वपितामहाद्यैस्तं वासुदेवं प्रणमाम्यजस्रम्।२२।
रूपस्य चक्षु ग्रहणे त्वगिष्टा! स्पर्शे ग्रहित्री रसना रसस्य।
श्रोतञ्च शब्दग्रहणे नराणां घ्राणञ्च गन्धग्रहणे नियुक्तम्।२३।
येनैकदंष्ट्राग्रसमुद्धृतेयं धराचलान् धारयतीह सर्वान्।
यस्मिंश्च शेते सकलं जगच्च तमीशमाद्यं प्रणतोऽस्मि विष्णुम्॥२४
न घ्राणग्राह्यः श्रवणादिभिर्यः सर्वेश्वरो वेदितु मक्षयात्मा।
अक्षयमीड्यं मनसैव देवं ग्राह्यन्त तोऽहं हरिमीशितारम्।२५
अंशावतीर्णेन च येन गर्भे हृतानि तेजांसि महासुराणाम्।
नमामि तं देवमनन्त मीशमशेषसंसारतरोः कुठारम्॥२६॥
देवोजगद्योनिरयं महात्मा स षोडशांशेन महासुरेन्द्र!।
स देवमातु र्जठरं प्रविष्टो हृतानि वस्तेन बलाद्वपूंषि॥२७॥
बलिरुवाच। तात! कोऽयं हरिर्नाम यतो नो भयमागतम्।

सन्ति मे शतशोदैत्या वासुदेवबलाधिकाः॥२८॥
विप्रचित्तिः शिबिः शङ्कुरयः शङ्कु स्तथैव च।
हयः शिराश्चाश्वशिरा भङ्गकारो महाहनुः॥२९॥
प्रतापः प्रघसः शम्भुः कुकुरश्च सुदुर्जयः।
एते चान्ये च मे सन्ति दैतेया दानवा स्तथा॥३०॥
महाबला महावीर्या भूभारोद्धरणक्षमाः।

एषामेकैकशः कृष्णो न वीर्यार्द्धेन सम्मितः ॥ ३१ ॥

शौनकउवाच । पौत्रस्यैतद्वचः श्रुत्वा प्रह्लादो दैत्यपुङ्गवः ।

धिग्धिगित्याह स बलिं वैकुण्ठाक्षेपवादिनम् ॥ ३२ ॥

प्रह्लादउवाच । विनाशमुपयास्यन्ति मन्ये दैतेयदानवाः ! ।

येषां त्वमीदृशो राजा दुर्बुद्धिरविवेकवान् ॥ ३३ ॥

देवदेवं महाभागं वासुदेवमजं विभुम् ।

त्वामृते पापसङ्कल्पः कोऽन्यएवं वदिष्यति ॥ ३४ ॥

य एते भवता प्रोक्ताः समस्ता दैत्यदानवाः ।

सब्रह्मका स्तथा देवाः स्थावरानन्तभूमयः ॥ ३५ ॥

त्वञ्चाहञ्च जगच्चेदं साद्रिद्रुमनदीनदम् ।

समुद्रद्वीपलोकाश्च न समं केशवस्य हि ॥ ३६ ॥

यस्यातिवन्द्यवन्द्यस्य व्यापिनः परमात्मनः ।

एकांशेन जगत्सर्वं कस्तमेवं प्रवक्ष्यति ॥ ३७ ॥

ऋते विनाशाभिमुखं त्वामेक मविवेकिनम् ।

कुबुद्धि मजितात्मानं वृद्धानां शासनातिगम् ॥ ३८ ॥

शोच्योऽहं यस्य मे गेहे जात स्तव पिताधमः ।

यस्य त्वमीदृशः पुत्रो देवदेवस्य निन्दकः ॥ ३९ ॥

तिष्ठत्वेषा हि संसारसम्भूताघविनाशिनी ।

कृष्णे भक्ति रहन्तावदवेक्ष्यो भवता नु किम् ॥ ४० ॥

न मे प्रियतमः कृष्णादपि देहो महात्मनः ।

इति जानात्ययं लोको न भवान् दितिजाधम ! ॥ ४१ ॥

न जानासि प्रियतरं प्राणेभ्योऽपि हरिं मम ।

निन्दां करोषि तस्य त्वमकुर्वन् गौरवं मम ॥ ४२ ॥

विरोचन स्तव गुरु र्गुरु स्तस्याप्यहं बले ! ।

ममापि सर्वजगतां गुरो नारायणो गुरुः ॥ ४३ ॥
निन्दां करोषि य स्तस्मिन् कृष्णे गुरुगुरो गुरौ।
यस्मात्तस्मादिहैश्वर्यादचिराद्भ्रंश मेष्यसि ॥ ४४ ॥
मम देवो जगन्नाथो वत्से! तावज्जनार्दनः।
भवत्वह मुपेक्ष्यस्ते प्रीतिमानस्तु मे गुरुः ॥ ४५ ॥
एतावन्मात्र मप्येवं निन्दितो जगतोगुरुः।
नावेक्षितं त्वया यस्मात् तस्माच्छापन्ददामि ते ॥ ४६ ॥
यथा मे शिरसः च्छेदादिदं गुरुतरं वचः।
त्वयोक्त मच्युताक्षेपि राज्यभ्रष्ट स्तथा पत ॥ ४७ ॥
यथा च कृष्णान्न परं परित्राणं भवार्णवे।
तथाचिरेण पश्येयं भवन्तं राज्यविच्युतम् ॥ ४८ ॥
शौनकउवाच। इति दैत्यपतिः श्रुत्वा गुरोर्वचन मप्रियम्।
प्रसादयामास गुरुं प्रणिपत्य पुनः पुनः ॥ ४९ ॥
बलिरुवाच। प्रसीद तात! माकोपं कुरु मोहहते मयि।
बलावलेपमत्तेन मयैतद्वाक्य मीरितम् ॥ ५० ॥
मोहोपहतविज्ञानः पापोऽहं दितिजोत्तम!।
यच्छप्तोऽस्मि दुराचार स्तत्साधु भवता कृतम् ॥ ५१ ॥
राज्यभ्रंशंयशोभ्रंशं प्राप्स्यैव न तथाप्यहम्।
विषण्णोऽस्मि यथा तात! तवैवाविनये कृते ॥ ५२ ॥
त्रैलोक्यराज्यमैश्वर्यं मन्यद्वा नातिदुर्लभम्।
संसारे दुर्लभास्ते तु गुरवोये भवद्विधाः ॥ ५३ ॥
तत्प्रसीद न मे कोपं कर्तु मर्हसि दैत्यप!।
त्वत्कोपदग्ध्या तातहं परितप्ये न शापतः ॥ ५४ ॥
प्रह्लादउवाच। वत्स! कोपो न मोहेन जनितस्तेन ते मया।

शापोदत्तो विवेकस्य मोहेनापहृतो मम ॥ ५५ ॥
यदि मोहेन मे ज्ञानं न छिन्नं स्यान्महासुर ! ।
तत्कथं सर्वगं जानन् हरिं किञ्चिच्छपाम्यहम् ॥ ५६ ॥
योऽयं शापो मयादत्तो भवतोऽ सुरपुङ्गव ! ।
भाव्यमेतेन नूनन्ते तस्मान्मा त्वं विषीद वै ॥ ५७ ॥
अद्य प्रभृति देवेशे भगवत्यच्युते हरौ ।
भवेथा भक्तिमानीशे स ते त्राता भविष्यति ॥ ५८ ॥
शापं प्राप्याथ मां वीर ! संस्मरेथाः स्मृत स्त्वया ।
तथा तथा यतिष्येऽहं श्रेयसा योक्ष्यसे यथा ॥ ५९ ॥
एव मुक्त्वा स दैत्येन्द्रं विरराम महाद्युतिः ।
अजायत स गोविन्दो भगवान् वामनाकृतिः ॥ ६० ॥
अवतीर्णे जगन्नाथे तस्मिन् सर्वामरेश्वरे ।
देवाश्च मुमुचुर्दुःखं देवमाता दिति स्तथा ॥ ६१ ॥
ववुर्वाताः सुखस्पर्शा विरजस्कमभून्नभः ।
धर्मे च सर्वभूतानां तदा मतिरजायत ॥ ६२ ॥
नोद्वेगश्चाप्यभूत्तत्र मनुजेन्द्रासुरेष्वपि ।
तदादि सर्वभूतानां भूम्यम्बरदिवौकसाम् ॥ ६३ ॥
तं जातमात्रं भगवान् ब्रह्मा लोकपितामहः ।
जा॰ कर्मादिकं कृत्वा कृष्णं हृष्ट्वा च पार्थिव ! ।
तुष्टाव देवदेवेश मृषीणाञ्चैव शृण्वताम् ॥ ६४ ॥
ब्रह्मोवाच । जयाद्येश ! जयाजेय ! जय सर्वात्मकात्मक ।
जय जन्मजरापेत ! जयानन्त ! जयाच्युत ! ॥ ६५ ॥
जयाजित ! जयामेय ! जयाव्यक्तस्थिते ! जय ।
परमार्थार्थसर्वज्ञ ! ज्ञानज्ञेयार्थनिःसृत ! ॥ ६६ ॥

जयाशेष! जगत्साक्षिन्! जगत्कर्त्त! जगद्गुरो!।
जगतोऽस्थान्तरद्दैर्वस्थितिं पालयितुं जय॥ ६७॥
जयाशेष! जयाशेष! जयाखिल! हृदि स्थित!।
जयादिमध्यान्त! जय सर्वज्ञानिधे! जय॥ ६८॥
मुमुक्षुभिर्निर्देश्य! स्वयं हृष्टजनेश्वर!।
योगिनां मुक्तिफलद! दमादिगुणभूषण!॥ ६९॥
जयातिसूक्ष्म! दुर्ज्ञेय! जय स्थूल! जगन्मय!।
जय स्थूलातिसूक्ष्म! त्वं जयातीन्द्रिय! सेन्द्रिय!॥७०
जय स्वमायायोगस्थ! शेषभोग! जयाक्षर!।
जयैकदंष्ट्राप्रान्ताग्रसमुद्धृतवसुन्धर!॥ ७१॥
नृकेसरिन्! जयारातिवक्षस्थलविदारण!।
सांप्रतं जय विश्वात्मन्! जय वामन! केशव!॥ ७२॥
निजमायापटच्छन्न! जगन्मूर्त्ते! जनार्दन!।
जयाजित! जयानेकस्वरूपैकविध! प्रभो!॥ ७३॥
वर्द्धस्व वर्धिताशेषविकारप्रकृते! हरे!।
त्वय्येषा जगतामीशे संस्थिता धर्मपद्धतिः॥ ७४॥
न त्वामहं न चेशानो नेन्द्राद्यास्त्रिदशा हरे!।
न ज्ञातु मीशा मुनयः सनकाद्या न योगिनः॥ ७५॥
त्वन्मायापटसम्वीते जगत्यत्र जगत्पते!।
कस्त्वां वेत्स्यति सर्वेश त्वत्प्रसादं विना नरः॥ ७६॥
त्वमेवाराधितो येन प्रसादसुमुख! प्रभो!।
स एकः केवलो देव! वेत्ति त्वां नेतरे जनाः॥ ७७॥
नन्दीश्वरेश्वरेशान! प्रभो! वर्धस्व वामन!।

प्रभवायास्य विश्वस्य विश्वात्मन्! पृथुलोचन! ॥ ७८ ॥
शौनकउवाच। एवं स्तुतो हृषीकेशः स तदा वामनाकृतिः।
प्रहस्य भावगम्भीर मुवाचाब्जसमुद्भवम् ॥ ७९ ॥
स्तुतोऽहं भवता पूर्व मिन्द्राद्यैः कश्यपेन च।
मया च वः प्रतिज्ञात मिन्द्रस्य भुवनत्रयम् ॥ ८० ॥
भूयश्चाहं स्तुतोदित्या तस्याश्चापि प्रतिश्रुतम्।
यथाशक्राय दास्यामि त्रैलोक्यं हतकण्टकम् ॥ ८१ ॥
सोऽहन्तथा करिष्यामि महन्द्रो जगतः पतिः।
भविष्यति सहस्राक्षः सत्यमेतद्ब्रवीमि वः ॥ ८२ ॥
ततः कृष्णाजिनं ब्रह्मा हृषीकेशाय दत्तवान्।
यज्ञोपवीतं भगवान् ददौ तस्मै बृहस्पतिः ॥ ८३ ॥
आषाढ मददाद्दण्डं मरीचि र्ब्रह्मणः सुतः।
कमण्डलुं वसिष्ठश्च कौशं वेद मथाङ्गिराः ॥ ८४ ॥
अक्षसूत्रञ्च पुलहः पुलस्त्यः सितवाससी।
उपतस्थुश्च तं वेदाः प्रणवोच्चारभूषणाः ॥ ८५ ॥
शास्त्राण्यशेषाणि तथा सांख्ययोगोक्तयश्च याः।
स वामनो जटीदण्डी छत्री धृतकमण्डलुः ॥ ८६ ॥
सर्वदेवमयो भूत्वा बलेरध्वरमभ्यगात्।
यत्र यत्र पदम्भूयो भूभागे वामनो ददौ ॥ ८७ ॥
ददाति भूमिर्विवरं तत्र तत्रातिपीडिता।
स वामनो जड़गति र्मृदु गच्छन् सपर्वताम्।
साब्धिद्वीपवतीं सर्वांश्चालयामास मेदिनीम् ॥ ८८ ॥

---

अथ पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः।

शौनकउवाच। सपर्वतवनामुर्वीं दृष्ट्वा संक्षोभितां बलिः।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः॥ १॥
आचार्य! क्षोभमायाता साब्धिभूधरना मही।
कस्माच्च नासुरान् भागान् प्रतिगृह्णन्ति वह्नयः॥ २॥
इति पृष्टोऽथ बलिना काव्यो वेदविदांवरः।
उवाच दैत्याधिपतिं चिरन्ध्यात्वा महामतिः॥ ३॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः।
वामनेनेह रूपेण जगदात्मा सनातनः॥ ४॥
स एष यज्ञमायाति तव दानवपुङ्गव!।
तत्पादन्यासविक्षोभादियं प्रचलिता मही॥ ५॥
कम्पन्ते गिरयश्चामी क्षुभितो मकरालयः।
नैनं भूतपतिं भूमिः समर्था वोढुमीश्वरम्॥ ६॥
सदेवासुरगन्धर्वा यक्षराक्षसकिन्नरा।
अनेनैव धृता भूमि रापोऽग्निः पवनोनभः॥ ७॥
धारयत्यखिलान् देवा मन्वादींश्च महासुरः।
इयमेव जगद्धेतो र्माया कृष्णस्य गह्वरी॥ ८॥
धार्यधारकभावेन यया संपीडितं जगत्।
तत्संन्निधानादसुरा भागार्हा नासुरोत्तम!।
भुञ्जते नासुरान् भागानमी ते नैव चाग्नयः॥ ९॥
बलिरुवाच। धन्योऽहं कृतपुण्यश्च यन्मे यज्ञपतिः स्वयम्।
यज्ञ मभ्यागतो ब्रह्मन्! मत्तः कोऽन्योऽधिकः पुमान्॥ १०॥
यं योगिनः सदा युक्ताः परमात्मानमव्ययम्।
द्रष्टुमिच्छन्ति देवेशं स मेऽध्वर मुपैष्यति॥ ११॥

होता भागप्रदोऽयञ्च यमुद्गाता च गायति ।
तमध्वरेश्वरं विष्णुं मत्तः कोऽन्य उपैष्यति ॥ १२॥
सर्वेश्वरेश्वरे कृष्णे मदध्वर मुपागते ।
यन्मया कार्य्य ! कर्त्तव्यं तन्ममादेष्टु मर्हसि ॥ १३ ॥
शुक्रउवाच । यज्ञभागभुजो देवा वेदप्रामाण्यतोऽसुर ! ।
त्वया तु दानवा दैत्या मखभागभुजः कृताः ॥ १४ ॥
अयञ्च देवः सत्वस्थः करोति स्थितिपालनम् ।
विसृष्टे ऽनु चान्नेन स्वयमत्ति प्रजाः प्रभुः ॥ १५ ॥
त्वत्कृते भविता नूनं देवो विष्णुः स्थितौ स्थितः ।
विदित्वैतन्महाभाग ! कुरु यत्ते ऽनागतम् ॥ १६ ॥
त्वया हि दैत्याधिपते ! स्वल्पकेऽपि हि वस्तुनि ।
प्रतिज्ञा नहि वोढव्या वाच्यं साम वृथाफलम् ॥ १७॥
नाऽलन्दातु महन्देव ! दैत्य ! वाच्यं त्वया वचः ।
कृष्णस्य देवभूत्यर्थं प्रवृत्तस्य महासुर ! ॥ १८ ॥
वलिरुवाच । ब्रह्मन् ! कथमहं ब्रूयामन्येनापि हि याचितः ।
नास्तीति किमु देवेन संसारौघौघहारिणा ॥ १९ ॥
व्रतोपवासै र्विविधैः प्रति संग्राह्यते हरिः ।
स चेद्वक्ष्यति देहीति गोविन्दः किमतोऽधिकम् ॥ २०॥
यदर्थ मुपहाराद्या तपःशौचगुणान्वितैः ।
यज्ञाः क्रियन्ते देवेशः स मां देहीति वक्ष्यति ॥ २१ ॥
तत्साधु सुकृतं कर्म तपः सुचरितं मम ।
यन्मया दत्त मीशेशः स्वयमादास्यते हरिः ॥ २२ ॥
नास्ति नास्तीत्यहं वक्ष्ये तमप्यागतमीश्वरम् ।
यदा वञ्चामि तं प्राप्तं वृथा तज्जन्मनः फलम् ॥ २३ ॥

यज्ञेऽस्मिन्यदि यज्ञेशो याचते मां जनार्दनः।
निजमूर्द्धान मप्यत्र तद्दास्याम्यविचारितम् ॥ २४ ॥
नास्तीति यन्मया नोक्त मन्येषा मपि याचताम्।
वक्ष्यामि कथमायाते तदनभ्यस्तमच्युते ॥ २५ ॥
श्लाघ्य एव हि वीराणां दानादापत्समागमः।
नाबाधकारि यद्दानं तदङ्गमलवत् स्मृतम् ॥ २६ ॥
मद्राज्येनासुखी कश्चिन्न दरिद्रो न चातुरः।
नाभूषितो न चोद्विग्नो न स्रगादिविवर्जितः ॥ २७ ॥
हृष्टस्तुष्टः सुगन्धिश्च तृप्तः सर्वसुखान्वितः।
जनः सर्वो महाभाग! किमुताहं सदा सुखी ॥ २८ ॥
एतद्विशिष्टपात्रोऽयं दानबीजफलं मम।
विदितं भृगुशार्दूल! मयैतत्त्वत्प्रसादतः ॥ २९ ॥
एतद्विजानता दानबीजं पतति चेद्गुरो!।
जनार्दनमहापात्रे किन्न प्राप्तन्ततो मया ॥ ३० ॥
मत्तो दान मवाप्येशो यदि पुष्णाति देवताः।
उपभोगाद्दशगुणं दानं श्लाघ्यतमं मम ॥ ३१ ॥
मत्प्रसादपरो नूनं यज्ञेनाराधितो हरिः।
तेनाभ्येति न सन्देहो दर्शनादुपकारकृत् ॥ ३२ ॥
अथ कोपेन चाभ्येति देवभागोपरोधिनम्।
मां निहन्तुमनास्तेव बधः श्लाघ्यतरोऽच्युतात् ॥ ३३ ॥
तन्मयं सर्वमेवेदं नाप्राप्यं यस्य विद्यते।
स मां याचितुमभ्येति नानुग्रहहृते हरिः ॥ ३४ ॥
यः सृजत्यात्मभूः सर्वंस्ततस्तैव च संहरेत्।
स मां हन्तुं हृषीकेशः कथं यत्नं करिष्यति ॥ ३५ ॥

एतद्विदित्वा न गुरो ! दानविघ्नकरेण च ।
त्वया भाव्यं जगन्नाथे गोविन्दे समुपस्थिते ॥ ३६ ॥
शौनकउवाच । इत्येवं वदतस्तस्य संप्राप्तः स जगत्पतिः ।
सर्वदेवमयो चिन्त्यो मायावामनरूपधृक् ॥ ३७ ॥
तं दृष्ट्वा यज्ञवाटान्तः प्रविष्टमसुराः प्रभुम् ।
जग्मुः सभासदः क्षोभन्तेजसा तस्य निष्प्रभाः ॥ ३८ ॥
जेपुश्च मुनय स्तत्र ये समेता महाध्वरे ।
बलिश्चैवाखिलं जन्म मेने स फलमात्मनः ॥ ३९ ॥
ततः संक्षोभ मापन्नो न कश्चित्किञ्चिदुक्तवान् ।
प्रत्येकं देवदेवेशं पूजया मासचेतसा ॥ ४० ॥
अथासुरपतिं प्रह्वं दृष्ट्वा मुनिवरांश्च तान् ।
देव देवपतिः साक्षी विष्णु र्वामनरूप धृक् ॥ ४१ ॥
तुष्टाव यज्ञवह्निञ्च यजमान मथर्त्विजः ।
यज्ञकर्माधिकारस्थान् सदस्यान् द्रव्यसम्पदः ॥ ४२ ॥
ततः प्रसन्नमखिलं वामनं प्रति तत्क्षणात् ।
यज्ञवाटस्थितं वीरः साधु साध्वित्युदीरयन् ॥ ४३ ॥
स चार्घमादाय बलिः प्रोद्भूतपुलकस्तदा ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥ ४४ ॥
बलिरुवाच । सुवर्णरत्नसंघातं गजाश्व ममितन्तथा ।
स्त्रियो वस्त्राण्यलङ्कारांस्तथा ग्रामांश्च पुष्कलान् ॥ ४५ ॥
सर्वस्वं सकलामुर्वीं भवतो वा यदीप्सितम् ।
तद्ददामि वृणुष्व त्वं येनार्थी वामनः प्रियः ॥ ४६ ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितंवचः ।
प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥ ४७ ॥

•ममाग्निशरणार्थाय देहि राजन्! पदत्रयम्।
सुवर्णग्रामरत्नानि तदर्थिभ्यः प्रदीयताम्॥ ४८॥
बलिरुवाच। त्रिभिः प्रयोजनं किन्ते पादैः पदवताम्बर!।
शतं शतसहस्राणां पदानां मार्गतां भवान्॥ ४९॥
वामनउवाच। एतावतैव दैत्येन्द्र! कृतकृत्योऽस्मि मार्गताम्।
अन्येषा मर्थिनां वित्त मीप्सितं दास्यते भवान्॥ ५०॥
एतत्छ्रुत्वा तु गदितं वामनस्य महात्मनः।
ददौ तस्मै महाबाहु र्वामनाय पदत्रयम्॥ ५१॥
पाणौतु पतिते तोये वामनोऽभूदवामनः।
सर्वदेवमयं रूपं दर्शयामास तत्क्षणात्॥ ५२॥
चन्द्रसूर्यौ च नयने द्यौ र्मूर्द्धा चरणौ क्षितिः।
पादाङ्गुल्यः पिशाचास्तु हस्ताङ्गुल्यश्च गुह्यकाः॥ ५३॥
विश्वेदेवाश्च जानुस्था जङ्घे साध्याः सुरोत्तमाः।
यक्षा नखेषु सम्भूता रेखास्वाप्सरसस्तथा॥ ५४॥
दृष्टी ऋक्षाण्यशेषाणि केशाः सूर्यांशवः प्रभोः।
तारकारोमकूपाणि रोमाणि च महर्षयः॥ ५५॥
बाहवो विदिशस्तस्य दिशः श्रोत्रे महात्मनः।
अश्विनौ श्रवणे तस्य नासा वायु र्महात्मनः॥ ५६॥
प्रसादश्चन्द्रमा देवो मनोधर्मः समाश्रितः।
सत्यं तस्याभवद्वाणी जिह्वा देवी सरस्वती॥ ५७॥
ग्रीवा दिति र्देवमाता विद्यास्तद्वलय स्तथा।
स्वर्गद्वारमभून्मैत्रं त्वष्टा पूषा च वै भ्रुवौ॥ ५८॥
मुखं वैश्वानरश्चास्य वृषणौ तु प्रजापतिः।
हृदयञ्च परं ब्रह्म पुंस्त्वं वै कश्यपो मुनिः॥ ५९॥

पृष्ठेऽस्य वसवो देवा मरुतः सर्वसन्धिषु ।
सर्वसूक्तानि दशना ज्योतींषि विमलप्रभाः ॥ ६० ॥
वक्षस्थले महादेवो धैर्ये चास्य महार्णवाः ।
उदरे चास्य गन्धर्वाः सम्भूताश्च महाबलाः ॥ ६१ ॥
लक्ष्मीर्मेधा धृतिः कान्तिः सर्वविद्याश्च वै कटिः ।
सर्वज्योतींषि जानीहि तस्य तत्परमं महः ॥ ६२ ॥
तस्य देवाधिदेवस्य तेजः प्रोद्भूत मुत्तमम् ।
स्तनौ कुक्षी च वेदाश्च उदरश्च महामखाः ॥ ६३ ॥
इष्टयः पशुबन्धाश्च द्विजानां चेष्टितानि च ।
तस्य देवमयं रूपं दृष्ट्वा विष्णो र्महाबलाः ॥ ६४ ॥
उपासर्पन्त दैत्येन्द्राः पतङ्गा इव पावकम् ।
प्रमथ्य सर्वानसुरान् पादहस्ततलै र्विभुः ॥ ६५ ॥
कृत्वा रूपं महाकायं जहाराशु स मेदिनीम् ।
तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे ॥ ६६ ॥
नाभौ विक्रममाणस्य सक्थिदेशस्थिता वुभौ ।
परं विक्रमतस्तस्य जानुमूले प्रभाकरौ ॥ ६७ ॥
विष्णोरास्तां महीपाल ! देवपालनकर्मणि ।
जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुङ्गवान् ॥ ६८ ॥
पुरन्दराय त्रैलोक्यं ददौ विष्णु र्जगत्पतिः ।
सुतलं नाम पातालमधस्ताद्वसुधातलात् ॥ ६९ ॥
बलेर्दत्तं भगवता विष्णुना प्रभविष्णुना ।
अथ दैत्येश्वरं प्राह विष्णुः सर्वेश्वरेश्वरः ॥ ७० ॥
यत् त्वया सलिलं दत्तं गृहीतं पाणिना मया ।
कल्पप्रमाणं तस्मात्ते भविष्यत्यायु रुत्तमम् ॥ ७१ ॥

वैवस्वते तथातीते बले! मन्वन्तरेऽथ।
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति॥ ७२॥
साम्प्रतं देवराजाय त्रैलोक्यं सकलं मया।
दत्तं चतुर्युगानाञ्च साधिका ह्येकसप्ततिः॥ ७३॥
नियन्तव्या मया सर्वे ये तस्य परिपन्थिनः।
तेनाहं परया भक्त्या पूर्वमाराधितो बले!॥७४॥
सुतलं नाम पातालं त्वमासाद्य मनोरमम्।
वसासुर! ममादेशं यथावत्परिपालयन्॥७५॥
तत्र दिव्यवनोपेते प्रासादशतसङ्कुले।
प्रोत्फुल्लपद्मसरसि स्वच्छशुद्ध सरिद्वरे॥७६॥
सुगन्धिधूपस्रग्वस्त्रवराभरणभूषितः।
स्रक्चन्दनादिमुदितो गेयनृत्यमनोरमे॥७७॥
पानान्नभोगान् विविधान् उपभुञ्ज महासुर!।
ममाज्ञयाकालमिमं तिष्ठ त्वं सततं वृतः॥७८॥
यावत्सुरैश्च विप्रैश्च न विरोधं करिष्यसि।
तावदेतान्महाभोगानवाप्स्यसि महासुर!॥७९॥
यदा च देवविप्राणां विरोधं त्वं करिष्यसि।
बन्धिष्यन्ति तदा पाशा वारुणास्त्वामसंशयम्॥८०॥
एतद्विदित्वा भवता मयाज्ञप्तमशेषतः।
न विरोधः सुरैः कार्य्यो विप्रैर्वा दैत्यसत्तम!॥८१॥
इत्येवमुक्तो देवेन विष्णुना प्रभविष्णुना।
बलिः प्राह महाराज! प्रणिपत्य मुदायुतः॥८२॥
बलिरुवाच। तत्रासतो मे पाताले भगवन्! भवदाज्ञया।
किं भविष्यत्युपादान मुपभोगोपपादकम्॥८३॥

श्रीभगवानुवाच। दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च।
हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥८४॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः।
फलानि तव दास्यन्ति अधीतान्यव्रतानि च ॥८५॥
शौनक उवाच। बलेर्वरमिमं दत्त्वा शक्राय त्रिदिवं तथा।
व्यापिना तेन रूपेण जगामादर्शनं हरिः ॥८६॥
प्रशशास यथा पूर्वमिन्द्रस्त्रैलोक्यपूजितः।
निषेवे च परान् कामान् बलिः पातालसंस्थितः ॥८७॥
इत्थैव देवदेवेन बद्धोऽसौ दानवोत्तमः।
देवानां कार्य्यकरणे भूयोऽपि जगति स्थितः ॥८८॥
सम्बन्धी ते महाभाग! द्वारकायां व्यवस्थितः।
दानवानां विनाशाय भारावतरणाय च ॥८९॥
यतो यदुकुले कृष्णो भवतः शत्रुनिग्रहे।
सहायभूतः सारथ्यं करिष्यति बलानुजः ॥९०॥
एतत्सर्वं समाख्यातं वामनस्य च धीमतः।
अवतारं महावीर! श्रोतुमिच्छोस्तवार्जुन! ॥९१॥
अर्जुन उवाच। श्रुतवानिह ते पृष्टं माहात्म्यं केशवस्य च।
गङ्गाद्वारमितो यास्याम्यनुज्ञां देहि मे विभो!।
एवमुक्त्वा ययौ पार्थो नैमिषं शौनकोगतः ॥९२॥
सूत उवाच। इत्येतद्देवदेवस्य विष्णोर्माहात्म्यमुत्तमम्।
वामनस्य पठेद्यस्तु सर्वपापैः प्रमुच्यते ॥ ९३ ॥
बलिप्रह्लादसंवादं मन्त्रितं बलिशुक्रयोः।
बलेर्विष्णोश्च कथितं यः स्मरिष्यति मानवः ॥९४॥
नाधयो व्याधयस्तस्य नच मोहाकुलं मनः।

भविष्यति कुरुश्रेष्ठ ! पुंसस्तस्य कदाचन ॥ ६५॥
च्युतराज्यो निजं राज्यमिष्टाप्तिश्च वियोगवान्।
अवाप्नोति महाभागो नरः श्रुत्वा कथामिमाम् ॥ ६६॥

---

अथ षड्चत्वारिंशदधिकद्विशततमोऽध्यायः।

अर्जुन उवाच। प्रादुर्भावान् पुराणेषु विष्णोरमिततेजसः।
सतां कथयतां विप्र वाराह इति नः श्रुतम् ॥ १॥
जाने न तस्य चरितं न विधिं नच विस्तरम्।
न कर्म्म गुणसंख्यानं न चाप्यन्तं मनीषिणः ॥ २ ॥
किमात्मको वराहोऽसौ किं मूर्त्तिः कास्य देवता।
किंप्रमाणः किंप्रभावः किं वा तेन पुरा कृतम् ॥ ३ ॥
एतन्मे शंस तत्वेन वाराहं श्रुतिविस्तरम्।
यथाहं च समेतानां द्विजातीनां विशेषतः ॥ ४ ॥

शौनक उवाच। एतत्ते कथयिष्यामि पुराणं ब्रह्मसम्मितम्।
महावराहचरितं कृष्णस्याद्भुतकर्म्मणः ॥ ५ ॥
यथा नारायणो राजन् ! वाराहं वपुरास्थितः।
दंष्ट्रयागां समुद्धृत्य मुञ्जहारारिमर्द्दनः ॥ ६ ॥
छन्दोगीभिरुदाराभिः श्रुतिभिः समलङ्कृतः।
मनः प्रसन्नतां कृत्वा निबोध विजयाधुना ॥ ७॥
इदं पुराणं परमं पुण्यं वेदैश्च सम्मितम्।
नानाश्रुतिसमायुक्तं नास्तिकाय न कीर्त्तयेत् ॥ ८ ॥
पुराणं वेदमखिलं साङ्ख्यं योगञ्च वेद यः।
कार्त्स्न्येन विधिना प्रोक्तं सौख्यार्थं वै वदिष्यति ॥ ९॥

विश्वेदेवास्तथा साध्या रुद्रादित्यास्तथाश्विनौ ।
प्रजानां पतयश्चैव सप्त चैव महर्षयः ॥ १० ॥
मनः सङ्कल्पजाश्चैव पूर्वजा ऋषयस्तथा ।
वसवो मरुतश्चैव गन्धर्व्वा यक्षराक्षसाः ॥ ११ ॥
दैत्याः पिशाचा नागाश्च भूतानि विविधानि च ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेच्छाश्च ये भुवि ॥१२॥
चतुष्पदानि सर्व्वाणि तिर्य्यग्योनिगतानि च ।
जङ्गमानि च सत्वानि यच्चान्यज्जीवसंज्ञितम् ।
पूर्णे युगसहस्रे तु ब्राह्मेऽहनि तथागते ।
निर्व्वाणे सर्वभूतानां सर्व्वोत्पातसमुद्भवे ॥ १४ ॥
हिरण्यरेतास्त्रिशिख स्ततो भूत्वा वृषाकपिः ।
शिखाभिर्विधमँल्लोका नशोषयत वह्निना ।
दह्यमानास्ततस्तस्य तेजोराशिभिरुन्नतैः ।
विवर्णवर्णा दग्धाङ्गा हतार्चिष्मच्छिराननैः ॥ १६ ॥
साङ्गोपनिषदो वेदा इतिहासपुरोगमाः ।
सर्वविद्याः क्रियाश्चैव सर्वधर्मपरायणाः ॥ १७ ॥
ब्रह्माणमग्रतः कृत्वा प्रभवं विश्वतोमुखम् ।
सर्वदेवगणाश्चैव त्रयस्त्रिंशत्तु कोटयः ॥ १८ ॥
तस्मिन्नहनि सम्प्राप्ते तं हंसं महदक्षरम् ।
प्रविशन्ति महात्मानं हरिं नारायणं प्रभुम् ॥ १९ ॥
तेषां भूयः प्रवृत्तानां निधनोत्पत्तिरुच्यते ।
यथा सूर्य्यस्य सतत मुदयास्तमने इह ॥ २० ॥
पूर्णे युगसहस्रान्ते सर्वे निःशेष उच्यते ।
यस्मिन् जीवकृतं सर्वं निःशेषं समतिष्ठत ॥ २१ ॥

संहृत्य लोकानखिलान् सदेवासुरमानुषान्।
कृत्वा सुसंस्थां भगवानास्त एको जगद्गुरुः॥ २२॥
स स्रष्टा सर्वभूतानां कल्पान्तेषु पुनः पुनः।
अव्ययः शाश्वतो देवो यस्य सर्वमिदं जगत्॥ २३॥
नष्टार्ककिरणो लोके चन्द्रग्रहविवर्जिते।
त्यक्तधूमाग्निपवने क्षीणयज्ञवषट्क्रिये॥ २४॥
अपक्षिगणसम्पाते सर्वप्राणिहरे पथि।
अमर्यादाकुले रौद्रे सर्वतस्तमसा वृते॥ २५॥
अदृश्ये सर्वलोकेऽस्मिन् अभावे सर्वकर्मणाम्।
प्रशान्ते सर्वसम्पाते नष्टे वैरपरिग्रहे॥ २६॥
गते स्वभावसंस्थाने लोके नारायणात्मके।
परमेष्ठी हृषीकेशः शयनायोपचक्रमे॥ २७॥
पीतवासा लोहिताक्षः कृष्णो जीमूतसन्निभः।
शिखासहस्रविकचजटाभारं समुद्वहन्॥ २८॥
श्रीवत्सलक्षणधरं रक्तचन्दनभूषितम्।
वक्षो बिभ्रन्महाबाहुः स विद्युदिव तोयदः॥ २९॥
पुण्डरीकसहस्रेण स्रगस्य शुशुभे शुभा।
पत्नी चास्य स्वयं लक्ष्मी र्देहमावृत्य तिष्ठति॥ ३०॥
ततः स्वपिति शान्तात्मा सर्वलोके शुभावहः।
किमप्यमितयोगात्मा निद्रायोगमुपागतः॥ ३१॥
ततो युगसहस्रे तु पूर्णे स पुरुषोत्तमः।
स्वयमेव विभूर्भूत्वा बुध्यते विबुधाधिपः॥ ३२॥
तत श्चिन्तयते भूयः सृष्टिं लोकस्य लोककृत्।

नरान् देवगणांश्चैव पारमेष्ठ्येन कर्मणा ॥ ३३ ॥
ततः सञ्चिन्तयन् कार्यं देवेषु समितिञ्जयः ।
सम्भवं सर्वलोकस्य विदधाति सतां गतिः ॥ ३४ ॥
कर्ता चैव विकर्ता च संहर्ता वै प्रजापतिः ।
नारायणः परं सत्यं नारायणः परं पदम् ॥ ३५ ॥
नारायणः परो यज्ञो नारायणः परा गतिः ।
स स्वयम्भूरिति ज्ञेयः स स्रष्टा भुवनाधिपः ॥ ३६ ॥
स सर्वमिति विज्ञेयो ह्येष यज्ञः प्रजापतिः ।
यद्वेदितव्यं त्रिदशैस्तदेष परिकीर्त्यते ॥ ३७ ॥
यत्तु वेद्यं भगवतो देवा अपि न तद्विदुः ।
प्रजानां पतयः सर्वे ऋषयश्च सहामरैः ॥ ३८ ॥
नास्यान्तमधिगच्छन्ति विचिन्वन्त इति श्रुतिः ।
यदस्य परमं रूपं न तत्पश्यन्ति देवताः ॥ ३९ ॥
प्रादुर्भावे तु यद्रूपन्तदर्चन्ति दिवौकसः ।
दर्शितं यदितनैव तदवेक्षन्ति देवताः ॥ ४० ॥
यन्न दर्शितवानेष कस्तदन्वेष्टुमीहते ।
ग्रामण्यां सर्वभूतानामग्निमारुतयोर्गतिः ॥ ४१ ॥
तेजसस्तपसश्चैव निधानममृतस्य च ।
चतुराश्रमधर्मेशश्चातुर्होत्रफलाशनः ॥ ४२ ॥
चतुःसागरपर्यन्तश्चतुर्युगनिवर्तकः ।
तदेष संहृत्य जगत्कृत्वा गर्भस्थमात्मनः ।
मुमोचाण्डं महायोगी धृतं वर्षसहस्रकम् ॥ ४३ ॥
सुरासुरद्विजभुजगाप्सरोगणै-
र्द्रुमौषधिक्षितिधरयक्षगुह्यकैः ।

प्रजापतिः श्रुतिभिर सङ्कुलं तदा
सवै सृजज्जगदिदमात्मना प्रभुः ॥ ४४ ॥

---

अथ सप्तचत्वारिंशदधिक द्विशततमोऽध्यायः।

शौनकउवाच। जगदण्ड मिदं पूर्व मासीद्दिव्यं हिरण्मयम्।
प्रजापतेरियं मूर्तिरितीयं वैदिकी श्रुतिः॥ १ ॥
तत्तु वर्षसहस्रान्ते विभेदोर्द्ध्वमुखं विभुः।
लोकसर्जनहेतोस्तु विभेदाधोमुखं नृप ! ॥ २ ॥
भूयोऽष्टधा विभेदाण्डं विष्णुर्वै लोकजन्मकृत्।
चकार जगतश्चात्र विभागं स विभागकृत्॥ ३ ॥
यच्छिद्र मूर्द्धमाकाशं विवराकृतितां गतम्।
विहितं विश्वयोगेन यदधस्तद्रसातलम्॥ ४ ॥
यदण्ड मकरोत्पूर्वं देवोलोकचिकीर्षया।
तत्र यत्सलिलं स्कन्नं सोऽभवत्काञ्चनो गिरिः॥ ५ ॥
शैलैः सहस्रै र्महती मेदिनी विषमाभवत्।
तैश्च पर्वतजालौघै र्बहुयोजनविस्तृतैः॥ ६ ॥
पीडिता गुरुभिर्देवी व्यथिता मेदिनी तदा।
महामते भूरिबलं दिव्यं नारायणात्मकम्॥ ७ ॥
हिरण्मयं समुत्सृज्य तेजो वै जातरूपिणम्।
अशक्ता वै धारयितु मधस्तात्प्राविशत्तदा॥ ८ ॥
पीड्यमाना भगवत स्तेजसा तस्य सा क्षितिः।
पृथ्वीं विशन्तीं दृष्ट्वातु तामधो मधुसूदनः॥ ९ ॥
उद्धारार्थं मनश्चक्रे तस्या वै हितकाम्यया॥ १० ॥

भगवानुवाच। मत्तेज एषा वसुधा समासाद्य तपस्विनी।
रसातलं प्रविशति पङ्के गौरिव दुर्बला॥ ११॥

पृथिव्युवाच।

त्रिविक्रमायामितविक्रमाय महावराहाय सुरोत्तमाय।
श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तुते देववर! प्रसीद॥१२
तव देहाज्जगज्जातं पुष्करद्वीप सुत्थितम्।
ब्रह्माणमिह लोकानां भूतानां शाश्वतं विदुः॥ १३॥
तव प्रसादाद्देवोऽयं दिवं भुङ्क्ते पुरन्दरः।
तव क्रोधाद्धि बलवान् जनार्दनजितोबलिः॥ १४॥
धाता विधाता संहर्ता त्वयि सर्वं प्रतिष्ठितम्।
मनुः कृतान्तोऽधिपतिर्ज्वलनः पवनोघनः॥ १५॥
वर्णाश्चाश्रमधर्माश्च सागरास्तरवो जलम्।
नद्यो धर्मश्च कामश्च यज्ञा यज्ञस्य च क्रिया॥ १६॥
विद्यावेद्यश्च सत्वञ्च ह्रीः श्रीः कीर्त्ति र्धृतिः क्षमा।
पुराणं वेदवेदाङ्गं सांख्ययोगौ भवाभवौ॥ १७॥
जङ्गमं स्थावरञ्चैव भविष्यञ्च भवच्च यत्।
सर्वन्तच्च त्रिलोकेषु प्रभावोपहितन्तव॥ १८॥
त्रिदशोदारफलदः स्वर्गस्त्रीचारुपल्लवः।
सर्वलोक मनःकान्तः सर्व सत्व मनोहरः॥ १९॥
विमानानेकविटपस्तोयदाम्बुमधुस्रवः।
दिव्यलोकमहास्कन्धसत्यलोकप्रशाखवान्॥ २०॥
सागराकारनिर्यासो रसातलजलाश्रयः।
नागेन्द्रपादपोपेतो जन्तुपक्षिनिषेवितः॥ २१॥
शीलाचारार्यगन्धस्त्वं सर्वलोकमयोद्रुमः।

द्वादशार्कमयद्वीपो रुद्रैकादशपत्तनः ॥ २२ ॥
वस्वष्टाचलसंयुक्तस्त्रैलोक्याम्भोमहोदधिः।
सिद्धसाध्योर्मिकलिलः सुपर्णानिलसेवितः ॥ २३ ॥
दैत्यलोकमहाग्राहो रक्षोरगझषाकुलः।
पितामहमहाधैर्यः स्वर्गस्त्रीरत्नभूषितः ॥ २४ ॥
धीश्रीह्रीकान्तिभि र्नित्यं नदीभि रुपशोभितः।
कालयोगमहापर्वप्रयागगतिवेगवान् ॥ २५ ॥
त्वं स्वयोगमहावीर्यो नारायणमहार्णवः।
कालोभूत्वा प्रसन्नाभिरद्भिर्ह्लादयसे पुनः ॥ २६ ॥
त्वया सृष्टा स्त्रयोलोकास्त्वयैव प्रतिसंहृताः।
विशन्ति योगिनः सर्वे त्वामेव प्रतियोजिताः ॥ २७ ॥
युगे युगे युगान्ताग्निः कालमेघो युगे युगे।
महाभारावताराय देव! त्वं हि युगे युगे ॥ २८ ॥
त्वं हि शुक्लः कृतयुगे त्रेतायां चम्पकप्रभः।
द्वापरे रक्तसङ्काशः कृष्णः कलियुगे भवान् ॥ २९ ॥
वैवर्ण्य मभिधत्से त्वं प्राप्तेषु युगसन्धिषु।
वैवर्ण्यं सर्वधर्माणा मुत्पादयसि वेदवित् ॥ ३० ॥
भासि वासि प्रतपसि त्वञ्च पासि विचेष्टसे।
क्रुध्यसि क्षान्ति मायासि त्वं दीपयसि वर्षसि ॥ ३१ ॥
त्वं हास्यसि न निर्यासि निर्वापयसि जाग्रसि।
निःशेषयसि भूतानि कालो भूत्वा युगक्षये ॥ ३२ ॥
शेषमात्मान मालोक्य विशेषयसि त्वं पुनः।
युगान्ताग्न्यवलीढेषु सर्वभूतेषु किञ्चन ॥ ३३ ॥
यातेषु शेषो भवसि तस्माच्छेषोऽसि कीर्तितः।

च्यवनोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु ॥ ३४ ॥
यस्मान्न च्यवसे स्थानात्तस्मात्सङ्कीर्त्यसेऽच्युतः ।
ब्रह्माणमिन्द्रञ्च यमं रुद्रं वरुणमेव च ॥ ३५ ॥
निगृह्य हरसे यस्मात्तस्माद्धरिरिहोच्यसे ।
सम्मानयसि भूतानि वपुषा यशसा श्रिया ॥ ३६ ॥
परेण वपुषा देव ! तस्माच्चासि सनातनः ।
यस्माद्ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ॥ ३७ ॥
न तेऽन्तं त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे ।
न क्षीयसे न क्षरसे कल्पकोटिशतैरपि ॥ ३८ ॥
तस्मात्त्वमक्षरत्वाच्च विष्णुरित्येव कीर्त्यसे ।
विष्टब्धं यत्त्वया सर्वं जगत् स्थावरजङ्गमम् ॥ ३९ ॥
जगद्विष्टम्भनाच्चैव विष्णुरेवेति कीर्त्यसे ।
विष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम् ॥ ४० ॥
यक्षगन्धर्वनगरं सुमहद्भूतपन्नगम् ।
व्याप्तं त्वयैव विशता त्रैलोक्यं सचराचरम् ॥ ४१ ॥
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ।
नारा इत्युच्यते ह्यापो ऋषिभिस्तत्त्वदर्शिभिः ॥ ४२ ॥
अयनन्तस्य ताः पूर्वं तेन नारायणः स्मृतः ।
युगे युगे प्रनष्टाङ्गां विष्णो ! विन्दसि तत्त्वतः ॥ ४३ ॥
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ।
हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ॥ ४४ ॥
ईशिता च त्वमेतेषां हृषीकेशस्तथोच्यते ।
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ॥ ४५ ॥
त्वं वा वससि भूतेषु वासुदेवस्तथोच्यसे ।

सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः॥ ४६॥
ततः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः।
प्रतिव्यूहेन तिष्ठन्ति सदेवासुरराक्षसाः॥ ४७॥
प्रविद्युः सर्वधर्माणां प्रद्युम्नस्तेन चोच्यसे।
निरोद्धा विद्यते यस्मान्न ते भूतेषु कश्चन॥ ४८॥
अनिरुद्धस्ततः प्रोक्तः पूर्वमेव महर्षिभिः।
यत्त्वया धार्यते विश्वं त्वया संह्रियते जगत्॥ ४९॥
त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च॥
यत्त्वया धार्यते किञ्चित् तेजसा च बलेन च॥ ५०॥
मया हि धार्यते पश्चान्नाधृतं धारये त्वया॥
न हि तद्विद्यते भूतं त्वया यन्नाव धार्यते॥ ५१॥
त्वमेव कुरुषे! देव! नारायण युगे युगे।
महाभारावतरणं जगतो हितकाम्यया॥ ५२॥
तवैव तेजसाक्रान्तां रसातलतलङ्गताम्।
त्रायस्व मां सुरश्रेष्ठ! त्वामेव शरणं गताम्॥ ५३॥
दानवैः पीड्यमानाहं राक्षसैश्च दुरात्मभिः।
त्वामेव शरणंनित्य मुपयामि सनातनम्॥ ५४॥
तावन्मेऽस्ति भयं देव! यावन्न त्वां ककुद्मिनम्।
शरणं यामि मनसा शतशोऽप्युपलक्षये॥ ५५॥
उपमानं न ते शक्ताः कर्तुं सेन्द्रा दिवौकसः।
तत्त्वं त्वमेव तद्वेत्सि निरुत्तरमतः परम्॥ ५६॥
शौनकउवाच। ततः प्रीतः स भगवान् पृथिव्यै शार्ङ्गचक्रधृक्।
काममस्या यथाकाम मभिपूरितवान् हरिः॥ ५७॥
अब्रवीच्च महादेवि! माधवीयं स्तवोत्तमम्।

धारयिष्यति यो मर्त्यो नास्ति तस्य पराभवः ॥ ५८ ॥
लोकान्विष्णुकषायांश्चैव वैष्णवान् प्रतिपद्यते ।
एतदाश्चर्यसर्वस्वं माधवीयं सवोत्तमम् ॥ ५९ ॥
अधीतवेदः पुरुषो मुनिः प्रीतमना भवेत् ॥ ६० ॥
श्रीभगवानुवाच । माभैर्धरणि ! कल्याणि ! शान्तिं व्रज ममाग्रतः।
एष त्वामुचितं स्थानं प्रापयामि मनीषितम् ॥ ६१ ॥
शौनक उवाच । ततो महात्मा मनसा दिव्यं रूपमचिन्तयत् ।
किन्नु रूपमहं कृत्वा उद्धरेयं धरामिमाम् ॥ ६२ ॥
जलक्रीड़ारुचिस्तस्माद्वाराहं वपुरास्थितः ॥
अदृश्यं सर्वभूतानां वाङ्मयं ब्रह्म संस्थितम् ॥ ६३ ॥
शतयोजनविस्तीर्णमुच्छ्रितं द्विगुणं ततः ।
नीलजीमूतसङ्काशं मेघस्तनितनिस्वनम् ॥ ६४ ॥
गिरिसंहननं भीमं श्वेततीक्ष्णाग्रदंष्ट्रिणाम् ।
विद्युदग्निप्रतीकाशमादित्यसमतेजसम् ॥ ६५ ॥
पीनोन्नतकटीदेशे वृषलक्षणपूजितम् ।
रूपमास्थाय विपुलं वाराहमजितो हरिः ॥ ६६ ॥
पृथिव्युद्धरणायैव प्रविवेश रसातलम् ।
वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः ॥ ६७ ॥
अग्निजिह्वो दर्भलोमा ब्रह्मशीर्षो महातपाः ।
अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः ॥ ६८ ॥
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ।
सत्यधर्ममयः श्रीमान् कर्मविक्रमसत्कृतः ॥ ६९ ॥
प्रायश्चित्तनखो घोरः पशुजानुर्मखाकृतिः ।
उद्गाथा होमलिङ्गोऽथ बीजौषधिमहाफलः ॥ ७० ॥

वाग्वन्तरात्मा यज्ञास्थिविकृतिः सोमशोणितः।
वेदस्कन्धो हविर्गन्धो हव्यकव्यविभागवान् ॥ ७१ ॥
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरन्वितः।
दक्षिणाहृदयो योगी महासत्रमयो महान् ॥ ७२ ॥
उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः।
नानाच्छन्दोगतिपथो गुह्योपनिषदासनः ॥ ७३ ॥
छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः।
रसातलतले मग्नां रसातलतलङ्गताम् ७४ ॥
प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार ताम्।
ततः स्वस्थानमानीय वराहः पृथिवीधरः ॥ ७५ ॥
मुमोच पूर्वं मनसा धारितां च वसुन्धराम्।
ततो जगाम निर्वाणं मेदिनी तस्य धारणात् ॥ ७६ ॥
चकार च नमस्कारं तस्मै देवाय शम्भवे।
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना ॥ ७७ ॥
उद्धृता पृथिवी देवी सागराम्बुगता पुरा।
अथोद्धृत्य क्षितिं देवो जगतः स्थापनेच्छया।
पृथिवीप्रविभागाय मनश्चक्रेऽम्बुजेक्षणः ॥ ७८ ॥

रसाङ्गतामवनिमचिन्त्यविक्रमः
सुरोत्तमः प्रवरवराहरूपधृक्।
वृषाकपिः प्रसभमथैकदंष्ट्रया-
समुद्धरद्धरणिमतुल्यपौरुषः ॥ ७९ ॥

अथाष्टचत्वारिंशदधिकद्विशततमोऽध्यायः।

ऋषय ऊचुः। नारायणस्य माहात्म्यं श्रुत्वा सूत ! यथाक्रमम्
न तृप्तिर्जायतेऽस्माकं मतः पुनरिहोच्यताम् ॥ १ ॥
कथं देवा गताः पूर्वं ममरत्वं विचक्षणाः।
तपसा कर्मणा वापि प्रसादात्कस्य तेजसा ॥ २ ॥
सूत उवाच। यत्र नारायणो देवो महादेवश्च शूलधृक्।
तत्रामरत्वे सर्वेषां सहायौ तत्रतौ स्मृतौ ॥ ३ ॥
पुरा देवासुरे युद्धे हताश्च शतशः सुरैः।
पुनः सञ्जीविनीं विद्यां प्रयोज्य भृगुनन्दनः ॥ ४ ॥
जीवापयति दैत्येन्द्रान् यथा सुप्तोत्थितानिव।
तस्य तुष्टेन देवेन शङ्करेण महात्मना ॥ ५ ॥
मृतसञ्जीविनी नाम विद्या दत्ता महाप्रभा।
तां तु माहेश्वरीं विद्यां महेश्वरमुखोद्गताम् ॥ ६ ॥
भार्गवे संस्थितां दृष्ट्वा मुमुदुः सर्वदानवाः।
ततोऽमरत्वं दैत्यानां कृतं शुक्रेण धीमता ॥ ७ ॥
या नास्ति सर्वलोकानां देवानां सर्वरक्षमाम्।
न नागाना मृषीणाञ्च न च ब्रह्मेन्द्र विष्णुषु ॥ ८ ॥
तां लब्ध्वा शङ्कराच्छुक्रः परां निर्वृतिमागतः।
ततो दैवासुरोघोरः समरः सुमहानभूत् ॥ ९ ॥
तत्र देवैर्हतान् दैत्यान् शुक्रोविद्याबलेन च।
उत्थापयति दैत्येन्द्रान् लीलयैव विचक्षणः ॥ १० ॥
एवंविधेन शक्रस्तु बृहस्पति रुदारधीः।
हन्यमाना स्ततो देवाः शतशोऽथ सहस्रशः ॥ ११ ॥
विषण्णवदनाः सर्वे बभूवुर्विकलेन्द्रियाः।

ततस्तेषु विषण्णेषु भगवान् कमलोद्भवः।
मेरुपृष्ठे सुरेन्द्राणा मिदमाह जगत्पतिः॥ १२॥

ब्रह्मोवाच। देवाः! शृणुत मद्वाक्यं तत्तथैव निरूप्यताम्
क्षिपतां दानवैः सार्द्धं सख्यमत्र प्रवर्त्तताम्॥ १३॥
क्रियताममृतोद्योगो मथ्यतां क्षीरवारिधिः।
सहायं वरुणं कृत्वा चक्रपाणि र्विबोध्यताम्॥ १४॥
मन्थानं मन्दरं कृत्वा शेषनेत्रेण वेष्टितम्।
दानवेन्द्रो बलिस्वामी लोककालं निवेश्यताम्॥ १५॥
प्रार्थ्यतां कूर्मरूपश्च पाताले विष्णुरव्ययः।
प्रार्थ्यतां मन्दरः शैलः मन्थकार्यं प्रवर्त्यताम्॥ १६॥
तच्छ्रुत्वा वचनं देवा जग्मुर्दानवमन्दिरम्।
अलं विरोधेन वयं भृत्यास्तव बले! ऽधुना॥ १७॥
क्रियता मममृतोद्योगो व्रीयतां शेषनेत्रकम्।
त्वया चोत्पादिते दैत्य! अमृतेऽमृतमन्थने॥ १७॥
भविष्यामो ऽमराः सर्वे त्वत्प्रसादान्न संशयः।
एवमुक्तस्तदा देवैः परितुष्टः स दानवः॥ १८॥
यथा वदत हे देवा! तथाकार्यं मयाधुना।
शक्तोऽहमेकएवात्र मथितुं क्षीरवारिधिम्॥ २०॥
आहरिष्येऽमृतं दिव्य ममृतत्वाय वोऽधुना।
सुदूरादाश्रयं प्राप्तान् प्रणतान पि वैरिणः॥ २१॥
यो न पूजयते भक्त्या प्रेत्य चेह विनश्यति।
पालयिष्यामि वः सर्वानधुना स्नेहमास्थितः॥ २२॥
एवमुक्त्वा स दैत्येन्द्रो देवैः सह ययौ तदा।
मन्दरं प्रार्थयामास सहायत्वे धराधरम्॥ २३॥

सखा भवत्व मत्कामधुनाद्य तमस्यने ।
सुरासुराणां सर्वेषां महत्कार्यं मिदं जगत् ॥ २४ ॥
तथेति मन्दरः प्राह यद्याधारो भवेन्मम ।
यत्र स्थित्वा भ्रमिष्यामि मथिष्ये वरुणालयम् ॥ २५
कल्प्यतां नेत्रकार्ये यः शक्तः स्याद्वेष्टने मम ।
ततस्तु निर्गतौ देवौ कूर्मशेषौ महाबलौ ॥ २६ ॥
विष्णोर्भागौ चतुर्थांशा दरण्या धारणे स्थितौ ।
ऊचतुर्गर्वसंयुक्तं वचनं शेषकच्छपौ ॥ २७ ॥
त्रैलोक्यधारणेनापि न ग्लानि र्मम जायते ।
किमुमन्दरकात् क्षुद्रात् घुटिकासन्निभादिह ॥ २८ ॥
शेषउवाच । ब्रह्माण्डवेष्टनेनापि ब्रह्माण्डमथनेन वा ।
न मे ग्लानि र्भवेद्देहे किमु मन्दरवर्तने ॥ २९ ॥
तत उत्पाट्य तं शैलं तत्क्षणात् क्षीरसागरे ।
चिक्षेप लीलया नागः कूर्मश्चाधः स्थित स्तदा ॥ ३० ॥
निराधारं यदा शैलं नशेकु र्देवदानवाः ।
मन्दरभ्रामणं कर्तुं क्षीरोदमथने तथा ॥ ३१ ॥
नारायणनिवासन्ते जग्मु र्बलिसमन्विताः ।
यत्रास्ते देवदेवेशः स्वयमेव जनार्दनः ॥ ३२ ॥
तत्रापश्यनृत तन्देवं सितपद्मप्रभं शुभम् ।
योगनिद्रासुनिरतं पीतवाससमच्युतम् ॥ ३३ ॥
हारकेयूरनद्धाङ्ग महिपर्यङ्कसंस्थितम् ।
पादपद्मेन पद्मायाः स्पृशन्तं नाभिमण्डलम् ॥ ३४ ॥
स्वपक्षव्यजनेनाथ वीज्यमानङ्गरुत्मता ।
स्तूयमानं समन्ताच्च सिद्धचारणकिन्नरैः ॥ ३५ ॥

आम्नाये सूक्तिर्मद्भिश्च स्तूयमानं समन्ततः।
सव्य बाहूपधानं तन्तुष्टुवु देव दानवाः॥ ३६॥
कृताञ्जलि पुटाः सर्व्वे प्रणताः सर्वतोदिशम्।

देवदानवा ऊचुः।

नमो लोक त्रयाध्यक्ष! तेजसामित भास्कर!॥ ३७॥
नमो विष्णो! नमो जिष्णो! नमस्ते कैटभार्द्दन!।
नमः सर्गक्रियाकर्त्रे जगत्पालयते नमः॥३८॥
रुद्ररूपाय शर्व्वाय नमः संहारकारिणे।
नमः शूलायुधाध्यक्ष नमो दानवघातिने॥ ३९॥
नमः क्रमत्रयाक्रान्त त्रैलोक्यायाभवाय च।
नमः प्रचण्डदैत्येन्द्रकुलकाल महानल!॥ ४०॥
नमोनाभिह्रदोद्भूतपद्मगर्भमहाचल!।
पद्मभूत! महाभूत! कर्त्रेहर्त्रे जगत्प्रिय!॥ ४१॥
जनिता सर्वलोकेश! क्रियाकारण कारिणे।
अमरारिविनाशाय महासमरशालिने॥ ४२॥
लक्ष्मीमुखाब्जमधुप! नमः कीर्तिनिवासिने।
अस्माकममरत्वाय ध्रियतां ध्रियतामयम्॥ ४३॥
मन्दरः सर्वशैलाना मयुतायुतविस्तृतः।
अनन्तबलबाहुभ्या मवष्टभ्यैकपाणिना॥ ४४॥
मथ्यताममृतं देव! स्वधास्वाहार्थकामिनाम्।
ततः श्रुत्वा स भगवान् स्तोत्र पूर्व्वं वचस्तदा।
विहाय योगनिद्रान्ता मुवाच मधुसूदनः॥ ४५॥
श्रीभगवानुवाच। स्वागतं विबुधाः! सर्वे किमागमन कारणम्।
यस्मात्कार्य्यादिह प्राप्ता स्तद्ब्रूतविगतज्वराः॥ ४६॥

नारायणेनैव मुक्ताः प्रोचुस्तत्र दिवौकसः ।
अमरत्वाय देवेश ! मथ्यमाने महोदधौ ॥४७॥
यथा ह्यमृतत्वं देवेश ! तथा नः कुरु माधव ! ।
त्वया विना न तच्छक्यं मस्माभिः कैटभार्दन ! ॥ ४८ ॥
प्राप्तुं तदमृतं नाथ ! ततोऽग्रे भवनो विभो ! ।
इत्युक्तश्च ततोविष्णुरप्रधृष्योऽरिमर्दनः ॥ ४९ ॥
जगाम देवैः सहितो यत्रासौ मन्दराचलः ।
वेष्टितो भोगिभोगेन धृतश्चामरदानवैः ॥ ५० ॥
विषभीतास्ततोदेवा यतः पुच्छं ततः स्थिताः ।
मुखतो दैत्यसङ्घास्तु सैंहिकेय पुरःसराः ॥ ५१ ॥
सहस्रवदनं चास्य शिरः सव्येन पाणिना ।
दक्षिणेन बलिर्देहं नागस्याकृष्टवांस्तथा ॥ ५२ ॥
दधाराम्रतमथ्यानं मन्दरं चारुकन्दरम् ।
नारायणः स भगवान् भुजयुग्मद्वयेन तु ॥ ५३ ॥
ततो देवासुरैः सर्वैं र्जयशब्दपुरःसरम् ।
दिव्यं वर्षशतं साग्रं मथितः क्षीरसागरः ॥ ५४ ॥
ततः श्रान्तास्तु ते सर्वे देवादैत्यपुरःसराः ।
श्रान्तेषु तेषु देवेन्द्रो मेघोभूत्वाम्बुशीकरान् ॥५५॥
ववर्षामृतकल्पांस्तान् ववौ वायुश्च शीतलः ।
भग्नप्रायेषु देवेषु शान्तेषु कमलासनः ॥ ५६ ॥
मथ्यतां मथ्यतां सिन्धु रित्युवाच पुनः पुनः ।
अवश्यमुद्योगवतां श्रीरपारा भवेत्सदा ॥ ५७ ॥
ब्रह्मप्रोत्साहितादेवा ममन्थुः पुनरम्बुधिम् ।
भ्राम्यमाणे ततः शैले योजनायुतशेखरे ॥ ५८ ॥

निपेतुर्हस्तियूथानि वराहशरभादयः।
श्वापदायुतलक्षाणि तथा पुष्पफलाद्रुमाः॥ ५८॥
ततः फलानां वीर्य्येण पुष्पौषधिरसेन च।
क्षीरसङ्घर्षणाच्चापि दधिरूपमजायत॥ ६०॥
ततस्तु सर्वजीवेषु चूर्णितेषु सहस्रशः।
तदस्वमेदसोत्सर्गाद्वारुणी समपद्यत॥ ६१॥
वारुणीगन्धमाघ्राय मुमुदुर्देवदानवाः।
तदास्वादेन बलिनो देवदैत्यादयोऽभवन्॥ ६२॥
ततोऽतिवेगाज्जगृहुर्नागेन्द्रं सर्वतोऽसुराः।
मन्थानं मन्थयष्टिस्तु मेरुस्तत्राचलो भवत्॥ ६३॥
अभवच्चाग्रतो विष्णुर्भुजमन्दरबन्धनः।
स वासुकि फणालग्नपाणिः कृष्णो व्यराजत॥ ६४॥
यथा नीलोत्पलैर्युक्तो ब्रह्मदण्डोऽतिविस्तरः।
ध्वनिर्मेघसहस्रस्य जलधे रुत्थितस्तदा॥ ६५॥
भागे द्वितीये मघवानादित्यस्तु ततः परम्।
ततो रुद्रा महोत्साहा वसवो गुह्यकादयः॥ ६६॥
पुरतो विप्रचित्तिश्च नमुचिर्वृत्रशम्बरौ।
द्विमूर्द्धा वज्रदंष्ट्रश्च सैंहिकेयो बलिस्तथा॥ ६७॥
एते चान्ये च बहवो मुखभागमुपस्थिताः।
ममन्थुरम्बुधिं हृष्टा बलतेजोविभूषिताः॥ ६८॥
बभूवात्र महाघोषो महामेघरवोपमः।
उदधेर्मथ्यमानस्य मन्दरेण सुरासुरैः॥ ६९॥
तत्र नानाजलचरा विनिर्धूता महाद्रिणा।
विलयं समुपाजग्मुः शतशोऽथ सहस्रशः॥ ७०॥

वारणानि च भूतानि विविधानि महेश्वरः ।
पातालतलवासीनि विलयं समुपानयत् ॥७१॥
तस्मिंश्च भ्राम्यमाणेऽद्रौ संघृष्टाश्च परस्परम् ।
न्यपतन् पतगोपेताः पर्वताग्रान्महाद्रुमाः ॥७२॥
तेषां सङ्घर्षणाच्चाग्निरर्चिभिः प्रज्वलन् मुहुः ।
विद्युद्भिरिव नीलाभ्रमावृणोन्मन्दरं गिरिम् ॥७३॥
ददाह कुञ्जरांश्चैव सिंहांश्चैव विनिःसृतान् ।
विगतासूनि सर्वाणि सत्वानि विविधानि च ॥७४॥
तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः ।
वारिणा मेघजेनेन्द्रः शमयामास सर्वतः । ७५ ॥
ततो नानारसास्तत्र सुस्रुवुः सागराम्भसि ।
महाद्रुमाणां निर्यासा बहवश्चौषधीरसाः ॥ ७६ ॥
तेषाममृतवीर्य्याणां रसानां पयसैव च ।
अमरत्वं सुरा जग्मुः काञ्चनच्छविसन्निभाः ॥ ७७ ॥
अथ तस्य समुद्रस्य तज्जातमुदकं पयः ।
रसान्तरैर्विमिश्रञ्च ततः क्षीरादभूद्घृतम् ॥ ७८ ॥
ततो ब्रह्माणमासीनं देवा वचनमब्रुवन् ।
श्रान्ताः स्म सुभृशं ब्रह्मन्नोद्भवत्यमृतञ्च यत् ॥ ७९ ॥
ऋते नारायणात्सर्वे दैत्या देवोत्तमास्तथा ।
चिरायितमिदञ्चापि सागरस्य तु मन्थनम् ॥ ८० ॥
ततो नारायणं देवं ब्रह्मा वचनमब्रवीत् ।
विधत्स्वैषां बलं विष्णो ! भवानेव परायणम् ॥ ८१ ॥
विष्णुरुवाच । बलं ददामि सर्वेषां कर्मैतद्ये समास्थिताः ।
क्षुभ्यतां क्रमशः सर्वैर्मन्दरः परिवर्त्यताम् ॥ ८२ ॥

ऊनपञ्चाशदधिकद्विशततमोऽध्यायः।

सूत उवाच। नारायणवचः श्रुत्वा बलिनस्तेमहोदधिम्।
तत्पयः सहिता भूत्वा चक्रिरेभृशमाकुलम्॥ १॥
ततः शतसहस्रांशु समान इव सागरात्।
प्रसन्नाभः समुत्पन्नः सोमः शीतांशुरुज्ज्वलः॥ २॥
श्रीरनन्तरमुत्पन्ना घृतात्पाण्डुरवासिनी।
सुरादेवीसमुत्पन्ना तुरगः पाण्डुरस्तथा॥ ३॥
कौस्तुभश्च मणिर्दिव्य उत्पन्नोऽमृतसम्भवः।
मरीचिविकचः श्रीमान् नारायण उरोगतः॥ ४॥
पारिजातश्च विकच कुसुमस्तवकाञ्चितः।
अनन्तरमपश्यंस्ते धूममम्बरसन्निभम्॥ ५॥
आपूरितदिशाभागं दुःसहं सर्वदेहिनाम्।
तमाघ्राय सुराः सर्वे मूर्च्छितापरिलङ्घिताः॥ ६॥
उपाविशन्नब्धितटे शिरः संगृह्य पाणिना।
ततः क्रमेण दुर्वारः सोऽनलः प्रत्यदृश्यत॥ ७॥
ज्वालामालाकुलाकारः समन्ताद्भीषणोऽर्चिषा।
तेनाग्निनापरिक्षिप्ताः प्रायशस्तु सुरासुराः॥ ८॥
दग्धाश्चाप्यर्द्धदग्धाश्च बभ्रमुः सकला दिशः।
प्रधाना देवदैत्याश्च भीषितास्तेन वह्निना॥ ९॥
अनन्तरं समुद्भूता स्तस्मात् कुण्डभजातयः।
कृष्णासर्पामहादंष्ट्रारक्ताश्च पवनाशनाः॥ १०॥
श्वेतपीतास्तथाचान्ये तथा गोनसजातयः।
मशकाभ्रमरादंशा मक्षिकाः शलभा स्तथा॥ ११॥
कर्णशल्याः कृकलासा अनेकाश्चैव बभ्रमुः।

प्राणिनो दंष्ट्रिणोरौद्रा स्तथा हि विषजातयः ॥ १२ ॥
शार्ङ्गहालाहलामुस्त वत्सकं गुरुभस्मगाः ।
नीलपत्रादयश्चान्ये शतशो वज्रभेदिनः ।
येषां गन्धेन दह्यन्ते गिरिशृङ्गाण्यपि द्रुतम् ॥१३॥
अनन्तरं नीलरसौघ भङ्गभिन्नाञ्जनाभं विषसंघसन्तम् ।
कायेन लोकान्तरपूरकेण केशैश्च वह्निप्रतिमैर्ज्वलद्भिः ॥ १४ ॥
सुवर्णमुक्ता फलभूषिताङ्गं किरीटिनं पीतदुकूलजुष्टम् ।
नीलोत्पलाभैः कुसुमैः कृतार्घं गर्जन्तमम्भोधरभीमवेगम् ॥१५॥
अद्रात्तुरम्भो निधिमध्यसंस्थं सविग्रहं देहि भयाश्रयन्तम् ।
विलोक्य तं भीषणमुग्रनेत्रं भूताश्च वित्रेसुरथापि सर्वे ॥१६॥
केचिद्विलो कैव गतास्त्वभावं निःसंज्ञतां चाप्यपरे प्रपन्नाः ।
वेमुर्मुखेभ्योऽपि च फेनमन्ये केचित्त्ववापुर्विषमामवस्थाम् ॥१७
श्वासेन तस्य निर्दग्धा ततोविष्णुन्द्रदानवा ।
दग्धाङ्गारनिभाजाता ये भूतादिव्यरूपिणः ॥
ततस्तु सम्भ्रमाद्विष्णु स्तमुवाच सुरात्मकम् ।१८॥
भगवानुवाच । को भवानन्तकप्रख्यः किमिच्छसि कुतोऽपि च ।
किं कृत्वा ते प्रियं जाये देवमाचक्ष्व मेऽखिलम् ॥ १९ ॥
तच्च तस्य वचः श्रुत्वा विष्णोः कालाग्निसन्निभः ।
उवाच कालकूटस्तु भिन्नदुन्दुभिनिस्वनः ॥२०॥
कालकूट उवाच । अहं हि कालकूटाख्यो विषोऽम्बुधिसमुद्भवः ।
यदा तीव्रतरामर्षैः परस्परवधैषिभिः ॥२१॥
सुरासुरैर्विमथितो दुग्धाम्भोनिधिरद्भुतः ।
सम्भूतोऽहं तदा सर्वान् हन्तुं देवान् सदानवान् ॥२२॥

सर्वानिह हनिष्यामि क्षणमात्रेण देहिनः।
मा मां ग्रसत वै सर्वे यात वा गिरिशान्तिकम् ॥२३॥
श्रुत्वैतद्वचनं तस्य ततोभीताः सुरासुराः।
ब्रह्मविष्णू पुरस्कृत्य गतास्ते शङ्करान्तिकम् ॥२४॥
निवेदितास्ततोद्वास्थैस्ते गणेशैः सुरासुराः।
अनुज्ञाताः शिवेनाथ विविशुर्गिरिशान्तिकम् ॥२५॥
मन्दरस्य गुहां हैमीं मुक्तामालाविभूषिताम्।
सुस्वच्छमणिसोपानां वैदूर्य्यस्तम्भमण्डिताम् ॥२६॥
तत्र देवासुरैः सर्वैर्जानुभिर्धरणीं गतैः।
ब्रह्माणमग्रतः कृत्वा इदं स्तोत्रमुदाहृतम् ॥ २७ ॥
देवदानवा ऊचुः। नमस्तुभ्यं विरूपाक्ष! सर्वतोऽनन्तचक्षुषे।
नमः पिनाकहस्ताय वज्रहस्ताय धन्विने ॥ २८ ॥
नमस्त्रिशूलहस्ताय दण्डहस्ताय धूर्जटे।
नमस्त्रैलोक्यनाथाय भूतग्रामशरीरिणे ॥२९॥
नमः सुरारिहन्त्रे च सोमाग्न्यर्काग्र्य चक्षुषे।
ब्रह्मणे चैव रुद्राय नमस्ते विष्णुरूपिणे ॥ ३० ॥
ब्रह्मणे वेदरूपाय नमस्ते देवरूपिणे।
साङ्ख्ययोगाय भूतानां नमस्ते शम्भवाय ते ॥ ३१ ॥
मन्मथाङ्गविनाशाय नमः कालक्षयङ्कर।
रंहसे देवदेवाय नमस्ते च सुरोत्तम! ॥ ३२ ॥
एकवीराय शर्वाय नमः पिङ्गकपर्दिने।
उमाभर्त्रे नमस्तुभ्यं यज्ञत्रिपुरघातिने ॥ ३३ ॥
शुद्धबोधप्रबुद्धाय मुक्तकैवल्यरूपिणे।

लोकत्रयविधात्रे च वरुणेन्द्राग्निरूपिणे ।
ऋग्यजुःसामवेदाय पुरुषायेश्वराय च ।
अग्र्यायचैवचोग्राय विप्रायश्रुति चक्षुषे ॥ ३५ ॥
रजसेचैवसत्त्वाय नमस्ते स्तिमितात्मने ।
अनित्यनित्यभावाय नमो नित्यचरात्मने ॥ ३६ ॥
व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः ।
भक्तानामार्तिनाशाय प्रियनारायणाय च ॥ ३७ ॥
उमाप्रियाय शर्वाय नन्दिवक्त्राञ्चिताय च ।
ऋतुमन्वन्तकल्पाय पक्षमासदिनात्मने ॥ ३८ ॥
नानारूपाय मुण्डाय वरूथपृथुदण्डिने ।
नमः कमलहस्ताय दिग्वासाय शिखण्डिने ॥ ३९ ॥
धन्विने रथिनेचैव यतये ब्रह्मचारिणे ।
इत्येवमादिचरितै स्तुतंतुभ्यं नमोनमः ॥ ४० ॥
एवं सुरासुरैस्त्वाशु स्तुतस्तोषमुपागतः ।
उवाच वाक्यं भीतानां स्मितान्वित शुभाक्षरम् ॥ ४१॥
श्रीशङ्करउवाच । किमर्थमागताब्रूत त्रासम्लान मुखाम्बुजाः ! ।
किंवाभीष्टं ददाम्यद्य कामं प्रब्रूतमाचिरम् ।
इत्युक्तास्तेतु देवेन प्रोचुस्तं स सुरासुराः ॥ ४२ ॥
सुरासुराऊचुः । अमृतार्थे महादेव ! मथ्यमानेमहोदधौ ।
विषमङ्गतमुद्भूतंलोकमं क्षयकारकम् ॥ ४३ ॥
स उवाचायसर्वेषां देवानां भयकारकः ।
सर्वान्वा भक्षयिष्यामि अथवा मापिवस्तथा ॥ ४४ ॥
तमशक्तावयं ग्रस्तुं सोऽस्मान् शक्तोबलोत्कटः ।
एषनिश्वासमात्रेण शतपर्व समद्युतिः ॥ ४५ ॥

विष्णुः कृष्णः कृतस्तेन यमश्च विषमात्मवान्।
मूर्च्छिताःपतिताश्चान्ये विप्रणाशङ्गताः परे ॥ ४६ ॥
अर्थोऽनर्थक्रियांयाति दुर्भगानां यथा विभो ! ।
दुर्बलानाञ्च सङ्कल्पो यथाभवति चापदि ॥ ४७ ॥
विषमेतत्समुद्भूतं तस्माद्दाहतकांक्षया।
अस्माद्भयान्मोचय त्वं गतिस्त्वञ्च परायणम् ॥ ४८ ॥
भक्तानुकम्पी भावज्ञो भुवनादीश्वरो विभुः।
यज्ञाग्रभुक् सर्वहविः सौम्यः सोमः स्मरान्तकृत् ॥४९॥
त्वमेकोनोगतिर्देव गीर्वाणगणशर्मकृत्।
रक्षास्मान् भक्तसङ्कल्पा द्विरूपाक्ष ! विषज्वरात् ॥ ५० ॥
तच्छ्रुत्वा भगवानाह भगनेत्रान्तकृद्भवः।
भक्षयिष्याम्यहं घोरं कालकूटं महाविषम् ॥ ५१ ॥
तथान्यदपि यत्कृत्यं कृच्छ्रसाध्यं सुरासुराः ! ।
तच्चापि साधयिष्यामि तिष्ठध्वं विगतज्वराः ॥ ५२ ॥
इत्युक्ताहृष्टरोमाणो बाष्पगद्गद कण्ठनः।
आनन्दाश्रु परीताक्षाः सनाथाइव मेनिरे।
सुराब्रह्मादयःसर्वे समाश्वस्ताः सुमानसाः ॥ ५३ ॥

ततोऽव्रजद्‌द्रुतगतिना ककुद्मिना-
हरोऽम्बरे पवनगतिर्जगत्पतिः।
प्रधावितैरसुरसुरेन्द्र नायकैः
स्ववाहनै र्विग्टहीत शुभ्रचामरैः।
पुरः सरैः सतु शुशुभे शुभाश्रयैः
शिवोवशीशिखि कपिशोर्ध्वजूटकः ॥ ५४ ॥
आसाद्य दुग्धसिन्धुं तं कालकूटं विषं यतः।

ततो देवीमहादेवो विलोक्य विषमं विषम् ॥ ५५ ॥
छायास्थानकमास्थाय सोऽपिबद्वामपाणिना ।
पीयमाने विषे तस्मिं स्ततोदेवाः महासुराः ॥ ५६ ॥
जगुश्च ननृतुश्चापि सिंहनादांश्च पुष्कलान् ।
चक्रुःशक्र मुखाद्याश्च हिरण्याक्षादयस्तथा ॥ ५७ ॥
स्तुवन्तश्चैव देवेशं प्रमन्नाश्चा भवं स्तदा ।
कण्ठदेशे ततःप्राप्ते विषेदेव मथाब्रुवन् ॥ ५७ ॥
विरिञ्चि प्रमुखादेवा बलिप्रमुखतोऽसुराः ।
शोभते देव ! कण्ठस्ते गात्रे कुन्दनिभप्रभे ॥ ५८ ॥
भृङ्गमालानिभंकण्ठेऽप्यत्रैवास्तु विषं तव ।
इत्युक्तःशङ्करोदेव स्तथाप्राह पुरान्तकृत् ॥ ६० ॥

पीतेविषेदेवगणान् विसृज्य-
गतोहरोमन्दर शैलमेव ।
तस्मिन् गते देवगणाः पुनस्तं-
ममन्थुरब्धिं विविध प्रकारैः ॥ ६१ ॥

---

अथ पञ्चाशदधिक द्विशततमोऽध्यायः ।

सूतउवाच । मथ्यमाने पुनस्तस्मिन् जलधौ समदृश्यत ।
धन्वन्तरिः स भगवान् आयुर्वेद प्रजापतिः ॥ १ ॥
मदिराचायताक्षी सा लोकचित्त प्रमाथिनी ।
ततोऽमृतञ्च सुरभिः सर्वभूत भयापहा ॥ २ ॥
जग्राह कमलां विष्णुः कौस्तुभञ्च महामणिम् ।
गजेन्द्रञ्च सहस्राक्षो हयरत्नञ्च भास्करः ॥ ३ ॥

धन्वन्तरिश्च जग्राह लोकारोग्य प्रवर्तकम्।
छत्रं जग्राह वरुणः कुण्डले च शचीपतिः॥ ४॥
पारिजाततरुं वायुं र्जग्राह मुदितस्तथा।
धन्वन्तरिस्ततोदेवो वपुष्मानुदतिष्ठत॥ ५॥
श्वेतंकमण्डलुं बिभ्र दमृतं यत्र तिष्ठति।
एतदत्यद्भुतंदृष्ट्वा दानवानां समुत्थितः॥ ६॥
अमृतार्थे महानादो ममेदमिति जल्पताम्।
ततो नारायणो माया मास्थितोमोहिनीं प्रभुः॥ ७॥
स्त्रीरूप मतुलंकृत्वा दानवा नभिसंश्रितः।
तत स्तदमृतं तस्यै ददुस्ते मूढचेतनाः।
स्त्रियैदानवदैतेयाः सर्वे तद्गतमानसाः॥ ८॥
अथास्त्राणि च मुख्यानि महाप्रहरणानि च।
प्रगृह्याभ्य द्रवन्देवान् सहिता दैत्यदानवाः॥ ९॥
तत स्तदमृतंदेवो विष्णु रादाय वीर्यवान्।
जहारदानवेन्द्रेभ्यो नरेण सहितः प्रभुः॥ १०॥
ततो देवगणाः सर्वे पपुस्तदमृतं तदा।
विष्णोः सकाशात् संप्राप्य संग्रामे तुमुलेसति॥ ११॥
ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितम्।
राहुर्विबुधरूपेण दानवोऽप्यपिबत्तदा॥ १२॥
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा।
आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया॥ १३॥
ततो भगवता तस्य शिरश्छिन्न मलंकृतम्।
चक्रायुधेन चक्रेण पिबतो ऽमृतमोजसा॥ १४॥
तच्छैलशृङ्गप्रतिमं दानवस्य शिरोमहत्।

चक्रेणोत्कृत्तमपतच्चालयन् वसुधातलम् ॥ १५ ॥
ततो वैरविनिर्बन्धः कृतोराहुमुखेन वै ।
शाश्वतश्चन्द्रसूर्याभ्यां प्रसह्याद्यापि बाधते ॥ १६ ॥
विहायभगवांश्चापि स्त्रीरूपमतुलं हरिः ।
नाना प्रहरणैर्भीमै र्दानवान् समकम्पयत् ॥ १७ ॥
प्रासाः सुविपुलास्तीक्ष्णाः पतन्तश्च सहस्रशः ।
ते सुराश्चक्रनिर्भिन्ना वमन्तोरुधिरं बहु ॥ १८ ॥
असिशक्ति गदाभिन्नानिपेतु धरणीतले ।
भिन्नानिपट्टिशैश्चापि शिरांसि युधि दारुणैः ॥ १९ ॥
तप्तकाञ्चनमाल्यानि निपेतुरनिशन्तदा ।
रुधिरेणावलिप्ताङ्गा निहताश्च महासुराः ॥ २० ॥
अद्रीणामिव कूटानि धातुरक्तानि शेरते ।
ततो हलहलाशब्दः सम्बभूव समन्ततः ॥ २१ ॥
अन्योऽन्यं च्छिन्दतांशस्त्रै रादित्ये लोहितायति ।
परिघैश्चायसैःपीतैः सन्निकर्षैश्च मुष्टिभिः ॥ २२ ॥
निघ्नतां समरेऽन्योऽन्यं शब्दोदिव मिवास्पृशत् ।
च्छिन्धिभिन्धि प्रधावेति पातयेभि सरेति वै ॥ २३ ॥
विश्रूयन्ते महाघोराः शब्दास्तत्र समन्ततः ।
एवं सुतुमुलेयुद्धे वर्त्तमाने महाभये ॥ २४ ॥
नरनारायणौदेवौ समाजग्मतुराहवम् ।
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
चिन्तयामासवैचक्रं विष्णुर्दानव सूदनम् ॥ २५ ॥
ततोऽम्बराच्चिन्तितमात्र मागतं
महाप्रभं चक्रममित्र नाशनम् ।

विभावसोस्तुल्य मकुण्ठमण्डलं·
सुदर्शनं भीममसह्य मुत्तमम् ॥ २६ ॥
तदागतं ज्वलितहुताशनप्रभं
भयङ्करं करिकरबाहुरच्युतः।
महाप्रभं दनुकुलदैत्य दारणं
तथोज्ज्वलज्ज्वलन समान विग्रहम् ॥ २७ ॥
मुमोच वै तपनमुद प्रवेगवान्
महाप्रभं रिपुनगरावदारणम्।
सम्वर्त्तकज्वलन समानवर्चसं
पुनः पुनर्न्यप तत वेगवत्तदा ॥ २८ ॥
व्यदारयद्दिति तनयान् सहस्रशः
करेरितं पुरुषवरेण संयुगे।
दहत् क्वचिज्ज्वलन इवानिलेरितं
प्रसह्य तान सुरगणान कृन्तत ॥ २८ ॥
प्रवेरितं वियतिमुहुः क्षितौ तदा-
पपौ रणे रुधिरमयः पिशाचवत्।
अथासुरागिरिभि रदीनमानसा
मुहुर्मुहुः सुरगणमर्दयं स्तथा ॥ ३० ॥
महाचला विगलित मेघवर्चसः
सहस्रशो गगन महाप्रपातिनः।
अथान्तराभरजनना: प्रपेदिरे-
सपादपा बहुविध मेघरूपिणः ॥३१॥
महाद्रयः प्रविगलिताग्रसानवः
परस्परं द्रुतमभिपत्य भास्वराः।
[ ८१ ]

ततो मही प्रचलित सादिकानना
महीधराः पवनहताः समन्ततः ॥ ३२ ॥
परस्परं भृशमभि गर्जितं मुहु-
रणाजिरे भृशमभि सम्प्रवर्त्तते ।
नरस्ततोवर कनकाग्रभूषणै
र्महेषुभिः पवनपथं समावृणोत् ॥ ३३ ॥
विदारयन् गिरिशिखराणि पत्रिभि-
र्महाभये सुरगणविग्रहे तदा ।
ततो महीं लवणजलञ्च सागरं
महासुराः प्रविविशुरर्दिताः सुरैः ॥ ३४ ॥
वियद्गतं ज्वलितहुताशनप्रभं
सुदर्शनं परिकुपितं निशाम्य च ।
ततः सुरैर्विजयमवाप्यमन्दरः
स्वमेव देशं गमितः सुपूजितः ॥ ३५ ॥
विनादयन् खदिशमुपेत्य सर्वश-
स्ततोगताः सलिलधरा यथा गतम् ।
ततोऽमृतं सुनिहितमेव चक्रिरे
सुराः परां मुदमभिगम्य पुष्कलाम् ।
ददुश्च तं निधिममृतस्य रक्षितुम्
किरीटिने बलिभिरथामरैः सह ॥३६॥

---

एकपञ्चाशदधिकद्विशततमोऽध्यायः ।

ऋषय ऊचुः । प्रासादभवनादीनां निवेशं विस्तराद्वद ।

कुर्य्यात्तेन विधानेन कश्चवास्तु कदाहृतः ॥ १ ॥

सूत उवाच। भृगुरत्रिर्वशिष्ठश्च विश्वकर्मामय स्तथा।

नारदोनग्नजिच्चैव विशालाक्षः पुरन्दरः ॥ २ ॥

ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च।

वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥ ३ ॥

अष्टादशैते विख्याता वास्तु शास्त्रोपदेशकाः।

सङ्क्षेपेणोपदिष्टन्तु मनवे मत्स्य रूपिणा ॥ ४ ॥

तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्।

पुरान्धकवधेघोरे घोररूपस्य शूलिनः ॥ ५ ॥

ललाटस्वेदसलिल मपतद्भुविभीषणम्।

करालवदनं तस्मात् भूतमुद्भूत मुल्वणम् ॥ ६ ॥

ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम्।

ततोऽन्धकानां रुधिर मपिवत्पतितं क्षितौ ॥ ७ ॥

तेन तत्समरे सर्वं पतितं यन्महीतले।

तथापि तृप्तिमगमन्न तद्भूतं यदा तदा ॥ ८ ॥

सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम्।

क्षुधाविष्टन्तु तद्भूतमाहर्तुं जगतीत्रयम् ॥ ९ ॥

ततः कालेन सन्तुष्टो भैरवस्तस्य चाहवे।

वरं वृणीष्वभद्रन्ते ! यदभीष्टन्तवानघ ! ॥ १० ॥

तमुवाच ततोभूतं त्रैलोक्यग्रसनक्षमम्।

भवामि देवदेवेश तथेत्युक्तश्च शूलिना ॥ ११ ॥

ततस्तत्त्रिदिवं सर्वं भूमण्डलमशेषतः।

स्वदेहेनान्तरिक्षञ्च रुन्धानं प्रपतद्भुवि ॥ १२ ॥

भीतभीतैस्ततोदेवै ब्रह्मणा चाथ शूलिना।

दानवासुररक्षोभि रवष्टब्धं समन्ततः ॥ १३ ॥
येन यत्रैव चाक्रान्तं स तत्रैवावसत्पुनः ।
निवासात्सर्वदेवानां वास्तुरित्यभिधीयते ॥ १४ ॥
अवष्टब्धाश्च तेनापि विज्ञप्ताः सर्वदेवताः ।
प्रसीदध्वं सुराः सर्वे युष्माभिर्निश्चलीकृतः ॥ १५ ॥
स्थास्याम्यहं किमाकारो ह्यवष्टब्धोऽह्यधोमुखः ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥१६॥
आहारो वैश्वदेवान्ते नूनमस्मिन्भविष्यति ।
वास्तुपूजामकुर्वाणस्तवाहारो भविष्यति ॥ १७ ।
अज्ञानात्तु कृतोयज्ञस्तवाहारो भविष्यति ।
यज्ञोत्सवादौ च बलिस्तवाहारो भविष्यति ॥१८॥
एवमुक्तस्ततोहृष्टः सवास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात्ततः प्रभृतिशान्तये ॥ १९ ॥

---

अथ द्विपञ्चाशदधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथा कालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥ १ ॥
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धेनुरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥ २ ॥
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभन्तु हानिं भाद्रपदे तथा ॥ ३ ॥
पत्नीनाशोऽश्विने विन्द्यात्कार्तिके धनधान्यकम् ।
मार्गशीर्षे तथाभक्तं पौषे तस्करतो भयम् ॥ ४ ॥

लाभश्च बहुशो विन्द्यात् अग्निं माघेविनिर्दिशेत्।
फाल्गुने काञ्चनं पुत्त्रानितिकालबलं स्मृतम् ॥ ५ ॥
अश्विनीरोहिणीमूलं उत्तरात्रयमैन्दवम्।
स्वातीहस्तोऽनुराधा च गृहारम्भे प्रशस्यते ॥ ६ ॥
आदित्यभौमवर्ज्यास्तु सर्ववाराः शुभावहाः।
वर्ज्यं व्याघातशूले च व्यतीपातातिगण्डयोः ॥७॥
विष्कम्भगण्डपरिघ वज्रयोगेषु कारयेत्।
श्वेतमैत्रेऽथमाहेन्द्रे गान्धर्वाभिजिति रौहिणे ॥८॥
तथा वैराजसावित्रे मुहूर्ते गृहमारभेत्।
चन्द्रादित्य बलं लब्ध्वा शुभलग्नं निरीक्षयेत् ॥ ९ ॥
स्तम्भोच्छ्रायादिकर्त्तव्य मन्यत्तु परिवर्जयेत्।
प्रासादेष्वेवमेवं स्यात् कूपवापीषु चैव हि ॥ १० ॥
पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्।
श्वेतारक्ता तथापीता कृष्णाचैवानुपूर्वशः।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम्।
विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु ॥ ११ ॥
तिक्ताकषाया च तथा वैश्य शूद्रेषु शस्यते।
अरत्निमात्रे वैगर्त्ते स्वनुलिप्ते च सर्वशः ॥ १२ ॥
घृतमामशरावस्थं कृत्वावर्त्तिचतुष्टयम्।
ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम् ॥१४॥
दीप्तौपूर्वादिगृह्णीयाद्वर्णानामनुपूर्वशः।
वास्तुः सामूहिकोनाम दीप्यते सर्वतस्तुयः ॥ १५ ॥
शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च।

अधिकेश्रियमाप्नोति न्यूनेहानिं समे समम्।
फालकृष्टेऽथवादेशे सर्व्वबीजानि वापयेत्॥ १७॥
त्रिपञ्चसप्तरात्रे च यत्रारोहन्ति तान्यपि।
ज्येष्ठोत्तमाकनिष्ठाभूर्व्वर्जनीयतरासदा॥ १८॥
पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत्।
एकाशीति पदं कृत्वा रेखाभिः कनकेन च॥ १९॥
पश्चात्पिष्टेनचालिप्य सूत्रेणालोड्य सर्व्वतः।
दशपूर्व्वायतालेखा दशचैवोत्तरायताः॥ २०॥
सर्व्ववास्तु विभागेषु विज्ञेया नवका नव।
एकाशीति पदं कृत्वा वास्तुवित्सर्व्ववास्तुषु॥ २१॥
पदस्थान् पूजयेद्देवां स्त्रिंशत्पञ्चदशैव तु।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश॥२२॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत।
ईशानकोणादिषु तान् पूजयेद्धविषानरः॥ २३॥
शिखीचैवाथपर्ज्जन्यो जयन्तः कुलिशायुधः।
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च॥ २४॥
पूषा च वितथश्चैव गृहचतयमावुभौ।
गन्धर्वो भृङ्गराजश्च मृगः पितृगणास्तथा॥ २५॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः।
असुरः शोषपापौ च रोगो हि मुख्य एव च॥ २६॥
भल्लाटः सोमसर्पौ च अदितिश्चदिति स्तथा।
वहिर्द्वात्रिंशदेते तु तदन्तस्तु ततः शृणु॥ २७॥
ईशानादिचतुष्कोणा संस्थितान् पूजयेद्बुधः।
आपश्चैवाथसावित्री जयोरुद्रस्तथैव च॥ २८॥

मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान्।
साध्यानेकान्तरान् विद्यात् पूर्वाद्यान्नामतः शृणु ॥२९॥
अर्य्यमा सविताचैव विवस्वान् विबुधाधिपः।
मित्रोऽथराजयक्ष्मा च तथा पृथ्वीधरः स्मृतः॥ ३०॥
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृतः।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा॥ ३१॥
पदिकानान्तु वर्गोऽयमेवं कोणेष्वशेषतः।
तन्मध्ये तु बहिर्विंश द्विपदास्ते तु सर्वशः॥ ३२॥
अर्य्यमाच विवस्वांश्च मित्रः पृथ्वीधरस्तथा।
ब्रह्मणः परितोदिक्षु त्रिपदास्ते तु सर्वशः॥ ३३॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक्।
वायुं यावत्तथारोगात् पितृभ्यः शिखिनं पुनः ॥३४॥
मुख्यात्भृशं तथा शोषाद्वितथं यावदेव तु।
सुग्रीवाददितिं यावत् मृगात् पर्जन्यमेव च ॥३५॥
एतेवंशाः समाख्याताः क्वचिच्च जयमेव तु।
एतेषां यस्तुसम्पातः पदं मध्यं समं तथा॥ ३६॥
मर्मचैतत्समाख्यातं त्रिशूलं कोणगञ्च यत्।
स्तम्भं न्यासेषु वर्ज्यानि तुलाविधिषु सर्वदा॥ ३७॥
कीलोच्छिष्टोपघातादि वर्जयेद्‌ यत्नतो जनः।
सर्वत्र वास्तुर्निर्दिष्टो पितृवैश्वानरायतः॥ ३८॥
मूर्द्ध्न्यग्निः समादिष्टो मुखेचापः समाश्रितः।
पृथ्वीधरोऽर्यमाचैव स्तनयोस्तावधिष्ठितौ॥ ३९॥
वक्षस्थले चापवत्सः पूजनीयः सदा बुधैः।
नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदिति जयन्तकौ॥ ४०॥

सर्पेन्द्रावंस संस्थौतु पूजनीयौ प्रयत्नतः।
सूर्य सोमादय स्तद्वत् बाह्वोः पञ्च च पञ्च च ॥ ४१ ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ।
सावित्रः सविता तद्वद्धस्तं दक्षिण मास्थितौ ॥४२॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ।
पूषाच पापयक्ष्मा च हस्तयो र्मणिबन्धने ॥ ४३ ॥
तथैवा सुरशोषौ च वामपार्श्वं समाश्रितौ।
पार्श्वेतु दक्षिणे तद्वत् वितथः सगृहक्षतः ॥ ४४ ॥
ऊर्वोर्यमांबुपौक्षियौ जान्वोर्गन्धर्व पुष्पकौ।
जङ्घयो र्भृंग सुग्रीवौस्फि क्स्थौ दौवारिको मृगः ।४५
जंय शक्रौ तथा मेढ्रे पादयोः पितरस्तथा।
मध्ये नव पदे ब्रह्माहृदये स तु पूज्यते ॥ ४६ ॥
चतुःषष्टि पदोवास्तुः प्रासादे ब्रह्मणास्मृतः।
ब्रह्मा चतुष्पद स्तत्र कोणेष्वर्ध पदास्तथा ॥ ४७ ॥
बहिः, कोणेषु वास्तौतु सार्धाश्चो भयसंस्थिताः।
विंशति द्विपदाश्चैव चतुःषष्टि पदे स्मृताः ॥ ४८ ॥
गृहारम्भेषु कण्डूतिः स्वाम्यङ्गे यत्र जायते।
शल्यं त्वपनयेत्तत्र प्रासादे भवने तथा ॥ ४९ ॥
सशल्यं भयदं यस्माद् शल्यं शुभदायकम्।
हीनाधिकांगता वास्तो सर्वथा तु विवर्जयेत् ॥ ५० ॥
नगर ग्रामदेशेषु सर्वत्रैवं विवर्जयेत्।
चतुःशालं त्रिशालञ्च द्विशालं चैकशालकम्।
नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥ ५१ ॥

---

## अथ त्रिपञ्चाशदधिक द्विशततमोऽध्यायः।

सूतउवाच। चतुःशालं प्रवक्ष्यामि स्वरूपन्नामतस्तथा।
चतुःशालन्तु द्वारैरलिन्दैः सर्वतोमुखम्॥ १॥
नाम्ना तत् सर्वतोभद्रं शुभं देवनृपालये।
पश्चिमद्वारहीनञ्च नन्द्यावर्तः प्रचक्षते॥ २॥
दक्षिणद्वारहीनन्तु वर्द्धमान मुपाहृतम्।
पूर्वद्वारविहीनं तत् स्वस्तिकं नाम विश्रुतम्॥ ३॥
रुचकंचोत्तरद्वार विहीनं तत्प्रचक्षते।
सौम्यशालाविहीनं यत्त्रिशालं धान्यकञ्च तत्॥ ४॥
क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम्।
शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम्॥ ५॥
धन्यं यशस्य मायुष्यं शोकमोह विनाशनम्।
शालया याम्यया हीनं यद्विशालं तु शालया॥ ६॥
कुलक्षयकरं नृणां सर्वव्याधि विनाशनम्।
हीनं पश्चिमया यत्तु पक्षघ्नं नामतत्पुनः॥ ७॥
मित्र बन्धून् सुतान् हन्ति तथा सर्व भयापहम्।
याम्यापराभ्यां शालाभ्यां धनधान्य फलप्रदम्॥ ८॥
क्षेमवृद्धिकरं नृणां तथापुत्र फलप्रदम्।
यम सूर्यञ्च विज्ञेयं पश्चिमोत्तर शालिकम्॥ ९॥
राजाग्निभयदं नृणां कुलक्षयरं च यत्।
उदक्पूर्वे तु शालेहं दण्डाख्ये यत्र तद्भवेत्॥ १०॥
अकालमृत्युभयदं परचक्र भयावहम्।
धनाख्यं पूर्वयाम्याभ्यां शालाभ्यां यद्विशालकम्॥ ११॥

तच्चक्रमभयदं नृणां पराभव भयावहम्।
चुल्लीपूर्वा पराभ्यां तु साभवेन्मृत्यु सूचनी ॥ १२ ॥
वैधव्यदायकं स्त्रोणा मनेक भयकारकम्।
कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् ॥ १३ ॥
सिद्धार्थवज्र वर्ज्याणि विशालानि सदाबुधैः।
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ॥ १४ ॥
पञ्चप्रकारं तत्प्रोक्त मुत्तमादि विभेदतः।
अष्टोत्तरं हस्तशतं विस्तरश्चोत्तमोमतः ॥ १५ ॥
चतुर्ष्वन्येषु विस्तारो हीयतेचाष्टभिः करैः।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ १६ ॥
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम्।
षड्भिः षड्भिस्तथाशीति हीयते तत्र विस्तरात् ॥१७॥
त्र्यंशेन चाधिकंदैर्घ्यं पञ्चस्वपि निगद्यते।
सेनापतेः प्रवक्ष्यामि तथा भवन पञ्चकम् ॥ १८ ॥
चतुःषष्टिस्तुविस्तारात् षड्भिः षड्भिस्तु ही यते।
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ १९ ॥
मन्त्रिणामथ वक्ष्यामि तथा भवन पञ्चकम्।
चतुश्चतुर्भिर्हीनास्यात् करषष्टि प्रविस्तरे ॥ २० ॥
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते।
सामन्तामात्यलोकानां वक्ष्ये भवन पञ्चकम् ॥ २१ ॥
चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात्।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते ॥ २२ ॥
शिल्पिनां कञ्चुकीनाञ्च वेश्यानां गृहपञ्चकम्।
अष्टाविंशत् कराणान्तु विहीनं विस्तरे क्रमात् ॥ २३ ॥

द्विगुणां दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तत्।
दूतीकर्मान्तिकादीनां वक्ष्ये भवन पञ्चकम्॥ २४॥
चतुर्थांशाधिकंदैर्घ्यं विस्तारोद्दादशैव तु।
अर्धार्धकरहानिःस्या द्विस्तारात्षष्ठशः क्रमात्॥२५॥
दैवज्ञ गुरुवैद्यानां सभास्तार पुरोधसाम्।
तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम्॥ २६॥
चत्वारिंशच्चतुविस्ताराच्चतु भिर्हीयते क्रमात्।
पञ्चस्वेतेषु दैर्घ्यं स्व षड्भागे नाधिकं भवेत्॥ २७॥
चतुर्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम्।
द्वात्रिंशतिकराणान्तु चतुर्भिर्हीयते क्रमात्॥ २८॥
आषोड़शादितिपरं नूनमन्तेवसायिनाम्।
दशांशेनाष्टभागेन त्रिभागेनाथ पादिकम्॥ २९॥
अधिकंदैर्घ्यमित्याहु र्ब्राह्मणादेः प्रशस्यते।
सेनापते नृपस्यापि गृहयोरन्तरेण तु॥ ३०॥
नृपवासगृहंकार्यं भाण्डागारन्तथैव च॥ ३०॥
सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरे।
वासाय च गृहंकार्यं राजपूज्येषु सर्वदा॥ ३१॥
अन्तरप्रभवानाञ्च स्व पितु र्गृहमिष्यते।
तथा हस्तशतादर्द्धं गदितं वनवासिनाम्॥ ३२॥
सेनापतेर्नृपस्यापि सप्तत्यासहितेऽन्विते।
चतुर्दश हृतेव्यासे शालाव्यासः प्रकीर्तितः॥ ३३॥
पञ्चत्रिंशान्विते तस्मिन्न लिन्दः समुदाहृतः।
तथा षट्त्रिंशद्धस्ता तु सप्ताङ्गुल समन्विता॥ ३४॥
विप्रस्य महती शाला न दैर्घ्यं परतोभवेत्।

दशाङ्गुलाधिका तद्वत् क्षत्रियस्य न विद्यते ॥ ३५ ॥
पञ्चत्रिंशत्करावैश्ये अङ्गुलानि त्रयोदश ।
तावत्करैव शूद्रस्य युतापञ्च दशाङ्गुलैः ॥ ३६ ॥
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत् ।
सोष्णीषंनाम तद्वास्तु पश्चाच्छ्रयो च्छ्रयं भवेत् ॥ ३७ ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते ।
समन्ताद्वीथिकायत्र सुस्थितं तदिहोच्यते ॥ ३८ ॥
शुभदंसर्वमेतत्स्या च्चातुर्वर्ण्ये चतुर्विधम् ।
विस्तरात् षोड़शोभाग स्तथाहस्त चतुष्टयम् ॥ ३९ ॥
प्रथमोभूमिकोच्छ्राय उपरिष्टात्प्रहीयते ।
द्वादशांशेनसर्वासु भूमिकासु तथोच्छ्रयः ॥ ४० ॥
पक्वेष्टकाभवेद्भित्तिः षोड़शांशेन विस्तरात् ।
दारवैरपिकल्पास्या तथामृन्मय भित्तिका ॥ ४१ ॥
गर्भमानेन मानन्तु सर्ववास्तुषु शस्यते ।
गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः ॥ ४२ ॥
संयुतोद्वारविष्कम्भो द्विगुणश्चोच्छ्रयोभवेत् ।
द्वारशाखा सुवाऽङ्गल्य मुच्छ्राय करसम्मितैः ॥ ४३ ॥
अङ्गुलैः सर्वयास्तूनां पृथुत्वं शस्यतेबुधैः ।
उदुम्बरोत्तमाङ्गञ्च तदर्धार्धं प्रविस्तरात् ॥ ४४ ॥

---

अथ चतुपञ्चाशदधिक द्विशततमोऽध्यायः ।

सूतउवाच । अथातः संप्रवक्ष्यामि स्तम्भमान विनिर्णयम् ।
कृत्वास्वभुवनोच्छ्रायं सदा सप्त गुणं बुधैः ॥ १ ॥

अशीत्यंशः पृथुत्वं स्यादग्रेणावगुणैः सह ।
रुचकश्चतुरःस्यात्तु अष्टाश्रो वज्र उच्यते ॥ २ ॥
द्विवज्रःषोड़शास्रस्तु द्वात्रिंशास्रः प्रलीनकः ।
मध्यप्रदेशे यस्तम्भो वृत्तोवृत्त इति स्मृतः ॥ ३ ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु ।
पद्मवल्लीलताकुम्भ पत्रदर्पण रूपिताः ॥ ४ ॥
स्तम्भस्य नवमांशेन पद्मकुम्भान्तराणि तु ।
स्तम्भतुल्या तुला प्रोक्ता हीना चोपतुला ततः ॥ ५ ॥
त्रिभागेनेह सर्वत्र चतुर्भागेन वा पुनः ।
हीनं हीनं चतुर्थांशात् तथासर्वासु भूमिषु ॥ ६ ॥
वासगेहानि सर्वेषां प्रवेशे दक्षिणेन तु ।
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु ॥ ७ ॥
पूर्वेणेन्द्रं जयन्तञ्च द्वारं सर्वत्रशस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ॥ ८ ॥
पश्चिमेपुष्पदन्तं च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यं तु शुभदम्भवेत् ॥ ९ ॥
तथावास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत् ।
द्वारे तु रथ्याविद्धे भवेत् सर्वकुलक्षयः ॥ १० ॥
तरुणाद्वेषबाहुल्यं शोकःपङ्केन जायते ।
अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा ॥ ११ ॥
व्यथाप्रस्रवणेन स्यात्कीलेनाग्नि भयं भवेत् ।
विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतं भवेत् ॥ १२ ॥
गृहभर्तुर्विनाशःस्यात् गृहेण च गृहे कृते ।

अमेध्यावस्करैर्विद्धे गृहिणी बन्धकी भवेत् ॥ १३ ॥
तथा शस्त्रमयं विन्द्यादन्त्यजस्य गृहेण तु ।
उच्छ्राया द्विगुणां भूमिं त्यक्त्वा वेधो न जायते ॥ १४ ॥
स्वयमुत्पाटिते द्वारे उन्मादो गृहवासिनाम् ।
स्वयं वापिहिते विद्यात् कुलनाशं विचक्षणः ॥१५॥
मानाधिके राजभयं न्यूने तस्करतो भवेत् ।
द्वारोपरि च यद्द्वारं तदन्तकमुखं स्मृतम् ॥ १६ ॥
अध्वनोमध्यदेशे तु अधिको यस्य विस्तरः ।
वज्रन्तु सङ्कटं मध्ये सद्योभर्तुर्विनाशनम् ॥ १७ ॥
तथान्यपीड़ितं द्वारं बहुदोषकरं भवेत् ।
मूलद्वारात्तथान्यत्तु नाधिकं शोभनं भवेत् ।
कुम्भश्रीपर्णिवल्लीभि र्मूलद्वारन्तु शोभयेत् ।
पूजयेच्चापि तन्नित्यं बलिनाचाक्षतोदकैः ॥१८॥
भवनस्य वटः पूर्वे दिग्भागे सर्वकामिकः ।
उदुम्बरस्तथा याम्ये वारुण्यां पिप्पलः शुभः ॥२०॥
प्लक्षः स्योत्तरतोधन्यो विपरीतास्त्वसिद्धये ।
कण्टकीक्षीरवृक्षश्च आसनः सफलोद्रुमः ॥२१॥
भार्य्याहानौ प्रजाहानौ भवेतां क्रमशस्तदा ।
नच्छिन्द्यात्यदितानन्यानन्तरे स्थापयेच्छुभान् ॥ २२ ॥
पुन्नागाशोकबकुल शमीतिलकचम्पकान् ।
दाड़िमीपिप्पलीद्राक्षा तथा कुसुममण्डपान् ॥२३॥

जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोज शतपत्रिकमल्लिकाभिः ।

यन्नालिकेरकदलीदलपाटलाभि-
र्युक्तं तदत्र भवनं श्रियमातनोति ॥ २४ ॥

---

अथ पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ।

सूत उवाच । उदगादिप्लवं वास्तु समानशिखरं तथा ।
परीक्ष्य पूर्ववत्कुर्य्यात्स्तम्भोच्छ्रायं विचक्षणः ॥ १ ॥
न देवधूर्त्तसचिव चत्वराणां समन्ततः ।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं ततः ॥ २ ॥
तस्य प्रदेशाश्चत्वारं स्तथोत्सर्गोऽग्रतः शुभः ।
पृष्ठतः पृष्ठभागस्तु सव्यावर्त्तः प्रशस्यते ॥ ३ ॥
अपसव्यो विनाशाय दक्षिणेशीर्षक स्तथा ।
सर्वकामफलो नृणां सम्पूर्णो नाम वामतः ॥ ४ ॥
एवं प्रदेशमालोक्य यत्नेन गृहमारभेत् ।
अथ सांवत्सरेप्रोक्ते मुहूर्त्ते शुभलक्षणे । ५ ॥
रत्नोपरि शिलां कृत्वा सर्वबीजसमन्विताम् ।
चतुर्भिर्ब्राह्मणैः स्तम्भं कारयित्वा सुपूजितम् ॥ ६ ॥
शुक्लाम्बरधरः शिल्पि सहितो वेदपारगैः ।
स्नापितं विन्यसेत्तद्वत्सर्वौषधिसमन्वितम् ॥ ७ ॥
नानाक्षतसमोपेतं वस्त्रालङ्कारसंयुतम् ।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिःस्वनैः ॥ ८ ॥
पायसं भोजयेद्विप्रान् होमन्तु मधुसर्पिषा ।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्वदा ॥ ९ ॥
सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।
द्वारवंशोच्छ्रये तद्वत्प्रवेशसमये तथा ॥ १० ॥

वास्तुपश्यमने तद्वद्वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपात: स्यादाग्नेयेस्तम्भरोपणम् ॥ ११ ॥
प्रदक्षिणञ्च कुर्वीत वास्तोः पदविलेखनम् ।
तर्जनीमध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥ १२ ॥
प्रवालरत्नकनकफलं पिष्टाक्षतोदकम् ।
सर्ववास्तु विभागेषु शस्तं पदविलेदने ॥ १३ ॥
नमस्याङ्गारकाष्ठेन नखशस्त्रेण चर्मभिः ।
न शृङ्गास्थिकपालैश्च क्वचिद्वास्तु विलेखयेत् ॥१४॥
एभिर्विलिखितं कुर्य्याद्दुःखशोकभयादिकम् ।
यदागृहप्रवेश: स्याच्छिल्पी तत्रापि लक्षयेत् ॥ १५ ॥
स्तम्भसूत्रादिकं तद्वच्छुभाशुभफलप्रदम् ।
आदित्याभिमुखं रौति शकुनिः पुरुषं यदि ॥ १६ ॥
तुल्यकालं स्पृशेदङ्गं गृहभर्तुर्यदात्मनः ।
वास्वङ्गे तद्विजानीयान्नरशल्यं भयप्रदम् ॥ १७ ॥
अङ्कनानन्तरं यत्र हस्त्यश्वश्वापदं भवेत् ।
तदङ्गसम्भवं विन्द्यात्तत्र शल्यं विचक्षणाः ॥ १८ ॥
प्रसार्य्यमाणे सूत्रे तु श्वागोमायुर्विलङ्घते ।
तत्तु शल्यं विजानीयात् खरशब्देति भैरवे ॥ १९ ॥
यदीशाने तु दिग्भागे मधुरं रौति वायसः ।
धनं तत्र विजानीयाद्भागे वास्वाध्यधिष्ठिते ॥ २० ॥
सूत्रच्छेदेभवेन्मृत्युर्व्याधिः कीले त्वधो मुखे ।
अङ्गारेषु तथोन्मादं कपालेषु च सम्भ्रमम् ॥ २१ ॥
कम्बुशल्येषु जानीयात् पौंश्चल्यं स्त्रीषु वास्तुवित् ।
गृहभर्तुर्गृहस्यापि विनाशः शिल्पिसम्भ्रमे ॥२२॥

स्तम्भेस्कन्धच्युतेकुम्भे शिरोरोगं विनिर्दिशेत्।
कुम्भापहारेसर्वस्व कुलस्यापि क्षयो भवेत्॥ २३॥
मृत्यु: स्यानच्युतेकुम्भे भग्नेबन्धं विदुर्बुधा:।
करसञ्ज्ञाविनाशे तु नाशं गृहपतेर्विदु:॥ २४॥
बीजौषधिविहीनेतु भूतेभ्यो भयमादिशेत्।
तत: प्रदक्षिणेनान्यान् न्यसेत्स्तम्भान्विचक्षणा:॥२५॥
यस्माद्भयकरं नृणां योजिताह्यप्रदक्षिणम्।
रक्षांकुर्वीत यत्नेन स्तम्भोपद्रवनाशिनीम्॥२६॥
तथा फलवतीं शाखां स्तम्भोपरि निवेशयेत्।
प्रागुदक्प्रवणं कुर्य्याद्दिङ्मूढन्तु नकारयेत्॥२७॥
स्तम्भं वा भवनं वापि द्वारं वासगृहं तथा।
दिङ्मूढेकुलनाश: स्यान्नचसंवर्द्धयेद्गृहम्॥२८॥
यदि संवर्द्धयेद्गेहं सर्वदिक्षुविवर्द्धयेत्।
पूर्वेण वर्द्धितं वास्तु कुर्य्याद्वैराणि सर्वदा॥२८॥
दक्षिणे वर्द्धितं वास्तु मृत्यवे स्यान्न संशय:।
पश्चाद्विवृद्धं यद्वास्तु तदर्थक्षयकारकम्॥ ३०॥
वर्द्धापितं तथा सौम्ये बहुसन्तापकारकम्।
आग्नेये यत्र वृद्धि: स्यात् तदग्निभयदम् भवेत्॥३१॥
वर्द्धितं राक्षसेकोणे शिशुक्षयकरं भवेत्।
वर्द्धापितन्तु वायव्ये वातव्याधिप्रकोपकृत्॥३२॥
ईशान्यां अन्नहानि: स्यात् वास्तौसंवर्द्धिते सदा।
ईशानेदेवतागारं तथा शान्तिगृहं भवेत्॥ ३३॥
महानसन्तथाग्नेये तत्पार्श्वेचोत्तरेजलम्।
गृहस्योपस्करं सर्वं नैर्ऋत्येस्थापयेद्बुध:॥ ३४॥

वधस्थानं बहिः कुर्य्यात् स्नानमण्डपमेव च ।
धनधान्यञ्च वायव्ये कर्मशालान्ततो बहिः ।
एवं वास्तु विशेषः स्यात् गृहभर्तुः शुभावहः ।।३५।।

---

अथ षट्पञ्चाशदधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः संप्रवक्ष्यामि दार्वाहरणमुत्तमम् ।
धनिष्ठापञ्चकं मुक्त्वा विष्ट्यादिकमतःपरम् ।
ततः सांवत्सरादिष्टे दिने यायाद्वनं बुधः ।
प्रथमं बलिपूजाञ्च कुर्य्याद्वृक्षस्य सर्वदा ।। २ ।।
पूर्वोत्तरेण पतितं गृहदारु प्रशस्यते ।
अन्यथा न शुभं विन्द्यात् याम्योपरि निपातनम् ।। ३।।
क्षीरवृक्षोद्भवं दारु न गृहे विनिवेशयेत् ।
कृताधिवासं विहगैरनिलानलपीड़ितम् ।। ४ ।।
गजावरुग्णञ्च तथा विद्युन्निर्घातपीड़ितम् ।
अर्द्धशुष्कं तथा दारुभग्न शुष्कं तथैव च ।। ५ ।।
चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा ।
श्मशानकूपनिलयं तड़ागादिसमुद्भवम् ।। ६ ।।
वर्जयेत्सर्वथादारुयदीच्छेद्विपुलां श्रियम् ।
तथा कण्टकिनो वृक्षान् नीपनिम्ब विभीतकान् ।। ७।।
श्लेष्मातकानाम्र तरून् वर्जयेद्गृह कर्मणि ।
आसना शोक मधुक सर्जशालाः शुभावहाः ।। ८ ।।
चन्दनं पनसन्धन्यं सुरदारु हरिद्रवः ।
द्वाभ्यामेकेन वा कुर्यात् त्रिभिर्वाभवनं शुभम् ।। ९ ।।

बहुभिः कारितं यस्मादनेक भयदं भवेत्।
एकैव शिंशपा धन्या श्रीपर्णी तिन्दुकी तथा ॥ १०॥
एतानान्य समायुक्ताः कदाचिच्छुभ कारकाः।
स्यन्दनः पनसस्तद्वत्सरलार्जुन पद्मकाः ॥ ११ ॥
एतेनान्य समायुक्ता वास्तु कार्य फलप्रदाः।
तरुच्छेदे मह्णपीतेः गोधा विन्द्याद्विचक्षणाः ॥ १२ ॥
माञ्जिष्ठ वर्णेभेकः स्यान्नीले सर्पादि निर्दिशेत्।
अरुणे सरटं विद्यान्मुक्ताभे शुकमा दिशेत् ॥ १३ ॥
कपिले मूषकान्विद्यात् खड्गाभे जलमा दिशेत्।
एवंविधं स गर्भन्तु वर्जयेद्वास्तु कर्मणि ॥ १४ ॥
पूर्वंच्छिन्नन्तु गृह्णीयान्निमित्त शकुनैः शुभैः।
व्यासेन गुणिते दैर्घ्येऽष्टाभिर्वैहृते तथा । १५ ॥
यच्छेष मायतं विद्यादष्ट भेदं वदामि वः।
ध्वजो धूमश्च सिंहश्च वृषभः खर एव च ॥ १६ ॥
हस्तीध्वांक्षश्च पूर्वाद्याः करशेषा भवन्त्यमी।
ध्वजः सर्वमुख धन्यः प्रत्यग्द्वारो विशेषतः ॥ १७ ॥
उदङ् मुखोभवेत्सिंहः प्राङ् मुखो वृषभो भवेत्।
दक्षिणाभिमुखो हस्ती सप्तभिःसमुदाहृतः ॥ १८ ॥
एकेन ध्वजउद्दिष्ट स्त्रिभिःसिंह प्रकीर्तितः।
पञ्चभिर्वृषभःप्रोक्तो विकोणस्थाश्च वर्जयेत् ॥ १६ ॥
तमेवाष्टगुणंकृत्वा करराशिं विचक्षणाः।
सप्त विंशाहृतभागे ऋक्षं विद्याद्विच णाः । २० ॥
अष्टभिर्भाजितेऋक्षेयःशेषःसव्ययो मतः।
व्ययाधिकं न कुर्वीत यतोदोष करम्भवेत्।

आयाधिकेभवेच्छान्ति रित्याह भगवान् हरिः ॥ २१ ॥
कृत्वाग्रतोद्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदल पुष्पफलोप शोभम् ।
कृत्वा हिरण्यवसनानि तदाद्विजेभ्यो
मङ्गल्यशान्ति निलयाय गृहं विशेत्तु ॥ २२ ॥
गृह्योक्तहोमविधिना बलि कर्म कुर्यात्
प्रासादवास्तु शमने च विधिर्यउक्तः ।
सन्तर्पयेद्विजवरानथ भोज्यभक्ष्यैः
शुक्लाम्बरः स्वभवनं प्रविशेत्सधूपम् ॥ २३ ॥

---

अथ सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ।

ऋषयऊचुः । क्रियायोगः कथंसिद्धो गृहस्थादिषु सर्वदा ।
ज्ञानयोग सहस्राद्धि कर्मयोगोविशिष्यते ॥ १ ॥
सूत उवाच । क्रियायोगं प्रवक्ष्यामि देवतार्चानु कीर्तनम् ।
भुक्तिमुक्तिप्रदं यस्मान्नान्यत् लोकेषु विद्यते ॥ २ ॥
प्रतिष्ठायां सुराणां तु देवतार्चानु कीर्तनम् ।
देवयज्ञोत्सवश्चापि बन्धनाद्यो न मुच्यते ॥ ३ ॥
विष्णोस्तावत्प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।
शङ्खचक्रधरंशान्तं पद्महस्तं गदाधरम् ॥ ४ ॥
छत्राकारंशिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ।
तुङ्गनासं शुक्तिकर्णं प्रशान्तोरुभुजक्रमम् ॥ ५ ॥
क्वचिदष्टभुजंविद्या च्चतुर्भुज मथापरम् ।
द्विभुजश्चापि कर्तव्यो भवनेषु पुरोधसा ॥ ६ ॥

देवस्याष्टभुजस्यास्य यथास्थानं निबोधत।
खड्गोगदाशरःपद्मं दिव्यं दक्षिणतो हरेः॥ ७॥
धनुश्च खेटकञ्चैव शङ्खचक्रे च वामतः।
चतुर्भुजस्य वक्ष्यामि यथैवायुध संस्थितिः॥ ८॥
दक्षिणेन गदापद्मं वासुदेवस्य कारयेत्।
वामतः शङ्खचक्रे च कर्तव्ये भूतिमिच्छता॥ ९॥
कृष्णावतारे तु गदा वामहस्ते प्रशस्यते।
यथेच्छया शङ्खचक्रे चोपरिष्टात् प्रकल्पयेत्॥ १०॥
अधस्तात् पृथिवी तस्य कर्तव्या पादमध्यतः।
दक्षिणे प्रणतं तद्वद्गरुत्मन्तंनिवेशयेत्॥ ११॥
वामतस्तुभवेल्लक्ष्मीः पद्महस्ता शुभानना।
गरुत्मानग्रतोवापि संस्थाप्यो भूतिमिच्छता॥ १२॥
श्रीश्चपुष्टिश्च कर्तव्ये पार्श्वयो पद्मसंयुते।
तोरणञ्चोपरिष्टात्तु विद्याधरसमन्वितम्॥ १३॥
देवदुन्दुभिसंयुक्तं गन्धर्वमिथुनान्वितम्।
पत्रवल्लीसमपेतं सिंहव्याघ्र समन्वितम्॥ १४॥
तथाकल्पलतोपेतं स्तुवद्भिरमरेश्वरैः।
एवंविधोभवेद्विष्णो स्त्रिभागेनास्य पीठिका॥ १५॥
नवतालप्रमाणास्तु देवदानव किन्नराः।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः॥ १६॥
जालान्तरप्रविष्टानां भानूनां यद्रजःस्फुटम्।
त्रसरेणुःसविज्ञेयो वालाग्रन्ते रथाष्टभिः॥ १७॥
तदष्टके न लिक्षातु यूकालिक्षाष्टकैर्मता।
यवोयूकाष्टकं तद्वदष्टभिस्ते स्तदङ्गुलम्॥ १८॥

स्वकीयाङ्गुलिमानेन मुखं स्यात् द्वादशाङ्गुलम् ।
मुखमानेनकर्तव्या सर्वावयवकल्पना ॥ १९ ॥
सौवर्णीराजतीवापि ताम्रीरत्नमयी तथा ।
शैलीदारुमयीचापि लौहसंघमयी तथा ॥ २० ॥
रीतिकाधातुयुक्ता वा ताम्रकांस्यमयी तथा ।
शुभदारुमयीवापि देवतार्चा प्रशस्यते ॥ २१ ॥
अङ्गुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥ २२ ॥
आषोडशा तु प्रासादे कर्तव्या नाधिका ततः ।
मध्योत्तमकनिष्ठा तु कार्याविचानुसारतः ॥ २३ ॥
द्वारोच्छ्रायस्य यन्मान मष्टधा तत्तु कारयेत् ।
भागमेकं ततस्त्यक्त्वा परिशिष्टन्तु यद्भवेत् ॥ २४ ॥
भागद्वयेन प्रतिमात्रिभागीकृत्य तत्पुनः ।
पीठिकाभागतःकार्या नातिनीचा नचोच्छ्रिता ॥ २५ ॥
प्रतिमामुखमानेन नवभागान् प्रकल्पयेत् ।
चतुरङ्गुला भवेद्ग्रीवाभागेन हृदयंपुनः ॥ २६ ॥
नाभिस्तस्मादधः कार्याभागेनैकेन शोभना ।
निम्नत्वे विस्तरत्वे च अङ्गुलं परिकीर्तितम् ॥ २७ ॥
नाभेरधस्तथामेढ्रं भागेनैकेन कल्पयेत् ।
द्विभागेनायतावूरू जानुनी चतुरङ्गुले । २८ ॥
जङ्घे द्विभागेविख्यातेपादौ च चतुरङ्गुलौ ।
चतुर्दशाङ्गुलस्तद्वन्मौलिरस्य प्रकीर्तितः ॥ २९ ॥
ऊर्द्ध्वमानमिदंप्रोक्तं पृथुत्वञ्च निबोधत ।
सर्वावयवमानेषु विस्तारं शृणुत द्विजाः ॥ ३० ॥

चतुरङ्गुलंललाटं स्यादूर्ध्वंनासा तथैव च ।
द्व्यङ्गुलन्तुहनुर्ज्ञेयमोष्ठः स्वाङ्गुलसम्मितः ॥ ३१ ॥
अष्टाङ्गुले ललाटे च तावन्मात्रे भ्रुवौ मते ।
अर्द्धाङ्गुलाभ्रुवोर्लेखा मध्येधनुरिवानता ॥ ३२ ॥
उन्नताग्राभवेत्पार्श्वे श्लक्ष्णातीक्ष्णा प्रशस्यते ।
अक्षिणीद्व्यङ्गुलायामे तदर्धं चैव विस्तरे ॥ ३३ ॥
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारकार्धविभागेन दृष्टिःस्यात्पञ्चभागिका ॥ ३४ ॥
द्व्यङ्गुलन्तु भ्रुवोर्मध्ये नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथानतम् ॥ ३५ ॥
नासापुटबिलंतद्वदर्धाङ्गुल मुदाहृतम् ।
कपोलेद्व्यङ्गुले तद्वत् कर्णमूलाद्विनिर्गते ॥ ३६ ॥
हन्वग्रमङ्गुलंतद्व द्विस्तारोद्व्यङ्गुलोभवेत् ।
अर्द्धाङ्गुलाभ्रुवोराजी प्रणालसदृशी समा ॥ ३७ ॥
अर्द्धाङ्गुलसमस्तद्व दुत्तरोष्ठस्तु विस्तरे ।
निष्पावसदृशन्तद्व न्नासापुटदलं भवेत् ॥ ३८ ॥
सृक्किणीज्योतिस्तुल्ये तु कर्णमूलात् षडङ्गुले ।
कर्णौ तु भ्रूसमौज्ञेयौ ऊर्द्धन्तु चतुरङ्गुलौ ॥ ३९ ॥
द्व्यङ्गुलौकर्णपार्श्वौ तु मात्रामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ॥ ४० ॥
ललाटात्पृष्ठतोऽर्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशदङ्गुलश्चास्य परिणाहःशिरोगतः ॥ ४१ ॥
सकेशनिचयोयस्य द्विचत्वारिंशदङ्गुलः ।
केशान्तात्हनुका तद्व दङ्गुलानि तु षोडश ॥ ४२ ॥

प्राणिनो दंष्ट्रिणोरौद्रा स्तथा हि विषजातयः ॥ १२ ॥
शार्ङ्गहालाहलामुस्त वत्सकं गूरुभस्मगाः ।
नीलपत्रादयश्चान्ये शतशो बहुभेदिनः ।
येषां गन्धेन दह्यन्ते गिरिश्टङ्गाण्यपि द्रुतम् ॥१३॥
अनन्तरं नीलरसौघ भृङ्गभिन्नाञ्जनाभं विषमंशुसन्तम् ।
कायेन लोकान्तरपूरकेण केशैश्च वह्निप्रतिमैर्ज्वलद्भिः ॥ १४ ॥
सुवर्णमुक्ता फलभूषिताङ्गं किरीटिनं पीतदुकूलजुष्टम् ।
नीलोत्पलाभैः कुसुमैः कृतार्घं गर्जन्तमम्भोधरभीमवेगम् ॥१५॥
अट्टाच्चरम्भो निधिमध्यसंस्थं सविग्रहं देहि भयाश्रयन्तम् ।
विलोक्य तं भीषणमुग्रनेत्रं भूताश्च वित्रेसुरथापि सर्वे ॥१६॥
केचिद्दिलो क्वैव गतास्त्वभावं निःसंज्ञतां चाप्यपरे प्रपन्नाः ।
वेमुर्मुखेभ्योऽपि च फेनमन्ये केचित्त्ववाप्ताविषमामवस्थाम् ॥१७॥
श्वासेन तस्य निर्दग्धा ततोविष्णुन्द्रदानवा ।
दग्धाङ्गारनिभाजाता ये भूतादिव्यरूपिणः ॥
ततस्तु सम्भ्रमाद्विष्णु स्समुवाच सुरात्मकम् ॥१८॥
भगवानुवाच । को भवानन्तकप्रख्यः किमिच्छसि कुतोऽपि च ।
किं कृत्वा ते प्रियं जाये देवमाचक्ष्व मेऽखिलम् ॥ १९ ॥
तच्च तस्य वचः श्रुत्वा विष्णोः कालाग्निसन्निभः ।
उवाच कालकूटस्तु भिन्नदुन्दुभिनिस्वनः ॥२०॥
कालकूट उवाच । अहं हि कालकूटाख्यो विषोऽम्बुधिसमुद्भवः ।
यदा तीव्रतरामर्षैः परस्परवधैषिभिः ॥२१॥
सुरासुरैर्विमथितो दुग्धाम्भोनिधिरद्भुतः ।
सम्भूतोऽहं तदा सर्वान् हन्तुं देवान् सदानवान् ॥२२॥

सर्वानिह हनिष्यामि चणमात्रेण देहिनः।
मा मां ग्रसत वै सर्वे यात वा गिरिशान्तिकम् ॥२३॥
श्रुत्वैतद्वचनं तस्य ततोभीताः सुरासुराः।
ब्रह्मविष्णू पुरस्कृत्य गतास्ते शङ्करान्तिकम् ॥२४॥
निवेदितास्ततोद्वास्थै स्ते गणेशैः सुरासुराः।
अनुज्ञाताः शिवेनाथ विविशुर्गिरिशान्तिकम् ॥२५॥
मन्दरस्य गुहां हैमीं मुक्तामालाविभूषिताम्।
सुस्वच्छमणिसोपानां वैदूर्य्यस्तम्भमण्डिताम् ॥२६॥
तत्र देवासुरैः सर्वै र्जानुभिर्धरणीं गतैः।
ब्रह्माणमग्रतः कृत्वा इदं स्तोत्रमुदाहृतम् ॥ २७ ॥
देवदानवा ऊचुः। नमस्तुभ्यं विरूपाक्ष! सर्वतोऽनन्तचक्षुषे।
नमः पिनाकहस्ताय वज्रहस्ताय धन्विने ॥ २८ ॥
नमस्त्रिशूलहस्ताय दण्डहस्ताय धूर्जटे।
नमस्त्रैलोक्यनाथाय भूतग्रामशरीरिणे ॥२९॥
नमः सुरारिहन्त्रे च सोमाग्न्यर्काग्र्य चक्षुषे।
ब्रह्मणे चैव रुद्राय नमस्ते विष्णुरूपिणे ॥ ३० ॥
ब्रह्मणे वेदरूपाय नमस्ते देवरूपिणे।
साङ्ख्ययोगाय भूतानां नमस्ते शम्भवाय ते ॥ ३१ ॥
मन्मथाङ्गविनाशाय नमः कालक्षयङ्कर।
रंहसे देवदेवाय नमस्ते च सुरोत्तम! ॥ ३२ ॥
एकवीराय शर्वाय नमः पिङ्गकपर्दिने।
उमाभर्त्रे नमस्तुभ्यं यज्ञत्रिपुरघातिने ॥ ३३ ॥
शुद्धबोधप्रबुद्धाय मुक्तकैवल्यरूपिणे।

लोकत्रयविधात्रे च वरुणेन्द्राग्निरूपिणे ।
ऋग्यजुः सामवेदाय पुरुषायेश्वराय च ।
अग्राग्रायैवचोग्राय विप्रायश्रुति चक्षुषे ॥ ३५ ॥
रजसेचैवसत्त्वाय नमस्ते स्तिमितात्मने ।
अनित्यनित्यभावाय नमो नित्यचरात्मने ॥ ३६ ॥
व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः ।
भक्तानामार्तिनाशाय प्रियनारायणाय च ॥ ३७ ॥
उमाप्रियाय शर्वाय नन्दिवक्त्राञ्चिताय च ।
ऋतुमन्वन्तकल्पाय पक्षमासदिनात्मने ॥ ३८ ॥
नानारूपाय मुण्डाय वरूथपृथुदण्डिने ।
नमः कमलहस्ताय दिग्वासाय शिखण्डिने ॥ ३९ ॥
धन्विने रथिनेचैव यतये ब्रह्मचारिणे ।
इत्येवमादिचरितैः स्तुतंतुभ्यं नमोनमः ॥ ४० ॥
एवं सुरासुरैस्स्थाणुः स्तुतस्तोषमुपागतः ।
उवाच वाक्यं भीतानां स्मितान्वित शुभाक्षरम् ॥ ४१॥
श्रीशङ्करउवाच । किमर्थमागताब्रूत त्रासम्लान मुखाम्बुजाः ! ।
किंवाभीष्टं ददामद्य कामं प्रब्रूतमाचिरम् ।
इत्युक्तास्तेतु देवेन प्रोचुस्तं स सुरासुराः ॥ ४२ ॥
सुरासुराऊचुः । अमृतार्थे महादेव ! मथ्यमानेमहोदधौ ।
विषमङ्गतमुद्भूतंलोकमं क्षयकारकम् ॥ ४३ ॥
स उवाचायसर्वेषां देवानां भयकारकः ।
सर्वान्वा भक्षयिष्यामि अथवा मापिवस्तथा ॥ ४४ ॥
तमशक्तावयं ग्रस्तुं सोऽस्मान् शक्तोबलोत्कटः ।
एषनिश्वाससमानेण शतपर्व समद्युतिः ॥ ४५ ॥

विष्णुः कृष्णः कृतस्तेन यमश्च विषमात्मवान्।
मूर्च्छिताःपतिताश्चान्ये विप्रणाशङ्गताः परे ॥ ४६ ॥
अर्थोऽनर्थक्रियांयाति दुर्भगानां यथा विभो!।
दुर्बलानाञ्च सङ्कल्पो यथाभवति चापदि ॥ ४७ ॥
विषमेतत्समुद्भूतं तस्माद्दाक्षतकांचया।
अस्माद्भयान्मोचय त्वं गतिस्त्वञ्च परायणम् ॥ ४८ ॥
भक्तानुकम्पी भावज्ञो भुवनादीश्वरो विभुः।
यज्ञाग्रभूक् सर्वहविः सौम्यः सोमः स्मरान्तकृत् ॥४९॥
त्वमेकोनोगतिर्देव गीर्वाणगणशर्मकृत्।
रक्षास्मान् भक्तसङ्कल्पा द्विरूपाक्ष! विषज्वरात् ॥ ५० ॥
तच्छ्रुत्वा भगवानाह भगनेत्रान्त कृद्भवः।
भक्षयिष्याम्यहं घोरं कालकूटं महाविषम् ॥ ५१ ॥
तथान्यदपि यत्कृत्यं कृच्छ्रसाध्यं सुरासुराः!।
तच्चापि साधयिष्यामि तिष्ठध्वं विगतज्वराः ॥ ५२ ॥
इत्युक्ताहृष्टरोमाणो बाष्पगद्गद कण्ठिनः।
आनन्दाश्रु परीताक्षाः सनाथाइव मेनिरे।
सुराब्रह्मादयःसर्वे समाश्वस्ताः सुमानसाः ॥ ५३ ॥

ततो ऽव्रजद्द्रुतगतिना ककुद्मिना-
हरोऽम्बरे पवनगतिर्जगत्पतिः।
प्रधावितैरसुरसुरेन्द्र नायकैः
स्ववाहनै र्विंगृहीत शुभ्रचामरैः।
पुरः सरैः सतु शुशुभे शुभाश्रयैः
शिवोवशीशिखि कपिशोर्ध्वजूटकः ॥ ५४ ॥

आसाद्य दुग्धसिन्धुं तं कालकूटं विषं यतः।

ततो देवीमहादेवो विलोक्य विषमं विषम् ॥ ५५ ॥
छायास्थानकमास्थाय सोऽपिबद्वामपाणिना ।
पीयमाने विषे तस्मिं स्ततोदेवाः महासुराः ॥ ५६ ॥
जगुश्च ननृतुश्चापि सिंहनादांश्च पुष्कलान् ।
चक्रुःशक्र मुखाद्याश्च हिरण्याक्षादयस्तथा ॥ ५७ ॥
स्तुवन्तश्चैव देवेशं प्रसन्नाश्चा भवं स्तदा ।
कण्ठदेशे ततःप्राप्ते विषेदेव मथाब्रुवन् ॥ ५७ ॥
विरिञ्चि प्रमुखादेवा बलिप्रमुखतोऽसुराः ।
शोभते देव ! कण्ठस्ते गात्रे कुन्दनिभप्रभे ॥ ५८ ॥
भृङ्गमालानिभंकण्ठेऽप्यत्रैवास्तु विषं तव ।
इत्युक्तःशङ्करोदेव स्तथाप्राह पुरान्तकृत् ॥ ६० ॥

पीतेविषेदेवगणान् विसृज्य-
गतोहरोमन्दर शैलमेव ।
तस्मिन् गते देवगणाः पुनस्तं-
ममन्थुरब्धिं विविध प्रकारैः ॥ ६१ ॥

---

अथ पञ्चाशदधिक द्विशततमोऽध्यायः ।

सूतउवाच । मथ्यमाने पुनस्तस्मिन् जलधौ समदृश्यत ।
धन्वन्तरिः स भगवान् आयुर्वेद प्रजापतिः ॥ १ ॥
मदिराचायताक्षी सा लोकचित्त प्रमाथिनी ।
ततोऽमृतञ्च सुरभिः सर्वभूत भयावहा ॥ २ ॥
जग्राह कमलां विष्णुः कौस्तुभञ्च महामणिम् ।
गजेन्द्रञ्च सहस्राक्षो हयरत्नञ्च भास्करः ॥ ३ ॥

धन्वन्तरिश्च जग्राह लोकारोग्य प्रवर्तकम्।
च्छत्रं जग्राह वरुणः कुण्डले च शचीपतिः॥ ४॥
पारिजाततरुं वायु र्जग्राह मुदितस्तथा।
धन्वन्तरिस्ततोदेवो वपुष्मानुदतिष्ठत॥ ५॥
श्वेतंकमण्डलुं बिभ्र दमृतं यत्र तिष्ठति।
एतदत्यद्भुतंदृष्ट्वा दानवानां समुत्थितः॥ ६॥
अमृतार्थे महानादो ममेदमिति जल्पताम्।
ततो नारायणो माया मास्थितोमोहिनीं प्रभुः॥ ७॥
स्त्रीरूप मतुलंकृत्वा दानवा नभिसंस्थितः।
तत स्तदमृतं तस्यै ददुस्ते मूढचेतनाः।
स्त्रियैदानवदैतेयाः सर्वे तद्गतमानसाः॥ ८॥
अथास्त्राणि च मुख्यानि महाप्रहरणानि च।
प्रगृह्याभ्य द्रवन्देवान् सहिता दैत्यदानवाः॥ ९॥
तत स्तदमृतंदेवो विष्णुरादाय वीर्यवान्।
जहारदानवेन्द्रेभ्यो नरेण सहितः प्रभुः॥ १०॥
ततो देवगणाः सर्वे पपुस्तदमृतं तदा।
विष्णोः सकाशात् संप्राप्य संग्रामे तुमुलेसति॥ ११॥
ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितम्।
राहुर्विबुधरूपेण दानवोऽप्यपिबत्तदा॥ १२॥
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा।
आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया॥ १३॥
ततो भगवता तस्य शिरश्छिन्न मलंकृतम्।
चक्रायुधेन चक्रेण पिबतो ऽमृतमोजसा॥ १४॥
तच्छैलशृङ्गप्रतिमं दानवस्य शिरोमहत्।

चक्रेणोत्कृत्तमपतत् ज्वालयन् वसुधातलम् ॥ १५ ॥
ततो वैरविनिर्बन्धः कृतोराहुमुखेन वै ।
शाश्वतं चन्द्रसूर्याभ्यां प्रसह्याद्यापि बाधते ॥ १६ ॥
विहायभगवांश्चापि स्त्रीरूप मतुलं हरिः ।
नाना प्रहरणैर्भीमै र्दानवान् समकम्पयत् ॥ १७ ॥
प्रासाः सुविपुलास्तीक्ष्णाः पतन्तश्च सहस्रशः ।
ते सुराश्चक्रनिर्भिन्ना वमन्तोरुधिरं बहु ॥ १८ ॥
असिशक्ति गदाभिन्नानिपेतु धरणीतले ।
भिन्नानिपट्टिशैश्चापि शिरांसि युधि दारुणैः ॥ १९ ॥
तप्तकाञ्चनमाल्यानि निपेतुरनिशन्तदा ।
रुधिरेणावलिप्ताङ्गा निहताश्च महासुराः ॥ २० ॥
अद्रीणामिव कूटानि धातुरक्तानि शेरते ।
ततो हलहलाशब्दः सम्बभूव समन्ततः ॥ २१ ॥
अन्योऽन्यं च्छिन्दतांशस्त्रै रादित्ये लोहितायति ।
परिघैश्चा यसैःपीतैः सन्निकर्षैश्च मुष्टिभिः ॥ २२ ॥
निघ्नतां समरेऽन्योऽन्यं शब्दोदिव मिवास्पृशत् ।
च्छिन्धिभिन्धि प्रधावेति पातयेभि सरेति वै ॥ २३ ॥
विश्रूयन्ते महाघोराः शब्दास्तत्र समन्ततः ।
एवं सुतुमुलेयुद्धे वर्त्तमाने महाभये ॥ २४ ॥
नरनारायणौदेवौ समाजग्मतुराहवम् ।
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
चिन्तयामासवैचक्रं विष्णुर्दानव सूदनम् ॥ २५ ॥
ततोऽम्बराच्चिन्तितमात्र मागतं
महाप्रभं चक्रममित्र नाशनम् ।

विभावसोस्तुल्य मकुण्ठमण्डलं
सुदर्शनं भीममसह्य मुत्तमम् ॥ २६ ॥
तदागतं ज्वलितहुताशनप्रभं
भयङ्करं करिकरबाहुरच्युतः ।
महाप्रभं दनुकुलदैत्य दारणं
तथोज्वलज्ज्वलन समान विग्रहम् ॥ २७ ॥
मुमोच वै तपनसुद प्रवेगवान्
महाप्रभं रिपुनगरावदारणम् ।
सम्वर्त्तकज्वलन समानवर्चसं
पुनः पुनर्न्यप तत वेगवत्तदा ॥ २८ ॥
व्यदारयद्दिति तनयान् सहस्रशः
करेरितं पुरुषवरेण संयुगे ।
दहत् क्वचिज्ज्वलन इवानिलेरितं
प्रसह्य तान सुरगणान कृन्तत ॥ २९ ॥
प्रवेरितं वियतिमुहुःक्षितौ तदा-
पपौ रणे रुधिरमयः पिशाचवत् ।
अथासुरागिरिभि रदीनमानसा
मुहुर्मुहुः सुरगणमर्दयं स्तथा ॥ ३० ॥
महाचला विगलित मेघवर्चसः
सहस्रशो गगन महाप्रपातिनः ।
अथान्तराभरजनना: प्रपेदिरे-
सपादपा बहुविध मेघरूपिणः ॥३१॥
महाद्रयः प्रविगलिताग्रसानवः
परस्परं द्रुतमभिपत्य भास्वराः ।

ततो महीप्रचलित सार्द्रिकानना
महीधरा: पवनहता: समन्तत: ॥ ३२ ॥
परस्परं भृशमभि गर्जितं मुहु-
रणाजिरे भृशमभि सम्प्रवर्त्तते ।
नरस्ततोवर कनकाग्रभूषणै
र्महेषुभि: पवनपथं समावृणोत् ॥ ३३ ॥
विदारयन् गिरिशिखराणि पत्रिभि-
र्महाभये सुरगणविग्रहे तदा ।
ततो महीं लवणजलञ्च सागरं
महासुरा: प्रविविशुरर्दिता: सुरै: ॥ ३४ ॥
वियद्गतं ज्वलितहुताशनप्रभं
सुदर्शनं परिकुपितं निशाम्य च ।
तत: सुरैर्विजयमवाप्यमन्दर:
स्वमेव देशं गमित: सुपूजित: ॥ ३५ ॥
विनादयन् स्वदिशमुपेत्य सर्वश-
स्ततोगता: सलिलधरा यथा गतम् ।
ततोऽमृतं सुनिहितमेव चक्रिरे
सुरा: परां मुदमभिगम्य पुष्कलाम् ।
ददुश्च तं निधिममृतस्य रक्षितुम्
किरीटिने बलिभिरथामरै: सह ॥३६॥

---

एकपञ्चाशदधिकद्विशततमोऽध्याय: ।

ऋषय ऊचु: । प्रासादभवनादीनां निवेशं विस्तराद्वद ।

कुर्य्यात्केन विधानेन कश्चवास्तु रुदाहृतः॥ १॥
सूत उवाच। भृगुरत्रिर्वशिष्ठश्च विश्वकर्मामय स्तथा।
नारदोनग्नजिच्चैव विशालाक्षः पुरन्दरः॥ २॥
ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती॥ ३॥
अष्टादशैते विख्याता वास्तु शास्त्रोपदेशकाः।
सङ्क्षेपेणोपदिष्टन्तु मनवे मत्स्य रूपिणा॥ ४॥
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्।
पुरान्धकवधेघोरे घोररूपस्य शूलिनः॥ ५॥
ललाटस्वेदसलिल मपतद्भुविभीषणम्।
करालवदनं तस्मात् भूतमुद्भूत मुल्वणम्॥ ६॥
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम्।
ततोऽन्धकानां रुधिर मपिबत्पतितं क्षितौ॥ ७॥
तेन तत्समरे सर्व्वं पतितं यन्महीतले।
तथापि तृप्तिमगमन्न तद्भूतं यदा तदा॥ ८॥
सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम्।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतीत्रयम्॥ ९॥
ततः कालेन सन्तुष्टो भैरवस्तस्य चाहवे।
वरं वृणीष्वभद्रन्ते! यदभीष्टन्तवानघ!॥ १०॥
तमुवाच ततोभूतं त्रैलोक्यग्रसनक्षमम्।
भवामि देवदेवेश तथेत्युक्तश्च शूलिना॥ ११॥
ततस्तत्त्रिदिवं सर्व्वं भूमण्डलमशेषतः।
स्वदेहेनान्तरिक्षञ्च रुन्धानं प्रपतद्भुवि॥ १२॥
भीतभीतैस्ततोदेवै र्ब्रह्मणा चाथ शूलिना।

दानवासुररक्षोभि रवष्टब्धं समन्ततः ॥ १३ ॥
येन यत्रैव चाक्रान्तं स तत्रैवावसत्पुनः ।
निवासात्सर्वदेवानां वास्तुरित्यभिधीयते ॥ १४ ॥
अवष्टब्धास्य तेनापि विज्ञप्ताः सर्वदेवताः ।
प्रसीदध्वं सुराः सर्वे युष्माभिर्निश्चलीकृतः ॥ १५ ॥
स्थास्याम्यहं किमाकारो ह्यवष्टब्धोऽह्यधोमुखः ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥१६॥
आहारो वैश्वदेवान्ते नूनमस्मिन्भविष्यति ।
वास्तुपूजामकुर्वाणा स्तवाहारो भविष्यति ॥ १७ ॥
अज्ञानात्तु कृतोयज्ञ स्तवाहारो भविष्यति ।
यज्ञोत्सवादौ च बलिस्तवाहारो भविष्यति ॥१८॥
एवं मुक्तस्ततोहृष्टः सवास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात्ततः प्रभृतिशान्तये ॥ १९ ॥

---

अथ द्विपञ्चाशदधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः सम्प्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथा कालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥ १ ॥
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धेनुरत्नानि ज्यैष्ठेमृत्युं तथैव च ॥ २ ॥
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभन्तु हानिं भाद्रपदे तथा ॥ ३ ॥
पत्नीनाशोऽश्विनेविन्द्यात्कार्तिके धनधान्यकम् ।
मार्गशीर्षे तथाभक्तं पौषेतस्करतो भयम् ॥ ४ ॥

लाभश्च बहुशो विन्द्यात् अग्निं माघे विनिर्दिशेत्।
फाल्गुने काञ्चनं पुत्रानितिकालबलं स्मृतम्॥ ५॥
अश्विनीरोहिणीमूलं उत्तरात्रयमैन्दवम्।
स्वातीहस्तोऽनुराधा च गृहारम्भे प्रशस्यते॥ ६॥
आदित्यभौमवर्ज्यास्तु सर्वे वाराः शुभावहाः।
वर्ज्यं व्याघातशूले च व्यतीपातातिगण्डयोः॥ ७॥
विष्कम्भगण्डपरिघ वज्रयोगेषु कारयेत्।
श्वेतमैत्रेऽथमाहेन्द्रे गान्धर्वाभिजिति रौहिणे॥ ८॥
तथा वैराजसावित्रे मुहूर्ते गृहमारभेत्।
चन्द्रादित्य बलं लब्ध्वा शुभलग्नं निरीक्षयेत्॥ ९॥
स्तम्भोच्छ्रायादिकर्तव्य मन्यत्तु परिवर्जयेत्।
प्रासादेष्वेवमेवं स्यात् कूपवापीषु चैव हि॥ १०॥
पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्।
श्वेतारक्ता तथापीता कृष्णाचैवानुपूर्वशः।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम्।
विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु॥ ११॥
तिक्ताकषाया च तथा वैश्य शूद्रेषु शस्यते।
अरत्निमात्रे वै गर्ते स्वनुलिप्ते च सर्वशः॥ १२॥
घृतमामशरावस्थं कृत्वावर्तिचतुष्टयम्।
ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम्॥ १४॥
दीप्तौ पूर्वादिगृह्णीयाद्वर्णानामनुपूर्वशः।
वास्तुः सामूहिकोनाम दीप्यते सर्वतस्तु यः॥ १५॥
शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च।
अरत्निमात्रमधोगर्ते परीक्ष्यं खातपूरणे॥ १६॥

अधिकेश्रियमाप्नोति न्यूनेहानिं समे समम् ।
फालकृष्टेऽथवादेशे सर्वबीजानि वापयेत् ॥ १७ ॥
त्रिपञ्चसप्तरात्रे च यत्रारोहन्ति तान्यपि ।
ज्येष्ठोत्तमाकनिष्ठाभूर्वर्जनीयतरासदा ॥ १८ ॥
पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत् ।
एकाशीति पदं कृत्वा रेखाभिः कनकेन च ॥ १९ ॥
पश्चात्पिष्टेनचालिप्य सूत्रेणालोड्य सर्व..: ।
दशपूर्वायतालेखा दशचैवोत्तरायताः ॥ २० ॥
सर्ववास्तु विभागेषु विज्ञेया नवका नव ।
एकाशीति पदं कृत्वा वास्तुवित्सर्ववास्तुषु ॥ २१ ॥
पदस्थान् पूजयेद्देवां स्त्रिंशत्पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ॥२२॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिषु तान् पूजयेद्धविषानरः ॥ २३ ॥
शिखीचैवाथपर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च ॥ २४ ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्वौ भृङ्गराजश्च मृगः पितृगणास्तथा ॥ २५ ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगो हि मुख्य एव च ॥ २६ ॥
भल्लाटः सोमसर्पौ च अदितिश्चदिति स्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तस्तु ततः शृणु ॥ २७ ॥
ईशानादिचतुष्कोण संस्थितान् पूजयेद्बुधः ।
आपश्चैवापसावित्रौ जयोरुद्रस्तथैव च ॥ २८ ॥

मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान्।
साध्यानेकान्तरान् विद्यात् पूर्वाद्यान्नामतः शृणु ॥२९॥
अर्य्यमा सविताचैव विवस्वान् विबुधाधिपः।
मित्रोऽथराजयक्ष्मा च तथा पृथ्वीधरः स्मृतः॥ ३० ॥
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृतः।
आपश्चैवापवत्सश्च पर्य्यग्नोऽग्निर्दितिस्तथा॥ ३१ ॥
पदिकानान्तु वर्गोऽयमेवं कोणेष्वशेषतः।
तन्मध्ये तु बहिर्विंश द्विपदास्ते तु सर्वशः॥ ३२ ॥
अर्य्यमाच विवस्वांश्च मित्रः पृथ्वीधर स्तथा।
ब्रह्मणः परितोदिक्षु त्रिपदास्ते तु सर्वशः॥ ३३ ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक्।
वायुं यावत्तथारोगात् पितृभ्यः शिखिनं पुनः॥३४॥
मुख्यात्भृशं तथा शोषाद्वितथं यावदेव तु।
सुग्रीवाददितिं यावत् स्वगात् पर्जन्यमेव च॥३५॥
एतेवंशाः समाख्याताः क्वचित्त्र जयमेव तु।
एतेषां यस्तुसम्पातः पदं मध्यं समं तथा॥ ३६ ॥
मर्मचैतत्समाख्यातं त्रिशूलं कोणगञ्च यत्।
स्तम्भं न्यासेषु वर्ज्यानि तुलाविधिषु सर्वदा॥ ३७ ॥
कीलोच्छिष्टोपघातादि वर्जयेद्व यत्नतो जनः।
सर्वत्र वास्तुर्निर्दिष्टो पितृवैश्वानरायतः॥ ३८ ॥
मूर्द्धन्यग्निः समादिष्टो मुखेचापः समाश्रितः।
पृथ्वीधरोऽर्यमाचैव स्तनयोस्तावधिष्ठितौ॥ ३९ ॥
वक्षस्थले चापवत्सः पूजनीयः सदा बुधैः।
नत्रयोर्दितिपर्जन्यौ श्रोत्रे ऽदिति जयन्तकौ॥ ४० ॥

सर्पेन्द्रावंस संस्थौतु पूजनीयौ प्रयत्नतः।
सूर्य सोमादय स्तद्वत् वाह्वोः पञ्च च पञ्च च ॥ ४१ ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ।
सावित्रः सविता तद्वद्धस्तं दक्षिण मास्थितौ ॥ ४२ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ।
पूषाच पापयक्ष्मा च हस्तयो र्मणिबन्धने ॥ ४३ ॥
तथैवा सुरशोषौ च वामपार्श्वं समाश्रितौ।
पार्श्वेतु दक्षिणे तद्वत् वितथः सगृहक्षतः ॥ ४४ ॥
ऊर्वोर्यमांबुपौक्षियौ जान्वोर्गन्धर्व पुष्पकौ।
जङ्घयो र्भंग सुग्रीवौस्फि क्स्थौ दौवारिको मृगः ॥४५
जय शक्रौ तथा मेढ्रे पादयोः पितरस्तथा।
मध्ये नव पदे ब्रह्माहृदये स तु पूज्यते ॥ ४६ ॥
चतुःषष्टि पदोवास्तुः प्रासादे ब्रह्मणास्मृतः।
ब्रह्मा चतुष्पद स्तत्र कोणेष्वर्ध पदास्तथा ॥ ४७ ॥
बहिः कोणेषु वास्तौतु सार्धाश्चो भयसंस्थिताः।
विंशति द्विपदाश्चैव चतुःषष्टि पदे स्मृताः ॥ ४८ ॥
गृहारम्भेषु कण्डूतिः स्वाम्यङ्गे यत्र जायते।
शल्यं त्वपनयेत्तत्र प्रासादे भवने तथा ॥ ४९ ॥
सशल्यं भयदं यस्माद् शल्यं शुभदायकम्।
हीनाधिकां गता वास्तो सर्वथा तु विवर्जयेत् ॥ ५० ॥
नगर ग्रामदेशेषु सर्वत्रैवं विवर्जयेत्।
चतुःशालं त्रिशालञ्च द्विशालं चैकशालकम्।
नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥ ५१ ॥

## अथ त्रिपञ्चाशदधिक द्विशततमोऽध्यायः।

सूतउवाच। चतुःशालं प्रवक्ष्यामि स्वरूपन्नामतस्तथा।
चतुःशालञ्च तु द्वारैरलिन्दैः सर्वतोमुखम्॥ १॥
नाम्ना तत् सर्वतोभद्रं शुभं देवनृपालये।
पश्चिमद्वारहीनञ्च नन्द्यावर्त्तः प्रचक्षते॥ २॥
दक्षिणद्वारहीनन्तु वर्द्धमान मुपाहृतम्।
पूर्वद्वारविहीनं तत् स्वस्तिकं नाम विश्रुतम्॥ ३॥
रुचकंचोत्तरद्वार विहीनं तत्प्रचक्षते।
सौम्यशालाविहीनं यत्त्रिशालं धान्यकञ्च तत्॥ ४॥
क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम्।
शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम्॥ ५॥
धन्यं यशस्य मायुष्यं शोकमोह विनाशनम्।
शालया याम्ययाहीनं यद्विशालं तु शालया॥ ६॥
कुलक्षयकरंनृणां सर्वव्याधि विनाशनम्।
हीनं पश्चिमया यत्तु पक्षघ्नं नाम तत्पुनः॥ ७॥
मित्र बन्धून् सुतान् हन्ति तथा सर्व भयापहम्।
याम्यापराभ्यां शालाभ्यां धनधान्य फलप्रदम्॥ ८॥
क्षेमवृद्धिकरं नृणां तथापुत्र फलप्रदम्।
यम सूर्यञ्च विज्ञेयं पश्चिमोत्तर शालिकम्॥ ९॥
राजाग्निभयदं नृणां कुलक्षयरं च यत्।
उदक्पूर्वे तु शालेहं दण्डाख्ये यत्र तद्भवेत्॥ १०॥
अकालमृत्युभयदं परचक्र भयावहम्।
धनाख्यं पूर्वयाम्याभ्यां शाल.भ्यां यद्विशालकम्॥ ११॥

तच्छस्त्रभयदं नृणां पराभव भयावहम्।
चुल्लीपूर्वा पराभ्यां तु साभवेन्मृत्यु सूचनी ॥ १२ ॥
वैधव्यदायकं स्त्रीणा मनेक भयकारकम्।
कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् ॥ १३ ॥
सिद्धार्थवज्ज्यं वर्ज्याणि विशालानि सदाबुधैः।
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ॥ १४ ॥
पञ्चप्रकारं तत्प्रोक्त मुत्तमादि विभेदतः।
अष्टोत्तरं हस्तशतं विस्तरश्चोत्तमोमतः ॥ १५ ॥
चतुर्ष्वन्येषु विस्तारो हीयतेचाष्टभिः करैः।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ १६ ॥
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम्।
षड्भिः षड्भिस्तथाशीति हीयते तत्र विस्तरात् ॥१७॥
त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते।
सेनापतेः प्रवक्ष्यामि तथा भवन पञ्चकम् ॥ १८ ॥
चतुःषष्टिस्तुविस्तारात् षड्भिः षड्भिस्तु ही यते।
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ १९ ॥
मन्त्रिणामथ वक्ष्यामि तथा भवन पञ्चकम्।
चतुश्चतुर्भिर्हीनास्यात् करषष्टि प्रविस्तरे ॥ २० ॥
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते।
सामन्तामात्यलोकानां वक्ष्ये भवन पञ्चकम् ॥ २१ ॥
चत्वारिंशत्तथाष्टौ च चतुर्भि र्हीयते क्रमात्।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते ॥ २२ ॥
शिल्पिनां कञ्चुकीनाञ्च वेश्यानां गृहपञ्चकम्।
अष्टाविंशत् कराणान्तु विहीनं विस्तरे क्रमात् ॥ २३ ॥

द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तत्।
दूतीकर्मान्तिकादीनां वक्ष्ये भवन पञ्चकम्॥ २४॥
चतुर्थांशाधिकं दैर्घ्यं विस्तारोद्दादशैव तु।
अर्धार्धकरहानिःस्या द्विस्तारात्पञ्चशः क्रमात्॥२५॥
दैवज्ञ गुरुवैद्यानां सभास्तार पुरोधसाम्।
तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम्॥ २६॥
चत्वारिंशत्तुविस्ताराच्चतु र्भिर्हीयते क्रमात्।
पञ्चस्वेतेषु दैर्घ्यं च षड्भागे नाधिकं भवेत्॥ २७॥
चतुर्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम्।
द्वात्रिंशतिकराणान्तु चतुर्भिर्हीयते क्रमात्॥ २८॥
आषोड़शादितिपरं नूनमन्तेवसायिनाम्।
दशांशेनाष्टभागेन त्रिभागेनाथ पादिकम्॥ २९॥
अधिकं दैर्घ्यमित्याहु र्ब्राह्मणादेः प्रशस्यते।
सेनापतेर्नृपस्यापि गृहयोरन्तरेण तु॥ ३०॥
नृपवासगृहं कार्य्यं भाण्डागारन्तथैव च॥ ३०॥
सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरे।
वासाय च गृहं कार्यं राजपूज्येषु सर्वदा॥ ३१॥
अन्तरप्रभवानाञ्च स्व पितु र्गृहमिष्यते।
तथा हस्तशतादर्द्धं गदितं वनवासिनाम्॥ ३२॥
सेनापतेर्नृपस्यापि सप्तत्यासहितेऽन्विते।
चतुर्दश हृतेव्यासे शालाव्यासः प्रकीर्तितः॥ ३३॥
पञ्चत्रिंशान्विते तस्मि न्नलिन्दः समुदाहृतः।
तथा षट्त्रिंशद्धस्ता तु सप्ताङ्गुल समन्विता॥ ३४॥
विप्रस्य महती शाला न दैर्घ्यं परतोभवेत्।

दशाङ्गुलाधिका तद्वत् क्षत्रियस्य न विद्यते ॥ ३५ ॥
पञ्चत्रिंशत्करावैश्ये अङ्गुलानि त्रयोदश ।
तावत्करैव शूद्रस्य युतापञ्च दशाङ्गुलैः ॥ ३६ ॥
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत् ।
सोष्णीषंनाम तद्वास्तु पश्चाच्छ्रेयो श्रयं भवेत् ॥ ३७ ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते ।
समन्ताद्वीथिकायत्र सुस्थितं तदिहोच्यते ॥ ३८ ॥
शुभदंसर्वमेतत्स्यात् चातुर्वर्ण्ये चतुर्विधम् ।
विस्तरात् षोड़शोभाग स्तथाहस्त चतुष्टयम् ॥ ३९ ॥
प्रथमोभूमिकोच्छ्राय उपरिष्टात्प्रहीयते ।
द्वादशांशेनसर्वासु भूमिकासु तथोच्छ्रयः ॥ ४० ॥
पक्वेष्टकाभवेद्भित्तिः षोड़शांशेन विस्तरात् ।
दारवैरपिकल्प्यास्या स्तथामृन्मय भित्तिका ॥ ४१ ॥
गर्भमानेन मानन्तु सर्वेषास्तुषु शस्यते ।
गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः ॥ ४२ ॥
संयुतोद्वारविष्कम्भो द्विगुणश्चोच्छ्रयोभवेत् ।
द्वारशाखा सुबाहुल्य मुच्छ्राय करसम्मितैः ॥ ४३ ॥
अङ्गुलैः सर्वासू नां पृथुत्वं शस्यतेबुधैः ।
उदुम्बरोत्तमाङ्गञ्च तदर्धार्धं प्रविस्तरात् ॥ ४४ ॥

---

अथ चतुःपञ्चाशदधिक द्विशततमोऽध्यायः ।

सूतउवाच । अथातः संप्रवक्ष्यामि स्तम्भमान विनिर्णयम् ।
कृत्वास्वभुवनोच्छ्रायं सदा सप्त गुणं बुधैः ॥ १ ॥

अशीत्यंशः पृथुत्वंस्यादग्रेणावगुणैः सह ।
रुचकश्चतुरःस्यात्तुअष्टास्रो वज्र उच्यते ॥ २ ॥
द्विवज्रःषोड़शास्रस्तु द्वात्रिंशास्रः प्रलीनकः ।
मध्यप्रदेशे यस्तम्भो वृत्तोवृत्त इति स्मृतः ॥ ३ ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु ।
पद्मवल्लीलताकुम्भ पत्रदर्पण रूपिताः ॥ ४ ॥
स्तम्भस्य नवमांशेन पद्मकुम्भान्तराणि तु ।
स्तम्भतुल्या तुला प्रोक्ता हीना चोपतुला ततः ॥ ५ ॥
त्रिभागेनेह सर्वत्र चतुर्भागेन वा पुनः ।
हीनं हीनं चतुर्थांशात् तथासर्वासु भूमिषु ॥ ६ ॥
वासगेहानि सर्वेषां प्रवेशे दक्षिणेन तु ।
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु ॥ ७ ॥
पूर्वेणेन्द्रं जयन्तञ्च द्वारं सर्वत्रशस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ॥ ८ ॥
पश्चिमेपुष्पदन्तं च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यं तु शुभदम्भवेत् ॥ ९ ॥
तथावास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत् ।
द्वारे तु रथ्ययाविद्धे भवेत् सर्वकुलक्षयः ॥ १० ॥
तरुणाद्वेषबाहुल्यं शोकःपङ्केन जायते ।
अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा ॥ ११ ॥
व्यथाप्रस्रवणेन स्यात्कीलेनाग्नि भयं भवेत् ।
विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतं भवेत् ॥ १२ ॥
गृहभर्तुर्विनाशःस्यात् गृहेण च गृहे कृते ।

अमेध्यावस्करैर्विद्धे गृहिणी बन्धकी भवेत् ॥ १३ ॥
तथा शस्त्रमयं विन्द्यादन्त्यजस्य गृहेण तु ।
उच्छ्राया द्विगुणां भूमिं त्यक्त्वा वेधो न जायते ॥ १४ ॥
स्वयमुत्पाटिते द्वारे उन्मादो गृहवासिनाम् ।
स्वयं वापिहिते विद्यात् कुलनाशं विचक्षणः ॥१५॥
मानाधिके राजभयं न्यूने तस्करतो भवेत् ।
द्वारोपरि च यद्द्वारं तदन्तकमुखं स्मृतम् ॥ १६ ॥
अध्वनोमध्यदेशे तु अधिको यस्य विस्तरः ।
वज्रन्तु सङ्कटं मध्ये सद्योभर्तुर्विनाशनम् ॥ १७ ॥
तथान्यपीड़ितं द्वारं बहुदोषकरं भवेत् ।
मूलद्वारात्तथान्यत्तु नाधिकं शोभनं भवेत् ।
कुम्भश्रीपर्णिवल्लीभि र्मूलद्वारन्तु शोभयेत् ।
पूजयेच्चापि तन्नित्यं बलिनाचाक्षतोदकैः ॥१८॥
भवनस्य वटः पूर्वे दिग्भागे सर्वकामिकः ।
उदुम्बरस्तथा याम्ये वारुण्यां पिप्पलः शुभः ॥२०॥
प्लक्षः स्वोत्तरतोधन्यो विपरीतास्त्वसिद्धये ।
कण्टकीक्षीरवृक्षश्च आसनः सफलोद्रुमः ॥२१॥
भार्य्याहानौ प्रजाहानौ भवेतां क्रमशस्तदा ।
नच्छिन्द्यात्यदितानन्यानन्तरे स्थापयेच्छुभान् ॥२२॥
पुन्नागाशोकबकुल शमीतिलकचम्पकान् ।
दाड़िमीपिप्पलीद्राक्षा तथा कुसुममण्डपान् ॥२३॥

जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोज शतपत्रिकमल्लिकाभिः ।

यन्नालिकेरकदलीदलपाटलाभि-
र्युक्तं तदत्रभवनं श्रियमातनोति ॥ २४ ॥

---

अथ पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः।

सूत उवाच। उदगादिप्लवं वास्तु समानशिखरं तथा।
परीक्ष्य पूर्ववत्कुर्य्यात्स्तम्भोच्छ्रायं विचक्षणः ॥ १ ॥
न देवधूर्त्तसचिव चत्वराणां समन्ततः।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं ततः ॥ २ ॥
तस्य प्रदेशाश्चत्वारः स्तथोत्सर्गोऽग्रतः शुभः।
पृष्ठतः पृष्ठभागस्तु सव्यावर्त्तः प्रशस्यते ॥ ३ ॥
अपसव्यो विनाशाय दक्षिणेशीर्षक स्तथा।
सर्व्वकामफलोनृणां सम्पूर्णोनाम वामतः ॥ ४ ॥
एवं प्रदेशमालोक्य यत्नेन गृहमारभेत्।
अथ सांवत्सरेप्रोक्ते मुहूर्त्ते शुभलक्षणे। ५ ॥
रत्नोपरि शिलां कृत्वा सर्व्वबीजसमन्विताम्।
चतुर्भिर्ब्राह्मणैः स्तम्भं कारयित्वा सुपूजितम् ॥ ६ ॥
शुक्लाम्बरधरः शिल्पि सहितो वेदपारगैः।
स्नापितं विन्यसेत्तद्वत्सर्व्वौषधिसमन्वितम् ॥ ७ ॥
नानाक्षतसमोपेतं वस्त्रालङ्कारसंयुतम्।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिःस्वनैः ॥ ८ ॥
पायसं भोजयेद्विप्रान् होमन्तु मधुसर्पिषा।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्व्वदा ॥ ९ ॥
सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः।
द्वारवंशोच्छ्रये तद्वत्प्रवेशसमये तथा ॥ १० ॥

वास्तुपश्रमने तद्वद्वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपातः स्यादाग्नेयेस्तम्भरोपणम् ॥ ११ ॥
प्रदक्षिणञ्च कुर्वीत वास्तोः पदविलेखनम् ।
तर्जनीमध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥ १२ ॥
प्रवालरत्नकनकफलं पिष्टाक्षतोदकम् ।
सर्ववास्तु विभागेषु शस्तं पदविलेदने ॥ १३ ॥
नमस्याङ्गारकाष्ठेन नखशस्त्रेण चर्मभिः ।
न शृङ्गास्थिकपालैश्च क्वचिद्वास्तु विलेखयेत् ॥१४॥
एभिर्विलिखितं कुर्य्याद्दुःखशोकभयादिकम् ।
यदागृहप्रवेशः स्याच्छिल्पी तत्रापि लक्षयेत् ॥ १५ ॥
स्तम्भसूत्रादिकं तद्वच्छुभाशुभफलप्रदम् ।
आदित्याभिमुखं रौति शकुनिः पुरुषं यदि ॥ १६ ॥
तुल्यकालं स्पृशेदङ्गं गृहभर्तुर्यदात्मनः ।
वास्वङ्गे तद्विजानीयान्नरशल्यं भयप्रदम् ॥ १७ ॥
अङ्गनानन्तरं यत्र हस्त्यश्वश्वापदं भवेत् ।
तदङ्गसम्भवं विन्द्यात्तत्र शल्यं विचक्षणः ॥ १८ ॥
प्रसार्य्यमाणे सूत्रे तु श्वागोमायुविलङ्घिते ।
तत्तु शल्यं विजानीयात् खरशब्देति भैरवे ॥ १९ ॥
यदीशाने तु दिग्भागे मधुरं रौति वायसः ।
धनं तत्र विजानीयाद्भागे वास्वाध्यधिष्ठिते ॥ २० ॥
सूत्रच्छेदेभवेन्मृत्युर्व्याधिः कीले त्वधो मुखे ।
अङ्गारेषु तथोन्मादं कपालेषु च सम्भ्रमम् ॥ २१ ॥
कम्बुशल्येषु जानीयात् पौंश्चल्यं स्त्रीषु वास्तुवित् ।
गृहभर्तुर्गृहस्यापि विनाशः शिल्पिसम्भ्रमे ॥२२॥

स्तम्भे स्तम्भच्युते कुम्भे शिरोरोगं विनिर्दिशेत्।
कुम्भापहारे सर्वस्य कुलस्यापि क्षयो भवेत्॥ २३॥
मृत्युः स्यानच्युते कुम्भे भग्ने बन्धं विदुर्बुधाः।
कारसङ्ख्याविनाशे तु नाशं गृहपतेर्विदुः॥ २४॥
बीजौषधिविहीने तु भूतेभ्यो भयमादिशेत्।
ततः प्रदक्षिणेनान्यान् न्यसेत् स्तम्भान् विचक्षणः॥२५॥
यस्माद्भयकरं नृणां योजितास्त्वप्रदक्षिणम्।
रक्षां कुर्वीत यत्नेन स्तम्भोपद्रवनाशिनीम्॥२६॥
तथा फलवतीं शाखां स्तम्भोपरि निवेशयेत्।
प्रागुदक्प्रवणं कुर्य्याद्दिङ्मूढन्तु नकारयेत्॥२७॥
साम्भं वा भवनं वापि द्वारं वासगृहं तथा।
दिङ्मूढे कुलनाशः स्यान्नच संवर्द्धयेद् गृहम्॥२८॥
यदि संवर्द्धयेद्गेहं सर्वदिक्षु विवर्द्धयेत्।
पूर्व्वेण वर्द्धितं वास्तु कुर्य्याद्वैराणि सर्वदा॥२९॥
दक्षिणे वर्द्धितं वास्तु मृत्यवे स्यान्न संशयः।
पश्चाद्विवृद्धं यद्वास्तु तदर्थक्षयकारकम्॥ ३०॥
वर्द्धापितं तथा सौम्ये बहुसन्तापकारकम्।
आग्नेये यत्र वृद्धिः स्यात् तदग्निभयदम् भवे[त्]॥३१॥
वर्द्धितं राक्षसे कोणे शिशुक्षयकरं भवेत्।
वर्द्धापितन्तु वायव्ये वातव्याधिप्रकोपकृत्॥३२॥
ईशान्यां अन्नहानिः स्यात् वास्तौ संवर्द्धिते सदा।
ईशाने देवतागारं तथा शान्तिगृहं भवेत्॥ ३३॥
महानसन्तथाग्नेये तत्पार्श्वे चोत्तरे जलम्।
गृहस्योपस्करं सर्वं नैर्ऋत्ये स्थापयेद्बुधः॥ ३४॥

वधस्थानं बहिः कुर्य्यात् स्नानमण्डपमेव च ।
धनधान्यञ्च वायव्ये कर्मशालान्ततो बहिः ।
एवं वास्तु विशेषः स्यात् गृहभर्तुः शुभावहः ॥३५॥

---

अथ षट्पञ्चाशदधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः संप्रवक्ष्यामि दार्वाहरणमुत्तमम् ।
धनिष्ठापञ्चकं मुक्त्वा विष्ट्यादिकमतःपरम् ।
ततः सांवत्सरादिष्टे दिने यायाद्वनं बुधः ।
प्रथमं बलिपूजाञ्च कुर्य्याद्वृक्षस्य सर्वदा ॥ २ ॥
पूर्वोत्तरेण पतितं गृहदारु प्रशस्यते ।
अन्यथा न शुभं विन्द्यात् याम्योपरि निपातनम् ॥ ३॥
क्षीरवृक्षोद्भवं दारु न गृहे विनिवेशयेत् ।
कृताधिवासं विहगैरनिलानलपीड़ितम् ॥ ४ ॥
गजावरुग्णाञ्च तथा विद्युन्निर्घातपीड़ितम् ।
अर्द्धशुष्कं तथा दारुभग्नं शुष्कं तथैव च ॥ ५ ॥
चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा ।
श्मशानकूपनिलयं तड़ागादिसमुद्भवम् ॥ ६ ॥
वर्जयेत्सर्वथा दारु यदीच्छेद्विपुलां श्रियम् ।
तथा कण्टकिनो वृक्षान् नीपनिम्ब विभीतकान् ॥ ७॥
श्लेष्मातकानाम्र तरून् वर्जयेद्गृहकर्मणि ।
आसना शोक मधुक सर्जशालाः शुभावहाः ॥ ८ ॥
चन्दनं पनसन्धन्यं सुरदारु हरिद्रवः ।
द्वाभ्यामेकेन वा कुर्यात् त्रिभिर्वाभवनं शुभम् ॥ ६ ॥

बहुभिः कारितं यस्मादनेक भयदं भवेत्।
एकैव शिंशपा धन्या श्रीपर्णी तिन्दुकी तथा ॥ १०॥
एतानान्य समायुक्ताः कदाचिच्छुभ कारकाः।
स्यन्दनः पनसस्तद्वत्सरलार्जुन पद्मकाः॥ ११ ॥
एतैनान्य समायुक्ता वास्तु कार्ये फलप्रदाः।
तच्छेदे मधुपीते गोधा विन्द्याद्विचक्षणः॥ १२ ॥
माञ्जिष्ठ वर्णेभेकः स्यान्नीले सर्पादि निर्दिशेत्।
अरुणे सरठं विद्यान्मुक्ताभे शुकमादिशेत्॥ १३ ॥
कपिले मूषकान्विद्यात् खड्गाभे जलमादिशेत्।
एवंविधं स गर्भन्तु वर्जयेद्वास्तु कर्मणि॥ १४ ॥
पूर्वच्छिन्नन्तु गृह्णीयान्निमित्त शकुनैः शुभैः।
व्यासेन गुणिते दैर्घ्यं अष्टाभिर्विहृते तथा। १५ ॥
यच्छेष मायतं विद्यादष्ट भेदं वदामि वः।
ध्वजो धूमश्च सिंहश्च वृषभः खर एव च॥ १६ ॥
हस्तीध्वांक्षश्च पूर्वाद्याः करशेषा भवन्त्यमी।
ध्वजः सर्वमुख धन्यः प्रत्यग्द्वारो विशेषतः॥ १७ ॥
उदङ् मुखोभवेत्सिंहः प्राङ् मुखो वृषभो भवेत्।
दक्षिणाभिमुखो हस्ती सप्तभिःसमुदाहृतः॥ १८ ॥
एकेन ध्वजउद्दिष्ट स्त्रिभिःसिंह प्रकीर्तितः।
पञ्चभिर्वृषभःप्रोक्तो विकोणश्चास्य वर्जयेत्॥ १९ ॥
तमेवाष्टगुणंकृत्वा करराशिं विचक्षणः।
सप्त विंशाहृतेभागे ऋक्षं विद्याद्विच णः। २० ॥
अष्टभिर्भाजितेऋक्षेयःशेषःसव्ययो मतः।
व्ययाधिकं न कुर्वीत यतोदोष करम्भवेत्।

आयाधिके भवेच्छान्ति रित्याह भगवान् हरिः ॥ २१ ॥

कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं

दध्यक्षताम्रदल पुष्पफलोप शोभम् ।

कृत्वा हिरण्यवसनानि तदा द्विजेभ्यो

मङ्गल्यशान्ति निलयाय गृहं विशेत्तु ॥ २२ ॥

गृह्योक्तहोमविधिना बलि कर्म कुर्यात्

प्रासादवास्तु शमने च विधिर्य उक्तः ।

सन्तर्पयेद्द्विजवरानथ भोज्यभक्ष्यैः

शुक्लाम्बरः स्वभवनं प्रविशेत्सधूपम् ॥ २३ ॥

---

अथ सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ।

ऋषयऊचुः । क्रियायोगः कथंसिद्धो गृहस्थादिषु सर्वदा ।

ज्ञानयोग सहस्राद्धि कर्मयोगोविशिष्यते ॥ १ ॥

सूत उवाच । क्रियायोगं प्रवक्ष्यामि देवतार्चानु कीर्तनम् ।

भुक्तिमुक्तिप्रदं यस्मान्नान्यत् लोकेषु विद्यते ॥ २ ॥

प्रतिष्ठायां सुराणां तु देवतार्चानु कीर्तनम् ।

देवयज्ञोत्सवञ्चापि बन्धनाद्यो न मुच्यते ॥ ३ ॥

विष्णोस्तावत्प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।

शङ्खचक्रधरं शान्तं पद्महस्तं गदाधरम् ॥ ४ ॥

छत्राकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ।

तुङ्गनासं शुक्तिकर्णं प्रशान्तोरुभुजक्रमम् ॥ ५ ॥

क्वचिदष्टभुजंविद्या च्चतुर्भुज मथापरम् ।

द्विभुजश्चापि कर्तव्यो भवनेषु पुरोधसा ॥ ६ ॥

देवस्याष्टभुजस्यास्य यथास्थानं निबोधत।
खड्गोगदाशरःपद्मं दिव्यं दक्षिणतो हरेः॥ ७॥
धनुश्च खेटकञ्चैव शङ्खचक्रे च वामतः।
चतुर्भुजस्य वक्ष्यामि यथैवायुध संस्थितिः॥ ८॥
दक्षिणेन गदापद्मं वासुदेवस्य कारयेत्।
वामतः शङ्खचक्रे च कर्तव्ये भूतिमिच्छता॥ ९॥
कृष्णावतारे तु गदा वामहस्ते प्रशस्यते।
यथेच्छया शङ्खचक्रे चोपरिष्टात् प्रकल्पयेत्॥ १०॥
अधस्तात् पृथिवी तस्य कर्तव्या पादमध्यतः।
दक्षिणे प्रणतं तद्वद्गरुत्मन्तंनिवेशयेत्॥ ११॥
वामतस्तुभवेल्लक्ष्मीः पद्महस्ता शुभानना।
गरुत्मानग्रतोवापि संस्थाप्यो भूतिमिच्छता॥ १२॥
श्रीश्चपुष्टिश्च कर्तव्ये पार्श्वयोः पद्मसंयुते।
तोरणञ्चोपरिष्टात्तु विद्याधरसमन्वितम्॥ १३॥
देवदुन्दुभिसंयुक्तं गन्धर्वमिथुनान्वितम्।
पत्रवल्लीसमपेतं सिंहव्याघ्र समन्वितम्॥ १४॥
तथाकल्पलतोपेतं स्तुवद्भिरमरेश्वरैः।
एवंविधोभवेद्विष्णोस्त्रिभागेनास्य पीठिका॥ १५॥
नवतालप्रमाणास्तु देवदानव किन्नराः।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः॥ १६॥
जालान्तरप्रविष्टानां भानूनां यद्रजःस्फुटम्।
त्रसरेणुःसविज्ञेयो वालाग्रन्ते रथाष्टभिः॥ १७॥
तदष्टके न लिक्षातु यूकालिक्षाष्टकैर्मता।
यवोयूकाष्टकं तद्वदष्टभिस्तैस्तदङ्गुलम्॥ १८॥

स्वकीयाङ्गुलिमानेन मुखं स्या द्वादशाङ्गुलम् ।
मुखमानेनकर्तव्या सर्वावयवकल्पना ॥ १९ ॥
सौवर्णीराजतीवापि ताम्रीरत्नमयी तथा ।
शैलीदारुमयीचापि लोहसंघमयी तथा ॥ २० ॥
रीतिकाधातुयुक्ता वा ताम्रकांस्यमयी तथा ।
शुभदारुमयीवापि देवतार्चा प्रशस्यते ॥ २१ ॥
अङ्गुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥ २२ ॥
आषोडशा तु प्रासादे कर्तव्या नाधिका ततः ।
मध्योत्तमकनिष्ठा तु कार्याविक्तानुसारतः ॥ २३ ॥
द्वारोच्छ्रायस्य यन्मान मष्टधा तत्तु कारयेत् ।
भागमेकं ततस्त्यक्ता परिशिष्टन्तु यद्भवेत् ॥ २४ ॥
भागद्वयेन प्रतिमात्रिभागीकृत्य तत्पुनः ।
पीठिकाभागतःकार्या नातिनीचा नचोच्छ्रिता ॥ २५ ॥
प्रतिमामुखमानेन नवभागान् प्रकल्पयेत् ।
चतुरङ्गुला भवेद्ग्रीवाभागेन हृदयंपुनः ॥ २६ ॥
नाभिस्तस्मादधः कार्याभागेनैकेन शोभना ।
निम्नत्वे विस्तरत्वे च अङ्गुलं परिकीर्तितम् ॥ २७ ॥
नाभेरधस्तथामेढ्रं भागेनैकेन कल्पयेत् ।
द्विभागेनायतावूरू जानुनी चतुरङ्गुले । २८ ॥
जङ्घे द्विभागेविख्यातेपादौ च चतुरङ्गुलौ ।
चतुर्दशाङ्गुलस्तद्वन्मौलिरस्य प्रकीर्तितः ॥ २९ ॥
ऊर्द्ध्वमानमिदंप्रोक्तं पृथुत्वञ्च निबोधत ।
सर्वावयवमानेषु विस्तारं शृणुत द्विजाः ॥ ३० ॥

चतुरङ्गुलं ललाटं स्यादूर्ध्वं नासा तथैव च ।
द्व्यङ्गुलन्तु हनुर्ज्ञेयमोष्ठः स्याङ्गुलसम्मितः ॥ ३१ ॥
अष्टाङ्गुले ललाटे च तावन्मात्रे भ्रुवौ मते ।
अर्द्धाङ्गुला भ्रुवोर्लेखा मध्ये धनुरिवानता ॥ ३२ ॥
उन्नताग्रा भवेत्पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते ।
अक्षिणी द्व्यङ्गुलायामे तदर्धं चैव विस्तरे ॥ ३३ ॥
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारकार्धविभागेन दृष्टिः स्यात्पञ्चभागिका ॥ ३४ ॥
द्व्यङ्गुलन्तु भ्रुवोर्मध्ये नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथानतम् ॥ ३५ ॥
नासापुटबिलं तद्वदर्धाङ्गुल मुदाहृतम् ।
कपोले द्व्यङ्गुले तद्वत् कर्णमूलाद्विनिर्गते ॥ ३६ ॥
हन्वग्रमङ्गुलं तद्व द्विस्तारो द्व्यङ्गुलो भवेत् ।
अर्द्धाङ्गुला भ्रुवोराजी प्रणालसदृशी समा ॥ ३७ ॥
अर्द्धाङ्गुलसमस्तद्व दुत्तरोष्टस्तु विस्तरे ।
निष्पावसदृशन्तद्व न्नासापुटदलं भवेत् ॥ ३८ ॥
सृक्किणी ज्योतिसतुल्ये तु कर्णमूलात् षडङ्गुले ।
कर्णौ तु भ्रूसमौ ज्ञेयौ ऊर्द्धन्तु चतुरङ्गुलौ ॥ ३९ ॥
द्व्यङ्गुलौ कर्णपाशौ तु मात्रामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ॥ ४० ॥
ललाटात्पृष्ठतोऽर्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशदङ्गुलश्चास्य परिणाहः शिरोगतः ॥ ४१ ॥
सकेशनिचयो यस्य द्विचत्वारिंशदङ्गुलः ।
केशान्तात्हनुका तद्व दङ्गुलानि तु षोडश ॥ ४२ ॥

ग्रीवामध्यपरीणाहश्चतुर्विंशतिकाङ्गुलः ।
अष्टाङ्गुला भवेत्ग्रीवा पृथुत्वेन प्रशस्यते ॥ ४३ ॥
स्तनग्रीवान्तरंप्रोक्तमेकतालं स्वयम्भुवा ।
स्तनयोरन्तरंतद्वद्द्वादशाङ्गुलमिष्यते ॥ ४४ ॥
स्तनयोर्मण्डलंतद्वद्‌द्व्यङ्गुलंपरिकीर्तितम् ।
चूचुकौ मण्डलस्यान्तर्यवमात्रावुभौस्मृतौ ॥ ४५ ॥
द्वितालञ्चापि विस्तारा द्वक्षस्थल मुदाहृतम् ।
कक्षे षड़ङ्गुलेप्रोक्ते बाहुमूलस्तनान्तरे ॥ ४६ ॥
चतुर्दशाङ्गुलौपादावङ्गुष्ठौ तु त्रियङ्गुलौ ।
पञ्चाङ्गुलपरीणाह मङ्गुष्ठाग्रं तथोन्नतम् ॥ ४७ ॥
अङ्गुष्ठकसमातद्वदायामा स्यात्प्रदेशिनी ।
तस्याः षोड़शभागेन हीयते मध्यमाङ्गुली ॥ ४८ ॥
अनामिकाष्टभागेन कनिष्टाचापि हीयते ।
पर्वत्रयेणचाङ्गुल्योगुल्फौ द्व्यङ्गुलकौ मतौ ॥ ४९ ॥
पार्ष्णिर्द्व्यङ्गुलमात्रस्तु कलयोश्चः प्रकीर्तितः ।
द्विपर्वाङ्गुष्ठकःप्रोक्तः परीणाहश्च द्व्यङ्गुलः ॥ ५१ ॥
प्रदेशिनीपरीणाह स्त्र्यङ्गुलः समुदाहृतः ।
कन्यमाचाष्टभागेन हीयते क्रमशोद्विजाः ॥ ५१ ॥
अङ्गुलेर्नोच्छ्रयःकार्यो: ह्यङ्गुष्ठस्य विशेषतः ।
तदर्धेन तु शेषाणामङ्गुलीनान्तथोच्छ्रयः ॥ ५२ ॥
जङ्घाग्रे परिणाहस्तु अङ्गुलानि चतुर्दश ।
जङ्घामध्ये परीणाह स्तथैवाष्टादशाङ्गुलः ॥ ५३ ॥
जानुमध्ये परीणाह एकविंशतिरङ्गुलः ।
जानूच्छ्रयोऽङ्गुलःप्रोक्तो मण्डलन्तु त्रिरङ्गुलम् ॥ ५४ ।

ऊरुमध्यपरीणाहो ह्यष्टाविंशतिकाङ्गुलः।
एकविंशोपरिष्टाच्च वृषणौ तु त्रिरङ्गुलौ ॥ ५५ ॥
द्व्यङ्गुलश्च तथामेढ्रं परीणाहः षडङ्गुलम्।
मणिबन्धा दर्धोविद्यात् केशरेखा स्तथैव च ॥५६॥
मणिकोशपरीणाह श्चतुरङ्गुल इष्यते।
विस्तरेण भवेत्तद्वत्कटिरष्टादशाङ्गुला ॥ ५७ ॥
द्वाविंशति तथास्त्रीणां स्तनौ च द्वादशाङ्गुलौ।
नाभिमध्यपरीणाहो द्विचत्वारिंश दङ्गुलः ॥ ५८ ॥
पुरुषे पञ्चपञ्चाशत् कण्ठाञ्चैव तु वेष्टनम्।
कक्षयोरुपरिष्टात्तु स्कन्धौप्रोक्तौ षडङ्गुलौ ॥ ५९ ॥
अष्टाङ्गुलात्तु विस्तारे ग्रीवाञ्चैव विनिर्दिशेत्।
परीणाहेतथाग्रीवां कला द्वादश निर्दिशेत् ॥६०॥
आयामोभुजयोस्तद्वत् द्विचत्वारिंशदङ्गुलः।
कार्यन्तु बाहुशिखरं प्रमाणे षोड़शाङ्गुलम् ॥ ६१ ॥
ऊर्द्धं यद्बाहुपर्यन्तं विन्द्यादष्टाङ्गुलं शतम्।
तथैकाङ्गुलहीनन्तु द्वितीयं पर्व उच्यते ॥ ६२ ॥
बाहुमध्ये परिणाहो भवेदष्टादशाङ्गुलः।
षोड़शोक्तःप्रबाहुस्तु षट्कलोग्र करोमतः ॥ ६३ ॥
सप्ताङ्गुलं करतलं पञ्च मध्याङ्गुली मता।
अनामिकामध्यमायाः सप्तभागेन हीयते ॥ ६४ ॥
तस्यास्तु पञ्चभागेन कनिष्ठा परिहीयते।
मध्यमायास्तु हीनावै पञ्चभागेन तर्जनी ॥६५॥
अङ्गुष्ठस्तर्जनीमूला दधःप्रोक्तस्तु तत्समः।
अङ्गुष्ठपरिणाहस्तु विज्ञेय श्चतुरङ्गुलः ॥ ६६ ॥

शेषाणां अङ्गुलीनान्तु भागो भागेन हीयते ।
मध्यमामध्यभागन्तु अङ्गुलद्वयमायतम् ॥ ६७ ॥
यवो यवेनसर्वासान्तस्या स्तस्याः प्रहीयते ।
अङ्गुष्ठपर्वमध्यन्तु तर्जन्या सदृशं भवेत् ॥ ६८ ॥
यवद्वयाधिकं तद्व दग्रपर्व उदाहृतम् ।
पर्वार्धेतु नखान्विद्या दङ्गुलीषु समन्ततः ॥ ६९ ॥
स्निग्धं श्लक्ष्णं प्रकुर्वीत ईषद्रक्तं तथाग्रतः ।
निम्नपृष्ठं भवेन्मध्ये पार्श्वतः कलयोच्छ्रितम् ॥ ७० ॥
तथैव केशवल्लीयं स्कन्धोपरि दशाङ्गुला ।
स्त्रियःकार्यास्तु तन्वङ्ग्यः स्तनोरुजघनाधिकाः ॥ ७१ ॥
चतुर्दशाङ्गुलाया मसुदरंनाम निर्दिशेत् ।
नानाभरणसम्पन्नाः किञ्चित्श्लक्ष्णभुजास्ततः ॥ ७२ ॥
किञ्चिद्दीर्घं भवेत्वक्त्रमलकावलिरुत्तमा ।
नासाग्रीवा ललाटञ्च सार्द्धमात्रं त्रिरङ्गुलम् ॥ ७३ ॥
अध्यर्द्धाङ्गुलविस्तारः शस्तोऽधरपल्लवः ।
अधिकंनेत्रयुग्मन्तु चतुर्भागेण निर्दिशेत् ।
ग्रीवावलिश्च कर्तव्या किञ्चिदर्धाङ्गुलोच्छ्रया ॥ ७४ ॥
एवं नारीषु सर्वासु देवानां प्रतिमासु च ।
तवचालमिदं प्रोक्तं लक्षणं पापनाशनम् ॥ ७५ ॥

---

अथ अष्टपञ्चाशदधिकद्विशततमोऽध्यायः ।

सूतउवाच । अतःपरंप्रवक्ष्यामि देवाकारान् विशेषतः ।
दशतालःस्मृतो रामो बलिर्वैरोचनि स्तथा ॥ १ ॥

वराहो नारसिंहश्च सप्ततालस्तु वामनः।
मत्स्यकूर्मौ च निर्दिष्टौ यथाशोभं स्वयम्भुवा ॥ २ ॥
अतःपरं प्रवक्ष्यामि रुद्राद्या कारमुत्तमम्।
स पीनोरुभुज स्कन्धस्तप्तकाञ्चनसप्रभः ॥ ३ ॥
शुक्लोऽर्करश्मि संघातश्चन्द्राङ्कितजटोविभुः।
जटामुकुटधारी च ह्यष्टवर्षाकृतिश्च सः ॥ ४ ॥
बाहुवारणहस्ताभो वृत्तजङ्घोरुमण्डलः।
ऊर्द्धकेशश्च कर्तव्यो दीर्घायत विलोचनः ॥ ५ ॥
व्याघ्रचर्मपरीधानः कटिसूत्र त्रयान्वितः।
हारकेयूरसम्पन्नो भुजङ्गाभरणस्तथा ॥ ६ ॥
बाहवश्चापि कर्तव्या नानाभरण भूषिताः।
पीनोरुगण्डफलकः कुण्डलाभ्या मलङ्कृतः ॥ ७ ॥
आजानुलम्बबाहुश्च सौम्यमूर्त्तिः सुशोभनः।
खेटकंवामहस्ते तु खड्गञ्चैव तु दक्षिणे ॥ ८ ॥
शक्तिंदण्डं त्रिशूलञ्च दक्षिणेषु निवेशयेत्।
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ॥ ९ ॥
एकश्च वरदोहस्त स्तथाक्षवलयोऽपरः।
वैशाखस्थानकं कृत्वा नृत्याभिनय संस्थितः ॥ १० ॥
नृत्यन्दशभुजः कार्यो गजचर्मधरस्तथा।
तथा त्रिपुरदाहे च बाहवः षोड़शैव तु ॥ ११ ॥
शङ्खं चक्रं गदाशार्ङ्गं घण्टातत्राधिकाभवेत्।
तथाधनुःपिनाकञ्च शरोविष्णुमयस्तथा ॥ १२ ॥
चतुर्भुजोऽष्टबाहु र्वाज्ञान योगेश्वरोमतः।
तीक्ष्णनासाग्रदशनः करालवदनो महान् ॥ १३ ॥

भैरवः शस्यते लोके प्रत्यायतन संस्थितः ।
न मूलायतने कार्यो भैरवस्तु भयङ्करः ॥ १४ ॥
नारसिंह वराहोवा तथान्येऽपि भयङ्कराः ।
नाधिकाङ्गा नहीनाङ्गाः कर्तव्या देवताः क्वचित् ॥१५॥
स्वामिनं घातयेत् न्यूना करालवदना तथा ।
अधिका शिल्पिनं हन्यात् कृशा चैवार्थ नाशिनी ॥ १६ ॥
कृशोदरी तु दुर्भिक्षं निर्मांसा धननाशिनी ।
वक्रनासा तु दुःखाय सङ्क्षिप्ताङ्गी भयङ्करी ॥१७॥
चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी ।
दुःखदा हीनवक्त्रा तु पाणिपादकृशा तथा ॥ १८ ॥
हीनाङ्गा हीनजङ्घा च भ्रमोन्माद करी नृणाम् ।
शुष्कवक्त्रा तु राजानं कटिहीना च याभवेत् ॥ १९ ॥
पाणिपादविहीनो यो जायते मारकोमहान् ।
जङ्घाजानुविहीना च शत्रुकल्याण कारिणी ॥ २० ॥
पुत्रमित्रविनाशाय हीनवक्षस्थला तु या ।
सम्पूर्णावयवा यातु आयुर्लक्ष्मीप्रदा सदा ॥ २१ ॥
एवं लक्षणमासाद्य कर्तव्यः परमेश्वरः ।
स्तूयमानःसुरैःसर्वैः समन्ताद्दर्शयेद्भवम् ॥ २२ ॥
शक्रेण नन्दिनाचैव महाकालेन शङ्करम् ।
प्रणतालोकपालास्तु पार्श्वे तु गणनायकाः ॥ २३ ॥
नृत्यत्भृङ्गीरिटिश्चैव भूतवेताल संवृताः ।
सर्वेहृष्टास्तु कर्तव्यास्तुवन्तः परमेश्वरम् ॥ २४ ॥

गन्धर्वविद्याधर किन्नराणा
मथाप्सरो गुह्यकनायकानाम् ।

गणैरनेकैः शतशो महेन्द्रै
मुनि प्रवीरैरपि नम्यमानम् ॥ २५ ॥
घृताक्षसूत्रैः शतशः प्रवाल
पुष्पोपहार प्रचयन्ददद्भिः।
संस्तूयमानं भगवन्तमीड्यं
नेत्रत्रयेणामरमर्त्यं पूज्यम् ॥ २६ ॥

अथ ऊनषष्ट्यधिकद्विशततमोऽध्यायः।

सूतउवाच। अधुना सम्प्रवक्ष्यामि अर्धनारीश्वरं परम्।
अर्धेन देव देवस्य नारीरूपं सुशोभनम् ॥ १ ॥
ईशार्धे तु जटाभागो बालेन्दुकलयायुतः।
उमार्धे चापि दातव्यौ सीमन्ततिलकावुभौ ॥ २ ॥
वासुकिर्दक्षिणे कर्णे वामे कुण्डलमादिशेत्।
बालिका चोपरिष्टात्तु कपालं दक्षिणे करे।
त्रिशूलं वापि कर्तव्यं देवदेवस्य शूलिनः ॥ ३ ॥
वामतो दर्पणं दद्यादुत्पलन्तु विशेषतः ॥४॥
वामबाहुश्च कर्तव्यः केयूरवलयान्वितः।
उपवीतञ्च कर्तव्यं मणिमुक्तामयन्तथा ॥ ५ ॥
स्तनभारं तथार्धे तु वामे पीनं प्रकल्पयेत्।
परार्ध्यमुज्ज्वलङ्कुर्यात् श्रोण्यर्धे तु तथैव च ॥ ६ ॥
लिङ्गार्धमूर्ध्वगं कुर्यात् व्यालाजिनकृताम्बरम्।
वामे लम्बपरीधानं कटिसूत्रत्रयान्वितम् ॥ ७ ॥
नानारत्नसमोपेतं दक्षिणे भुजगान्वितम्।

देवस्य दक्षिणं पादं पद्मोपरि सुसंस्थितम् ॥ ८ ॥
कश्चिदर्द्धे तथा वामं भूषितं नूपुरेण तु ।
रत्नैर्विभूषितान् कुर्य्यादङ्गुलीष्वङ्गुलीयकान् ॥ ९ ॥
सालक्तकं तथा पादं पार्वत्या दर्शयेत्सदा ।
अर्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम् ॥ १० ॥
उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः ! ।
संस्थानन्तु तयोर्वक्ष्ये लीलाललित विभ्रमम् ॥ ११ ॥
चतुर्भुजं द्विबाहुं वा जटाभारेन्दु भूषणम् ।
लोचनत्रयसंयुक्त सुमैञ्च स्कन्धपाणिनम् ॥ १२ ॥
दक्षिणेनोत्पलं शूलं वामेकुचभरे करम् ।
द्वीपिचर्मपरीधानं नानारत्नोपशोभितम् ॥ १३ ॥
सुप्रतिष्ठं सुवेषञ्च तथार्धेन्दु कृताननम् ।
वामेतु संस्थितादेवी तस्योरौ बाहुगूहिता ॥ १४ ॥
शिरोभूषणसंयुक्तैरलकैर्ललिताननां ।
सवालिका कर्णवती ललाट तिलकोज्ज्वला ॥ १५ ॥
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित् ।
हारकेयूर बहुला हरवक्त्रावलोकिनी ॥ १६ ॥
वामांसन्देवदेवस्य स्पृशन्ती लीलया ततः ।
दक्षिणन्तु बहिःकृत्वा बाहुं दक्षिणतस्तथा ॥ १७ ॥
स्कन्धं वा दक्षिणेकुक्षौ स्पृशन्त्यङ्गुलजैः क्वचित् ।
वामे तु दर्पणं दद्यात् उत्पलं वा सुशोभनम् ॥ १८ ॥
कटिसूत्रत्रयञ्चैव नितम्बे स्यात्प्रलम्बकम् ।
जया च विजयाचैव कार्तिकेय विनायकौ ॥ १९ ॥
पार्श्वयोर्दर्शयेत्तत्र तोरणेगण गुह्यकान् ।

माला विद्याधरी स्तद्वद्वीणावानप्सरोगणः ॥ २० ॥
एतद्रूपमुमेशस्य कर्तव्यं भूतिमिच्छता।
शिवनारायणं वक्ष्ये सर्वपाप प्रणाशनम् ॥ २१ ॥
वामार्धे माधवं विद्यात् दक्षिणे शूलपाणिनम्।
बाहुद्वयञ्च कृष्णस्य मणिकेयूर भूषितम् ॥ २२ ॥
शङ्खचक्रधरं शान्त मारक्ताङ्गुलि विभ्रमम्।
चक्रस्थाने गदां वापि पाणौ दद्याद्गदाभृतः ॥२३॥
शङ्खञ्चैवेतरे दद्यात् कट्यर्धं भूषणोज्वलम्।
पीतवस्त्रपरीधानं चरणं मणिभूषणम् ॥ २४ ॥
दक्षिणार्धे जटाभार मर्धेन्दुकृतभूषणम्।
भुजङ्गहारवलयं वरदं दक्षिणं करम् ॥ २५ ॥
द्वितीयञ्चापि कुर्वीत त्रिशूलवरधारिणम्।
व्यालोपवीतसंयुक्तं कट्यर्धं कृत्तिवाससम् ॥ २६ ॥
मणिरत्नैश्च संयुक्तं पादं नाग विभूषितम्।
शिवनारायणस्यैवं कल्पयेद्रूप मुत्तमम् ॥ ७ ॥
महावराहं वक्ष्यामि पद्महस्तं गदाधरम्।
तीक्ष्णदंष्ट्राग्रघोणास्यं मेदिनीवामकूर्परम् ८
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीमुत्पलान्विताम्।
विस्मयोत्फुल्लवदना मुपरिष्टात्प्रकल्पयेत् ॥ ९ ॥
दक्षिणं कटिसंस्थन्तु करं तस्याः प्रकल्पयेत्।
कूर्मोपरि तथा पादमेकं नागेन्द्रमूर्धनि ॥ ३० ॥
संस्तूयमानं लोकेशैः समन्तात्परिकल्पयेत्।
नारसिंहन्तु कर्तव्यं भुजाष्टक समन्वितम् ॥ ३१ ॥
रौद्रं सिंहासनं तद्वत् विदारितमुखेक्षणम्।

जटाजूट समायुक्ता मर्द्धेन्दुकृतलक्षणाम् ॥ ५६ ॥
लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम् ।
अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनाम् ॥ ५७ ॥
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ।
सुचारुदशनान्तद्वत्पीनोन्नत पयोधराम् ॥ ५८ ॥
त्रिभङ्गस्थान संस्थानां महिषासुर मर्दिनीम् ।
त्रिशूलं दक्षिणे दद्यात् खङ्गं चक्रं तथैव च ॥ ५९ ॥
तीक्ष्णं बाणं तथाशक्तिं वामतोऽपि निबोधत ।
खेटकं पूर्णचापञ्च पाश मङ्कुशमेव च ॥६०॥
घण्टां वा परशुञ्चापि वामतः सन्निवेशयेत् ।
अधस्तान्महिषन्तद्वद्विशिरस्कं प्रदर्शयेत् ॥६१॥
शिरच्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् ॥ ६२ ॥
वेष्टितं नागपाशेन भृकुटी भीषणाननम् ।
वमद्रुधिरवक्त्रञ्च देव्याःसिंहं प्रदर्शयेत् ॥ ६३ ॥
देव्यास्तु दक्षिणंपादं समंसिंहोपरि स्थितम् ।
किञ्चिदूर्द्ध्वं तथावाम मङ्गुष्ठं महिषोपरि ॥ ६४ ॥
स्तूयमानञ्चतद्रूप ममरैःसन्निवेशयेत् ।
इदानींसुरराजस्य रूपं वक्ष्ये विशेषतः ॥ ६५ ॥
सहस्रनयनं देवं मत्तवारणसंस्थितम् ।
पृथूरुवक्षोवदनं सिंहस्कन्धं महाभुजम् ॥ ६६ ॥
किरीट कुण्डलधरं पीवरोरु भुजेक्षणम् ।
वज्रोत्पलधरं तद्वन्नानाभरण भूषितम् ॥ ६७ ॥
पूजितं देवगन्धर्वै रप्सरोगण सेवितम् ।

छत्र चामरधारिण्यः स्त्रियः पार्श्वे प्रदर्शयेत् ॥ ६८ ॥
सिंहासनगतश्चापि गन्धर्वगणसंयुतम्।
इन्द्राणीं वामतश्चास्य कुर्य्यादुत्पल धारिणीम् ॥ ६९ ॥

---

अथ षष्ठ्यधिकद्विशततमोऽध्यायः।

सूतउवाच। प्रभाकरस्य प्रतिमा मिदानीं शृणुत द्विजाः!।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥ १ ॥
सप्ताश्वञ्चैकचक्रञ्च रथं तस्य प्रकल्पयेत्।
मुकुटेन विचित्रेण पद्मगर्भ समप्रभम् ॥ २ ॥
नानाभरणभूषाभ्यां भुजाभ्यां धृतपुष्करम्।
स्कन्धस्थे पुष्करे ते तु लीलयैव धृते सदा ॥३॥
चोलक च्छन्नवपुषं क्वचित् चित्रेषु दर्शयेत्।
वस्त्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥ ४ ॥
प्रतिहारौ च कर्तव्यौ पार्श्वयोर्दण्डि पिङ्गलौ।
कर्तव्यौ खड्गहस्तौ तौ पार्श्वयोः पुरुषावुभौ ॥ ५ ॥
लेखनीकृत हस्तञ्च पार्श्वे धातार मव्ययम्।
नानादेवगणैर्युक्तमेवं कुर्याद्दिवाकरम् ॥ ६ ॥
अरुणः सारथिश्चास्य पद्मिनी पत्रसन्निभः।
अश्वौ सुवलयग्रीवावन्तस्थौ तस्य पार्श्वयोः ॥ ७ ॥
भुजङ्गरज्जुभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः।
पद्मस्थं वाहनस्थं वा पद्महस्तं प्रकल्पयेत् ॥ ८ ॥
वह्नेस्तु लक्षणं वक्ष्ये सर्वकाम फलप्रदम्।
दीप्तं सुवर्णवपुषमर्धं चन्द्रासने स्थितम् ॥ ९ ॥

बालार्क सदृशं तस्य वदनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्चधरं तथा ॥ १० ॥
कमण्डलुं वामकरे दक्षिणेत्वक्ष सूत्रकम् ।
ज्वालावितानसंयुक्त मजवाहन मुज्वलम् ॥ ११ ॥
कुण्डस्थं वापिकुर्वीत मूर्ध्नि सप्तशिखान्वितम् ।
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ॥ १२ ॥
महामहिषमारूढं कृष्णाञ्जनचयोपमम् ।
सिंहासनगतञ्चापि दीप्ताग्नि सम लोचनम् ॥ १३ ॥
महिष श्चित्रगुप्तश्च करालाः किङ्करास्तथा ।
समन्ताद्दर्शयेत्तस्य सौम्या सौम्यान् सुरासुरान् ॥ १४ ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैर्ऋतम् ।
नरारूढं महामायं रक्षोभिर्बहुभिर्वृतम् ॥ १५ ॥
खड्गहस्तं महानीलं कज्जलाचल सन्निभम् ।
नरयुक्त विमानस्थं पीताभरण भूषितम् ॥ १६ ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शङ्खस्फटिकवर्णाभं सितहाराम्बरावृतम् ॥ १७ ॥
झषासन गतं शान्तं किरीटाङ्गद धारिणम् ।
वायुरूपं प्रवक्ष्यामि धूम्रन्तु मृगवाहनम् ॥ १८ ॥
चित्राम्बरधरं शान्तं युवानं कुञ्चित भ्रुवम् ।
मृगाधिरूढं वरदं पताका ध्वजसंयुतम् ॥ १९ ॥
कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्या मलङ्कृतम् ।
महोदरं महाकायं निध्यष्टक समन्वितम् ॥ २० ॥
गुह्यक बहुभिर्युक्तं धनव्यय करै स्तथा ।
हारकेयूर रचितं सिताम्बरधरं सदा ॥ २१ ॥

गदाधरश्च कर्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्त विमानस्थं एवं रीत्या च कारयेत् ॥ २२ ॥
तथैवेशं प्रवक्ष्यामि धवलं धवलेक्षणम् ।
त्रिशूलपाणिनं देवं त्र्यक्षं वृषगतं प्रभुम् ॥ २३ ॥
मातृणां लक्षणं वक्ष्ये यथा वदनु पूर्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ॥ २४ ॥
हंसाधिरूढा कर्तव्या साक्षसूत्र कमण्डलुः ।
महेश्वरस्य रूपेण तथा माहेश्वरी मता ॥ २५ ॥
जटा मुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपाल शूल खट्वाङ्ग वरदाढ्या चतुर्भुजा ॥ २६ ॥
कुमाररूपा कौमारी मयूरवर वाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा मता ॥ २७ ॥
हारकेयूरसम्पन्ना कृकवाकु धरा तथा ।
वैष्णवी विष्णुसदृशा गरुडे समुपस्थिता ॥ २८ ॥
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासन गतावापि बालकेन समन्विता ॥ २९ ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरि संस्थिताम् ।
वराह सदृशी देवी शिरश्चामरधारिणी ॥ ३० ॥
गदाचक्रधरा तद्वद्दानवेन्द्र विनाशिनी ।
इन्द्राणीमिन्द्रसदृशीं वज्रशूल गदाधराम् ॥ ३१ ॥
गजासन गतां देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां दिव्याभरण भूषिताम् ॥ ३२ ॥
तीक्ष्णखड्गधरं तद्वद्वक्ष्ये योगेश्वरी मिमाम् ।
दीर्घजिह्वा मूर्ध्वकेशी मस्थिखण्डैश्च मण्डिताम् ॥ ३३ ॥

दंष्ट्रा करालवदनां कुर्य्याच्चैव कृशोदरीम् ।
कपालमालिनीं देवीं मुण्डमाला विभूषिताम् ॥ ३४ ॥
कपालं वामहस्ते तु मांस शोणितपूरितम् ।
मस्तिष्काक्तञ्च बिभ्राणां शक्तिकां दक्षिणे करे ॥ ३५ ॥
गृध्रस्था वायसस्था वा निर्म्मांसा विनतोदरी ।
करालवदना तद्वत्कर्त्तव्या सा त्रिलोचना ॥ ३६ ॥
चामुण्डा बद्धघण्टा वा द्वीपिचर्म्मधरा शुभा ।
दिग्वासाः कालिका तद्वद्रासभस्था कपालिनी ॥ ३७ ॥
सुरक्तपुष्पाभरणा वर्धनी ध्वजसंयुता ।
विनायकञ्च कुर्वीत मातृणामन्तिके सदा ॥ ३८ ॥
वीरेश्वरश्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्त स्त्रिशूली च मातृणा मग्रतो भवेत् ॥ ३९ ॥
श्रियं देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चित भ्रुवम् ॥ ४० ॥
पीनोन्नत स्तनतटां मणि कुण्डलधारिणीम् ।
सुमण्डलं मुखं तस्याः शिरः सीमन्त भूषणम् ॥ ४१ ॥
पद्मस्वस्तिक शङ्खैर्वा भूषितां कुण्डलालकैः ।
कञ्चुका बद्धगात्रौ च हार भूषौ पयोधरौ ॥ ४२ ॥
नागहस्तोपमौ बाहू केयूर कटकोज्ज्वलौ ।
पद्मं हस्ते प्रदातव्यं श्रीफलं दक्षिणे भुजे ॥ ४३ ॥
मेखलाभरणां तद्वत्तप्तकाञ्चन सप्रभाम् ।
नानाभरण सम्पन्नां शोभनाम्बर धारिणीम् ॥ ४४ ॥
पार्श्वे तस्याः स्त्रियः कार्य्याश्चामर व्यग्रपाणयः ।
पद्मासनोपविष्टातु पद्मसिंहासनस्थिता ॥ ४५ ॥

करिभ्यां स्नाप्यमानासौ भृङ्गाराभ्यामनेकशः।
प्रक्षालयन्तौ करिणौ भृङ्गाराभ्यां तथापरौ ॥ ४६ ॥
स्तूयमाना च लोकेशैस्तथा गन्धर्व गुह्यकैः।
तथैव यक्षिणीकार्या सिद्धा सुर निषेविता ॥ ४७ ॥
पार्श्वयोः कलशौ तस्या स्तोरणे देवदानवाः।
नागाश्चैवतु कर्तव्याः खड्गखेटक धारिणः ॥ ४८ ॥
अधस्तात्प्रकृतिस्तेषां नाभेरूर्ध्वन्तु पौरुषी।
फणाश्च मूर्ध्नि कर्तव्या द्विजिह्वा बहवः समाः ॥ ४९ ॥
पिशाचा राक्षसाश्चैव भूत वेताल जातयः।
निर्मांसाश्चैव ते सर्वे रौद्रा विकृतरूपिणः ॥ ५० ॥
क्षेत्रपालश्च कर्तव्यो जटिलो विकृताननः।
दिग्वासा जटिल स्तद्वच्छ्वागोमायुनिषेवितः ॥५१॥
कपालं वामहस्ते तु शिरः केशैः समावृतम्।
दक्षिणे शक्तिकां दद्यादसुरक्षय कारिणीम् ॥ ५२ ॥
अथातः सम्प्रवक्ष्यामि द्विभुजं कुसुमायुधम्।
पार्श्वे चाश्व मुखं तस्य मकरध्वज संयुतम् ॥ ५३ ॥
दक्षिणे पुष्पबाणश्च वामे पुष्पमयं धनुः।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥ ५४ ॥
रतिश्च वामपार्श्वेतु शयनं सारसान्वितम्।
पटश्च पटहश्चैव खरः कामातुरस्तथा ॥ ५५ ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च।
सुशोभनश्च कर्तव्यो भगवान् कुसुमायुधः ॥ ५६ ॥
संस्थानमीषद्वक्रं स्याद्विस्मयस्मित वक्त्रकम्।

एतदुद्देशतः प्रोक्तं प्रतिमा लक्षणं मया ।
विस्तरेण न शक्नोति बृहस्पतिरपि द्विजाः ! ॥ ५७ ॥

---

अथ एकषष्ठ्यधिकद्विशततमोऽध्यायः ।

सूतउवाच। पीठिका लक्षणं वक्ष्ये यथा वदनु पूर्वशः ।
पीठोच्छ्रायं यथा वत्स भागान् षोडश कारयेत् ॥१॥
भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता ।
वृत्तोभागस्तथैकः स्याद्वृत्तः पटलभागतः ॥ २ ॥
भागैस्त्रिभि स्तथा कण्ठः कण्ठपट्टस्त्रिभागतः ।
भागाभ्या मूर्ध्वपट्टश्च शेषभागेन पट्टिका ॥ ३ ॥
प्रविष्टं भागमेकैकं जगतीयावदेवतु ।
निर्गमस्तु पुनस्तस्य यावद्वै शेष पट्टिका ॥४॥
वारि निर्गमनार्थन्तु तत्र कार्य्यः प्रणालकः ।
पीठिकानान्तु सर्वासा मेतत्सामान्यलक्षणम् ॥ ५ ॥
विशेषान् देवताभेदान् शृणुध्वं द्विजसत्तमाः ! ।
स्थण्डिला वाथवापी वा यक्षीवेदी च मण्डला ॥ ६ ॥
पूर्णचन्द्रा च वज्रा च पद्मावार्ध शशिस्तथा ।
त्रिकोणा दशमी तासां संस्थानं वा निबोधत ॥ ७ ॥
स्थण्डिला चतुरस्रातु वर्जिता मेखलादिभिः ।
वापी द्वि मेखलाज्ञेया यक्षीचैव त्रिमेखला ॥ ८ ॥
चतुरस्राय तावेदीन तां लिङ्गेषु योजयेत् ।
मण्डलावर्तुलायातु मेखलाभिर्गुणा प्रिया ॥ ९ ॥
रक्ता द्विमेखलामध्ये पूर्णचन्द्रा तु सा भवेत् ।
मेखलात्रयसंयुक्ता षड्स्रावज्रिका भवेत् ॥ १० ॥

षोडशास्त्रा भवेत्पद्मा किञ्चिद्‌ह्रस्वा तु मूलतः।
तथैव धनुषाकारा सार्द्धचन्द्रा प्रशस्यते ॥११॥
त्रिशूलसदृशी तद्वत् त्रिकोणाच्चूर्द्ध्वतोमता।
प्रागुदक् प्रवणा तद्वत् प्रशस्तालक्षणान्विता॥ १२ ॥
परिवेषंत्रिभागेन निर्गमं तत्र कारयेत्।
विस्तारंतत् प्रमाणञ्च मूलेचाग्रे ततोर्ध्वतः॥ १३ ॥
जलमार्गश्च कर्तव्य स्त्रिभागेन सुशोभनः।
लिङ्गस्यार्द्धविभागेन स्थौल्येन समधिष्ठिता॥ १३ ॥
मेखला तत्रिभागेन खातञ्चैव प्रमाणतः।
अथवा पादहीनन्तु शोभनं कारयेत्सदा॥ १४ ॥
उत्तरस्थं प्रणालञ्च प्रमाणादधिकारयेत्।
स्थण्डिलायामथारोग्य धनं धान्यञ्च पुष्कलम्॥ ५ ॥
गोप्रदा च भवेद्यत्तीवेदीसंपत् प्रदाभवेत्।
मण्डलायां भवेत्कीर्ति र्वरदापूर्णचन्द्रिका॥ १६ ॥
आयुः प्रदाभवेद्दज्ञा पद्मासौभाग्यदा भवेत्।
पुत्रप्रदार्धचन्द्रा स्यात्त्रिकोणा शत्रुनाशिनी॥ १७ ॥
देवस्य जनार्थन्तु पीठिकादश कीर्तिताः।
शैले शैलेमयींदद्यात् पार्थिवे पार्थिवीं तथा॥ १८॥
दारुजे दारुजां कुर्यात् मिश्रेमिश्रां तथैवच।
नान्ययोनिस्तु कर्तव्या सदा शुभफलेप्सुभिः॥ १९ ॥
अर्च्चायामासमन्दैर्घ्यं लिङ्गाया मसमन्तथा।
यस्य देवस्य या पत्नी तां पीठेपरिकल्पयेत्।
एतत्सर्वंसमाख्यातं समासात्पीठलक्षणम्॥ २० ॥

अथ द्विषष्ट्यधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः संप्रवक्ष्यामि लिङ्गलक्षणमुत्तमम् ।
सुस्निग्धञ्च सुवर्णञ्च लिङ्गं कुर्याद्विचक्षणः ॥१॥
प्रासादस्य प्रमाणेन लिङ्गमानं विधीयते ।
लिङ्गमानेन वा विद्यात् प्रासादं शुभलक्षणम् ॥ २ ॥
चतुरस्रे तमे गर्त्ते ब्रह्मसूत्रं निपातयेत् ।
वामेन ब्रह्मसूत्रस्य अर्च्चा वा लिङ्गमेव च ॥३॥
प्रागुत्तरेण लीनन्तु दक्षिणा परयाश्रितम् ।
पुरस्थापरदिग्भागे पूर्वद्वारं प्रकल्पयेत् ॥ ४ ॥
पूर्वेणचापरंद्वारं माहेन्द्रं दक्षिणोत्तरम् ।
द्वारंविभज्य पूर्वन्तु एकविंशति भागिकम् ।
ततो मध्यगतं ज्ञात्वा ब्रह्मसूत्रं प्रकल्पयेत् ।
तस्यार्द्धन्तु त्रिधाकृत्वा भागञ्चोत्तरतस्त्यजेत् ॥ ६ ॥
एवं दक्षिणतस्त्यक्त्वा ब्रह्मस्थानं प्रकल्पयेत् ।
भागार्द्धेन तु यल्लिङ्गं कार्यन्तदिह शस्यते ॥ ७ ॥
पञ्चभागविभक्ते वा त्रिभागे ज्यैष्ठमुच्यते ।
भाजिते नवधा गर्भे मध्यमं पाञ्च भागिकम् ॥ ८ ॥
एकस्मिन्नेव नवधा गर्भे लिङ्गानि कारयेत् ।
समसूत्रं विभज्याथ नवधा गर्भभाजितम् ॥९॥
ज्येष्ठमर्द्धंकनीयोऽर्धं तथा मध्यममध्यमम् ।
एवं गर्भःसमाख्यात स्त्रिभिर्भागैर्विभाजयेत् ॥ १० ॥
ज्येष्ठन्तु त्रिविधं ज्ञेयं मध्यमन्त्रिविधन्तथा ।
कन्यसं त्रिविधं वद्दत् लिङ्गभेदा नवैव तु ॥११॥
नाभ्यर्धमष्टभागेन विभज्याथ सजं बुधैः ।

भागत्रयं परित्यज्य विष्कम्भश्चतुरस्रकम् ॥ १२ ॥
अष्टास्रं मध्यमं ज्ञेयं भागं लिङ्गस्य वै ध्रुवम्।
विकीर्णं चेत्ततोऽप्यस्य कोणाभ्यां लाञ्छयेद्बुधः ॥ १३ ॥
अष्टास्रं कारयेत्तद्वदूर्द्धमप्येवमेव तु।
षोड़शास्रीकृतं पश्चाद्वर्तुलं कारयेत्ततः ॥ १४ ॥
आयामो तस्य देवस्य नाभ्यां वै कुण्डलीकृतम्।
माहेश्वरं त्रिभागन्तु ऊर्द्धवृत्तं त्ववस्थितम् ॥ १५ ॥
अधस्ताद्ब्रह्मभागस्तु चतुरस्रो विधीयते।
अष्टास्रो वैष्णवो भागो मध्यस्तस्य उदाहृतः ॥ १६ ॥
एवं प्रमाणसंयुक्तं लिङ्गं वृद्धिप्रदम्भवेत्।
तथान्यदपि वक्ष्यामि गर्भमानं प्रमाणतः ॥ १७ ॥
गर्भमानप्रमाणेन य ल्लिङ्गमुचितं भवेत्।
चतुर्धा तद्विभज्याथ विष्कुम्भन्तु प्रकल्पयेत् ॥ १८ ॥
देवतायतने सूत्रं भागत्रय विकल्पितम्।
अधस्ताच्चतुरस्रन्तु अष्टास्रं मध्यभागतः ॥ १९ ॥
पूज्यभागस्ततोऽर्द्धन्तु नाभिभागस्तथोच्यते।
आयामे यद्भवेत् सूत्रं नाहस्य चतुरस्रके ॥ २० ॥
चतुरस्रार्द्धं परित्यज्य अष्टास्रस्य तु यद्भवेत्।
तस्याप्यर्द्धं परित्यज्य ततो वृत्तन्तु कारयेत् ॥ २१ ॥
शिरःप्रदक्षिणं तस्य संक्षिप्तं सूत्रेणोन्नयेत्।
ज्येष्ठपूज्यं भवेल्लिङ्ग मधस्तादिह पुलञ्च यत् ॥ २२ ॥
शिरसा च सदा निम्नं मनोज्ञं लक्षणान्वितम्।
सौम्यन्तु दृश्यते लिङ्गन्तद्वृद्धिदं भवेत् ॥२३॥

अथमूले च मध्ये तु प्रमाणेसर्वतःसमम्।
एवम्विधन्तु यल्लिङ्गं भवेत्तत्सार्वकामिकम्॥ २४॥
अन्यथा यद्भवेल्लिङ्गं तदसत्यं प्रचक्षते।
एवंरत्नमयंकुर्यात् स्फाटिकं पार्थिवं तथा॥ २५॥
शुभं दारुमयञ्चापि यद्वा मनसि रोचते।

---

अथ त्रिषष्ट्यधिकद्विशततमोऽध्यायः।

ऋषयऊचुः। देवतानामथैतासां प्रतिष्ठाविधिमुत्तमम्।
वद सूत! यथान्यायं सर्वेषामप्यशेषतः॥ १॥
सूतउवाच। अथातः संप्रवक्ष्यामि प्रतिष्ठाविधिमुत्तमम्।
कुण्डमण्डपवेदीनां प्रमाणञ्च यथा क्रमम्॥ २॥
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदाभवेत्॥ ३॥
प्राप्यपक्षं शुभंशुक्लमतीते दक्षिणायने।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा॥ ४॥
दशमीपौर्णमासी च तथाश्रेष्ठा त्रयोदशी।
आसु प्रतिष्ठा विधिवत् कृत्वाबहुफला लभेत्॥ ५॥
आषाढेद्वे तथा मूल मुत्तराद्वयमेव च।
ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा॥ ६॥
हस्ताश्विनीरेवती च पुष्योमृगशिरस्तथा।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते॥ ७॥
बुधोबृहस्पतिःशुक्र स्त्रयोऽप्येते शुभग्रहाः।
एभिर्निरीक्षितं लग्नं नक्षत्रञ्च प्रशस्यते॥ ८॥

ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं शकुनं लब्ध्वा वर्जयित्वाद्भुतादिकम् ॥ ९ ॥
शुभयोगे शुभस्थाने क्रूरग्रहविवर्जिते ।
लग्ने ऋक्षे प्रकुर्वीत प्रतिष्ठादिक मुत्तमम् ॥ १० ॥
अयने विषुवे तद्वत् षड़शीतिमुखे तथा ।
एतेषु स्थापनं कार्यं विधिदृष्टेन कर्मणा ॥ ११ ॥
प्राजापत्ये तु शयनं श्वेते तूत्थापनं तथा ।
मुहूर्ते स्थापनं कुर्यात् पुनर्ब्राह्मे विचक्षणः ॥ १२ ॥
प्रासादस्योत्तरे वापि पूर्वे वा मण्डपो भवेत् ।
हस्तान् षोड़शकुर्वीत् दशद्वादश वा पुनः ॥ १३ ॥
मध्ये वेदिकया युक्तः परिक्षिप्तः समन्ततः ।
पञ्चसप्तापि चतुरः करान् कुर्वीतवेदिकाम् ॥ १४ ॥
चतुर्भिस्तोरणैर्युक्तो मण्डपः स्याच्चतुर्मुखः ।
प्लक्षद्वारं भवेत्पूर्वं याम्ये चौदुम्बरं भवेत् ॥ १५ ॥
पश्चादश्वत्थघटितं नैयग्रोधं तथोत्तरे ।
भूमौ हस्तप्रविष्टानि चतुर्हस्तानि चोच्छ्रये ॥ १६ ॥
सूपलिप्तं तथा श्लक्ष्णं भूतलं स्यात् सुशोभनम् ।
वस्त्रैर्नानाविधैस्तद्वत् पुष्पपल्लव शोभितम् । १७ ॥
कृत्वैवं मण्डपं पूर्वं चतुर्द्वारेषु विन्यसेत् ।
अव्रणान् कलशानष्टौ ज्वलत्काञ्चन गर्भितान् ॥ १८ ॥
चूतपल्लवसंच्छन्नान् सितवस्त्रयुगान्वितान् ।
सर्वौषधिफलोपेतां श्चन्दनोदकपूरितान् ॥ १९ ॥
एवं निवेश्य तद्गर्भे गन्धधूपार्चनादिभिः ।

ध्वजादिरोहणं कार्यं मण्डपस्य समन्ततः ॥ २० ॥
ध्वजांश्च लोकपालानां सर्वदिक्षु निवेशयेत् ।
पताका जलदाकारा मध्येस्यान्मण्डपस्य तु ॥ २१ ॥
गन्धधूपादिकंकुर्यात् स्वैःस्वैर्मन्त्रैरनुक्रमात् ।
बलिश्चलोकपालेभ्यः स्व मन्त्रेण निवेदयेत् ॥ २२ ॥
ऊर्द्ध्वन्तु ब्रह्मणे देयं त्वधस्ताच्छेषवासुके: ।
संहितायान्तु येमन्त्रा तद्दैवत्याः श्रुतौस्मृताः ॥ २३ ॥
तैः पूजा लोकपालानां कर्त्तव्या च समन्ततः ।
त्रिरात्रमेकरात्रं वा पञ्चरात्र मथापि वा ॥ २४ ॥
अथवा सप्तरात्रन्तु कार्यंस्यादधिवासनम् ।
एवं सतोरणंकृत्वा अधिवास न मुत्तमम् ॥ २५ ॥
तस्याप्युत्तरतःकुर्यात् स्नानमण्डप मुत्तमम् ।
तदर्धेनत्रिभागेन चतुर्भागेन वा पुनः ॥ २६ ॥
आनीय लिङ्गमर्चां वा शिल्पिनः पूजयेद्बुधः ।
वस्त्राभरणरत्नैश्च येऽपि तत्परिचारकाः ॥ २७ ॥
क्षमध्वमिति तान् ब्रूयाद्यजमानोऽप्यतः परम् ।
देवं प्रस्तरणेकृत्वा नेत्रज्योतिः प्रकल्पयेत् ॥ २८ ॥
अस्त्रोद्धरणंवक्ष्ये लिङ्गस्यापि समासतः ।
सर्वतस्तु बलिं दद्यात्सिद्धार्थ घृतपायसैः ॥ २९ ॥
शक्लपुष्पैरलङ्कृत्य घृतगुग्गुल धूपितम् ।
विप्राणाञ्चार्चनं कुर्य्याद्दद्याच्छक्त्या च दक्षिणाम् ॥ ३० ॥
गां महीं कनकञ्चैव स्थापकाय निवेदयेत् ।
लक्षणं कारयेच्छक्त्या मन्त्रेणानेन वै द्विजः ।

ॐ नमो भगवते तुभ्यं शिवाय परमात्मने।
हिरण्य रेतसे विष्णो विश्वरूपाय ते नमः॥ ३२॥
मन्त्रोऽयं सर्वदेवानां नेत्रज्योतिष्वपि स्मृतः।
एवमामन्त्र्यदेवेशं काञ्चनेन विलेखयेत्॥ ३३॥
मङ्गल्यानि च वाद्यानि ब्रह्मघोषं सगीतकम्।
वृद्ध्यर्थं कारयेत् विद्वान् अमङ्गल्य विनाशनम्॥ ३४॥
लक्षणोद्धरणं वक्ष्ये लिङ्गस्य सुसमाहितः।
त्रिधा विभज्य पूज्यायां लक्षणं स्यात् विभाजकम्॥३५॥
लेखात्रयन्तु कर्तव्यं यवाष्टान्तर संयुतम्।
न स्थूलं न कृशं तद्वन्न वक्रं छेदवर्जितम्॥३६॥
निम्नं यव प्रमाणेन ज्येष्ठलिङ्गस्य कारयेत्।
सूक्ष्मास्ततस्तु कर्तव्या यथा मध्यमके न्यसेत्॥ ३७॥
अष्टभक्तं ततः कृत्वात्यक्त्वा भागत्रयं बुधः।
लम्बयेत्सप्तरेखास्तु पार्श्वयोरुभयोः समाः॥ ३८॥
तावत् प्रलम्बयेद्विद्वान् यावद्भाग चतुष्टयम्।
भ्रामयेत् पञ्चभागोर्ध्वं कारयेत्सङ्गमन्ततः॥ ३९॥
रेखयोः सङ्गमे तद्वत् पृष्ठे भागद्वयं भवेत्।
एवमेतत्समाख्यातं समासाल्लक्षणं मया॥ ४०॥

---

अथ चतुःषष्ट्यधिकद्विशततमोऽध्यायः।

सूतउवाच। अतः परं प्रवक्ष्यामि मूर्तिपानान्तु लक्षणम्।
स्थापकस्य समासेन लक्षणं शृणुत द्विजाः!॥१॥
सर्वावयवसम्पूर्णो वेदमन्त्र विशारदः।

पुराणवेत्ता तत्वज्ञोदम्भलोभ विवर्जितः ॥ २ ॥
कृष्णसारमयेदेशे उत्पन्नश्च शुभाकृतिः ।
शौचाचार परोनित्यं पाषण्डकुल निस्पृहः ॥ ३ ॥
समः शत्रौ च मित्रे च ब्रह्मोपेन्द्र हरप्रियः ।
ऊहापोहार्थतत्वज्ञो वास्तुशास्त्रस्य पारगः ॥ ४ ॥
आचार्य्यस्तु भवेन्नित्यं सर्वदोष विवर्जितः ।
मूर्त्तिपास्तु द्विजाश्चैव कुलीना ऋजवस्तथा ॥ ५ ॥
द्वात्रिंशत् षोडशाथापि अष्टौ वा श्रुतिपारगाः ।
ज्येष्ठमध्यकनिष्ठेषु मूर्त्तिपाः प्रकीर्त्तिताः ॥ ६ ॥
ततो लिङ्गमथार्चां वा नीत्वा स्नपनमण्डपम् ।
गीत मङ्गलशब्देन स्नपनं तत्र कारयेत् ॥ ७ ॥
पञ्चगव्य कषायेण मृद्भिर्भस्मोदकेन वा ।
शौचं तत्र प्रकुर्वीत वेदमन्त्र चतुष्टयात् ॥ ८ ॥
समुद्र ज्येष्ठमन्त्रेण आपोदिव्येति चापरः ।
यासां राजेतिमन्त्रस्तु आपोहिष्ठेति चापरः ॥ ९ ॥
एवं स्नाप्य ततोदेवं पूज्य गन्धानु लेपनैः ।
प्रच्छाद्य वस्त्रयुग्मेन अभिवस्त्रेत्युदाहृतम् ॥ १० ॥
उत्थापयेत्ततोदेव मुत्तिष्ठ ब्रह्मणस्पते ।
अमूरजेति च तथा रथे तिष्ठेति चापरः ॥ ११ ॥
रथे ब्रह्मरथेवापि धृतां शिल्पिगणेन तु ।
आरोप्यच ततो विद्वान्‌ क्रमेण प्रवेशयेत् ॥ १२ ॥
ततः प्रास्तीर्य्य शय्यायां स्थापयेच्छनकैर्बुधः ।
कुशानास्तीर्य पुष्पाणि स्थापयेत् प्राङ्मुखं ततः ॥ १३ ॥

ततस्तु निद्राकलशं वस्त्रकाञ्चनसंयुतम्।
शिरोभागे तु देवस्य जपन्नेवं निधापयेत्॥ १४ ॥
आपोदेवीति मन्त्रेण आपोऽस्मान् मातरोऽपि च।
ततो दुकूलपट्टैश्च छाद्य नेत्रोपधानकम्॥ १५ ॥
दद्याच्छिरसि देवस्य कौशेयं वा विचक्षणः।
मधुनासर्पिषाभज्य पूज्य सिद्धार्थकैस्ततः॥ १६ ॥
आप्यायस्वेति मन्त्रेण यातिरुद्र शिवेति च॥
उपविश्यार्चयेद्देवं गन्धपुष्पैः समन्ततः॥ १७ ॥
सितं प्रतिसरं दद्यात् बार्हस्पत्येति मन्त्रतः।
दुकूलपट्टैः कार्पासैर्नानाचित्रै रथापि वा॥ १८ ॥
आच्छाद्य देवं सर्वत्र छत्रचामरदर्पणम्।
पार्श्वतः स्थापयेत्तत्र वितानं पुष्पसंयुतम्॥१९॥
रत्नान्यौषधयस्तत्र गृहोपकरणानि च।
भाजनानि विचित्राणि शयनान्यासनानि च॥ २०॥
अभित्वा शूरमन्त्रेण यथा विभवतो न्यसेत्।
क्षीरं क्षौद्रं घृतं तद्वत् भक्ष्य भोज्यान्यपायसैः॥ २१ ॥
षड्विधैश्च रसैस्तद्वत् समन्तात् परिपूजयेत्।
बलिं दद्यात् प्रयत्नेन मन्त्रेणानेन भूरिशः॥ २२ ॥
त्र्यम्बकं यजामहे इति सर्वतः शनकैर्भुवि।
मूर्तिपान्स्थापयेत् पश्चात्सर्वदिक्षु विचक्षणः॥ २३ ॥
चतुरो द्वारपालांश्च द्वारेषु विनिवेशयेत्।
श्रीसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम्॥ २४ ॥
तथाच शान्तिकाध्याय मिन्द्रसूक्तं तथैव च।

रक्षोघ्नञ्च तथा सूक्तं पूर्वतो बहृचोजपेत्॥ २५॥
रौद्रं पुरुष सूक्तञ्च श्लोकाध्यायं सशुक्रियम्।
तथैव मण्डलाध्याय मध्वर्युर्दक्षिणे जपेत्॥ २६॥
वामदेवं बृहत्सामज्येष्ठसाम रथन्तरम्।
तथा पुरुष सूक्तञ्च रुद्रसूक्तं स शान्तिकम्॥ २७॥
भारुण्डानि च सामानिच्छन्दोगः पश्चिमे जपेत्।
अथर्वोऽङ्गिरसं तद्वन्नीलं रौद्रं तथैव च॥ २८॥
तथा पराजिता देवी सप्तसूक्तं सरौद्रकम्।
तथैव शान्तिकाध्याय मथर्वाचोत्तरे जपेत्॥ २९॥
शिरस्थाने तु देवस्य स्थापको होममाचरेत्।
शान्तिकैः पौष्टिकैस्तद्वन् मन्त्रैर्व्याहृति पूर्वकैः॥ ३०॥
पलाशोदुम्बराश्वत्थ अपामार्गः शमी तथा।
हुत्वा सहस्रमेकैकं देवं पादेतु संस्पृशेत्॥ ३१॥
ततो होम सहस्रेण हुत्वा हुत्वा ततस्ततः।
नाभिमध्यं तथा वक्षः शिरश्चाप्यालभेत् पुनः॥ ३२॥
हस्तमात्रेषु कुण्डेषु मूर्तिपाः सर्वतोदिशम्।
स मेखलेषु ते कुर्युर्योनिवक्त्रेषु चादरात्॥ ३३॥
वितस्तिमात्रा योनिः स्यात्षडष्टाङ्गुलविस्तृता तथा।
आयताच्छिद्रसंयुक्ता पार्श्वतः कलयोच्छ्रिता॥ ३४॥
कुण्डात् कलानुसारेण सर्वतश्चतुरङ्गुला।
विस्तारेणोच्छ्रयातद्वच्चतुरस्रा समाभवेत्॥ ३५॥
वेदीभित्तिं परित्यज्य त्रयोदशभिरङ्गुलैः।
एवं नवसु कुण्डेषु लक्षणञ्चैव दृश्यते॥ ३६॥

आग्नेय शाक्रयाम्येषु होतव्यमुदगाननैः।
शान्तयो लोकपालेभ्यो मूर्तिभ्यः क्रमशस्तथा॥ ३७॥
तथा मूर्त्यधिदेवानां होमं कुर्यात्समाहितः।
वसुधा वसुरेता च यजमानो दिवाकरः॥ ३८॥
जलं वायु स्तथासोम आकाशः श्चाष्टमः स्मृतः।
देवस्य मूर्तयस्त्वष्टा वेताः कुण्डेषु संस्मरेत्॥ ३९॥
एतासामधिपान्वच्मे पवित्रान्मूर्तिनामतः।
पृथ्वीं पाति च शर्वश्च पशुपश्चाग्निमेव च॥ ४०॥
यजमानं तथैवोग्रो रुद्रश्चादित्यमेव च।
भवोजलं सदा पाति वायुमीशानएव च॥ ४१॥
महादेव स्तथा चन्द्र भीमश्चाकाशमेव च।
सर्वदेव प्रतिष्ठासु मूर्ति पाश्चोतएव च॥ ४२॥
एतेभ्यो वैदिकैर्मन्त्रै र्यथास्वं होममाचरेत्।
तथा शान्तिघटं कुर्य्यात् प्रतिकुण्डेषु सन्न्यसेत्॥ ४३॥
शतान्ते वा सहस्रान्ते सम्पूर्णाहुति रिष्यते।
समपादः पृथिव्यान्तु प्रशान्तात्मा विनिक्षिपेत्॥ ४४॥
आहुतीनान्तु सम्पातं पूर्णकुम्भेषु वै न्यसेत्।
मूलमध्योत्तमाङ्गेषु देवं तेनावसेचयेत्॥४५॥
स्थितश्च स्नापयेत्तेन सम्पाताहुति वारिणा।
प्रतियामेषु धूपन्तु नैवेद्यञ्चदनोदकम्॥ ४६॥
पुनः पुनः प्रकुर्वीत होमः कार्यः पुनः पुनः।
पुनः पुनश्च दातव्या यजमानेन दक्षिणा॥ ४७॥
सितवस्त्रैश्च ते सर्वे पूजनीयाः समन्ततः।

विचित्रै र्हैमकटकै र्हैमसूत्राङ्गुलीयकैः ॥ ४८ ॥
वासोभिः शयनीयैश्च परिधाप्याः स्वशक्तितः ।
भोजनञ्चापि दातव्यं यावत्स्यादधि वासनम् ॥ ४९ ॥
बलि स्त्रिसन्ध्यं दातव्यो भूतेभ्यः सर्वतोदिशम् ।
ब्राह्मणान् भोजयेत्पूर्वं शेषान् वर्णांस्तु कामतः ॥ ५० ॥
रात्रौ महोत्सवः कार्यो नृत्यगीतक मङ्गलैः ।
सदा पूज्याः प्रयत्नेन चतुर्थी कर्म यावता ॥ ५१ ॥
त्रिरात्र मेकरात्रं वा पञ्चरात्र मथापिवा ।
सप्तरात्र मथो कुर्य्यात् क्वचित्सद्योऽधि वासनम् ।
सर्वयज्ञ फलो यस्मा दधिवासोत्सवः सदा ॥ ५२ ॥

---

अथ पञ्चषष्ट्यधिकद्विशततमोऽध्यायः ।

सूतउवाच । कृत्वाधि वासं देवानां शुभं कुर्य्यात् समाहितः ।
प्रासादस्यानुरूपेण मानं लिङ्गस्य वा पुनः ॥ १ ॥
पुष्पोदकेन प्रासादं प्रोक्ष्य मन्त्र युतेन तु ।
पातयेत्पञ्च सूत्रन्तु द्वारसूत्रं तथैव च ॥ २ ॥
आश्रयेत्किञ्चिदीशानीं मध्यं ज्ञात्वादिशं बुधः ।
ईशानी माश्रितं देवं पूजयन्ति दिवौकसः ॥ ३ ॥
आयुरारोग्यफलदमथोत्तर समाश्रितम् ।
शुभं स्याद शुभं प्रोक्त मन्यथा स्थापनं बुधैः ॥ ४ ॥
अधः कूर्म शिलाप्रोक्ता सदा ब्रह्म शिलाधिका ।
उपर्य्येव स्थिता तस्या ब्रह्मभागाधिका शिला ॥ ५ ॥

ततस्तु पिण्डिका कार्या पूर्वोक्तै र्नामलक्षणैः ।
ततः प्रक्षालितां कृत्वा पञ्चगव्येन पिण्डिकाम् ॥ ६ ॥
कषायतोयेन पुनर्मन्त्रयुक्तेन सर्वतः ।
देवतार्चाश्रयं मन्त्रं पिण्डिकासु नियोजयेत् ॥ ७ ॥
तत उत्थाप्य देवेशं उत्तिष्ठ ब्रह्मणेति च ।
आनीय गर्भभवनं पीठान्ते स्थापयेत्पुनः ॥ ८ ॥
अर्घ्यं पाद्यादिकं तत्र मधुपर्कं प्रयोजयेत् ।
ततो मुहूर्तं विश्रम्य रत्नन्यासं समाचरेत् ॥ ९ ॥
वज्र मौक्तिक वैदूर्य शङ्खस्फटिकमेव च ।
पुष्परागेन्द्र नीलञ्च नीलं पूर्वादि दिक् क्रमात् ॥ १० ॥
तालकञ्च शिलावज्र मञ्जनं श्याममेव च ।
कांस्यीकाशी समाक्षीकं गैरिकञ्चादितः क्रमात् ॥११॥
गोधूमञ्च यवं तद्वत्तिलमुद्गं तथैवच ।
नीवारमथश्यामाकं सर्षपं व्रीहिमेव च ॥ १२ ॥
न्यस्य क्रमेण पूर्वादि चन्दनं रक्तचन्दनम् ।
अगरुञ्चाञ्जनञ्चापि उशीरञ्च ततः परम् ॥ १३ ॥
वैष्णवीं सह देवीञ्च लक्ष्मणाञ्च ततः परम् ।
स्वलोकपालनाम्नातु न्यसेदोङ्कार पूर्वकम् ॥ १४ ॥
सर्वबीजानि धातूंश्च रत्नान्योषधय स्तथा ।
काञ्चनं पद्मरागन्तु पारदं पद्ममेव च ॥ १५ ॥
कूर्मं धरां वृषं तत्रन्यसेत्पूर्वादितः क्रमात् ।
ब्रह्मस्थानेतु दातव्या संहता स्युः परस्परम् ॥ १६ ॥
कनकं विद्रुमं ताम्रं कांस्यञ्चैवार कूटकम् ।

रजतं विमलं पुष्यं लोहञ्चैव क्रमेण तु ॥ १७ ॥
काञ्चनं हरितालञ्च सर्वाभावेऽपि निक्षिपेत् ।
दद्याद्दीजौषधिस्थाने सह देवीं यवानपि ॥ १८ ॥
न्यास मन्त्रानतोवच्ये लोकपालात्मकानिह ।
इन्द्रस्तु सहसादीप्तः सर्वदेवाधिपो महान् ॥ १९ ॥
वज्रहस्तो महासत्व स्तस्मैनित्यं नमोनमः ।
आग्नेयः पुरुषोरक्तः सर्वदेवमयः शिखी ॥ २० ॥
धूमकेतुरनाधृष्य स्तस्मै नित्यं नमोनमः ।
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा ॥ २१ ॥
धर्मसाची विशुद्धात्मा तस्मै नित्यं नमोनमः ।
निर्ऋतिस्तु पुमान् कृष्णः सर्वरक्षोऽधिपो महान् ॥ २२ ॥
खड्गहस्तो महासत्व स्तस्मैनित्यं नमोनमः ।
वरुणो धवलोविष्णुः पुरुषो निम्नगाधिपः ॥ २३ ॥
पाशहस्तो महाबाहु स्तस्मैनित्यं नमोनमः ।
वायुश्च सर्ववर्णो वै सर्वगन्धवहः शुभः ॥ २४ ॥
पुरुषोध्वजहस्तश्च तस्मैनित्यं नमोनमः ।
गौरोयश्च पुमान् सौम्यः सर्वौषधि समन्वितः ॥ २५ ॥
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमोनमः ।
ईशान पुरुषः शुक्लः सर्वविद्याधिपो महान् ॥ २६ ॥
शूलहस्तो विरूपाक्ष स्तस्मैनित्यं नमोनमः ।
पद्मयोनि श्चतुर्मूर्तिर्वेदवासाः पितामहः ॥ २७ ॥
यज्ञाध्यक्ष श्चतुर्वक्त्र स्तस्मैनित्यं नमोनमः ।
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥ २८ ॥

पुष्पं धारयेन्मूर्ध्नि तस्मै नित्यं नमोनमः ।
ओङ्कार पूर्वकाश्चेते न्यासे बलि निवेदने ॥ २९ ॥
मन्त्राःस्युः सर्वकार्य्याणां वृद्धि पुत्र फलप्रदाः ।
न्यासं कृत्वातु मन्त्राणां पायसेनानुलेपितम् ॥ ३० ॥
पाटेनाच्छादयेत्स्तम्भं शुक्लेनोपरि यत्नतः ।
तत उत्थाप्य देवेशमिष्टदेशेतु शोभने ॥ ३१ ॥
ध्रुवा द्यौरिति मन्त्रेण स्तम्भोपरि निवेशयेत् ।
ततः स्थिरीकृतस्यास्य हस्तं दत्वातु मस्तके ॥ ३२ ॥
ध्यात्वा परम सद्भावाद्देव देवञ्च निष्कलम् ।
देवव्रतं तथा सोमं रुद्र सूक्त तथैव च ॥ ३३ ॥
आत्मानमीश्वरं कृत्वानानाभरण भूषितम् ।
यस्य देवस्य यद्रूपं तद्ध्याने संस्मरेत्तथा ॥ ३४ ॥
अतसीपुष्प सङ्काशं शङ्ख चक्र गदाधरम् ।
संस्थापयामि देवेशं देवोभूत्वा जनार्दनम् ॥ ३५ ॥
त्र्यक्षञ्च दशबाहुञ्च चन्द्रार्द्ध कृत शेखरम् ।
गणेशं वृषसंस्थञ्च स्थापयामि त्रिलोचनम् । ३६ ॥
ऋषिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरम् ।
पितामहं महाबाहुं स्थापयाम्यम्बुजोद्भवम् ॥ ३७ ॥
सहस्रकिरणंशान्त मप्सरोगण संयुतम् ।
पद्महस्तंमहाबाहुं स्थापयामि दिवाकरम् ॥ ३८ ॥
देवमन्त्रां स्तथारौद्रान् रुद्रस्यस्थापने जपेत् ।
विष्णोस्तु वैष्णवांस्तद्वत् ब्राह्मणान् वै ब्रह्मणोबुधैः॥३९॥
सौराः सूर्यस्यजप्तव्या स्तथान्येषु तदाश्रयाः ।

वेदमन्त्रप्रतिष्ठा तु यस्मादानन्ददायिनी ॥ ४० ॥
स्थापयेद्यन्तु देवेशन्तं प्रधानं प्रकल्पयेत् ।
तस्य पार्श्वस्थितानन्यान् संस्मरेत् परिवारित: ॥ ४१॥
गणं नन्दिमहाकालं वृषं भृङ्गिरिटिंगुहम् ।
देवीं विनायकञ्चैव विष्णुं ब्रह्माणमेव च ॥ ४२ ॥
रुद्रं शक्रं जयन्तञ्च लोकपालान् समन्तत: ।
तथैवाप्सरस: सर्वा गन्धर्वगण गुह्यकान् ॥ ४३ ॥
यो यत्र स्थाप्यतेदेवस्तस्यतान् परित:स्मरेत् ।
अवाहयेत्तथारुद्रं मन्त्रेणानेन यत्नत: ॥ ४४ ॥
यस्य सिंहारथेयुक्ता व्याघ्रभूता स्तथोरगा: ।
ऋषयोलोकपालाश्च देव:स्कन्दस्तया वृष: ॥४५॥
प्रियोगणोमातरश्च सोमोविष्णु: पितामह: ।
नागायक्षा: सगन्धर्वाये च दिव्यानभश्चरा ॥ ४६ ॥
तमहं ऋत्तमीशानं शिवं रुद्र मुमापतिम् ।
आवाहयामि सगणं सपत्नीकं वृषध्वजम् ॥ ४७ ॥
आगच्छभगवन् ! रुद्रा: नुग्रहाय शिवोभव ।
शाश्वतो भव पूजां मे गृहाण त्वं नमोनम: ॥ ४८ ॥

ॐ नम: स्वागतं भगवते नम: ॐ नम: सोमाय सगणाय सपरिवाराय प्रतिगृह्णातु भगवन् ! मन्त्रपूतमिदंसर्व मर्घ्यपाद्य माचमनीय मासनं ब्रह्मणाभिहितं नमोनम: स्वाहा ॥४९॥

तत: पुण्याहघोषेण ब्रह्मघोषैश्च पुष्कलै: ।
स्नापयेत्तु ततोदेवं दधिक्षीरघृतेन च ॥ ५० ॥
मधुशर्करया तद्वत् पुष्पगन्धोदकेन च ।

शिवध्यानैकचित्तस्तु मन्त्रानेतानुदीरयेत् ॥ ५१ ॥

यज्जाग्रतो दूरमुदेति। ततोविराडजायत इति च सहस्रशीर्षा पुरुषइति च। अभित्वाशूरनोनम इति च। पुरुष एवेदं सर्वमिति। त्रिपादूर्ध्वमिति येनेदं भूतमिति। नत्वा अवीन्य इति।

सर्वांश्चैतान् प्रतिष्ठासु मन्त्रान् जप्त्वापुनः पुनः।
चतुःकृत्वास्पृशेदङ्घ्रि मूलमध्ये शिरस्यपि ॥ ५२ ॥
स्थापितं तु ततोदेवे यजमानोऽथमूर्तिपम्।
आचार्यं पूजयेद्भक्त्या वस्त्रालङ्कारभूषणैः ॥ ५३ ॥
दीनान्धकृपणां स्तद्वद्येचान्ये समुपस्थिताः।
तर्पयेत् मधुनादेवं प्रथमेऽहनि लेपयेत् ॥ ५४ ॥
हैरिद्रयाथ सिध्दार्थै र्द्वितीये ऽहनि तत्वतः।
चन्दनेन यवैस्तद्वत्तृतीयेऽहनि लेपयेत् ॥ ५५ ॥
मनःशिलाप्रियङ्गुभ्यां चतुर्थेऽहनिल्लेपयेत्।
सौभाग्यशुभदं यस्माल्लेपनं व्याधिनाशनम् ॥ ५६ ॥
परप्रीतिकरन्नृणामितद्वेदविदोविदुः।
कृष्णाञ्जनन्तिलं तद्वत् पञ्चमेऽपि निवेदयेत् ॥ ५७ ॥
षष्ठे तु सष्टतंदद्यात् चन्दनं पद्मकेसरम्।
रोचनागुरुपुष्पं तु सप्तमेऽहनि दापयेत् ॥ ५८ ॥
यत्र सद्योऽधिवासःस्या त्तत्र सर्वं निवेदयेत्।
स्थितं न चालयेद्देव मन्यथादोष भाग्भवेत् ॥ ५९ ॥
पुरयेत्सिकताभिस्तु निश्छिद्रं सर्वतोभवेत्।
लोकपालस्य दिग्भागे यस्य सञ्चलते विभुः ॥ ६० ॥

तस्य लोकपतेःशान्तिं दद्यात्ते मात्र दक्षिणाः ।
इन्द्रायाभरणं दद्यात् काञ्चनं चाल्पवित्तवान् ॥ ६१ ॥
अग्नेः सुवर्णमेवस्याद्यमस्यमहिषं तथा ।
अन्नञ्च काञ्चनं दद्यात् नैर्ऋतं राक्षसं प्रति ॥ ६२ ॥
वरुणं प्रतिमुक्तानि सप्तशुक्तीनि प्रदापयेत् ।
रीतिकं वायवे दद्यात् हस्तयुग्मेन साम्प्रतम् ॥ ६३ ॥
सोमाय धेनुर्दातव्या रजतं सवृषं शिवे ।
यस्यां यस्यां सञ्चलनं शान्तिः स्यात्तत्र तत्र तु ॥६४॥
अन्यथा तु भवेद्घोरं भयङ्कुल विनाशनम् ।
अचलं कारयेत्तस्मात्त्रिकताभिः सुरेश्वरम् ॥ ६५ ॥
अन्नं वस्त्रञ्च दातव्यं पुण्याह जयमङ्गलम् ।
त्रिःपञ्चसप्तदश वा दिनानि स्यान् महोत्सवः ॥ ६६ ॥
चतुर्थेऽह्नि महास्नानं चतुर्थीकर्म कारयेत् ।
दक्षिणा च पुनस्तद्वद्देया तत्रातिभक्तितः ॥ ६७ ॥
देवप्रतिष्ठा विधिरेषतुभ्यं निवेदितः पापविनाशहेतोः ।
यस्माद्बुधैः पूर्वमनन्तमुक्त मनेकविद्याधरदेव पूज्यम् ॥६८॥

---

अथ षट्षष्ट्यधिकद्विशततमोऽध्यायः ।

सूत उवाच । अथातः संप्रवक्ष्यामि देवस्नपनमुत्तमम् ।
अर्धस्यापि समासेन शृणुत्वं विधिमुत्तमम् ॥ १ ॥
दध्याज्यतकुशाग्राणि क्षीरं दूर्वा तथा मधु ।
यवाः सिद्धार्थकास्तद्वदष्टाङ्गोऽर्घः फलैःसह ॥ २ ॥
गजाश्वरथ्यावल्मीक वराहोत् खातमण्डलात् ।

अग्न्यागारात्तथातीर्थाद्गजाद्गोमण्डलादपि ॥ ३ ॥
कुम्भे तु मृत्तिकां दद्याद्दुद्रुतासीति मन्त्रवित्।
शन्नोदेवीत्यपां मन्त्रमापो हिष्ठेति वै तथा ॥ ४ ॥
सावित्र्यादायगोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ ५ ॥
तेजोसीति घृतंतद्वद्देवस्यत्वेति चोदकम्।
कुशमिश्रं क्षिपेद्विद्वान् पञ्चगव्यं भवेत्ततः ॥ ६ ॥
स्नाप्याथ पञ्चगव्येन दर्भाम्बुना वै ततः।
दधिक्राव्णेतिमन्त्रेण स्नापयेद्रत्नवारिणा ॥ ७ ॥
कुशाम्भसा ततः स्नानं देवस्यत्वेति कारयेत्।
फलोदके न च स्नानमग्न आयाहि कारयेत् ॥ ८ ॥
ततस्तु गन्धतोयेन सावित्र्या चाभिमन्त्रयेत्।
ततोघटसहस्रेण सहस्रार्द्धेन वा पुनः ॥ ९ ॥
तस्याप्यर्द्धेन वा कुर्यात् सपादेन शतेन वा।
चतुःषष्ट्या ततोर्द्धेन तदर्धार्द्धेन वा पुनः ॥ १० ॥
चतुर्भिरथ वा कुर्याद्घटाना मल्पवित्तवान्।
सौवर्णैराजतैवापि ताम्रैर्वा रीतिकोद्भवैः ॥ ११ ॥
कांस्यैर्वा पार्थिवैर्वापि स्नपनं शक्तितो भवेत्।
सहदेवीवचाव्याघ्री बलाचातिवला तथा ॥ १२ ॥
शङ्खपुष्पी तथा सिंही ह्यष्टमी च सुवर्चला।
महौषध्यष्टकंह्येतत् महास्नानेषु योजयेत् ॥ १४ ॥
यवगोधूमनीवार तिलश्यामाकशालयः।
प्रियङ्गवोव्रीहयश्च स्नानेषु परिकल्पिताः ॥ १४ ॥

स्वस्तिकं पञ्चकं शङ्ख मुत्पलं कमलं तथा ।
श्रीवत्सं दर्पणान्त द्वन्द्यावर्तं मथाष्टकम् ।। १५ ।।
एतानि गोमयैः कुर्य्यान् मृदा च शुभया ततः ।
पञ्चवर्णादिकं तद्वत् पञ्चवर्णं रज स्तथा ।। १६ ।।
दूर्वां कृष्णातिलान् दद्यान्नी राजन विधिं तत. ।
एवं नीराजनं कृत्वा दद्यादाच मनं बुधः ॥ १७ ।।
मन्दाकिन्यास्तु तद्वारि सर्वपापापहं शुभम् ।
ततो वस्त्र युगं दद्यान्मन्त्रेणानेन यत्नतः ।। १८ ।।
देवसूत्र समायुक्ते यज्ञदान समन्विते ।
सर्ववर्णे शुभे देववाससी ते विनिर्मिते ।। १९ ।।
ततस्तु चन्दनं दद्यात् समं कर्पूर कुङ्कुमैः ।
इम मुच्चारयेन्मन्त्रं दर्भपाणिः प्रयत्नतः ।। २० ।।
शरीरन्ते न जानामि चेष्टां नैव च नैव च ।
मयानिवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम् ।।२१।।
चत्वारिंशत्ततो दीपान् दद्याच्चैव प्रदक्षिणान् ।
त्वं सूर्यचन्द्र ज्योतींषि विद्युदग्नि स्तथैव च ॥ २२ ।।
त्वमेव सर्वज्योतींषि दीपोऽयं प्रति गृह्यताम् ।
ततस्त्वनेन मन्त्रेण धूपं दद्याद्विचक्षणः ।। २३ ।।
वनस्पति रसोदिव्यो गन्धाढ्यो गन्ध उत्तमः ।
मयानिवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ।।२४।।
ततश्चाभरणं दद्यात् महाभूषाय ते नमः ।
अनेन विधिना कृत्वा सप्तरात्रं महोत्सवम् ।। २५ ।।
देवकुम्भै स्ततः कुर्याद्यजमानोऽभिषेचनम् ।
चतुर्भिरष्टभि र्वापिद्वाभ्यामेकेन वा पुनः ।। २६ ।।

स पञ्चरत्न कलशैः सित वस्त्राभि र्वेष्टितैः।
देवस्यत्वेति मन्त्रेण साम्नाचाथर्वणेन च॥ २७॥
अभिषेकेच ये मन्त्रा नवग्रह मखे स्मृताः।
सिताम्बरधरः स्नात्वा देवान् संपूज्य यत्नतः॥ २८॥
स्थापकं पूजयेद्भक्त्या वस्त्रालङ्कार भूषणैः।
यज्ञ भाण्डानि सर्वाणि मण्डपो पस्करा दिकम्॥२९॥
यच्चान्य दपि तद्गेहे तदाचार्याय दापयेत्।
सुप्रसन्ने गुरौ यस्मात्तुष्यन्ते सर्वदेवताः॥ ३०॥

नैतद्विशीलेन च दाम्भिकेन
न लिङ्गिनास्थापन मत्रकार्यम्।
विप्रेण कार्यं श्रुति पारगेण
गृहस्थ धर्माभिरतेन नित्यम्॥ ३१॥
पाषण्डिनं यस्तु करोति भक्त्या
विहाय विप्रान् श्रुतिधर्म युक्तान्।
गुरुं प्रतिष्ठादिषु तत्र नूनं
कुलक्षयः स्याद् चिराद् पूज्यः॥ ३२॥
स्थानं पिशाचैः परिगृह्यते वा
अपूज्यतां यात्य चिरेणशोकः।
विप्रैः कृतं यच्छुभदं कुले स्यात्
प्रपूज्यतां याति चिरञ्च कालम्॥ ३३॥

---

सप्तषष्ट्यधिक द्विशततमोऽध्यायः।

ऋषयऊचुः। प्रासादाः कीदृशाः सूत! कर्तव्या भूतिमिच्छता।

प्रमाणं लक्षणं तद्वद् विस्तरतोऽधुना ॥ १ ॥
सूत उवाच । अथातः संप्रवक्ष्यामि प्रासाद विधि निर्णयम् ।
वास्तौ परीक्षिते सम्यग्वास्तु देह विचक्षणः ॥ २ ॥
वास्तूप शमनं कुर्यात् समिद्भिर्बलि कर्मणा ।
जीर्णोद्धारे तथोद्याने तथा गृह निवेशने ॥ ३ ॥
नवप्रासाद भवने प्रासाद परिवर्तने ।
द्वाराभि वर्तने तद्वत्प्रासादेषु गृहेषु च ॥ ४ ॥
वास्तूप शमनं कुर्यात् पूर्वमेव विचक्षणः ।
एकाशीति पदं लिख्य वास्तु मध्ये च पृष्ठतः ॥ ५ ॥
होमश्च मेखले कार्यः कुण्डे हस्त प्रमाणके ।
यवैः कृष्णतिलै स्तद्वत्समिद्भिः क्षीरवृक्षजैः ॥ ६ ॥
पालाशैःखादिरै श्चापि मधु सर्पि समन्वितैः ।
कुशदूर्वा मयैर्वापि मधु सर्पि समन्वितैः ॥ ७ ॥
कार्यस्तु पञ्चभि र्बिल्वैर्बिल्व बीजैरथापि वा ।
होमान्ते भक्ष्य भोज्यैस्तु वास्तु देशे बलिं हरेत् ॥ ८ ॥
तद्वद्विशेष नैवेद्यमे वन्दद्यात्क्रमेण तु ।
ईश कोणे घृतान्नन्तु शिखिने विनि वेदयेत् ॥ ९ ॥
ओदनं सफलं दद्यात् पर्जन्याय घृतान्वितम् ।
जयाय च ध्वजान् पीतान् पैष्टं कूर्मञ्च कल्पयेत् ॥१०॥
इन्द्राय पञ्चरत्नानि पैष्टञ्च कुलिशं तथा ।
वितानकञ्च सूर्याय धूम्रं सक्तुं तथैव च ॥ ११ ॥
सत्याय घृत गोधूमं मत्स्यं दद्याद्भृशाय च ।
शष्कुलीमान्तरिक्षाय दद्यात्सक्तुं च वायवे ॥ १२ ॥
लाजाः पूष्णेतु दातव्याः वितथे चणकौदनम् ।

मृहक्षताय मध्वन्नं यमाय पिष्टितौदनम् ॥ १३ ॥
गन्धौदनञ्च गन्धर्वे भृङ्गराजस्य भृङ्गिकाम्।
मृगाय यावकं दद्यात् पितृभ्यः कृसरामता ॥ १४ ॥
दौवारिके दन्तकाष्ठं पैष्टं कृष्णाबलिं तथा।
सुग्रीवे पुष्पकं दद्यात् पुष्पदन्ताय पायसम् ॥ १५ ॥
कुशस्तम्बेन संयुक्तं तथा पद्मञ्च वारुणम्।
पिष्टं हिरण्मयं दद्यात् असुराय सुरामता ॥ १६ ॥
घृतौदनञ्च शोषाय यवान्नं पापयक्ष्मणे।
घृतलड्डुकांस्तु रोगाय नागे पुष्पफलानि तु ॥ १७ ॥
सर्पिर्मुख्याय दातव्यं मुद्गौदन मतःपरम्।
भल्लाटस्थानके दद्यात् सोमाय घृतपायसम् ॥ १८ ॥
भगाय शालिकं पिष्टमदित्यै पोलिकास्तथा।
दित्यैतु पूरिका दद्यादित्येवं बाह्यतोबलिः ॥ १९ ॥
क्षीरं यमाय दातव्य मापवत्साय वैदधि।
साविले लड्डुकान् दद्यात् समरीचं कुशोदनम् ॥२०॥
सवितुर्गुड़पूपांस्तु जयाय घृतचन्दनम्।
विवस्वते पुनर्दद्याद्रक्त चन्दन पायसम् ॥ २१ ॥
हरितालौदनं दद्यादिन्द्राय घृत संयुतम्।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥ २२ ॥
आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे।
पृथ्वीधराय मांसानि कूष्माण्डानि च दापयेत् ॥ २३ ॥
शर्करा पायसं दद्यादर्यम्णे पुनरेव हि।
पञ्चगव्यं यवांश्चैव तिलाक्षतमयं चरुम् ॥ २४ ॥
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे वि निवेदयत्।

एवं सम्पूजिता देवा: शान्तिं कुर्वन्ति ते सदा ॥ २५ ॥
सर्वेभ्य: काञ्चनं दद्याद्ब्राह्मणे गां पयस्विनीम् ।
राक्षसीनां बलिर्देयो अपि यादृक् यथा मृणु ॥ २६ ॥
मांसौदनं घृतं पद्मकेसरं रुधिरान्वितम् ।
ईशानभागमाश्रित्य चरक्यैविनिवेदयेत् ॥ २७ ॥
मांसौदनश्च रुधिरं हरिद्रौदनमेव च ।
आग्नेयीं दिशमाश्रित्य विदार्यै वि निवेदयेत् ॥ २८ ॥
दध्योदनं स रुधिरमस्थि खण्डैश्च संयुतम् ।
पीतरक्तं बलिं दद्यात् पूतनायै सरक्षसे ॥ २९ ॥
वायव्यां पापराक्षस्यै मत्स्यमांसं सुरासवम् ।
पायसञ्चापि दातव्यं स्वनाम्ना सर्वत: क्रमात् ॥ ३० ॥
नमस्कारान्तयुक्तेन प्रणवाद्येन संयुत: ।
तत: सर्वौषधीस्नानं यजमानस्य कारयेत् ॥ ३१ ॥
द्विजान्सुपूजयेद्भक्त्या ये चान्ये गृहमागता: ।
एतद्वास्तूप शमनं कृत्वा कर्म समारभेत् ॥ ३२ ॥
प्रासाद भवनोद्यान प्रारम्भे विनिवर्तने ।
पुरवेश्म प्रवेशेषु सर्वदोशापनुत्तये ॥ ३३ ॥
रक्षोघ्न पावमानेन सूक्तेन भवनादिकम् ।
नृत्य मङ्गलवाद्येन कुर्य्यात् ब्राह्मण वाचनम् ॥ ३४ ॥
अनेन विधिनायस्तु प्रतिसम्वत्सरं बुध: ।
गृहे वा यतने कुर्य्यान्न स दु:खमवाप्नुयात् ॥ ३५ ॥
नच व्याधि भयं तस्य नच बन्धु धनक्षय: ।
जीवेद्वर्ष शतं स्वर्गे कल्पमेकञ्च तिष्ठति ॥ ३६ ॥

---

अथ अष्टषष्ट्यधिकद्विशततमोऽध्यायः।

सूत उवाच। एवं वास्तुबलिं कृत्वा भजेत् षोडशभागिकम्।

तस्य मध्ये चतुर्भिस्तु भागैर्गर्भन्तु कारयेत्॥ १॥

भागद्वादशकं सार्द्धं ततस्तु परिकल्पयेत्।

चतुर्दिक्षु तथा ज्ञेयं निर्गमं तु ततो बुधैः॥ २॥

चतुर्भागेन भित्तीनामुच्छ्रायः स्यात् प्रमाणतः।

द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायमानतः॥ ३॥

शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा।

गर्भसूत्रद्वयं चाग्रे विस्तारो मण्डपस्य तु॥ ४॥

आयतः स्यात् त्रिभिर्भागैर्भद्रयुक्तः सुशोभनः।

पञ्चभागेन संभज्य गर्भमानं विचक्षणः॥ ५॥

भागैकं गृह्य तु प्राग्ग्रीवं कल्पयेद्बुधः।

गर्भसूत्रसमाद्भागादग्रतो मुखमण्डपः॥ ६॥

एतत्सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम्।

तथान्यन्तु प्रवक्ष्यामि प्रासादं लिङ्गमानतः॥ ७॥

लिङ्गपूजाप्रमाणेन कर्तव्या पीठिका बुधैः।

पिण्डिकार्द्धे विभागः स्यात् तन्मानेन तु भित्तयः॥ ८॥

बाह्यभित्तिप्रमाणेन उत्सेधस्तु भवेत् पुनः।

भित्त्युच्छ्रायात्तु द्विगुणः शिखरस्य समुच्छ्रयः॥ ९॥

शिखरस्य चतुर्भागात् कर्तव्या च प्रदक्षिणा।

प्रदक्षिणायास्तु समस्त्वग्रतो मण्डपो भवेत्॥ १०॥

तस्य चार्द्धेन कर्तव्य स्त्वग्रतो मुखमण्डपः।

प्रासादान्निर्गतौ कार्यौ कपालौ गर्भमानतः॥ ११॥

ऊर्द्धं भित्त्युच्छ्रया त्तस्य मञ्जरीन्तु प्रकल्पयेत्।

मञ्जर्यास्त्वार्द्धभागेन शुकनासां प्रकल्पयेत् ॥ १२ ॥
अर्द्धंतथार्द्धभागेन वेदीबन्धोभवेदिह ।
वेद्याश्चोपरि यच्छेषं कण्ठश्चामलसारकः ॥ १३ ॥
एवंविभज्यप्रासादं शोभनंकारयेद्बुधः ।
अथान्यञ्चप्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥ १४ ॥
गर्भमानप्रमाणेन प्रासादंशृणुतद्विजाः ! ।
विभज्य नवधा गर्भंमध्येस्या ल्लिङ्गपीठिका ॥ १५ ॥
पादाष्टकंतु रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेन तेन विस्तारो भित्तीनान्तु विधीयते ॥ १६ ॥
पादंपञ्चगुणंकृत्वा भित्तीना मुच्छ्रयोभवेत् ।
सएवशिखरस्यापि द्विगुणःस्यात् समुच्छ्रयः ॥ १७ ॥
चतुर्धाशिखरंभज्य अर्द्धभागद्वयस्य तु ।
शुकनासंप्रकुर्वीत तृतीये वेदिका मता ॥ १८ ॥
कण्ठमामलसारं तु चतुर्थे परिकल्पयेत् ।
कपालयोस्तुसंहारो द्विगुणोऽत्रविधीयते ॥ १९ ॥
शोभनैःपत्रवल्लीभि रण्डकैश्चविभूषितः ।
प्रासादोऽयं तृतीयस्तु मया तुभ्यंनिवेदितः ॥ २० ॥

सूतउवाच । सामान्यमपरंतद्वत्प्रासादंशृणुतद्विजाः ! ।
त्रिभेदंकारयेत्चैतं यत्र तिष्ठन्ति देवताः ॥ २१ ॥
रथाङ्गस्तेन मानेन वाह्यभागविनिर्गतः ।
नेमीपादेन विस्तीर्णा प्रासादस्यात् समन्ततः ॥ २२ ॥
गर्भंतु द्विगुणं कुर्यात् तस्यमानं भवेदिह ।
सएव भित्तेरुत्सेधो द्विगुणः शिखरोमतः ॥ २३ ॥
प्राक्ग्रीवः पञ्चभागेन निष्कासस्तस्यचोच्यते ।

कारयेत्सुषिरं तद्वत् प्राकारस्य विभागतः ॥ २४ ॥
प्राक् ग्रीवं पञ्चभागेन निष्कासेण विशेषतः ।
कुर्य्याद्वा पञ्चभागेन प्राक् ग्रीवे कर्णमूलतः ॥ २५ ॥
स्थापयेत्कनकं तत्र गर्भान्ते द्वारमूलतः ।
एवन्तु त्रिविधं कुर्य्यात्ज्येष्ठमध्यकनीयसम् ॥ २६ ॥
लिङ्गमानानुभेदेन रूपभेदेन वा पुनः ।
एते समासतः प्रोक्ता नामतः शृणुताधुना ॥ २७ ॥
मेरुमन्दरकैलास कुम्भ सिंह मृगास्तथा ।
विमानच्छन्दकस्तद्वच्चतुरस्र स्तथैव च ॥ २८ ॥
अष्टास्रः षोडशास्रश्च वर्तुल सर्व भद्रकः ।
सिंहास्यो नन्दनश्चैव नन्दिवर्धनकस्तथा ॥ २९ ॥
हंसोवृषः सुवर्णेशः पद्मकोऽथ समुद्गकः ।
प्रासादा नामतः प्रोक्ता विभागं शृणुतद्विजाः ॥ ३० ॥
शतशृङ्ग श्चतुर्द्वारो भूमिका षोड़शोच्छ्रितः ।
नानाविचित्र शिखरोमेरुः प्रासाद उच्यते ॥ ३१ ॥
मन्दरो द्वादश प्रोक्तः कैलासो नव भूमिकः ।
विमानच्छन्दकस्तद्वदनेक शिखराननः ॥ ३२ ॥
सचाष्ट भूमिकस्तद्वत् सप्तभिर्नन्दि वर्धनः ।
विषाणक समायुक्तो नन्दनः स उदाहृतः ॥ ३३ ॥
षोडशास्र समायुक्तो नानारूप समन्वितः ।
अनेक शिखरस्तद्वत्सर्वतो भद्र उच्यते ॥ ३४ ॥
चित्रशालासमोपेतो विज्ञेयः पञ्चभूमिकः ।
वलभीच्छन्दक स्तद्वदनेक शिखराननः ॥ ३५ ॥
वृषस्योच्छ्रायतस्तुल्यो मण्डलश्चास्र वर्जितः ।

सिंहः सिंहाकृतिर्ज्ञेयो गजोगज समस्तथा ॥ ३६ ॥
कुम्भः कुम्भाकृति स्तद्वद्भूमिका नवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानः पञ्चाण्डकविभूषितः ॥ ३७ ॥
षोड़शास्त्रः समन्ताच्च विज्ञेयः स रुसुद्गकः ।
पार्श्वयोश्चन्द्रशालेऽस्य उच्छ्रायो भूमिकाद्वयम् ॥ ३८ ॥
तथैव पद्मकःप्रोक्तः उच्छ्रायोभूमिकात्रयम् ।
षोड़शास्त्रः स विज्ञेयो विचित्रशिखरः शुभः ॥ ३९ ॥
मृगराजस्तु विख्यात श्चन्द्रशाला विभूषितः ।
प्राग्ग्रीवेण विशालेन भूमिकस्तु षड़ुन्नतः ॥ ४० ॥
अनेकचन्द्रशालश्च गजः प्रासादइष्यते ।
पर्य्यस्तगरुड़राजो वै गरुड़ोनाम नामतः ॥ ४१ ॥
सप्तभूम्युच्छ्रयस्तद्व च्चन्द्रशालात्रयान्वितः ।
भूमिकाषड़शीतिस्तु बाह्यतः सर्वतोभवेत् ॥ ४२ ॥
तथान्योगरुड़स्तद्व दुच्छ्रयाद्दशभूमिकः ।
भूमिकाषोड़शास्त्रस्तु भूमिद्वयमथाधिकः ॥ ४३ ॥
पद्मतुल्यप्रमाणेन श्रीवृक्ष इति स्मृतः ।
पञ्चाण्डको द्विभूमिश्च गर्भस्तस्य चतुष्टयम् ॥ ४४ ॥
वृषोभवतिनाम्नायं प्रासादः सार्वकामिकः ।
सप्तकाः पञ्चकाश्चैव प्रासादा वै मयोदिताः ॥ ४५ ॥
सिंहास्येन समाज्ञेया येषान्ये तत्प्रमाणकाः ।
चन्द्रशालैःसमोपेताः सर्वेप्राग्ग्रीवसंयुताः ।
ऐष्टकादारवाश्चैव शैलावा स्युः सतोरणाः ॥ ४६ ॥
मेरुःपञ्चाशहस्तःस्या न्मन्दरःपञ्चहीनकः ।
चत्वारिंशत्तु कैलास श्चतुस्त्रिंशद्विमानकः ॥ ४७ ॥

नन्दिवर्द्धनकस्तद्वत् द्वात्रिंशत् समुदाहृतः।
त्रिंशतानन्दनःप्रोक्तः सर्वतोभद्रक स्तथा॥ ४८॥
वर्तुलःपद्मकश्चैव विंशद्धस्त उदाहृतः।
गजःसिंहश्च कुम्भश्च वलभीच्छन्दक स्तथा॥ ४९॥
एते षोड़शहस्ताःस्यु, श्चत्वारो देववल्लभाः।
कैलासो मृगराजश्च विमानच्छन्दकोमतः॥ ५०॥
एते द्वादशहस्ताःस्यु, रेतेषामिह मन्मतम्।
गरुड़ोऽष्टकरोज्ञेयो हंसोदश उदाहृतः॥ ५१॥
एवमेते प्रमाणेन कर्तव्याः शुभलक्षणाः।
यक्षराक्षसनागानां मातृहस्तान् प्रशंस्यते॥ ५२॥
तथामेर्वादयःसप्त ज्येष्ठलिङ्गे शुभावहाः।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य प्रकीर्तिताः॥ ५३॥
तथा हंसादयःपञ्च कन्यसे शुभदा मताः।
वलभीच्छन्दकेगौरी जटामुकुट धारिणी॥ ५४॥
वरदाभयदा तद्वत् साक्षसूत्र कमण्डलुः।
गृहे तु रत्नमुकुटा उत्पलाङ्कुशधारिणी।
वरदाभयदा चापि पूजनीया सभर्तृका॥ ५५॥
तपोवनस्था मितरां तां तु संपूजयेद्बुधः।
देव्याविनायकस्तद्वत् बलभीच्छन्दके शुभः॥ ५६॥

---

## अथ ऊनसप्तत्यधिकद्विशततमोऽध्यायः।

सूतउवाच। अथातःसंप्रवक्ष्यामि मण्डपानान्तु लक्षणम्।
मण्डपप्रवरान्वक्ष्ये प्रासादस्यानुरूपतः॥ १॥

त्रिविधा मण्डपा:कार्या ज्येष्ठमध्यकनीयस: ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वमृषि सत्तमा: ॥ २ ॥
पुष्पक: पुष्पभद्रश्च सुव्रतोऽमृतनन्दन: ।
कौशल्योबुद्धिसंकीर्णो गजभद्रोजयावह: ॥ ३ ॥
श्रीवत्सोविजयश्चैव वास्तुकीर्ति: श्रुतिजय: ।
यज्ञभद्रोविशालश्च सुश्लिष्ट: शत्रुमर्दन: ॥ ४ ॥
भागपञ्चोनन्दनश्च मानवोमानभद्रक: ।
सुग्रीवोहरितश्चैव कर्णिकार: शतर्द्धिक: ॥ ५ ॥
सिंहश्च श्यामभद्रश्च सुभद्रश्च तथैव च ।
सप्त विंशतिराख्याता लक्षणं शृणुत: ! द्विजा: ! ॥ ६ ॥
स्तम्भा यत्र चतु:षष्टि पुष्पक: ससुदाहृत: ।
द्विषष्टिपुष्पभद्रस्तु षष्टि:सुव्रत उच्यते ॥ ७ ॥
अष्टपञ्चाशकस्तम्भ: कथ्यते मृतनन्दन: ।
कौशल्य: षट्चपञ्चाशस्त्वनु: पञ्चाशता पुन: ॥ ८ ॥
नाम्ना तु बुद्धिसंकीर्णो द्विहीनो गजभद्रक: ।
जयावहस्तु पञ्चाशत् श्रीवत्सस्तु द्विहीनक: ॥ ६ ॥
विजयस्तु द्विहीन:स्यात् वास्तुकीर्ति स्तथैव च ।
द्वाभ्यामेव प्रहीयेत तत: श्रुतिजयोऽपर: ॥ १० ॥
चत्वारिंशद्यज्ञभद्रस्तु द्विहीनो विशालक: ।
षट्त्रिंशच्चैव सुश्लिष्टो द्विहीन: शत्रुमर्द्दन: ॥ ११ ॥
द्वात्रिंशद्भागपञ्चस्तु त्रिंशद्भिर्नन्दन:स्मृत: ।
अष्टाविंशन्मानवस्तु मानभद्रो द्विहीनक: ॥ १२ ॥
चतुर्विंशस्तुसुग्रीवो द्वाविंशो वर्षणोमत: ।
विंशति:कर्णिकार:स्या दष्टादश शतर्धिक: ॥ १३ ॥

सिंहोभवेद्विहीनश्च श्यामभद्रो द्विहीनकः।
सुभद्रस्तु तथाप्रोक्तो द्वादशस्तम उच्यते ॥ १४ ॥
मण्डपाःकथितास्तुभ्यं यथा वक्षणान्विताः।
त्रिकोणं वृत्तमर्द्धन्तु ह्यष्टकोणं द्विरष्टकम् ॥ १५ ॥
चतुःकोणन्तु कर्तव्यं संस्थानं मण्डपस्य तु।
राज्यञ्च विजयश्चैव आयुवर्द्धनमेव च ॥ १६ ॥
पुत्त्रलाभःश्रियःपुष्टि स्त्रिकोणादि क्रमाद्भवेत्।
एवं तु शुभदा प्रोक्ता ह्यन्यथा त्वशुभावहाः ॥ १७ ॥
चतुःषष्टिपदंकृत्वा मध्ये द्वारं प्रकल्पयेत्।
विस्ताराद्विगुणोच्छ्रायं तत्त्रिभागः कटिर्भवेत् ॥ १८ ॥
विस्तारार्द्धोभवेद्गर्भो भित्तयोऽन्याः समन्ततः।
गर्भपादेन विस्तीर्णं द्वारं त्रिगुणमायतम् ॥ १९ ॥
तथा द्विगुणविस्तीर्णमुखस्तद्वदुदुम्बरः।
विस्तारपादप्रतिमं बाहुल्यं शाखयोःस्मृतम् ॥ २० ॥
त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते।
कनिष्ठमध्यमंज्येष्ठं यथा योगं प्रकल्पयेत् ॥ २१ ॥
अङ्गुलानां शतं सार्द्धं चत्वारिंश तथोन्नतम्।
त्रिंशद्विशोत्तरं चान्यदन्य मुत्तममेव च ॥ २२ ॥
शतञ्चाशीतिसहितं वार्तानिर्गमने भवेत्।
अधिकं दशभिस्तद्वत् तथाषोड़शभिःशतम् ॥ २३ ॥
शतमानंतृतीयञ्च नवत्या शीतिभिस्तथा।
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्वदा ॥ २४ ॥
अन्यानि वर्जनीयानि मनसोद्वेगदानि तु।

द्वारवेधं प्रयत्नेन सर्ववास्तुषु वर्जयेत् ॥ २५ ॥
वृक्षकोणभ्रमिद्वारस्तम्भकूपध्वजादपि ।
कुड्यस्तम्भेन वा विद्धं द्वारं न शुभदम्भवेत् ॥ २६ ॥
क्षयश्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ।
दौर्भाग्यं बन्धनं रोगो दारिद्र्यं कलहं तथा ॥ २७ ॥
विरोधश्चार्थनाशश्च सर्वं वेधाद्भवेत् क्रमात् ।
पूर्वेण फलिनोवृक्षाः क्षीरवृक्षास्तु दक्षिणे ॥ २८ ॥
पश्चिमेन जलं श्रेष्ठं पद्मोत्पलविभूषितम् ।
उत्तरे सरलैस्तालैः शुभास्यात् पुष्पवाटिका ॥ २९ ॥
सर्वतस्तु जलं श्रेष्ठं स्थिरमस्थिरमेव च ।
पार्श्वतश्चापि कर्त्तव्यं परिवारादिकालयम् ॥ ३० ॥
याम्ये तपोवनस्थानमुत्तरे मातृका गृहम् ।
महानसं तथाग्नेये नैर्ऋत्येऽथ विनायकम् ॥ ३१ ॥
वारुणे श्रीनिवासस्तु वायव्ये गृहमालिका ।
उत्तरे यज्ञशालातु निर्माल्यस्थानमुत्तरे ॥ ३२ ॥
वारुणे सोमदैवत्ये बलिनिर्वपणं स्मृतम् ।
पुरतो वृषभस्थानं शेषे स्यात् कुसुमायुधः ॥ ३३ ॥
जलं वापि तथैशाने विष्णुस्तु जलशाय्यपि ।
एवमायतनंकुर्यात् कुण्डमण्डपसंयुतम् ॥ ३४ ॥

घण्टावितानकसतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदादिवि पूज्यते च ॥ ३५ ॥

एवं गृहार्चनविधावपि शक्तितः स्यात्।
संस्थापनं सकलमन्त्र विधानयुक्तम् ॥ २६ ॥

---

## अथ सप्तत्यधिकद्विशततमोऽध्यायः।

ऋषयऊचुः। पूर्वोवंशस्त्वया सूत ! स भविष्यो निवेदितः।
सूर्यवंशे नृपा येतु भविष्यन्ति हि तान् वद ॥ १ ॥
तथैव यादवे वंशे राजानः कीर्तिवर्धनाः।
कलौयुगे भविष्यन्ति तानपीह वदस्व नः ॥ २ ॥
वंशान्ते ज्ञातयो याश्च राज्यं प्राप्स्यन्ति सुव्रताः।
ब्रूहि संक्षेपतस्तासां यथाभाव्य मनुक्रमात् ॥ ३ ॥
सूतउवाच। बृहद्बलस्य दायादो वीरोराजा ह्युरुक्षयः।
उरुक्षय सुतश्चापि वत्सद्रोहो महायशाः ॥ ४ ॥
वत्सद्रोहात् प्रतिव्योम स्तस्यपुत्रो दिवाकरः।
तस्यैव मध्यदेशेतु अयोध्यानगरी शुभा ॥ ५ ॥
दिवाकरस्य भविता सहदेवो महायशाः।
सहदेवाच्च भविता ध्रुवाश्वोवै महामनाः ॥ ६ ॥
तस्य भाव्यो महाभागः प्रतीपाश्वश्च तत्सुतः।
प्रतीपाश्वसुतश्चापि सुप्रतीपो भविष्यति ॥ ७ ॥
मरुदेवः सुतस्तस्य सुनक्षत्र स्ततोऽभवत्।
किन्नराश्वः सुनक्षत्राद्भविष्यति परन्तपः ॥ ८ ॥
किन्नराश्वादन्तरिक्षो भविष्यति महामनाः।
सुषेणश्चान्तरिक्षाच्च सुमित्रश्चाप्य मित्रजित् ॥ ९ ॥

सुमित्रजो बृहद्राजः बृहद्राजस्य वीर्यवान् ।
पुत्रः क्रतंञ्जयोनाम धार्मिकश्च भविष्यति ॥ १० ॥
क्रतञ्जय सुतो विद्वान् भविष्यति रणेजयः ।
भविता सञ्जयश्चापि वीरोराजा रणे जयात् ॥ ११ ॥
सञ्जयस्य सुतः शाक्यः शाक्याच्छुद्धौदनो नृपः ।
शुद्धौदनस्य भविता सिद्धार्थः पुष्कलः सुतः ॥ १२ ॥
प्रसेनजिततोभाव्यः क्षुद्रको भविता ततः ।
क्षुद्रकात् कुलकोभाव्यः कुलकात् सुरथः स्मृतः ॥ १३ ॥
सुमित्र सुरथाज्जातो अन्यस्तु भविता नृपः ।
एतेचैक्ष्वाकवः प्रोक्ता भविष्या ये कलौयुगे ॥ १४ ॥
बृहद्बलान्ववायेतु भविष्याः कुलवर्द्धनाः ।
अत्रानुवंशश्लोकोऽयं विप्रैर्गीतः पुरातनैः ॥ १५ ॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
सुमित्रं प्राप्यराजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥
इत्येवं मानवोवंशः प्रागेव समुदाहृतः ।
अतऊर्ध्वं प्रवक्ष्यामि मागधा ये बृहद्रथाः ॥ १७ ॥
पूर्वेण येजरासन्धात् सहदेवान्वये नृपाः ।
अतीता वर्त्तमानाश्च भविष्यांश्च निबोधत: ॥ १८ ॥
संग्रामे भारतेवृत्ते सहदेवे निपातिते ।
सोमाधिस्तस्यदायादो राजाभूत्सगिरिव्रजे ॥ १९ ॥
पञ्चाशतं तथाष्टौच समाराज्य मकारयत् ।
श्रुतश्रवा चतुःषष्टिं समास्तस्यान्वये भवत् ॥ २० ॥
अप्रतीपीच षट्त्रिंशत् समाराज्य मकारयत् ।

चत्वारिंशत् समास्तस्य निरमित्रोदिवङ्गतः॥ २१॥
पञ्चाशतं समाः षट्चतुरश्चः प्राप्तवान्महीम्।
वृहत् कर्मा त्रयोविंशदब्दं राज्य मकारयत्॥ २२॥
सेनाजित् सम्मयातश्च भुक्ता पञ्चशतं महीम्।
श्रुतञ्जयस्तु वर्षाणि चत्वारिंशद्भविष्यति। २३॥
अष्टाविंशति वर्षाणि महीं प्राप्स्यति वै विभुः।
अष्टपञ्चाशतं षट् च राज्येस्थास्यति वै शुचिः॥ २४॥
अष्टाविंशत् समाराजा क्षेमो भोक्ष्यति वै महीम्।
अनुव्रतश्चतुःषष्टि राज्यं प्राप्स्यति वीर्यवान्॥ २५॥
पञ्चत्रिंशतिवर्षाणि सुनेत्रो भोक्ष्यते महीम्।
भोक्ष्यते निर्वृतिश्चेमामष्टपञ्चाशतं समाः॥ २६॥
अष्टाविंशत् समाराज्यं त्रिनेत्रो भोक्ष्यते ततः।
चत्वारिंशत्तथाष्टौ च द्युमत्सेनो भविष्यति॥ २७॥
त्रयस्त्रिंशत्तु वर्षाणि महीनेत्रः प्रकाश्यते।
द्वात्रिंशत्तु समाराजा ह्यचलस्तु भविष्यति। २८॥
रिपुञ्जयस्तु वर्षाणि पञ्चाशत् प्राप्स्यते महीम्।
द्वात्रिंशति नृपाश्चैते भवितारो वृहद्रथाः॥ २९॥
पूर्णं वर्षसहस्रन्तु तेषां राज्यं भविष्यति।
जयतां क्षत्रियाणाञ्च बालकः पुलकोभवेत्॥ ३०॥

---

अथ एकसप्तत्यधिकद्विशततमोऽध्यायः।

सूतउवाच। वृहद्रथेष्वतीतेषु वीतिहोत्रेष्ववन्तिषु।
पुलकः स्वामिनं हत्वा स्वपुत्रमभिषेक्ष्यति॥ १॥

मिषतां क्षत्रियाणाञ्च बालकः पुलकोद्भवः ।
सवै प्रणत सामन्तो भविष्यो न च धर्मतः ॥ २ ॥
त्रयोविंशत् समाराजा भविता स नरोत्तमः ।
अष्टाविंशतिवर्षाणि पालको भविता नृपः ॥ ३ ॥
विशाखयूपोभविता त्रिपञ्चाशत्तथा समाः ।
एकविंशत्समा राजा सूर्यकस्तु भविष्यति ॥ ४ ॥
वाराणस्यां सुतं स्थाप्य श्रयिष्यति गिरिव्रजम् ।
शिशुनाकस्तु वर्षाणि चत्वारिंशद्भविष्यति ॥ ५ ॥
काकवर्णः सतस्तस्य षड्विंशत् प्राप्स्यते महीम् ।
षट्त्रिंशच्चैव वर्षाणि क्षेमधर्मा भविष्यति ॥ ६ ॥
चतुर्विंशत्समाः सोऽपिक्षेमजित्प्राप्स्यते महीम् ।
अष्टाविंशतिवर्षाणि बिन्ध्यसेनो भविष्यति ॥ ७ ॥
भविष्यतिसमाराजा नवकाण्वायनो नृपः ।
भूमिमित्रः सुतस्तस्य चतुर्दश भविष्यति ॥ ८ ॥
अजातशत्रुर्भविता सप्तविंशत् समानृपः ।
चतुर्विंशत्समाराजा वंशकस्तु भविष्यति ॥ ९ ॥
उदासीभविता तस्मात्त्रयस्त्रिंशत्समानृपः ।
चत्वारिंशत्समाभाव्यो राजावै नन्दिवर्द्धनः ॥ १० ॥
चत्वारिंशत्त्रयश्चैव महानन्दी भविष्यति ।
इत्येते भवितारो वै दशद्वौशिशुनाकजाः ॥ ११ ॥
शतानि त्रीणि पूर्णानि षष्टिवर्षाधिकानि तु ।
शिशुनाका भविष्यन्ति राजानः क्षत्रबन्धवः ॥ १२ ॥
एतैः सार्द्धं भविष्यन्ति यावत्कालिनृपाः परे ।

तुल्यकालं भविष्यन्ति सर्वेह्येते महीक्षितः॥ १३॥
चतुर्विंशत्तथैक्ष्वाकाः पाञ्चालाः सप्तविंशतिः।
काशेयास्तु चतुर्विंशदष्टाविंशत्तु हैहयाः॥ १४॥
कलिङ्गाश्चैव द्वात्रिंशदश्मकाः पञ्चविंशतिः।
कुरवश्चापि षट्विंशदष्टाविंशास्तु मैथिलाः॥ १५॥
शूरसेनास्त्रयोविंशद्वीतिहोत्राश्च विंशतिः।
एतेसर्वे भविष्यन्ति एककालं महीक्षितः॥ १६॥
महानन्दिसुतश्चापि शूद्रायां कलिकांशजः।
उत्पत्स्यतेमहापद्मः सर्वक्षत्रान्तको नृपः॥ १७॥
ततः प्रभृतिराजानो भविष्याः शूद्रयोनयः।
एकराट्समहापद्मो एकच्छत्रोभविष्यति॥ १८॥
अष्टाशीति तु वर्षाणि पृथिव्याञ्च भविष्यति।
सर्वक्षत्रमथोत्साद्य भाविनार्थेन चोदितः॥ १९॥
सुकल्पादि सुताह्यष्टौ समाद्वादश ते नृपाः।
महापद्मस्य पर्य्याये भविष्यन्ति नृपाः क्रमात्॥ २०॥
उद्धरिष्यति कौटिल्यः समैद्वादशभिः सुतान्।
भुक्त्वामहीं वर्षशतं ततो मौर्य्यान् गमिष्यति॥ २१॥
भविता शतधन्वा च तस्य पुत्रस्तु षट्समाः।
बृहद्रथस्तु वर्षाणि तस्य पुत्रश्च सप्ततिः॥ २२॥
षट्त्रिंशत्तु समाराजा भविता शक एव च।
सप्तानां दशवर्षाणि तस्य नप्ता भविष्यति॥ २३॥
राजादशरथोऽष्टौ तु तस्य पुत्रो भविष्यति।
भविता नववर्षाणि तस्य पुत्रश्च सप्ततिः॥ २४॥
इत्येते दशमौर्य्यास्तु ये भोक्ष्यन्ति वसुन्धराम्।

सप्तत्रिंशच्छतं पूर्णं तेभ्यः शुङ्गान् गमिष्यति ॥२५॥
पुष्यमित्रस्तु सेनानी समुद्धृत्य स बृहद्रथान् ।
कारयिष्यति वै राज्यं षट्त्रिंशतिसमान्नृपः ॥ २६ ॥
भवितापि वसुज्येष्ठः सप्तवर्षाणि वै नृपः ।
वसुमित्रस्तथाभाव्यो दशवर्षाणि वै ततः ॥ २७ ॥
ततोऽन्तकः समे द्वे तु तस्य पुत्रो भविष्यति ।
भविष्यति समास्तस्मात्तीण्येवं स पुलिन्दकः ॥ २८ ॥
भविता वज्रमित्रस्तु समाराजा पुनर्भवः ।
द्वात्रिंशत्तु समाभागः समाभागात्ततो नृपः ॥ २९ ॥
भविष्यति सुतस्तस्य देवभूमिः समादश ।
दशैते शुङ्गराजानो भोक्ष्यन्ती मां वसुन्धराम् ॥३०॥
शतं पूर्णं शते द्वे च ततः शुङ्गान् गमिष्यति ।
अमात्यो वसुदेवस्तु प्रसह्य ह्यवनीं नृपः ॥ ३१ ॥
देवभूमिमथोत्साद्य शौङ्गस्तु भविता नृपः ।
भविष्यति समाराजा नवकाण्वायनो नृपः ॥ ३२ ॥
भूमिमित्रः सुतस्तस्य चतुर्दश भविष्यति ।
नारायणः सुतस्तस्य भविता द्वादशैव तु ॥ ३३ ॥
सुशर्मा तत्सुतश्चापि भविष्यति दशैव तु ।
इत्येते शुङ्गभृत्यास्तु स्मृताः काण्वायना नृपाः ॥३४॥
चत्वारिंशद्द्विजा ह्येते काण्वा भोक्ष्यन्ति वै महीम् ।
चत्वारिंशत्पञ्च चैव भोक्ष्यन्ती मां वसुन्धराम् ॥३५॥
एते प्रणतसामन्ता भविष्या धार्मिकाश्च ये ।
येषां पर्य्यायकाले तु भूमिरान्ध्रान् गमिष्यति ॥३६॥

अथ द्विसप्तत्यधिकद्विशततमोऽध्याय:।

सूत उवाच। काण्वायनास्ततो भूपा: सुशर्माण: प्रसह्यताम्।
शुङ्गानाञ्चैव यच्छेषं क्षपित्वा तु बलीयस:॥ १॥
शिशुकोऽन्ध्र: सजातीय: प्राप्स्यती मां वसुन्धराम्।
त्रयोविंशत् समाराजा शिशुकस्तु भविष्यति॥ २॥
श्रीमल्लकर्णिर्भविता तस्य पुत्रस्तु वै दश।
पूर्णोत्सङ्गस्ततोराजा वर्षाण्यष्टादशैव तु॥ ३॥
पञ्चाशतं समा: षट्च शान्तकर्णिर्भविष्यति।
दशचाष्टौ च वर्षाणि तस्य लम्बोदर: सुत:॥ ४॥
आपीतकोदशद्वेच तस्य पुत्रो भविष्यति।
दशचाष्टौ च वर्षाणि मेघस्वाति र्भविष्यति॥५॥
स्वातिश्च भवितराजा समास्त्वष्टादशैव तु।
स्कन्दस्वातिस्तथा राजा सप्तैव तु भविष्यति॥६॥
मृगेन्द्रस्वातिकर्णस्तु भविष्यतिसमास्त्रय:।
कुन्तल: स्वातिकर्णस्तु भविताष्टौ समानृप:॥ ७॥
एकसंवत्सरं राजा स्वातिवर्णो भविष्यति॥ ८॥
भवितारिक्तवर्णस्तु वर्षाणि पञ्चविंशति:।
तत: संवत्सरान् पञ्च हालोराजा भविष्यति॥ ९॥
पञ्चमन्टुलकोराजा भविष्यतिसमा नृप:।
पुरीन्द्रसेनो भविता तस्मात्सौम्यो भविष्यति॥ १०॥
सुन्दर: शान्तिकर्णस्तु अब्दमेकं भविष्यति।
चकोर: स्वातिकर्णस्तु षण्मासान् वै भविष्यति॥ ११॥
अष्टाविंशतिवर्षाणि शिवस्वातिर्भविष्यति।

राजा च गौतमी पुत्त्रोह्येकविंशत्यतोनृप: ॥ १२ ॥
अष्टाविंशति सुत स्तस्य सुलोमावै भविष्यति ।
शिव श्रीर्वै सुलोमास्तु सप्तैव भविताऽनृप: ॥ १३ ॥
शिवस्कन्ध: शान्तिकर्णोऽभविताह्यात्मज: समा: ।
नवविंशतिवर्षाणि यज्ञ श्री: शान्तिकर्णिक: ॥ १४ ॥
षड़ेव भविता तस्माद्विजयस्तु समास्तत: ।
चण्ड श्री: शान्तिकर्णास्तु तस्य पुत्त्र: समादश ॥१५॥
सुलोमा सप्तवर्षाणि अन्यस्तेषां भविष्यति ।
एकोनविंशतिर्ह्येते आन्ध्रा भोक्ष्यन्ति वै महीम् ॥१६॥
तेषां वर्षशतानिस्युश्चत्वारिषष्टिरेव च ।
आन्ध्राणां संस्थिताराज्ये तेषां भृत्यान्वयेनृपा: ॥१७॥
सप्तैवान्ध्रा भविष्यन्ति दशाभीरा स्तथा नृपा: ।
सप्तगर्दभिलाश्चापि शकाश्चाष्टादशैव तु ॥ १८ ॥
यवनाष्टौ भविष्यन्ति तुषाराश्च चतुर्दश ।
त्रयोदश गुरुं डाश्च हूणाह्येकोनविंशति: ॥ १६ ॥
यवनाष्टौ भविष्यन्ति सप्ताशीति महीमिमाम् ।
सप्तगर्द्दभिलाभूयो भोक्ष्यन्ती मां वसुन्धराम् ॥ २० ॥
सप्तवर्षसहस्राणि तुषाराणां महीस्मृता ।
शतानि त्रीण्यशीतिश्च शतान्यष्टादशैव तु ॥ २१ ॥
शतान्यर्द्धञ्चतुष्काणि भवितव्यास्त्रयोदश ।
गुरुण्डा वृषलै: सार्धं भोक्ष्यन्ते म्लेच्छसम्भवा: ॥ २२ ॥
शतानित्रीणिभोक्ष्यन्ते वर्षाण्येकादशैव तु ।
आन्ध्रा: श्री पार्वतीयाश्च ते द्विपञ्चाशतं समा: ॥२३॥

सप्तषष्टिस्तुवर्षाणि दशाभीरा स्तथैव च।
तेषूत्सन्नेषु कालेन ततः किल किलानृपाः॥ २४॥
भविष्यन्तीह यवनाधर्मतः कामतोऽर्थतः।
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्वशः॥२५॥
विपर्ययेण वर्तन्ते क्षयमेष्यन्ति वै प्रजाः।
लुब्धानृत ब्रुवाश्चैव भवितारो नृपास्तथा॥ २६॥
कल्किनानुहताः सर्वे आर्य्या म्लेच्छाश्च सर्वतः।
अधार्मिकाश्च येऽत्यर्थं पाषण्डाश्चैव सर्वशः॥ २७॥
प्रणष्टे नृपवंशेतु सन्ध्याशिष्टे कलौयुगे।
किञ्चिच्छिष्टाः प्रजास्तावै धर्मेनष्टेऽपरिग्रहाः॥२८॥
असाधवोह्यसत्वाश्च व्याधिशोकेन पीड़िताः।
अनावृष्टि हताश्चैव परस्पर वधेप्सवः॥ २९॥
अशरण्याः परित्रस्ताः सङ्कटं घोरमाश्रिताः।
सरित्पर्वतवासिन्यो भविष्यन्त्यखिलाः प्रजाः॥ ३०॥
पत्र मूल फलाहारा चीरपत्राजिनाम्बराः।
इत्यर्थमभिलिप्सन्त्यश्चरिष्यन्ति वसुन्धराम्॥ ३१॥
एवं कष्ट मनुप्राप्ताः प्रजाः काले युगान्तके।
निःशेषास्तु भविष्यन्ति सर्धं कलियुगेन तु॥ ३२॥
क्षीणे कलियुगे तस्मिन् दिव्ये वर्ष सहस्रके।
ससन्ध्यांशे सुनिःशेषे कृतं तु प्रतिपत्स्यते॥ ३३॥
एवं वंशक्रमः कृत्स्नः कीर्त्तितो यो मया क्रमात्।
अतीता वर्त्तमानाश्च तथैवानागताश्च ये॥ ३४॥
महापद्माभिषेकात्तु यावज्जन्म परीक्षितः।

एवं वर्षसहस्रं तु ज्ञेयं पञ्चाशदुत्तरम् ॥ ३५ ॥
पौलोमास्तु तथान्ध्रास्तु महापद्मान्तरे पुनः ।
अनन्तरं शतान्यष्टौ षट्त्रिंशत्तु समास्तथा ॥ ३६ ॥
तावत्कालान्तरं भाव्यमान्ध्रान्तादा परीक्षितः ।
भविष्येते प्रसङ्ख्याताः पुराणज्ञैः श्रुतर्षिभिः ॥ ३७ ॥
सप्तर्षयस्तदाप्रांशु प्रदीप्तेनाग्निना समाः ।
सप्तविंशतिभाव्यानां आन्ध्राणान्तु यदा पुनः ॥ ३८ ॥
सप्तर्षयस्तु वर्त्तन्ते यत्र नक्षत्रमण्डले ।
सप्तर्षयस्तु तिष्ठन्ति पर्य्यायेण शतं शतम् ॥ ३९ ॥
सप्तर्षीणामुपर्य्येतत् स्मृतं वै दिव्यसंज्ञया ।
समादिव्याः स्मृताः षष्टिर्दिव्याब्दानितु सप्तभिः ॥४०॥
एभिः प्रवर्तते कालोदिव्यः सप्तर्षिभिस्तुवै ।
सप्तर्षीणाञ्च यौ पूर्वौ दृश्येते ह्युदितौ निशि ॥ ४१ ॥
तयोर्मध्ये तु नक्षत्रं दृश्यते यत्समं दिवि ।
तेन सप्तर्षयोज्ञेया युक्ताव्योम्नि शतं समाः ॥ ४२ ॥
नक्षत्राणामृषीणाञ्च योगस्यैतन्निदर्शनम् ।
सप्तर्षयो मघायुक्ताः काले पारिक्षिते शतम् ॥ ४३ ॥
ब्राह्मणास्तु चतुर्विंशा भविष्यन्ति शतं समाः ।
ततः प्रभृत्ययं सर्वोलोको व्यापत्स्यति भयम् ॥ ४४ ॥
अनृतोपहतालुब्धा धर्मतः कामतोऽर्थतः ।
श्रौतस्मार्तेति शिथिले नष्टवर्णाश्रमे तथा ॥ ४५ ॥
सङ्करं दुर्बलात्मानः प्रतिपत्स्यन्ति मोहिताः ।
ब्राह्मणाः शूद्रयोनिस्थाः शूद्रावै मन्त्रयोनयः ॥ ४६ ॥

उपस्थास्यन्ति तान्विप्रा स्तदर्थमभिलिप्सवः।
क्रमेणैव च हास्यन्ते स्ववर्णान्तरदायकम् ॥ ४७ ॥
क्षयमेव गमिष्यन्ति क्षीणा शेषा युगक्षये।
यस्मिन् कृष्णोदिवं यातस्तस्मिन्नेव तदाहनि ॥ ४८ ॥
प्रतिपन्नं कलियुगं प्रमाणं तस्य मे शृणु।
चतुःशतसहस्रन्तु वर्षाणां वै स्मृतं बुधैः ॥ ४९ ॥
चत्वार्यष्टसहस्राणि सङ्ख्यातं मानुषेण तु।
दिव्यं वर्षं सहस्रन्तु तदासङ्ख्या प्रवर्त्तते ॥ ५० ॥
निःशेषेतु तदा तस्मिन् क्षतं वै प्रतिपत्स्यते।
ऐलश्चेक्ष्वाकुवंशश्च सहदेवः प्रकीर्त्तिताः ॥ ५१ ॥
इक्ष्वाकोः संस्मृतं क्षत्रं सुमित्रान्तं भविष्यति।
ऐलं क्षत्रं समाक्रान्तं सोमवंश विदोविदुः ॥ ५२ ॥
एते विवस्वतः पुत्त्राः कीर्तिताः कीर्तिवर्धनाः।
अतीता वर्तमानाश्च तथैवानागताश्च ये ॥ ५३ ॥
ब्राह्मणाः क्षत्रिया वैश्या स्तथाशूद्राश्च वै स्मृताः।
वैवस्वतेऽन्तरे तस्मिन्निति वंशः समाप्यते ॥ ५४ ॥
देवापिः पौरवोराजा ऐक्ष्वाकोयश्च ते मतः।
महायोगबलोपेतौ कलाप ग्राममाश्रितौ ॥ ५५ ॥
एतौ क्षत्र प्रणेतारौ नवविंशे चतुर्युगे।
सुवर्चा मनुपुत्त्रस्तु ऐक्ष्वाकाद्यो भविष्यति ॥ ५६ ॥
नवविंशे युगेसो वै वंशस्यादि र्भविष्यति।
देवापि पुत्त्रः सत्यस्तु ऐलानां भविता नृपः ॥ ५७ ॥
क्षत्र प्रवर्तकावेतौ भविषेरतु चतुर्युगे।

एवं सर्वेषु विज्ञेयं सन्तानार्थन्तु लक्षणम् ॥ ५७ ॥
क्षीणे कलियुगेचैव तिष्ठन्तीति कृते युगे।
सप्तर्षयस्तु तैः सार्धं मध्ये त्रेतायुगे पुनः ॥ ५८ ॥
बीजार्थं वै भविष्यन्ति ब्रह्मक्षत्रस्तु वै पुनः।
एवमेवं तु सर्वेषु तिष्ठान्तेष्वन्तरेषु च ॥ ६० ॥
सप्तर्षयोनृपैः सार्द्धं सन्तानार्थं युगे युगे।
एवं क्षत्रस्य चोत्सेधः सम्बन्धो वै द्विजैः स्मृतः ॥६१॥
मन्वन्तराणां सन्ताने सन्तानाश्च श्रुतौ स्मृताः।
अतिक्रान्तयुगाश्चैव ब्रह्म- क्षत्रस्य सम्भवाः ॥ ६२ ॥
यथा प्रयान्ति तेषां वै प्रकृतीनां यथाक्षयः।
सप्तर्षयोविदुस्तेषां दीर्घायुष्ट्वं क्षयोदयौ ॥ ६३ ॥
एतेन क्रमयोगेन ऐला इक्ष्वाकवो नृपाः।
उत्पद्यमानास्त्रेतायां क्षीयमाणाः कलौ युगे ॥६४॥
अनुयान्ति युगाख्यान्तु यावन्मन्वन्तरक्षयम्।
जामदग्न्येन रामेण क्षत्रे निरवशेषिते ॥ ६५ ॥
रिक्तेयं वसुधासर्वा क्षत्रियैर्वसुधाधिपैः।
द्विवंशकरणं सर्वं कीर्तयिष्ये निबोध मे । ६६ ॥
ऐलस्येक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते।
राजानः श्रेणिबद्धाश्च तथान्ये क्षत्रियाभुवि ॥ ६७ ॥
ऐलवंशास्तु भूयांसो न तथेक्ष्वाकवो नृपाः।
एषामेकशतं पूर्णं कुलानामभिरोचते ॥ ६८ ॥
तावदेव तु भोजानां विस्ताराद्द्विगुणं स्मृतम्।
भोजानां द्विगुणं क्षत्रं चतुर्द्धा तद्यथातथम् ॥ ६९ ॥

ते ह्यतीताः स नामानो ब्रुवतस्तान्निबोध मे।
शतं वै प्रतिविन्ध्यानां शतं नागाः शतं हयाः ॥७०॥
शतमेकं धार्तराष्ट्रा ह्यशीतिर्जनमेजयाः।
शतं वै ब्रह्मदत्तानां वीराणां कुरवः शतम् ॥ ७१ ॥
ततः शतञ्च पञ्चालाः शतं काशिकुशादयः।
तथापरे सहस्रे द्वे ये नीपाः शशविन्दवः ॥ ७२ ॥
इष्टवन्तश्च ते सर्वे सर्वेनियुत दक्षिणाः।
एवं राजर्षयोऽतीताः शतशोऽथ सहस्रशः ॥ ७३ ॥
मनोर्वैवस्वतस्यासन् वर्तमानेऽन्तरे विभोः।
तेषां तु निधनोत्पत्तौ लोकसंस्थितयः स्थिताः ॥७४॥
न शक्योविस्तरस्तेषां सन्तानस्य परस्परम्।
तत्पूर्वापरयोगेन वक्तुं वर्षशतैरपि ॥ ७५ ॥
अष्टाविंशसमाख्याता गता वैवस्वतेऽन्तरे।
एते देवगणैः सार्द्धं शिष्टा ये तान्निबोधत ॥ ७६ ॥
चत्वारिंशत्त्रयश्चैव भविष्यास्ते महात्मनः।
अवशिष्टायुगाख्यास्ते ततो वैवस्वतो ह्ययम् ॥७७॥
एतद्वः कीर्तितं सम्यक् समास व्यासयोगतः।
पुनर्वक्तुं बहुत्वात्तु न शक्यं विस्तरेण तु ॥ ७८ ॥
उक्ता राजर्षयो येतु अतीतास्ते युगैः सह।
ये ते ययातिवंश्यानां येच वंशा विशाम्पते ॥ ७९ ॥
कीर्तिता द्युतिमन्तस्ते य एतान् धारयेन्नरः।
लभते स वरान् पञ्चदुर्लभानिहलौकिकान् ॥८०॥
आयुः कीर्तिं धनं स्वर्गं पुत्रवांश्चाभिजायते।
धारणाच्छ्रवणाच्चैव परं स्वर्गस्य धीमतः ॥ ८१ ॥

## अथ त्रिसप्तत्यधिकद्विशततमोऽध्यायः ।

ऋषय ऊचुः । न्यायेनार्जनमर्थानां वर्द्धनञ्चाभिरक्षणम् ।
सत्पात्रे प्रतिपत्तिश्च सर्वशास्त्रेषु पठ्यते ॥ १ ॥
कृतकृत्योभवेत्केन मनस्वी धनवान् बुधः ।
महादानेन दत्तेन तन्नो विस्तरतो वद ॥ २ ॥
सूत उवाच । अथातः सम्प्रवक्ष्यामि महादानानुकीर्तनम् ।
दानधर्मेऽपि यन्नोक्तं विष्णुनाप्रभविष्णुना ॥ ३ ॥
तदहं सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
सर्वपापक्षयकरं नृणां दुःस्वप्ननाशनम् ॥ ४ ॥
यत्तत् षोड़शधा प्रोक्तं वासुदेवेन भूतले ।
पुण्यं पवित्रमायुष्यं सर्वपापहरं शुभम् ॥ ५ ॥
पूजितं देवताभिश्च ब्रह्मविष्णुशिवादिभिः ।
आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम् ॥ ६ ॥
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ।
कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम् ॥ ७ ॥
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च ।
हिरण्याश्वरथस्तद्वत् हेमहस्तिरथस्तथा ॥ ८ ॥
पञ्चलाङ्गलकं तद्वत् धरादानं तथैव च ।
द्वादशं विश्वचक्रन्तु ततः कल्पलतात्मकम् ॥ ९ ॥
सप्तसागरदानञ्च रत्नधेनुस्तथैव च ।
महाभूतघटस्तद्वत् षोड़शं परिकीर्तितम् ॥ १० ॥
सर्वाण्येतानि कृतवान् पुरा शम्बरसूदनः ।
वासुदेवस्तु भगवान् अम्बरीषोऽथ भार्गवः ॥ ११ ॥

कार्तवीर्य्यार्जुनोनाम प्रह्लादः पृथुरेव च।
कुर्य्युरन्येमहीपालाः केचिच्च भरतादयः॥ १२॥
यस्माद्विघ्नसहस्रेण महादानानि सर्वदा।
रक्षन्तेदेवताः सर्वा एकैकमपि भूतले॥ १३॥
एषामन्यतमं कुर्य्याद्वासुदेव प्रसादतः।
न शक्यमन्यथा कर्तुं मपिशक्रेण भूतले॥ १४॥
तस्मादाराध्य गोविन्द मुमापतिविनायकौ।
महादानमथं कुर्य्याद्विप्रैश्चैवानुमोदितः॥ १५॥
एतदेवाह मनवे परिपृष्टो जनार्दनः।
यथावदनुवक्ष्यामि शृणुध्वमृषिसत्तमाः!॥ १६॥
मनुरुवाच। महादानानि यानीह पवित्राणि शुभानि च।
रहस्यानि प्रदेयानि तानि मे कथयाच्युत!।
मत्स्य उवाच। यानि नोक्तानि गुह्यानि महादानानि षोडश।
तानि ते कथयिष्यामि यथावदनुपूर्वशः॥ १८॥
तुलापुरुषयागोऽयं येषामादौ विधीयते।
अयने विषवे पुण्ये व्यतीपाते दिनक्षये॥ १९॥
युगादिषूपरागेषु तथा मन्वन्तरादिषु।
सङ्क्रान्तौ तौ वैधृतिदिने चतुर्दश्यष्टमीषु च॥ २०॥
सितपञ्चदशीपर्व द्वादशीष्वष्टकासु च।
यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने॥ २१॥
द्रव्यब्राह्मण लाभे वा श्रद्धा वा यत्र जायते।
तीर्थे वायतने गोष्ठे कूपारामसरित्सु च॥ २२॥
गृहे वायतने वापि तड़ागे रुचिरे तथा।
महादानानि देयानि संसारभयभीरुणा॥ २३॥

अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम् ।
केशेष्वेव गृहीतः सन् मृत्युना धर्ममाचरेत् ॥ २४ ॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
षोड़शारत्निमात्रन्तु दशद्वादशवाऽकरान् ॥ २५ ॥
मण्डपं कारयेद्विद्वान् चतुर्भद्रासनं बुधः ।
सप्तहस्ता भवेद्वेदी मध्ये पञ्चकरा तथा ॥ २६ ॥
तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं बुधः ।
कुर्य्यात् कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः ॥२७॥
समेखलायोनियुतानि कुर्य्यात् सम्पूर्ण कुम्भानि सहासनानि ।
सुताम्रपात्र द्वयसंयुतानि स यज्ञपात्राणि सुविष्टराणि ॥२८॥
हस्तप्रमाणानि तिलाज्यधूपपुष्पोपहाराणि सुशोभनानि ।
पूर्वोत्तरे हस्तमिताथ वेदी ग्रहादिदेवेश्वरपूजनाय ॥ २९ ॥

अत्रार्चनं ब्रह्मशिवाच्युतानां
तत्रैव कार्य्यं फलमाल्यवस्त्रैः ।
लोकेशवर्णाः परितः पताका-
मध्ये ध्वजः किङ्किणिकायुतः स्यात् ॥ ३० ॥
द्वारेषु कार्य्याणि च तोरणानि
चत्वार्य्यपि क्षीरवनस्पतीनाम् ।
द्वारेषु कुम्भद्वयमत्र कार्य्यं
स्रग्गन्धधूपाम्बररत्नयुक्तम् ॥ ३१ ॥
शालेङ्गुदी चन्दनदेवदारु-
श्रीपर्णिविल्वप्रियकाञ्चनोत्थम् ।
स्तम्भद्वयं हस्तयुगावखातं
कृत्वा दृढं पञ्चकरोच्छ्रितञ्च ॥ ३२ ॥

तदन्तरं हस्तचतुष्टयं स्याद्यथोदरङ्गस्य तदङ्गमेव ।
समानजातिश्च तुलावलम्ब्या हैमेन मध्ये पुरुषेण युक्ता ॥३३॥
दैर्घ्येण सा हस्तचतुष्टयं स्यात् पृथुत्वमस्यास्तु दशाङ्गुलानि ।
सुवर्णपट्टाभरणातु कार्य्या सा लोहपाशद्वयशृङ्खलाभिः॥३४॥
युतासुवर्णेन तु रत्नमाला विभूषितामाल्यविलेपनाभ्याम् ।
चक्रं लिखेद्वारिजगर्भयुक्तं नानारजोभिर्भुविपुष्पकीर्णम् ॥३५॥
वितानकञ्चोपरि पञ्चवर्णं संस्थापयेत् पुष्पफलोपशोभम् ।
अथर्त्विजो वेदविदश्च कार्य्याः सुरूपवेशान्वयशीलयुक्ताः ॥३६॥
विधानदक्षाः पटवोऽनुकूला येचार्य्यदेशप्रभवा द्विजेन्द्राः ।
गुरुश्च वेदान्तविदार्य्यवंश समुद्भवः शीलकुलाभिरूपः ॥ ३७ ॥
पुराणशास्त्राभिरतोऽतिदक्षः प्रसन्नगम्भीरसरस्वतीकः ।
सिताम्बरः कुण्डलहेमसूत्र केयूरकण्ठाभरणाभिरामः ॥३८॥
पूर्वेण ऋग्वेदविदावथास्तां यजुर्विदौदक्षिणतस्य शस्तौ ।
स्थाप्यौ द्विजौ सामविदौ तु पश्चादाथर्वणावुत्तरतस्तुकार्य्यौ ॥
विनायकादिग्रहलोकपाल वस्वष्टकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतोहोमचतुष्टयं स्यात् ॥४०॥
जप्यानि सूक्तानि तथैव चैषां मनुक्रमेणापि यथा स्वरूपम् ।
होमावसाने कृततूर्य्यनादो गुरुर्गृहीत्वा बलिपुष्पधूपम् ।
आवाहयेल्लोकपतीन् क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः ।४१॥
एह्येहि सर्वामरसिद्धसाध्यै रभिष्टुतोवज्रधरोऽमरेशः ।
संवीज्यमानोऽप्सरसाङ्गणेन रक्षाध्वरन्नो भगवन्नमस्ते ॥४२॥
एह्येहि सर्वामरहव्यवाह ! मुनिप्रवीरैरभितोऽभिजुष्टः ।
तेजस्वितालोकगणेन सार्द्धं ममाध्वरं रक्ष कवे ! नमस्ते ॥४३॥
एह्येहि वैवस्वतधर्मराज ! सर्वामरैरर्चितदिव्यमूर्ते ! ।

शुभाशुभानन्दशुचामधीश! शिवायनः पाहि मखं नमस्ते ॥४४॥
एह्येहि रक्षोगणनायकस्त्वं सर्वैस्तु वेतालपिशाचसङ्घैः।
ममाध्वरं पाहि शुभादिनाथ! लोकेश्वरस्त्वं भगवन्नमस्ते ॥४५॥
एह्येहि यादोगणवारिधीनाङ्गणेन पर्जन्यमहाप्सरोभिः।
विद्याधरेन्द्रामरगीयमान! पाहि त्वमस्मान् भगवन्नमस्ते ॥४६॥
एह्येहि यक्ष मम रक्षणाय मृगाधिरूढः सहसिद्धसङ्घैः।
प्राणाधिपः कालकवेः सहायः गृहाण पूजां भगवन्नमस्ते ॥४७॥
एह्येहि यक्षेश्वर! यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम्।
सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥४८॥
एह्येहि विश्वेश्वर! नस्त्रिशूल कपालखट्वाङ्गधरेण सार्द्धम्।
लोकेशयज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥४९॥
एह्येहि पातालधराधरेन्द्र! नागाङ्गनाकिन्नरगीयमान!।
यक्षोरगेन्द्रामरलोकसार्द्धं मनन्त! रक्षाध्वरमस्मदीयम् ॥५०॥
एह्येहि विश्वाधिपते! मुनीन्द्र! लोकेन सार्द्धं पितृदेवताभिः।
सर्वस्य धातास्यमितप्रभाव विशाध्वरन्नो भगवन्नमस्ते ॥५१॥

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥५२॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः।
ऋषयो मनवो गावो देवमातर एव च ॥५३॥
सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः।
इत्यावाह्य सुरान् दद्यादृत्विग्भ्यो हेमभूषणम् ॥५४॥
कुण्डलानि च हैमानि सूत्राणि कटकानि च।
अङ्गुलीयपवित्राणि वासांसि शयनानि च ॥५५॥
द्विगुणं गुरवे दद्याद्भूषणाच्छादनानि च।

जपेयुः शान्तिकाध्यायं जापकाः सर्व्वतोदिशम् ॥५६॥
तत्रोषितास्तु ते सर्व्वे कृत्वैवमधिवासनम्।
आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम् ॥५७॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः।
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ॥५८॥
शुक्लमाल्याम्बरीभूत्वा तां तुलामभिमन्त्रयेत्।
नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमास्थिता ॥५९॥
साक्षिभूता जगद्धात्री निर्म्मिता विश्वयोनिना।
एकतः सर्वसत्यानि तथानृतशतानि च ॥ ६० ॥
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते।
त्वं तुले! सर्वभूतानां प्रमाणमिह कीर्त्तिता ॥६१॥
मां तोलयन्ती संसारा दुद्धरस्व नमोऽस्तु ते।
योऽसौतत्वाधिपोदेवः पुरुषः पञ्चविंशकः ॥६२॥
स एकोऽधिष्ठितोदेवि! त्वयि तस्मान्नमोनमः।
नमोनमस्ते गोविन्द! तुलापुरुषसंज्ञक! ॥६३॥
त्वं हरे! तारयस्वास्मानस्मात् संसारकर्द्दमात्।
पुण्यकालं समासाद्य कृत्वैव मधिवासनम् ॥६४॥
पुनः प्रदक्षिणां कृत्वा तुलामारोहयेद्बुधः।
स खड्गचर्मकवचः सर्वाभरणभूषितः ॥६५॥
धर्मराजमथादाय हैमं सूर्य्येण संयुतम्।
कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम् ॥६६॥
ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः।
समादभ्यधिकं यावत् काञ्चनं चातिनिर्म्मलम् ॥६७॥
पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नरेश्वरः।

क्षणमात्रं ततः स्थित्वा पुनरेव मुदीरयेत् ॥६८॥
नमस्ते सर्वभूतानां साक्षिभूते ! सनातनि ! ।
पितामहेन देवि ! त्वं निर्मिता परमेष्ठिना ॥ ६९ ॥
त्वया धृतं जगत्सर्वं सहस्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे ! नमस्ते विश्वधारिणि ! ॥७०॥
ततोऽवतीर्य्य गुरवे पूर्वमर्द्धं निवेदयेत् ।
ऋत्विग्भ्यो परमर्धन्तु दद्यादुदकपूर्वकम् ॥७१॥
गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत् ।
प्राप्य तेषामनुज्ञां तु तथान्येभ्योऽपि दापयेत् ॥७२॥
दीनानाथविशिष्टादीन् पूजयेद्ब्राह्मणैः सह ।
नचिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः ॥७३॥
तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणाम् ।
शीघ्रं परस्वीकरणाच्छ्रेय. प्राप्नोति मानवः ॥७४॥
अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥७५॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ।
कल्पकोटिशतं यावत्तस्मिन् लोके महीयते ॥७६॥
कर्मक्षयादिह पुन र्भुविराजराजो-
भूपालमौलि मणिरञ्जितपादपीठः ।
श्रद्धान्वितो भवति यज्ञसहस्रयाजी
दीप्तप्रतापजित सर्वमहीपलोकः ॥७७॥
यो दीयमानमपि पश्यति भक्तियुक्तः
कालान्तरे स्मरति वाचयतीह लोके

योवा शृणोति पठतीन्द्रसमानरूपः
प्राप्नोति धाम सपुरन्दरदेव जुष्टम् ॥ ७८ ॥

---

अथ चतुःसप्तत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥ १ ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विग् मण्डपसम्भार भूषणाच्छादनादिकम् ॥२॥
कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः ।
पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम् ॥३॥
ब्राह्मणैरानयेत्कुम्भं तपनीयमयं शुभम् ।
द्विसप्तत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत् ॥४॥
त्रिभागहीनविस्तार माज्यक्षीराभिपूरितम् ।
दशास्त्राणि च रत्नानि दात्रीं सूचीं तथैव च ॥५॥
हेमनालं सपिठकं बहिरादित्यसंयुतम् ।
तथैवावरणं नाभेरुपवीतञ्च काञ्चनम् ॥६॥
पार्श्वतः स्थापयेत् तद्वत् हैमदण्डकमण्डलू ।
पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम् ॥७॥
मुक्तावलीसमायेतं पद्मरागसमन्वितम् ।
तिलद्रोणोपरिगतं वेदिमध्ये व्यवस्थितम् ॥८॥
ततो मङ्गलशब्देन ब्रह्मघोषरवेण च ।
सर्वौषध्युदकस्नान स्नापितो वेदपुङ्गवैः ॥९॥
शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः ।

दमसुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥१०॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमोनमः ॥ ११ ॥
भूर्लोकप्रमुखा लोका स्तवगर्भे व्यवस्थिताः ।
ब्रह्मादय स्तथा देवाः नमस्ते विश्वधारिणे ॥ १२ ॥
नमस्ते भुवनाधार ! नमस्ते भुवनाश्रय ! ।
नमो हिरण्यगर्भाय गर्भे यस्य पितामहः ॥ १३ ॥
यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः ।
तस्मान्मामुद्धराशेष दुःख संसारसागरात् ॥ १४ ॥
एवमामन्त्र्य तन्मध्यमा विश्यास्त उदङ्मुखः ।
मुष्टिभ्यां परिसंगृह्य धर्मराज चतुर्मुखौ ॥ १५ ॥
जानुमध्ये शिरः कृत्वा तिष्ठेदुच्छ्वास पञ्चकम् ।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ॥ १६ ॥
कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः ।
गीतमङ्गलघोषेण गुरुरुत्थापयेत्ततः ॥ १७ ॥
जातकर्मादिकाः कुर्युः क्रियाः षोडश चापराः ।
सूच्यादिकञ्च गुरवेदद्यान् मन्त्रमिमं जपेत् ॥ १८ ॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः ।
चराचरस्य जगतो गृहभूताय वै नमः ॥ १९ ॥
यथाहं जनितः पूर्वं मर्त्यधर्मा सुरोत्तम ! ।
त्वद्गर्भसम्भवादेष दिव्यदेहो भवाम्यहम् ॥ २० ॥
चतुर्भिः कलशैर्भूयः ततस्ते द्विजपुङ्गवाः ।
स्नापयेयुः प्रसन्नाङ्गाः सर्वाभरण भूषिताः ॥ २१ ॥
देवस्यत्वेति मन्त्रेण स्थितस्य कनकासने ।

अद्य जातस्ततेऽङ्गानि अभिषेक्ष्यामहे वयम्॥ २२॥
दिव्येनानेन वपुषा चिरं जीव सुखी भव।
ततो हिरण्यगर्भं तन्तेभ्यो दद्याद्विचक्षणः॥ २३॥
ते पूज्याः सर्वभावेन बहवो बहवो वा तदाज्ञया।
तत्रोपकरणं सर्वं गुरवे विनिवेदयेत्॥ २४॥
पादुकोपानहच्छत्र चामरासन भाजनम्।
ग्रामं वा विषयं वापि यदन्यदपि सम्भवेत्॥ २५॥
अनेन विधिनायस्तु पुण्येऽहनि निवेदयेत्।
हिरण्यगर्भदानं स ब्रह्मलोके महीयते॥ २६॥
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत्।
कल्पकोटिशतं यावद्ब्रह्मलोके महीयते॥ २७॥
कलि कलुषविमुक्तः पूजितः सिद्धसाध्यै
रमर चमरमाला वीज्यमानोऽप्सरोभिः।
पितृशतमथ बन्धून् पुत्त्रपौत्त्रान् प्रपौत्त्रान्
अपिनरक निमग्नां स्तारयेदेक एव॥ २८॥
इति पठति य इत्थं यः शृणोतीह सम्यक्
मधुरिपुरिव लोके पूज्यते सोऽपि सिद्धैः।
मतिमपि च जनानां यो ददाति प्रियार्थं
विबुधपति जनानां नायकः स्यादमोघम्॥ २९॥

---

अथ पञ्चसप्तत्यधिकद्विशततमोऽध्यायः।

मत्स्यउवाच। अथातः सम्प्रवक्ष्यामि ब्रह्माण्ड विधिमुत्तमम्।
यच्छ्रेष्टं सर्वदानानां महापातक नाशनम्॥ १॥

पुण्यं दिन मथासाद्य तुलापुरुष दानवत्।
ऋत्विग्मण्डपसम्भार भूषणाच्छादनादिकम् ॥ २ ॥
लोकेशावाहनं कुर्य्या दधिवासनकं तथा।
कुर्य्याद्विंशपलादूर्द्ध मातृत्त्वाच्च शक्तितः ॥ ३ ॥
कलशद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्ग समन्वितम् ॥ ४ ॥
लोकपालाष्टकोपेतं मध्यस्थित चतुर्मुखम्।
शिवाच्युतार्कशिखरमुमा लक्ष्मी समन्वितम् ॥ ५ ॥
वस्वादित्य मरुद्गर्भं महारत्न समन्वितम्।
वितस्तेरङ्गुलशतं यावदायाम विस्तरम् ॥ ६ ॥
कौशेय वस्त्रसम्वीतं तिलद्रोणे परिन्यसेत्।
तथाष्टादशधान्यानि समन्तात्परिकल्पयेत् ॥ ७ ॥
पूर्वेणानन्तशयनं प्रद्युम्नं पूर्वदक्षिणे।
प्रकृतिं दक्षिणे देशे सङ्कर्षण मतःपरम् ॥ ८ ॥
पश्चिमे चतुरो वेदाननिरुद्ध मतःपरम्।
अग्निमुत्तरतो हैमं वासुदेव मतःपरम् ॥ ९ ॥
समन्ताद्गुडपीठ स्थानर्चये काञ्चनान्बुधः।
स्थापयेद्वस्त्रसम्वीतान् पूर्णकुम्भान् दशैवतु ॥ १० ॥
दशैव धेनवो देयाः स हैमा म्बरदोहनाः।
पादुकोपानहच्छत्र चामरासन दर्पणैः।
भक्ष्य भोज्यान्नदीपेक्षु फलमाल्यानु लेपनैः ॥ ११ ॥
होमाधिवासनान्ते च स्नापितो वेदपुङ्गवैः।
इम मुच्चारयेन्मन्त्रं त्रिः कृत्वाथ प्रदक्षिणम् ॥ १२ ॥
नमोऽस्तु विश्वेश्वर! विश्वधाम! जगत्सवित्रे भगवन्नमस्ते।

सप्तर्षिलोकामर भूतलेश ! गर्भेण साधं वितराभिरक्षाम् ॥१३॥
येदुःखितास्ते सुखिनोभवन्तु प्रयान्तु पापानि चराचराणाम्।
त्वद्दानशस्त्राहतपातकानां ब्रह्माण्ड दोषाः प्रलयं व्रजन्तु ॥१४॥
एवं प्रणम्यामर विश्वगर्भं दद्याद्द्विजेभ्यो दशधा विभज्य।
भागद्वयं तत्र गुरोः प्रकल्प्य समं भजेच्छेष मनुक्रमेण ॥१५॥
स्वल्पे च होमं गुरुरेक एव कुर्य्यादथैकाग्नि विधानयुक्त्या।
स ऽएव सम्पूज्यतमोऽल्पवित्ते यथोक्त वस्त्राभरणादिकेन ॥१६॥

इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्-
ब्रह्माण्डदान मधिगम्य महद्विमानम्।
निर्धूतकल्मष विशुद्धतनुर्मुरारे
रानन्दकृत्पदमुपैति सहाप्सरोभिः ॥ १७ ॥
सन्तारयेत् पितृपितामह पुत्त्रपौत्त्र
बन्धुप्रिया तिथिकलत्र शताष्टकं सः।
ब्रह्माण्डदान शकलीकृत पातकौघ
मानन्दयेच्च जननीकुलमप्यशेषम् ॥ १८ ॥
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्मिकाणाम्।
मति मपि च ददाति मोदते
ऽसावमरपतेर्भवने सहाप्सरोभिः ॥ १९ ॥

---

## अथ षट्सप्तत्यधिकद्विशततमोऽध्यायः।

मत्स्यउवाच। कल्पपादपदानाख्य मतःपर मनुत्तमम्।
महादानं प्रवक्ष्यामि सर्वपातक नाशनम् ॥ १ ॥

पुण्यं दिन मथासाद्य तुला पुरुष दानवत् ।
पुण्याह वाचनं कृत्वा लोकेशा वाहनं तथा ॥ २ ॥
ऋत्विग् मण्डपसम्भारभूषणाच्छादनादिकम् ।
काञ्चनं कारयेत्‌वृक्षं नानाफल समन्वितम् ॥ ३ ॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्ध्वमा सहस्रं प्रकल्पयेत् ॥ ४ ॥
अर्धं कृत्वा सुवर्णस्य कारयेत्कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च सितवस्त्र युगान्वितम् ॥ ५ ॥
ब्रह्मविष्णु शिवोपेतं पञ्चशाखं सभास्करम् ।
कामदेव मधस्ताच्च सकलत्रं प्रकल्पयेत् ॥ ६ ॥
सन्तानं पूर्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्धं घृतोपरि ॥ ७ ॥
पश्चिमे पारिजातन्तु सावित्र्या सह जीरके ।
सुरभीसंयुतं तद्वत्तिलेषु हरिचन्दनम् ॥ ८ ॥
तुरीयांशेन कुर्वीत सौम्येन फलसंयुतम् ।
कौशेय वस्त्रसम्वीतानिक्षुमाल्य फलान्वितान् ॥ ९ ॥
तथाष्टौ पूर्णकलशान् पादुकाशन भाजनम् ।
दीपिकोपानहच्छत्र चामरासन संयुतम् ॥ १० ॥
फलमाल्ययुतं तद्वदुपरिष्टात् वितानकम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥ ११ ॥
होमाधि वासनान्ते च स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमावृत्य मन्त्रमेत मुदीरयेत् ॥ १२ ॥
नमस्ते कल्पवृक्षाय चिन्तितार्थ प्रदायिने ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्तये ॥ १३ ॥

यस्मात्त्वमेव विश्वात्मा ब्रह्मास्थाणुर्दिवाकरः ।
मूर्तोऽमूर्तं परं वीज मतःपाहि सनातन ! ॥ १४ ॥
त्वमेवा मृतसर्वस्वमनन्तः पुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतास्मात् पाहि संसारसागरात् ॥ १५ ॥
एवमामन्त्र्य तं दद्यात् गुरवे कल्पपादपम् ।
चतुर्थ्यश्चाथ ऋत्विग्भ्यः सन्तानादीन् प्रकल्पयेत् ॥१६॥
स्वल्पे त्वेकाग्निवत् कुर्य्यात् गुरवे चाभि पूजनम् ।
न वित्तशाठ्यं कुर्वीत नच विस्मयवान् भवेत् ॥ १७ ॥
अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्वपाप विनिर्मुक्तः सोऽश्वमेध फलं लभेत् ॥ १८ ॥
अप्सरोभिः परिवृतः सिद्धचारण किन्नरैः ।
भूतान् भाव्यांश्च मनुजां स्तारयेत् गोत्रसंयुतान् ॥१९॥
स्तूयमा नेदिवः पृष्ठे पितृ पुत्त्र प्रपौत्त्रकान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ॥ २० ॥
दिविकल्प शतं तिष्ठेत् राजराजो भवेत्ततः ।
नारायण बलोपेतो नारायण परायणः ।
नारायण कथासक्तो नारायण पुरं व्रजेत् ॥ २१ ॥

यो वा पठेत्सकल कल्पतरु प्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोक मधिगम्य सहाप्सरोभि
र्मन्वन्तरं वसति पाप विमुक्तदेहः ॥ २२ ॥

---

अथ सप्तसप्तत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । अथातः सम्प्रवक्ष्यामि महादान मनुत्तमम् ।
गो सहस्रप्रदानाख्यं सर्वपाप हरं परम् ॥ १ ॥
पुण्यां तिथिं समासाद्य युग मन्वन्तरादिकीम् ।
पयोव्रतं त्रिरात्रं स्यादेकरात्र मथापि वा ॥ २ ॥
लोकेशावाहनं कुर्यात् तुलापुरुष दानवत् ।
पुण्याह वाचनं कुर्याद्धोमः कार्य स्तथैव च ॥ ३ ॥
गोसहस्रं बहिः कुर्याद्वस्त्रमाल्य विभूषणम् ।
सुवर्ण शृङ्गाभरणं रौप्य पाद समन्वितम् ॥ ४ ॥
अन्तः प्रवेश्य दशकं वस्त्रमाल्यैश्च पूजयेत् ।
सुवर्ण घण्टिकायुक्तं कांस्य दोहन कान्वितम् ॥ ५ ॥
सुवर्ण तिलकोपेतं हेमपट्टै रलङ्कृतम् ।
कौशेय वस्त्र संवीतं माल्यगन्ध समन्वितम् ॥ ६ ॥
हेमरत्नमयैः शृङ्गैश्चामरै रुप शोभितम् ।
पादुकोपान च्छत्र भाजनासन संयुतम् ॥ ७ ॥
गवां दशक मध्ये स्यात् काञ्चनो नन्दिकेश्वरः ।
कौशेय वस्त्र संवीतो नानाभरण भूषितः ॥ ८ ॥
लवण द्रोणशिखरे माल्ये क्षु फलसंयुतः ।
कुर्यात् पलशतादूर्द्ध्वं सर्वमेतदशेषतः ॥ ९ ॥
शक्तितः पलसाहस्र त्रितयं यावदेव तु ।
गोशतेऽपि दशांशेन सर्वमेतत्समाचरेत् ॥ १० ॥
पुण्यकालं समासाद्य गीतमङ्गल निःस्वनैः ।
सर्वौषध्युदक स्नान स्नापितो वेदपुङ्गवैः ॥ १ ॥
इम मुच्चारयेन्मन्त्रं गृहीत कुसुमाञ्जलिः ।

नमोऽस्तु विश्व मूर्तिभ्यो विश्वमातृभ्य एव च ॥ १२ ॥
लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः।
गवां मङ्गेषु तिष्ठन्ति भुवनान्येक विंशतिः ॥ १३ ॥
ब्रह्मादय स्तथादेवा रोहिण्यः पान्तुमातरः।
गावो मे अग्रतः सन्तुगावः पृष्ठत एव च ॥ १४ ॥
गावः शिरसि मे नित्यं गवांमध्ये वसाम्यहम्।
यस्मात्त्वं वृषरूपेण धर्म एव सनातनः ॥ १५ ॥
अष्टमूर्ते रधिष्ठान मतःपाहि सनातन!।
इत्यामन्त्र्य ततोदद्याद्गुरवे नन्दिकेश्वरम् ॥ १६ ॥
सर्वोप करणोपेतं गोयुतञ्च विचक्षणः।
ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत् ॥ १७ ॥
गवाञ्च शतमेकैकं तदर्द्धं वाथ विंशतिम्।
दशपञ्चाथ वा दद्यादन्येभ्य स्तदनुज्ञया ॥ १८ ॥
नैका बहुभ्यो दातव्या यतो दोष करी भवेत्।
बह्व्यश्चैकस्य दातव्या धीमता रोग्य वृद्धये ॥ १९ ॥
पयोव्रतः पुनस्तिष्ठे देकाहं गोसहस्रदः।
श्रावयेच्छृणुयाद्वापि महादानानु कीर्तनम् ॥ २० ॥
तद्दिने ब्रह्मचारी स्यात् यदीच्छेद्विपुलां श्रियम्।
अनेन विधिना यस्तु गोसहस्र प्रदोभवेत्।
सर्वपाप विनिर्मुक्तः सिद्धचारण सेवितः ॥ २१ ॥
विमानेनार्क वर्णेन किङ्किणी जालमालिना।
सर्वेषां लोकपालानां लोके संपूज्यतेऽमरैः ॥ २२ ॥
प्रति मन्वन्तरं तिष्ठत्पुत्र पौत्र समन्वितः।
सप्तलोकान तिक्रम्य ततः शिवपुरं व्रजेत् ॥ २३ ॥

शतमेको नरन्त इत्पितॄणां तारयेद्बुधः ।
मातामहानां तद्वच्च पुत्र पौत्र समन्वितः ।
यावत्कल्प शतन्तिष्ठे द्राजराजो भवेत् पुनः ॥ २४ ॥
अश्वमेध शतंकुर्याच्छिव ध्यान परायणः ।
वैष्णवं योगमास्थाय ततो मुच्येत बन्धनात् ॥ २५ ॥
पितरश्चाभि नन्दन्ति गोसहस्र प्रदं सुतम् ।
अपिस्यात्स कुलेऽस्माकं पुत्रो दौहित्र एव वा ।
गोसहस्र प्रदोभूत्वा नरकादुद्धरिष्यति ॥ २६ ॥
तस्य कर्म करोवास्या दपिद्रष्टा तथैव च ।
संसार सागरादस्मात्सोऽस्मान् सन्तारयिष्यति ॥ २७ ॥
इति पठति यऽएतत् गोसहस्र प्रदानं
सुरभुवन मुपेयात् संस्मरेद्वाथ पश्येत् ।
अनुभवति मुदंवा मुच्यमानो निकामं
प्रहत कलुष देहः सोऽपियातीन्द्र लोकम् ॥ २८ ॥

---

अथ अष्टसप्तत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच । अथातः संप्रवक्ष्यामि कामधेनु विधिं परम् ।
सर्वकाम प्रदंनॄणां महापातक नाशनम् ॥ १ ॥
लोकेशा वाहनं तद्वद्धोमः कार्योऽधि वासनम् ।
तुलापुरुष वत्कुर्यात् कुण्डमण्डप वेदिकम् ॥ २ ॥
स्वल्पेत्वेकाग्नि वत्कुर्यात् गुरुरेकः समाहितः ।
काञ्चनस्यातिं शुद्धस्य धेनुं वत्सञ्च कारयेत् ॥ ३ ॥
उत्तमापल साहस्री तदर्धेन तु मध्यमा ।

कनीयसी तदर्धेन कामधेनुः प्रकीर्तिता॥ ४॥
शक्तित स्त्रिपलादूर्द्धम शक्तोऽपीह कारयेत्।
वेद्यां कृष्णाजिनंन्यस्य गुड प्रस्थ समन्वितम्॥ ५॥
न्यसेदुपरि तां धेनुं महारत्नै रलङ्कृताम्।
कुम्भाष्टक समोपेतां नानाफल समन्विताम्॥ ६॥
तथाष्टादश धान्यानि समन्तात्परिकल्पयेत्।
इक्षु दण्डाष्टकं तद्वन्नानाफल समन्वितम्।
भाजनञ्चासनं तद्वत्ताम्र दोहनकन्तथा॥ ७॥
कौशेय वस्त्रद्वय संयुताङ्गीं दीपात पञ्चाभरणाभि रामाम्।
स चामरां कुण्डलिनीं सघण्टां सुवर्णश्रृङ्गींपरिरूप्य पादाम्॥८
रसैश्च सर्वैः परितोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः।
अजाजि कुस्तुम्बुरु शर्करादिभि वितानकञ्चोपरि पञ्चवर्णम्॥६
स्नातः स्ततो मङ्गल वेदघोषैः प्रदक्षिणी कृत्य स पुष्पहस्तः।
आवाहयेत्तां गुरुणोक्त मन्त्रै र्द्विजाय दद्यादथ दर्भपाणिः॥१०

त्वं सर्व देवगण मन्दिर मङ्गभूता
विश्वेश्वरि त्रिपथ गोदधि पर्वतानाम्।
त्वद्दान शस्त्रशकली कृतपाप कौघः
प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि॥ ११॥
लोके यथेप्सित फलार्थ विधायिनीं त्वा
मासाद्य कोहि भुवि दुःख मुपैति मर्त्यः।
संसार दुःख शमनाय यतस्व कामं
त्वां कामधेनु मिति देवगणा वदन्ति॥ १२॥
आमन्त्र्य शील कुल रूप गुणान्विताय
विप्राय यः कनकधेनु मिमां प्रदद्यात्।

प्राप्नोति धाम सपुरन्दर देवजुष्टं
कन्यागणैः परिवृतः पदमिन्दु मौलेः ॥ १३ ॥

---

अथ ऊनाशीत्यधिक द्विशततमोऽध्यायः ।

मत्स्यउवाच । अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ।
यस्य प्रदानाद् भुवने चानन्त्यं फलमश्नुते ॥ १ ॥
पुण्यां तिथि मथासाद्य कृत्वा ब्राह्मण वाचनम् ।
लोकेशावाहनं कुर्यात्तुला पुरुष दानवत् ॥ २ ॥
ऋत्विक् मण्डप सम्भार भूषणाच्छादनादिकम् ।
स्वल्पे त्वेकाग्निवत् कुर्याद्धेमवाजि मखम्बुधः ॥ ३ ॥
स्थापयेद्वेदि मध्ये तु कृष्णाजिन तिलोपरि ।
कौशेय वस्त्रसम्वीतं कारयेत् हेम वाजिनम् ॥ ४ ॥
शक्तितः त्रिपलादूर्ध्वमा सहस्र पलाद्बुधः ।
पादुकोपानहच्छत्र चामरासन भाजनैः ॥ ५ ॥
पूर्णकुम्भाष्टकोपेतं माल्ये चु फल संयुतम् ।
शय्यां सोपस्करां तद्वत् हेममार्तण्ड संयुताम् ॥ ६ ॥
ततः सर्वौषधी स्नान स्नापितो द्विज पुङ्गवैः ।
इम मुच्चारयेन्मन्त्रं गृहीत कुसुमाञ्जलिः ॥ ७ ॥
नमस्ते सर्वदेवेश ! वेदाहरण लम्पट ! ।
वाजिरूपेण मामस्मात्पाहि संसार सागरात् ॥ ८ ॥
त्वमेव सप्तधाभूत्वा छन्दोरूपेण भास्कर ! ।
यस्माद्भासयसे लोकानतः पाहि सनातन ! ॥ ९ ॥
एव मुच्चार्य गुरवे तमश्वं विनिवेदयेत् ।

दत्वा पापक्षयाद्भानो र्लोक मभ्येति शाश्वतम् ॥ १० ॥
गोभिर्विभवतः सर्वानृत्विजश्चापि पूजयेत् ।
सर्वधान्योप करणं गुरवे विनिवेदयेत् ॥ ११ ॥
सर्वं शय्यादिकं दत्वा भुञ्जीता तैल मेवहि ।
पुराण श्रवणं तद्वत् कारयेद्भोजना दिकम् ॥ १२ ॥
इमं हिरण्याश्व विधिं करोति यः
संपूज्यमानोदिविदेव सङ्घैः ।
विमुक्त पापः सपुरं मुरारेः
प्राप्नोति सिद्धैरभि पूजितः सन् ॥ १३ ॥
इति पठति य एतद्धेम वाजि प्रदानं
सकल कलुष मुक्तः सोऽश्वमेधेन युक्तः ।
कनकमय विमानेनार्कलोकं प्रयाति
त्रिदशपति वधूभिः पूज्यते योऽभि दश्येत् ॥१४॥
योवा शृणोति पुरुषोऽल्पधनः स्मरेद्वा-
हेमाश्व दानमभि नन्दयतीह लोके ।
सोऽपि प्रयाति हत कल्मष शुद्धदेहः
स्थानं पुरन्दर महेश्वर देवजुष्टम् ॥ १५ ॥

---

अथ अशीत्यधिक द्विशततमोऽध्यायः ।

मत्स्यउवाच । अथातः संप्रवक्ष्यामि महादान मनुत्तमम् ।
पुण्यमश्वरथं नाम महापातक नाशनम् ॥ १ ॥
पुण्यं दिन मथासाद्य कृत्वा ब्राह्मण वाचनम् ।
लोकेशा वाहनं कुर्यात्तुला पुरुष दानवत् ॥ २ ॥

ऋत्विक् मण्डप सम्भार भूषणाच्छादनादिकम् ।
कृष्णाजिने तिलान् कृत्वा काञ्चनं स्थापयेद्रथम् ॥ ३ ॥
अष्टाश्वं चतुरश्वं वा चतुश्चक्रं सकूबरम् ।
ऐन्द्रनीलेन कुम्भेन ध्वजरूपेण संवृतम् ॥ ४ ॥
लोक पालाष्टकं तद्वत्पद्मराग दलान्वितम् ।
चतुरः पूर्णकलशान् धान्यान्यष्टा दशैव तु ॥ ५ ॥
कौशेय वस्त्रसंयुक्त मुपरिष्टाद्वितानकम् ।
माल्येच फल संयुक्तं पुष्पेण समन्वितम् ॥ ६ ॥
योयद्भक्तः पुमान् कुर्यात् सतन्नाम्नाधिवासनम् ।
छत्र चामर कौशेय वस्त्रोपानह पादुकम् ॥ ७ ॥
गोभिर्वि भवतः सार्द्धं दद्याच्च शयनादिकम् ।
आभारात्रि पलादूर्ध्वं शक्तितः कारयेद्बुधः ॥ ८ ॥
अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः ।
द्वाभ्या मपियुतं दद्याद्धेमसिंह ध्वजान्वितम् ॥ ९ ॥
चक्ररक्षा वुभौ तस्य तुरगस्था वथाश्विनौ ।
पुण्यकाल मथासाद्य पूर्ववत्स्नापितो द्विजैः ॥ १० ॥
त्रिःप्रदक्षिण माहृत्य गृहीत कुसुमाञ्जलिः ।
शुक्लमाल्याम्बरो दद्यादिमं मन्त्र मुदीरयेत् ॥ ११ ॥

नमो नमः पाप विनाशनाय
विश्वात्मने वेद तुरङ्गमाय ।
धाम्नामधीशाय दिवाकराय
पापौघ दावानल देहिशान्तिम् ॥ १२ ॥

वस्वष्टकादित्य मरुद्गणानां त्वमेव धाता परमं निधानम् ।
यतस्ततोमे हृदयंप्रयातु धर्मैकतानत्वमघौघनाशात् ॥ १३ ॥

इति तुरगरथप्रदानमेकं भवभयसूदनमत्र यः करोति।
स कलुषपटलैर्विमुक्तदेहः परमुपैतिपदं पिनाकपाणेः॥ १४॥
देदीप्यमानवपुषां विजित प्रभाव
माक्रम्य मण्डलमखण्डित चण्डभानोः।
सिद्धाङ्गनानयन षट्पदपीयमान
वक्त्राम्बुजोऽम्बुजभवेन चिरं सहास्ते॥ १५॥
इति पठति शृणोति वा य इत्थं कनकतुरगरथप्रदानमस्मिन्
न स नरकपुरं व्रजेत् कदाचिन्नरकरिपोर्भवनं प्रयाति भूयः॥१६॥

---

## अथ एकाशीत्यधिकद्विशततमोध्यायः।

मत्स्यउवाच। अथातःसंप्रवक्ष्यामि हेमहस्तिरथं शुभम्।
यस्य प्रदानाद्भुवनं वैष्णवं याति मानवः॥ १॥
पुण्यांतिथिमथासाद्य तुलापुरुष दानवत्।
विप्रवाचनकं कुर्याल्लो केशावाहनं बुधः।
ऋत्विक्मण्डपसम्भारभूषणा च्छादनादिकम्॥ २॥
अत्राप्युपोषितस्तद्व द्ब्राह्मणैः सहभोजनम्।
कुर्यात्पुष्परथाकारं काञ्चनंमणिमण्डितम्॥ ३॥
वलभीभिर्विचित्राभि श्चतुश्चक्र समन्वितम्।
कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्रथम्॥ ४॥
लोकपालाष्टकोपेतं ब्रह्मार्क शिवसंयुतम्।
मध्ये नारायणोपेतं लक्ष्मीपुष्टि समन्वितम्॥ ५॥
तथाष्टादशधान्यानि भाजना सन चन्दनैः।
दीपिकोपानच्छत्र दर्पणं पादुकान्वितम्॥ ६॥

ध्वजे तु गरुडं कुर्यात् कूवराग्रे विनायकम्।
नानाफलसमायुक्तं सुपरिष्टाद्वितानकम् ॥ ७ ॥
कौशेयं पञ्चवर्णन्तु अम्लान कुसुमान्वितम्।
चतुर्भिःकलशैःसार्द्धं गोभिरष्टाभिरन्वितम् ॥ ८ ॥
चतुर्भि हैंमसातङ्गै सुक्तादाम विभूषितैः।
स्वरूपतःकरिभ्याञ्च युक्तं कृत्वा निवेदयेत् ॥ ९ ॥
कुर्यात्पञ्चपलादूर्ध्वं माभारादपि शक्तितः।
तथा मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ॥ १० ॥
त्रिःप्रदक्षिणमावृत्य गृह्णीत कुसुमाञ्जलिः।
इममुच्चारयेन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत् ॥ ११ ॥
नमोनमः शङ्कर पद्मजार्कलोकेश विद्याधर वासुदेवैः।
त्वं सेव्यसेवेद पुराण यज्ञै स्तेजोमयस्यन्दनपाहि तस्मात् ॥ १२

यस्तत्पदं परमगुह्यतमं मुरारे
ह्यानन्दहेतु गुणरूप विमुक्तमन्तः।
योगैकमान सदृशो मुनयः समाधौ
पश्यन्तितत्वमसिनाथ रथाधिरूढ ! ॥ १३ ॥
यस्मात्त्वमेव भवसागर संप्लुताना
मानन्दभाग स्वतमध्वगपारपत्रम्।
तस्मादघौघ शमनेन कुरु प्रसाद
श्चामीकरे भरथ ! माधव सम्प्रदानात् ॥ १४ ॥
इत्थं प्रणम्य कनकेभ रथप्रदानं
यः कारयेत् सकल पाप विमुक्तदेहः।
विद्याधरामर मुनीन्द्रगणाभिजुष्टं
प्राप्नोत्यसौ पदमतीन्द्रिय मिन्दुमौलेः ॥१५॥

आदुरित वितान प्रज्वलद्वह्निजाल
व्यतिकर कृत देहोद्वेग भाजोऽपि बन्धून्।
नयति स पितृपुत्रान् बान्धवानप्य शेषान्
कृत गज रथदानाच्छाश्वतं सद्म विष्णोः॥ १६॥

---

अथ द्व्यशीत्यधिकद्विशततमोऽध्यायः।

मत्स्यउवाच। अथातः सम्प्रवक्ष्यामि महादान मनुत्तमम्।
पञ्चलाङ्गलकं नाम महापातक नाशनम्॥ १॥
पुण्यां तिथि मथासाद्य युगादि ग्रहणादिकाम्।
भूमिदानं नरोदद्यात् पञ्चलाङ्गलकान्वितम्॥ २॥
खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनम्।
निवर्तन शतं वापि तदर्धं वापि शक्तितः॥ ३॥
सारदारुमयान् कृत्वा हलान्पञ्च विचक्षणः।
सर्वोपकरणैर्युक्ता नन्यान् पञ्च च काञ्चनान्।
कुर्य्यात्पञ्च पलादूर्ध्वमासहस्र पलावधि॥ ४॥
वृषान् लक्षणसंयुक्तान् दशचैव धुरन्धरान्।
सुवर्णशृङ्गाभरणान् मुक्ता लाङ्गूल भूषणान्।
रूप्यपादाग्रतिलकान् रक्तकौशेय भूषणान्।
स्रग्दाम चन्दनयुतान् शालाया मधिवासयेत्॥६॥
धरण्यादित्यरुद्रेभ्यः पायसं निर्वपेच्चरुम्।
एकस्मिन्नेव कुण्डे तु गुरुस्तेभ्यो निवेदयेत्॥७॥
पलाशसमिधस्तद्वदाज्यं कृष्णतिलास्तथा।
तुलापुरुषवत्कुर्य्याल्लोकेशावाहनं बुधः॥८॥

ततो मङ्गलशब्देन शुक्लमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुलीयकैः ॥९॥
कौशेयवस्त्रकटकैर्मणिभिश्चाभिपूजयेत् ।
शय्यां सोपस्करां दद्याद्धेनुमेकां पयस्विनीम् ॥१०॥
तथाष्टादशधान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणीकृत्य गृहीतकुसुमाञ्जलिः ॥११॥
इममुच्चारयेन्मन्त्रमथ सर्वं निवेदयेत् ।
यस्माद्देवगणाः सर्वे स्थावराणि चराणि च ॥१२॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवेऽस्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोडशीम् ॥१३॥
दानान्यन्यानि मे भक्तिर्धर्मएव दृढाभवेत् ।
दण्डेन सप्तहस्तेन त्रिंशद्दण्डं निवर्तनम् ॥ १४ ॥
त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यान्निवर्तं न शतं बुधः ।
विधिनानेन तस्याशु क्षीयते पापसंहतिः ॥ १५ ॥
तदर्द्धमथवा दद्या दपिगोचर्म मात्रकम् ।
भवनस्थानमात्रं वा सोऽपिपापैः प्रमुच्यते ॥ १६ ॥

यावन्ति लाङ्गलकमार्गमुखानि भूमे
र्भासां पतेर्दुहितुरङ्गजरोमकाणि ।
तावन्ति शङ्करपुरे स समा हि तिष्ठेत्
भूमिप्रदानमिह यः कुरुते मनुष्यः ॥ १७ ॥
गन्धर्वकिन्नरसुरासुरसिद्धसङ्घै
राधूतचामर मुपेत्य महद्विमानम् ।
संपूज्यते पितृपितामहबन्धुयुक्तः

शम्भोःपदं व्रजति चामरनायकः सन् ॥ १८ ॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपैति
गोभूमिलाङ्गल धुरन्धर सम्प्रदानात्।
तस्मादशेषपटलक्षयकारिभूमे
र्दानं विधेयमिति भूतिभवोद्भवाय ॥ १६ ॥

---

अथ त्र्यशीत्यधिकद्विशततमोऽध्यायः।

मत्स्यउवाच। अथातः संप्रवक्ष्यामि धरादान मनुत्तम्।
पापक्षयकरं नृणाममङ्गल्य विनाशनम्॥ १ ॥
कारयेत्पृथिवीं हैमीं जम्बुद्वीपानु कारिणीम्।
मर्यादापर्वतवतीं मध्ये मेरु समन्विताम् ॥ २ ॥
लोकपालाष्टकोपेतां नववर्ष समन्विताम्।
नदीनदसमोपेता मन्तेसागर वेष्टिताम् ॥ ३ ॥
महारत्नसमाकीर्णां वसुरुद्रार्क संयुताम्।
हेम्नःपलसहस्रेण तदर्द्धेनाथ शक्तितः ॥ ४ ॥
शतत्रयेण वा कुर्यात् द्विशतेन शतेन वा।
कुर्यात्पञ्चपलादूर्ध्वं मशक्तोऽपि विचक्षणः ॥ ५ ॥
तुलापुरुषवत्कुर्या ल्लोकेशावाहनं बुधः।
ऋत्विक्मण्डप सम्भार भूषणाच्छादनादिकम् ॥ ६ ॥
वेद्यांकृष्णाजिनंकृत्वा तिलाना मुपरि न्यसेत्।
तथाष्टादशधान्यानि रसांश्च लवणादिकान्। ७ ॥
तथाष्टौ पूर्णकलशान् समन्तात् परिकल्पयेत्।
वितानकं च कौशेयं फलानि विविधानि च ॥ ८ ॥

तथा शुक्लानि रम्याणि श्रीखण्डशकलानि च ।
इत्येवं कारयित्वा ता मधिवासन पूर्वकम् ॥ ९ ॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः ।
प्रदक्षिणं ततः कृत्वा गृह्णीत कुसुमाञ्जलिः ॥ १० ॥
पुण्यं कालमथासाद्य मन्त्रानेतानुदीरयेत् ।
नमस्तेसर्वदेवानां त्वमेवभवनं यतः ॥ ११ ॥
धात्री च सर्वभूताना मतःपाहि वसुन्धरे ! ।
वसु धारयसे यस्माद्वसुचातीव निर्मलम् ॥ १२ ॥
वसुन्धरा ततोजाता तस्मात्पाहि भयादलम् ।
चतुर्मुखोऽपि नोगच्छे द्यस्मादन्तं तवाचले ! ॥ १३ ॥
अनन्तायै नमस्तस्मात्पाहि संसारकर्दमात् ।
तमेव लक्ष्मीर्गोविन्दे शिवेगौरीति चास्थिता ॥ १४ ॥
गायत्री ब्रह्मणःपार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ।
बुद्धिर्बृहस्पतौख्याता मेधा मुनिषु संस्थिता ॥ १५ ॥
विश्वं व्याप्य स्थिता यस्मात् ततोविश्वम्भरा स्मृता ।
धृतिःस्थितिः क्षमाक्षोणी पृथ्वी वसुमती रसा ॥ १६ ॥
एताभिर्मूर्तिभिःपाहि देवि ! संसार सागरात् ।
एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ॥ १७ ॥
धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ।
शेषञ्चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्जयेत् ॥ १८ ॥
अनेन विधिना यस्तु कुर्याद्धेमधरां शुभाम् ।
पुण्यकाले तु संप्राप्ते सपदं याति वैष्णवम् ॥ १९ ॥
विमानेनार्कवर्णेन किङ्किणी जालमालिना ।

नारायणपुरं गत्वा कल्पत्रय मथावसेत्।
पितॄन् पुत्रांश्च पौत्रांश्च तारयेदेकविंशतिम् ॥ २० ॥
इति पठति य इत्थं यः शृणोतिप्रसङ्गा-
दपि कलुष वितानैर्मुक्तदेहः समन्तात्।
दिवममरवधूभिर्याति संप्रार्थ्यमानो
पदमगरसहस्रैः सेवितं चन्द्रमौलेः ॥ २१ ॥

---

## अथ चतुरशीत्यधिकद्विशततमोऽध्यायः।

मत्स्यउवाच। अथातःसंप्रवक्ष्यामि महादान मनुत्तमम्।
विश्वचक्रमितिख्यातं महापातक नाशनम् ॥ १ ॥
तपनीयस्य शुद्धस्य विषुवादिषु कारयेत्।
श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ॥ २ ॥
तस्यार्द्धेन कनिष्ठंस्यात् विश्वचक्र मुदाहृतम्।
अन्यद्विंशत्पलादूर्ध्वं मशक्तोऽपि निवेदयेत् ॥ ३ ॥
षोडशारं ततश्चक्रं भ्रमन्वै स्यष्टकावृतम्।
नाभिपद्मे स्थितंविष्णुं योगारूढं चतुर्भुजम् ॥ ४ ॥
शङ्खचक्रेऽस्य पार्श्वे तु देव्यष्टक समावृतम्।
द्वितीयावरणे तद्वत् पूर्वतो जलशायिनम् ॥ ५ ॥
अत्रिर्भृगुर्वशिष्ठश्च ब्रह्मा कश्यपएव च।
मत्स्यःकूर्मो वराहश्च नरसिंहोऽथ वामनः ॥ ६ ॥
रामोरामश्च कृष्णश्च बुद्धःकल्कीतिच क्रमात्।
तृतीयावरणे गौरी मातृभिर्वसुभिर्युता ॥ ७ ॥
चतुर्थे द्वादशादित्या वेदाश्चत्वारएव च।
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ॥ ८ ॥

लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च ।
सप्तमे ब्रह्मणिसर्वाणि मङ्गलानि च कारयेत् ॥ ९ ॥
धन्तरान्ततस्तोदेवान् विन्यसेदष्टमे पुनः ।
तुलापुरुषवच्छेषं समन्तात् परिकल्पयेत् ॥ १० ॥
ऋत्विग्मण्डप सम्भारभूषणाच्छादनादिकम् ।
विश्वचक्रं ततः कुर्यात् कृष्णाजिन तिलोपरि ॥ ११ ॥
तथाष्टादश धान्यानि रसांश्च लवणादिकान् ।
पूर्णं कुम्भाष्टकञ्चैव वस्त्राणि विविधानि च ॥ १२ ॥
माल्येक्षु फलरत्नानि वितानञ्चापि कारयेत् ।
ततो मङ्गल शब्देन स्नातः शुक्लाम्बरो गृही ।
होमाधि वासनान्ते वै गृहीत कुसुमाञ्जलिः ॥ १३ ॥
इम मुच्चारयेन्मन्त्रन्त्रिः कृत्वा तु प्रदक्षिणम् ।
नमो विश्वमयायेति विश्वचक्रात्मने नमः ॥ १४ ॥
परमानन्द रूपी त्वं पाहि नः पाप कर्दमात् ।
तेजोमय मिदं यस्मात् सदा पश्यन्ति योगिनः ॥ १५ ॥
हृदि तत्वं गुणातीतं विश्वचक्रं नमाम्यहम् ।
वासुदेवे स्थितं चक्रं चक्र मध्येतु माधवः ॥ १६ ॥
अन्योन्याधार रूपेण प्रणमामि स्थिताविह ।
विश्वचक्र मिदं यस्मात् सर्वपाप हरं परम् ॥ १७ ॥
आयुधञ्चापि वासश्च भवादुद्धर मामतः ।
इत्यामन्त्र्य च यो दद्याद्विश्वचक्रं विमत्सरः ॥ १८ ॥
विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ।
वैकुण्ठ लोकमासाद्य चतुर्बाहुः सनातनः ॥ १९ ॥
सेव्यतेऽप्सरसांसङ्घैस्तिष्ठेत्कल्प शतत्रयम् ।

प्रणामे द्वादश कृत्वा विश्वचक्रं दिने दिने ।
तस्यायुर्वर्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥ २० ॥

इति सकल जगत् सुराधिवासं-
वितरति यस्तपनीय षोडशारम् ।
हरि भवन मुपागतः ससिद्धै-
श्चिरमभि गम्य नमस्यते शिरोभिः ॥ २१ ॥

शुभदर्शनतां प्रयाति शली
मदन सुदर्शनताञ्च कामिनीभ्यः ।
स सुदर्शन केशवानु रूपः
कनक सुदर्शन दानदग्ध पापः ॥ २२ ॥

कृत गुरु दुरितानि षोडशार
प्रवितरणे प्रवराकृति मुरारेः ।
अभिभवति भवोद्भवन्ति भीत्या
भवमभितो भुवने भयानि भूयः ॥ २३ ॥

---

अथ पञ्चाशीत्यधिक द्विशततमोऽध्यायः ।

मत्स्य उवाच । अथातः सम्प्रवक्ष्यामि महादान मनुत्तमम् ।
महाकल्पलता नाम महापातक नाशनम् ॥ १ ॥
पुण्यां तिथि मथासाद्य कृत्वा ब्राह्मण वाचनम् ।
ऋत्विग्मण्डप सम्भार भूषणाच्छादना दिकम् ॥ २ ॥
तुला पुरुषवत् कुर्यात् लोकेशावाहनं बुधः ।
चामीकरमयीः कुर्याद्दशकल्पलताः समाः ॥ ३ ॥
नानापुष्प फलोपेता नानांशुक विभूषिताः ।

विद्याधर सुपर्णानां मिथुनै रुपशोभिता: ॥ ४ ॥
हारानादित्सुभि: सिद्धै: फलानि च विहङ्गमै: ।
लोकपालानु कारिण्य: कर्तव्यास्तासु देवता: ॥ ५ ॥
ब्राह्मीमनन्त शक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्ताल्लतयो र्मध्ये पद्म शङ्ख करे शुभे ॥ ६ ॥
इभासनस्था तु गुडे पूर्वत: कुलिशायुधा ।
रजनी संस्थिताग्नायी स्रुवपाणि रथानले ॥ ७ ॥
याम्ये च महिषारूढा गदिनी तण्डुलोपरि ।
घृतेतु नै र्ऋतीस्थाप्या सखड्गा दक्षिणापरे ॥ ८ ॥
वारुणे वारुणी क्षीरे झषस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था शर्करोपरि ॥ ९ ॥
सौम्या तिलेषु संस्थाप्या शङ्खिनी निधि संस्थिता ।
माहेश्वरी वृषारूढा नवनीते त्रिशूलिनी ॥ १० ॥
मौलिन्यो वरदा स्तद्वत् कर्तव्या बालकान्विता: ।
शक्त्या पञ्चपला दूर्ध्वमा सहस्रात्प्रकल्पयेत् ॥ ११ ॥
सर्वासामुपरि स्थाप्यं पञ्चवर्णं वितानकम् ।
धेनवो दशकुम्भाश्च वस्त्रायुग्मानि चैवहि ॥ १२ ॥
मध्यमे देतु गुरवे ऋत्विग्भ्योऽन्या स्तथैव च ।
ततो मङ्गल शब्देन स्नात: शुक्लाम्बरो बुध: ॥ १३ ॥

नमो नम: पाप विनाशिनीभ्यो
ब्रह्माण्ड लोकेश्वर पालिनीभ्य: ।
आशंसिताधिक्य फल प्रदाभ्यो
दिग्भ्य स्तथा कल्पलता वधूभ्य: ॥ १४ ॥
इति सकल दिगङ्गना प्रदानं

भव भयसूदन कारि यः करोति।
अभिमत फलदे सनागलोके
वसति पितामह वत्सराणि त्रिंशत् ॥ १५ ॥
पिह्र व्रत मथतारयेद्भवाब्धे
र्भवदुरितौघ विघात शुद्धदेहः।
सुरपति वनिता सहस्र सङ्घैः
परिवृत मम्बुजसं सदाभिवन्द्यः ॥ १६ ॥
इति विधान मिदं दिगङ्गनानां
कनक कल्पलता विनिवेदकम्।
पठति यः स्मरतीह तथे क्षते
सपदमेति पुरन्दर सेवितम् ॥ १७ ॥

---

अथ षड़शीत्यधिक द्विशततमोऽध्यायः।

मत्स्यउवाच। अथातः संप्रवक्ष्यामि महादान मनुत्तमम्।
सप्त सागरकं नाम सर्वपाप प्रणाशनम् ॥ १ ॥
पुण्यं दिन मथासाद्य कृत्वा ब्राह्मण वाचनम्।
तुलापुरुष वत्कुर्याल्लोकेशावाहनं बुधः ॥ २ ॥
ऋत्विग्मण्डप सम्भार भूषणाच्छादनादिकम्।
कारयेत्सप्त कुण्डानि काञ्चनानि विचक्षणः ॥ ३ ॥
प्रादेश मात्राणि तथारत्निमात्राणि वै पुनः।
कुर्यात्सप्त पलादूर्ध्वं मासहस्राच्च शक्तितः ॥ ४ ॥
संस्थाप्यानि च सर्वाणि कृष्णाजिन तिलोपरि।
प्रथमं पूरयेत्कुण्डं लवणेन विचक्षणः ॥ ५ ॥

द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा पुनः ।
चतुर्थन्तु गुडेनैव दध्ना पञ्चम मेव च ॥ ६ ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थ वारिणा ।
स्थापयेल्लवणस्थं तु ब्रह्माणं काञ्चनं शुभम् ॥ ७ ॥
केशवं क्षीरमध्येतु घृतमध्ये महेश्वरम् ।
भास्करं गुडमध्येतु दधिमध्ये निशाधिपम् ॥ ८ ॥
शर्करायां न्यसेल्लक्ष्मीं जलमध्येतु पार्वतीम् ।
सर्वेषु सर्वरत्नानि धान्यानि च समन्ततः ॥ ९ ॥
तुलापुरुष वच्छेष मत्रापि परिकल्पयेत् ।
ततोवारुण होमान्ते स्नापितो वेद पुङ्गवैः ॥ १० ॥
त्रिःप्रदक्षिण मावृत्य मन्त्रानेतानु दीरयेत् ।
नमो वः सर्व सिन्धू नामाधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥ ११ ॥

क्षीरोदकाज्यदधि माधुर लावणेक्षु
सारामृतेन भुवनत्रय जीव सङ्घान् ।
आनन्दयन्ति वसुभिश्च यतोभवन्त
स्तस्मान्ममाप्यघ विघातमलं दिशन्तु ॥ १२ ॥
यस्मात्समस्त भुवनेषु भवन्त एव
तीर्थामरासुर सुवन्द्यमणि प्रदानम् ।
पापक्षयामृत विलेपन भूषणाय
लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः ॥ १३ ॥
इति ददाति रसामृत संयुतान्
शुचि रविस्मय वानिह सागरान् ।
अमल काञ्चनवर्ण मयानसौ

पद मुपैति हरे रमरार्च्चितः॥ १४॥
सकल पाप विधौत विराजितः
पितृ पितामह पुत्रकलत्रकम्।
नरक लोक समाकुल मप्ययं
झटिति सोऽपि नयेच्छिव मन्दिरम्॥ १५॥

---

अथ सप्ताशीत्यधिक द्विशततमोऽध्यायः।

मत्स्यउवाच। अथातः संप्रवक्ष्यामि महादान मनुत्तमम्।
रत्नधेन्विति विख्यातं गोलोक फलदं नृणाम्॥ १॥
पुण्यं दिन मथासाद्य तुलापुरुष दानवत्।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत्॥ २॥
भूमौ कृष्णाजिनं कृत्वा लवण द्रोण संयुतम्।
धेनुं रत्नमयीं कुर्यात् सङ्कल्प्य विधि पूर्वकम्॥ ३॥
स्थापयेत्पद्मरागाणामेकाशीति मुखे बुधः।
पुष्पराग शतं तद्वद्घोणायां परिकल्पयेत्॥ ४॥
ललाटे हेमतिलकं मुक्ताफल शतं दृशोः।
भ्रूयुगे विद्रुम शतं शुक्ती कर्णद्वये स्मृतौ॥ ५॥
काञ्चनानि च शृङ्गाणि शिरोवज्र शतात्मकम्।
ग्रीवायां नेत्र पटकं गोमेदक शतान्वितम्॥ ६॥
इन्द्रनील शतं पृष्ठे वैदूर्य शतपार्श्वके।
स्फाटिकैरुदरं तद्वत्सौगन्धिक शतैः कटिम्॥ ७॥
खुरा हेममयाः कार्याः पुच्छं मुक्तावलीमयम्।

सूर्यकान्तेन्दु कान्तौ च घ्राणे कर्पूर चन्दने ॥ ८ ॥
कुङ्कुमानि च रोमाणि रौप्य नाभिंच कारयेत् ।
मात्स्मत शतं तद्वदपाने परिकल्पयेत् ॥ ६ ॥
तथान्यानि च रत्नानि स्थापयेत्सर्व सन्धिषु ।
कुर्याच्छर्करया जिह्वां गोमयञ्च गुडात्मकम् ॥ १० ॥
गोमूत्र माज्येन तथा दधि दुग्धे स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात्समीपे ताम्रदोहनम् ॥ ११ ॥
कुण्डलानि च हैमानि भूषणानि च शक्तितः ।
कारये देवमेवन्तु चतुर्थांशेन वत्सकम् ॥ १२ ॥
तथा धान्यानि सर्वाणि पादाश्चेत्तु मयाः स्मृताः ।
नानाफलानि सर्वाणि पञ्चवर्णं वितानकम् ॥ १३ ।
एवं विरचनं कृत्वा तद्वद्धोमाधि वासनम् ।
ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुमा मन्त्रयेत्ततः ।
गुडधेनु वदावाह्य इदश्चोदा हरेत्ततः ॥ १४ ॥

त्वां सर्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्र सूर्य कमलासन वासुदेवाः ।
तस्मात्समस्त भुवनत्रय देह युक्ता
मां पाहि देवि ! भवसागर पीड्यमानम् ॥ १५ ॥
आमन्त्र्य चेत्थमभितः परिहृत्य भक्त्या
दद्यात्द्विजाय गुरवे जल पूर्विकां ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापै विमुक्त तनुरेति पदं मुरारेः ॥ १६ ॥
इति सकल विधिज्ञो रत्नधेनु प्रदानं
वितरति स विमानं प्राप्य देदीप्य मानम् ।

सकल कलुष मुक्तो बन्धुभिः पुत्र पौत्रैः
सह मदन सरूपः स्थानमभ्येति शम्भोः॥ १७॥

---

अथ अष्टाशीत्यधिकद्विशततमोऽध्यायः।

मत्स्य उवाच। अथातः संप्रवक्ष्यामि महादान मनुत्तमम्।
महाभूतघटं नाम महापातकनाशनम्॥ १॥
पुण्यांतिथि मथासाद्य कृत्वा ब्राह्मणवाचनम्।
ऋत्विग्मण्डप सम्भारभूषणाच्छादनादिकम्॥ २॥
तुलापुरुषवत् कुर्यात् लोकेशावाहनादिकम्।
कारयेत्काञ्चनंकुम्भं महारत्नाचितं बुधः॥ ३॥
प्रादेशादङ्गुलशतं यावत् कुर्यात् प्रमाणतः।
क्षीराज्यपूरितं तद्वत् कल्पवृक्ष समन्वितम्॥ ४॥
पद्मासनगतांस्तत्र ब्रह्मविष्णुमहेश्वरान्।
लोकपालान् महेन्द्रांश्च स्व स्ववाहन मास्थितान्।
वराहेणो द्धृतां तद्वत्कुर्यात् पृथ्वीं सपङ्कजाम्॥ ५॥
वरुणंचासनगतं काञ्चनं मकरोपरि।
हुताशनं मेषगतं वायुं कृष्णमृगासनम्॥ ६॥
तथा कोशाधिपं कुर्यात् मूषकस्थं विनायकम्।
विन्यस्य घटमध्ये तान् वेदपञ्चक संयुतान्॥ ७॥
ऋग्वेदस्याक्षसूत्रं स्या द्यजुर्वेदस्य पङ्कजम्।
सामवेदस्य वीणास्याद्वेणुं दक्षिणतो न्यसेत्॥ ८॥
अथर्ववेदस्यपुनःस्रुक्स्रुचौ कमलङ्करे।

पुराणवेदोवाद्‌: सात्रसूत्र कमण्डलु: ॥ ९ ॥
परित:सर्वधान्यानि चामरासन दर्पणम्‌ ।
पादुकोपानहच्छत्रं दीपिका भूषणानि च ॥ १० ॥
शय्याश्च जलकुम्भांश्च पञ्चवर्णं वितानकम्‌ ।
स्नात्वाधिवासनान्ते तु मन्त्रमेत मुदीरयेत्‌ ॥ ११ ॥
नमोव:सर्वदेवाना माधारेभ्य श्चराचरे ।
महाभूताधिदेवेभ्य: शान्तिरस्तु शिवं मम ॥ १२ ॥
यस्मान्नकिञ्चिदप्यस्ति महाभूतै र्विना कृतम्‌ ।
ब्रह्माण्डे सर्वभूतेषु तस्माच्छ्री रक्षयास्तुमे ॥ १३ ॥
इत्युच्चार्य महाभूत घटं यो विनिवेदयेत्‌ ।
सर्वपापविनिर्मुक्त: स याति परमाङ्गतिम्‌ ॥ १४ ॥
विमानेनार्कवर्णेन पितृबन्धु समन्वित: ।
स्तूयमानोवरस्त्रीभि: पदमभ्येति वैष्णवम्‌ ॥ १५ ॥
षोड़शैतानि य:कुर्यात्‌ महादानानि मानव: ।
न तस्य पुनरावृत्तिरिह लोकेऽभिजायते ॥ १६ ॥

इह पठतिय इत्थं वासुदेवस्य पार्श्वे
ससुतपितृकलत्र: संशृणोतीह सम्यक्‌ ।
मुररिपुभवने वै मन्दिरे वार्कलक्ष्म्या-
त्वमरपुरवधूभिर्मोदते सोऽपि नित्यम्‌ ॥ १७ ॥

---

अथ ऊननवत्यधिकद्विशततमोऽध्याय: ।

मनुरुवाच । कल्पमानं त्वया प्रोक्तं मन्वन्तरयुगेषु च ।
इदानीं कल्पनामानि समासात्कथयाच्युत ! ॥ १ ॥

मत्स्य उवाच। कल्पानांकीर्तनंवक्ष्ये महापातकनाशनम्।
यस्यानुकीर्तनादेव वेदपुण्येन युज्यते ॥ २ ॥
प्रथमंश्वेतकल्पस्तु द्वितीयो नीललोहितः।
वामदेवस्तृतीयस्तु ततोराथन्तरोऽपरः। ३ ॥
रौरवःपञ्चमःप्रोक्तः षष्ठो देव इतिस्मृतः।
सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥ ४ ॥
सद्योऽथ नवमःप्रोक्त ईशानो दशमःस्मृतः।
तम एकादशः प्रोक्तः तथा सारस्वतः परः ॥ ५ ।
त्रयोदश उदानस्तु गारुड़ोऽथ चतुर्दशः।
कौर्मःपञ्चदशःप्रोक्तः पौर्णमास्या मजायत ॥ ६ ॥
षोड़शो नारसिंहस्तुसमानस्तु ततोऽपरः।
आग्नेयोऽष्टादशःप्रोक्तः सोमकल्प स्तथापरः ॥ ७ ॥
मानवोविंशतिःप्रोक्त स्तत्पुमानिति चापरः।
वैकुण्ठश्चापरस्तद्द लक्ष्मीकल्पस्तथापरः ॥ ८ ।
चतुर्विंशतिमःप्रोक्तः सावित्रीकल्पसंज्ञकः।
पञ्चविंशस्ततोघोरो वाराहस्तु ततोऽपरः ॥ ९ ॥
सप्तविंशोऽथ वैराजो गौरिकल्प स्तथापरः।
माहेश्वरस्तु स प्रोक्तस्त्रिपुरोयत्र घातितः ॥ १० ॥
पितृकल्प स्तथान्ते तु या कुहूर्ब्रह्मणः परा।
इत्येवं ब्रह्मणोमासः सर्व पातक नाशनः ॥ ११ ॥
आदावेव हि माहात्म्यं यस्मिन्यस्य विधीयते।
तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥ १२ ॥
सङ्कीर्णा स्तामसाश्चैव राजसाः सात्त्विका स्तथा।
रज स्तमोमया स्तद्वदेते त्रिंशदुदाहृताः ॥ १३ ॥

सङ्कीर्णेषु सरस्वत्याः पितृणां च निगद्यते।
अग्नेः शिवस्य माहात्म्यं तामसेषु दिवाकरे॥ १४॥
राजसेषु च माहात्म्य मधिकं ब्रह्मणः स्मृतम्।
यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा॥ १५॥
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते।
सात्त्विकेष्वधिकं तद्वद्विष्णो र्माहात्म्य मुत्तमम्॥ १६॥
तथैव योग संसिद्धा गमिष्यन्ति परां गतिम्।
ब्राह्मं पाद्ममिमं यस्तु पठेत्पर्वणि पर्वणि॥ १७॥
तस्य धर्मे मतिं ब्रह्माकरोति विपुलां श्रियम्।
यस्तु दद्यादिमान् श्रुत्वा हैमान् पर्वणि पर्वणि॥ १८॥
ब्रह्म विष्णु पुरे वासं मुनिभिः पूज्यते दिवि।
सर्वपाप क्षयकरं कल्पदानं यतो भवेत्॥ १९॥
मुनिरूपां स्ततः कृत्वा दद्यात्कल्पान् विचक्षणः।
पुराण संहिता चेयं तव भूप! मयोदिता॥ २०॥
सर्वपाप हरा नित्य मारोग्य श्रीफल प्रदा।
ब्रह्म संवत्सर शतादेकाहं शैव मुच्यते॥ २१॥
शिववर्ष शतादेकं निमेषं वैष्णवं विदुः।
यदा सविष्णुर्जागर्ति तदेदं चेष्टते जगत्॥ २२॥
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति।
इत्युक्त्वा देव देवेशो मत्स्यरूपी जनार्दनः॥ २३॥
पश्यतां सर्वभूतानां तत्रैवान्तरधीयत।
वैवस्वतोऽपि भगवान् विसृज्य विविधाः प्रजाः॥ २४॥
स्वान्तरं पालयामास मार्तण्ड कुलवर्द्धनः।
यस्य मन्वन्तरञ्चैत दधुना चानुवर्तते॥ २५॥

पुण्यं पवित्र मेतद्वः कथितं मत्स्य भाषितम्।
पुराणं सर्वशास्त्राणां यदेतन्मूर्ध्नि संस्थितम्॥ २६॥

---

अथ नवत्यधिकद्विशततमोऽध्यायः।

सूतउवाच। एतद्वः कथितं सर्वं यदुक्तं विश्वरूपिणा।
मात्स्यं पुराण मखिलं धर्म कामार्थ साधनम्॥ १॥
यत्रादौ मनुसंवादो ब्रह्माण्ड कथनन्तथा।
सांख्यं शारीरकं प्रोक्तं चतुर्मुख मुखोद्भवम्॥ २॥
देवासुराणा मुत्पत्ति र्मारुतोत्पत्तिरेव च।
मदन द्वादशी तद्वल्लोक पालाभि पूजनम्॥ ३॥
मन्वन्तराणा मुद्देशो वैन्य राजाभि वर्णनम्।
सूर्य वैवस्वतोत्पत्ति र्बुधस्या गमनं तथा॥ ४॥
पितृवंशानु कथनं श्राद्धकाल स्तथैव च।
पितृतीर्थ प्रवासश्च सोमोत्पत्ति स्तथैव च॥ ५॥
कीर्तनं सोमवंशस्य ययाति चरितं तथा।
कार्तवीर्यस्य माहात्म्यं वृष्णिवंशानु कीर्तनम्॥ ६॥
भृगु शाप स्तथा विष्णोर्दैत्य शाप स्तथैव च।
कीर्तनं पुरुवंशस्य वंशो हौताशन स्तथा॥ ७॥
पुराण कीर्तनं तद्वत्क्रियायोग स्तथैव च।
व्रतं नक्षत्र संख्याकं मार्तण्ड शयनं तथा॥ ८॥
कृष्णाष्टमी व्रतं तद्वद्रोहिणी चन्द्र संज्ञितम्।
तडाग विधि माहात्म्यं पादपोत्सर्व एव च॥ ९॥
सौभाग्य शयनं तद्वदगस्त्य व्रत मेवच।
तथानन्त तृतीया तु रसकल्याणिनी तथा॥ १०॥

आर्द्रा नन्द करीतद्वद्व्रतं सारस्वतं पुनः ।
उपरागाभिषेकश्च सप्तमीस्नपनं पुनः ॥ ११ ॥
भीमाख्या द्वादशी तद्वदनङ्ग शयनं तथा ।
अशून्य शयनं तद्वत्तथैवाङ्गारक व्रतम् ॥ १२ ॥
सप्तमी सप्तकं तद्वद्विशोक द्वादशी तथा ।
मेरु प्रदानं दशधा ग्रहशान्ति स्तथैव च ॥ १३ ॥
ग्रहस्वरूप कथनं तथा शिव चतुर्दशी ।
तथा सर्व फल त्यागः सूर्य वार व्रतं तथा ॥ १४ ॥
संक्रान्ति स्नपनं तद्वद्विभूति द्वादशी व्रतम् ।
षष्टिव्रतानां माहात्म्यं तथा स्नान विधिक्रमः ॥ १५ ॥
प्रयागस्य तु माहात्म्यं सर्वतीर्थानु कीर्तनम् ।
पैलाश्रम फलं तद्वद्द्वीप लोकानु कीर्तनम् ॥ १६ ॥
तथान्तरिक्ष चारश्च ध्रुव माहात्म्य मेवच ।
भुवनानि सुरेन्द्राणां त्रिपुराघोषणं तथा ॥ १७ ॥
पितृ पिण्डद माहात्म्यं मन्वन्तर विनिर्णयम् ।
वज्राङ्गस्य तु संभूतिः तारकोत्पत्तिरेव च ॥ १८ ॥
तारकासुर माहात्म्यं ब्रह्मदेवानु कीर्तनम् ।
पार्वती सम्भव स्तद्वत् तथा शिव तपोवनम् ॥ १९ ॥
अनङ्ग देहदाहस्तु रति शोक स्तथैव च ।
गौरी तपोवनं तद्वद्विश्वनाथ प्रसादनम् ॥ २० ॥
पार्वती ऋषि संवाद स्तथैवोद्वाह मङ्गलम् ।
कुमार सम्भव स्तद्वत् कुमार विजय स्तथा ॥ २१ ॥
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ।
पद्मोद्भव विसर्गस्तु तथैवान्धक घातनम् ॥ २२ ॥

वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च।
प्रवरानुक्रम स्तद्वत् पितृ गाथानु कीर्तनम्॥ २२॥
ततोभयमुखीदानं दानं कृष्णाजिनस्य च।
तथा सावित्र्युपाख्यानं राजधर्मा स्तथैव च॥ २४॥
यात्रा निमित्त कथनं स्वप्न मङ्गल्य कीर्तनम्।
वामनस्य तु माहात्म्यं तथैवाथ वराहजम्॥ २५॥
क्षीरोद मथनं तद्वत् कालकूटाभि शासनम्॥ २६॥
प्रासाद लक्षणं तद्वन् मण्डपानान्तु लक्षणम्।
पुरुवंशे तु संप्रोक्तं भविष्य द्राजवर्णनम्॥ २७॥
तुलादानादि बहुशो महादानानु कीर्तनम्।
कल्पानु कीर्तनं तद्वद् ग्रन्थानु क्रमणी तथा॥ २८॥
एतत्पवित्र मायुष्य मेतत्कीर्ति विवर्धनम्।
एतत्पवित्रं कल्याणं महापापहरं शुभम्॥ २९॥

अस्मात् पुराणादपि पादमेकं
पठेत्तु यः सोऽपि विमुक्त पापः।
नारायणाख्यं पदमेति नून
मनङ्गवद्दिव्य सुखानि भुंक्ते॥ ३०॥

समाप्तं मत्स्यपुराणम्।